00056118

THE
ASIATIC SOCIETY OF BOMBAY
Town Hall, Bombay.

00056118

Digitized with financial assistance from
Shri Brihad Bhartiya Samaj
on 11 March, 2020

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PAṆḌITS OF THE BENARES SANSKṚIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH M. A.,

LATE DIRECTOR OF PUBLIC INSTRUCTION, N. W. P. & OUDH,

& G. THIBAUT PH. DR.,

PRINCIPAL, BENARES COLLEGE.

Nos. 8, 10, 18, 21, 26 & 31.

कात्यायनमहर्षिप्रणीतम् शुक्लयजुःप्रातिशाख्यम्।
उव्वटकृतभाष्ययुतम्।

प्रतिज्ञासूत्रं अनन्तदेवभाष्ययुतम्। त्रिकण्डिकाभाषिकसूत्रं तत्कृतभाष्यान्वितञ्च। जटाद्यष्टविकृतिलक्षणं सोदाहरणं सव्याख्यानम्। मूलमात्रं ऋग्यजुःपरिशिष्टसूत्रम्। तावन्मात्रं अनुवाकाध्यायपरिशिष्टसूत्रञ्च। शौनकोक्तं चरणव्यूहपरिशिष्ट[illegible]हिदासविवृत्तिसमेतम्।

श्रीकाशिकप्रधानपाठालय। [illegible]र्येन श्रीमिथिलामण्डलाधीशतो लब्धवैदुष्यप्रतिष्ठेन पाठकोपाह्वश्रीयुगलकिशोरशर्म्मणा निर्मितप्रातिशाख्यकीर्त्तिप्रकाशाख्यटिप्पण्या समेतम्।

KÁTYÁYANA'S PRÁTIŚÁKHYA OF THE WHITE YAJUR VEDA, WITH THE COMMENTARY OF UVAṬA;

THE PRATIJNÁ SÚTRAS WITH THE COMMENTARY OF ANANTADEVA; THE TRIKANDIKÁ BHÁSHIKA SÚTRAS ALSO WITH ANANTADEVA'S COMMENTARY; DEFINITIONS OF JAṬÁ &c. OR EIGHTFOLD PERMUTATIONS OF VAIDIK TEXT, WITH ILLUSTRATIONS AND COMMENTARY; THE PARIŚISHṬA SÚTRAS OF RIK & YAJUSH; THE PARIŚISHṬA SÚTRAS OF THE ANUVÁKÁDHYÁYA; AND ŚAUNAKA'S CHARAṆAVYÚHA PARIŚISHṬA SÚTRAS WITH THE EXPOSITION OF MAHIDÁSA.

EDITED BY PAṆḌIT YUGALKIŚORA PÁṬHAKA,

LATE SCHOLAR OF THE BENARES SANSKRIT COLLEGE.

56118

BENARES

56118

REGISTERED ACCORDING TO ACT XXV. OF 186

PRINTED AT THE BEN[illegible] [illegible]RINTING PRESS
BY CHHANN[illegible]

56118

श्रीः

विज्ञापनम्।

श्रीमद्विश्वेश्वरपालितायां परमपवित्रायां वाराणस्यां प्रत्यग्दि
छोटीपीयरीनामवीथिकावास्तव्यसरयूपारिणः पाठकोपाह्वपण्डि
नाथूरामशर्मणः प्रपौत्रेण, श्रीमद्रामफलपाठकस्य पौत्रेण, श्री
द्रामचन्द्रचरणाब्जसेवकव्यासोपाह्वश्रीमद्विश्वेश्वरपाठकस्य कनिष्ठ
सुतेन, विद्वद्वरमण्डलमण्डितेन, वेदशास्त्रसम्पन्नेन च श्रौतस्मार्तग्र
न्थाध्ययनाध्यापनशीलेन, वेदविद्याप्रदसारस्वतान्वयाबालब्रह्मचारि
श्रीमद्रामानन्दगुरुचरणारविन्दपादुकासेवकेन च, गवर्मेण्ट संस्था
पितराजकीयपाठालयाधीतविद्येन रामघट्टस्थबालूजीफरसाभिधसु
प्रसिद्धस्थानीयपुराणवाचकेन श्रीमद्दर्भङ्गानगराद्यनेकसुप्रतिष्ठधार्मि
कगोष्ठीगरिष्ठवैदिकधर्मानुयानवरिष्ठमहाराजेभ्यो लब्धवैदुष्यप्रति-
ष्ठेन च व्यासोपाह्वश्रीमद्युगलकिशोरपाठकेन श्रीमद्योगिवरयाज्ञव-
ल्क्यदत्तकपुत्रेण श्रीमत्कात्यायनप्रणीताष्टाध्याय्यात्मकं वज्रटसुतोव्व-
टकृतभाष्ययुतं शुक्लयजुर्वेदीयप्रातिशाख्यपुस्तकं सभाष्यप्रतिज्ञासू
त्रसभाष्यत्रिकण्डिकाभाषिकसूत्रजटापटलयजुःपरिशिष्टसूत्रा
काध्यायपरिशिष्टसूत्रैः समेतं महर्षिशौनकप्रणीतचरणव्यूह
ष्टसूत्रं महिदासकृतभाष्यसहितं पूर्वममुद्रितं वेदशास्त्रव्यु
विदुषां मैथिलाद्यनेकदेशीयछात्राणां च सौकर्यार्थं आधु
वैदिकस्वरवर्णोच्चारणपरिपाटीशोधनार्थं च आदर्शपञ्च
समवलम्ब्य विषयसूचनपत्रशुद्धाशुद्धपत्रान्वितं च श्रीम

...तमहाशयडाक्टरथिबोसाहिबानुमत्या १९४५ पञ्चचत्वारिं-
...त्तरैकोनविंशतिशततमवैक्रमाब्दीयसहमासावदातदलतिथितिथौ
...ाशितम् ॥ अत्र च प्रथमपुस्तकं मया १९१९ एकोनविंशत्युत्तरै-
...नविंशतिशततमवैक्रमाब्दीयं पण्डितेश्वरीदत्तत्रिपाठिहस्तलिखि-
...मतीवशुद्धं लब्धम् ॥ अपरं श्रीमद्गङ्गाधरपाठककनिष्ठापत्यश्रीगो-
...िनाथशास्त्रिहस्तादष्टनवत्युत्तराष्टादशशततम १८९८ वैक्रमाब्दीयं
...ाप्तम् ॥ तृतीयपुस्तकं गवर्मेण्टसंस्थापितराजकीयपाठशालीयसं-
...कृतपुस्तकालयस्थपण्डितवरश्रीमद्रमानाथशर्मणः करकमलात्प्रा-
...चीनं काश्मीरलिपिकृतमेकाशीत्युत्तराष्टादशशततम १८८१ वैक्र-
माब्दीयं गृहीतम् ॥ तुरीयं गौडशि उपाह्व श्रीप्रभाकरभट्टस्य हस्ता-
दतीवशुद्धं सटिप्पणं षडशीत्युत्तरसप्तदशशततम १७८६ शालिवाहन-
शाकाब्दीयम् ॥ पञ्चमपुस्तकं मन्मित्रवर्य्यवृन्दावननगरवास्तव्यवैया-
करणचमत्स्वर्गवासिनः श्रीसखालालशर्मणः कृपयाऽतीवप्राचीनं
शुद्धं ज्योत्स्नाख्यव्याख्यानयुतं वैदिकमानभञ्जिन्याख्यटिप्पण्यान्वितं
च षोडशोत्तराष्टादशशततम १८१६ वैक्रमब्दीयञ्चोपलब्धम् ॥ य-
दस्मिन्ग्रन्थे प्रमादेनान्यथा स्याच्छोधने ग्रन्थने च तद्बुद्धिमन्तः सम्य-
गध्ययनाध्यापनादिना प्रचारयन्तु कृपया शोधयन्तु चेति शम् ॥

अथ प्रातिशाख्यसूत्रप्रतिज्ञासूत्रभाषिकसूत्राणां विषयसूचनपत्रस्य अध्यायपृष्ठसूत्राङ्का लिख्यन्ते ॥

	अ०	पृ०	सू०
शुक्लयजुर्वेदीयमाध्यन्दिनशाखायां स्वरसंस्काराधिकारः	१	१	१
लौकिकवैदिकशब्दयोर्भेदः ...	१	१	२
शब्दोत्पत्तिकथनम्	१	५	६
वेदपठनादौ ओङ्काराद्यकारोच्चारणभेदः	१	८	१६
वेदपठनविधिः	१	९	२०
वर्णनिर्देशः उपधासंज्ञा ...	१	१४	३५
सवर्णसंज्ञा	१	१६	४३
सिम्संज्ञा	१	१६	४४
सन्ध्यक्षरसंज्ञा	१	१७	४५
भावीसंज्ञा	१	१८	४६
व्यञ्जनसंज्ञा	१	१८	४७
संयोगसंज्ञा	१	१८	४८
सङ्ख्यासंज्ञा	१	१८	४९
जित्संज्ञा	१	१९	५०
मुत्संज्ञा	१	१९	५२
धिसंज्ञा	२	१९	५३
सोष्मसंज्ञा	१	२०	५४
ह्रस्वसंज्ञा	१	२१	५५
दीर्घसंज्ञा	१	२२	५७
प्लुतसंज्ञा	१	२२	५८
अर्द्धमात्रासंज्ञा	१	२२	५९
अणुमात्रासंज्ञा	१	२२	६०
परमाणुमात्रासंज्ञा	१	२२	६१
स्थानाधिकारः	१	२३	६१

		अ०	पृ०	सू०
अन्तस्थात्प्रागुपधाऽनुनासिक्यम्	..	३	१८४	१३१
मकारस्य कार्यम्	...	३	१८६	१३४
तृतीयोऽध्यायः	..	३	१९८	१५२
अनुस्वारकार्यम्	..	४	१९८	१
सोपधानुनासिकम्	..	४	२०२	४
परसवर्णकार्यम्	...	४	२०४	१२
तकारस्य लकारकार्यम्	..	४	२०५	१३
ङनयोः कतकार्यम्	..	४	२०६	१५
स्वरभक्तिकार्यम्	..	४	२०७	१७
इतिकारागमः	..	४	२०८	१८
पदावृत्तिकार्यम्	..	४	२०९	२०
चकारागमकार्यम्	..	४	२१२	२५
ऊष्मान्तकार्यम्	..	४	११३	२७
स्वरान्तकार्यम्	..	४	२१५	२८
रिहिसर्गकार्यम्	..	४	२१०	३४
विसर्गस्य रेफकार्यम्	..	४	२२१	३६
कण्ठ्योपधविसर्गस्य यकारविधिः	..	४	२२१	३७
विसर्गलोपकार्यम्	..	४	२२२	३८
विसर्गस्यौकारकार्यम्	..	४	२२३	४२
भाव्यन्तस्य कार्यम्	..	४	२२५	४६
सन्ध्यक्षराणामयादिकार्यम्	..	४	२२६	४७
कण्ठ्यस्वरस्य ह्रस्वत्वम्	..	४	२२७	४९
पूर्वोत्तरयोरेकत्वम्	..	४	२२८	५०
सिम्वर्णस्य दीर्घत्वम्	..	२	२२८	५१
पूर्वापरयोरनुनासिकत्वम्	..	४	२२८	५२
एत्वौत्वकार्यम्	..	४	२२९	५३
एकादेशस्य निपातनत्वम्	..	३	२३०	५५
सन्ध्यक्षरयोरैत्वमौत्वं च	..	४	२३१	५७

	अ०	पृ०	सू०
ऋकारे आराल्कार्यम्	४	२३१	५९
अभिनिधानकार्यम्	४	२३२	६१
प्रकृतिभावत्वम्	४	२४९	८१
अपृक्तोकारस्य दीर्घानुनासिक्यम् ...	४	२५८	९२
तवर्गस्य चवर्गत्वम्	४	२५९	९५
शस्य छत्वम्	४	२६०	९७
उदःपरस्य लोपत्वम्	४	२६०	९७
अघ्वस्थे तकारत्वम्	४	२६१	९८
द्वित्वकार्यम्	४	२६१	९९
स्वराणां द्विमात्रिकत्वम्	४	२६१	१००
द्वितीयचतुर्थयोर्द्वित्वम्	४	२६८	१०७
द्वित्वनिषेधकार्यम्	४	२६९	१०८
पञ्चमस्य तृतीयत्वम्	४	२७०	१०९
अपञ्चमस्य प्रथमत्वम्	४	२७५	११९
अपञ्चमस्य द्वितीयत्वम्	४	२७६	११९
अपञ्चमस्य पञ्चमत्वम्	४	२७७	
हस्य पूर्वचतुर्थत्वम्	४	२७७	
यवयोर्लोपकार्यम्	४	२७९	१२५
नवकारलोपः	४	२८०	१२५
प्रयुगमितियलोपो वा	४	२८१	१२८
स्वराणामेकीभावत्वम्	४	२८२	१३०
परत्वादुदात्तस्य बलवत्वम्	४	२८३	१३३
उदात्तादनुदात्तस्य स्वरितत्वम् ...	४	२८६	१३५
उदात्तस्वरपरेऽनुदात्तत्वम्	४	२८७	१३६
स्वरितस्य नीचीकरणम्	४	२८८	१३८
प्रचयस्वरत्वम्	४	२८९	१३९
उदात्तमयस्य निषेधः	४	२९०	१४१
द्विवर्णमेकवर्णत्वम्	४	२९०	१४२
एकारौकारयोरेकवत्वम्	४	२९१	१४३

	अ०	पृ०	सू०
ऋऌयोर्ढत्वम्	४	२८२	१४४
द्विसकारत्वम्	४	२८२	१४५
ऋलोरत्वलत्वम्	४	२८४	१४८
ह्रस्वपूर्वकानुस्वारस्याध्यर्धमात्रिकत्वम्	४	२८४	१४९
दीर्घप्रागनुस्वारस्यार्धमात्रिकत्वम् ...	४	२८५	१५०
द्वियकाराधिकारः	४	२८६	१५२
एकयकाराधिकारः	४	२८८	१५७
एकयकारनिषेधः	४	३०२	१६१
यमवर्णापत्तिः	४	३०३	१६२
यमापत्तिर्दोषः	४	३०४	१६३
स्फोटनं दोषः	४	३०५	१६४
जकारस्य यकारो वा	४	३०६	१६६
सङ्क्रमाधिकारः	४	३१६	१७८
क्रमप्रयोजनम्	४	३१८	१८२
क्रमलक्षणम्	४	३१९	१८३
त्रिक्रमलक्षणम्	४	३२०	१८५
चतुष्क्रमलक्षणम्	४	३२२	१८८
स्थितोपस्थितप्रकारः	४	३२६	१९५
क्रमसन्धानानि	४	३२७	१९५
चतुर्थोध्यायः			
अवग्रहलक्षणम्	५	३२८	१
अवग्रहनिषेधः	५	३४४	१
पंचमोऽध्यायः			
आख्यातादीनामनुदात्तादिविशेषस्वराधिकारः	६	३६३	१
उपसर्गस्वरकथनम्	६	३६४	२
आख्यातस्वराभिधानम्	६	३७०	११
द्विसर्गाधिकारः	६	३७६	२५
त्रिसर्गविधानम्	६	३८०	२९
ङकारद्वयकार्यम्	६	३८१	३०

	अ०	पृ०	सू०
षष्ठोऽध्यायः			
अवसानमितिकारेण स्वराणाम् ...	७	३८२	८
भाव्युपधारिहिसर्गयोरेफि, सन्धिः ...	७	३८५	९
प्रथमवर्णास्तृतीयेनावसानम् ...	७	३८६	१०
उत्तमवर्णाः पञ्चमेनेतिपदेन सहावसानम्	७	३८६	११
इतिसप्तमोऽध्यायः			
वर्णसमाम्नायसूत्रम्	८	३८७	१
स्वरा व्याख्याताः	८	३८७	२
सन्ध्यक्षराणि व्याख्यातानि	८	३८८	३
अथ व्यञ्जनानि व्याख्यातानि ...	८	३८८	४
स्पर्शा व्याख्याताः	८	३८८	५
अन्तस्था व्याख्याताः	८	३८९	६
ऊष्माणो व्याख्याताः	८	३८९	७
अथायोगवाहा व्याख्याताः	८	३८९	८
जिह्वामूलीयो व्याख्यातः	८	३८९	९
उपध्मानीयो व्याख्यातः	८	३८९	१०
अनुस्वारो व्याख्यातः	८	३८९	११
विसर्जनीयो व्याख्यातः	८	३८९	१२
हुँ इति नासिक्यो व्याख्यातः ...	८	३९०	१३
यमा व्याख्याताः	८	३९०	१४
एते पञ्चषष्टिवर्णा व्याख्याताः ...	८	३९०	१५
वेदाध्ययनविधिः	८	३९१	१७
अन्यतोऽर्थतस्य वेदफलमाह	८	३९१	१८
वर्णसमाम्नायवर्णा जिह्वामूलीयाद्या माध्यन्दिनानां नेष्यन्ते	८	३९२	२९
वर्णदेवता व्याख्याताः	८	३९४	३१
अक्षरसंज्ञा व्याख्याताः	८	३९५	३९
पदसंज्ञा व्याख्याताः	८	३९६	४१
पदस्य चतुर्भेदो व्याख्यातः	८	३९६	४३

	अ०	पृ०	सू०
अथ पदगीता व्याख्याता:	८	३९९	४९
पददेवता व्याख्याता:	८	३९९	५०
स्वरसंस्कारप्रशंसा व्याख्याता ...	८	४००	५४
अष्टमोऽध्याय: समाप्त: ...	८	४०१	
	क०	पृ०	सू०
मन्त्रब्राह्मणयोर्वेदत्वम्	१	४०२	२
स्वरप्रक्रियाकथनम्	१	४०४	३
अनुदात्तो व्याख्यात:	१	४०८	४
उदात्तो व्याख्यात:	१	४०९	५
स्वरितो व्याख्यात:	१	४०९	६
जात्यादय: कथिता:	१	४१०	७
ब्राह्मणे तूदात्तानुदात्तौ	१	४१२	८
सूत्राणि तानस्वराणि व्याख्यातानि ...	१	४१३	९
अन्तस्थप्रकारोच्चारणविधानम् । ...	२	४१४	१
द्वित्वयकारोऽप्येवम्	२	४१८	२
अन्तस्थरकारोच्चारणविधि:	२	४१९	३
तृतीयान्तस्थस्य विधि:	२	४२१	४
ऋकारस्य एकारसदृशोच्चारणविधि: ...	२	४२२	५
वकारोच्चारणप्रकारस्त्रिधा	२	४२३	६
षकारोच्चारणप्रकार: ।	२	४२३	७
अध्ययनादिकर्मसूच्चारणविधि: ...	२	४२५	८
अनुस्वारस्य ऽ॑कारादेश:	३	४२६	१
ऽ॑ कारस्य त्रैविध्यप्रकार:	३	४२६	२
परसवर्णस्य ईषत्प्रकृत्योच्चारणम् ...	३	४२८	३
विसर्गस्येषद्विरति:	३	४२९	४
संयुक्तस्य अकारस्येषद्दीर्घता	३	४३०	५
अथ भाषिकपरिशिष्टे ब्राह्मणस्वरसंस्कारनियम:	१	४३२	१
मन्त्रस्वरो निरूपित:	१	४३३	२
ब्राह्मणे स्वरलक्षणम्	१	४३३	३

	का०	पृ०	सू०
उदात्तानुदात्तयोर्भाषिकसञ्ज्ञा	१	४३४	४
अनुदात्तोदात्तयोः पूर्वमिकादेशः	१	४३५	५
आप्रपूर्वआख्यातपरो न भाषिकसंज्ञा	१	४३५	६
समासाख्यातपरो न भाषिकस्वरः	१	४३७	७
अपूर्वसमासो न भाषिकस्वरः	१	४३८	८
जात्याभिनिहितक्षैप्रप्रश्लिष्टानां भाषिकसञ्ज्ञा	१	४३८	९
उदात्तादीनां भाषिकसञ्ज्ञा	१	४४०	१०
ओंकारस्य भाषिकसञ्ज्ञा	१	४४०	११
भाषिकसञ्ज्ञकानामुदात्तविधानम्	१	४४१	१२
स्वरितानुदात्तयोरुदात्तत्वम्	१	४४१	१३
उदात्तस्यानुदात्तविधानम्	१	४४२	१४
अन्तोदात्तस्यानुदात्तम्	१	४४३	१५
भाषिकेपरे उदात्तानुदात्तयोरनुदात्तम्	१	४४३	१६
स्वरितस्य भाषिके परेऽनुदात्तादेशत्वम्	१	४४४	१७
भाषिकस्य स्वरितस्याभिनिहितत्वम् ।	१	४४५	१८
अनुदात्तानां कम्पनत्वविधानम्	१	४४६	१९
भाषिके परेऽनुदात्तस्य कम्पनत्वम्	१	४४६	२०
उदात्तपूर्वस्य स्वरितस्य भाषिकपरे कम्पनत्वम्	१	४४७	२१
मुख्यमतेऽन्त्योदात्तस्यानुदात्तत्वम्	१	४४७	२२
आख्यातपदानां स्वरविकाराः	२	४४९	१
अर्थाख्यातविकारः	२	४४९	२
पदाद्याख्यातविकारः	२	४४९	३
हिशब्दपराख्यातविकारः	२	४५०	४
हन्तपदाख्यातविकारः	२	४५०	५
नेत्पराख्यातविकारः	२	४५०	६
कुवित्पराख्यातविकारः	२	४५१	७
अहःपराख्यातविकारः	२	४५१	८
चपदात्परआख्यातविकारः	२	४५१	९
आमन्त्रितसस्वरपराख्यातविकारः	२	४५२	१०

	कां०	पृ०	सू०
जिज्ञासिताख्यातविकारः	२	४५२	११
विचारिताख्यातविकारः	२	४५३	१२
अवधारणार्थाख्यातविकारः	२	४५३	१३
यद्योगाख्यातविकारः	२	४५३	१४
विनियोगार्थाख्यातविकारः	२	४५४	१५
वाक्यशेषाख्यातविकारः	२	४५४	१६
अनुबन्धात्पराख्यातविकारः	२	४५५	१७
आषोडशाक्षरादाख्यातविकारः ...	२	४५५	१८
आपञ्चविंशाक्षराख्यातविकारः ...	२	४१६	१९
आद्वात्रिंशाक्षरादाख्यातविकारः ...	२	४५६	२०
आमर्यादाख्याख्यातपदविकारः ...	२	४५७	२१
विनियोगार्थकाख्यातविकारः ...	३	४५८	१
जिज्ञासितयोः पूर्वाख्यातविकारः ...	३	४५८	२
अन्यजातीययोः पूर्वाख्यातविकारः ...	३	४५९	३
विकारितसमुच्चयोः पूर्वपदविकारः ...	३	४५९	४
निर्वचनानुबन्धाख्यातपदस्य न विकारः	३	४६०	५
भूयोवाद्यादिपदादाख्यातस्य न विकारः	३	४६१	६
समान्यर्थसमीपस्थानामाख्यातानां न विकारः	३	४६२	७
स्वराद्ययोरल्पतरस्य स्वरस्य प्रकृतिभावः	३	४६२	८
स्वरादिसमभाक्ययोर्यमपदयोर्न प्रकृतिभावः	३	४६३	९
नामाख्यातादीनां ब्राह्मणे स्वरविपर्यासः	३	४६४	१०
कण्ठ्यदीर्घह्रस्वस्वरयोरक्रवर्णौ ...	३	४६४	११
पदान्तीयवकारलोपो ब्राह्मणे ...	३	४६५	१२
अन्यत्पदं पाणिनीयव्याकरणात्सिद्धम् ...	३	४६६	१३
अकारादीनां लृपर्यन्तानां स्वराणां अल्पवद्विधानम्	३	४६६	१३
शतपथब्राह्मणस्वरवत्ताविभाजविनां ब्राह्मणस्वरः	३	४६७	१५
यजुर्वेदे ऽपि सप्तस्वरा भवन्ति ...	३	४६७	१६

	कं०	पृ०	सू०
सप्तस्वराणामुत्पत्तिस्थानानि ...	३	४६८	१७
चरकाणां मन्द्रस्वरवद्ब्राह्मणस्वरो भवति	३	४६९	२५
खाण्डिकेयौखीयानां शाखिनां चातुःस्वर्यम्	३	४६९	२६
आश्वलायनादीनां तानस्वरो भवति ...	३	४६९	२७
अङ्गोपाङ्गानां तानस्वरो भवति ...	३	४७०	२८

	का०	पृ०	सू०
अष्टविकृतीनां लक्षणानि	१	४७१	१
अष्टविकृतीनां पाठे फलानि ...	१	४७१	१
जटालक्षणं सोदाहरणम् ...	२	४७२	२
जटानिषेधलक्षणम्	२	४७२	२
जटायां पञ्चसन्धयः सोदाहरणाः ...	३	४७३	३
स्थितोपस्थिते ये विधयस्ते व्युत्क्रमे न पठनीयाः	४	४७३	४
विश्पतीव वर्ज्यम्	४	४७५	४
विकल्पविषयसन्धौ पाणिनीयव्याकरणं प्रमाणम्	५	४७५	५
अनुक्रमसङ्क्रमयोः सन्धौ स्वरेषु प्रतिशाख्यं प्रमाणम्	५	४७८	५
सवर्णे स्वरे परेऽपृक्तोकारस्य वत्वविधानम्	६	४८०	५
सन्धिकारकसूत्रेण वर्णान्तरेणैकेन			
उकारः प्रगृह्यः	६	४८१	५
निपातौकारस्य प्रगृह्यसञ्ज्ञा भवति ...	७	४८२	५
सपूर्वाकारऽओङ्कार ओभावत्वं याति ...	७	४८२	५
अयं सर्वासु विकृतिषु शास्त्रार्थो बोध्यः	८	४८३	६
अथ पुष्पमालालक्षणम्	८	४८३	६
अथ क्रममालालक्षणम्	९	४८४	६
अथ शिखालक्षणम्	१०	४८५	१
अथ रेखालक्षणम्	१०	४८५	१२
अथ ध्वजलक्षणम्	११	४८६	७
अथ क्रमदण्डलक्षणम्	१२	४८७	३

	का०	पृ०	सू०
अथ रथलक्षणम् … …	१३	४८८	७
अथ द्विविधघनलक्षणम् … …	१४	४९१	१२
अथ द्वितीयघनलक्षणम् … …	१५	४९२	७
अथ ऋग्यजुःपरिशिष्टसूत्रम् … …	१५	४९४	३
अथानुवाकाध्यायपरिशिष्टसूत्रम् …	३	५०१	५
अथ शौनकोक्तचरणव्यूहसूत्रम् …	१	१	१
चतुर्वेदसूत्रम् … …	१	५	२
ऋग्वेदस्याष्टौ स्थानानि … …	१	७	४
अष्टविकृतीनां लक्षणानि भाष्ये …	१	८	६
ऋग्वेदीयपञ्चशाखाः … …	१	१०	७
चतुष्षष्टिरध्याया अष्टौ मण्डलानि …	१	१२	९
अथ भाष्ये वेदपारायणविधिः … …	१	२३	१०
अथ यजुर्वेदस्य शाखाङ्गोपाङ्गाष्टादशपरिशिष्टानि … …	२	२७	१
अथ महार्णवोक्तदेशभेदेन शाखाभेदः …	२	३३	२
भागवतोक्तकृष्णशुक्लवेदोत्पत्तिर्भाष्ये …	२	३३	२
अथ सामवेदखण्डव्याख्या. … …	३	४३	३
अथाथर्ववेदखण्डव्याख्या … …	४	५३	४
अथ चतुर्वेदस्वरूपम् चरणव्यूहफलंच …	५	५४	१
अथ टिप्पण्यां वेदोपवेदाङ्गोपाङ्गादीनां हेमाद्र्युक्तलक्षणानि … …		५५	
अथ भाष्यकर्तृटिप्पणीकर्तृपद्यानि …		५९	

इति प्रातिशाख्यादिग्रन्थविषयसूचीपत्रं समाप्तम् ॥

शुक्लयजुःप्रातिशाख्यम् ।

उव्वटकृतभाष्यसहितम् ॥

श्रीगणेशाय नमः ।

यस्य मुक्तावलिः कण्ठे स्रुतदानाम्बुपूरिते ।
भाति रुद्राक्षमालेव स वः पायाद् गणाधिपः ॥ १ ॥
प्रणम्य परमात्मानं व्याख्यास्ये प्रातिशाख्यकम् ।
सरस्वतीं च जगतस्तमोनाशनदीपिकाम् ॥ २ ॥
जपादौ नाधिकारोऽस्ति सम्यक्पाठमजानतः ।
प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये (१) ॥ ३ ॥

स्वरसंस्कारयोश्छन्दसि नियमः ॥ १ ॥

स्वर उदात्तानुदात्तस्वरितप्रचितलक्षणः । संस्कारो लोपागमवर्णविकारप्रकृतिभावलक्षणः । तयोः स्वरसंस्कारयोः छन्दसि विषये नियमोऽधिकृतो वेदितव्यः । प्रतिज्ञासूत्रमेतत् प्रतिज्ञा च शिष्यबुद्धिसमाधानार्था ॥

लौकिकानामर्थपूर्वकत्वात् (२) ॥ २ ॥

लोके विदिता लौकिकाः लौकिकानां शब्दानामर्थपूर्वकत्वात्प्रयोजनपूर्वकत्वादस्मिन् शास्त्रे नियमो न

---

(१) केचिदिदं पद्यं मूले पठन्ति ॥

(२) उत्तरसूत्रावस्थितनकारः काकाक्षिवदत्र सम्बध्यते । लौकिकानां शब्दानां

क्रियते कथं प्रयोजनपूर्वकत्वम् कथं प्रयोजनपूर्वकाणां शब्दानां नियमो न क्रियते आह देवदत्त गामभ्याज शुक्लां दण्डेनेति यस्य पुरुषस्य देवदत्तकर्तृका गोत्वजात्युपलक्षितशुक्लद्रव्यकर्मिका दण्डकरणिका ऽभ्याजनक्रिया ऽभिप्रेता स एवैतद्वाक्यं ब्रवीति । न तत्सर्वः (१) अतो ऽर्थपूर्वकत्वं लौकिकानां शब्दानाम् अर्थपूर्वकत्वे सत्यर्थाभावे नोच्चारणं लौकिकानां शब्दानां, छन्दसि पुनरहरहः स्वाध्यायमधीयीतेति श्रुतिचोदनात् अतः सदाकालं छान्दसानां शब्दानामभ्यासः श्रुत्या विधीयते पुरुषस्याभ्युदयार्थम् अतस्तद्विषय एव स्वरसंस्कारयोर्न्नियम आरभ्यते न लौकिकानामर्थपूर्वकत्वात् ॥

न समत्वात् ॥ ३ ॥

नकारः प्रतिषेधवाच्युभयत्र सम्बध्यते काकाक्षिवत् न चैतद् यद्वैदिकानां शब्दानां स्वरसंस्कारनियमोऽभ्युदयहेतुः किं तर्हि लौकिकानामपि नियमो ऽभ्युदयहेतुरेव कुतः समत्वात् तुल्यत्वाच्छब्दानां यएव वैदिकास्तएव लौकिकास्त एव तेषामर्था इति अतो यदुक्तं वैदिकानामेव स्वरसंस्करणमभ्युदयहेतुरित्येतन्न समत्वात्(२)॥

अर्थबोधनार्थं प्रयोगात्तत्तदनुसारिप्रकृतिप्रत्ययकल्पनया व्याकरणानुसारेण स्वरसंस्कारवर्णानिर्णयः । छन्दसस्तु अपौरुषेयत्वाद्यथोच्चारितं तस्यैव स्वरवर्णस्य च साधुत्वं कल्पनीयम् । तदर्थमिदं प्रातिशाख्यम् । प्रातिशाख्यशब्दस्य व्युत्पत्तिमग्रे वादिष्यामि ॥

(१) न सर्वतः । इति 'क' 'ख' पुस्तके पाठः ॥

(२) साधूनेव प्रयुञ्जीत नासाधूनिति । एकः शब्दः सम्यगुच्चारितः स्वर्गे लोके

स्याद्वाम्नायधर्मित्वाच्छन्दसि नियमः ॥ ४ ॥

आम्नायो वेदस्तस्य धर्म आम्नायधर्मः आम्नायधर्मो विद्यते यस्य शब्दग्रामस्य स आम्नायधर्मी तस्य भाव आम्नायधर्मित्वम् तस्मादाम्नायधर्मित्वात् भवेद्वा छन्दसि शब्दानां स्वरसंस्कारनियमो ऽभ्युदयाय महते स्याच्छन्दसि नियमो महोदयः कतमत्तदाम्नायधर्मित्वं नाम आह आम्नायः क्रियार्थो यज्ञार्थश्च । तद्यथा ब्राह्मणं विध्यर्थवादरूपम् मन्त्रस्तु कर्माङ्गभूतद्रव्यदेवतास्मारकः मन्त्रेण स्मृतं कर्म कर्तव्यमिति नियमार्थं वचनम् मन्त्रस्तु यदि मनागपि स्वरतो वर्णतो वा हीनो भवति अथ कर्मासमृद्धिः न केवलं कर्मासमृद्धिः किन्तर्हि दुरिष्टहेतुः प्रत्यवायः स्यात् । उक्तं च मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधादिति दुष्प्रयुक्तमन्त्रविषयो निन्दार्थवादः तथा स्वाध्यायविषयः फलार्थवादो भवति घृतकुल्यामधुकुल्याः पितॄन्स्वधा अभिवहन्तीति न तु लौकिकशब्दविषयमिदं (१) किञ्चिदुपलभ्यते अतः स्वरसं-

---

कामधुग् भवति इति भाष्यकारोक्तेश्च यएव वैदिकास्तएव लौकिकास्तएव तेषामर्था इति अन्यथा पाणिन्यादिप्रणयनं व्यर्थमिव स्यादिति ।

(१) मीदृक् इति 'ख' 'ग' पुस्तके पाठः ।

स्कारयोश्छन्दसि नियमो महोदय इति (१) ॥

यत्तन्न (२) ॥ ५ ॥

एवं स्वरसंस्कारौ छन्दसि विषये प्रतिज्ञातौ छन्दोविषये महोदयफलावित्यवधार्य, अधुना शब्दस्वरूपजिज्ञापयिषयेदमाह । यत् न ज्ञायते शब्दस्य कारणभूतं तद्व वक्ष्याम इति सूत्रशेषः ॥

---

(१) वा शब्दः पूर्वोक्तसमनियमत्वनिरासनेन निर्द्धारणार्थः ।

मन्त्रब्राह्मणात्मको यो वेदः सो ऽपि विध्यर्थवादमन्त्रनामधेयभेदैश्चतुर्विधो यज्ञादिक्रियार्थः । विधिस्तु प्रवर्त्तनात्मकः यावज्जीवमग्निहोत्रञ्जुहुयादिति । अग्न्यादिविधिस्तावकः प्ररोचनाविशेषजनकः । ब्रह्मवर्चसीहैव भवति य एवं विद्वानग्निहोत्रं जुहोतीत्यादि । मन्त्रस्तु कर्म्माङ्गभूतद्रव्यदेवतादिस्मारकः । मन्त्रेण स्मृतं कर्म्म कर्त्तव्यमिति नियमार्थं वचनम् । मन्त्रान्तैः कर्म्मादिः सन्निपात्यो ऽभिधानादिति । नामधेयन्तु गुणफलोपबन्धार्थं वेदः । अग्निहोत्रं जुहोतीत्यादि । एवं चतुर्विधस्याम्नायस्य धर्म्मः । अहरहः स्वाध्यायमधीयीत । तस्मात् स्वाध्यायोऽध्येतव्य इत्यादि । घृतकुल्यामधुकुल्याः पितॄन्त्स्वधाऽभिवहन्ति । प्रज्ञावृद्धियशोलोकपङ्क्तिरित्याद्यभ्युदयहेतुफलार्थवादो भवति । अति ह वै पुनर्मृत्युमुच्यते गच्छति ब्रह्मणः सात्मतामित्युपक्रम्य तथाभूतेभ्यो न हीयत इत्यादि दुरिष्टहेतुः प्रत्यवायपरिहारो ऽपि भवतीत्याहस्म वेदः । तथा वर्णतः स्वरतो युक्तो महते ऽभ्युदयायेत्याह । तस्य हैतस्य साम्नो यो वेदो भवति ह्रास्यत्वं तस्य वै स्वरएव स्वमित्युपक्रम्य भवति ह्रास्यत्वमित्यादि । यथा वेद उक्तवान् उक्तोऽन्यद्वां कर्म्मोकृतामित्यादि तद्वास्यां ततः क्षियतएवेति । तथा यन्ति वा आपएत्यादित्यएति चन्द्रमायन्ति नक्षत्राणि यथा ह वा एता देवता नेयुर्नकुर्य्युरेवर्ठ. हैव तदहर्ब्राह्मणो भवति यदहः स्वाध्यायन्नाधीते तस्मात् स्वाध्वायन्नाधीते तस्मात् स्वाध्यायोऽध्येतव्यस्तस्मादप्यृचं वा यजुर्वा साम वा गाथां वा कुंव्यां वा भिव्याहरेद्व्रतस्याव्यवच्छेदायेति दुरिष्टपरिहारः ।

(२) वर्णात्मकश्छन्दस्तु स्वरसंस्कारनियमविधानाद् वर्णवच्छब्दकारणमुपक्रमते । पुनराधीयते न च व्याख्यायते यत् न ज्ञायते पृथिव्यादिभिश्चक्षुरादिभिः स चात्मा तत्प्रभवं च खं च ज्ञेयम् एतस्मादात्मन आकाशः सम्भूत इति श्रुतेः ।

वायुः खात् ॥ ६ ॥

वायुः कारणभूतः शब्दस्य स च खादाकाशादुत्पद्यते ॥

शब्दस्तत् (१) ॥ ७ ॥

शब्दस्तदात्मको वाय्वात्मक इत्यर्थः ॥

सङ्करोप (२) ॥ ८ ॥

यदि वाय्वात्मकः शब्दः वायोः सर्वगतत्वात् सदाकालं सर्वत्रोपलब्धिः प्राप्नोतीत्याशङ्क्याह । संकरोपेति । सम्यक्करणैरुपहितो हृदि वायुर्वेणुशङ्खादिभिः शब्दीभवति (३) ॥

ससङ्घातादीन् वाक् ॥ ९ ॥

यो वायुः सम्यक्करणैरुपहितो वेणुशङ्खादिभिः शब्दीभवति स एव सङ्घातादीन् प्राप्य वाग् भवति सङ्घातः पुरुषप्रयत्नः स आदौ येषां स्थानादीनां ते सङ्घातादयः

---

(१) तदिति प्रातिपादिकं सारूप्ये । यथाह याज्ञवल्क्यः । सर्गादौ तु यथाकाशं वायुं ज्योतिर्जलं महीम् । सृजत्येकोत्तरगुणांस्तथादत्ते भवन्नपीति । वायोर्गुणद्वयत्वाद्गुणगुणिनोरभेदेन सारूप्येण शब्दात्मको वायुरित्यर्थः ।

(२) सङ्करोपहितः इति 'ग' 'घ' पुस्तकपाठः ।

(३) उक्तं च पाणिनिना । आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरमिति ॥

तान् प्राप्य वाग्भवति वर्णो भवतीत्यर्थः (१) ॥

त्रीणि स्थानानि ॥१०॥

सङ्घातः पुरुषप्रयत्न इत्युक्तम् । अधुना सङ्घात आदिभूतो येषां स्थानादीनां तान्युच्यन्ते त्रीणि स्थानानि वायोर्भवन्ति उरःकण्ठशिरआत्मकानि शरीरे ॥

द्वे करणे ॥११॥

संवृतविवृताख्ये वायोर्भवतः ॥

शरीरात् ॥ १२ ॥

ये एते करणे संवृतविवृताख्ये यानि च त्रीणि स्था-

---

(१) सा वाक् चतुर्द्धा । ऐन्द्रवायवग्रहब्राणे उक्तम् । मनुष्यपशुपक्षिक्षुद्रसरीसृपेषु तुरीयभागेनावस्थिता परा पश्यन्ती मध्यमा वैखरीति । तथा च श्रुतिः । शतपथब्राह्मणे ४ काण्डे १ प्रपाठके ३ ब्राह्मणे । वाग्घवा अस्यैन्द्रवायव इत्युपक्रम्य तौ प्रजापतिं प्रतिप्रश्नएवेति च तुरीयमेव भाजया चकारेत्याधिकृत्य तदेतत्तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्त्यथैतत्तुरीयं वाचो निरुक्तं यत्पशवो वदन्त्यथैतत्तुरीयं वाचो निरुक्तं यद्वयांꣳसि वदन्त्यथैतत्तुरीयं वाचो निरुक्तं यदिदं क्षुद्रꣳ सरीसृपन्तस्मादेतदृषिणाऽभ्यनूक्तम् ॥ चत्वारि वाक्परिमितापदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥ गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ अथैतासां लक्षणानि ॥ वैखरी शब्दनिष्पत्तिर्ध्वनिरूपा तु मध्यमा । पश्यन्ती ज्ञानरूपा च वाग्विशुद्धा परा स्मृता इति यथा । या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्ठिवर्णानान्तःकरणसदनैः प्राणसङ्गप्रसूती । तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये । सो दीर्णो मूर्द्धन्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः । स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः । इति वर्णविदः प्राहुर्निपुणं तन्निबोधत इति पाणिनिः ॥

नानि शरीराद्वायोर्निर्गच्छतस्तानि भवन्ति यानि पुनरुपरिष्टाद्वक्ष्यति स्थानकरणानि तानि मुखस्थानानि अत एवमाह शरीरादिति ॥

शरीरम् ॥ १३ ॥

एवमेतेन प्रकारेण शरीराद्वायुर्निर्गच्छन् कादिवर्णविशेषव्यक्तिमापद्यते ॥

शरीरे ॥ १४ ॥

किं शरीराद्वायुर्निर्गच्छन्मात्रात्कादिवर्णविशेषव्यक्तिमापद्यते नेत्याह शरीरे शरीरैकदेशे मुखे प्राप्तो वायुस्तात्वादिस्थानेषु निषक्तः करणेन विशेषव्यक्तिरूपेण वर्णत्वमापद्यते ॥

तेषाᳯं समूहात् स उदयँस्त्रैकाल्यम् ॥ १५ ॥

तेषां स्थानकरणप्रयत्नानां सम्बन्धिनः समूहात् स उदयन् वायुरुद्गच्छन् त्रैकाल्यमभिधत्ते त्रयः कालाः समाहृताः त्रिकालम् त्रिकालमेव त्रैकाल्यं स्वार्थे ष्यञ् । त्रिकालसम्बद्धमर्थजाते भवद्भूतभविष्यत्सम्बद्धमर्थजातम् । वायुर्वर्णीभूतः पदवाक्यैरभिधत्ते त्रिकालसम्बद्धस्यार्थजातस्य वायुः शब्दरूपेण प्रकाशको भवतीत्यर्थः । वायोरियं विभूतिर्या त्रयी विद्येति ॥

ओङ्कारः स्वाध्यायादौ ॥ १६ ॥

यत्तन्नेत्येवमादिना वायुः पदवाक्यरूपेण सर्वं प्रकाशयतीत्युक्तम्। अधुना स्वाध्यायविधिरुच्यते ओङ्कारः स्वाध्यायादौ कर्त्तव्य इति सूत्रशेषः। तथा चाह मनुः ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा। स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यते इति (१) ॥

ओङ्काराथकारौ ॥ १७ ॥

ओङ्कारोच्चारणं स्वाध्यायादौ प्रतिज्ञातमेव तत्तुल्यफलोऽथशब्दोऽपीति सूत्रार्थः। तथा चोक्तम्। ओङ्कारश्चाथकारश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेनेमौ मङ्गलावुभौ (२) ॥

ओङ्कारं वेदेषु ॥ १८ ॥

एवमधस्तनसूत्रेण ओङ्काराथशब्दयोः स्वाध्यायादावविशेषेणोच्चारणमुक्त्वाऽनेन सूत्रेण व्यवस्था क्रियते ओङ्कारं वेदेषु प्रयुञ्जीतेति सूत्रशेषः ॥

अथकारं भाष्येषु ॥ १९ ॥

भाष्येषु ग्रन्थेषु अथकारं प्रयुञ्जीतेति सूत्रशेषः (३) ॥

---

(१) शिक्षायां याज्ञवल्क्यो ऽपि। प्रणवं प्राक् प्रयुञ्जीत व्याहृतिस्तदनन्तरम्। सावित्रीं चानुपूर्व्येण ततो वेदं समारभेत् इति।

(२) विनिष्क्रान्तौ तस्मान्माङ्गलिकावुभौ इति 'ग' 'घ' पुस्तके पाठः।

(३) वैदिको ऽर्थो भाष्यते येषु कल्पसूत्रादिषु तेष्वथशब्दं प्रयुञ्जीतेति।

प्रयतः ॥ २० ॥

प्रयतः शुचिरुच्यते पादशौचाचमनादिना शुचिरधीयीतेत्यर्थः (१) ॥

शुचौ ॥ २१ ॥

शुचौ विविक्तदेशेऽधीयीत । उक्तञ्च । द्वावेव वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः । स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥

इष्टम् ॥ २२ ॥

अभिरुचितमासनमासीनः (२) ॥

ऋतुं प्राप्य ॥ २३ ॥

हेमन्तमृतुं प्राप्य रात्र्याश्चतुर्थप्रहरेऽधीयीत (३) ॥

योजनान्न परम् ॥ २४ ॥

अधीयानो योजनात् परमध्वानं न गच्छेत् (४) ॥

(१) प्राथमिकाष्टमिकाभ्यां सूत्राभ्यामन्तर्बहिश्चाचमनदर्भपाण्यादिना शुचिरधीयीतेत्युच्यते ।

(२) मासीत इति 'घ' पुस्तकपाठः ।

(३) प्रथमेऽपि यामेऽध्ययनं कुर्वीत तदुक्तं याज्ञवल्क्येन । रात्रेः पूर्वोत्तरौ यामौ वेदाभ्यासेन यो नयेत् । यामद्वयशयानश्च ब्रह्मभूयाय कल्पते । हयानामिव जात्यानामर्द्धरात्रार्द्धशायिनाम् । नहि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति ॥

(४) अत्र कश्चिद् अध्ययनं कुर्वन् योजनात्परमध्वानं न गच्छेदिति वदन् योज-

भोजनं मधुरं स्निग्धम् ॥ २५ ॥

मधुररसप्रायं घृतप्रायं चान्नं(१)भुञ्जीत ॥

वर्णदोषविवेकार्थम् ॥ २६ ॥

अकारादयो वर्णाः तेषां दोषाः तेषां विवेचनाय नानाकरणाय तद्यथा त्रिमात्रिकस्य स्वरस्य द्विमात्रता द्विमात्रिकस्य मात्राकालता अनुनासिकस्य स्वरस्यैकदेशरङ्गता यथा महाँइन्द्रइति तथा व्यञ्जनानामनेकप्रकारा दोषाः संभवन्ति अयमपि वक्ष्यति ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोष इति ॥

तिङ्कृत्तद्धितचतुष्टयसमासाः

नपर्यन्तं मध्ये मार्गे पठेदित्याह तन्न यदि ह वा अप्यभुक्तोऽलङ्कृतः सुहितः सुखे शयने शयानः स्वाध्यायमधीयीत । आहैव सनखाग्रेभ्यस्तप्यत इति श्रुतावध्ययनस्यागममादर्शनात् । कूर्म्मपुराणे । नोच्छिष्टः संवसेन्नित्यं न नग्नः स्नानमाचरेत् । न गच्छन्वै पठेद्वापि न चैव स्वशिरः स्पृशेत् । तथा भविष्योत्तरपुराणीयशिवरात्रिकथायां मृगसंवादे शतपथब्राह्मणेषु चास्यार्थस्योक्तत्वात् । यः पठेत्स्वरहीनं तु लक्षणेन विवर्जितम् । रथ्यां च सञ्चरन्विप्रो वेदमुद्गीरयेत्तथा । विप्रस्य पठनं क्वापि शृणोति तावतान्त्यजः । तेन पापेन लिप्यामि यदि नायामि ते गृहमिति ॥

(१) वान्नमिति 'घ' पुस्तकपाठः । भोजनपरिमाणं चाह याज्ञवल्क्यः । अन्नव्यञ्जनयोर्भागौ भागैकमुदकस्य च । वायोः सञ्चारणार्थाय भागैकमवशेषयेत् । तथा आम्रपालाशबिल्वानामपामार्गशिरीषयोः । वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम् । खदिरश्च कदम्बश्च करवीरकरञ्जकौ । सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः । तेनास्यकरणं सूक्ष्मं माधुर्य्यं चोपजायते । आदरं कुरु यत्नेन करणं हितकाम्यया इति ॥

शब्दमयम् ॥ २७ ॥

यत्किञ्चिच्छब्दमयमुपलभ्यते त्रयीलक्षणं तत् तिङ्कृत्तद्धितचतुष्टयसमासाः तिङ् खलु आख्यातका भवन्ति पचति पठतीत्येवमादयः । कृतः कर्त्ता कारक इत्येवमादयः । तद्धिताः आग्नेयः सारस्वत इत्येवमादयः । चतुःप्रकाराः समासाः अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहयः । अव्ययीभावो यथा समंभूमि उपरिनाभि । तत्पुरुषो यथा प्रजापतिः इत्वहा । द्वन्द्वो यथा इन्द्राग्नी मित्रावरुणौ । बहुव्रीहिर्यथा शुद्धवालः सर्वशुद्धवालः (१) ॥

तां वाचमोङ्कारं पृच्छामः ॥ २८ ॥

तिङ्कृत्तद्धितचतुष्टयसमासलक्षणां तामित्थं भूतांवाचम् ओङ्कारं पृच्छामः ओङ्कारो वाचः पुत्रः स पृष्टः सन् स्वाध्यायादावुच्चारणेन स्वां मातरमर्थतो ग्रन्थतश्च कथयिष्यति(२) अतः स्वाध्यायादौ प्रणवः कार्यः । द्विकर्मा च पृच्छतिर्धातुः । अतो वाक्शब्दे ओङ्कारशब्दे च द्वितीया । माणवकं पन्थानं पृच्छतीति यथा (३) ॥

---

(१) द्विगुकर्म्मधारयौ तत्पुरुषान्तर्भूतौ ज्ञेयौ ॥

(२) तथा च शौनकः यथेह गौर्वत्सरुतं निशम्य हुं कृत्यवत्साभिमुखं प्रयाति । अत्रापि तद्वत्प्रणवाभिज्ञं तं वक्तारमागच्छति चाप्यभुक्तमिति फलम् ॥

(३) ओङ्कारोच्चारणं विना कर्म्मफलन्न भवति तदुक्तं नरसिंहपुराणे ब्रह्मयज्ञे जपे होमे देवर्षिपितृकर्म्मणि । अनोङ्कृत्य कृतं सर्वं न भवेत्सिद्धिकारकमिति । ओङ्कारमा-

अथ शिक्षा विहिताः ॥ २९ ॥

अथेत्ययं शब्दो विशेषाधिकारार्थः शिक्षाविहिताः स्थानकरणास्यप्रयत्नादयोऽभिधीयन्ते इत उत्तरमधिकारइयानुवृत्तिर्द्रष्टव्या । स्वरसंस्कारानुवृत्तिः शिक्षाविहितानुवृत्तिश्च ॥

सवनक्रमेणोरःकण्ठभ्रूमध्यानि ॥ ३० ॥

अधस्तादुक्तं ससङ्घातादीन् प्राप्य वाक् तस्यास्त्रीणि स्थानानि । ननु कतमानि तानीत्युक्तम् इह तु शिक्षाप्रक्रमात्तत्पर्य्यायेणोच्यन्ते सवनक्रमेणोरःकण्ठभ्रूमध्यानि । प्रातःसवनमाध्यन्दिनतृतीयसवनक्रमेण उरःकण्ठभ्रूमध्यानि त्रीणि स्थानानि वायोर्भवन्ति (१) ॥

आयाममार्द्दवाभिघाताः ॥ ३१ ॥

एवमेतेषु स्थानेषु वर्णेषूच्चार्य्यमाणेषु त्रयो विकाराः शरीरस्य पर्य्यायेण भवन्ति आयाममार्द्दवाभिघाताः आयामो नाम ऊर्द्ध्वगमनं शरीरस्य । मार्द्दवं नामाधोगमनं गात्राणाम् अभिघातस्तिर्य्यग्गमनं गात्राणाम् ॥

हात्म्यमुक्त्वाऽधुना हरिशब्दमाहत्म्यमुच्यते तदुक्तं हरिवंशे वेदे रामायणे चैव पुराणेषु च भारते । आदिमध्यावसानेषु हरिः सर्वत्र गीयत इति ॥

(१) अमुमेवार्थं पाणिनिरप्याह । प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् । कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगमिति ॥

उच्चनीचविशेषः ॥ ३२ ॥

योऽयन्नामाभिघातः स्वरितः स उच्चनीचविशेषः उच्चनीचाभ्यामभिनिवर्त्यन्ते । एवं शरीरस्य प्रयत्नेन ये निवर्त्यन्ते तेषामुपरिष्टात् सञ्ज्ञां वक्ष्यति उच्चैरुदात्त इत्येवमादिना ॥

अथाद्याः समाम्नायाधिकाः प्राग्रिफितात् ॥ ३३ ॥

अथशब्दो मङ्गलार्थः सञ्ज्ञाः समाम्नायाधिकाः वर्णसमाम्नायं वक्ष्यति अथातो वर्णसमाम्नायं व्याख्यास्याम इति । तस्मादधिकाः प्राग्रिफितात् रिफितसंशब्दनात्प्राक् वक्ष्यति विसर्ज्जनीयो रिफित इति तस्मात्प्राक् उपलक्षणार्थमेतत् परिभाषाप्यत्र भविष्यति तद्यथा ह्रस्वग्रहणे दीर्घप्लुतौ प्रतीयात् प्रथमग्रहणे वर्गमिति ॥

उपदिष्टा वर्णाः ॥ ३४ ॥

वर्णसमाम्नाये कथिता वर्णाः तद्यथा किंतिखितिगितिघितिङिति कवर्गः अथवा ये पदेषूपदिष्टा वर्णास्तएव प्रत्येतव्याः अन्यद्वचनाद्भविष्यति तद्यथा इषे त्वा अत्र संहितायामपि न वर्णान्यत्वम् वचनात्संहितायां विकारा भविष्यन्ति तांस्तत्रैव वक्ष्यामः । अथवा पदेषु सङ्ख्योपदिष्टा वर्णाः कर्तव्याः तद्यथा इषे त्रिवर्णं पद-

म् । त्वा विवर्णं । पदम् । ऊर्जं पञ्चवर्णं पदम् । उक्तं च स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगार्थ एव च । मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे इति ॥

अन्त्याद्वर्णात्पूर्व उपधा ॥ ३५ ॥

अन्ते भवोऽन्त्यो वर्णः ककारादिः अन्त्याद्वर्णात्पूर्व उपधासंज्ञो भवति तद्यथा महान् इन्द्र इति अत्र नकारस्याकार उपधासञ्ज्ञकः । सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति अनुनासिकमुपधा प्रागन्तस्थाया इति ॥

निर्देश इतिना ॥ ३६ ॥

वर्णानां निर्देश इतिना भवति तद्यथा किति खिति गिति घिति ङिति कवर्ग इति ॥

कारेण च ॥ ३७ ॥

कारप्रत्ययेन च वर्णानां निर्देशो भवति तद्यथा यकारवकारयोर्जामित्वे पद इति (१) ॥

अव्यवहितेन व्यञ्जनस्य ॥ ३८ ॥

अकारव्यवहितेन कारप्रत्ययेन व्यञ्जनस्य निर्देशो भवति यथा ककारपकारयोः सकारमिति व्यञ्जनस्येति किम् अकार इकार उकार इति ॥

(१) अत्र पाणिनिनापि वर्णात्कार इत्यनेन रेफं विना व्यञ्जनानां निर्देशः कृतः । चकारादितिना स्वरैश्च निर्देशो ज्ञातव्यः ॥

र एफेन च ॥ ३९ ॥

रः रेफस्य एफेन च निर्द्दिश्यते यथा रेफऽ० स्वरधाविति चशब्दादितिना च यथा यितिरितिलितिविति ॥

स्वरैरपि ॥ ४० ॥

स्वरैरपि व्यञ्जनानां निर्द्देशो भवति यथा नु चछयोः शम् तथयोः समिति (१) ॥

नानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः ॥ ४१ ॥

वच्यति अं इत्यनुस्वारः तथा कुंखुंगुंघुं इति यमाः तथा अः इति विसर्ज्जनीयः । तथाᳵक इति जिह्वामूलीयः । ᳵ पइत्युपध्मानीयः एते न कारप्रत्ययेन निर्द्देष्टव्याः यथा अनुस्वारऽ० रोष्मसु मकार इति अनुस्वारस्य स्वशब्देनैव निर्द्देशः तथा ऊष्मभ्यः पञ्चमेषु यमापत्तिर्हीष इति यमस्य स्वशब्देनैवोपादानम् । तथा विसर्ज्जनीयस्य विसर्ज्जनीय इति । तथा जिह्वामूलीयोपध्मानीयौ शाकटायन इति ॥

दन्त्यस्य मूर्द्धन्यापत्तिर्नतिः ॥ ४२ ॥

(१) अपिशब्दादितिना कारेण च ॥

दन्त्यस्य मूर्द्धन्यभावो नतिरुच्यते तद्यथा परिसिञ्चन्ति परिषिञ्चन्ति सञ्ज्ञाकरणे प्रयोजनं स्विति चानताविल्यादि ॥

समानस्थानकरणास्यप्रयत्नः सवर्णः ॥ ४३ ॥

समानमेकं स्थानं करणमास्यप्रयत्नश्च यस्य स एव मुच्यते यो यस्य वर्णस्य समानस्थानः समानकरणः समानमुखप्रयत्नः स तस्य सवर्णसञ्ज्ञो भवति । तद्यथा प्र अर्प्पयतु प्रार्प्पयतु तव अयम् तवायठ॰ सोमः स्रुचि इव स्रुचीव घृतम् अभि इन्धताम् अभीन्धतां सुखे अनु उज्जेषम् अनूज्जेषं वाजस्य अनु उज्जयताम् अनूज्जयताम् ऋकारलृकारयोरपि सवर्णदीर्घत्वमेव भवति यद्युदाहरणं छन्दसि लभ्यते सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति । सिठ॰ सवर्णे दीर्घमिति ॥

सिमादितोऽष्टौ स्वराणाम् ॥ ४४ ॥

वर्णसमाम्नायस्यादौ अष्टानां स्वराणां सिम् सञ्ज्ञा भवति अष्टाविति विभक्तिव्यत्ययेन षष्ठीबहुवचनं द्रष्टव्यं स्वराणामितिसामानाधिकरण्यात् यथा अआइईउऊ ऋऋृ वर्णसमाम्नाये त्रिमात्रा अपि वक्ष्यन्ते इह संधौ तु तेषां ग्रहणं न संभवति प्रयोजनाभावात् (१) त्रिमा-

(१) आपिशलिमते ऋलृकारयोरविशेषेण दीर्घता महाभाष्ये तु लृकारस्य दीर्घाभावः

त्वान् हि स्वयमेव वक्ष्यति सर्वमग्ना३इ३ लाजीं३ छाचो३निति त्रिमात्राणि चेत्यादिना सवर्णदीर्घत्वं च सञ्ज्ञाकरणे प्रयोजनम् न च सवर्णदीर्घत्वमुक्तानां प्लुतानां च संभवति अतः प्लुता न गृह्यन्ते । संज्ञाकरणे प्रयोजनं वक्ष्यति सिर्ठ० सवर्णे दीर्घमिति ॥

सन्ध्यक्षरं परम् ॥ ४५ ॥

स्वराणामित्यनुवर्तते स्वराणां यत्परमन्त्यमक्षरं तत्सन्ध्यक्षरसञ्ज्ञं भवति सन्ध्यक्षरमिति जातावेकवचनम् यथा पक्वो यव इति सन्ध्यक्षराणि पराणीत्यर्थः तानि चत्वारि द्विमात्राणि गृह्यन्ते न प्लुतान्यपि प्रयोजनाभावात् प्रयोजनार्थं च सञ्ज्ञापरिभाषाः क्रियन्ते । अतो द्विमात्राण्येव गृह्यन्ते । न सर्वाणीति । वर्णसमाम्नाये तु सर्वेषां वर्णानां पाठो युक्तरूप एव तत्र हि एतावन्तो वर्णाः संभवन्तीत्येतदेव व्याप्यते अतस्तत्र सर्वेषां पाठो युक्तरूप एवेत्यदोषः इह तु कार्यवन्त एवोपदिश्यन्ते । तद्यथा ए ऐ ओ औ सञ्ज्ञायाः प्रयोजनं सन्ध्यक्षरमयवायावमिति ॥

प्रयोगाभावात् इति गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचामित्यनेन कृष्णशिखेत्यादौ प्रयोगे सत्वादस्ति वा सूत्रकारमते भाषिकमते च यथोक्तत्रयोऽपि भेदाः सन्ति । अकारैकारोकारर्कारऌकारा अवर्णधारणाः अइउऋऌ एते पञ्चवर्णा अवर्णेन समानधारणा इति शतपथब्राह्मणस्य स्वरसंस्कारप्रतिपादकवक्ष्यमाणपरिशिष्टभाषिकसूत्रोक्तेन ऋकारसावर्ण्यात् ऌकारस्य ऋकारान्तर्भावः ॥

अकण्ठ्यो भावी ॥ ४६ ॥

स्वराणामित्येव कण्ठ्यौ अकाराकारौ वर्ज्जयित्वा स्वराणां भाविसञ्ज्ञा भवति तद्यथा इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ । सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति भाव्युपधस्वरिद्विसर्ज्जनीय इति ॥

व्यञ्जनं कादि ॥ ४७ ॥

ककारादि ऊष्मान्तं यद्वर्णजातं तद्व्यञ्जनसंज्ञं भवति किति खिति गिति घिति ङिति इत्यादि अं इत्यनुस्वार एतदन्तम् सञ्ज्ञाकरणे प्रयोजनं व्यञ्जनमर्द्धमात्रेत्यादि ॥

अनन्तरꣳ संयोगः ॥ ४८ ॥

अनन्तरमव्यवहितं व्यञ्जनं व्यञ्जनेन सह संयोगसञ्ज्ञं भवति तद्यथा पक्वम् किति किति विति अप्स्वः श्विति श्विति विति सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति स्वरात् संयोगादिर्द्विरुच्यते सर्वत्रेति ॥

स्पर्शेष्वेव सङ्ख्या ॥ ४९ ॥

ककारादयः पञ्चवर्गाः पञ्चवर्णाः समाम्नाये स्पर्शसञ्ज्ञा उक्ताः तेषु वर्गेषु सङ्ख्या ज्ञातव्या वक्ष्यति असस्थाने मुदि द्वितीयꣳ शौनकस्य पञ्चमे पञ्चम-

भिति परिभाषासूत्रमेतत् ॥

द्वौद्वौ प्रथमौ जित् ॥ ५० ॥

स्पर्शेष्वेवसङ्ख्येति परिभाषितमेव अतस्तस्याः परिभाषाया इहोपस्थानम् द्वौद्वौ प्रथमौ वर्णौ वर्गे वर्गे जित्सञ्ज्ञौ यथा । क ख च छ ट ठ त थ प फ सञ्ज्ञाकरणे प्रयोजनम् लुङ् मुदि जित्पर इति ॥

ऊष्माणश्च हवर्ज्जम् ॥ ५१ ॥

ऊष्माणश्च जित्सञ्ज्ञका भवन्ति । हकारं वर्जयित्वा तद्यथा शषसाः च शब्दात् द्वौद्वौ प्रथमौ वर्गे वर्गे क ख च छ ट ठ त थ प फ एते त्रयोदशवर्णा जित्सञ्ज्ञा वेदितव्याः ॥

मुच्च ॥ ५२ ॥

मुत्सञ्ज्ञकाः शषसा भवन्ति च शब्दाज्जित्सञ्ज्ञकाश्च शषसेष्वेव मुत्सञ्ज्ञा यथा स्यादिति पृथग्योगकरणम् । सञ्ज्ञायाः प्रयोजनं लुङ्मुदि जित्पर इति ॥

धिशेषः ॥ ५३ ॥

कृतसञ्ज्ञकेतरवचनः शेषशब्दः शेषो यो वर्णराशिः स धिसञ्ज्ञो भवति तद्यथा वर्गाणामुत्तरास्त्रयो यरलवहकाराश्चेति विंशतिवर्णा धिसञ्ज्ञा भवन्ति

सञ्ज्ञाकरणे प्रयोजनम् रेफऌ० स्वरधाविति (१) ॥

द्वितीयचतुर्थाः सोष्माणः ॥ ५४ ॥

द्वितीयाः ख छ ठ थ फाः चतुर्थी घ झ ढ ध भाः एते दशवर्णाः सोष्मसञ्ज्ञा भवन्ति इह यासां सञ्ज्ञानां शास्त्रे संव्यवहारो नोपलभ्यते पूर्वाचार्य्यसञ्ज्ञास्ता वेदितव्याः शिष्यसंव्यवहारार्थाः शिष्या आभिः संव्यवहरेयुरिति पूर्वाचार्य्यसञ्ज्ञानुकथनमस्मिन् शास्त्रे मङ्गलार्थं च पूर्वाचार्य्यशास्त्रकीर्त्यपरित्राणार्थं वा यद्वा यथा एते वर्णा नित्या एवमेता अपि सञ्ज्ञा नित्या एव एवं च कृत्वा सर्वशास्त्रेष्वेताएव सञ्ज्ञा उपलभ्यन्ते द्वि-

---

(१) आस्यप्रयत्नापरपर्य्यायं चतुर्विधं करणमाह स्पृष्टमसंस्पृष्टं संवृतं विवृतं चेति । स्पृष्टप्रयत्नाः कादिमान्ताः असंस्पृष्टप्रयत्नाः स्वराः तेषां मध्ये ऋऌकारौ ईषत्स्पृष्टौ ज्ञेयौ ऋऌोर्मध्ये भवत्यर्द्धमात्रा रेफऌकारयोः । तस्मादस्पृष्टता वर्ज्या ऋऌकारस्य सम्भवे १ ऋऌवर्णे रेफऌकारौ सऌ०श्लिष्टावश्रुतिधरावेकवर्णाविति चतुर्थाध्यायस्थवक्ष्यमाणसूत्रेण सूत्रकारज्ञापनात् पाणिनिस्तु ईषन्नेमस्पृष्टे अधिके आह उक्तं च अचोऽस्पृष्टा यणस्त्वीषन्नेमिस्पृष्टाः शलस्तथा । शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदातः । अनुप्रदानमिति स्वस्थानादिना घोषादि अनुप्रकर्षेण दीयत इति अनुप्रदानतो हेतोर्निबोध जानीहि वर्णानां भेदम् । ञमोऽनुनासिका नाद्गौ नादिनो हझषः स्मृता । ईषन्नादा यण् जशः श्वासिनस्तु खफादयः । ईषच्छ्वासाँश्चरो विद्याद्गोर्धामैतत् प्रचक्षते । अमोऽनुनासिका इति वा पाठः ञम् इति प्रत्याहारः । ञमङणन एत अनुनासिकामनुगताः सानुनासिका इत्यर्थः । अमोऽनुनासिका इति पाठे अम् प्रत्याहारः तन्मध्ये हकाररेफौ न नादिनो हझषः स्मृताः गोर्धाम गोर्वाचः धाम स्थानं एतत् प्रचक्षते शब्दशास्त्रविदः, पाणिनिना च निष्पाद्यन्ते यमप्रभृतयः, अमोञम् पाठद्वयात् अमान्त रेफहकारवर्जितानां विकल्पेनानुनासिकत्वम् अमान्तु नित्यं पाणिनीयानां ये स्वरास्त्रयोदशविवारश्वासघोषप्रयत्नास्तेऽत्र जित्सञ्ज्ञाः ये तु हशः विंशतिसम्वारनादघोषप्रयत्नास्ते सञ्ज्ञा वर्ग्गेषु ॥

तीयचतुर्थाः सोष्माणः तथा ककारादीनां स्पर्शसञ्ज्ञा तथा यकारादीनामन्तस्थसंज्ञा आभिः संज्ञाभिर्व्यवहरतां धर्म्मो भवति यद्वा नैव संज्ञा किन्तर्हि वर्णस्वरूपमनेन सूत्रेण कथ्यते ऊष्मा वायुः ऊष्मणा सहवर्त्तन्त इति सोष्माणः अतिशयार्थं वचनं महाप्राणा इत्यर्थः । अत एवैषां संयोगपीडने वायुर्न्निर्गच्छति तन्निह्वारयेत् । यथा । दद्ना दकारो धकारप्रकृतिर्यमः नकार इतिसंयोगः अत्र धकारप्रकृतित्वात् यमस्य पीडने ऊष्मा निष्क्रामति तं सन्धारयेत् तदात्मकत्वात्तस्य वर्णस्याचार्य्योऽपि यमस्य स्फोटने दोषं वक्ष्यति ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोष इति, स्फोटनं च ककारवर्गे वा स्पर्शादिति (१) ॥

अमात्रस्वरो ह्रस्वः ॥ ५५ ॥

अकारमात्रस्वरो ह्रस्वसञ्ज्ञो भवति तद्यथा अ इ उ ऋ लृ सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वो चार्द्धमात्रेति ॥

मात्रा च ॥ ५६ ॥

मात्रा च यत्र श्रूयते तत्र अकारकालः मात्रस्वरः

---

(१) अन्वर्था चेयं सञ्ज्ञा एवं च सति वर्गेषु प्रथमतृतीयपञ्चमानां अङणनमानां यरळवानां चाल्पप्राणरूपमेकप्रयत्नत्वं उक्तं च अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः । युग्माः शळोऽयोगवाहा महाप्राणा इतीरिताः ॥

प्रत्येतव्यः ह्रस्वो मात्रेति पर्यायावित्यर्थः ॥

द्विस्तावान् दीर्घः ॥ ५७ ॥

ह्रस्वात् द्विगुणकालो वर्णो दीर्घसञ्ज्ञो भवति यथा आ ई ऊ ॠ ॡ ए ऐ ओ औ इति सञ्ज्ञाकरणे प्रयोजनं दीर्घोऽर्द्धमात्रा पूर्वा चाध्यर्द्धेति ॥

प्लुतस्त्रिः ॥ ५८ ॥

ह्रस्वत्रिगुणकालः प्लुतसञ्ज्ञो भवतीति यथा आ३ ई३ ऊ३ ॠ३ ॡ३ ए३ ऐ३ ओ३ औ३ सञ्ज्ञाकरणे प्रयोजनं प्लुतमितावित्यादि ॥

व्यञ्जनमर्द्धमात्रा ॥ ५९ ॥

कादीनां व्यञ्जनसञ्ज्ञा कृता व्यञ्जनं कादीति अधुना तस्यार्द्धमात्राकालतोच्यते यथा प्राङ् प्रत्यङ् ङकारावर्द्धमात्रौ ॥

तदर्द्धमणु ॥ ६० ॥

अर्द्धमात्रार्द्धमणुसञ्ज्ञं भवति सञ्ज्ञाकरणे प्रयोजनम् मात्रार्द्धमात्राणुमात्रावर्णोपत्तीनामिति (१) ॥

परमाण्वर्द्धाणुमात्रा ॥ ६१ ॥

(१) अयस्पिण्डादिसप्तविधपिण्डा याज्ञवल्क्येनोक्ताः तेषां सोदाहरणलक्षणान्यग्रे कथयिष्यन्ते ॥

अर्द्धाणुमात्रा परमाणुसञ्ज्ञं भवति (१) ॥

स्थाने ॥ ६२ ॥

अधिकरणं वर्णानां स्थानशब्देनोच्यते यदित ऊर्ध्वमनुक्रमिष्यामः स्थाने इत्येवं तद्वेदितव्यम् अधिकारसूत्रमेतत् ॥

ह्रस्वग्रहणे दीर्घप्लुतौ प्रतीयात् ॥ ६३ ॥

ह्रस्वस्य वर्णस्य ग्रहणे दीर्घप्लुतावपि वर्णौ गृहीतौ द्रष्टव्यौ परिभाषेयं स्थानाधिकारार्थी ॥

प्रथमग्रहणे वर्गम् ॥ ६४ ॥

वर्गादौ प्रथमवर्णग्रहणे वर्गं जानीयात् परिभाषेयम् ॥

ऋ॒कौ जिह्वामूले ॥ ६५ ॥

ऋऋॠ ३ इति त्रयः जिह्वामूलीयः कवर्ग इत्येते नव वर्णा जिह्वामूलस्थानाः ॥

इचशेयास्तालौ ॥ ६६ ॥

---

(१) तदतिसूक्ष्मं वाङ्मनसयोरगोचरं ब्रह्मैव तदुक्तं तेनैव । निमेषो मात्राकालः स्याद्विद्युत्कालोऽपि वा परे । अक्षरातुल्ययोगात्तु मतिः स्यात्सोमशर्म्मणः । सूर्य्यरश्मिप्रतीकाशाकणिका यत्र दृश्यते । अणुत्वस्य तु सा मात्रा मात्रा तु चतुराणवी । मानसे चाणवं विद्यात्कण्ठे विद्याद्द्विराणवम् । त्रिराणवं तु जिह्वाग्रे निःसृतं मात्रिकं विदुरिति ॥

इईई३ इति त्रयः चवर्गः शकार एकारो यकार-इत्येते एकादशवर्णास्तालुस्थानाः ॥

षटौ मूर्द्धनि ॥ ६७ ॥

षकारटवर्ग इत्येते षड्वर्णा मूर्द्धन्या द्रष्टव्याः ॥

रो दन्तमूले ॥ ६८ ॥

रेफो दन्तमूलस्थानः प्रत्येतव्यः ॥

लृलसिता दन्ते ॥ ६९ ॥

लृॡॡ३ एते त्रयः लकारः सकारस्तवर्ग इत्येते दशवर्णा दन्त्याः ॥

उवोपोपध्मा ओष्ठे ॥ ७० ॥

उऊऊ३ एते त्रयः वकार ओकार उपध्मानीयः पवर्ग एते एकादशवर्णा औष्ठ्याः ॥

अहविसर्जनीयाः कण्ठे ॥ ७१ ॥

अकारो मात्रिको द्विमात्रिकस्त्रिमात्रिक इत्येते त्रयः हकारविसर्जनीयौ इत्येते पञ्चवर्णाः कण्ठ्याः प्रत्येतव्याः (१) ॥

---

(१) सँय्युक्तस्तु हकार औरसः, हकारं पञ्चमैर्य्युक्तमन्तस्थाभिश्च सँय्युतम्। औरस्यं तं विजानीयात्कण्ठ्यमाहुरसँय्युतमिति याज्ञवल्क्येनैवोक्तम् ॥

सवर्णवच्च ॥ ७२ ॥

अहविसर्जनीयाः कण्ठे इति अकारस्य मात्रिकस्य द्विमात्रिकस्य त्रिमात्रिकस्य च कण्ठस्थानता उक्ता यथा कण्ठ्या मध्येनेति समानकरणता त्रयाणामपि आस्यप्रयत्नस्तु भिद्यते कोऽसावास्यप्रयत्नो नाम संवृतता विवृतता च अस्पृष्टता स्पृष्टता च ईषत्स्पृष्टता अर्द्धस्पृष्टता च इत्यास्यप्रयत्नः तद्यथा संवृतास्यप्रयत्न अकारः विवृतास्यप्रयत्ना इतरे(१) स्वराः यथा अस्पृष्टास्यप्रयत्नाः स्वराः(२)स्पृष्टास्यप्रयत्नाः स्पर्शाः तथा ईषत्स्पृष्टास्यप्रयत्ना अन्तस्थाः अर्द्धस्पृष्टास्यप्रयत्ना ऊष्माणः अनुस्वारश्च अयमास्यप्रयत्नः शिक्षाविद्भिरुक्त इह गृह्यते अतोऽकारस्य मात्रिकस्य संवृतास्यप्रयत्नस्य इतरयोश्च विवृतास्यप्रयत्नयोर्द्विमात्रिकत्रिमात्रिकयोः सह सावर्ण्यं तुल्यं न सम्भवतीति तदर्थमिदमारभ्यते सवर्णवच्च कार्य्यं भवति सवर्णदीर्घत्वं भवतीत्यर्थः तद्यथा सोमऽ आभूयो भर, मात्वा अग्निः मात्वाग्निर्ध्वनयीत् एवमन्यत्रापि सवर्णवत्कार्य्यं द्रष्टव्यम् ॥

ऐकारौकारयोः कण्ठ्या पूर्वामात्रा तात्वोष्ठयोरुत्तरा ॥ ७३ ॥

(१) अत्रेतरशब्देन दीर्घाकारप्लुताकारयोर्ग्रहणम् ॥

(२) इकाराद्यौकारान्ताः ह्रस्वदीर्घप्लुतभेदयुताः ॥

ऐकारस्य औकारस्य च कण्ठ्यापूर्वामात्रा अकारमात्रा उभयोरपि पूर्वा उत्तरा प्रथमस्य तालुस्थाना उत्तरा पूर्वं एकार इत्यर्थः । तद्यथा अए ऐ इति द्वितीयस्योत्तरा ओष्ठस्थाना द्वितीयस्योत्तरा ओकार इत्यर्थः तद्यथा अओ औ इति । अत्र केचिदाहुः अकारस्यार्द्धमात्रा एकारस्याध्यर्द्धा ऐकारे अकारस्यार्द्धमात्रा ओकारस्याध्यर्द्धा औकारे इति तथा चोक्तम् अर्द्धमात्रा तु कण्ठ्यस्य ऐकारौकारयोर्भवेत् इति० अनेनैव क्रमेण एकारौकारौ व्याख्यातौ ॥

यमानुस्वारनासिक्यानां नासिके ॥ ७४ ॥

चत्वारो यमाः अनुस्वारनासिक्यौ चेति षड्वर्णा नासिकास्थाना इति (१) ॥

मुखनासिकाकरणोऽनुनासिकः ॥ ७५ ॥

मुखसहितया नासिकया क्रियते इति मुखनासिकाकरणः मुखनासिकाकरणो वर्णोऽनुनासिकसञ्ज्ञो भवति जातावेकवचनम् स्वराणामयं वैकल्पिको धर्मः

(१) कुं खुं गुं घुं इति चत्वारो यमाः । अम् इत्यनुस्वारः । हुँ इति नासिक्यः । एतेषां सूत्राणि अष्टमाध्याये वक्ष्यन्ते ॥

अन्तस्थानां रेफवर्ज्जितानां च वाचनिकश्चायं धर्म्मः तद्यथा अनुनासिकमुपधा प्रागन्तस्थायाः यथा मह्वाँ २॥ ऽइन्द्रः उन्नयामि त्वाँ २ ॥ ऽअहम् ये वा वनस्पतीँ ॥ रनु अग्ने क्रत्वा क्रतूँ १॥ रनु अन्तस्थासु भवति वक्ष्यति अन्तस्थामन्तस्थास्वनुनासिकां परसस्थानाम् (१) सँय्यौमि सँव्यामि तँल्लोकम्पुण्यं प्रज्ञेषमिति इत उत्तरं करणाधिकारो भविष्यति ॥

दन्त्या जिह्वाग्रकरणाः ॥ ७६ ॥

दन्त्या जिह्वाग्रेण क्रियन्ते तद्यथा तथेति ॥

रश्च ॥ ७७ ॥

रेफश्च जिह्वाग्रेण क्रियते अन्यस्थानोऽपि ॥

मूर्द्धन्याः प्रतिवेष्ट्याग्रम् ॥ ७८ ॥

मूर्द्धन्याः षकारटवर्गौ एतौ प्रतिवेष्ट्य जिह्वाग्रेण क्रियन्ते (२) ॥

तालुस्थाना मध्येन ॥ ७९ ॥

तालुस्थाना इचशेया एते जिह्वामध्येन क्रियन्ते (३) ॥

---

(१) परस्परसंस्थानामिति 'घ' पुस्तकपाठः ।

(२) अभियुक्ता जिह्वामूलीयकवर्गीयप्रतिरूपकस्थानकरणापरित्यागेन नेमस्पृष्टं षकारं परम्परया पठन्ति तदप्यविरोधीति । सुष्टु तृतीयवर्गसँय्योगे तु स्पृष्टप्रयत्नस्य प्राबल्यात् नेमस्पृष्टतानुपलब्धेः स्वरे पर एव तथेति ॥

(३) इकार अस्पृष्टप्रयत्नः, चवर्गः स्पृष्टप्रयत्नः, शकार अर्द्धस्पृष्टप्रयत्नः, एकारोऽ-

समानस्थानकरणा नासि-क्यौष्ठ्याः ॥ ८० ॥

ङुँकारो नासिक्यः स च नासिकास्थानः उवो पोपध्मा ओष्ठ इत्योष्ठस्थानाः एतेषां यदेव स्थानं तदेव-करणम् ॥

वो दन्ताग्रैः ॥ ८१ ॥

वकारस्तु ओष्ठ्योपि दन्ताग्रैः क्रियते (१) ॥

स्पृष्टः, षकार ईषत्स्पृष्टः, पादान्तादौ पादादौ पदादौ तु स्पृष्ट एव, तदुक्तं याज्ञवल्क्येन यकारवकारावधिकृत्य, पादाद्यन्तं पदाद्यन्तं तथाऽवग्रहकालिकम् । संस्पृष्टं तं विजानीयात् तस्मिन्काले तु कारयेत् । पदाद्यन्तमिति द्वे पदे यकारं वकारं च पादाद्यभूतं पदाद्यभूतं अवग्रहकालिकं संस्पृष्टं विजानीयात् तस्मिन्काले अवग्रहकाले तु संस्पृष्टप्रयत्नं कारयेत् । न संहिताकाले, पादादौ यथा यज्ञेन, पदादौ यथा यज्ञम् तच्च. किम्, अयजन्त, सँय्योगादिति आदेरनुवृत्तौ परन्तु रेफहकाराभ्यामित्यादिभूतस्यैव यः, नृपाय्यम् सूर्य्यः सिꣳह्यासि । तच्च किम् । अग्निज्ज्योतिः, दुश्च्यवनः, ऊवध्यम्, पादान्तस्थं पदान्तस्थं तथाऽवग्रहकालिकम् । ईषत्स्पृष्टं विजानीयात्तस्मिन् काले तु कारयेत् । उपसर्गात्परो यस्तु पदादिरपि दृश्यते । ईषत्स्पृष्टो यथा वियत् प्रयत्नं तु परं भवेत् । पादादौ च पदादौ च सँय्योगाऽवग्रहेषु च । यः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः । अतः सम्प्रदायविद एवं विधे यकारे स्पृष्टप्रयत्नज्ञानाय मध्ये बिन्दुं प्रक्षिपन्ति स्पृष्टप्रयत्नं पठन्ति च ॥

(१) एवं वकारो दन्त्योष्ठ्यः स च त्रिविधः, पदान्ते पदमध्ये च वकारो दृश्यते यदि । संहितायां लघुर्ज्ञेयो ह्यन्यत्रापि लघूतरः । वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः । पदमिति सर्वत्रानुवर्त्तनीयम् छन्दोऽनुरोधेन, व्वोढव इति वोढवे, दीर्घत्वं पदादिगुरुः, पदमध्ये लघुः, पदान्ते च वकारो लघूतरः, गुरुरिति संस्पृष्टप्रयत्न उच्चारयितव्यः, पादाद्यन्तं पदाद्यन्तं तथाऽवग्रहकालिकम् । संस्पृष्टं तं विजानीयात्तस्मिन् काले तु

नासिकामूलेन यमाः ॥ ८२ ॥

यमाश्चत्वारो नासिकामूलेन क्रियन्ते यथा यज्ञः याँश्च चक्र इति ॥

जिह्वामूलीयानुस्वारा हनुमूलेन ॥ ८३ ॥

जिह्वामूलस्थाना अनुस्वारश्च हनुमूलेन क्रियते यथा ऋक्सामयोः अꣳशुना ते अꣳशुः ॥

कण्ठ्या मध्येन ॥ ८४ ॥

कण्ठ्या वर्णा मध्येन हन्वोरेव क्रियन्ते यथा अह इति॥

प्रथमोत्तमाः पदान्तीया अचञौ ॥ ८५ ॥

एवं तावदधस्तनेन वर्णानां स्थानानि करणानि चोक्तानि आस्यप्रयत्नस्तु शिक्षान्तराद् गृह्यते सवर्णसञ्ज्ञाङ्गभूतत्वात् अधुना पदान्तीयवर्णनिरूपणायाह प्रथमोत्तमाः पदान्तीया भवन्ति चकारञकारौ वर्जयित्वा प्रथमा यथा प्राक् अपाक् विराट् सम्राट् यत् तत् त्रिष्टुप् अनुष्टुप् उत्तमा यथा प्राङ् प्रत्यङ् त्रीन् समुद्रान्

कारयेत् । इति याज्ञवल्क्येनोक्तत्वात् अन्यत्र तु ईषत्स्पृष्टः, पादान्तस्थं पदान्तस्थं तथाऽवग्रहकालिकम् । ईषत्स्पृष्टं विजानीयादिति चोक्तत्वात्, व्वसोः पवित्रम्, व्वायवस्स्थ, अत्रादिर्गुरुः, द्वितीयो लघुः, देवो वः, अत्रान्त्यो लघूतरः, चित्रश्रवस्तममिति चित्रश्रवः तमम्, अत्र संहितायामपि ॥

तम् यज्ञम् ॥

विसर्जनीयः ॥ ८६ ॥

विसर्जनीयः पदान्तीयो भवति यथा अग्निः घर्म्मः ॥

स्वराश्च लृकारवर्जम् ॥ ८७ ॥

स्वराश्च पदान्तीया भवन्ति लृकारं वर्जयित्वा यथा द्वीप्याय नीप्याय अश्विना मित्रावरुणा सुचि इन्द्राग्नी मधु अनु दृषण्वसू चमू इ विरूपे पृथिव्यै भूम्यै इन्द्रो अश्विनौ एतानि स्वरान्तान्युदाहरणानि ॥

णकारऋकारावपग्रहे ॥ ८८ ॥

प्रथमोत्तमाः पदान्तीया इत्यनेन णकारः पदान्तीयः प्राप्तः स्वराश्च लृकारवर्जमित्यनेन ऋकारश्च पदान्तीयः प्राप्तः अतस्तावुभौ पदान्तीयावापद्येते अवग्रह एव स्याप्येते यथा पूषण्वान् दृषण्वसू पितृसदनाः पितृसदनम् (१) ॥

अनुनासिकाश्चोत्तमाः ॥ ८९ ॥

वर्गोत्तमाः ङञणनमा अनुनासिका भवन्ति। चकारात्स्वस्थानाद्यपरित्यागद्वारेण नासिकास्थानं द्वि-

(१) समासेऽवग्रहो ह्रस्वसमकाल इति पञ्चमाध्यायस्थादिमसूत्रेणाऽवग्रहोऽभिहितः तस्मिन्नवग्रहकाले अवग्रहः पदान्तवदित्यनेन शास्त्रेण पदकालीनणकारऋकारघटितोदाहरणचतुष्टये पदान्तत्वं बोध्यम् ॥

तीयमेषामित्यर्थः । वर्णस्वरूपज्ञापनार्थमिदम् । सञ्ज्ञार्थमित्यपरे ॥

स्पर्शान्तस्य स्थानकरणविमोक्षः ॥ ९० ॥

स्पर्शान्तस्य पदस्य स्थानकरणविमोक्षः कर्त्तव्यः अन्येन प्रयत्नेनान्यत्पदमारब्धव्यम् अन्यथा पदादेर्द्वित्वं भवति तद्यथा तत् नः, तन्नो मित्रो वरुणः, सम् यौमि, सँय्यौमीदमग्ने: ॥

अवसाने च ॥९१॥

समाप्तौ च अर्द्धर्चादौ स्वरान्तानामपि पदानां स्थानकरणविमोक्षः कर्त्तव्यः यथा संमधुमतीर्म्मधुमतीभिः पृच्यन्ताम् शुक्रन्दुदुह्रेऽअह्नयः ॥

प्रगृह्यम् ॥ ९२ ॥

प्रगृह्यमित्ययमधिकारः । यदित ऊर्द्ध्वमनुक्रमिष्यामः प्रगृह्यमिति तद्वेदितव्यम् प्रगृह्यसञ्ज्ञायाः प्रयोजनं प्रगृह्यं स्वरे इत्यादि ॥

एकारेकारोकारा द्विवचनान्ताः॥९३॥

एकार ईकार ऊकार एते द्विवचनप्रतिपादकाः सन्तः प्रगृह्यसञ्ज्ञा भवन्ति यथा एकारस्य भवति द्वे इति

शीर्षे इति यथा ईकारान्तस्य भवति उर्वी इति पृथ्वीइ-इति यथा ऊकारान्तस्य भवति अङ्घ्र्यू इति बाहू इति ॥

ओकारश्च पदान्तेऽनवग्रहः ॥ ९४ ॥

ओकारश्च पदान्ते वर्त्तमानोऽवग्रहवर्जितः प्रगृह्य-सञ्ज्ञो भवति यथा अद्धयोंऽअद्रिभिः चित्रभानो इति इन्द्रायाहि चित्रभानो सुताः अनवग्रह इति किम् गो-व्यच्छमिति गो । व्यच्छम् । गोघातमिति गो । घातम् (१)

उकारोऽपृक्तः ॥ ९५ ॥

उकारोऽपृक्तः प्रगृह्यसञ्ज्ञो भवति । उकारोऽपृक्तो दीर्घमनुनासिकमिति वक्ष्यति एतेनेत्थं रूपं भवति यथा ऊँ, मन्वेतवाउ नवाउऽएतत् अपृक्त इति किम् नु इन्द्र योजान्विन्द्रते ॥

चमू अस्मे त्वे ॥ ९६ ॥

चमू अस्मे त्वे एतानि पदानि प्रगृह्यसञ्ज्ञकानि भ-वन्ति यथा चमू इति चमू सोममिन्द्रचमूसुतम् अस्मेइ-त्यस्मे इन्द्रोऽअस्मेऽआरात् त्वेइति त्वे बन्धुस्त्वे रायः ॥

मे उदात्तम् ॥ ९७ ॥

---

(१) ऋग्यजुस्सौत्रातिरिक्तोऽयमारम्भः । अवग्रहइति किम् । ३४।२.३ गविष्टाविति गो । इष्टौ । अवग्रहत्वादवादेशः ॥ अत्राङ्कलेखनस्यायमाशयः पूर्वाङ्केन शुक्लयजुस्संहिताध्यायपरिचयः द्वितीयाङ्केन मन्त्रो ज्ञातव्य एवं सर्वत्रोह्यम् ॥

मे इत्येतत्पदमुदात्तं चेत्प्रगृह्यसञ्ज्ञं भवति यथा मे इति मे, मे रायो मा व्ययम् उदात्त इति किं इमम्मे वरुण ॥

अमी पदम् ॥ ९८ ॥

अमी इत्येतत्पदं चेत्प्रगृह्यसञ्ज्ञं भवति यथा अमी-इत्यमी, एष वोऽमी राजा, ये वामी रोचने दिवः, पदमिति किम् पदावयवस्य माभूत् अमीषांच्चित्तम् ॥

स्वरोऽक्षरम् ॥ ९९ ॥

स्वरोऽक्षरसञ्ज्ञो भवति यथा अइति इइति अक्षरसञ्ज्ञायाः प्रयोजनम् प्रागुवर्णादक्षराणामेकीभाव इति वक्ष्यति । तथा चोक्तम्, सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरमिति ॥

सहाद्यैर्व्यञ्जनैः ॥ १०० ॥

आद्यैर्व्यञ्जनैः सहितः स्वरोक्षऽरं प्रत्येतव्यम् यथा मो ओकारसहितोऽक्षरं प्रत्येतव्यम् यथा द्रुअन्नः द्रुन्नः उकारो दकाररेफसहितोऽक्षरम् ॥

उत्तरैश्चावसितैः ॥ १०१ ॥

आद्यैर्व्यञ्जनैः उत्तरैश्चावसानगतैः सहितः स्वरोऽक्षरम् यथा वाक् वकारककारसहित आकारोऽक्षरम्

प्राङ् यकाररेफङकारसहित आकारोऽन्त्यरम् एव-
न्तावद्युत्येकः स्वरो भवति तदधस्तनान्युपरितनानि च
व्यञ्जनानि तदङ्गानि भवन्तीत्येतत्प्रतिपादितम्, अधु-
ना स्वरयोर्मध्ये द्विप्रभृतीनां व्यञ्जनानामङ्गत्वनिरूप-
णायाह ॥

सँय्योगादिः पूर्वस्य ॥ १०२ ॥

सँय्योगादिभूतो वर्णः पूर्वस्य स्वरस्याङ्गं भवति यथा
अभ्व्वः द्वौ भकारौ वकारश्च सँय्योगः तत्र सँय्योगादिः
पूर्वस्येति कृत्वा पूर्वः भकारः पूर्वस्य स्वरस्याङ्गम् उत्त-
रभकारवकारावुत्तरस्य स्वरस्याङ्गम् यथा हव्व्यम् द्वौ
वकारौ यकारश्च सँय्योगः तत्रैको वकारः सँय्योगादिः
पूर्वस्येति कृत्वा पूर्वस्याङ्गम् वकारयकारावुत्तरस्य ॥

यमश्च ॥ १०३ ॥

यमः पूर्वस्याङ्गं भवति चशब्दात्पूर्ववर्णसहितः यथा
रुक्क्मम् ककारद्वययममकाराः सँय्योगः तत्र कका-
रयमौ पूर्वस्य मकार उत्तरस्य ॥

क्रमजश्च ॥ १०४ ॥

क्रमाज्जातं क्रमजम् यत्सँय्योगादेः परस्य वर्णस्य
द्विरुक्त्या जायते तत् क्रमज मित्युच्यते यथा पार्भ्व्यम्
रेफो द्वौ भकारौ वकारो यकारश्च सँय्योगः तत्र रेफः

सँय्योगादिः क्रमजश्च प्रथमः षकारः पूर्वाङ्गम्, द्वितीयः षकारो वकारो यकारश्चोत्तराङ्गम् व्वर्ष्य्यीय रेफो द्वौ षकारौ यकारश्च सँय्योगः तत्र रेफः सय्योगादिः पूर्वषकारः क्रमज एतौ पूर्वाङ्गम् अपरः षकारो यकारश्चोत्तराङ्गम् ॥

तस्माच्चोत्तरᳪ स्पर्शे ॥ १०५ ॥

तस्मात् क्रमजाद्यदुत्तरं व्यञ्जनं तत्पूर्वाङ्गं भवति स्पर्शे परभूते यथा पार्ष्ण्या रेफषकारो द्वौ णकारौ यकारश्च सँय्योगः तत्र रेफः संयोगादिरिति कृत्वा षकारः क्रमजमिति कृत्वा तस्माच्चोत्तरᳪ स्पर्शे इति कृत्वा पूर्वणकारश्च एते पूर्वाङ्गम्, द्वितीयणकारो यकारश्चोत्तरस्य स्वरस्याङ्गम् ॥

अवसितं च ॥ १०६ ॥

अवसानगतं पूर्वाङ्गं भवति यथा वार्क् ककारोऽवसितः, ऊर्क् अत्र रेफककारयोः संयोगः रेफः संयोगादिः ककारोऽवसितः एतौ पूर्वस्य स्वरस्याङ्गम्, पूर्वाङ्गपराङ्गचिन्तायाः प्रयोजनमाह ॥

व्यञ्जनᳪ स्वरेण सस्वरम् ॥ १०७ ॥

व्यञ्जनं यद्यस्य स्वरस्याङ्गं तत्तेनैव स्वरेण समानस्वरम्भवति अधस्तनान्येवोदाहरणानि तथा चोक्तम् स्व-

र उच्चः स्वरो नीचः स्वरः स्वरित एव च, स्वरप्रधानं (१) त्रैस्वर्यं व्यञ्जनं तेन सस्वरमिति १ अथ शिक्षा त्रिहिता इत्युपक्रम्य उरःकण्ठभ्रूमध्यानि प्रातःसवनमाध्यन्दिनतृतीयसवनेषु यथा क्रमं स्थानानि भवन्तीति प्रतिपादितम् तत एकैकस्मिन्स्थाने वर्णेषु उच्चार्य्यमाणेषु त्रयो विकाराः शरीरस्य भवन्ति पर्य्यायेण ते प्रतिपादिता एव आयाममार्द्दवाभिघाता इत्यनेन सूत्रेण, अधुना तेषु शरीरविकारेषु सत्सु ये स्वरा निष्पद्यन्ते तन्निरूपणायाह ॥

उच्चैरुदात्तः ॥१०८॥

आयामेनोर्द्ध्वगमनेन गात्राणां यः स्वरो निष्पद्यते स उदात्तसञ्ज्ञो भवति यथा (२) अग्ना३इ (३) लाजी३न् उदात्तश्चानुदात्त इत्येवमादयः ॥

नीचैरनुदात्तः ॥ १०९ ॥

नीचैर्मार्द्दवेणाधोगमनेन गात्राणां यः स्वरो निष्पद्यते सोऽनुदात्तसञ्ज्ञो भवति (४) यथा आर्षेयऽ ऋषीणाम् अनुदात्तप्रदेशाः उदात्तानुदात्तꣳ स्वरितमित्येवमादयः ॥

---

(१) स्वरप्रधाने इति 'घ' पुस्तकपाठः ॥

(२) ८ । १० ॥

(३) २२ । ७ ॥

(४) २१ । ६१ ॥

उभयवान्स्वरितः ॥११०॥

उदात्तस्योर्द्ध्वगमनं गात्राणां प्रयत्न अनुदात्तस्याधो गमनं गात्राणां प्रयत्न आभ्यां प्रयत्नाभ्यां समाहारीभूताभ्यां यः स्वर उच्चार्य्यते स स्वरितसञ्ज्ञो भवति यथा (१) धान्यमसि,(२) व्वैष्णव्यौ स्थः (३) ॥

एकपदे नीचपूर्वः सयवो जात्यः ॥१११॥

एकस्मिन् पदे नीचपूर्वोऽनुदात्तपूर्वो यकारेण वकारेण सहितो जात्यः स्वरः प्रत्येतव्यः नीचपूर्व इति सम्भवद्विशेषणम् । अपूर्वोऽपि भवति नीचपूर्वो यथा (४) कन्या इव (५) धान्यमसि । अपूर्वो (६) यथा स्वर्द्देवेषु (७) ॥

---

(१) १ । २० ॥

(२) १ । १२ ॥

(३) अष्टानां स्वरितस्वराणां भेदो याज्ञवल्क्येनापि दर्शितः यथा अष्टौ स्वरान् प्रवक्ष्यामि तेषामेव च लक्षणम् । जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथाऽपरः । तैरो व्यञ्जनसञ्ज्ञश्च तथा तैरो विरामकः । पादवृत्तो भवेत्तद्वत्ताथाभाव्य इति स्वराः ॥

(४) १७ । ९७ ॥

(५) १ । २० ॥

(६) १८ । ६४ ॥

(७) एकपदे नीचपूर्वः सयवो जात्य इष्यते । अपूर्वोऽपि परस्तद्वद्धान्यं कन्या स्वरित्यपि अमुमेवार्थं नारदोऽप्युक्तवान् स्वशिक्षायाम् ॥

उदात्तादयः परे सप्त ॥११२॥

उदात्तादयः परे सप्त स्वराः प्रत्येतव्या यथा अभिनिहित,क्षैप्र,प्रश्लिष्ट,तैरोव्यञ्जन,तैरोविराम,पादवृत्त,ताथाभाव्याः (१) ॥

त्रयो नीचस्वरपराः ॥११३॥

त्रयो नीचस्वरपरा (२) ज्ञेयाः अभिनिहित,क्षैप्र,-प्रश्लिष्टाः ॥

एदोद्भ्यामकारो लुगभिनिहितः ॥११४॥

एकारौकाराभ्यामुदात्ताभ्यामकारोऽनुदात्तो यत्र लुक् लुप्यते तत्राभिनिहितः स्वरो भवति यथा एकारस्य भवति, (३) ते अप्सरसाम् तेऽप्सरसाम्, (४) ते अवन्तु तेऽवन्त्वस्मान् ओकारस्य भवति यथा (५) व्वेदः असि व्वेदोऽसि, (६) तुथः असि तुथोऽसि (७) ॥

---

(१) परे वक्ष्यमाणाः स्वरितभेदा उदात्तादय उदात्त आदौ येषां स्वराणामिति ॥

(२) अनुदात्तस्वरपरा इति ॥

(३) २४ । ३७ ॥

(४) १९ । ५८ ॥

(५) २ । २१ ॥

(६) ५ । ३१ ॥

(७) ए ओ आभ्यामुदात्ताभ्यामकारो रिफितश्चयः । अकारो लुप्यते यत्र तं

युवर्णौ यवौ क्षैप्रः ॥ ११५ ॥

इश्च उश्च यू युवर्णौ उदात्तावनुदात्तस्वरोदयौ यकारवकाराभ्यां यथासङ्ख्येन युक्तौ यदा तदा क्षैप्रसञ्ज्ञः स्वरो भवति इवर्णस्य यथा (१) त्रि अम्बकम् त्र्यम्बकं यजामहे, (२) वाजी अर्वन् आशुर्भव वाज्यर्वन् उवर्णस्य यथा (३) नु इन्द्र योजान्विन्द्र ते हरी, (४) हु अन्तः ह्वन्तः सर्पिः (५) ॥

इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः ॥ ११६ ॥

पूर्वो ह्रस्व इकार उदात्तः परश्च ह्रस्व इकारोऽनुदात्तस्तयोः परस्परप्रश्लिष्टे प्रश्लिष्टः स्वरो भवति यथा (६) अभि इन्धताम् अभीन्धताम्, (७) स्रुचि इव स्रु-

---

चाभिनिहितं विदुरिति तौ चेदुदात्तावनुदात्ते स्वरिताविति चतुर्थाध्यायस्थसूत्रेण स्वरितो भवति ॥

(१) ३ । ६० ॥

(२) ११ । ४४ ॥

(३) ३ । ५१ ॥

(४) ११ । ७० ॥

(५) इ उ वर्णौ यदोदात्तावापद्येते यवौ क्वचित् । अनुदात्ते परे नित्यं विद्यात् क्षैप्रस्य लक्षणमिति । उदात्तस्यान्तस्थीभावे परमनुदात्त ७ स्वरितमिति तदध्यायस्थशास्त्रेण च स्वरितो विहितः ॥

(६) ११ । ६१ ॥

(७) २० । ७० ॥

च्चीव घृतम् (१)॥

स्वरो व्यञ्जनयुतस्तैरोव्यञ्जनः ॥११७॥

उदात्तात्पूर्वस्मात्परो यः स्वरो व्यञ्जनयुतः स तैरोव्यञ्जनसञ्ज्ञकः स्वरो भवति यथा (२) इडे रन्ते हव्ये काम्ये (३)॥

उदवग्रहस्तैरो विरामः ॥ ११८ ॥

उदात्तावग्रहस्तैरो विरामसञ्ज्ञकः स्वरो भवति अयं च समस्तपदेषु भवति अवग्रहवचनात् अवग्रहाभावे तु तैरोव्यञ्जन एव यथा (४) गोपताविति गो । पतौ (५) यज्ञपतिमिति यज्ञ । पतिम् (६)॥

---

(१) इकारो दृश्यते यत्र इकारेण च संयुतः। उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वर इति। इवर्णमुभयतो ह्रस्वमुदात्तपूर्वमनुदात्तं स्वरितमित्यनेनापि तदध्यायस्थेनैव सूत्रेण स्वरितः स्वरो भवति॥

(२) ८। ४३॥

(३) उदात्तपूर्वं यत्किञ्चिद्व्यञ्जनेन युतं पदम्। एष सर्वबहुस्वारस्तैरोव्यञ्जन उच्यते इति॥

(४) २। २॥

(५) ६।११॥ यस्य यकारस्याधो भागे विन्दुरस्ति तस्य जकारोच्चारणमिति वक्ष्यमाणप्रतिज्ञापरिशिष्टसूत्रभाष्यकारेण यकारस्य मध्ये विन्दुप्रक्षेपोऽभिहितः परन्तु तन्मध्ये प्रक्षेपे सति षकारोच्चारणभीतिस्तस्मात्तदधो भागे विन्दुचिह्नं विहितम्॥

(६) अवग्रहात्परो यस्तु स्वरितः स्यादनन्तरम्। तैरो विरामं तं विद्यादुदात्तो य-

विवृत्तिलक्षणः पादवृत्तः ॥११९॥

स्वरयोरन्तरयोरन्तरं विवृत्तिरुच्यते तया लक्ष्यत इति विवृत्तिलक्षणः स पादवृत्तसञ्ज्ञः स्वरो भवति विवृत्त्या व्यवहित इत्यर्थः । यथा (१) ध्रुवा॒ऽअ॑सद॒न्नृत॒स्य॑ (२) का ई॒म् का॒ऽई॑मरे पिश॒ङ्गि॒ला (३) ॥

उदाद्यन्तो(४)न्यवग्रहस्ताथा-भाव्यः ॥१२०॥

उदात्तादिरुदात्तान्तो नीचावग्रहस्ताथाभाव्यसञ्ज्ञः स्वरो भवति यथा (५) तनू॒नप्त्र॒ऽइ॒ति॒ तनू॑ । नप्त्रे॑- (६) तनू॒नपा॒दि॒ति तनू॑ । नपा॑त् अयं तु स्वरितानां मध्ये पठ्यते नत्विह माध्यन्दिनानां स्वरित उपलभ्यते

यवग्रहः इति । उदात्ताचानुदात्त ७ स्वरितमिति चतुर्थाध्यायस्थेनैव शास्त्रेणापि स्वरितो विहितः ॥

(१) २ । ६ ॥

(२) २३ । ५५ ॥

(३) स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते । पादवृत्तो भवेत्स्वारो विवनऽइन्द्रेति निदर्शनमिति । स्वरयोरन्तरे काले विवृत्तिर्यत्र दृश्यते । स स्वारः पादवृत्तः स्यात्काऽईमिति निदर्शनमिति ॥

(४) उदात्ताद्यन्त इति 'घ, पुस्तकपाठः ॥

(५) ५ । ५ ॥

(६) २१ । १० । अयं दशमाङ्कः पदपाठादवगन्तव्यः कुतः वेदस्य पदपाठे सद्भावात् ॥

उदात्तानुदात्तौ तु पृथग्भूतावुपलभ्येते स्वरितस्योदात्तानुदात्तयोरेकीभावे सति तस्मिंश्च तिर्य्यग्गमनं गात्राणां भवति न च तदिह किञ्चिदुपलभ्यते अतो माध्यन्दिनानां पदकाले ताथाभाव्यसञ्ज्ञकः कम्पो (१) भवति तथा चोक्तमौज्जिहायनकैर्माध्यन्दिनमतानुसारिभिः । अवग्रहो यदा नीच उच्चयोर्मध्यतः क्वचित् । ताथाभाव्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनम्, यस्तु ताथाभाव्यस्य स्वरितानाम्मध्ये पाठः अयमन्येषामाचार्य्याणां मतेन तेषां हि मतेन तनूशब्दः संहितावद्भवति अतोऽसौ स्वरितो भवति तदभिप्रायेण स्वरितानां मध्ये पाठः (२) अयमपि चोपरिष्टाद्वक्ष्यति, निहितमुदात्तस्वरितपरमनवग्रहे, स्वरितस्य चोत्तरो देशः प्रणिहन्यत इति तदभिप्रायेण वक्ष्यति, एवमुदात्तानुदात्तस्वरितलक्षणविधानानन्तरं हस्तलक्षणमाह ॥

हस्तेन ते ॥१२१॥

अनेन प्रकारेण हस्तेन ते स्वराः प्रदृश्यन्ते तत्रोदात्ते ऊर्ध्वगमनं हस्तस्य अनुदात्तेऽधोगमनं हस्तस्य एतत्स-

---

(१) कम्पो नाम नीचत्वमिति ॥

(२) माध्यन्दिनविरोधी स्यात्ताथाभाव्यस्तु यः स्वरः । भिन्नौ यतोऽत्र दृश्येते तावुदात्तानुदात्तकौ । तस्मान्माध्यन्दिनीयानां पदे कम्पो विधीयते । संहिताकाले विरोधः पदपाठे तु भवत्येवेति ॥

केषामाचार्य्याणां मतेन स्थितं, (१) स्वरिते तु विप्रतिपद्यन्ते तत्प्रकाशनार्थमिदमाह ॥

चत्वार इतिर्य्यक्स्वरिताः ॥१२२॥

(१) हस्तचालनलक्षणं याज्ञवल्क्येनोक्तम् । हस्तौ सुसंय्यतौ धार्यौ जान्वोरुपरि संस्थितौ । गुरोरनुमतिं कृत्वा पठन्नान्यमतिर्भवेत् । १ ऊरूभागे तृतीये तु करन्यस्याथ दक्षिणम् । प्रसन्नमानसो भूत्वा किञ्चिन्नम्रमधो मुखः २ कूर्मोऽङ्गानीव संहृत्य हस्तदृष्टिर्दृढं मनः । स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः ३ नाभ्याहन्यान्न निर्हन्यान्न गायेन्न च कम्पयेत् । यथादावुच्चरेद्वर्णांस्तथैवैतान् समापयेत् ४ निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयन् । सम्यगुच्चारयेद्वर्णान् हस्तेन च मुखेन च ५ स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत् स्थितौ । हस्ताद्भ्रष्टः स्वराद्भ्रष्टो न वेदफलमश्नुते ६ न कराळो न लम्बोष्ठो नाव्यक्तो नानुनासिकः । गद्गदो बद्धजिह्वश्च न वर्णान्वक्तुमर्हति ७ चुलुनीका स्फुटो दण्डी स्वस्तिको मुष्टिकाकृतिः । एते वै हस्तदोषाः स्युः परशुश्चेति सप्तमः ८ हस्तहीनं तु योऽधीते मन्त्रं मन्त्रविदो विदुः । न साधयति यजू०ंषि भुक्तमव्यञ्जनं यथा । ९ ऋचो यजू०ंषि सामानि हस्तहीनानि यः पठेत् । अनृचो ब्राह्मणस्तावद्यावत्स्वारं न विन्दति १० हस्तेनाधीयमानस्तु स्वरवर्णप्रयोगतः । ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ११ न कुर्वीत पदं दीर्घं न चात्यन्तविलम्बितम् । पदस्य ग्रहमोक्षस्तु यथा शीघ्रगतिर्हयः १२ यथा वाणी तथा पाणीरिक्तं तु परि वर्ज्जयेत् । यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति १३ यथा धनुष्यावितते शरे क्षिप्ते पुनर्गुणः । स्वस्थानं प्रति पद्येत तद्वद्धस्तगतः स्वरः १४ उत्तानं सोन्नतं किञ्चित्सुव्यक्ताङ्गुलिरञ्जितम् । स्वरविच्च स्वरं कुर्यात्प्रादेशोद्देशगामिनम् १५ मनुष्यतीर्थोर्ध्वं कृत्वा पितृतीर्थोदकं व्रजेत् । नामितं करपृष्ठं तु सुव्यक्ताङ्गुलिमोक्षणम् १६ अङ्गुष्ठस्योत्तरे पर्वे (पर्वे इत्यार्षपाठः) यवस्योपरि यद्भवेत् । प्रादेशस्य तु सो देशस्तन्मात्रं (सो देश इत्यपि तथैव ज्ञातव्यः) चालयेत्करम् १७ उदात्तं तु भ्रुवः प्रान्ते प्रचयं नासिकाग्रतः । हृत्प्रदेशेऽनुदात्तं तु तिर्यग्जात्यादिरीरितः १८ स्वरिते त्र्यङ्गुलं विद्यान्निपाते तु षडङ्गुलम् । उत्थाने तु नवाङ्गुल्यमेतत् स्वारस्य लक्षणम् १९ षडङ्गुलं तु जात्यस्य हस्तस्यानुपथस्य च । तच्चतुर्भागमात्रं तु भूयस्तेनैव वर्त्तयेदिति २० । दक्षिणजानूरुसन्धौ कूर्परं धृत्वा मिळितचतुरङ्गुल उत्तानो हस्तो धार्य्य इति ॥ उदात्तादिस्वरेषु हस्तप्रक्षेपप्रकारः कात्यायनेनापि वक्ष्यमाणप्रतिज्ञापरिशिष्टसूत्रे ह्यनुदात्तो मूर्द्धन्युदात्तः श्रुतिमूले स्वरित इति कथितः ॥

जात्याभिनिहितक्षैप्रप्रश्लिष्टा एते चत्वारस्तिर्य्यग्व-स्तं कृत्वा स्वरणीयाः पिष्टदानवद्धस्तं कृत्वेत्यर्थः ॥

अनुदात्तं चेत्पूर्व्वं तिर्य्यङ् निहत्य काण्वस्य ॥१२३॥

एतेषां चतुर्णां जात्यादीनां यद्यनुदात्तं पूर्व्वं भवति तदा तिर्य्यग्वस्तं कृत्वा स्वरयितव्याः काण्वाचार्य्यस्य मतेन उदात्तपूर्वे अपूर्वे च न भवति अनुदात्तपूर्वो यथा (१) वैष्णव्यौ (२) धान्यमसि (३) स्रुपोसि (४) स्वेदोसि (५) अभ्यर्षत (६) योजान्विन्द्र ते (७) अभीन्धतामुखे (८) स्रुचीव घृतम् एतेषु तिर्य्यग्वस्तः क्रियते उदात्तपूर्वेष्वपूर्वेषु च जात्यादिषु तैरो व्यञ्जनवद्धस्तः क्रियते उदात्तपूर्वो भवति यथा (९) पञ्चदशो

---

(१) १ । १२ ॥
(२) १ । २० ॥
(३) ५ । ३१ ॥
(४) २ । २१ ॥
(५) १७ । ९८ ॥
(६) ३ । ५१ ॥
(७) ११ । ६१ ॥
(८) २० । ७९ ॥
(९) १४ । २३ ॥

व्योम (१) कतिधा व्यकल्पयन् अपूर्वो भवति (२) यथा त्र्यम्बकम् (३) इन्द्रः सर्पिरासुतिः ॥

ऋजुन्निहत्य प्रणिहन्यते उदात्ते ॥ १२४ ॥

ऋजुन्निहत्य (४) हस्तमनुदात्तवत् ततः प्रकर्षेण निहन्यते नोच्चो क्रियते जात्याभिनिहितक्षैप्रप्रश्लिष्टा उदात्ते परभूते यथा (५) भूर्भुवः स्वर्द्यौरिव (६) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम् (७) यास-द्विश्वभ्वलिनम् (८) सुचीवेति उदात्त इति कस्मात् (९) धान्यमसि धिनुहि देवान् (१०) पवित्रे स्थो वै-

(१) ३१ । १० ॥

(२) ३ । ६० ॥

(३) ११ । ७० । यत्र विसर्गसमीपे '(' एतच्चिह्नमस्ति तत्रोदात्तानुदात्तस्वरितक्रमेणाङ्गुलिप्रक्षेपः कर्त्तव्य इत्यत्र प्रमाणं विसर्जनीय इति सूत्रव्याख्याऽवसरे द्रष्टव्यम् ॥

(४) उपरितो हस्तमवतार्येत्यर्थः ॥

(५) ३ । ५ ॥

(६) १ । १० ॥

(७) १७ । १६ ॥

(८) २० । ६९ । अयमङ्कः पदपाठादवगन्तव्यः ॥

(९) १ । २० ॥

(१०) १ । १२ ॥

व्याख्यौ (१) ॥
— ४

तीक्ष्णोऽभिनिहितः परम्पर-म्मृदुस्त्वन्यः ॥ १२५ ॥

तीक्ष्ण उच्चारणतो ह्रस्वेन चाभिनिहितः स्वरो भवति ततोऽन्यो मृदुप्रयत्नो भवति किमविशेषेणेत्याह परम्परम् शब्दोऽव्ययम् पूर्वमपेक्ष्य परः परमपेक्ष्य पर इत्येवम् यथा अभिनिहितमपेक्ष्य क्षैप्रः क्षैप्रमपेक्ष्य प्रश्लिष्टः क्षैप्रे जात्यस्यान्तर्भावो द्रष्टव्यः तथा चोक्तम् सर्वतीक्ष्णोऽभिनिहितः प्रश्लिष्टस्तदनन्तरम् । ततो मृदुतरौ स्वारौ जात्यक्षैप्रावुभौ स्मृतौ १ ततो मृदुतरः स्वारस्तैरो व्यञ्जन उच्यते । पादवृत्तो मृदुतमस्त्वेतत् स्वारबलाबलमिति २ ॥

तस्यादित उदात्तꣳ स्वरार्द्धमात्रम् ॥ १२६ ॥

स्वरितस्य स्वरस्यादावुदात्तं ज्ञातव्यं तच्च स्वरार्द्धमात्राकालम् यद्येकमात्रो यदि द्विमात्रो यदि त्रिमात्रः स्वरस्तथाप्यर्द्धमुदात्तं परमनुदात्तं अयं तु स्व-

(१) निहितमुदात्तस्वरितपरमिति वक्ष्यमाणत्वात्स्वरिते च परे द्रष्टव्यम् । अनुदात्तपूर्ववति स्वरितपूर्वे चेदं नीचीकरणं हृदयादप्यधो मनुष्यदानवन्न्युब्जकरं कृत्वा कर्त्तव्यमिति ॥

रिते उदात्तानुदात्तप्रविभागो द्रष्टव्यः स्वरितशब्दे नोदात्तानुदात्तं निर्वर्त्य पृथक् श्रुतिस्वरान्तरमभिधीयते यथा त्रपुताम्रयोः सँय्योगे धात्वन्तरस्य कांस्यस्योत्पत्तिः यथा च गुडदध्नोरेकीभावे मार्जिकोत्पत्तिः एवमुदात्तानुदात्तसंयोगे स्वरितोत्पत्तिः ॥

सप्त ॥१२७॥

सामसु सप्तस्वरानाहुः षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादान् (१) ननु यजुर्वेदलक्षणप्रक्रमे एवं उदात्तानुदात्तसँय्योगे स्वरितोत्पत्तौ कः सामलक्षणप्रसङ्ग उच्यते अग्नौ यजुर्वेदे अध्वर्य्योः सामगानं विहितम् । नान्योध्वर्य्योर्गायेदिष्टका वा एता विहितचितो ह्यस्माद्यदन्योऽध्वर्योर्गायेत् इति ब्रा० २ । ब्रा-

(१) सप्तानां निषादादीनां स्वराणामुच्चारणप्रकारः तेषामुदात्तादिस्वरमध्येऽन्तर्भावश्च पाणिनियाज्ञवल्क्यावुक्तवन्तौ । चाषस्तु वदते मात्रां द्विमात्रां वायसो ब्रवीत् । शिखी रौति त्रिमात्रं तु नकुलस्त्वर्द्धमात्रिकम् । षड्जं मयूरो वदति ऋषभं वृषभो वदेत् । अजा वदति गान्धारं मध्यमं दर्दुरो वदेत् । धैवतं चातको ब्रूते तत्तद्वायुगतः स्वरः । प्रावृट्काले तु सम्प्राप्ते कोकिला पञ्चमं वदेत् ॥ निषादं वदते हस्ती स्वरान् सप्त विनिर्द्दिशेत् । अस्योत्पत्तिर्य्यथा । सङ्गीतदामोदरे । वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः । नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना ॥ नाभेः समुद्गतो वायुर्गन्धश्रोत्रे च चालयन् । स शब्दस्तेन निर्य्याति गान्धारस्तेन कथ्यते । चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः । ऋषभे धैवते तिस्रो द्वे गान्धारनिषादके इति एषां सर्वेषां लक्षणानि ग्रन्थविस्तरभिया न लिखितानीति, उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ । स्वरितप्रभवाः शेषाः षड्जमध्यमपञ्चमा इति । अथ च शतपथब्राह्मणीयवक्ष्यमाणत्रिकण्डिकासूत्रपरिशिष्टेऽपि कात्यायनेनोक्तम् ॥

तपथे ६ सञ्चितिकाण्डे, अतोऽध्वर्य्युकर्त्तृकमिति कृत्वा कश्चिल्लक्षणांशः कृतः सामसु, अपरे त्वाहुः जात्याभिनिहितक्षैप्रप्रश्लिष्टतैरोव्यञ्जनतैरोविरामपादवृत्ताः सप्तस्वरा अत्रावधार्य्यन्ते ताथाभाव्यस्तु वाजसनेयिनां निवार्य्यते ॥

त्रीन् ॥१२८॥

उदात्तानुदात्तस्वरितान्यजुर्वेदे त्रीन्स्वरानाहुः, (१) तथा च उक्ता एव सन्तोऽनूद्यन्ते एवेदानीमपवादार्थम् ॥

द्वौ ॥ १२९ ॥

किमविशेषेण यजुर्वेदे त्रीन्स्वरानाहुः नेत्युच्यते द्वौ स्वरावुदात्तानुदात्तौ भाषितलक्षितौ शतपथब्राह्मणे आहुः । पारिशेष्यान्मन्त्रेषु त्रैस्वर्य्यम् (२) ॥

---

(१) प्रचितस्त्वनुदात्तान्तर्भूत एवेति पृथङ्नोक्तः तल्लक्षणं चतुर्थाध्याये स्वरितात्परमनुदात्तमुदात्तमयामित्यनेन सूत्रेणोक्तम् तद्धस्तचालनप्रकारः प्रतिज्ञापरिशिष्टसूत्रीयकात्यायनकृताशिक्षायां सर्वास्ये प्रचयः स्मृत इति याज्ञवल्क्येन प्रचन्नासाग्र एव चेत्युक्तं पाणिनिनापि कात्यायनानुकूलमेवोक्तं परन्तु याज्ञवल्क्योक्त्या सहाविरोध एवेति बोध्यम् ॥

(२) अन्यब्राह्मणे तु भाषिकोक्ताः स्वरा ज्ञेयाः । ते चामन्त्रस्वरवद्ब्राह्मणस्वरश्चरकाणां त्रैस्वर्य्यमित्यर्थः । तेषां खाण्डकीयौखीयानां चातुःस्वर्य्यमिति क्वचित् । तेषां चरकाणां मध्ये अवान्तरभेदाभिन्नानां खाण्डकीयानां औखीयानां शाखिनामुदात्तानुदात्तस्वरितप्रचितलक्षणं चातुःस्वर्य्यं भवति क्वचिद् ग्रहणात् त्रैस्वर्य्यं चेति ॥

एकम् ॥१३०॥

तानलक्षणमेकं स्वरमाहुर्यज्ञकर्म्मणि (१) ॥

सामजपन्न्यूँखवर्ज्जम् ॥१३१॥

प्रगीतं मन्त्रवाक्यं सामशब्देनोच्यते विश्वेदेवाः शृणुतेति जपः, न्यूँखो बह्वृचि प्रसिद्धः एतानि वर्जयित्वा यज्ञकर्म्मण्येकः स्वरो भवति तानलक्षणः (२) ॥

प्रावचनो वा यजुषि ॥१३२॥

प्रवचनशब्देनार्षपाठ उच्यते तत्र भवः स्वरः प्रावचनः स च यजुषि भवति वा तान इति विकल्पः स च त्रैस्वर्य्यलक्षण एव भवति प्रगृह्यं चर्च्चायामितिना पदेष्वित्यनेनैकस्मात्पर आर्ष इति (३) ॥

---

(१) तानोऽन्येषां ब्राह्मणस्वरः अतोऽन्येषां पञ्चविंशत् षड्विंशत् वाष्कलादि ब्राह्मणानां तान एकश्रुतिस्वरो भवति तान एवाङ्गोपाङ्गानामिति तानस्वराणि छन्दोवत् सूत्राणीति वक्ष्यमाणप्रतिज्ञासूत्रपरिशिष्टेऽप्युक्तम् ॥

(२) सुसमिद्धायेत्यादिः मयीदमित्यादिश्च जपः । न्यूँखो वह्वृचशाखासु ऋग्वेदीयप्रणवोच्चारः । न्यूँखः सम्यङ्मनोज्ञे च साम्नः षट् प्रवणेऽपि चेति मेदिनीकोशे । न्यूँखः सामवेदे निपातित ओकार इति अमरकोशीयतृतीयकाण्डस्य रामानन्दकृतटीकायां स्पष्टमुक्तम् ॥

(३) एवं शातपथिकस्य मन्त्रस्य भाषिकस्वरेण पाठः । साहितिकस्य चातुःस्वर्य्येण महासमाख्ययोपसङ्गृहीतत्वात् । मन्त्रकाण्डपठितानामपि ब्राह्मणभागानामश्वस्तूपर इत्यादीनां त्रैस्वर्य्यमेव । ब्राह्मणकाण्डपठितानां विश्वेदेवाः शोस्तनमापथेहेत्यादीनां भाषिकस्वर एवेति । भाषिकस्वरलक्षणं अथ ब्राह्मणस्वरसंस्कारनियम इत्यारभ्य तानऽएवाङ्गोपाङ्गानामित्यन्तेन त्रिकाण्डिकाभाषिकसूत्रवक्ष्यमाणपरिशिष्टका-

तमितिविकारः ॥१३३॥

तमित्युत्सृष्टसर्वनामका द्वितीया विभक्तिर्गृह्यते द्वितीयया यो निर्दिश्यते स विकारः प्रत्येतव्यः । यथा अनुस्वारꣳ रोष्मसु मकार इति मकारोऽनुस्वारविकारमापद्यते भाविश्यः स षꣳ समानपद इति सकारः षकारविकारमापद्यते (१)

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥१३४॥

तस्मिन्निति सप्तम्यन्तं परिगृह्यते सप्तम्या निर्दिष्टे पूर्वस्य कार्य्यं वेदितव्यम् पूर्वस्य पदान्तस्य विधिः प्रत्येतव्यः यथा ककारपकारयोः सकारमिति तथयोः समिति ॥

तस्मादित्युत्तरस्यादेः ॥१३५॥

तस्मादिति पञ्चमी निर्दिष्टात्परस्य कार्य्यं वेदितव्यम् यथा ओकारात्सु, परेः सिञ्चतेः ॥

षष्ठीस्थाने योगा ॥१३६॥

षष्ठी विभक्तिः स्थाने योगिनी वेदितव्या षष्ठ्यन्तस्य कार्य्यं भवतीत्यर्थः यथा यवयोः पदान्तयोः स्वरमध्ये लोपः ऐकारौकारयोः कण्ठ्यापूर्वामात्रा ताल्वोष्ठयो

र्यायनोक्तेन बोध्यम् ॥

(१) तमित्यारभ्य सूत्रसप्तकं पारिभाषीयम् । स्थाने जायमानो विकारो ज्ञातव्य इति ॥

वत्तरा इति (१) ॥

तेनेत्यागमः ॥ १३७ ॥

तेनेति तृतीयाग्रहणम् तृतीयया यो निर्द्दिश्यते स आगमः प्रत्येतव्यः यथा ङ्नौ क्राभ्यां सकार इति प्रगृह्यं चर्चायामितिना पदेषु (२)

अन्तरेण पर्वणी ॥ १३८ ॥

पर्वशब्देन पदमुच्यते पदयोर्मध्ये आगमो भवति यथा प्राङ्सोमः(३) प्राङ्क्सोमः प्रत्यङ्सोमः(४) प्रत्यङ्क्सोमः त्रीन्समुद्रान् (५) त्रीन्त्समुद्रान् अस्मान्सीते (६) अस्मान्त्सीते ॥

पर एकस्मात् ॥ १३९ ॥

एकस्य पदस्य मध्ये य आगमो विधीयते स परो भवति यथा(७) ह्व इति शीर्षे इति प्रगृह्यं चर्चायामितिना पदेष्वित्यनेनैकस्मात्पदात्पर इतिकार आगमो

(१) स्थानमुच्चारणप्रसङ्गः ।
(२) समीपे जायमान आगमो बोध्य इति ॥
(३) १० । ३१ ॥
(४) १९ । ३ ॥
(५) १३ । ३० ॥
(६) १२ । ७० ॥
(७) १७ । ९३ ॥

विधीयते इति ॥

उभयोर्विकारः ॥१४०॥

द्वितीयया निर्द्दिष्टो विकार इत्यधस्तादुक्तम् । स उभयोर्भवति अन्तरेण पर्वणी च पदान्तपदाद्योरित्यर्थः एकस्य वा वर्णस्य निर्द्दिश्यते यथा आ इदम् (१) एदम् इह ऊर्ज्जम् (२) इहोर्ज्जन्धातन एकवर्णस्य भवति यथा मो सु नः (३) मोषूणांऽइन्द्रात्र सुसाव (४) सुषाव सोमम् (५) ॥

वर्णस्यादर्शनं लोपः ॥१४१॥

दृशिरुपलब्धिवचनः । अनुपलब्धिरदर्शनं वर्णस्य लोप इत्युच्यते वक्ष्यति "लोपं धौ" यथा अयक्ष्माः मा (६) अयक्ष्मामा वस्तेनः, सत्याः नः (७) सत्या नः सन्त्वाशिषः ॥

विकारी यथासन्नम् ॥१४२॥

(१) ४ । १ ॥
(२) १८ । ६३ ॥
(३) ३ । ४६ ॥
(४) १८ । २ ॥
(५) स्थाने जायमानो विः
(६) ४ । १२ ॥
(७) २ । १० ॥

विकारोऽस्यास्तीति विकारी विकारी वर्णोऽवचने यथासन्नम् यो य आसन्नस्तमापद्यते वक्ष्यति स्वरे भाव्यन्तस्थाम् यथा त्रि अम्बकम् त्र्यम्बकम् इन्द्र अन्नः इन्द्रान्नः वचनादन्यदपि भवति यथा अनसो वाहौ सकारो डकारमिति अनड्वान् वचनात् सकारस्य डकारः । परिभाषासूत्रमेतत् ॥

सङ्ख्यातानामनूदेशो यथासङ्ख्यम् ॥ १४२ ॥

समानसङ्ख्यानां यः पश्चादुद्देशः स यथासङ्ख्यम् भवति यस्य या सङ्ख्या प्रथमस्य प्रथमः द्वितीयस्य द्वितीयः तृतीयस्य तृतीय इत्यर्थः । वक्ष्यति सदो द्यौर्नमस्कृतं पिता पथेषु यथा (१) सदः कृतम् सदस्कृतम् (२) तेभ्यः सर्पेभ्यो नमः (३) "द्यौः पिता" द्यौष्पितोपमाम् (४) नमः पथे, शर्म सप्रथा नमस्पथे परिभाषासूत्रमेतत् ॥

सन्निकृष्टविप्रकृष्टयोः सन्निकृ-

---

(१) १९ । १८ ।
(२) १३ । ६ ।
(३) २ । ११ ।
(४) १८ । ५१ ।

छस्य ॥ १४४ ॥

यत्रोदाहरणसंशयः तत्रेयं परिभाषोच्यते सन्निकृष्टविप्रकृष्टयोरुदाहरणयोः सन्निकृष्टस्यैवोदाहरणस्य कार्य्यं प्रत्येतव्यम् न तु विप्रकृष्टस्य यथा असि शिवा सुषदेत्येवमादिषु परभूतेषु असि शब्द आद्युदात्त उक्तः तत्र सन्देहः किं सुम्ना चासि शिवा चासि स्योना चासि सुषदेत्यत्रासि शब्द आद्युदात्तो भवति उत स्योना चासिसुषदेति उभयोरप्यसि शब्दः परभूतः तत्रानेनावधारणं क्रियते यत्रान्यत्रापि सन्निकृष्टानि पदानि भवन्ति तत्र कार्य्यं भवति तद्यथा असि शिवा सुषदा पयस्वतीत्यत्र पयस्वतीसन्निधानात् सुम्ना चासि शिवा चासि स्योना चासि सुषदेत्ययमेवाद्युदात्तो भवति न तु स्योनासुषदेति विप्रकृष्टत्वात् (१) ॥

पूर्वोत्तरयोरुत्तरस्य ॥ १४५ ॥

यत्र पूर्वस्योत्तरस्य च युगपत्कार्य्यं प्राप्नोति तत्रोत्तरस्यैव भवति न तु पूर्वस्य स्वम्यमुदाहरणम् (२) आ च शास्वा च अत्र स्वरिताकार उदात्तः तत्र युगपत्कार्यमुभयोः सन्धावुदात्त एव स्वरविषयकं चैतत्सूत्रम् ॥

द्विरुक्तमाम्रेडितं पदम् ॥ १४६ ।

(१) सहचरितासहचरितयोर्म्मध्ये सहचरितस्यैव कार्य्यहेतुत्वं स्यात् ॥

(२) २१ । ६१ ॥

द्विरभ्यस्तं पदमाम्रेडितसञ्ज्ञं भवति यथा (१) यज्ञायज्ञावो ऽअग्नये, तत्र आम्रेडितसञ्ज्ञायाः प्रयोजनम् आम्रेडितं चोत्तरमित्यादि ॥

सꣳहितꣳस्थितोपस्थितम् ॥१४७॥

इत उत्तरं पदसंहिता वर्तिष्यते द्विरुक्तमित्यनुवर्त्तते । द्विरुक्तं यत्पदमिति करणेन मध्यस्थितेन आद्यन्तसंहितेन पूर्वमादिसंहितमुत्तरपदमन्तसंहितं स्थितोपस्थितसञ्ज्ञं भवति यथा (२) द्वे, इति द्वे, (३) शीर्षे इति शीर्षे, (४) पुनरिति पुनः । (५) वह्नितममिति वह्नि । तमम् । (६) सस्नितममिति सस्नि । तमम् । (७) पप्रितममिति पप्रि । तमम् । तथा चोक्तम् ।
उपस्थितं सेतिकारं केवलं तु पदं स्थितम् । तत्स्थितोपस्थितन्नाम यत्रोभे आह संहिते । १ । अस्यार्थः । इतिकरणसहितमुपस्थितसञ्ज्ञं पदं भवति । केवलमिति करणसहितं स्थितसञ्ज्ञं भवति यत्र पदान्तप-

---

(१) २७ । ४२ ॥

(२) १७ । ९३ । अयमङ्कः पदपाठाद् ज्ञातव्यः ॥

(३) १७ । ९३ । अयमपि तथैव ॥

(४) ४ । १५ ॥

(५) १ । ८ ॥

(६) १ । ८ ॥

(७) १ । ८ ॥

दादी इतिकरणेन सहितौ आह । तत्स्थितोपस्थितपदमुच्यते । स्थितोपस्थितप्रदेशाः, । पूर्वोत्तरसंहितस्य स्थितोपस्थितमवगृह्यस्येति स्थितोपस्थितस्यैव सावग्रहस्य स्वरविशेषविधानार्थमाह ॥

सꣳहितावदवग्रहः स्वरविधौ परं च सर्वं चेदनुदात्तम् ॥१४८॥

अवग्रहशब्देन सावग्रहस्य पदस्य पूर्वपदमभिधीयते । अवग्रहः स्वरविधौ स्वरचिन्तायां संहितावत्स्वरं लभते । इतिकरणेन सह सन्धौ तस्मिंश्च सावग्रहे पदे द्वे भवतः तत्र पूर्वपदं तावदिति करणेन सह सन्धौ संहितावत्स्वरं लभते । परं च अवग्रहात्परं पदं संहितावत्स्वरं लभते । यदि तत्सर्वमनुदात्तं भवति । यदि स्वतन्त्रं किं चिदक्षरमुदात्तं वा स्वरितं वा भवति । तदा स्वकीयया प्रकृत्या भवति । यथा वर्हितममिति वर्हि । तमम् । गृहपत ऽइति गृह । पते । प्रजावतीरिति प्रजा । वतीः । परं च सर्वञ्चेदनुदात्तमिति कस्मात् जर्भारीत्यूर्षा । सूलेशं । व्विरुरुचुरिति वि । रुरुचुः । द्रोणकलश ऽइति द्रोण । कलशः । उदात्तोदाहरणम्, राजस्व ऽइति राज । स्वः- । स्वरितपदोदाहरणम्, स्वरविधाविति किम् । वर्णविधौ संहितावन्न भवति । महंध्य ऽइति महत् । ध्यः । तिष्ठं-

ष्ठ इति तिष्ठतु । व्य॰ । (१) धावंष्ठ इति धावंतु । व्य॰ ॥

इति परस्तिर्यङ्नीचोन्तोदात्ते मध्योदात्ते पर्वणि काण्वस्य वा ॥१४९॥

इति परस्तिर्य्यङ्नीचो भवति अनुदात्तो भवतीत्यर्थः । अन्तोदात्ते मध्योदात्ते वा पदे वा शब्दो भिन्नक्रमो विकल्पार्थः । काण्वस्याचार्यस्य मतेन । (२) ऊर्णोस्त्रवेर्णोत्यूर्णो । स्त्रवेर्णां, (३) द्रोणकलश इति द्रोण । कलशः ॥

उदात्तमयोऽन्यत्र नीच एव ॥१५०॥

काण्वस्येति वर्त्तते अन्तोदात्तमध्योदात्तयोः पर्वणोरन्यत्र इति करणात्परो नीच उदात्तमय एव भवति । प्रचित एव भवतीत्यर्थः । यथा । (४) सोमंगोपा इति सोमं । गोपाः । (५) सस्निंतममिति सस्निं । तमम् । पप्रिंतममिति पप्रिं । तमम् ॥

---

(१) १६ । २३ । अयमङ्कः पदपाठाद् ज्ञातव्यः ॥

(२) १९ । ७८ । तथा ॥

(३) १९ । २५ । अयमपि तथा ॥

(४) १२ । २० ॥

(५) १ । ७ ॥

एकवर्णः पदमपृक्तम् ॥१५१॥

एकवर्णस्याऽपृक्तसञ्ज्ञा विधीयते पदस्य यथा (१) आ (२) उ अपृक्तसञ्ज्ञायाः प्रयोजनं । अपृक्तमध्यानि त्रीणि स त्रिक्रमः ॥

स एवादिरन्तश्च ॥ १५२ ॥

स एवैको वर्णः पदसञ्ज्ञः सन् पदादिसम्बन्धीनि पदान्तसम्बन्धीनि च कार्याणि लभते । यथा । (३) इन्द्र आ इहि । इन्द्रे हि ॥

अवग्रहः पदान्तवत् ॥१५३॥

अवग्रहशब्देन पूर्वपदमिहाभिधीयते । अवग्रहः पदान्तसम्बन्धीनि कार्याणि लभते वर्णविधौ, स्वरविधौ तु अधस्तादुक्तम् संहितावदवग्रहः स्वरविधाविति, यथा (४) भरद्वाज ऽइति भरत् । वाजः । (५) तिष्ठद्भ्य ऽइति तिष्ठत् । भ्यः ॥

---

(१) १ । १ ॥

(२) ७ । ४१ । तथा ॥

(३) ३३ । २५, अयमङ्कः पदपाठादवगन्तव्यः । एहीत्यादौ अन्तस्था दीर्घाकारादीनि स एवादिरन्तश्चेत्यतिदेशाद् भवन्ति २० । ७८ । इन्द्र आ याहीत्युदाहरणं बोध्यम् ॥

(४) १३ । ५० ॥

(५) १६ । २३ ॥

न त्विति करणम् ॥१५४॥

अवग्रहः पदान्तवदित्युपदेशादिति करणमपि प्राप्नोति तन्निषिध्यते । यथा । (१) अन्तःश्लेष ऽइत्यन्तः । श्लेषः । रिफितं च संहितायामनिरुक्तमित्यनेनेति करणमपि प्राप्नोति तन्निषिध्यते (२) ॥

पूर्वेणोत्तरः सꣳहितः ॥ १५५ ॥

इत उत्तरं संहितोच्यते पूर्वेण पदान्तेन उत्तरः पदादिः संहिता यदा क्रियते स्वरतो वर्णतश्च तदा द्विपदसंहितोच्यते यथा (३) इषे त्वा, त्वोर्ज्जे क्रमसंहितेयम् ॥

पदविच्छेदोऽसꣳहितः ॥१५६॥

पदे पदे विच्छेदः पदविच्छेदः । पदविच्छेदो यदा क्रियते तदा असंहितः पाठः । यथा (४) इषे त्वा ऊर्ज्जे त्वा ॥

---

(१) १३ । २३ ॥

(२) न त्विति करणा इति 'घ' पुस्तकपाठः वत्युपदेशादिति करणस्य पदान्तता प्राप्तौ प्रतिषेधः पदान्तधर्मेण लभते ॥

(३) १ । १ ॥

(४) १ । १ ॥

एकपदद्विपदत्रिपदचतुष्पदानेकपदाः पादाः ॥ १५७ ॥

एकं पदं यस्मिन् पादे स एकपदः पादः सा च पदसंहितोच्यते । छन्दसः पादपरिज्ञानार्थम् । एक पदः पादो यथा । (१) हृदिस्पृशम् । द्विपदः पादो यथा । (२) क्रतोः भद्रस्य । क्रतोर्भद्रस्य । त्रिपदः पादो यथा । (३) अग्ने तम् अद्य । अग्ने तमद्य । चतुष्पदः पादो यथा । (४) अग्ने विश्वेभिः सुमना ऽअनीकैः । अनेकपदः पादो यथा । (५) वि धूमम् । अग्ने । अरुषम् मियेध्य । विधूममग्नेऽअरुषम्मियेध्य ॥

वर्णानामेकप्राणयोगः संहिता ॥ १५८ ॥

एवं तावत्पादसंहिता ऋक्षु कर्तव्या यजुष्षु त्वयं विधिः । वर्णानामेकोच्छ्वासोच्चारणयोगः पदे वा वाक्ये विश्रामः सा च प्राणसंहिता यत्र भूयांसि पदानि

(१) १५ । ४४ ॥
(२) १५ । ४५ ॥
(३) १५ । ४४ ॥
(४) १५ । ४६ ॥
(५) ११ । ३७ ॥

अतिक्रम्यावसानं भवति न त्वेकेन प्राणेन तान्विव्याप्तुं शक्यन्ते तत्रायं विधिः । यथा । (१) "त्वामद्य ऽऋषऽ आर्षेयऽऋषीणान्नपादवृणीतायं यजमानः" यत्र त्ववसानं शक्यते व्याप्तुं तत्रावसान एव विरतिः कर्तव्या यथा । (२) इन्द्रो विश्वस्य राजति ॥

विप्रतिषेधऽ उत्तरम्बलवदलोपे ॥१५६॥

शास्त्रद्वयमन्यत्र चरितार्थमेकस्मिन्नर्थे सङ्गच्छते यत्र स तुल्यबलविरोधो विप्रतिषेध उक्तः । तत्रोत्तरं शास्त्रं बलवद्भवति लोपं वर्ज्जयित्वा लोपे तु यतो लोपस्तदेव शास्त्रं बलवद्भवति यथा "स्वरितवान्स्वरित" इत्यस्यावकाशः । अनुदात्तस्वरितसन्धौ स्वरितो भवति यथा(३) स्वाहा अवक्रान्द्राय । स्वाहाऽवक्रान्द्राय, तथा च वक्ष्यति उदात्तवानुदात्तः । अस्यावकाशः । उदात्तानुदात्तसन्धौ उदात्तो भवति । यथा । (४) सुक्ष्मा च असि । सुक्ष्मा चासि । स्वरितोदात्तसन्धौ परत्वादुदात्त एव भवति । (५) यथा सुपर्वा इति । सुपर्वेति, (६) राज्ञी इन्द्र-

---

(१) २१ । ६१ ॥
(२) ३६ । ८ ॥
(३) २२ । ७ ॥
(४) १ । २७ ॥
(५) १ । ३ ॥
(६) ३ । १० ॥

वत्या । राध्येन्द्रवत्या, अलोप इति किम् । स्य एष चे-त्यनेन शास्त्रेण स्यशब्दस्य विसर्जनीयो व्यञ्जने परतो लुप्यते । यथा । (१) एषः । स्यः । वाजी, एतच्च पूर्वं शास्त्रम् । अतोऽन्यद्भवति । रेफे लुप्यते दीर्घश्चोपधेत्यनेन शास्त्रेण रेफे परभूते लुप्यते विसर्ज्जनीय उपधा च दीर्घमापद्यते । एतच्च परं शास्त्रम् ततो लोपस्य बलीयस्त्वाल्लोप एव भवति नोपधादीर्घत्वम् । यथा (२) एषः स्यः राध्यः । एषस्य राध्यो वृषा, (३) एषः छागः । एषच्छागः । विसर्जनीयलोपः चक्रयोः शमिति न शकारः ॥

विसर्ज्जनीयो रिफितः ॥ ॥१६०॥

इत उत्तरमकारोपध आकारोपधस्य विसर्ज्जनीयो रिफितसञ्ज्ञो भवति । वक्ष्यति करमनुदात्तम् । यथा । (४) अच्छिद्रा गात्राण्यसिना मिथू कः । सञ्ज्ञाकरणे प्रयोजनम् । भाव्युपधस्य रिद्विसर्जनीय इति । करिति कः ॥

करमनुदात्तम् ॥ १६१ ॥

(१) ९ । १४ ॥

(२) २३ । १३ ॥

(३) २५ । २६ ॥

(४) २५ । ४१ ॥

करित्येतत्पदमनुदात्तं चेद्रिफितसञ्ज्ञं भवति । अधिकारसूत्रमेतत् । यथा (१) मह्रिपार्थः- पूर्व्यर्ठ० सध्यक्ःः । अनुदात्तमिति किम् । (२) कोऽअस्य वेद भुवनस्य नाभिम् ॥

अन्तरनाद्युदात्तम् ॥ १६२ ॥

अन्तरित्येतत्पदं रिफितसञ्ज्ञं भवति आद्युदात्तं चेन्न भवति । अन्तरित्यन्तः (३) । अन्तस्ते द्यावापृथिवी । अनाद्युदात्तमिति किम् (४) । समुद्रस्य मध्यं चान्तस्य, (५) इयं वेदिः परो ऽअन्तः ॥

अहरभकारपरम् ॥ १६३ ॥

अहरित्येतत्पदं रिफितसञ्ज्ञं भवति भकारपरं (६) चेन्न भवति । यथा । (७) प्रवयाऽह्नाऽहर्ज्जिन्वा (८) । अहरहरित्यहः । अहः । अहरहरप्रयावम् । अभका-

(१) ३३ । ५९ ॥
(२) २३ । ५९ ॥
(३) ७ । ५ ॥
(४) १७ । १ ॥
(५) २३ । ६२ ॥
(६) भकारपरो न चेदित्यपि पाठान्तरं 'ग' चिह्नितपुस्तके ॥
(७) १५ । ६ ॥
(८) ११ । ७५ ॥

रपरमिति किम् (१) तत्ते शुध्यतु शमहोभ्यः (२) । द्यु-भिरक्तोभिरक्तुभिर्व्यक्तम् ॥

आववरिति समानर्चि ॥ १६४ ॥

आवः । वः । इत्येते पदे रिफिते भवतः । उभे अप्ये-कस्यामृचि यदि भवतः । यथा (३) । आवरित्यावः वि सोमतः सुरुचो वेनऽआवः । वरिति वः । सत-श्च योनिमसतश्च वि वः । समानर्चीति किम् (४) । आ वो देवास ऽईमहे, (५) नमो वः किरिकेभ्यः । (६) अस्मे वोऽअस्त्विन्द्रियम् ॥

स्तोत-र्वस्तः सनुत-रभा-र्वाद्वाः ॥ १६५ ॥

स्तोतः वस्तः सनुतः अभाः वाः द्वाः । एतानि पदा-नि रिफितसञ्ज्ञकानि भवन्ति । यथा (७) एतं स्तो-

(१) ६ । १५ ॥
(२) ३५ । २ ॥
(३) १३ । ३ ॥
(४) ४ । ५ ॥
(५) १६ । ४६ ॥
(६) ९ । २२ ॥
(७) २३ । ७ ॥

तरनेन, । (१) दोषावस्तर्द्धिया व्ययम् । (२) आराच्चिद्द्वेषः सनुतर्युयोतु । (३) अग्निः स्वे योनावभारुखा । (४) इदमहन्तम्वार्विहिद्धा । (५) द्वार्थ्यः स्वामम् ॥

स्वः पदमनरणे ॥ १६६ ॥

स्वरित्येतत्पदं रिफितसञ्ज्ञं भवति । अरणशब्दो यदि परो न भवति यथा (६) स्वः न । स्वर्ण घर्मः । (७) स्वः अभि विक्ख्येषम् । स्वरभि विक्ख्येषम्, पदमिति किम्, पदावयवस्य रिफितसञ्ज्ञा माभूत् । (८) राजस्वऽइति राज । स्वः । सोमस्य दात्वमसि स्वाहा राजस्वः, अनरण इति किम् । (९) स्वायचारणाय च ? पदादिश्चाजित्पर इति वक्ष्यति तस्यायं पुरस्तादपवादः ॥

पदादिश्चाजित्परः ॥ १६७ ॥

---

(१) ३ । २२ ॥
(२) २० । ५२ ॥
(३) १२ । ६१ ॥
(४) ५ । ११ ॥
(५) ३० । १० ॥
(६) १८ । ५० ॥
(७) १ । ११ ॥
(८) १० । ६ ॥
(९) २६ । २ । सर्वेष्वपि पुस्तकेष्वेवमेव पाठः ॥

पदादिश्च यदि स्वशब्दो भवति तदा रिफितसञ्ज्ञो भवति जित्परश्चेन्न स्यात् "द्वौद्वौ प्रथमौ जित्" । "ऊष्माणश्च हवर्ज्जं" जिदित्युक्तम् (१) स्वर्ग्यायेति स्वः । ग्याय । स्वर्ग्याय शक्त्या । पदादिरिति किम् (२) स्वाहा राजस्वः । अजित्परमिति किम् (३) स्वःसामिति स्वःसाम् । पदसंहितोदाहरणम् ॥

द्वाः सवितः पुनस्त्वष्टर्नेष्टरकर्होतर्मातः प्रातर्ज्जामातरजीगः प्रणेतरिति च ॥ १६८ ॥

द्वाः सवितः पुनः त्वष्टः नेष्टः अकः होतः मातः प्रातः जामातः अजीगः प्रणेतः एतेषां पदानां विसर्जनीयो रिफितसञ्ज्ञो भवति । यथा (४) मा द्वार्म्मा ते । (५) देव सवितरिति सवितः । (६) पुनर्म्मनः । (७) देव त्वष्टर्भूरि ते । (८) ग्रावो नेष्टः पिब,

(१) ११ । २ ॥
(२) १० । ६ ॥
(३) ३४ । २० ॥
(४) १ । २ ॥
(५) ९ । १ ॥
(६) ४ । १५ ॥
(७) ६ । २० ॥
(८) २६ । २१ ॥

(१)सरस्वति तमिह धातवेऽकः। (२) सोमᳶ हो तव्यं-जं । (३) पृथिवि मातर्मा मा हिᳶसीः । (४) इन्द्रं प्रातर्जुषस्व नः । (५) त्वष्टुर्जामातरद्भुत । (६) आदित्यासिᳶ ऽओषधीरजीगः । (७) भग प्रणेतर्भग सत्यराधः ॥

वृद्धं वृद्धिः॥ १६९ ॥

वृद्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य । शिक्षाविहितं व्याकरणविहितं चास्मिन् शास्त्रे उभयं यतः प्रक्रियते । अत एव हेतोः शिष्याणामेतच्छास्त्रश्राविणां वृद्धिर्भवति ॥

इति कात्यायनकृतौ प्रातिशाख्य सूत्रे प्रथमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यश्रीवज्रटसुतोव्वटकृतौ प्रातिशाख्यसूत्रभाष्ये प्रथमोऽध्यायः ॥

---

(१) ३८ । ५ ॥
(२) २३ । ६४ ॥
(३) १० । २३ ॥
(४) २० । २९ ॥
(५) २७ । ३४ ॥
(६) २९ । १८ ॥
(७) ३४ । ३६ ॥

सञ्ज्ञाः परिभाषाश्च प्रथमाध्याये शास्त्रसंव्यवहारार्थमुक्ताः । इदानीं स्वरसंस्कारयोश्छंदसि नियम इति प्रतिज्ञातौ । स्वरसंस्कारावारभ्येते तत्र च प्रथमं स्वरः प्रतिज्ञात इत्यतः स्वर एव प्रथममारभ्यते ॥

स्वरितवर्ज्जमेकोदात्तं पदम् ॥१॥

एकं स्वरितं प्रथमं वर्ज्जयित्वा एकोदात्तं पदम्भवति सर्वस्मिन्नेव पदे एकमक्षरं स्वरितमुदात्तं च भवति । अन्यान्यक्षराण्यनुदात्तानीति सूत्रार्थः । तत्र स्वरितस्य चत्वारो भेदा भवन्ति तद्यथा । आदिस्वरितमध्यस्वरितान्तस्वरितसर्वस्वरितानि पदानि भवन्ति । आदिस्वरितम् । यथा (१) व्युप्तकेशायेति व्युप्त । केशाय । मध्यस्वरितं यथा (२) मनुष्याणाम् । स्वर्ग्याय । अन्तस्वरितं यथा (३) वैष्णव्यौ, (४) धान्यम् । सर्वस्वरितं यथा (५) स्वः । उदात्तस्य चत्वारो भेदा भवन्ति तद्यथा । आद्युदात्तमध्योदात्तान्तोदात्तसर्वोदात्तानि पदानि भवन्ति । आद्युदात्तम् । यथा (६) अश्वः, (७)

(१) १६ । २९ । अयमङ्कः पदपाठादवगन्तव्यः ॥

(२) ६ । ६ ॥

(३) १ । १२ ॥

(४) १ । २० ॥

(५) ३ । ५ ॥

(६) २४ । १ ॥

(७) ४ । ६ ॥

स्वाहा । मध्योदात्तं यथा (१) वितार्य्ये द्वितार्य्ये । अन्तोदात्तं यथा (२) इषे ऊर्ज्जे रय्यै । सर्वोदात्तं यथा (३) प्र तत् । एता अष्टौ पदभक्तयोऽनेन सूत्रेणोक्ताः आद्युदात्तन्युदात्तसर्वोदात्तानि वक्ष्यति । एवमेता एकादशपदभक्तयो भवन्ति सर्ववेदेषु ॥

अनुदात्तम् ॥ २ ॥

स्वरितादक्षरादुदात्ताद्वा यदवशिष्टं तदनुदात्तं भवति । उक्तान्येवोदाहरणानि । अधिकारार्थमेतत् ॥

नो नौ मे मदर्थे त्रिद्व्येकेषु ॥ ३ ॥

अनुदात्तमित्यनुवर्त्तते नः नौ मे । एतानि मदर्थे वर्त्तमानानि अस्मदर्थं यदि ब्रुवन्ति । बहुवचनद्विवचनैकवचनाभिधायकानि च यदि भवन्ति यथासङ्ख्यं वर्त्तमानानि अनुदात्तानि भवन्ति । नः यथा, (४) अग्न ऽइन्द्राग्नी, (५) स्वस्ति न ऽइन्द्रः । नौ यथा (६) अस्पूरि णौ गार्हपत्यानि सन्तु, मे यथा (७) इमा-

(१) १ । २३ ॥
(२) १४ । २२ ॥
(३) ५ । २० ॥
(४) ३६ । ११ ॥
(५) २५ । १९ ॥
(६) २ । २७ ॥
(७) १७ । २ ॥

मेऽ अग्न ऽइष्टका धेनवः-। (१) इमम् मे व्वरुण (२)॥

मा च ॥४॥

मा इत्येतच्च पदमनुदात्तं भवति। अस्मदर्थे चेद्वर्त्तते। यथा (३) आ मा गन्ताम्पितरा मातरा च। मदर्थ इति किम् (४) मापो मौषधीर्हिंᳬसीः॥

वो वान्ते त्वदर्थे॥५॥

वः वाम् ते एतानि पदानि युष्मदर्थे वर्त्तमानानि बहुवचनद्विवचनैकवचनेषु यथासङ्ख्यं वर्त्तमानानि अनुदात्तानि भवन्ति, वः। यथा (५) तँव्वो दस्मम्। (६) आ वो देवासऽ ईमहे। वां यथा (७) अयँव्वां मित्रावरुणा सुतः। (८) या वां कशा मधुमती, ते

(१) २१।१॥

(२) पदपूर्वाणीति द्रष्टव्यम्। त्रिद्व्यकेष्विति स्पष्टार्थम्। मदर्थ इत्युत्तरार्थम्। सन्देहे साहचर्य्यन्नियामकमिति सर्वादेशस्यैव ग्रहणम्। तेन मे इत्यादेशाविशिष्टस्य न यथा ४।२२। रायो मे॥

(३) ९।१९॥

(४) ६।२२॥

(५) २६।११॥

(६) ४।५॥

(७) ७।९॥

(८) ७।११॥

यथा (१) एष ते रुद्र भागः । (२) अयं ते योनिः (३) ॥

त्वा च ॥ ६ ॥

त्वा इत्येतच्च पदं युष्मदर्थे वर्त्तमानमनुदात्तं भवति। यथा (४) मा त्वाग्निर्ध्वनयीद्धूमगन्धिः । (५) तन्त्वा शोचिष्ठ दीदिवः । नो नौ म इति यथाश्रुतेन सिद्धे यन्मदर्थ इति लिङ्गेक्ष्विति च वदति तच्छिष्यव्युत्पादनार्थम् । मा इत्येतस्य तु पदस्य मदर्थ इति विशेषणं कर्तव्यम् । प्रतिषेधार्थीयस्यापि सम्भवात् । वो वां ते त्वा एतेषां च पदानां त्वदर्थ इति विशेषणं शिष्यव्युत्पादनार्थमेव अन्यार्थस्याव्यभिचारात् ॥

पूर्ववानन्नुदेशः ॥ ७ ॥

पूर्वैः पदैः प्रज्ञापितस्यार्थस्य यत्पश्चात् । अस्मै एषां अस्मिन्नित्यादि सर्वनामपदं तस्यैवार्थस्याभिधायकम्भवति तदनुदेशशब्देनोच्यते (६) । तदनुदात्तम्भव-

(१) ३ । ५७ ॥

(२) ३ । १३ ॥

(३) त्वदर्थे किम् । ८ । १७ । ते नो ऽअर्व्वन्तः ॥

(४) २५ । ३७ ॥

(५) ३ । २६ ॥

(६) पूर्वोऽस्यास्तीति पूर्ववान् । अनुदिश्यते अनेनेत्यनुदेशः । पूर्वमुद्दिष्टस्यार्थस्य पुनर्निर्देशकः शब्दः ॥

ति अस्मै यथा (१) भरन्तोऽस्मायेव तिष्ठते घासमस्मै। एषां यथा (२) इहेहैषां कृणुहि भोजनानि। अस्मिन् यथा (३) आस्मिन्हव्या जुहोतन। पूर्ववानिति किम्, (४) सोमः- पवते सोमः पवतेऽस्मै ब्रह्मणे। (५) आसां प्रजानामेषाम्पशूनाम् ॥

असि ॥ ८ ॥

असीत्येतत्पदमनुदात्तं भवति (६) कृष्णोऽस्याखरेष्ठः, वेदिरसि बर्हिषि। आख्यातमसि शब्दस्तस्य वक्ष्यमाणोऽनुदात्तस्वरः प्राप्त एव इह यद्ग्रहणं तदाख्यातपदानभिज्ञस्यापि ज्ञानार्थम् ॥

यथा गृभो भुवोऽग्निभ्यः ॥ ९ ॥

यथा शब्दो गृभो भुवो ऽग्निशब्देभ्यः परोऽनुदात्तो भवति। गृभः, यथा (७) पुरा जीव गृभो यथा। भुवः,

---

(१) ११ । ७४ ॥
(२) १० । ३२ ॥
(३) ३ । १ ॥
(४) ७ । २१ ॥
(५) १६ । ४७ ॥
(६) २ । १ ॥
(७) १२ । ८५ । त्रिद्व्येकेष्विति इह पूर्वर्ते० श्रुतमित्यतः प्रागनुवर्त्तते ॥

यथा (१) सत्यस्याग्निर्भुवो यथा। अग्निर्यथा (२) भ्राजन्तो ऽग्नयो यथा। एतेभ्यः किम् (३) यथा नो व्यंसस्कृत् ॥

गिर्व्वणः ॥ १० ॥

गिर्व्वण इत्येतत्पदमनुदात्तं भवति। (४) परि त्वा गिर्व्वणो गिरः। एतच्चामन्त्रितत्वादेवानुदात्तं प्राप्तं यत्पुनरुच्यते तदामन्त्रितानभिज्ञस्यापि प्रत्ययार्थम् ॥

अग्ने घृतेनेति च ॥ ११ ॥

अग्ने पूर्वं घृतेनेत्येतत्पदमनुदात्तं भवति। यथा (५) अग्ने घृतेनाहुत। अग्ने पूर्वमिति किम्। (६) अङ्गिरो घृतेन वर्द्धयामसि ॥

प्रचिकितश्च ॥ १२ ॥

प्रपूर्वं चिकित इत्येतत्पदमनुदात्तं भवति। यथा (७)

---

(१) २३। २९॥

(२) ८। ४०। असि शिवा सुषदेत्यादिसूत्रविहितवर्ज्यम्। अनुदात्तमाख्यातमामन्त्रितवदित्यस्यैवायं प्रपञ्चः॥

(३) ३। ५८॥

(४) ५। २९॥

(५) १७। ५०॥

(६) ३। ३॥

(७) १९। ५२। ननु पदपूर्वमामन्त्रितमनानार्थेऽपादादावित्युक्तत्वान्न वाच्यमेत-

त्वꣳ सोम प्रचिकितो मनीषा । अपूर्वमिति किम् । अन्यपदपूर्वमनुदात्तं न भवति । एतदप्यामन्त्रितत्वादेवानुदात्तं मन्दधीप्रतिपत्त्यर्थमुच्यते ॥

एनोऽपापे ॥१३॥

एन इत्येतत्पदमपापे वाच्येऽनुदात्तं भवति । अवशिष्टं चैतत्प्रातिपदिकमात्रं सर्वलिङ्गं गृह्यते पुल्लिङ्गं भवति यथा (१) उदेनमुत्तरान्नय, स्त्रीलिङ्गं भवति यथा (२) मैनान्तपसा मार्चिषाऽभि शोचीः, (३) नपुंसके भवति यथा । (४) मातेव पुत्रं बिभृताप्स्वेनत् । ४

दिति चेत् । श्रुतौ । इन्द्राणेर्वा विशो गिर्वणाः । क्षत्रमेवैतद्विभाषा परिवृणोति । तादिदं विशा परिवृतमिति काण्वपाठात् । माध्यन्दिनपाठे तु विशो गिर इति । गिर्व्वणशब्देन व्यत्ययेन प्रथमाबहुवचनस्थाने द्वितीयाबहुवचनमिवाभाति । सान्तस्य प्रथमैकवचनं सम्बुद्ध्यन्तं च । सन्देहे सम्बुद्ध्यन्तमेवेदम् । यतः परित्वेति मन्त्रस्य सदःकरणे विनियुक्तत्वात् । इन्द्रसद इत्यभिधानादिन्द्रो गिर्वण इति सम्बोद्ध्यते । प्रमन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वदितीन्द्रवाचकस्य गिर्वणशब्दस्य दर्शनात् । हे गिर्वण इन्द्र । इन्द्रो गिर्वेति श्रुतेः । इमा गिरः ऋग्यजुःसामलक्षणा वाचः विशो मरुतः त्वा परिभवन्तु स्तोतुं परिगृह्णन्तु सेवितुं वा विश्वतः सर्वतः परिभवन्तु कीदृशा अनुवृद्धयः इन्द्रमनुवृद्धिर्येषामित्यनुवृद्धयः कीदृशं त्वां वृद्धायुं वृद्धश्चासावायुश्चेति आयुर्मनुष्यः महापुरुष इत्यर्थः । मनुष्यादिव्यवहारार्थं गिरः सम्भवा इति श्रुतितात्पर्येण क्षत्रमेवैतद्विशा परिवृणोति तादिदं क्षत्रं विशा परिवृतमित्युक्तम् ॥

(१) १७ । ५० ॥

(२) १२ । १५ ॥

(३) नपुंसकमिति 'घ' पुस्तकपाठान्तरम् ॥

(४) १२ । ३५ ॥

अपाप इति किम् । (१) देवकृतस्यैनसोऽवयजनमसि, (२) यद्देनश्चकृमा वयम् ॥ (३)

इह पूर्वं श्रुतम् ॥ १४ ॥

इह पूर्वं श्रुतमित्येतदनुदात्तम्भवति । यथा (४) ममेदिह श्रुतं हवम् । इह पूर्वमिति किम् । (५) श्रुतम्मे मित्रावरुणा हवेमा । एतद्याख्यातत्वादनुदात्तं मन्दधीप्रतिपत्त्यर्थमुच्यते ॥

मन्ये पदपूर्वं सर्वत्र ॥ १५ ॥

मन्ये इत्येतत्पदं पदपूर्वं अनुदात्तं भवति सर्वत्र (६) यथा (७) अग्निं होतारं मन्ये दास्वन्तम् । आख्यातत्वादाख्यातवद्योगादिभिः स्वरविकारो यः

---

(१) ८ । १३ ॥

(२) ३ । ४५ ॥

(३) द्वितीयाटौस्स्वेन इति वच्छब्दमात्रस्यानुकरणं लिङ्गाद्यविवक्षया तेन सर्वलिङ्गं सर्ववचनं च गृह्यते अनुदेशवाचीत्यर्थः ॥

(४) ७ । ९ । श्रुतमिति कृदन्तादित्यपि सम्भवात् एतस्य आख्यातत्वादनुदात्तमाख्यातमित्यनेनानुदात्तत्वे सिद्धे विधानं ज्ञापकम् । श्रुधातोराख्यातस्य नानुदात्तत्वम् । तेन वरुण, श्रुधी, हवमित्यस्य न निघातः ॥

(५) ७ । ९ ॥

(६) सर्वत्रेति यद्वृत्तोपपदाच्चेति निषेधबाधनार्थम् । १५ । ४१ । तम्मन्ये यः ॥

(७) १५ । ४७ ॥

प्राप्तः सोऽनेन सर्वत्र ग्रहणेन निषिध्यते अपदपूर्व्वस्य स्थाप्यते ॥

वा च कमु चित्समस्माद् घ ह स्म त्व ईम्मर्य्या अरे स्विन्निपाताश्चेत् ॥ १६ ॥

वा च कम् उ चित् । समस्मात् । घ । ह । स्म । त्व ईम् । मर्य्याः । अरे । स्वित् । एतानि पदानि अनुदात्तानि भवन्ति यदि निपातानि भवन्ति । असत्त्ववचनानि भवन्तीत्यर्थः । वा यथा । (१) व्वातो वा मनो वा । च यथा (२) अग्निश्च पृथिवी च सन्नते । कं यथा । (३) इमानु कं भुवना सीषधाम, उ यथा (४) यऽ उ संभूत्याᳪ रताः, । चिद्यथा । (५) उतापवक्ता हृदया व्विधश्चित्, । समस्माद्यथा । (६) उरुष्या णोऽ अघायतः समस्

(१) ९ । ७ ॥
(२) २६ । १ ॥
(३) २५ । ४६ ॥
(४) ४० । ९ ॥
(५) ८ । २३ ॥
(६) ३ । २६ ॥
(७) ७ । ३२ ॥

न्वते । ह यथा (१) दधे ह गर्भमृत्वियम् । स्म यथा । (२) अस्ति हि ष्मा ते शुष्मिन्नवयाः, त्वो यथा । (३) पीयति त्वोऽअनु त्वो गृणाति, ईम् यथा । (४) का ऽईमरे पिशङ्गिला । मर्य्याः यथा । (५) आविर्म्मर्य्याऽ आवित्तोऽअग्निर्गृहपतिः । अरे यथा । (६) अजारे पिशङ्गिला । स्विद्यथा । (७) अधः स्विदासी३दुपरि स्विदासी३त् । निपाता इति किम् । (८) चिदसि मनासि (९) ॥

पदपूर्वमामन्त्रितमनानार्थे पादादौ ॥ १७ ॥

पदपूर्वमामन्त्रितं यत् पदं तदनुदात्तं भवति । यदि तन्नानाभूतस्यार्थस्याभिधायकन्न भवति । यदि तत्

---

(१) २३ । ६३ ॥
(२) ३ । ४६ ॥
(३) १२ । ४२ ॥
(४) २३ । ५५ ॥
(५) १० । ९ ॥
(६) २३ । ५७ ॥
(७) ३३ । ७४ ॥
(८) ४ । १९ ॥
(९) निपाता आद्युदात्ता इत्येतत्सूत्रबाधनार्थमिदं सूत्रमुक्तम् ॥

द्विवचनबहुवचनेनारभ्यत इत्यर्थः । (१) यदि च पादादौ न भवति पदपूर्वं भवति यथा । (२) त्वमग्ने व्रतपाऽ असि । (३) व्यथं सोम व्रते तव । अनानार्थ इति किम् । (४) मित्रस्य मा चक्षुषेक्षध्वमग्नयः, (५) आदित्यानां पत्वान्विहि देवाः । अपादादाविति किम् । (६) या वां कशा मधुमत्यश्विना । (७) सं समिद्युवसे वृषन्नग्ने ॥

तेनानन्तरा षष्ठ्येकपदवत् ॥ १८ ॥

तेनामन्त्रितेनाव्यवहिता षष्ठ्येकपदवद्भवति । आनन्तर्य्यं चेह देशकृतमर्थकृतं च गृह्यते । देशकृतं पुरस्तादुपरिष्टाद्वा षष्ठ्यन्तं पदमामन्त्रितस्य । अर्थकृतमेकार्थीभावः । एतदुक्तं भवति । यदि तत्षष्ठ्यन्तमामन्त्रितस्य विशेषणं भवति । अथैकपदवत्स्वरो भवति । एतदुक्तं भवति यदि षष्ठ्यन्तं वाक्यादौ पादादौ वा न भवति पदपूर्व्वं भवति अथ तदप्यनुदात्तं भवति । अ-

---

(१) यदि तत्प्रभृत्यन्यद्वाक्यन्नारभ्यत्य इत्यर्थः इति 'ग' पुस्तकपाठः ॥

(२) ४ । १६ ॥

(३) ३ । ५६ ॥

(४) ५ । ३४ ॥

(५) २२ । १९ ॥

(६) ७ । ११ । पादग्रहणादृक्ष्वेव । यजुष्षु वाक्यादिर्ज्ञेयः ॥

(७) १५ । ३० ॥

तोऽन्यथात्वे आद्युदात्तं भवति। यथा (१)। अपान्नपात्। देवीरापो ऽअपान्नपात्। ऋषीणान्नपात् यथा। (२) ऋषीणान्नपादवृणीत। (३) विश्वासां भुवां पते, (४) उत्तिष्ठ ब्रह्मणस्पते। अनन्तरेति किं। (५) ब्रह्मणस्पते त्वमस्येत्यत्र एकपदवदिति च वदिति "व्युपदेशादन्यत्राद्युदात्तत्त्वं षष्ठ्या (६) भवति यथा। (७) ऊर्जो नपाज्जातवेद इत्यत्र ऊर्क्शब्दस्य षष्ठ्यन्तस्य तेनानन्तरा षष्ठ्येकपदवदित्यनेन सूत्रेणामन्त्रितस्यानन्तरा षष्ठ्येकपदवत्स्वरं लभते इत्येतदुक्तं भवति॥ अधुनाऽऽमन्त्रितेन सह षष्ठ्या यत्रैकार्थीभावो न भवति तत्रत्युदाहरणभूतं सूत्रं शिष्यभ्रान्तिव्युदासार्थं स्वयमेव सूत्रकारः पठति॥

न पृथिवि देवयजन्योषध्या देव भूरेः पवित्रपते पवित्रपूतस्यापान्नपान्नृणान्नृपते सोमाग्नेः सोमेन्द्रस्य सोम

(१) ६ । २७ ॥

(२) २१ । ६१ ॥

(३) ३७ । १८ ॥

(४) ३४ । ५६ ॥

(५) ३४ । ५८ ॥

(६) वत्युपदेशादाद्युदात्तत्वं षष्ठ्यन्तस्य इति 'घ' पुस्तकपाठः ॥

(७) १२ । १०८ ॥

सुवीर्य्यस्य सोम व्विश्वेषां देवानां प्रजापते यस्य यस्य देवाग्ने तवाग्ने व्वाजस्याग्ग्ने व्वरुणस्यापो ऽअस्माकम् ॥ १९ ॥

पृथिवि देवयजन्योषध्याः, देव भूरेः । पवित्रपते पवित्रपूतस्य । अपां नपात् । नृणां नृपते । सोमाग्नेः । सोमेन्द्रस्य । सोम सुवीर्य्यस्य, सोम व्विश्वेषां देवानाम् । प्रजापते यस्य, यस्य देव । अग्ने तव । अग्ग्ने व्वाजस्य । अग्ग्ने व्वरुणस्य । आपो ऽ अस्माकम् । एतेषामामन्त्रितानां याऽनन्तरा षष्ठी साऽनेकार्थीभावान्नैकपदवत्स्वरं लभते । यथा (१) पृथिवि देवयजनी । पृथिवि देवयजन्योषध्यास्ते । देव भूरेर्यथा । (२) व्वामस्य हि क्षयस्य देव भूरेः । पवित्रपते पवित्रपूतस्य यथा । (३) तस्य ते पवित्रपते पवित्रपूतस्य । अपान्नपाद्यथा । (४) अपान्नपात्प्रतिरक्षन्नसुर्य्यम् । नृणान्नृ-

(१) १ । २५ ॥
(२) ८ । ६ ॥
(३) ४ । ४ ॥
(४) ८ । २४ ॥

पते यथा । (१) त्वन्नृणाम्नृपते जायसे शुचिः, सोमाग्नेर्यथा । (२) उशिक् त्वं देव सोमाग्नेः । सोमेन्द्रस्य यथा । (३) वशी त्वं देव सोमेन्द्रस्य । सोम सुवीर्यस्य यथा । (४) अच्छिन्नस्य ते देव सोम सुवीर्यस्य । सोम विश्वेषां देवानां यथा । (५) अस्मत्सखा त्वं देव सोम विश्वेषां देवानाम् । प्रजापते यस्य यथा । (६) स नो भुवनस्य पते प्रजापते यस्य । यस्य यथा, (७) यस्य देव दधिषे पूर्वपेयम् । अग्ने तव यथा । (८) अग्ने तव श्रवो वयः । अग्ने वाजस्य यथा । (९) अग्ने वाजस्य गोमतः । अग्ने वरुणस्य यथा । (१०) त्वन्नोऽ अग्ने वरुणस्य विद्वान् । आपोऽ अस्माकं यथा । (११) आपोऽ अस्माकमन्तरुदरे सुशेवाः । एवमादी-

(१) ११ । २७ ॥
(२) ८ । ५० ॥
(३) ८ । ५० ॥
(४) ७ । १४ ॥
(५) ८ । ५० ॥
(६) १८ । ४४ ॥
(७) ७ । ७ ॥
(८) १२ । १०६ ॥
(९) १५ । ३५ ॥
(१०) २१ । ३ ॥
(११) ४ । १२ ॥

न्यन्यान्यपि प्रत्युदाहरणानि द्रष्टव्यानि, यथा । (१) यस्यौषधीः प्रसर्प्पथ ॥

सुमङ्गल सत्यराजन्विकिरिद्र विलोहित दरिद्र नीललोहित श्रेयस्कर भूयस्कराम्बे ऽअम्बिकेऽम्बालिके शरव्ये ब्रह्म्म सꣳशिते मरुतो ऽअश्विना यव्ये गव्ये द्यावापृथिवी ऽउरो ऽअग्ना ऽ३इ पत्नीवँल्लाजीँ३ञ्छाचीँ३न्मीढुष्टम शिवतम सहस्राक्ष शतेषुधे व्वसुपते व्वसुदावन् ॥ २० ॥

सुमङ्गल सत्यराजन् । विकिरिद्र विलोहित । दरिद्र नीललोहित, श्रेयस्कर, भूयस्कर । अम्बे ऽअम्बिकेऽम्बालिके । शरव्ये ब्रह्म सꣳशिते । मरुतोऽ अश्विना । यव्ये गव्ये । द्यावापृथिवीऽ उरो । अग्ना ३इ पत्नीवन् । लाजी३न् । शाची३न् । मीढुष्टम शिवतम । सहस्राक्ष शतेषुधे, व्वसुपते व्वसुदावन् । एता-

(१) १२ । ८६ ॥

न्यामन्त्रितानि, नानुदात्तानि (१) भवन्ति । पदपूर्व-मित्यस्यापवादः । सुमङ्गल सत्यराजन्यथा (२) सुश्लोक सुमङ्गल सत्यराजन् । विकिरिद्र विलोहित यथा । (३) विकिरिद्र विलोहित नमस्ते । दरिद्र नीललोहित यथा । (४) अन्धसस्पते दरिद्र नीललोहित । अत्र सुमङ्गलविकिरिद्रशब्दस्य पादादित्वादाद्युदात्तत्वं सिद्धमेव इति तद्विशेषणार्थं द्वितीयपदस्योच्यते । एवं सर्वत्रैतज्जातीयकेषु द्विपदेषु प्रयोजनं द्रष्टव्यम् । श्रेयस्कर भूयस्कर यथा । (५) बहुंकार श्रेयस्कर भूयस्कर । अम्बेऽम्बिके यथा । (६) अम्बेऽम्बिकेऽम्बालिके न मा नयति कश्चन, शरव्ये ब्रह्म सशंसिते यथा । (७) परा पत शरव्ये ब्रह्म सशंसिते । मरुतोऽश्विना यथा । (८) इता मरुतोऽश्विना । यव्ये गव्ये यथा । (९) य-

(१) आद्युदात्तानि भवन्तीत्यर्थः । पादादेराद्युदात्तत्वे सिद्धे उत्तरार्थयोगकरणम् । पाणिनिनाऽपि उक्तमामन्त्रितं पूर्वमविद्यमानवदिति प्रतिपादितम् ॥

(२) २० । ४ ॥

(३) १६ । ५२ ॥

(४) १६ । ४७ ॥

(५) १० । २८ ॥

(६) २३ । १८ ॥

(७) १७ । ४५ ॥

(८) ३३ । ४७ ॥

(९) २३ । ८ । एतानि निपात्यन्ते समूहार्थे । यवमयः समूह उक्तो धानाः सर्वमावृत्याहुतस्य शेषस्याश्नाय प्रदाने विनियुक्तं निपातनत्वादाद्युदात्तत्वम् ॥

ख्ये गव्यं ऽएतदन्नमत्त देवाः, द्यावापृथिवीऽ उरो यथा। (१) द्यावापृथिवी ऽ उरो ऽअन्तरिक्ष । अग्नाऽ ३ इ पत्नीवन्यथा। (२) अग्नाऽ३ इ पत्नीवन्त्सजूः । लाजी-३न् शाचीइन् यथा । (३) भूर्भुवः स्वर्लाजी ३ ञ्छाची-३न् । मीढुष्टम शिवतम यथा । (४) मीढुष्टम शिव-तम शिवो नः । सहस्राक्ष शतेषुधे यथा । (५) धनु-ष्टुठं० सहस्राक्ष शतेषुधे । वसुपते वसुदावन्यथा । (६) मघवा वसुपते वसुदावन् ॥

इडोत्तराणि नव स्वानोत्तराणि ष-ड्ग्न्युत्तराणि चत्वारि भगोत्तराणि चेन्द्रोत्तरमेकठं० सिनीवाल्युत्तरञ्च-प्रजापतये ब्रह्मन्निति च ॥२१॥

---

(१) ४ । ७ ॥

(२) ८ । १० । सर्वमग्ना३इ लाजी ३ञ्छाची ३नितिसर्वोदात्तस्य प्लुतस्य च वक्ष्यमाणत्वात् । अग्ना३इ पत्नीवन्निति आमन्त्रितत्वादत्र पाठः । आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्य इति वार्त्तिकेन एचोऽप्रगृह्यस्याऽदूराद्धूते पूर्वस्यार्द्धस्याऽऽऽदुत्तर-स्येदुतौ । इत्यनेन पाणिन्युक्तसूत्रेण च अग्ना ३इ इत्यस्य पदस्य सिद्धिः ॥

(३) २३ । ८ ॥

(४) १६ । ५१ ॥

(५) १६ । १३ ॥

(६) १२ । ४३ ॥

इडोत्तराणि नवामन्त्रितानि पदान्याद्युदात्तानि भवन्ति । यथा । (१) इडे, रन्ते । हव्ये, काम्ये । चन्द्रे, ज्योते । अदिति । सरस्वति । महि । विश्रुति । स्वानोत्तराणि षडामन्त्रितानि पदान्याद्युदात्तानि भवन्ति । यथा । (२) स्वान । भ्राज । अङ्घारे । बम्भारे । हस्त । सुहस्त । कृशानो । अग्न्युत्तराणि चत्वार्यामन्त्रितानि पदान्याद्युदात्तानि भवन्ति । यथा (३) अग्ने । इन्द्र । वरुण । मित्र । देवाः, भगोत्तराणि च । चशब्दाच्चत्वार्य्येवामन्त्रितान्याद्युदात्तानि भवन्ति । यथा । (४) भग । प्रणेतः । भग सत्यराधः । भग । इन्द्रोत्तरमेकं पदमाद्युदात्तं भवति यथा (५) इन्द्र । गोमन् । सिनीवाल्युत्तरञ्च । च शब्दादेकमेवामन्त्रितमाद्युदात्तं भवति। यथा (६) सिनीवालि पृथुष्टुके । प्रजापतये ब्रह्मन्निति च । अत्र ब्रह्मन्नित्यामन्त्रितमाद्युदात्तं भवति । यथा (७) प्रजापतये ब्रह्म-

(१) ८ । ४३ । कारावानां तु हव्योत्तराणीति ज्ञेयम् ॥
(२) ४ । २७ ॥
(३) ३३ । ४८ ॥
(४) ३४ । ३६ ॥
(५) २६ । ४ ॥
(६) ३४ । १० ॥
(७) २२ । ४ । एकं सिनीवाल्युत्तरमित्येकशब्देऽनुवर्त्तमानेऽपि पुनरेकशब्दग्रह-

न्नर्भ्वम् ॥

भूतिराद्युदात्तम् ॥ २२ ॥

अनुदात्ताधिकारो निवृत्तः । इत उत्तरमाद्युदात्ताधिकारः प्रवृत्तः, भूतिरित्येतत्पदमाद्युदात्तं भवति यथा (१) । भूत्यै जागरणम् । (२) नमो भूत्यै येदम् । भूतिरिति किम् । (३) भूतं च (४) मे भविष्यच्च मे ॥

कदा न रिष्येम पूर्वम् ॥ २३ ॥

कदेत्येतत्पदमाद्युदात्तं भवति । न रिष्येम पूर्वं चेद्भवति यथा (५) । न रिष्येम कदा चन । न रिष्येम पूर्वमिति किम् (६) । कदा चन स्तरीरसि ॥

आमन्त्रितञ्च ॥ २४ ॥

णेन ज्ञापयस्याब्रह्मन्निति क्वचिदेकशब्दो न पठ्यते तदा आब्रह्मन्निति ब्रह्मशब्दः सप्तम्यन्तो "निशब्दो बहुल" मिति सूत्रकृदुक्तेः । आ राष्ट्रे राजन्य इत्युत्तरवाक्यनिदर्शनात् । "ब्राह्मणऽ एव ब्रह्मवर्चसन्दधाति योषित्येव रूपं दधाति" ब्राह्मणे इत्युक्तेश्च । इतरथा एतद् ब्रह्मन्निति वत्स्यात् ॥

(१) ३० । १७ ॥

(२) १२ । ६५ ॥

(३) १८ । ११ ॥

(४) भूतिरिति प्रथमानिर्देशात्सार्वविभक्तिको निर्देशः ॥

(५) ३४ । ४१ ॥

(६) ३ । ३२ ॥

आमन्त्रितमाद्युदात्तम्भवति । यस्यामन्त्रितस्याधस्तात्स्वरो न विहितः । कस्य चाधस्तात्स्वरो न विहितः । पदपूर्व्वं यन्न भवति । पादादौ वाक्यादौ वा यद्भवति तदाद्युदात्तं भवति। अपदपूर्व्वम्भवति यथा (१)। अग्ने गृहपते । वाक्यादौ भवति यथा (२)। अग्नय: सगरा: (३)। देवा ऽआशा पाला: । पादादौ भवति यथा (४)। या वाङ्मधु मधुमत्यश्विना (५)। विप्रेभि: सोम्यम्मध्वग्ने। सुमङ्गलादि तु निपातितमेव ॥

कृष्णो मृगसँय्योगे ॥ २५ ॥

कृष्णशब्दो मृगवचन आद्युदात्तो भवति। यथा। (६) कृष्णोऽस्याखरेष्ठ:। (७) कृष्णो राल्या ऽक्टत्तो जतू:। मृगसंयोग इति किम् । (८) श्वा कृष्ण: कर्णो गर्द्दभ:। अत्र कृष्णशब्दो वर्णवचनः वर्णविशेषाभिमतत्वात् ॥

ऽव्ययवांश्चान्तः ॥ २६ ॥

(१) ३ । ३८ ॥
(२) ५ । ३४ ॥
(३) २२ । १९ ॥
(४) ७ । ११ ॥
(५) ३३ । १० ॥
(६) २ । १ ॥
(७) २४ । ३६ ॥
(८) २४ । ४० ॥

अन्तःशब्दो द्विविधः व्ययवानव्ययवांश्च यस्य विभक्त्यादिभिर्विकारो न क्रियते सोऽव्ययवान् । तथा चोक्तम् । सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति । यस्य पुनर्विभक्त्यादिभिर्विकारः क्रियते स व्ययवान् । स चाद्युदात्तो भवति । यथा (१) । समुद्रश्च मध्यं चान्तश्च (२) । इयँ वेदिः परोऽ अन्तः पृथिव्याः । व्ययवानिति किम् । (३) अन्तर्यच्छ मघवन् ॥

परः प्रधाने ॥ २७ ॥

परशब्दः प्रधानवचनः अपरिमितवचन आद्युदात्तो भवति । यथा । (४) यस्मान्न जातः परोऽ अन्योऽ अस्ति । (५) इयँ वेदिः परः । प्रधान इति किम् । (६) परो दिवा परऽ एना पृथिव्या ॥

मात्रा च परिमाणे ॥ २८ ॥

मात्राशब्दस्य परिमाणवचन आद्युदात्तो भवति ।

(१) १७ । २ ॥
(२) २३ । ६२ ॥
(३) ७ । ४ ॥
(४) ८ । ३६ ॥
(५) २३ । ६२ ॥
(६) १७ । २९ ॥

यथा । (१) कस्य माता न विंद्यते । (२) गोस्तु माता न विंद्यते । परिमाण इति किम् । (३) विभूर्म्माता प्रभूः पिता । अत्र मातृशब्दस्य सम्बन्धिवचनस्य तृतीयान्तस्यैतद्रूपं भवति । अतः परिमाणवाची न भवति ॥

दक्षिणा च ॥ २९ ॥

दक्षिणाशब्दस्याद्युदात्तो भवति । यथा । (४) तस्य दक्षिणाऽ अप्सरसंः । (५) दक्षिणा यज्ञः पुरऽ एतु सोमः (६) ॥

न दश विश्वकर्म्मा निषद्येन्द्रस्य पातु सदः सद्भ्येषु ॥ ३० ॥

दश विश्वकर्म्मा निषद्य । इन्द्रस्य । पातु । सदः । सद्यः । एतेषु परभूतेषु दक्षिणाशब्द आद्युदात्तो न भवति । दश (७) यथा । दशं दक्षिणा दशं प्रती-

(१) २३ । ४७ ॥
(२) २३ । ४८ ॥
(३) २२ । १९ ॥
(४) १८ । ४२ ॥
(५) १७ । ४० ॥
(६) चशब्दोऽप्यर्थे ॥
(७) १६ । ६४ ॥

चीः । विश्वकर्म्मा यथा । (१) अयं दक्षिणा विश्वकर्म्मा । निषद्य यथा । (२) आच्या जानु दक्षिणतो निषद्य । इन्द्रस्य यथा । (३) पुत्रवती दक्षिणत ऽइन्द्रस्याधिपत्ये । पातु यथा । (४) मनोजवास्त्वा पितृभिर्दक्षिणतः पातु । सदः यथा । (५) यमनेत्रा दक्षिणासदः । सद्भ्यः यथा । (६) यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः ॥

कर्णः स्वाङ्गे ॥ २१ ॥

कर्णशब्दः स्वाङ्गाभिधाय्याद्युदात्तो भवति । यथा । (७) भद्रं कर्णेभिः शृणुयाम देवाः । (८) श्रोत्राभ्यां कर्णौ ते दन्तीमधरकण्ठेन । स्वाङ्ग इति किम् । (९) श्वा कृष्णः कर्णो गर्दभः ॥

---

(१) १३ । ५५ ॥
(२) १९ । ६२ ॥
(३) ३७ । १२ ॥
(४) ५ । ११ ॥
(५) ९ । ३६ ॥
(६) ९ । ३५ ॥
(७) २५ । २१ ॥
(८) २५ । २ ॥
(९) २४ । ४० ॥

महो नपुꣳसके ॥३२॥

मह्शब्दो नपुंसकाभिधाय्याद्युदात्तो भवति । यथा । (१) महस्स्थ महो वो भक्षीय । नपुंसक इति किम् । (२) महो देवाय तदृतꣳ सपर्यत । (३) महोऽअग्नेः समिधानस्य शर्म्मणि (४) ॥

अवश्च ॥ ३३ ॥

अवःशब्दो नपुंसकवाच्याद्युदात्तो भवति यथा । (५) अग्ने तव श्रवो वयः । नपुंसक इति किम् । (६) अवश्च मे श्रुतिश्च मे ॥

अन्धो वीर्य्ये ॥ ३४ ॥

---

(१) ३ । २० ॥

(२) ४ । ३५ ॥

(३) ३३ । १७ ॥

(४) महो देवायेत्यत्र महते देवायेति देवविशेषणत्वात्पुल्लिङ्गः । तस्माच्छान्दसत्वाच्चतुर्थ्या लुक् । महो अग्ने इत्यत्र महत अग्नेर्विशेषणीभूतो लुप्तषष्ठीको महः शब्दः पुल्लिङ्गः ॥ यद्यपि गां प्रति गमने विनियुक्तः स्त्रीलिङ्गमपेक्षते । तथापि श्रुत्या नपुंसकलिङ्गो महश्शब्दो व्याख्यातः ॥ तथा चोक्तं शतपथब्राह्मणस्य २ काण्डीयतृतीयप्रपाठकस्य २ ब्राह्मणस्य २५ कण्डिकायां यानि वो वीर्य्याणि यानि वो महाꣳसि तानि भक्षीयेति ॥

(५) १२ । १०६ ॥

(६) १८ । १ ॥

अन्धशब्दो वीर्यवचन आद्युदात्तो भवति । यथा । (१) अन्धस्थान्धो वो भक्षीय । वीर्य इति किम् । (२) स्वप्नायान्धमधर्माय । (३) अन्धन्तमः प्रविशन्ति ॥

एता वर्णे ॥ ३५ ॥

एताशब्दोवर्णवचन आद्युदात्तो भवति । यथा । (४) एताऽ ऐन्द्राग्नाः । वर्ण इति किम् । (५) एता मेऽअग्न इष्टकाः ॥

रोहितश्च केवलः ॥ ३६ ॥

रोहितशब्दस्य वर्णवचनः केवलः असमासस्य आद्युदात्तो भवति । यथा । (६) रोहितो धूम्ररोहितः । वर्णवाचीति किम् । (७) रोहित्कुण्ड्रणाची गोलत्तिका । केवल इति किम् । (८) धूम्ररोहितः कर्कन्धु-

---

(१) ३ । २० । वीर्यवाची श्रुत्या व्याख्यातः ॥

(२) ३० । १० ॥

(३) ४० । ९ । प्रत्युदाहरणद्वये प्रथमोऽन्धशब्दो नेत्रविकलवचनः । द्वितीयोऽन्धशब्दो निविडार्थकः ॥

(४) २४ । ८ ॥

(५) १७ । २ ॥

(६) २४ । २ ॥

(७) २४ । ३७ । अत्र रोहितशब्दो मृगविशेषवचनः ॥

(८) २४ । २ धूम्रश्चासौ रोहितश्चेति समासघटितोऽयं न केवलः ॥

रोहितः ॥

यन्वी राट् ॥ ३७ ॥

यन्वीशब्द आद्युदात्तो भवति । राट् परश्चेद्भवति । यथा । (१) यन्वी राट् । राट् पर इति किम् । (२) यन्व्यसि यमनी ॥

ओषधीरनामन्त्रिते ॥ ३८ ॥

ओषधीशब्दोऽनामन्त्रितविषय आद्युदात्तो भवति । यथा । (३) या ओषधीः पूर्वा जाताः । अनामन्त्रित इति किम् । (४) यत्रौषधीः प्रसर्प्पथ ॥

सर्व्वं विश्वश्च मानुषाशाः स्वाहा व्वाजः पयो नमः ॥ ३९ ॥

सर्व्व । विश्व । मानुषा । आशाः । स्वाहा । व्वाजः । पयः । नमः । एतानि पदान्याद्युदात्तानि भवन्ति । सर्व्वयथा ।(५) सर्व्वे निमेषा जज्ञिरे । विश्वयथा । (६)

---

(१) १४ । २३ ॥

(२) तथोदाहरणम् ॥

(३) १२ । ७५ ॥

(४) १२ । ८६ ॥

(५) ३२ । २ ॥

(६) ३२ । ८ ॥

यत्र विश्वं भवत्येकनीडम् । मानुषा यथा । (१) दैव्यं मानुषा युगा । आशा यथा । (२) विश्वाऽआशाः प्रमुञ्चन्मानुषीर्भियः । स्वाहा यथा । (३) हिङ्काराय स्वाहा । वाजः यथा । (४) वाजश्च मे । पयः यथा । (५) पयः पृथिव्याम् । नमः यथा । (६) नमो हिरण्यबाहवे ॥

असि शिवा सुषदा पयस्वती यत्ते मधुमतीर्वर्चस्वानोजिष्ठो भ्राजिष्ठः शुष्मिणी भद्रवाच्याय वन्द्यो मेध्यो यमादित्यस्त्रितः सोमेन स्वसेत्येतेषु ॥ ४० ॥

शिवा । सुषदा । पयस्वती । यत्ते । मधुमतीः । वर्चस्वान् । ओजिष्ठ । भ्राजिष्ठ । शुष्मिणी । भद्रवाच्याय । वन्द्यः । मेध्यः । यमः । आदित्यः । त्रितः । सोमे-

(१) १२ । १११ ॥
(२) २७ । ७ ॥
(३) २२ । ७ ॥
(४) १८ । १ ॥
(५) १८ । ३६ ॥
(६) १६ । १७ ॥

न। स्वसा। असीत्यधस्तादनुदात्त उक्तः स एतेषु परभूतेषु आद्युदात्तो भवति। शिवा यथा। (१) सुक्ष्मा चासि शिवा। सुषदा यथा। (२) स्योना चासि सुषदा। पयस्वती यथा। (३) ऊर्ज्जस्वती चासि पयस्वती च। यत्ते यथा। (४) योस्याम्पृथिव्यामसि यत्ते। मधुमतीर्यथा। (५) येषां भागोसि मधुमतीः। वर्च्चस्वान्यथा। (६) त्वन्देवेष्वसि वर्च्चस्वान्। ओजिष्ठः यथा। (७) त्वन्देवेष्वस्योजिष्ठः। भ्राजिष्ठः यथा (८) त्वन्देवेष्वसि भ्राजिष्ठः। शुष्मिणी यथा। (९) सुरा त्वमसि शुष्मिणी। भद्रवाच्याय यथा। (१०) होतरसि भद्रवाच्याय। वन्द्यः यथा। (११) ईड्यश्चासि वन्द्यः। मेध्यः यथा। (१२) आशुश्चासि मेध्यश्च स-

---

(१) १।२७॥
(२) १।२७॥
(३) १।२७॥
(४) ५।९॥
(५) ७।१॥
(६) ८।३८॥
(७) ८।३८॥
(८) ८।३९॥
(९) १९।७॥
(१०) २१।६१॥
(११) २९।३॥
(१२) २९।३३॥

सम्प्ते । यमः यथा । (१) असि यमः । आदित्यः यथा । (२) असि आदित्योऽ अर्वन् । त्रितः यथा । (३) असि त्रितो गुह्येन । सोमेन यथा । (४) असि सोमेन । स्वसा यथा । (५) या देवानामसि स्वसा ॥

धनदारत्नधाभ्याञ्च ॥ ४१ ॥

धनदारत्नधाभ्याम्परोऽसिशब्द आद्युदात्तो भवति । धनदा यथा । (६) त्वᳬ हि धनदाऽ असि । रत्नधा यथा । (७) त्वᳬ हि रत्नधाऽ असि ॥

रायोऽपोषे ॥ ४२ ॥

राय इत्येतत्पदमपोषे परे चाद्युदात्तं भवति यथा । (८) त्वे रायो मे रायः । अपोष इति किम् । (९) मा वयᳬ रायस्पोषेण वि योष्म ॥

---

(१) २९ । १४ ॥
(२) २९ । १४ ॥
(३) २९ । १४ ॥
(४) २९ । १४ ॥
(५) ३४ । ३३ ॥
(६) ९ । २८ ॥
(७) २६ । २१ ॥
(८) ४ । २२ ॥
(९) ४ । २२ ॥

न भागर्मीशिषयोः ॥ ४३ ॥

राय इत्येतत्पदं भागमीशिषयोः परयोराद्युदात्त-न्न भवति । भागं यथा । (१) रायो भागम् । ईशिषे यथा । (२) राय ऽईशिषे ॥

त्रिधा बद्धहितयोः ॥ ४४ ॥

त्रिधा शब्दो बद्धहितयोः परयोराद्युदात्तो भवति बद्धो यथा (३) त्रिधा बद्धो वृषभो रोरवीति । हितं यथा(४) त्रिधा हितं पणिभिर्गुह्यमानम् ॥

सुकृतम्भूते ॥ ४५ ॥

सुकृतशब्दो भूताभिधाय्याद्युदात्तो भवति, यथा (५) उरुः पृथुः सुकृतः कर्तृभिर्भूत् । भूत इति किम् । सुकृतञ्च (६) मे सुकृतञ्च मे (७) ॥

द्विरुदात्तानि ॥ ४६ ॥

---

(१) ३४ । २३ ॥

(२) १७ । ७१ । न भागेशिषयोः इति 'ग' 'घ' पुस्तकपाठः ॥

(३) १७ । ९१ ॥

(४) १७ । ९२ ॥

(५) ७ । ३९ ॥

(६) १८ । ५ ॥

(७) अयं तु न प्राणिवचनः किन्तु पुण्यवाचकः ॥

द्विरुदात्तं येषु तानि पदानि वक्ष्यन्त इति सूत्रशेषः अधिकारसूत्रमेतत् ॥

बृहस्पतिर्वनस्पतिर्नराशꣳस स्तनूनप्त्रे तनूनपान्नक्तोषासोषासानक्ता द्यावापृथिवी द्यावाक्षामा क्रतूदक्षाभ्यामेतवाऽअन्वेतवा इति च ॥४७॥

(१) बृहस्पतिः । (२) वनस्पतिः, (३) नराशꣳसः, (४) तनूनप्त्रे (५) तनूनपात्, (६) नक्तोषासा, (७) उषासा नक्ता, (८) द्यावापृथिवी, (९) द्यावा-

---

(१) १७ । ४० ॥
(२) २० । ४५ ॥
(३) २० । ३७ ॥
(४) ४ । ५ ॥
(५) २० । ३७ ॥
(६) १२ । २ ॥
(७) २० । ४१ ॥
(८) १७ । २० ॥
(९) १२ । २ ॥

त्वामा, (१) ऋतूदृत्वाब्भ्याम्, (२) एतवै, (३) अनून्वेतवै, एतानि पदानि द्विरुदात्तानि भवन्ति अदेवताद्वन्द्वार्थ आरम्भः प्रचुराण्येवोदाहरणानि ॥

देवताद्वन्द्वानि चानामन्त्रितानि ॥४८॥

देवताद्वन्द्वानि च द्विरुदात्तानि भवन्ति आमन्त्रितानि वर्जयित्वा, यथा (४) अग्नीषोमाब्भ्याञ्जुष्टं॑ङ्गृह्णामि (५) मित्त्रावरुणाब्भ्यां त्वा, देवताद्वन्द्वानीति किम् (६) ऋक्सामयोः शिल्पे (७) दीक्षातपसोस्तनूरसि, अनामन्त्रितानीति किम् (८) ताब्भ्येनं मित्त्रावरुणा, च शब्दादधस्तनसूत्रविहितान्यनामन्त्रितानि द्विरुदात्तानि भवन्ति आमन्त्रितानि त्वामन्त्रितस्वरँल्लभन्ते यथा (९) बृहस्पते ऽअति यदर्य्यो ऽअ-

---

(१) ७ । २७ ॥

(२) १७ । ९७ ॥

(३) ८ । २३ । अविशेषात्सर्वविभक्त्यन्तानि क्रमेण द्रष्टव्यान्युदाहरणानि ॥ परन्तु तनूनपाच्छब्दो द्विरुदात्तउक्तः स च पथशब्दे परे न द्विरुदात्तः स्यात् । यथा २८ । २६ । नर्नूनपात्पथ ऽऋतस्य यानान् इति ॥

(४) २ । १० ॥

(५) ७ । २३ ॥

(६) ४ । ९ ॥

(७) ४ । २ ॥

(८) ७ । १० ॥

(९) २६ । ३ ॥

ह्वीत् (१) तनूनपात्पथऽ ऋतस्य यानान् ॥

इन्द्राबृहस्पतिभ्यामिन्द्राबृहस्पती इति त्रीणि ॥४९॥

इन्द्राबृहस्पतिभ्यामिन्द्राबृहस्पती इत्येतयोः पदयोस्त्रीण्यक्षराण्युदात्तानि भवन्ति, इन्द्राबृहस्पतिभ्यां यथा (२) इन्द्राबृहस्पतिभ्यां त्वा देवाव्यँय्यज्ञस्य । इन्द्राबृहस्पती यथा (३) इन्द्राबृहस्पती ऽजस्व्याम् (४) ॥

सर्वमग्ग्नाऽ३इ लाजीँ३ञ्छाचीँ३निति त्रिमात्राणि च ॥५०॥

अग्ग्नाऽइ लाजीँ३न् शाचीँ३न् एतानि पदानि सर्वोदात्तानि भवन्ति त्रिमात्राणि च त्रीण्यक्षराण्येतेषु पदेषु भवन्ति, यथा (५) अग्ग्नाऽ ३इ इह आकारस्त्रिमात्रः (६) लाजीँ३निहेकारः शाचीँ३निहेकारः ॥

(१) २८ । २६ ॥

(२) ७ । २३ ॥

(३) २५ । ६ ॥

(४) इति शब्द उदाहरणद्वयसमाप्त्यर्थः । प्रायोऽन्यस्याभावादिति ॥

(५) ८ । १० ॥

(६) २३ । ८ ॥

प्रणवश्च ॥५१॥

प्रणवश्च सर्वोदात्तो भवति त्रिमात्रश्च यथा (१) ओ३म् खम्ब्रह्म ॥

विवेशा३ इति चानुदात्तम् ॥५२॥

विवेशा३ इत्येतत्पदं सर्वानुदात्तं भवति अन्त्यमक्षरं चास्य त्रिमात्रं भवति यथा (२) तेषु विश्वं भुवनमाविवेशा३, इहाकारस्त्रिमात्रः, अनुदात्तमिति किम्, (३) विश्वम्भुवनमाविवेश ॥

आसीदिति चोत्तरँ्विचारे ॥५३॥

आसीदित्येतत्पदं विचारे वर्त्तमानमुत्तरं सर्वानुदात्तं भवति तस्य चान्त्यमक्षरं त्रिमात्रं भवति यथा (४) उपरि स्विदासी३त्, इहाकारस्त्रिमात्रः, विचार इति किम् । (५) का स्विदासीत् ॥

---

(१) ४० । अन्त्ये ॥

(२) २३ । ४९ ॥

(३) २३ । ५० । उत्तरं पूर्वं इति पदद्वयं उत्तरसूत्राभ्यामपकृष्यते ॥ हिरण्यगर्भ-इत्यध्याये विवेशपदस्य चतुर्वारं एकस्मिन् सन्दर्भे पठितत्वात्पूर्वत्वस्य सापेक्षत्वात्त-दध्यायस्थस्यैव प्लुतत्वम् । तेन अन्यत्र अवराँ२ऽआ विवेश । अभि सँविवेश इत्या-दौ न भवति ॥

(४) ३३ । ७४ ॥

(५) २३ । ११ ॥

पूर्व्वमन्तोदात्तम् ॥ ५४ ॥

आसीदित्येतत्पदं पूर्व्वं विचारे वर्त्तमानमन्तोदात्तं भवति त्रिमात्रं चास्यान्त्यमक्षरं भवति यथा (१) अधः स्विदासी३त् इहेकारस्त्रिमात्रः ॥

द्वन्द्वञ्चेन्द्रसोमपूर्व्वं पूषाग्निवायुषु ॥ ५५ ॥

दैवताद्वन्द्वं च इन्द्रसोमपूर्व्वं पूषाग्निवायुषु परभूतेष्वन्तोदात्तं भवति, द्विरुदात्तापवादः, इन्द्रपूर्व्वं यथा (२) इन्द्रापूष्णोः प्रियमप्येति पाथः, (३) इन्द्राग्न्योरुज्जितिमनूज्जेषम् (४) इन्द्रवायुभ्यान्त्वैष ते योनिः। सोमपूर्वस्य यथासम्भवमुदाहरणम् (५) वाह्णोः सौमापौष्णः ॥

अग्निश्चेन्द्रे ॥ ५६ ॥

अग्निपूर्व्वश्चेन्द्रोत्तरपदो दैवताद्वन्द्वसमासोऽन्तो-

---

(१) ३३ । ७४ । इत उत्तरं अन्तोदात्ताधिकारश्च द्रष्टव्यः ॥

(२) २५ । २५ ॥

(३) २ । १५ ॥

(४) ७ । ८ ॥

(५) २४ । १ ॥

दात्तो भवति यथा (१) अग्नीन्द्राभ्यान्वैषते योनिः ॥

ऋक्वसाम्नि च ॥५७॥

ऋक्पूर्वपदः सामशब्दोत्तरपदस्य द्वन्द्वसमासोऽन्तोदात्तो भवति यथा (२) ऋक्सामाभ्याᳯ सन्तरन्तः ॥

यतो गतौ ॥५८॥

यत इत्येतत्पदं गतौ वर्त्तमानमन्तोदात्तं भवति यथा (३) स्वर्यतो धिया दिवम्, इण्गतावित्यस्यैतद्रूपम्, गताविति किम् (४) यतो जातः प्रजापतिः ॥

पायोर्विशः ॥५९॥

पायुशब्दात्परो विशः शब्दोऽन्तोदात्तो भवति यथा (५) पायुर्विशोऽअस्याऽअदब्धः, पायोरिति किम् (६) इन्द्रन्दैवीर्विशो मरुतः ॥

आयुरर्य्यमोर्व्वश्यस्तिभ्यः ॥६०॥

(१) ७ । ३२ ॥
(२) ४ । १ ॥
(३) ११ । ३ ॥
(४) २३ । ६३ । अत्र प्रत्युदाहरणे यतः शब्दस्तासिल् प्रत्ययान्तः ॥
(५) १३ । ११ ॥
(६) १७ । ८६ ॥

आयुरित्येतत्पदम् अर्य्यमा उर्व्वशी अस्ति शब्देभ्यः परमन्तोदात्तं भवति, अर्य्यमा यथा (१) मा नो मित्रो वरुणोऽ अर्य्यमायुः, उर्व्वशी यथा (२) उर्व्वश्यस्यायुरसि, पदसंहितोदाहरणम्, अस्ति यथा (३) अध स्मा ते व्रजनं कृष्णमस्ति आयोऽष्टा, एतेभ्य इति किम् (४) आयुश्च मे जरा च मे ॥

अस्य रोचनाऽसौ बोधा मे पारम्पुरऽएतारो दिवः कोऽहन्त्वम्महीँय्य ईशऽईशानेभ्यः ॥ ६१ ॥

रोचना असौ बोधा मे पारम् पुरऽएतारः दिवः कः अहम् त्वम् महीम् यऽईशे ईशानम् एतेभ्यः परः अस्यशब्दोऽन्तोदात्तो भवति, रोचना यथा (५) अन्तश्चरति रोचनास्य, असौ यथा (६) असावस्य पिता व-

(१) २५ । २४ ॥

(२) ५ । २ । अत्र यद्यपि उर्व्वशीशब्दात्परो असिशब्दो न आयुः शब्दस्तथापि पदसंहितायां पाठादुदाहृतः ॥

(३) १५ । ६२ ॥

(४) १८ । ३ ॥

(५) ३ । ७ ॥

(६) १० । २० ॥

यꣳ स्याम, बोधा मे यथा (१) बोधा मे ऽअस्य वच-
सो यविष्ठ, पारम् यथा (२) अगन्म तमसस्पार-
मस्य, पुरऽ एतारो यथा (३) ये ब्रह्माणः पुरऽ एता-
रोऽ अस्य, दिवः यथा (४) एकेनाङ्गेन दिवोऽ अस्य
पृष्ठम्, कः यथा (५) को ऽअस्य वेद भुवनस्य नाभि-
म्, अहं यथा (६) वेदाहमस्य भुवनस्य नाभिम्, त्वम्
यथा (७) ब्रह्मणस्पते त्वमस्य यन्ता, महीम् यथा (८)
इमान्ते धियम्प्रभरे महो महीमस्य, यऽ ईशे यथा (९)
यऽ ईशेऽअस्य द्विपदः, ईशानम् यथा (१०) ईशान-
मस्य जगतः ॥

प्रत्नां यज्ञस्य हविषः पाहीत्पातं
मद्ध्वो यजमानस्य होतुरजरासो

(१) १२ । ४२ ॥
(२) १२ । ७३ ॥
(३) १७ । १४ ॥
(४) २३ । ५० ॥
(५) २३ । ५९ ॥
(६) २३ । ६० ॥
(७) ३४ । ५८ ॥
(८) ३३ । २९ ॥
(९) २३ । ३ ॥
(१०) २७ । ३५ ॥

लोकेषु च ॥ ६२ ॥

प्रत्नाम् यज्ञस्य हविषः पाहि इत् पातम् मद्वः यजमानस्य होतुः अजरासः लोकः इत्येतेषु च प्रत्ययेषु अस्य शब्दोऽन्तोदात्तो भवति, प्रत्नं यथा (१) अस्य प्रत्नामनु द्युतम्, यज्ञस्य यथा (२) आस्य यज्ञस्योदृचः, हविषः यथा (३) अस्य हविषस्त्मना यज, पाहि यथा (४) यं त्वमग्ने सुमनाऽअस्य पाहि । इत् यथा (५) अस्येदिन्द्रो वावृधे, पातम् यथा (६) अस्य पातन्धियेषिता, मद्वः यथा (७) अस्य मद्वः पिबत, यजमानस्य यथा (८) अस्य यजमानस्य वीरो जायताम्, होतुर्यथा (९) अस्य होतुः प्रदिश्यृतस्य वाचि । अजरासो यथा (१०) अस्याजरासो दमाम्, लोकः यथा

---

(१) ३ । १६ ॥
(२) ४ । १० ॥
(३) ६ । ११ ॥
(४) २६ । २३ ॥
(५) ३३ । ९७ ॥
(६) ७ । ३१ ॥
(७) ९ । १८ ॥
(८) २२ । २२ ॥
(९) २८ । ११ ॥
(१०) ३३ । १ ॥

(१) अस्य लोकः सुतावतः ॥

अनुदात्तमन्यत् ॥ ६३ ॥

अस्येत्येतत्पदमुक्तादन्यदनुदात्तं भवति, यथा (२) षडस्य विष्ठाः शतम् (३) अद्यातमस्य, पूर्ववाननुदेश इत्येतस्यैवायं प्रपञ्चः (४) ॥

पङ्क्तीहंसयोरन्त उदात्त आदिर्वा ॥ ६४ ॥

पङ्क्तीः शब्दस्य हंसशब्दस्य चान्त उदात्तो भवति आदिर्वा उदात्तो भवति स्वरविकल्पः, पङ्क्तीर्यथा (५) पचन्पङ्क्तीः, हंसः यथा (६) पूँश्चलूए हंसाय ॥

वृद्धं वृद्धिः ॥ ६५ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्य-

(१) ३५ । १ ॥
(२) २३ । ५८ ॥
(३) ३३ । ९७ ॥
(४) इतोऽन्यदनन्वादेशस्थमित्यर्थः ॥
(५) २१ । ५९ ॥
(६) ३० । २० ॥

सूत्रे द्वितीयोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यवज्रटसुतोव्वटकृतौ (१) प्रातिशाख्यभाष्ये द्वितीयोऽध्यायः ॥

स्वरसंस्कारयोश्छन्दसि नियम इति प्रतिज्ञातम्, तत्र प्रथमाध्याये स्वरसंस्कारयोरेवाङ्गभूताः सञ्ज्ञाः परिभाषा उक्ताः, द्वितीये स्वरः। अधुना क्रमप्राप्तः संस्कारोऽभिधीयते लोपागमवर्णविकारप्रकृतिभावलक्षणः ॥

सꣳहितायाम् ॥ १ ॥

इत्ययमधिकारः आसप्तमाध्यायपरिसमाप्तेः, यदित ऊर्ध्वमनुक्रमिष्यामः संहितायामित्येवं तद्वेदितव्यम् वक्ष्यति च "उदः स्तभाने लोपम्" उत् (२) स्तभान उत्तभान तेजसा दिवः उदृꣳह ॥

अर्थः पदम् ॥ २ ॥

संहितालक्षणमुक्तम् (३) "वर्णानामेकप्राणयोगः सꣳहितेति" अधुना पदलक्षणमुच्यते अर्थाभिधायि पदम्

---

(१) 'सुतोवटकृतौ' क्वचित्पुस्तक पाठः ॥

(२) १७ । ७२ । उदः स्तभाने लोपमिति सूत्रं चतुर्थाध्यायस्थं ९४ चतुर्णवतिसङ्ख्याकम् ॥

(३) प्रा. अ. १ सू. १५८ ॥

(१) पद्यते गम्यते ज्ञायतेऽर्थोऽनेनेति पदम् यद्येवम् निपातस्यानर्थकस्य पदसञ्ज्ञा न प्राप्नोति नैष दोषः उपरिष्टादर्थभेदनिबन्धनं पदचतुष्टयं वक्ष्यति "नामाख्यातोपसर्गनिपाताश्चेति" तत्रास्य पदसञ्ज्ञा भविष्यति यथा क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् । सत्त्वाभिधायकन्नाम निपातः पादपूरण इति (२) सूत्रकारस्य त्वयमभिप्रायः पदप्रतिरूपकस्य (३) पदावयवस्य पदसञ्ज्ञा माभूदित्यतोऽर्थग्रहणं इहैव पदसञ्ज्ञा यथा स्यात् (४) गोर्व्यच्छमन्तकाय गोघातम्, इह माभूत् (५) गोधूमांश्च मे ॥

पदान्तपदाद्योः सन्धिः ॥ २ ॥

यः कश्चिद्वैदिकशास्त्रसन्धिरुच्यते स पदान्तपदाद्योर्वेदितव्य इति, (६) ते सन्धयश्चत्वारो भवन्ति स्वरयोः,

(१) अर्थोऽस्ति यस्मिन्नर्थवाचकः । अक्षरसमुदायोऽक्षरं वा पदं स्यात् । अक्षरसमुदायः पदमित्यष्टमेऽध्याये वक्ष्यति । तत्रार्थवत्पदमुच्यते । न पदावयवः ॥

(२) निपाताः पादपूरणा इति 'ख' पुस्तकपाठः । तस्मान्निपातस्यापि पादपूरणार्थत्वेनार्थवत्त्वादर्थः पदमिति साधूक्तम् ॥

(३) पदसदृशस्य ॥

(४) ३० । १८ ॥

(५) १८ । १२ ॥

(६) अवग्रहयोग्ये पदे सन्धिकार्याणि 'अवग्रहः पदान्तवत्' इत्यतिदेशाद्भवन्ति । अवग्रहत्वन्नाम किं 'समासेऽवग्रहो ह्रस्वसमकाल' इति पञ्चमाध्यायस्थादिमसूत्रे वक्ष्यमाणरूपम् । अवग्रहणं अवग्रहः । अवान्तरपदसञ्ज्ञां सूचयितुं पदपाठकाले किञ्चित्कालमवसानमिति । याज्ञवल्क्योक्तमर्द्धमात्राकालिकं । अवग्रहे तु यः कालस्त्वर्द्ध-

व्यञ्जनयोः, स्वरव्यञ्जनयोस्तु द्विप्रकारः। पूर्वः स्वरो भवति पश्चाद्व्यञ्जनानि, व्यञ्जनानि वा पूर्वाणि भवन्ति पश्चात्स्वर इति, स्वरयोर्भवति यथा (१) आ इदम् एदम्। (२) वरुण इह वरुणेह। व्यञ्जनयोर्भवति यथा (३) सम् यौमि, सँय्यौमि (४) सम् व्पामि सँव्वपामि, स्वरपूर्वो भवति यथा (५) इषे त्वा इषे त्त्वा, ऊर्ज्जे त्वा ऊर्ज्जे त्त्वा, व्यञ्जनपूर्वो भवति यथा (६) उत् एनम् उद्देनम्, परिभाषासूत्रमेतत् ॥

न परकालः पूर्वकाले पुनः ॥ ४ ॥

ह्यन्तराः काला इति वक्ष्यति तत्र यः परकालः सन्धिः पूर्वकाले सन्धौ सति पुनः प्राप्नुवन्न भवति यथा (७) "आकारोपधो यकारमिति, नकारस्याकारोपध-

---

मात्रा विधीयतइति। ग्रहउपादाने। अवपूर्वाद् ग्रहेर्घञो भावे ग्रहवृदृनिश्चिगमश्चेत्यप् ॥ अतिदेशत्वं नाम। अन्यत्र श्रुतस्यान्यत्रान्वयित्वम्। यानि पदद्वयसम्बन्धीनि कार्याणि तत्रैवैतस्य परिभाषासूत्रस्योपस्थितेः व्यस्तपदे सन्धिकार्य्याणि न भवन्ति। एकपदस्थानि सन्धिकार्याणि तु अवग्रहे न भवन्ति ॥

(१) ४। १॥

(२) १८। ४५। अयमङ्कः पदपाठात् ज्ञातव्यः ॥

(३) १। २२॥

(४) १। २१॥

(५) १। १॥

(६) १७। ५०॥

(७) प्रा० अ० ३। सू० १४२॥

स्य यकारो विहितः स्वरे प्रत्यये, (१) महाँ२ऽऽइन्द्र इति यथा (२) "कण्ठ्यपूर्वो यकारमरिफित इति, अवर्णपूर्वस्य विसर्ज्जनीयस्य यकारो विहितः स्वरे प्रत्यये, (३) याऽओषधीरिति ततो हिशब्दात्परं लक्षणमुक्तम् (४) "यवयोः पदान्तयोः स्वरमध्ये लोपः," ततो यलोपे कृते हिशब्दात्पूर्वं शास्त्रं पुनः प्रवर्त्तते (५) "कण्ठ्यादिवर्णा एकारम्" "उवर्णा ओकारमिति, । तत्प्रवर्त्तमानन्निषिध्यत इति सूत्रार्थः ॥

ह्यन्तराः कालाः ॥ ५ ॥

कालाधिकारः हिः अन्तरा येषां सन्धिकालानां ते ह्यन्तराः कालाः कालशब्दः स्थानपर्य्यायः, उक्तमुदाहरणम् ॥

विसर्ज्जनीयः ॥ ६ ॥

विसर्ज्जनीयसन्धिरधिकृतइति सूत्रार्थः ॥

चछयोः शम् ॥ ७ ॥

चकारछकारयोः प्रत्यययोर्विसर्ज्जनीयः शकारमा-

(१) ७ । ३९ ॥

(२) प्रा० अ० ४ । सू० ३६ ॥

(३) १२ । ९२ ॥

(४) प्रा० अ० ४ । सू० १२२ ॥

(५) प्रा० अ० ४ । सूत्रद्वयस्याङ्कौ ज्ञातव्यौ । ५२ । ५३ ॥

पद्यते, चकारे यथा (१) वार्जं॑ च मे, वार्जश्च मे, छे यथा (२) अस्त्रीवयं॑ छन्दं॑ अस्त्रीवयश्छन्दं॑ ॥

तथयोः सम् ॥ ८ ॥

तकारथकारयोः प्रत्यययोर्विसर्ज्जनीयः सकारमापद्यते, तकारे यथा (३) आखुः ते पशुः आखुस्ते पशुः, (४) नमः ते रुद्र नमस्ते रुद्र, विसर्जनीयथकारसन्धिस्तु संहितायां न विद्यते अतो रूपोदाहरणं दीयते, कः थकारः कस्थकारः ॥

प्रत्ययसवर्णम्मुदि शाकटायनः ॥ ९ ॥

शषसा मुत्सञ्ज्ञा उक्ताः, मुत्सञ्ज्ञकेषु परभूतेषु विसर्जनीयः परसवर्णमापद्यते शाकटायनाचार्य्यस्य मतेन, यथा (५) आशुः शिशानः आशुश्शिशानः (६) अदितिः षोडशाक्षरेण अदितिष्षोडशाक्षरेण, (७) देवो वः सविता देवो वस्सविता ॥

---

(१) १८ । १ ॥
(२) १४ । १८ ॥
(३) ३ । ५७ ॥
(४) १६ । १ ॥
(५) १७ । ३३ ॥
(६) ९ । ३४ ॥
(७) १ । १ ॥

अविकारं॰ शाकल्यः शषसेषु ॥१०॥

विसर्ज्जनीयस्य विकारन्न मन्यते शाकल्यः शषसेषु परभूतेषु, यथा (१) आशुः शिशानः आशुः शिशानः, अदितिः षोडशाक्षरेण अदितिः षोडशाक्षरेण, देवो वः सविता देवो वः सविता ॥

प्रकृत्या कखयोः पफयोश्च ॥११॥

प्रकृत्या विसर्ज्जनीयं मन्यते कखयोः पफयोश्च प्रत्ययोः शाकल्यः, कखयोर्भवति यथा (२) विष्णोः क्रमः विष्णोः क्रमः, (३) ततः खनेम, पफयोर्भवति यथा (४) देव सवितः प्रसुव देव सवितः प्रसुव, (५) याः फलिनीः याः फलिनीर्याऽअफलाः, कखयोः पफयोश्चेति पृथक्समासकरणमुत्तरार्थम् ॥

जिह्वामूलीयोपध्मानीयौ शाकटायनः ॥१२॥

---

(१) अत्र पूर्वसूत्रोक्तोदाहरणानामङ्का द्रष्टव्याः ॥

(२) १२ । ५ ॥

(३) ११ । २२ ॥

(४) ९ । १ ॥

(५) १२ । ८९ ॥

जिह्वामूलीयोपध्मानीयौ विसर्जनीयश्चापद्यते यथासङ्ख्यम् कखयोर्जिह्वामूलीयमापद्यते पफयोस्तूपध्मानीयम् शाकटायनाचार्यस्य मतेन, कखयोर्यथा (१) विष्णोः क्रमः विष्णो᳘ क्रमः, ततः खनेम ततः खनेम, पफयोर्यथा (२) वसोः पवित्रम् वसो᳘ पवित्रम् (३) याः फलिनीः याः फलिनीर्याऽ अफलाः॥

लुङ्मुदि जित्परे ॥१३॥

मुत्सञ्ज्ञकाः शषसाः, जित्सञ्ज्ञका द्वौद्वौ प्रथमौ शषसाश्च, तत्र शषसेषु "प्रत्ययसवर्णमिति" विसर्जनीयसन्धिरुक्तः अतइह द्वयैव जित्सञ्ज्ञका गृह्यन्ते, लुक् लुप्यते विसर्जनीयो मुत्सञ्ज्ञके जित्परे परतः, यथा (४) अन्धः स्थ । अन्धस्थान्धो वो भक्षीय, (५) स्थालीभिः स्थालीः । स्थालीभिस्थालीराप्नोति, मुदि जित्परइति किम् (६) स्वस्ति नः तार्क्ष्यः । स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति ॥

---

(१) पूर्वोक्तसूत्रोदाहरणानामङ्का ज्ञातव्याः ॥

(२) १ । २ ॥

(३) पूर्वोक्तसूत्रोदाहरणस्याङ्को बोध्यइति ॥

(४) ३ । २० ॥

(५) १९ । २७ ॥

(६) २५ । १९ ॥

उपवसने पीवः ॥ १४ ॥

उपवसने (१) प्रत्यये पीवशब्दसम्बन्धी विसर्ज्जनीयो लुप्यते, यथा (२) पीवः उपवसनानाम् पीवोपवसनानाम् ॥

सऽओषधीमयोः ॥ १५ ॥

सपदसम्बन्धी विसर्ज्जनीयो लुप्यते (३) ओषधीमयोः प्रत्यययोः, ओषधी यथा (४) सः ऽ ओषधीः सौषधीरनुरुध्यसे, इम यथा (५) सः इमाम् सेमान्नो हव्यदातिं जुषाणः ॥

व्यञ्जने च ॥ १६ ॥

व्यञ्जने च प्रत्यये सपदसम्बन्धी विसर्ज्जनीयो लुप्य-

---

(१) पदे क्व चित् शब्दे इति (ग) (घ) पुस्तकपाठः ॥

(२) २१ । ४३ । पीवस् शब्दोऽसुन् प्रत्ययान्तः स्थूलवाची । अत्र प्रा. ४ अ. सू. ५३ । उवर्ण्णओकारमित्यनेन पूर्वपरयोः स्थाने ओकारादेशइति ॥

(३) ओषधी इमइत्येतयोः इति (ग) पुस्तकपाठः ॥

(४) १२ । ३६ । अत्र प्रा० ४ अ० सू० ५६ । सन्ध्यक्षरऐकारौकारौ, इत्यनेन पूर्वपरयोः स्थानऔकारः ॥

(५) २९ । ५४ । अत्र "कण्ठ्यपूर्व्वो यकारमरिफितइत्यनेन चतुर्थाध्यायस्थेन षट्त्रिंशत्सङ्ख्याकसूत्रेण यत्वे यवयोरिति यकारलोपे च कृते न परकालः पूर्वकाले पुनरित्यनेन च स्वरसन्धिनिषेधे प्राप्ते पुनर्विधानार्थमिदं सूत्रमेवमन्यत्राप्यूह्यम् ॥

ते, यथा (१) सः नः स नो बोधि श्रुधी हवम्, (२) सः जायसे स जायसे मत्थ्यमानः, व्यञ्जनइति किम्, (३) सः अग्निः सोऽअग्निर्य्यो वसुर्गृणे ॥

स्यएष च ॥ १७ ॥

स्यएषपदयोः सम्बन्धी विसर्ज्जनीयो लुप्यते व्यञ्जनमात्रे, यथा (४) स्यः राध्यः एष स्य राथ्यो वृषा, (५) स्यः वाजी एष स्य वाजी क्षिपणिम्, (६) एषः छागः एष च्छागः पुरो अश्वेन (७) ॥

निशब्दो बहुलम् ॥ १८ ॥

निशब्दः पदान्तीयो लुप्यते बहुलम्, शृङ्गा शृङ्गाणीति प्राप्ते यथा (८) चत्वारि शृङ्गा त्रयोऽ अस्य पादाः

(१) ३ । २६ ॥
(२) १५ । २८ ॥
(३) १५ । ४२ ॥
(४) २२ । १३ ॥
(५) ९ । १४ ॥
(६) २५ । २६ ॥
(७) इदं सूत्रद्वयं तथयोः समित्यादीनां बाधकम् । स्य व्वाजी स बोधीत्यादौ "सर्वोऽ अकारओकारम्" प्रा. अ. ४ सू. ४१ इत्यनेन सूत्रेण पूर्व्वान्विधीन्बाधन्ते नोत्तरानिति न्यायेन च "विप्रतिषेधउत्तरं बलवदलोपे" प्रा. अ. १ सू. १५९ इत्युक्तत्वादेतस्य बाधः । मध्येऽपवादः प्राप्तः अलोपइत्युक्तत्वान्न भवतीति बोध्यम् । पा. सू. अ. ६ पा. १ सू. १३३ स्यश्छन्दसि बहुलमिति सोर्लोपो वैकल्पिकः ॥
(८) १७ । ९१ ॥

पदा पदानीति प्राप्ते यथा (१) त्रीणि पदा वि चक्रमे, बहुलग्रहणात्क्वचिन्न च लोपो भवति, यथा (२) एता तेऽघ्न्ये नामानि, क्वचिदिकारमात्रस्य भवति, एमन् एमनीति प्राप्ते यथा (३) एमन्त्सादयामि, क्वचिन्नकारमात्रस्य भवति दुष्कर्त्तारम् निष्कर्त्तारमिति प्राप्ते यथा (४) दुष्कर्त्तारमह्वरस्य, इत्थं भूतपदाद्यन्तप्रवृत्त्यर्थं बहुलग्रहणम् (५) ॥

अनितावध्याये ॥ १९ ॥

अस्मिन्नध्यायशेषे येऽन्तःपदआगमा विकाराश्च वक्ष्यन्ते ते अनितौ इतिकरणे परत्रावस्थिते न भवन्तीति सूत्रार्थः, यथा (६) श्रेयस्कर श्रेयः करोति, (७)

---

(१) ३४ । ४३ ॥

(२) ८ । ४३ ॥

(३) १३ । ५३ ॥

(४) १२ । ११० ॥

(५) कारिकायामपि । क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यतोऽपि ॥ विधेर्विधानं बहुधा समीक्ष्यचतुर्विधं बाहुलकं वदन्ति इति व्याकरणशास्त्रे बहुलशब्दस्यैव निर्वचनात् । अपरं च पाणिनिना अ. ७ पा. १ सू. ३९ "सुपां सुलुक्पूर्व्वसवर्णाच्छेयाडाड्यायाजालः" इति सूत्रं विभक्तिविकारार्थं कृतम् । कात्यायनस्य लेखनं तु स्वशास्त्रीयप्रयोगदृढीकरणार्थमिति ज्ञेयम् । सिद्धान्तकौमु. वै. ६ अ. एमन्नादिषु छन्दसि पररूपं वक्तव्यमिति सर्ववैदिकसाधारणप्रयोगे भवति ॥

(६) ३ । ५८ ॥

(७) २ । १६ ॥

चक्षुष्पाःऽ चक्षुःपाइति, (१) स्वर्षाम् स्वःसामिति, (२) धूर्षाहौ धूःसहाविति, (३) दूडभं दुर्दभइति, (४) वनर्षदं वनसदइति, (५) अवरस्पराय अवरपरायेति (६) दुदुक्षन् दुधुक्षन्निति, (७) सुषाव सुसावेति, (८) पुरीषवाहणः पुरीषवाहनऽइति, (९) मामहानः ममहानऽइति, (१०) वृष्टिमाँ२ऽ इव वृष्टिमानिवेति, अध्यायशेषइति किम्, (११) तवस्तरमिति तवः । तरम्, (१२) अत्रेतिकरणे परत्वावस्थितेऽपि सकारो विद्यतएव (१३)अस्यावधेःप्राग्भूतत्वात् ॥

(१) ३४ । २० ॥

(२) ४ । ३३ ॥

(३) ३ । ३६ ॥

(४) ३३ । ११ ॥

(५) ३० । १९ ॥

(६) २९ । ५५ ॥

(७) १९ । २ ॥

(८) ११ । ४४ ॥

(९) १७ । ५५ ॥

(१०) ७ । ४० ।

(११) ११ । १५ । अत्र तथयोः समित्यनेन सकारो भवति ॥

(१२) उपस्थितं विना इतिपरत्वाऽसम्भवात् । स्थितोपस्थितस्य तु एकपदविषयत्वादन्तःपदविकारागमविषयोऽयं निषेधः । अध्याये इत्यधिकारावध्यर्थम् ॥

(१३) अस्यावधेः परभूत्वादिति 'क' पुस्तकस्य पाठइति ॥ अध्याये किम् ३० । १८ गोव्व्यच्छामिति गो । व्व्यच्छम् । इत्यादौ "स्वरे भाव्यन्तस्था"मिति सूत्रेण यकारो भवति । अयं निषेधो विकारवतः पदस्यैव स्थितोपस्थिते नान्यत्र तेन ५ । १ । रा-

इतिवच्चर्चायाम् ॥ २० ॥

इतिकरणात्परतो यत्पुनः पदवचनं तच्चर्चाशब्देनोच्यते तत्रेतिवत् इताविव, यथा इतिकरणे परत्रावस्थिते आगमविकाराश्च न भवन्ति एवमिहापि न भवन्ति, यथा (१) श्रेयः कर, चक्षुः पाः । स्वः साम्, भूः सहौ, दुः दभः । वन सदः । अवरः पराय । सु चन्द्र । दुधुक्षन् । सुसाव । पुरीषवाहनः । ममहानः । दृष्टिमान् इव । एवं ह्याहुः "लोपागमविकारांश्च नैवेतिकरणे स्मृताः । अवग्रहस्तु चर्चायामितिना चोपदिश्यते ॥

ककारपकारयोः सकारम् ॥ २१ ॥

विसर्जनीयोऽधिकृतः स यथादिष्टं ककारपकारयोः प्रत्यययोः सकारमापद्यते, यद्यप्यत्राविशेषेण सकारउक्तः तथापि कण्ठ्यपूर्वस्यैव सकारः, अकण्ठ्यपूर्वस्य तु षकारोऽभिप्रेतः, यतः 'कषोश्च कधौ सकारमिति' अकण्ठ्यपूर्वस्य सकारं विदधाति, अतोऽकण्ठ्यपूर्वस्य षकारो भवतीति निश्चीयते ॥

भाव्युपधः षकारम् ॥ २२ ॥

यस्पोषदऽइति रायस्पोष । दे । अत्र "रायः सहस्पोषपुत्रयोः" इत्यनेन प्रातिशाख्यस्थसूत्रेण सकारो भवति ॥

(१) अत्र सूत्रे यान्युदाहरणानि दत्तानि तेषामङ्काः पूर्वसूत्रोक्तोदाहरणाङ्कैर्ज्ञातव्याः ॥

अकण्ठ्यो भावीत्युक्तम् भाव्युपधो विसर्ज्जनीयः षकारमापद्यते ककारपकारयोः प्रत्यययोः । कण्ठ्यपूर्वस्य तु सकारएव एतयोरुदाहरणान्यग्रेतनसूत्रेषु द्रष्टव्यानि अधिकारसूत्रमेतत् ॥

आविर्न्निरिडइडाया वसतिर्व्वरिवः ॥ २३ ॥

आविः निः इडः इडायाः वसतिः वरिवः इति एतेषां विसर्ज्जनीयः सकारं षकारं चापद्यते यथायोगं ककारपकारयोः प्रत्यययोः, यथा (१) आविः कृणुष्व, आविष्कृणुष्व, निः) यथा (२) अम्बनिष्पर समरीर्व्विदाम्, इडः) यथा (३) इडस्पदे समिध्यसे, इडायाः) यथा (४) इडायास्पदमसि । वसतिः) यथा (५) पर्णेवो वसतिष्कृता, वरिवः) यथा (६) अयन्नो ऽअग्निर्व्वरिवस्कृणोतु ॥

दिवोऽककुत्पृथिव्योः ॥ २४ ॥

(१) १३ । १३ ॥
(२) ६ । ३६ ॥
(३) १५ । ३० ॥
(४) ४ । २२ ॥
(५) १२ । ७९ ॥
(६) ५ । ३७ ॥

दिवइत्येतस्य सम्बन्धी विसर्ज्जनीयः सकारमापद्यते ककुत्पृथिवीशब्दौ वर्ज्जयित्वा, यथा (१) दिवः पुत्राय दिवस्पुत्राय सूर्य्याय, (२) दिवस्पृष्ठे व्यचस्वतीम्, (३) दिवस्पृष्ठे ज्ज्योतिष्मतीम्, अककुत्पृथिव्योरिति किम् (४) अग्निर्मूर्द्धा दिवः ककुत्, (५) दिवः पृथिव्याः पर्य्योजः ॥

रायः सहसः पोषपुत्रयोः ॥ २५ ॥

रायः सहसइत्येतौ विसर्ज्जनीयौ सकारमापद्येते यथासङ्ख्यं पोषपुत्रयोः परयोः, रायः यथा (६) रायः पोषेण, मा व्ययर्ठ० रायस्पोषेण वि यौष्म, सहसः यथा (७) सहसः पुत्रः सहसस्पुत्रोऽअद्भुतः ॥

तमसोऽपरस्तात् ॥ २६ ॥

तमसइत्ययं विसर्ज्जनीयः सकारमापद्यते परस्ता-

---

(१) ४ । ३५ ॥
(२) १५ । ६५ ॥
(३) १५ । ५८ ॥
(४) ३ । १२ ॥
(५) २९ । ५३ ॥
(६) ४ । २२ ॥
(७) ११ । ७० ॥

च्छब्दं (१) मुक्त्वा, यथा (२) तमसः पारम् तमसस्पारमस्य, अपरस्तादिति किम् (३) आदित्यवर्णन्तमसः परस्तात् ॥

तपसस्पृथिव्याम् ॥ २७ ॥

तपसइत्ययं विसर्ज्जनीयः पृथिव्यां प्रत्यये सकारमापद्यते, यथा (४) धर्त्ता दिवो विभाति तपसस्पृथिव्याम् ॥

अद्ध्वनो रजसो रिषः स्पृशस्पातौ ॥ २८ ॥

अद्ध्वनः रजसः रिषः स्पृशः एते विसर्ज्जनीयाः पातौ प्रत्यये सकारमापद्यन्ते, अद्ध्वनः यथा (५) अद्ध्वनः पातु पूषाऽद्ध्वनस्पात्विन्द्राय । रजसः यथा (६) रजसः पाति रजसस्पात्यन्तौ, रिषः यथा (७) रिषःऽ पातु स नो दिवा सरिषस्पातु नक्तम्, पाताविति धा-

(१) वर्ज्जयित्वा इति ,क, पुस्तकपाठः ॥
(२) १२ । ७३ ॥
(३) ३१ । १८ ॥
(४) ३७ । १६ ॥
(५) ३ । १९ ॥
(६) १७ । ६० ॥
(७) १८ । ७३ ॥

वृग्रहणम् अतद्गृहापि भवति, (१) देव रिषस्पाहि, स्पृशः यथा (२) सहस्पृशस्पाहि ॥

अद्व्वनस्कर्कुर्व्विति च ॥ २९ ॥

अद्व्वनइत्ययं विसर्ज्जनीयः कुर्व्वित्येतस्मिंश्च प्रत्यये सकारमापद्यते, यथा (३) सकामाँऽ२ ॥ अद्व्वनस्कुरु ॥

समानपदे च ॥ ३० ॥

एकस्मिंश्च पदे यो विसर्ज्जनीयः स ककारपकारयोः प्रत्ययो र्य्यथायोगं सकारं षकारं चापद्यते, यथा (४) श्रेयः कर श्रेयस्कर, भूयः कर भूयस्कर, (५) आयुः पाः आयुष्पाः ॥

परावरसाने ॥ ३१ ॥

अवसानस्थे परीत्येतस्मिन्पदे प्रत्यये अधस्तनपदसम्बन्धी विसर्ज्जनीयः सकारमापद्यते, यथा (६) ओषधयः परि दिवऽ ओषधयस्परि, अवसानइति किम्

(१) ३ । ४८ ॥
(२) ३७ । ११ ॥
(३) २६ । १ ॥
(४) १० । २८ ॥
(५) २२ । १ ॥
(६) १२ । ९१ ॥

(१) तमग्ने हेडः परि ते वृणक्तु ॥

कविष्करत्कृधिषु ॥ ३२ ॥

कविः करत् कृधि एतेषु च पदेषु प्रत्ययेषु अवस्तनपदसम्बन्धी विसर्ज्जनीयः सकारं षकारं चापद्यते, कविः यथा (२) वसुः कविः सङ्दधानो वसुष्कविः, करत् यथा (३) यथा नो वस्यसः करत् यथा नो वस्यसस्करत्, कृधि यथा (४) पुनः कृधि प्रबुधे नः पुनस्कृधि ॥

कृषीश्च कृधौ सकारम् ॥ ३३ ॥

कृधौ च प्रत्यये कृषीरित्ययं विसर्ज्जनीयः सकारमापद्यते यथा (५) कृषीः कृधि सुसस्याः कृषीस्कृधि, ननु कविष्करत्कृधिष्विति कृधौ कृषीरिति विसर्ज्जनीयस्य सकारः प्राप्तः किमनेन सूत्रेण क्रियते एवन्तर्ह्यकण्ठ्योपधस्य षकारोऽभिप्रेतः स माभूदिति सकारविधानम् अस्माच्च ज्ञापकादकण्ठ्योपधः षकारमापद्यते इत्येतदध्यवस्यामः ॥

---

(१) १३ । ४५ ॥
(२) १५ । ३६ ॥
(३) ३ । ५८ ॥
(४) ४ । १४ ॥
(५) ४ । १० ॥

सदो द्यौर्न्नमस्कृतम्पितापथेषु ॥३४॥

सदः द्यौः नमः एतेषां सम्बन्धी विसर्ज्जनीयः यथा सङ्ख्यं कृतं पिता पथ इत्येतेषु पदेषु प्रत्ययेषु सकार-षकारावापद्येते सदः यथा (१) येषामप्सुसदस्कृतम्, द्यौः यथा (२) उपह्वतो द्यौष्पिता, नमः यथा (३) विश्वायुः शर्म्म सप्रथा नमस्पथे ॥

पतिताल्व्यस्वरोदये ॥ ३५ ॥

पतिशब्दे तालव्यस्वरोदये प्रत्ययेऽधस्तनपदसम्बन्धी विसर्ज्जनीयः सकारमापद्यते यथा (४) वाचःऽ पतिम् वाचस्पतिं विश्वकर्म्माणमूतये, (५) ब्रह्मणः पते ब्रह्मणस्पते त्वमस्य, (६) वाचःऽ पतये वाचस्पतये पवस्व ॥

पदे च ॥ ३६ ॥

पतिशब्दे च पदे एतद्भवति न पदावयवे यथा (७)

---

(१) १३ । ८ ॥
(२) २ । ११ ॥
(३) १८ । ५४ ॥
(४) ८ । ४५ ॥
(५) ३४ । ५८ ॥
(६) ७ । १ ॥
(७) ८ । ४५ ॥

व्वाचःऽ प्रतिम्, पद इति किम् (१) यतोजातः प्रजापतिः, (२) परमेष्ठ्यभिधीतः प्रजापतिः ॥

न परुषः परुषि ॥ ३७ ॥

परुषइत्ययं विसर्ज्जनीयः परुषि प्रत्यये न सकारमापद्यते, यथा (३) परुषः परुषस्पर्रि, समानपदे चेति प्राप्तस्य प्रतिषेधः ॥

वाजपतिर्व्वासऽएदिधिषुरन्तःपर्श-व्व्येनान्तःपार्श्व्यमिति च ॥ ३८ ॥

वाजपतिः वासः एदिधिषुः अन्तःपर्शव्येन अन्तःपार्श्व्यमित्येते विसर्ज्जनीयाः यथा प्राप्तं न सकारषकारावापद्यन्ते, (४) व्वाजपतिः कविः "कविः करत्कधिष्विति" प्राप्तिः (५) व्वासः पल्पूलीम्, (६) एदिधिषुःपतिम्, "समानपदे चे"त्युभयोः प्राप्तिः अन्तः पर्शव्येन

(१) २३ । ६३ ॥
(२) ८ । ५४ ॥
(३) १३ । २० ॥
(४) ११ । २५ ॥
(५) ३० । १२ ॥
(६) ३० । ९ ॥

यथा (१) अन्तः पर्श्व्येनोग्म्यम्, अन्तः पार्श्व्यम् यथा (२) अन्तः पार्श्व्यम्हादेवस्य, "समानपदे चे"त्युभयोः प्राप्तिः ॥

अहः पतौ रेफम् ॥ ३९ ॥

अहरित्ययं विसर्जनीयः पतिशब्दे प्रत्यये रेफमापद्यते यथा (३) अहर्पतये स्वाहा, समानपदइति प्राप्ते सकारे तदपवादो रेफः ॥

परश्च मूर्द्धन्यम् ॥ ४० ॥

इतउत्तरं लोपागमवर्णविकारान्वक्ष्यामः ते ताव-द्भविष्यन्ति परश्च दन्त्यो मूर्द्धन्यमापद्यते अधिकारसूत्र-मेतत् ॥

स्वर्धूः साꣳसहयोः ॥ ४१ ॥

स्वः धूः एतौ विसर्जनीयौ रेफमापद्यते यथासङ्ख्यं साꣳसहयोः प्रत्यययोः परश्च दन्त्यो मूर्द्धन्यमापद्यते स्वः यथा (४) स्वः साम् स्वर्षामप्सां वृजनस्य गोपाम्,

---

(१) ३९ । ८ ॥
(२) ३९ । ९ ॥
(३) ९ । २० ॥
(४) ३४ । २० ॥

धूः यथा (१) धूः साहौ धूर्षाहौ युज्येथाम् (२) ॥

उकारं दुर्दे ॥ ४२ ॥

दुरित्ययं विसर्ज्जनीय उकारमापद्यते दकारे प्रत्यये उकारात्परश्च दन्त्यो मूर्द्धन्यमापद्यते यथा (३) दुः दभः परि ते दूडभो रथः ॥

नाशे च ॥ ४३ ॥

नाशे च प्रत्यये दुरित्ययं विसर्ज्जनीय उकारमापद्यते उकारात्परश्च दन्त्यो मूर्द्धन्यमापद्यते यथा (४) दुः नाशः दूणाशः स्यमुदाहरणम् ॥

पुरो दाशे ॥ ४४ ॥

पुरइत्ययं विसर्ज्जनीयो दाशे प्रत्यये उकारमापद्यते परश्च मूर्द्धन्यम् यथा पुरः दाशः अत्र रूपसिद्धिः विसर्ज्जनीयादेशस्योकारस्य चोपधाकारस्य च उवर्णे ओकारमित्येकादेशओकारः ततः परस्य दकारस्य

(१) ४ । ३३ ॥

(२) साढुसाहयोरिति 'क' पुस्तकपाठः ॥ धुर्वाहौ इति कण्वशाखीयानां च पाठः ॥

(३) ३ । ३६ ॥

(४) दुर्णामाचदो बहुदक्षिणो दूणासश्च इति सौत्रः । दूणाशं सख्य तव । अन्यशाखीयानामिदमुदाहरणम् ॥

डकारः, (१) पुरोडाशैर्हवीᳬंष्या ॥

अनसो वाहौ सकारो डकारम् ॥४५॥

अनश्शब्दः सान्तः तस्य वाहौ प्रत्यये सकारमापद्यते यथा (२) अनस् वाहम् अनड्वाहमन्वारभामहे ॥

उकारमितः सिञ्चतौ सोपधः ॥४६॥

इतः शब्दसम्बन्धी विसर्जनीय उपधासहित उोकरमापद्यते सिञ्चतौ प्रत्यये परस्य मूर्द्धन्यम् यथा (३) इतः सिञ्चत परीतो षिञ्चता सुतम् ॥

षड्दशदन्तयोः सङ्ख्यावयोऽर्थयोश्च ॥ ४७ ॥

षडित्येतस्य शब्दस्य च शब्दादन्यो वर्णः सोपध उोकारमापद्यते परस्य मूर्द्धन्यं दशदन्तयोः प्रत्यययोर्यथा सङ्ख्यं सङ्ख्यावयसोरभिधायकयोः । यथा (४) षट् दश षोडश च मे, षट् दन्ता अस्येति षोडन्तः एतच्च शिष्यव्युत्पादनार्थम् न हि संहितायामुदाहर-

(१) १९ । २० ॥

(२) ३५ । १३ ॥

(३) १९ । २ ॥ अत्र विसर्गस्थाने परसवर्णस्य सकारस्यापवादो द्रष्टव्य इति ।

(४) १८ । २५ ॥

-षां लभ्यते (१) ॥

तआघादनाडम्बरात् ॥ ४८ ॥

आघाशब्दात्परस्तकारः परश्च मूर्द्धन्यमित्यनेन मूर्द्धन्यमापद्यते स चेदाघाशब्द आडम्बरशब्दात्परो न भवति यथा (२) दारु आघातः गोधा कालका दार्वाघाटः, अनाडम्बरादिति किम् (३) शब्दायाडम्बराघातम् ॥

वनसदोऽवेटो रेफेण ॥ ४९ ॥

वनशब्दः सदशब्दे प्रत्यये रेफेण व्यवधीयते स चेद्वनशब्दो वेट्शब्दात्परो न भवति यथा (४) वनसदः वनर्षदो वायवो न सोमाः, अवेट् इति किम् (५) बर्हिषदे वेड्वनसदे वेट् ॥

पत्यौ च सकारेण ॥ ५० ॥

पतिशब्दे च प्रत्यये वनशब्दः सकारेण व्यवधीयते,

---

(१) षोडन्त्यो अस्य महतो महित्वा । अन्यशाखीयानां पाठः ॥

(२) २४ । ३५ ॥

(३) ३० । १९ ॥

(४) ३३ । १ ॥

(५) १७ । १२ ॥

यथा (१) वनपतिः वनस्पतिः शमिता देवः ॥

ऋतावरौ च पतिपरयोः ॥ ५१ ॥

ऋतः अवरश्च शब्दौ सकारेण व्यवधीयेते यथासङ्ख्यं पतिपरयोः प्रत्यययोः, यथा (२) ऋतपते ऋतस्पते त्वष्टुर्जामातरद्भुत, (३) अवरपराय अवरस्पराय शब्दम्भमम् ॥

तद्बृहतौ करपत्योस्तलोपश्च ॥ ५२ ॥

तत् बृहत् एतौ करपतिशब्दयोः प्रत्यययोर्यथासङ्ख्यं सकारेण व्यवधीयेते पूर्वपदयोश्च तकारलोपो भवति, यथा (४) तत् करान् तस्करां २॥ऽ उत, (५) बृहत् पतिः बृहस्पतिः ॥

परिष्कृते षकारेण ॥ ५३ ॥

परीत्येतत्पदं कृते प्रत्यये षकारेण व्यवधीयते, य-

(१) २९ । ३५ ॥ इदं शास्त्रान्तरविषयम् । अत्र लेखनं तु सकारेणेति पदस्यानुवृत्तिप्रदर्शनार्थम् ॥

(२) २७ । ३४ ॥

(३) ३० । १९ ॥

(४) ११ । ७८ ॥

(५) २५ । १९ ॥

यथा (१) परिष्कृताः परिष्कृताः शुक्राः ॥

चन्द्रे सु शकारेण ॥ ५४ ॥

चन्द्रे प्रत्यये सुशब्दः शकारेण व्यवधीयते, यथा (२) सुचन्द्र उभे सुश्चन्द्र सर्प्पिषः ॥

दुधुक्षन्धो दकारम् ॥ ५५ ॥

दुधुक्षन्नित्येतस्य शब्दस्य धकारो दकारमापद्यते, यथा (३) दुधुक्षन् सहस्रधाराम्बृहतीन्दुदुक्षन् ॥

भाविभ्यः सः षठ० समानपदे ॥५६॥

अकवर्ज्जो भावीत्युक्तम् भाविभ्यउत्तरः सकारः षकारमापद्यते एकपदस्थौ चेद्भाविसकारौ भवतः, यथा (४) गोस्थानम् व्रजङ्गच्छ गोष्ठानम्, (५) परमेस्थी परमेष्ठ्यभिधीतः, (६) सुसाव सुषाव सोमम्, (७) सी-

(१) २१ । ४२ ॥ परिष्कृण्वन्ति इत्युदारणं शाखान्तरीणम् ॥
(२) १५ । ४३ ॥
(३) ३३ । २८ ॥
(४) १ । २५ ॥
(५) ८ । ५४ ॥
(६) १९ । २ ॥
(७) २५ । ४६ । तस्मादित्युत्तरस्येत्यव्यवहितस्य तेन प्रेषितइत्यत्र तकारस्य 'षात्तथौ' मूर्द्धन्यमित्यनेन सूत्रेण टकारात्मको मूर्द्धन्यवर्णो न भवतीति सुज्ञैर्ज्ञेयः ॥

सधाम सोषधामेन्द्रश्च, भाविष्यदिति किम् (१) ध्रुवसदन्त्वा, समानपदइति किम् (२) वि सीमतः सुरुचः ॥

अनुस्वाराच्च तत्पूर्वात् ॥५७॥

अनुस्वाराच्च परः सकारः षकारमापद्यते, भाविपूर्वात् यथा (३) तपूंष्यग्ने, (४) पुरोडाशैंर्हवींष्या, तत्पूर्वादिति किम् (५) उत्सन्नानाम्मामकानाम्मनांसि॥

करेफाभ्याञ्च ॥ ५८ ॥

ककाररेफाभ्यां च परः सकारः षकारमापद्यते, ककाराद्भवति यथा (६) दिक् सु ये चैनठं रुद्राऽअभितो दिक्षु, ऋक् सु ऋक्षु, रेफाद्भवति यथा (७) गीः सु गीर्षु, धूः सु धूर्षु, ननु (८) च यत्र पदकारोऽन्यथाभूतं

(१) ९ । २ ॥
(२) १२ । ३ ॥
(३) १३ । ९ ॥
(४) १९ । २० ॥
(५) १७ । ४२ ॥
(६) १६ । ६ ॥
(७) रेफात्परो ३३ । १ । वनर्षदो व्वायवं÷ चकाराद्भाविपूर्वात्परस्य सकारस्योदाहरणं ७ । ३८ अनुष्ष्वधम्मदायोति ज्ञेयम् ॥
(८) ननु यदुदाहरणं व्याकरणसाध्यं न भवति तत्र प्रातिशाख्यलक्षणं कर्त्तुमुचितं एवं कृते सति करेफाभ्यामित्यादीनां वैयर्थ्यमिति चेत्सत्यमित्येवं प्रसङ्गादाचार्य्येण

पदं करोति अन्यथा चार्षसंहिता तत्रैव लक्षणं कर्त्तुं युज्यते, यथा सुसाव सुषाव, यत्र पुनः पदकारस्य (१) चार्षसंहितायाश्च समानवाक्यत्वं तत्र लक्षणं न घटते व्याकरणस्य विषयः सत्यमेव यदि नाम प्रसङ्गमुपजीव्याचार्येण शिष्यव्युत्पत्त्यर्थं (२) कश्चिद्व्याकरणलक्षणादृह्यासञ्जितः एवं संहितायामविद्यमानेषु लक्षणं द्रष्टव्यम्, अथवा यथा एधाहारस्य मध्वाहरणमुदकाहारस्य मत्स्याहरणं पुष्पाहारस्य फलाहरणम् एवमेतदपि एवं च कृत्वा अदोषएवेति ॥

नेः सीदतेः ॥ ५९ ॥

नेः परस्य सीदतेः सकारः षकारमापद्यते यथा (३) नि सीदत एदं बर्हिर्निषीदत ॥

ससाद च ॥ ६० ॥

नेःपरस्य ससादशब्दस्य सकारः षकारमापद्यते,

शिष्यव्युत्पत्त्यर्थं कश्चिद्व्याकरणविषयोऽपि प्रदर्शितः । वस्तुतस्तु ऋक्सामयोरित्युदाहरणे हि० सोऽृक्सामयोरित्यादि वक्ष्यमाणनिषेधशास्त्रेण षत्वमपवादिष्यति तत्र प्राप्तिपूर्वकत्वात्प्रतिषेधस्येति तत्प्राप्त्यर्थमत्र लेखनं संहितायामविद्यमानपदव्युत्पादनमपि शिष्यव्युत्पत्यर्थञ्चेति न कश्चिद्दोषः यथा इध्मानयनार्थं प्रवृत्तस्य नरस्य प्रसङ्गाच्छाकानयनवत् । यद्वा पञ्चदशसु शाखासु लक्षणार्थमाचार्य्यस्य प्रवृत्तेः । अथ वा तत्तच्छाखासिद्धोदाहरणसिद्ध्यर्थं सूत्राधिक्यकरणमिति द्रष्टव्यम् ॥

(१) आर्ष्याः संहिताया एकवाक्यत्वमिति 'घ' पुस्तकपाठः ॥

(२) कश्चिद्व्याकरणलक्ष्यलक्षणइहाशङ्कितइति 'ग' पुस्तकपाठः ॥

(३) ७ । ३४ ॥

यथा (१) नि ससाद नि षसाद धृतव्रतः, असमानपदार्थ आरम्भः ॥

ओकारात्सु ॥ ६१ ॥

ओकारात्पदात्परः सुसकारः षकारमापद्यते, यथा (२) मो सुनः मो षूणः ॥

ऊश्चापृक्तात् ॥ ६२ ॥

एकवर्णं पदमपृक्तमित्युक्तम् ऊकाराच्चापृक्तसञ्ज्ञात्परः सुसकारः षकारमापद्यते, यथा (३) ऊँ इति ऊ सु नः ऊर्ध्व ऽऊषुणः ॥

अभेश्च ॥ ६३ ॥

अभेरुपसर्गाच्च परः सुसकारः षकारमापद्यते, यथा (४) अभि सु नः अभीषुणः सखीनाम् ॥

परेश्च सिञ्चतेः ॥ ६४ ॥

---

(१) १० । २७ ॥ एतस्य सदधातुजत्वात्स्पष्टार्थम् । सीदतेरिति इकश्तिपौ धातुनिर्देशइति सिद्धे पुनर्ग्रहणं व्याकरणानभिज्ञस्य मन्दधियः परिज्ञापनार्थञ्चेति ॥

(२) ३ । ४६ ॥ ओषुघृष्टिराध्वरा । सहोषुणो वज्रहस्तैः । इदमुदाहरणद्वयमन्यशाखीयं द्रष्टव्यम् ॥

(३) ११ । ४२ ॥

(४) ३६ । ६ ॥

परेरुपसर्गाच्च परः सिञ्चतेः सकारः षकारमापद्यते, यथा (१) परि॑ षिञ्चन्ति ॥

अभेश्च ॥ ६५ ॥

अभेरुपसर्गाच्च परः सिञ्चतेः सकारः षकारमापद्यते संहितायाम्, यथा (२) अभि सिञ्चामि अभिषि॑ञ्चाम्यसौ ॥

अव्यवहितोऽपि ॥ ६६ ॥

अकारव्यवहितो ऽप्यभेरुत्तरः सिञ्चतेः सकारः षकारमापद्यते संहितायाम्, यथा (३) अभ्यसिञ्चन् या॒भिर्मि॑त्रावरु॑णावभ्यषिञ्चन् ॥

वेर्युदयः ॥ ६७ ॥

वेरुपसर्गात्परः सकारो यकारोदयः षकारमापद्यते, (४) विष्यामि तन्ते॒ व्विष्या॒म्यायु॑षो॒ न मध्या॑त्, यकारोदयइति किम् (५) व्वि स्व॒ः पश्य॒व्व्यन्तरि॑क्षम् ॥

---

(१) १९ । २८ ॥ परेः सिञ्चतेः, इति 'ख' 'ग' पुस्तकपाठः ॥

(२) ९ । ३० ॥ अभेरित्येव 'ग' 'घ' पुस्तकपाठः ॥

(३) १० । १ ॥

(४) १२ । ६५ ॥

(५) ७ । ४४ ॥

हेर्मिथोदयः ॥ ६८ ॥

हिशब्दात्परः सकारो मकारोदयो वा थकारोदयो वा षकारमापद्यते, मकारोदयो यथा (१) हि ष्म अस्ति हि ष्मा॑ते शुष्मिन्नवयाः, थकारोदयो यथा (२) हि ष्ठा आपो॑ हि ष्ठा म॑यो॒भुवः॑ ॥

द्यवेश्च ॥ ६९ ॥

द्यविशब्दाच्च परः सकारः षकारमापद्यते यथासम्भवं मकारोदयः थकारोदयश्च संहितायाम् यथा (३) द्यवि ष्ठ ये॑ ऽअ॒न्तरि॑क्षे॒ ऽय॒ऽउप॒ द्यवि॒ष्ठ ॥

नेः स्त्यास्तनोः ॥ ७० ॥

नेरुपसर्गात्परयोः स्त्यास्तन्योर्धात्वोः सकारः षकारमापद्यते संहितायाम्, यथा (४) निः स्त्यायताम् आ-ष्ट्यायतान्निष्ट्या॑यताम्, निस्तनिहि (५) निष्ट॑निहि दु॒रिता बाध॑मानः ॥

(१) ३ । ४६ ॥

(२) ११ । ५० ॥

(३) ३३ । ५३ ॥ मकारस्तु पूर्वसूत्रान्न सम्बद्ध्यते कुतः उदाहरणस्यासम्भवात् ॥

(४) ६ । १५ ॥ ष्ट्यै सङ्घाते इत्यस्माद्धातोरूपम् । परन्तु पदपाठे आर्षत्वात् स्त्यायतामित्येतत्पदघटकीभूतस्य सकारस्य षत्वविधानादृषिमते तथैव धातुरस्ति ॥

(५) २९ । ५६ । निः स्तनिहि । इति स्थिते 'लुङ्मुदि जित्परे' इति विसर्गलोपे कृते सस्य षः । स्तनशब्दे चुरादिरदन्तः । नेस्त्यास्तन्योरिति 'ख' पुस्तकपाठः ॥

ततक्षौ ॥ ७१ ॥

ततक्षुरित्येतस्मिन्नुत्तरपदे निरुपसर्गसम्बन्धिविसर्ज्जनीयसकारः षकारमापद्यते यथा (१) निः ततक्षुः स्वधया निष्टतक्षुः ॥

अनोः स्तुवन्त्याम् ॥ ७२ ॥

अनोरुपसर्गात्परः स्तुवन्तिसकारः षकारमापद्यते यथा (२) अनु स्तुवन्ति अनुष्टुवन्ति पूर्व्वथा ॥

दुष्ष्वाप्न्यम् ॥ ७३ ॥

निपातनसूत्रमेतत् भाविभ्यउत्तरस्य सकारस्य षत्वमित्युक्तं समानपदे इह तु विसर्ज्जनीयेन व्यवधानान्न प्राप्नोति अतः षत्वं निपात्यते संहितायाम्, यथा (३) दुःष्वाप्न्यम् अपं दुःष्वाप्न्यꣳ सुव ॥

वन्दारुम्माकिः ॥ ७४ ॥

वन्दारुः माकिः अनयोर्विसर्ज्जनीयस्य सकारः षकारमापद्यते संहितायाम् तथयोः समिति विसर्ज्ज-

(१) १७ । ८२ ॥
(२) ३३ । १७ ॥
(३) ३५ । ११ ॥

नीयस्य सकारउक्तस्तस्यैव षत्त्वम् यथा (१) वन्द्रारुः ते व्वन्द्रारुष्टे तन्वँ व्वन्द्रे अग्ने, (२) माकिः ते माकिष्टे व्यथिरादधर्षीत् ॥

सहेः पृतनायाः ॥ ७५ ॥

एतदपि निपातनसूत्रम् अभान्निपूर्वत्वात्षकारो न प्राप्नोति स निपात्यते । यथा (३) पृतनासाह्याय च पृतनाषाह्याय च ॥

सधिरंशुरदितिः ॥ ७६ ॥

सधिः अंशुः अदितिः एतेषां विसर्ज्जनीयसकारः षकारमापद्यते संहितायाम्, सधिः (४) यथा सधिः तव सधिष्टव सौषधीः, अंशुः यथा (५) अंशुः ते अंशुष्टे देव सोम, अदितिः यथा (६) अदितिः त्वा अदितिष्ट्वा देवी ॥

वायुरग्निरग्नेरेकाक्षरे ॥ ७७ ॥

(१) १२ । ४२ ॥
(२) १३ । ११ ॥
(३) १८ । ६८ ॥
(४) १२ । ३६ ॥
(५) ५ । ७ ॥
(६) ११ । ६१ ॥

वायुः अग्निः अग्नेः एतेषां विसर्ज्जनीयसकारः षकारमापद्यते एकाक्षरे पदे प्रत्यये, यथा (१) वायुः ते व्वायुष्टेऽधिपतिः, (२) अग्निः ते अग्निष्टेऽधिपतिः, (३) अग्नेः त्वा अग्नेष्ट्वास्येन, एकाक्षरइति किम् (४) अग्निः तिग्मेन अग्निस्तिग्मेन शोचिषा, (५) अग्नेः तनूः अग्नेस्तनूरसि ॥

सकारपरे च ॥ ७८ ॥

सकारः परो यस्मादेकाक्षरात्स तथोक्तः तस्मिन्नेकाक्षरे प्रत्यये च शब्दादधस्तनपदसम्बन्धी विसर्ज्जनीयसकारः षकारमापद्यते संहितायाम्, यथा (६) बृहस्पतिः त्वा सुम्ने बृहस्पतिष्ट्वा सुम्ने, (७) प्रजापतिः त्वा सादयतु प्रजापतिष्ट्वा सादयतु, सकारपरइति किम् (८) विष्णुस्त्वा क्रमताम् (९) सवितुस्त्वाप्रसवे ॥

(१) १४ । १४ ॥
(२) १३ । २४ ॥
(३) २ । ११ ॥
(४) १७ । १६ ॥
(५) १ । १५ ॥
(६) ४ । २१ ॥
(७) १३ । १७ ॥
(८) २ । ९ ॥
(९) १ । ३१ ॥

मातृभिरर्च्चिभिः पायुभिर्व्वरूत्रीः ॥ ७९ ॥

मातृभिः अर्चिभिः पायुभिः वरूत्रीः एतेषां च पदानां विसर्ज्जनीयसकारः षकारमापद्यते एकाक्षरे प्रत्यये, मातृभिः यथा (१) मातृभिः त्वम् मातृभिष्ट्वम्, अर्चिभिः यथा (२) अर्चिभिः त्वम् अर्चिभिष्ट्वम्, पायुभिर्यथा (३) पायुभिः त्वम् पायुभिष्ट्वम्, वरूत्रीः यथा (४) वरूत्रीः त्वा वरूत्रीष्ट्वा देवीः ॥

षात्तथौ मूर्द्धन्यम् ॥ ८० ॥

षकारात्परः तकारथकारौ मूर्द्धन्यमापद्यते विकारी यथासन्नमिति परिभाषितत्वात् तकारस्य टकारः थकारस्य ठकारः यथा (५) वरूत्रीष्ट्वा (६) कृष्णोऽस्याखरेष्ठः

प्रकृत्या नानापदस्थे तकारे ॥८१॥

(१) १२ । ३८ ॥
(२) १२ । ३२ ॥
(३) ३३ । ६९ ॥
(४) ११ । ६१ ॥
(५) ११ । ६१ ॥
(६) २ । १ ॥

द्रुतउत्तरं प्रकृत्या सकारो भविष्यति समानपदस्थः नानापदस्थस्तु यः प्रकृतिभावः स (१) तकारे प्रत्येतव्यः अपवादसूत्रमेतत् ॥

अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसन्दृशमभिसत्त्वाऽभिसंविशन्तु सुसस्याऽअतिस्थूलम्मुसलेपत्क्रीसँय्याजान् ऋतुस्थलाञ्जिसक्वथो दिविस्पृशा हृदिस्पृशꣳ हिꣳसीर्ऋक्कसामयोर्ऋक्कसामाभ्यान्तित्तिरिः सीसेन सीसाः सीसम्पशुसनिगोसनि प्रतिसदृङ् प्रतिसदृक्षासश्चतुस्त्रिꣳशत् ॥ ८२ ॥

अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसंदृ-

(१) अतकारे इति छेदः । अकारपूर्वस्तकारः अतकारः सकारः प्रकृत्या स्यात नानापदे च । नानापदस्थेऽतकारे परिभूते पूर्वपदस्थान्निमित्तादुत्तरपदस्थः सदइत्यस्य सकारः प्रकृत्या स्यात् इत्यर्थः तकारपदान्तीयाभिप्रायेण तेन सदो दकारत्वेऽपि न दोषः । अत्राकारव्यवहिततकारपरत्वं बोध्यन्न त्वव्यवधानेन । पृथिविसदम् । उर्वीरसदो दुवस्वन्तः । अनेन प्राप्ते पुनर्योगकरणं विकल्पार्थम् ॥

शम् अभि सत्त्वा अभि संविशन्तु सुसस्याः अतिस्थूलम् मुसले पत्नीसंयाजान् क्रतुस्थला अश्विसक्थः दिविस्पृशाः हृदिस्पृशम् हिंसीः रुक्सामयोः रुक्सामाभ्याम् तित्तिरिः सीसेन सीसा सीसम् पशुसनि गोसनि प्रतिसहङ् प्रतिसहच्चासः चतुस्त्रिंशत् एते सकाराः प्रकृत्या भवन्ति सकारः षकारं प्राप्नोति स निषिध्यतइति सूत्रार्थः, इदानीमुदाहरणानि दीयन्ते अनुसन्तनोतु यथा (१) इदम्मे कर्मेदं वीर्य्यम्पुत्रोऽनुसन्तनोतु, बृहस्पतिसुतस्य यथा (२) बृहस्पतिसुतस्य देव, सुसमिद्धाय यथा (३) सुसमिद्धाय शोचिषे, सुसन्दृशम् यथा (४) सुसन्दृशन्त्वा व्वयम्, अभि सत्वा यथा (५) अभि वीरोऽ अभि सत्त्वा सहोजाः, अभि सँव्विशन्तु यथा (६) इन्द्रमिव देवाऽ अभि सँव्विशन्तु, सुसस्याः यथा (७) सुसस्याः कृषीस्कृधि, अतिस्थूलम्

---

(१) एकपादीनामके २ काण्डे ३ प्रपाठके ३ अध्याये २ ब्राह्मणे एकचत्वारिंशत् कण्डिकायाम् ॥

(२) ८ । ९ ॥

(३) ३ । २ ॥

(४) ३ । ५२ ॥

(५) १७ । ३७ ॥

(६) १३ । २५ ॥

(७) ४ । १० ॥

यथा (१) अतिस्थूलञ्चातिकृशञ्च, मुसले यथा (२) उलूखलमुसले, पत्नीसंयाजान् यथा (३) ग्रायुना पत्नीसंयाजान्, क्रतुस्थला यथा (४) पुञ्जिकस्थला च क्रतुस्थला च, अञ्जिसक्थो यथा (५) शितिकक्षोञ्जिसक्थः, दिविस्पृशा यथा (६) घृतप्रतीको बृहता दिविस्पृशा, हृदिस्पृशम् यथा (७) क्रतुन्न भद्रꣳ हृदिस्पृशम्, एतेषां पदानां सकारो भाव्युपधत्वात्षत्वं प्राप्नोति तस्यैतेन प्रकृतिभावः, हिꣳसीः यथा (८) स्वधिते मैनꣳ हिꣳसीः अनुस्वाराच्च तत्पूर्वादिति प्राप्तिः कटकक्षामयोः यथा (९) कटकक्षामयोः शिल्पे कटकक्षामाभ्याꣳ सन्तरन्त;, करेफाभ्याञ्चेति प्राप्तिः, तित्तिरिः यथा (१०) तित्तिरिस्ते सर्पाणाम्, एकाक्षरे सकारपरे चेति प्राप्तिः, इदमर्थेन च नाना-

(१) ३० । २२ ॥

(२) प्रथमकाण्डे शातपथीयहविर्यज्ञनामके १ ब्राह्मणे २२ द्वाविंशतिकण्डिकायाम् ॥

(३) १९ । २९ ॥

(४) १५ । १५ ॥

(५) २४ । ४ ॥

(६) १५ । २७ ॥

(७) १५ । ४४ ॥

(८) ४ । १ ॥

(९) ४ । ९ ॥

(१०) २४ । ३६ ॥

पदस्थे तकारइति सूत्रावयवः कृतः अन्यथातित्तिरिपदे सकारो न विद्यतइति मोहः स्यात्, सीसेन यथा (१) सीसेन तन्त्रं मनसा, सीसाः यथा (२) रजता हरिणीः सीसायुजो युज्यम्, सीसम् यथा (३) सीसञ्च मे, पशुसनि यथा (४) प्रजासनि पशुसनि, गोसनिर्यथा (५) यो गोसनिस्तस्य ऽत इष्टयजुषः । प्रतिसदृङ् यथा (६) सदृङ् च प्रतिसदृङ् च, प्रतिसदृक्षासः यथा (७) प्रतिसदृक्षास ऽएतन, चतुस्त्रिंशत् यथा (८) चतुस्त्रिंशद्वाजिनः, न चात्र भावीविसर्ज्जनीयव्यवहितः अतो नैवेह षत्वशंका किमनेन सूत्रावयवेनेति एवन्तर्हि येऽन्येपि चतुः शब्दविसर्ज्जनीयव्यवहितास्तेषां षत्वार्थम् । (९) यथा चतुः स्तोमः चतुष्टोमः ॥

ऋकाररेफादयश्च ॥ ८३ ॥

(१) १९ । ८० ॥
(२) २३ । ३७ ॥
(३) १८ । १३ ॥
(४) १९ । ४८ ॥
(५) ८ । १२ ॥
(६) १७ । ८१ ॥
(७) १७ । ८४ ॥
(८) २५ । ४१ ॥
(९) १४ । २४ ॥

ऋकारोदयः रेफोदयः अवदयश्च सकारः प्रकृत्या भवति, ऋकारोदयः यथा (१) तिसृभिरस्तुवत, रेफोदयः यथा (२) तिस्रश्चमे, अवदयः यथा (३) व्वाचो व्विसर्ज्जनम् ॥

पृथिविदिव्युपरिचर्षणिशकुनियासिभ्यः ॥ ८४ ॥

पृथिवि दिवि उपरि शकुनि यासि एतेभ्यो भाविभ्यः परः सकारः प्रकृत्या भवति संहितायाम्, पृथिवि यथा (४) पृथिवि सदन्त्वा, दिवि यथा (५) दिवि सदन्देवसदम्, उपरि यथा (६) उपरि सदो दुवस्वन्तः, चर्षणि यथा (७) चर्षणीसहा व्वेत्तु, शकुनि यथा (८) शकुनि सादेन, यासि यथा (९) अवयासि सिसीष्ठाः (१०) ॥

(१) १४ । २८ ॥

(२) १७ । २४ ॥

(३) १ । १५ ॥

(४) ९ । २ ॥

(५) ९ । २ ॥

(६) ९ । ३६ ॥

(७) २८ । १ ॥

(८) २५ । ३ ॥

(९) २१ । ३ ॥

(१०) पृथिवि सदन्त्वेत्यादीनि त्रयाणामाद्यानामुदाहरणान्युक्तानि । तत्र सिद्धानाम-

ऋषरेभ्यो नकारो णकारः समानपदे ॥ ८५ ॥

ऋकारषकाररेफेभ्य उत्तरो नकारो णकारमापद्यते समानपदे, ऋकाराद्भवति यथा (१) नृणाम्, षकाराद्भवति यथा (२) पूष्णः, रेफाद्भवति यथा (३) पूर्णा, एते प्रत्ययनकाराः ऋषरेफेभ्य उत्तराः सन्तो णकारमापद्यन्ते, अयं तावत्सूत्रार्थो व्याकरणविषयप्रदर्शनार्थं क्रियते ॥

स्वरयवहकपैश्च ॥ ८६ ॥

स्वरैर्यकारवकारहकारैः कवर्गपवर्गाभ्याञ्च व्यवहितो नकारः ऋषरेभ्य उत्तरो णकारमापद्यते संहितायाम्, यथा (४) नृमणाः तृतीयमप्सु नृमणाः, (५)

त्र पुनर्ग्रहणं सौत्रस्य विधेरनित्यत्वज्ञापनार्थं तेन शुचिषत् नृषदित्यादावेव पृथिविषदमित्यादि न प्रकृतिभावप्राप्तिः । अनेन प्राप्तिश्चेति विकल्पः फलितो भवति अन्यथा प्रकृतस्यैतावतैव सिद्धेऽनानापदस्थे तकारे इति व्यर्थं स्यात् । प्रयोजनान्तराभावात् । विकल्पश्च व्यवस्थाप्यते । यथा चरणपाठः पृथिविषदमित्यादौ काण्वाः षत्वं पठन्ति । माध्यन्दिनास्तु सत्वमेव पठन्तीति बोध्यम् ॥

(१) ११ । २७ ॥

(२) १ । १० ॥

(३) ३ । ४९ ॥

(४) १२ । २८ ॥

(५) ११ । ४४ ॥

पुरीषवाहनः अग्नेः पुरीषवाहणः, (१) प्रवाहनः विभूरसि प्रवाहणः, ऋषरेभ्यइति किम् (२) वह्निरसि हव्यवाहनः, समानपदइति किम् (३) प्र नो यच्छत्वर्य्यमा ॥

निषण्णाय रथवाहणमिन्द्रऽएणम्परिणीयते समिन्द्रणऽउरुष्याणो रक्षाणः षूणः षुणः षुणासत्या स्वर्णास्थूरिणौ प्र णऽ आयूꣳषि ॥ ८७ ॥

निषण्णाय रथवाहणम् इन्द्रएणम् परिणीयते समिन्द्रणः उरुष्याणः रक्षाणः षूणः षुणः षुणासत्या स्वर्णाः अस्थूरि णौ प्रणऽआयूꣳषि एते च णकारा निपात्यन्ते यदत्र लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम् यथा निषण्णाय अत्र द्वयोर्नकारयोर्णत्वं निपात्यते प्रथमस्य तवर्गे चेति निषेधः उत्तरस्य तु नकारव्यवहितत्वात् नकारस्य स्वरयवहकपां मध्ये न पठ्यते, (४) निषण्णाय स्वाहोत्थिताय, रथवाहणं यथा (५) रथवाहनम् थका-

(१) ५ । ३१ ॥
(२) ५ । ३१ ॥
(३) ९ । २९ ॥
(४) २२ । ८ ॥
(५) २९ । ४५ ॥

रेण व्यवधानादप्राप्तिः अतो निपात्यते रथवाहणं० हविर्धस्य नाम, इन्द्रऽएणम् यथा (१) इन्द्रऽएनम् इत-ऽउत्तरमसमानपदत्वादप्राप्तं णत्वं निपात्यते । इन्द्रऽए-णं प्रथमोऽअध्यतिष्ठत्, परिणीयते यथा (२) परिनी-यते सोऽअध्वराय परिणीयते कविः, समिन्द्रणः यथा (३) इन्द्र नः समिन्द्र णो मनसा नेषि गोभिः, उरु-ष्याणः यथा (४) उरुष्यानः उरुष्याणोऽअघायतः समस्मात्, रक्षाणः यथा (५) रक्ष नः रक्षाणो ब्रह्म-णस्पते, षूणः यथा (६) षूनः मोषूणऽइन्द्रात्र, षुणः यथा (७) अभीषु नः अभीषु णः सखीनाम्, षुणा य-था (८) गोमद्रूषु नासत्या गोमद्रूषुणा सत्या, स्वर्ण य-था (९) स्वः न स्वर्ण घर्मः स्वाहा, अस्तूरि णौ यथा

---

(१) २९ । १३ ॥

(२) ३३ । ७४ ॥

(३) ८ । १५ ॥

(४) ३ । २७ ॥

(५) ३ । २९ ॥

(६) ३ । ४६ ॥

(७) २७ । ४१ । ऋषरेभ्यः समानपदत्वादप्राप्ते णत्वविधिः काण्वानां पठ्यते । तत्रोत्सर्गविधित्वेऽन्यानप्युदाहरणानि दीयन्ते ॥

(८) २० । ८१ ॥

(९) १८ । ५० ॥

(१) अस्थूरि नौ अस्त्थूरि णौ गार्हपत्यानि सन्तु, प्रण आयूꣳषि यथा (२) प्र नः आयूꣳषि प्रण आयूꣳषि तारिषः, आयूꣳषीति किम् (३) भग प्र नो जनय गोभिः ॥

परिणऽइति शाकटायनः ॥ ८८ ॥

परिणइति निपात्यते शाकटायनाचार्यस्य मतेन, यथा (४) परि नः परिणो रुद्रस्य हेतिः, शाकटायनइति किम् (५) परि नो रुद्रस्य हेतिः ॥

प्र नेतिनुदातिहिनोमिनाम् ॥ ८९ ॥

प्रपूर्वाणाम् नेति नुदाति हिनोमि एषां शब्दरूपाणां नकारो णकारमापद्यते संहितायाम्, अत्र नेति नुदात्योर्द्वीग्रहणमतः सर्वप्रत्ययान्तयोर्भवति (६) हिनोतेस्तु विकरणनिर्देशाद्यत्र विकरणं तत्रैव भवति,

---

(१) २ । २७ ॥

(२) २३ । ३१ ॥

(३) ३४ । ३६ ॥

(४) इति काण्वानां पाठः । वाजसनेयिनां तु णत्वरहितः पाठस्तस्माच्छाकटायनग्रहणं विकल्पार्थम् ॥

(५) १६ । ५० ॥

(६) हिनोमीति च विकरणनिर्देशात्तन्मात्रग्रहणमिति विवेकः, इति (ग) पुस्तकपाठः ॥

नेति यथा (१) प्र नय प्रणय देवाव्यम्, नुदाति यथा (२) प्र नुदानः अग्ने जाताग्प्रणुदानः, हिनोमि यथा (३) प्रहिनोमि क्रव्यादमग्निं प्रहिणोमि ॥

प्रकृत्या पदान्तीयः ॥ ९० ॥

पदान्तीयो नकारो हल् प्रकृत्या भवति, समानपद इति प्राप्तिः यथा (४) पितॄन्हविषे ऽअत्तवे, (५) पूषन्तव व्रते वयम्, (६) अकृन्कर्म कर्मकृतः ॥

निवनिनसः प्रपीनम् ॥ ९१ ॥

नि वनि नसः प्रपीनम् एते नकाराः प्रकृत्या भवन्ति, समानपदइति प्राप्तिः नि यथा (७) कृष्णा बभ्रुनीकाशाः, वनि यथा (८) ब्रह्मवनिं त्वा क्षत्रवनिं, नसः यथा (९) वार्द्ध्रीनसस्ते मत्या अरण्याय, प्रपी-

---

(१) ११ । ८ ॥
(२) १५ । १ ॥
(३) ३५ । १९ ॥
(४) १९ । ७० ॥
(५) ३४ । ४१ ॥
(६) ३ । ४७ ॥
(७) २४ । १८ ॥
(८) १ । १७ ॥
(९) २४ । ३९ ॥

नम् यथा (१) अपाम्प॑र्णीनमग्ग्ने ॥

श्रीमनाऽ इत्येके ॥ ९२ ॥

अयञ्च नकारः प्रकृत्या भवति एकेषामाचार्य्याणा-
म्मतेन, यथा (२) श्रीम॑नाः शतप॑याः, एकेषामिति
किम् (३) श्रीम॑णाः शतप॑याः ॥

इन्द्राग्ग्नी चित्रभानो वार्त्त्रग्घ्न न्दुःष्व-
प्प्न्यन्ध्रुवयोनिः पुरोऽनुवाक्क्याभिः
रोऽनुवाक्क्याश्चर्म्मम्नम् ॥ ९३ ॥

इन्द्राग्ग्नी चित्रभानो वार्त्रघ्नम् दुःष्वप्न्यम् ध्रुवयोनिः
पुरोऽनुवाक्याभिः पुरोऽनुवाक्याः चर्म्मम्नम् एते च न-
काराः समानपदइति प्राप्तणकाराः प्रकृत्या भवन्ति,
इन्द्राग्ग्नी यथा (४) इन्द्राग्ग्न्योरुज्जितिम्, चित्रभानो
यथा (५) इन्द्रायाहि चित्रभानो, वार्त्त्रघ्नम् यथा (६)

(१) १७ । ७८ ॥
(२) १७ । ५७ ॥
(३) यथा चरणानां पाठव्यवस्था नत्वणत्वे माध्यन्दिनकाण्वयोर्ज्ञेयेति ॥
(४) २ । १५ ॥
(५) २० । ८७ ॥
(६) ९ । ८ ॥

इन्द्रस्य वार्त्रघ्नमसि, दुःष्वप्न्यम् यथा (१) अप दुःष्वप्न्यंठं० सुव, ध्रुवयोनिर्यथा (२) ध्रुवक्षितिर्ध्रुवयोनिः, पुरोऽनुवाक्याभिः यथा (३) ऋषे: पुरोऽनुवाक्क्याभिः, पुरोऽनुवाक्याः यथा (४) पुरोऽनुवाक्क्या याज्याभिः, चर्मण्णम् यथा (५) साह्योर्ध्वश्वचर्मण्णम् ॥

तवर्गे च ॥ ९४ ॥

तवर्गे च प्रत्यये ऋषरेफेभ्यउत्तरो नकारः प्रकृत्या भवति, यथा (६) त्वम्मन्तु श्नोत्राः, (७) अवक्रन्देन तालु ॥

षादनन्तरऋकारे ॥ ९५ ॥

षकारादनन्तरो नकारऋकारे प्रत्यये प्रकृत्या भवति, यथा (८) उग्रस्त्वेष नृम्णः ॥

---

(१) ३५ । ११ ॥
(२) १४ । १ ॥
(३) २० । १२ ॥
(४) २० । १२ ॥
(५) ३० । १५ ॥
(६) ७ । १५ ॥
(७) २५ । १ ॥
(८) ३३ । ८० ॥

शिलिसिवर्गमध्यमव्यवहितो-ऽपि ॥९६॥

शकारलकारसकारव्यवहितः वर्गाश्च ते मध्यमाश्च वर्गमध्यमाः चटतवर्गाः तैश्च व्यवहितो नकारऋषरेभ्य उत्तरः प्रकृत्या भवति, शकारव्यवहितो यथा (१) दृशानो रुक्मः, (२) सम्राडसि कृशानुः, लकारव्यवहितः यथा (३) निर्ऋतिर्निर्ऋत्यर्ल्ल्येन, सकारव्यवहितः यथा (४) अपाᳬ रसेन वरुणः, चवर्गव्यवहितः यथा (५) प्राचीनं ज्योतिः, (६) अन्तश्चरति रोचना, टवर्गव्यवहितः यथा (७) त्रैष्टुभेन च्छन्दसा, (८) अनुष्टुभेन च्छन्दसा, तवर्गव्यवहितो यथा (९) रथिनो जयन्तु, (१०) आर्त्नी इमे, ननु शिलिसिवर्गमध्यमव्यवहितोऽपीत्यनेन सूत्रेण एतैर्वर्णैर्व्यवहितऋषरेफेभ्य-

(१) १२ । १ ॥
(२) ५ । ३२ ॥
(३) २५ । २ ॥
(४) १९ । ९४ ॥
(५) २० । ४२ ॥
(६) ३ । ७ ॥
(७) ११ । ९ ॥
(८) ११ । ११ ॥
(९) २९ । ५७ ॥
(१०) २९ । ४१ ॥

उत्तरो नकारः प्रकृत्या भवति समानपदइत्युक्तम्, तथा 'ऋषरेफेभ्यो नकारो णकारः समानपदे' स्वरयवहकपैश्च' इत्यनेन (१) एतैर्वर्णैर्व्यवहितोऽपि नकारो णकारमापद्यते समानपदे इत्युक्तम्, एवं यएव स्वरयवहकपव्यतिरिक्ता वर्णास्तएव शिलिसिवर्गमध्यमाः अतोऽनेन सूत्रेण न प्रयोजनम् एवन्तर्ह्युभयथा लक्षणानुकथनं शिष्यबुद्धिव्युत्पादनार्थम् ॥

दीर्घम् ॥ ९७ ॥

विसर्ज्जनीयइत्युपक्रम्य द्वयोर्व्यञ्जनयोः सन्धौ ये लोपागमवर्णविकारास्ते प्रतिपादिताः, अधुना स्वरस्य व्यञ्जनेन सह सन्धौ यः स्वरविकारः सउच्यते ह्रस्वः स्वरो दीर्घविकारमापद्यते अधिकारसूत्रमेतत् ॥

अश्वरश्मिमतिसुमतिश्वसुतचारयघृणिसेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाऽश्वस्यहृदयघुष्ट्यर्त्ताभ्यवतादूऽयर्चशक्तिपुरुशचि वकारे ॥९८॥

अश्व रश्मि मति सुमति श्व सुत चारय घृणि सेदिम इन्द्रिय धारय चित्र भङ्गुर वयुनः अश्वस्य हृदय

---

(१) आभ्यां सूत्राभ्यामिति (ग) पुस्तकपाठः ॥

घृष्य ऋत अभि अवत अधि अर्च्च शक्ति पुरु शचि एते ह्रस्वस्वरा वकारे प्रत्यये दीर्घमापद्यन्ते, अश्व यथा (१) अश्वावतीᳪं सोमावतीम्, रश्मि यथा (२) रश्मीवतीम्भास्वतीम्, मति यथा (३) प्रदेवायं मतीविदे, सुमति यथा (४) सुष्टुतिᳪं सुमतीवृधः, स्व यथा (५) स्वाविद्दूर्मी, सुत यथा (६) विप्रजूतः सुतावतः, चारय यथा (७) समञ्जिञ्चारया वृषन्, वृषि यथा (८) उष्ट्रो घृणीवान् । सेदिम यथा (९) देवानाᳪं सकुख्यसुपसे दिमा वयम् । इन्द्रिय यथा (१०) इन्द्रियावान्मदिन्तमः । धारय यथा (११) वृहस्पते धारया वसूनि, चित्र यथा (१२) चित्रावसो स्वस्ति ते पारमशीय,

---

(१) १२ । ८१ ॥
(२) १५ । ६३ ॥
(३) २२ । १२ ॥
(४) २२ । १२ ॥
(५) २४ । ३३ ॥
(६) २० । ८८ ॥
(७) २३ । २१ ॥
(८) २४ । ३९ ॥
(९) २५ । १५ ॥
(१०) ६ । २७ ॥
(११) ६ । ८ ॥
(१२) ३ । १८ ॥

भङ्गुर यथा (१) हन्तारम्भङ्गुरा वताम् । व्युन यथा (२) व्विद्दोता दधे वयुनाविदेक÷ । अश्वस्य यथा (३) एकस्त्वष्टुरश्वस्या विशस्ता, हृदय यथा (४) उतापवक्ता हृदया व्विधश्चित्, घुष्य यथा (५) परुष्यः ष्करनुघुष्या विशस्त, ऋत यथा (६) ऋतावानमग्निहि- षम्, अभि यथा (७) अभीवर्त्तःऽ संविठेंऽणो वर्च्चा द्दाविधुयाः, अवत यथा (८) इदम्मे प्रावता वच÷, अधि यथा (९) अधीवासँय्या हिरण्याऽन्यस्मै, अर्च यथा (१०) अर्चा व्विश्वानराय व्विश्वा भुवे, शक्ति यथा (११) इच्छे स्थितः शक्तीवन्तो गभीराः, पुरु यथा (१२) इमाऽउत्वा पुरूवसो । शुचि यथा (१३)

(१) ११ । २६ ॥
(२) ५ । १४ ॥
(३) २५ । ४२ ॥
(४) ८ । २३ ॥
(५) २५ । ४१ ॥
(६) १२ । १११ ॥
(७) १४ । २३ ॥
(८) १२ । ८८ ॥
(९) २५ । ३९ ॥
(१०) ३३ । २३ ॥
(११) २९ । ४६ ॥
(१२) ३३ । ८१ ॥
(१३) शाखान्तरीयं मृग्यमुदाहरणम् ॥

शचीवसे ॥

नाश्ववद्धिरण्यात् ॥९९॥

अश्ववदित्येतत्पदन्न दीर्घमापद्यते हिरण्यशब्दाद्यदि परं भवति, यथा (१) आपवस्व हिरण्यवदश्ववत् ॥

अभि विक्ष्येषँ वीर विश्व वत्स वृत्र वाजयन्तेषु ॥१००॥

अभीत्येतत्पदं विक्ष्येषम् वीर विश्व वत्स वृत्र वाजयन्त इत्येतेषु न दीर्घमापद्यते । विक्ष्येषं यथा (२) स्वरभिविख्येषम् । वीर यथा (३) अभिवीरो ऽअभिसत्वा सहोजाः, विश्व यथा (४) इमा वाचमभि विश्वे गृणन्तः, वत्स यथा (५) अभि वत्सन्न स्वसरेषु धेनवः, वृत्र यथा (६) अभि वृत्रँ वर्द्धमानम्पियारुम्, वाजयन्तः यथा (७) अश्याम वाजमभि वाजयन्तः ॥

---

(१) ८ । ६३ ॥
(२) १ । ११ ॥
(३) १७ । ३७ ॥
(४) २ । १८ ॥
(५) २६ । ११ ॥
(६) १८ । ६९ ॥
(७) १८ । ७४ ॥

अश्वस्य व्वाजिनइति च ॥१०१॥

अश्वस्य वाजिनइति च द्विपदस्य न पूर्वपदान्तो दीर्घमापद्यते, यथा (१) अश्वस्य व्वाजिनस्त्वचि सिमाः (२) ॥

विश्व सहभुवपुषवसुषु ॥१०२॥

विश्वइत्येतत्पदं सहइत्येतेषु प्रत्ययेषु दीर्घमापद्यते, सह यथा (३) व्विश्वा साह्मवसे नूतनाय, भुव यथा (४) अर्वा व्विश्वा नराय व्विश्वाभुवे, पुष यथा (५) व्विश्वा पुषं रयिम्, वसु यथा (६) गन्धर्वस्त्वा व्विश्वा वसुः ॥

नरह्यमित्रेषु च ॥१०३॥

नरह्यमित्रेषु च प्रत्ययेषु विश्वशब्दो दीर्घमापद्यते,

---

(१) २२। ३७॥

(२) अस्मिन्सूत्रे इति पदं एवं विधान्योदाहरणसूचनार्थम्। तेन अधिवक्तेति न दीर्घः॥

(३) नेति नात्रानुवर्त्तते। ७। ३६॥

(४) ३३। २३॥

(५) २५। ४५॥

(६) २। ३॥

नर यथा (१) अश्वां विभृत्वा नराय, हा यथा (२) विभृत्वाहा शर्म यच्छतु, मित्र यथा (३) विभृत्वा मित्रऽकृष्टिः । पृथग्योगकरणं शिष्याणामवग्रहत्वव्युदासप्रज्ञप्त्यर्थम् । अर्थव्याख्यानार्थं त्वन्वयवदर्शनम् ॥

तिष्ठाद्युदात्तम् ॥ १०४ ॥

तिष्ठेत्येतत्पदं दीर्घमापद्यते यद्याद्युदात्तं भवति, यथा (४) तिष्ठा देवो न सविता, (५) तिष्ठा रथमधियं वज्रहस्ता, आद्युदात्तमिति किम् (६) आतिष्ठ वृत्रहन्रथम् ॥

प्र वणशृङ्गयासेषु ॥ १०५ ॥

प्र इत्येतत्पदं वन शृङ्ग यास इत्येतेषु प्रत्ययेषु दीर्घमापद्यते, वन यथा (७) प्रा वणेभिः सजोषसः । शृङ्ग यथा (८) प्रा शृङ्गा माहेन्द्राः, यास यथा (९) प्रा या-

(१) ३३ । २३ ॥
(२) १७ । ४८ ॥
(३) १३ । ५७ ॥
(४) ११ । ४२ ॥
(५) १० । २२ ॥
(६) ८ । ३३ ॥
(७) १२ । ५० ॥
(८) २४ । १७ ॥
(९) ३६ । ११ ॥

साय स्वाहा (१) ॥

नि वारहारयोरनवग्रहे ॥१०६॥

नि इत्ययमुपसर्गो वारहारयोः प्रत्यययोर्दीर्घमापद्यते अवग्रवर्ज्जिते, वार यथा (२) नीवारांश्च मे, हार यथा (३) नीहारेण प्रावृता, अवयवव्युत्पत्त्यर्थं वचनम् अनवग्रहाणां हि मध्ये वक्ष्यति (४) ॥

नाऽवनयामि ॥१०७॥

अवेत्येतत्पदं न दीर्घमापद्यते नयामीत्येतस्मिन्प्रत्यये यथा (५) अवं नयामि वैष्णवान् । धारयामेत्येतस्मिन्सूत्रेऽवशब्दस्य नकारे दीर्घत्वं वक्ष्यति तस्यायं पुरस्तादपवादः ॥

धारयाम योजाव सचस्व नुद मोषु जयतोरुष्य रक्ष यज यच्छ मत्सथ

(१) क्वचित्पुस्तके प्र वनेति पाठः ॥

(२) १८ । १२ ॥

(३) १७ । ३२ ॥

(४) अनवगृह्यतां मध्ये (क) पुस्तकपाठः । अनवग्रहे इत्येतद्ग्रहणं किमर्थम् । ३ । ५० । निहारन्नि हराणि ते स्वाहा । इत्यस्मिन्मन्त्रीयपदपाठे निहारमिति नि । हारम् इत्यवग्रहघटिते पदे निहारमित्यत्र दीर्घापत्तिरतोऽनवग्रहग्रहणम् ॥

(५) ५ । २५ ॥

पिपृत गायता तु येन नकारे ॥१०८॥

धारयाम योज अव सचस्व नुद मोषु जयत उरुष्य रक्ष यज यच्छ मत्स्थ पिपृत गायत आतु येन एते ह्रस्वा नकारे प्रत्यये दीर्घमापद्यन्ते, धारयाम यथा (१) धारयामा नमोभिः, योज यथा (२) योजान्विन्द्र ते हरी, अव यथा (३) अवा नो दैव्या धिया, सचस्व यथा (४) सचस्वा नः स्वस्तये, नुद यथा (५) अग्ने जातान्प्रणुदा नः, मोषु यथा (६) मो षूणऽइन्द्रात्र पृत्सु देवैःऽ, मोऽइति किम् (७) ऊर्ध्वऽऊषुणऽऊतये, जयत यथा (८) प्रेता जयता नरः, उरुष्य यथा (९) उरुष्याणो ऽअघायतःऽ। रक्ष यथा (१०) रक्षा णो ब्रह्मणस्पते, यज यथा (११) यजा नो मित्रावरुणा,

(१) १७ । ९० ॥
(२) ३ । ५२ ॥
(३) ११ । ४१ ॥
(४) ३ । २४ ॥
(५) १५ । १ ॥
(६) ३ । ४६ ॥
(७) ११ । ४२ ॥
(८) १७ । ४६ ॥
(९) ३ । २६ ॥
(१०) ३ । ३० ॥
(११) ३३ । ३ ॥

यच्छ यथा (१) यच्छा नः शर्म सप्रथाः, मत्सथ यथा (२) अपि यथा युवानो मत्सथा नः, पिपृत यथा (३) निरंहसः पिपृता निरवद्यात्, गायत यथा (४) उपास्मै गायता नरः, आतु यथा (५) आ तू न इन्द्र वृत्रहन्, (६) येन यथा (७) येना नः पूर्वे पितरः ॥

भव च ॥ १०९ ॥

भवेत्ययं ह्रस्वो दीर्घमापद्यते नकारे प्रत्यये, यथा (८) भवा नः सप्रथस्तमः सखा वृधे, पृथग्योगकरणमुत्तरार्थम् ॥

सचावरूथ्यवाजस्य पायुषु च ॥ ११० ॥

सचावरूथ्य वाजस्य पायुः एषु च प्रत्ययेषु भवेत्ये-

---

(१) ३६ । १३ ॥
(२) ३३ । ३४ ॥
(३) ३३ । ४२ ॥
(४) ३३ । ६२ ॥
(५) ३३ । ६५ ॥
(६) अस्मिन्त्सूत्रे आ तु ग्रहणं किमर्थं नोचेत्तदा ३३ । ९७ अपरन्तुवे तु नो भवन्तु । इत्यत्रापि द्वितीयतुकारस्य नकारे दीर्घो न भवेदतऽआ तु पदग्रहणम् ॥
(७) ३४ । १७ ॥
(८) १२ । ११४ । अत्र सूत्रे पूर्वसूत्रान्नकारे इति पदं सम्बध्यते ॥

तत्पदं दीर्घमापद्यते, सचा यथा (१) इन्द्रं प्राशूर्भवा सचा, वरूथ्य यथा (२) उत त्राता शिवो भवा वरूथ्यः, वाजस्य यथा (३) भवा वाजस्य सङ्गथे, पायुः यथा (४) भवा पायुर्विशो ऽअस्या ऽअदब्धः ॥

अपृक्तः सौ ॥ १११ ॥

अपृक्तग्रहणेनेह उकारो गृह्यते नाकारो दीर्घविधानात्, अपृक्तउकारो दीर्घमापद्यते सुप्रत्यये, यथा (५) ऊ षु णः ऊर्ध्व ऽऊतये, (६) गोमदूषु णासत्या ॥

रथि तकारनकारयोः ॥ ११२ ॥

रथीत्येतत्पदं तकारनकारयोः प्रत्यययोर्दीर्घमापद्यते, यथा (७) रथी तमः रथी नाम ॥

अथोदारिथ शोच पनय सादयजुवृ-

(१) ३४ । ५६ ॥
(२) ३ । २५ ॥
(३) १२ । ११२ ॥
(४) १३ । ११ ॥
(५) ११ । ४२ ॥
(६) २० । ८१ । अन्यान्यप्युदाहरणानि महीमूषु एता दृक्षासऽऊषुर्णऽइत्यादीनि द्रष्टव्यानि । सौ किमर्थम् ११ । ४१ उदुतिष्ठेत्यत्रापि दीर्घो न स्यादतः सौ पदग्रहणम् ॥
(७) १२ । ५६ ॥

षशत्वसलक्ष्मावाराक्तृतभवत य-कारे ॥ ११३ ॥

अथ उदारिथ शोच पनय सादय ऋतु वृष शत्रु सलक्ष्म आ व अव अराति ऋत भवत एते ह्रस्वा य-कारे प्रत्यये दीर्घमापद्यन्ते, अथ यथा (१) अवाधमँ विमंद्यम ए॑ श्रथाय, उदारिथ यथा (२) अस्मादुद्योनें रुदारिथा यजं, शोच यथा (३) बृहच्छोचा यविष्ठ्य, पनय यथा (४) देवता पनया युजम्, सादय यथा (५) सादया यज्ञ ए॑ सुकृतस्य योनौ, ऋतु यथा (६) देवानां भद्रा सुमतिर्ऋजूयताम्, वृष यथा (७) वृषायमाणो वृषभस्तुराषाट्, शत्रु यथा (८) शत्रूयतो हन्ता, सलक्ष्म यथा (९) सलक्ष्मा यद्विषुरूपं भवाति, व यथा (१०)

(१) १२ । १२ ॥
(२) १७ । ७५ ॥
(३) ३ । ३ ॥
(४) १९ । ६४ ॥
(५) ११ । ३५ ॥
(६) २५ । १५ ॥
(७) २० । ४६ ॥
(८) १२ । ५ ॥
(९) ६ । २० ॥
(१०) ७ । ३२ ॥

आघा ये ऽअग्निम्, अघ यथा (१) अघायतः॒ सम-स्मात्, अराति यथा (२) अरा॑ती य॒तो ह॒न्ता, ऋत यथा (३) मधु व्वाता॑ ऽऋता य॒ते, भवत यथा (४) अ॒र्व्वाञ्चो॑ऽअ॒द्द्या भ॑वता यजत्राः ॥

व वृधवृजोः ॥११४॥

वइत्ययं ह्रस्वो वृधवृजोः प्रत्यययोर्दीर्घमापद्यते, वृध यथा (५) अस्मद्र्यग्वावृधे, वृज यथा (६) प्र वा॑वृजे ॥

अद्य तर्ठ० हकारचकारभवत वृ-णीमहे देवेषु ॥११५॥

अद्य इत्ययं ह्रस्वस्तकार हकार चकार भवत वृणी महे देव इत्येतेषु प्रत्ययेषु दीर्घमापद्यते, तम् यथा (७) अ॒द्द्या तम॑स्य म॒हिमान॑म्, हकार यथा (८) अ॒द्द्या

(१) ३ । २७ ॥
(२) १२ । ५ ॥
(३) १३ । २७ ॥
(४) ३३ । ५१ ॥
(५) ७ । ३९ ॥
(६) ३३ । ४४ ॥
(७) ३३ । ९९ ॥
(८) ८ । ४५ ॥

ऊ॑वेम, चकार यथा (१) ए॒वम॒द्धा च॑ ऋडय, भवत यथा (२) अ॒द्धा भ॑वता युज॒त्राः, हणीमहे यथा (३) तद्देवानामवोऽ अ॒द्धा ह॑णीमहे, देव यथा (४) अ॒द्धा दे॑वाः (५) ॥

न होतरि ॥ ११६ ॥

होतृशब्दे प्रत्यये अद्येत्ययं ह्रस्वो न दीर्घमापद्यते, अधस्तनसूत्रेण प्राप्तस्य प्रतिषेधः, यथा (६) तम॒द्य होतरिषितः (७) अ॒ग्निम॒द्य होतारमहणीतायम् ॥

शृणुत त्विषि धजि भवत पिबेत स्म तिष्ठ रक्षा मकारे ॥ ११७ ॥

शृणुत त्विषि धजि भवत पिब इत स्म तिष्ठ रक्ष एते ह्रस्वा मकारे प्रत्यये दीर्घमापद्यन्ते, शृणुत यथा

---

(१) २१ । १ ॥
(२) ३३ । ५१ ॥
(३) ३३ । १७ ॥
(४) ३३ । ४२ ॥
(५) तमिति किम् । ३३ । ९४ ॥ अद्य ते ऽअपरम् ॥ अत्रापि दीर्घो न भवेद-तस्तमिति पद ग्रहणम् ॥
(६) २९ । ३४ ॥
(७) २१ । ५९ ॥

(१) शृणुता मऽइममॅं हवम्, त्विषि यथा (२) शुष्मिन्न्तराय त्विषीमते । भ्रजि यथा (३) चित्तं व्रातऽइव भ्रजीमान्, भवत यथा (४) आदित्यासो भवता मृडयन्तः, पिब । यथा (५) पिबा मित्रस्य धामभिः, इत यथा (६) इता मरुतो अश्विना, स्म यथा (७) देवासो हि ष्मा मनवे समन्यवः । तिष्ठ यथा (८) शत्रूयतामभि तिष्ठा महाॅंसि, तिष्ठाद्युदात्तमित्याद्युदात्तस्य दीर्घभावउक्तः, अनुदात्तार्थआरम्भः, रक्ष यथा (९) रक्षा माकिर्नोऽ अघशॅंस ईशत (१०) ॥

विश्वदेव्यसोमौ वत्याम् ॥११८॥

विश्वदेव्यसोमावेतौ ह्रस्वौ वति प्रत्यये दीर्घमापद्ये-

---

(१) ७ । ३४ ॥

(२) १६ । १७ ॥

(३) २९ । २२ । इदं शाखान्तरविषयं । माध्यन्दिनानां तु दीर्घान्तादेव मतुप् । अतएवात्र 'अन्तःपददीर्घीभावे' ४ अ० । ८४ सू० । इति वक्ष्यमाणसूत्रेण पदपाठे स्थितोपस्थितन्न भवति । इति ज्ञेयम ॥

(४) ८ । ४ ॥

(५) ३३ । १० ॥

(६) ३३ । ४७ ॥

(७) ३३ । ९४ ॥

(८) ३३ । १३ ॥

(९) २९ । ४७ ॥

(१०) रक्षा मकारे (क) इति पुस्तकपाठः ॥

ते, विश्वदेव्य यथा(१) अदितिष्ट्वा देवी विश्वदेव्यावती, सोम यथा (२) अश्वावतीꣳ सोमावतीम्, वस्यामिति किम् (३) पितॄणाꣳ सोमवताम् (४) ॥

उष महोभिर्नक्तमीकारैकारौकारनकारेभ्यः ॥ ११९ ॥

उषइत्ययं ह्रस्वो दीर्घमापद्यते महोभिः नक्त ईम् ईकारएकारौकारनकारेभ्यः परश्चेद्भवति, महोभिः यथा (५) प्रथमानामहोभिः, उषासा नक्ता बृहती, नक्त यथा (६) नक्तोषासा समनसा, ईम् यथा (७) प्रति धेनुमिवायतीमुषासम्, ईकारात् यथा (८) देवीऽ उषासा नक्ता, एकारात् यथा (९) यजतेऽ उपाकेऽ उषासा नक्ता, औकारात् यथा (१०) दिव्येन योनाऽउषासा

---

(१) ११ । ६१ ॥
(२) १२ । ८१ ॥
(३) २४ । १८ ॥
(४) वस्यामिति स्त्रीलिङ्गनिर्देशाल्लिङ्गान्तरविशिष्टे पदे मा भूद्दीर्घत्वम् ॥
(५) २० । ४० । ४१ । प्रकरणानुसारादन्त्यस्य व्याख्यानाद्दीर्घत्वं बोध्यम् ॥
(६) १२ । २ ॥
(७) १५ । २४ ॥
(८) २८ । १४ ॥
(९) २९ । ३१ ॥
(१०) २७ । १७ ॥

नक्ताँ, नकारात् यथा (१) अश्वावतीर्गोमतीर्नऽउषा-सः, एतेभ्यः परइति किम् (२) समिद्धऽ इन्द्रऽउषसाम् ॥

पूरुषोऽवसाने ॥ १२० ॥

पूरुषइति (३) दीर्घो निपात्यते अवसाने चेद्भवति, यथा (४) न सरिष्यति पूरुषः, अवसानइति किम् (५) पुरुषऽएव ॥

पूष्णो जहीमस्त्तेष्वक्त्ता ॥ १२१ ॥

अक्तेत्ययं ह्रस्वो दीर्घमापद्यते पूष्णः जहीमः ते इत्येतेषु प्रत्ययेषु, पूष्णः यथा (६) अक्ता पूष्णःऽ, जहीमः यथा (७) अक्ता जहीमोऽशिवा ये, ते यथा (८) अक्ता ते रूपमुत्तमम् ॥

---

(१) ३४ । ४० ॥

(२) २० । ३६ । अस्मिन्दीर्घप्रकरणे यानि ह्रस्वान्तान्यवग्रहविशिष्टानि स्थितोपस्थितघटितानि पदानि पदपाठे सन्ति तेषां पदानां अव्यवहितत्वासम्भवाद्व्यवधानेऽपि दीर्घत्वं बोध्यम् ॥

(३) पुरुष इति 'क' पुस्तकपाठः । आदिदीर्घमापद्यते 'ख' पुस्तकपाठः ॥

(४) १२ । ९१ ॥

(५) ३१ । २ ॥

(६) २५ । २७ ॥

(७) ३५ । १० ॥

(८) २९ । १८ ॥

नरस्सप्तऽऋषीन्नस्तऽआहुर्नियुद्भिष्षु यत्र ॥ १२२ ॥

नरः सप्तऽऋषीन् नः तऽआहुः नियुद्भिः एतेषु प्रत्ययेषु यत्रेत्ययं ह्रस्वो दीर्घमापद्यते, नरः यथा (१) युवानरः सञ्च विचहर्वन्ति, सप्तऽऋषीन्यथा (२) युवां सप्तऽऋषीन्परः, नः यथा (३) युवा नश्चक्रा जरसं तनूनाम्, तऽआहुः यथा (४) युवा तऽआहुः परमं जनित्रम्, नियुद्भिः यथा (५) युवा नियुद्भिः सचसे शिवाभिः (६) ॥

अभिमाति पृतनासु सपत्नधूर्विश्वसमत्सु पृतनाव्रातेभ्यः सहः ॥१२३॥

अभिमाति पृतनासु सपत्न धूः विश्व समत्सु पृतना

(१) २९ । ४८ ॥
(२) १७ । २६ ॥
(३) २५ । २२ ॥
(४) २९ । १५ ॥
(५) १३ । १५ ॥
(६) तऽआहुरिति किमर्थम् । २३ । १६ यत्र ते युयुरित्यत्र पदे दीर्घो न भवेदतस्तऽआहुरिति पदग्रहणम् ॥ एतेष्विति किम् । ३२ । ८ । यत्र विश्वम्भवत्येकनीडमित्यत्रापि दीर्घो मा भूदतएतेषु पदेषु प्रत्येष्वेवेति ग्रहणम् । अत्र यत्र पदे तकारस्य द्वित्वन्न भवति कुतः ६ अ० सू० २७ वक्ष्यमाणसूत्रेण निषेधात् ॥

व्रात इत्येतेभ्यउत्तरस्य सहेर्ह्रस्वो दीर्घमापद्यते, अभिमाति यथा (१) सँव्वृष्णयान्यभिमातिषाहः, पृतनासु यथा (२) जेतारमग्निम्पृतनासु सासहिम्, सपत्न यथा (३) सिᳪह्यसि सपत्नसाही, भूः यथा (४) उस्रावेतं धूर्षाहौ, विश्वे यथा (५) विश्वासाहमवसे नूतनाय, समत्सु यथा (६) येना समत्सु सासहः, पृतना यथा (७) पृतनाषाह्याय च, व्रात यथा (८) सतो वीराऽउरवो व्रातसाहाः ॥

उक्थाच्च शसेः ॥१२४॥

उक्थशब्दात्परस्य शसेर्धातोर्ह्रस्वो दीर्घमापद्यते, यथा (९) उक्थशसः उक्थशासश्चरन्ति ॥

एवाच्छ चक्रमाथ ॥१२५॥

एव अच्छ चक्रम अथ एते ह्रस्वा व्यञ्जनमात्रे दी-

(१) १२ । ११३ ॥
(२) ११ । ७६ ॥
(३) ५ । १० ॥
(४) ४ । ३३ ॥
(५) ७ । ३६ ॥
(६) १५ । ४० ॥
(७) १८ । ६८ ॥
(८) २८ । ४६ ॥
(९) १७ । ३१ ॥

र्घमापद्यन्ते, एव यथा (१) एवा नो दूर्वे प्रतनु, अच्छ यथा (२) गिरिशाच्छा वदामसि, चक्रम यथा (३) यदेनश्चकृमा वयम्, अथ यथा (४) अथा मन्दस्व जुजुषाणः (५) ॥

विद्मा सौत्रामण्याम् ॥ १२६ ॥

विद्मइत्ययं ह्रस्वो दीर्घमापद्यते सौत्रामणीमन्त्रं मुक्त्वा, यथा (६) विद्मा तेऽअग्ने, असौत्रामण्यामिति किम् (७) यांश्च विद्म यां२ ॥ ऽउं च न प्रविद्म ॥

अधा यत्स्मग्नावायुषु ॥ १२७ ॥

अधइत्ययं ह्रस्वो व्यञ्जनमात्रे दीर्घमापद्यते, यथा

---

(१) १३ । २० ॥

(२) १६ । ४ ॥

(३) ३ । ४५ ॥

(४) २६ । २५ ॥

(५) एव शब्दोऽत्र उपमानार्थएव कुतः सर्वैरुवटाद्याचार्यैर्व्याख्यानात् । अवधारणार्थस्य तु न भवति । ३२ । १ । तदेव शुक्रम् । सऽएव जातःऽ । संहिताऽधिकारान्मन्त्रावसाने तु न दीर्घो भवति । यथा ३३ । ७८ ॥ ता नोऽअच्छ, प्रायः पदादावेव एवशब्दो गृह्यते । व्यञ्जनमात्रे नो चेत्तदा ३१ । १ एवमित्यत्रापि दीर्घः स्यात्तदर्थं व्यञ्जनमात्रग्रहणं भाष्ये कृतमिति ॥

(६) १२ । १९ ॥

(७) १९ । ६८ ॥

(१) अधा सपत्नानिन्द्राग्नी मे, यत् स्म ग्ना वायुः इत्येतेषु प्रत्ययेषु न दीर्घमापद्यते, यत् यथा (२) अमुत्र भूयादध यद्यमस्य, स्म यथा (३) अध स्म ते व्रजनम्, ग्ना यथा (४) रुद्रोऽ अधग्नाः, वायुम् यथा (५) अध वायुं नियुतः, अयत्स्मग्नावायुष्विति किम् (६) अधा यथा नः पितरः ॥

पूर्वो द्वन्द्वेष्ववायुषु ॥१२८॥

द्वन्द्वेषु समासेषु वायुरहितेषु पूर्वः पदान्तो दीर्घमापद्यते, यथा (७) अग्नीषोमौ, (८) मित्रावरुणौ, (९) इन्द्राबृहस्पती, द्वन्द्वेष्विति किम् (१०) अवोरहणौ ब्रह्मचोदनौ, अवायुष्विति किम् (११) इन्द्रवायुभ्यान्त्वा ॥

(१) १७ । ६४ ॥

(२) २७ । ९ ॥

(३) १५ । ६२ ॥

(४) ३३ । ४८ ॥

(५) २७ । २४ ॥

(६) १९ । ६८ । अधेति चत्वारि पदादिभूतानि पदानि व्यञ्जनमात्रे दीर्घमेति नो चेत्तदा २७ । ९ । अमुत्र भूयादध यत् । इत्यादिषु चतुर्षु पदेष्वपि दीर्घः स्यात्तदर्थमयदित्यादिग्रहणम् ॥

(७) २ । १५ ॥

(८) २ । ३ ॥

(९) २५ । ६ ॥

(१०) ४ । ३३ ॥

(११) ७ । ८ ॥

ह्रि शयेत्येके ॥ १२९ ॥

ह्रि इत्यस्य एके आचार्या दीर्घमिच्छन्ति शयप्रत्यये, यथा (१) ह्रि शया ह्री शया, एकइति किम् (२) या ते॑ऽअग्ने ह्रि शया ॥

पिबा सोमं पिबा सुतस्य स्तथा मयोभुवो नूरणे शर्मीष्व मामहानो मामहन्तामशितम रीरिषो रीरिषत यामयन्ति हि ष्मा ते वर्द्धया रयिꣳ श्रुधी हव ञ्चरा सोम सूयवसिनी श्रोता ग्रावाणो धर्षा मानुषः पाथा दिवो युक्ष्वा हि गमया तमः सिञ्चता सुतम्परीवापऽ उक्वथा शस्त्राण्यक्ता हवीꣳष्याच्च्याजानु क्षामा रेरिहत्क्षामा भिन्दन्तो रुहेमा स्वस्तये

(१) ५ । ८ ॥

(२) यथा पाठं व्यवस्था काण्वमाध्यन्दिनयोः शाखिनोर्ज्ञातव्या ॥

जनयथा च धारयाम पितरा मृधो बोधा मे विचृता बन्धमवता हवेषु शृणुधी गिरो रक्षातोकञ्चर्षणिस-हाञ्चर्षणीधृतो येना समत्सु वनेमा तऽऋद्ध्यामा ते शिक्षासखिभ्यस्त-त्वा रथ न्दीया रथेनेता जयत वर्द्धया त्वं प्रब्रवा मा घृतस्या जगन्था पर-स्या ररिमा हि पुरी तता प्लीहाक-र्णशुण्ठाकर्णौ प्रकृति दीर्घावित्ये-के नी काशाऽअनू काशेन चक्रा जरसम्मिथूकस्तरता सखायः सास-ह्वानपामाग्गोभयादतऽऋतीषहम-भीषु सुष्टरीमा जुषाणा यजा देवा-न्येना पावकाऽश्वायन्तो यदी सरमा स्वदया सुजिह्व निषद्या दधिष्व

सदतना रणिष्ट नभरा चिकित्वाँश् चिकित्सा गविष्टाववादद्दक्षा चायुनक्वसृजा रराणः सादन्न्यमिति च ॥ १३० ॥

पिबा सोमम्, पिबा सुतस्य, स्या मयो भुवः, नूरणे, शमीष्व, मामहानः, मामहन्ताम्, अशीतम, रिरिषः, रीरिषत, यामयन्ति, हिष्मा ते, वर्द्धया रयिम्, श्रुधी हवम्, चरा सोम, सूयवसिनी, श्रोता ग्रावाणः, घषा मानुषः, पाथा दिवः, युद्धा हि, गमयातमः, सिञ्चता सुतम्, परीवापः, उक्था शस्त्राणि, अत्ता हवीँषि, आच्या जानु, चामा रेरिहत्, चामा भिन्दन्तः, रुहेमा स्वस्तये, जनयथा च, धारयाम, पितरा ऋभ्वः, बोधा मे, विचृताबन्धम्, अवता हवेषु, शृणुधी गिरः, रक्षा तोकम्, चर्षणीसहाम्, चर्षणीधृतः, येना समत्सु, वनेमा ते, ऋध्यामा ते, शिक्षा सखिभ्यः, तत्रा रथम्, दीया रथेन, इता जयत, वर्द्धया त्वम्, प्रब्रवामा घृतस्य, आजगन्या परस्याः, ररिमा हि, पुरी तता, लोहाकर्णः, शुण्ठाकर्णः, नी काशाः, अनू काशेन, चक्राजरसम्, मिथू कः, तरता सखायः, सा सह्वान्, अपा मार्गः, उभया दतः, ऋती षहम्, अभीषु, सुष्टरीमा जुषाणा, यजा देवान्, येना पा-

वक, अश्वायन्तः, यदी सरमा, स्वदया सुजिह्व, निषद्या दधिष्व, सदतना रणिष्टन, भरा चिकित्वान्, चिकित्सा गविष्टौ, अवा ददत्, रक्षा च, आयुनक् सृजा रराणः, सादन्न्यम्, एते ह्रस्वादीर्घमापद्यन्ते, पिब सोमम् यथा (१) पिबा सोमँ शतक्रतो, (२) पिबा सोम मनुष्वधं मदाय, पिब सुतस्य यथा (३) पिबा सुतस्यान्धसो मदाय, स्य मयो भुवः यथा (४) आपो हि ष्ठा मयो भुवः, नु रणे यथा (५) तूर्वन्नयामन्नेतशस्य नू रणे, शमीष्व यथा (६) हविः शमीष्व, ममहानः यथा (७) समिद्धेऽ अग्नावधि मामहानः, ममहन्ताम् यथा (८) तन्नो मित्रो वरुणो मामहन्ताम्, अशि तम यथा (९) अग्ने दब्धायोऽशीतम, रीरिषः यथा (१०) मा

(१) २६ ।४।। केचिदेतानि द्विपदैकपदान्यष्टसप्ततिरूपाणि कृतदीर्घाणि निपात्यन्ते ।।

(२) ७ । ३६ ।।

(३) ३३ । ७० ।।

(४) ११ । ५० ।।

(५) १७ । १० ।।

(६) १ । १५ ।।

(७) १७ । ५५ ।।

(८) ३३ । ४२ ।।

(९) २ । २० ।। ५ अ० ३७ सू० प्रातिशाख्यवक्ष्यमाणसूत्रे वायुरसजातइत्यत्रानवग्रहे चापपाठात् विकारत्वाच्चावग्रहः । यथा चरणं पाठव्यवस्था । काण्वा नावगृह्णन्ति । माध्यन्दिनास्त्ववगृह्णन्ति । अशितमेत्यशि । तम । एवमन्यत्राप्यवग्रहघटितपदपाठो ज्ञातव्यः ।।

(१०) १६ । १६ ।।

नोऽ अश्वेषु रीरिषः, रिरिषत यथा (१) मा नो मह्या रीरिषतायुः, यमयन्ति यथा (२) प्रिया देवेष्वायामयन्ति, हि स्म ते यथा (३) अस्ति हि ष्मा ते, हीति किम् (४) अध स्म ते व्रजनम्, वर्द्धय रयिम् यथा (५) अथा नो वर्द्धया रयिम्, श्रुधि हवम् यथा (६) इमं मे वरुण श्रुधी हवम्, चर सोम यथा (७) प्रचरा सोम दुर्य्यान्, श्रोत ग्रावाणः यथा (८) श्रोता ग्रावाणो विदुषो न यज्ञम्, धर्ष मानुषः यथा (९) मुञ्चामि धर्षा मानुषः, पाथ दिवः यथा (१०) पाथा दिवो विमहसः, युक्ष्व हि यथा (११) युक्ष्वा हि केशिना हरी, गमय तमः यथा (१२) अर्वाङ् गमया तमः, सिञ्चत

(१) २५ । २२ ॥
(२) २५ । ३९ ॥
(३) ३ । ४६ ॥
(४) १५ । ६२ ॥
(५) ३ । १४ ॥
(६) २१ । १ ॥
(७) ४ । ३७ ॥
(८) ६ । २६ ॥
(९) ६ । ८ ॥
(१०) ८ । ३१ ॥
(११) ८ । ३४ ॥
(१२) ८ । ४४ ॥

यथा (१) परीतो षिञ्चता सुतम्, परि वापः यथा (२) परी वापः पयो दधि, उक्थ शस्त्राणि यथा (३) छन्दोभिरुक्था शस्त्राणि, अक्त हवीꣳषि यथा (४) अक्ता हवीꣳषि प्रयतानि बर्हिषि, आच्य जानु यथा (५) आच्या जानु दक्षिणतः। क्षाम रेरिहत् यथा (६) क्षामा रेरिहद्वीरुधः, क्षाम भिन्दन्तः यथा (७) क्षामा भिन्दन्तोऽ अरुणीः। रुहेम स्वस्तये यथा (८) अस्रवन्तीमा रुहेमा स्वस्तये, जनयथ च नः यथा (९) आपो जनयथा च नः, धारय मयि यथा (१०) धारया मयि प्रजाम्, तर द्वेषः यथा (११) अग्ने त्वन्तरा द्वेषः, बोध मे यथा (१२) बोधा मे अस्य, विचृत बन्धम् य-

---

(१) १९।२॥
(२) १९।२१॥
(३) १९।२८॥
(४) १९।६९॥
(५) १९।६२॥
(६) १२।६॥
(७) १९।६९॥
(८) २१।६॥
(९) ११।५२॥
(१०) ११।५८॥
(११) ११।७२॥
(१२) १२।४२॥

था (१) व्विचृता बन्धमेतम्, अवत हवेषु यथा (२) देवा अवता हवेषु, श्रुणुधि गिरः यथा (३) प्राहि श्रुणुधी गिरः, रक्ष तोकम् यथा (४) रक्षा तोकमुत त्मना, चर्षणिसहाम् यथा (५) चर्षणीसहाँ व्विश्वाज्ज्य- स्य, चर्षणिधृतः यथा (६) ओमासश्चर्षणीधृतः, येन समत्सु यथा (७) येना समत्सु सासहः, वनेम ते यथा (८) व्वनेमा तेऽअभिष्टिभिः, ऋध्याम ते यथा (६) ऋध्यामा तऽओहैः, शिक्ष सखिभ्यः यथा (१०) शिक्षा सखिभ्यो हविषि, तत्र रथम् यथा (११) तत्रा रथमुप शग्मᳪ सदेम, दीय रथेन यथा (१२) बृहस्पते परि दीया रथेन, इत जयत यथा (१३) प्रेता जयता

(१) ११ । ६३ ॥
(२) १७ । ४३ ॥
(३) १३ । ५२ ॥
(४) १३ । ५२ ॥
(५) २८ । १ ॥
(६) ७ । ३३ ॥
(७) १५ । ४० ॥
(८) १५ । ४० ॥
(९) १५ । ४४ ॥
(१०) १७ । २१ ॥
(११) २९ । ४५ ॥
(१२) १७ । ३६ ॥
(१३) १७ । ४६ ॥

नरः, वर्द्धय त्वम् यथा (१) तमग्ने वर्द्धया त्वम्, प्रब्रवाम घृतस्य यथा (२) व्ययन्नाम प्रब्रवामा घृतस्य, जगन्य परस्याः यथा (३) परावत ऽआजगन्था परस्याः, ररिम हि कामम् यथा (४) व्ययन्तेऽ अद्य ररिमा हि कामम्, पुरि तता यथा (५) अन्तरिच्चं पुरी तता, अस्य पदस्यापवादोऽभिप्रेतः तथा हि, (६) पशुपतेः पुरीतदित्येतदपि भवति, स्त्रीहाकर्णः शुण्ठाकर्णः एतौ शब्दौ प्रकृतिदीर्घावित्येके आचार्या मन्यन्ते, यथा (७) स्त्रीहाकर्णः शुण्ठाकर्णः, नि काशाः यथा (८) बभ्रुनी काशाः पितॄणाम्, अनु काशेन यथा (९) अन्तरमनू काशेन, चक्र जरसम् यथा (१०) यत्रा नश्चक्रा जरसन्तनूनाम्, मिथु कः यथा (११) गात्राणसिना

(१) १७ । ५२ ॥

(२) १७ । ९० ॥

(३) १८ । ७१ ॥

(४) १७ । ७५ ॥

(५) १५ । ८ ॥

(६) ३९ । ९ । अत्र विभक्तिरविवक्षिता । कुत्रचित् सर्वविभक्त्यन्तं पुरीततेति पदं गृह्यते ॥

(७) २४ । ४ । तत्पक्षे नावग्रहः । यथा चरणं पाठव्यवस्था ॥

(८) २४ । १८ ॥

(९) २५ । २ ॥

(१०) २५ । २२ ॥

(११) २५ । ४३ ॥

मिथूं कः, तरत सखायः यथा (१) प्रतरता सखायः, ससह्वान् यथा (२) सासह्वाँश्चाभियुग्वा च, अप-मार्ग यथा (३) अपा मार्गं त्वमस्मत्, उभय इतः य-था (४) ये के चोभयादितः, ऋति षहम् यथा (५) तँवो दस्ममृतीषहम्, अभि सु यथा (६) अभी षुणः सखीनाम्, सुष्टरीम जुषाणा यथा (७) बर्हिः सुष्टरीमा जुषाणा, यज देवान् यथा (८) यजा देवाँ २ ॥ ऋतम्बृहत्, येन पावक यथा (९) येना पावक चक्षसा, अभ्यस्वयन्तः यथा (१०) अभ्यस्वायन्तो मघवन्, यदि सर-मा यथा (११) विदद्यदी सरमा, स्वदय सुजिह्व यथा (१२) समञ्जन्स्वदया सुजिह्व, निषद्य दधिष्व

---

(१) ३५ । १० ॥
(२) ३९ । ७ ॥
(३) ३५ । ११ ॥
(४) ३१ । ८ ॥
(५) २६ । ११ ॥
(६) ३६ । ६ ॥
(७) २९ । ४ ॥
(८) ३३ । ३ ॥
(९) ३३ । ३२ ॥
(१०) २७ । ३६ ॥
(११) ३३ । ५९ ॥
(१२) २९ । २६ ॥

यथा (१) बर्हिष्या निषद्द्या दधिष्व । सदतन रणिष्टन यथा (२) सदतना रणिष्टन, भर चिकित्वान् यथा (३) उत्तानायामवभरा चिकित्वान्, चिकित्स गविष्टौ यथा (४) प्रचिकित्सा गविष्टौ, अवददत् यथा (५) भगेमां धियमुदवा ददन्नः, रक्ष च यथा (६) रक्षा च नोऽ अधि च ब्रूहि देव, अयुनक् यथा (७) यमेनं दत्तं त्रितऽएनमायुनक्, सृज रराणः यथा (८) व्वनस्पतेऽवसृजा रराणः, सदन्यम् यथा (९) सादन्यँ ४ व्विदथ्यम्, ॥

अनुनासिकमुपधा प्रागन्तस्थायाः ॥ १३१ ॥

---

(१) २६ । २३ ॥
(२) २६ । २४ ॥
(३) ३४ । १४ ॥
(४) ३४ । २३ ॥
(५) ३४ । ३६ ॥
(६) ३४ । २७ ॥
(७) २९ । १३ ॥
(८) २७ । २१ ॥
(९) ३४ । २१ । इतिशब्दश्चकारशब्दश्चानुक्तसमुच्चयार्थः । तेन ३७ । १६ । यच्छ देवायुर्वमित्यत्रापि दीर्घः । यच्छेति ग्रहणं नो चेत्तदा १ । १२ । यज्ञपतिन्देवयुर्वमित्यत्रापि दीर्घः स्यात्तदर्थं यच्छपदग्रहणम् ॥

ह्रस्वो दीर्घः प्लुतः सानुनासिको निरनुनासिकउदात्तोऽनुदात्तः स्वरितइति स्वरधर्माः तत्र पदे दृष्टस्यान्यथाभावो विकारउच्यते सचात्र स्वरे एवाधिकृतो न व्यञ्जने यतो दीर्घमित्यारभ्यते अतइहापि स्वरस्यैवानुनासिक्यं विकारउच्यते इयांस्तु विशेषः यत्र नकारमकारावेवपरभूतौ तयोश्च विकारे सति स्वरस्य विकारः । यत्र तु तयोः प्रकृतिभावो वा लोपो वा तत्र स्वरस्यापि विकारो न भवति यथा (१) अस्मान्त्सीते इत्येवमादि, (२) यत्प्रागन्तस्थासंशब्दनात्, (३) यदितऊर्ध्वमनुक्रमिष्यामस्तत्रोपधाभूतः स्वरोऽनुनासिकं स्वरं विकारमापद्यते इत्येतदधिकृतं वेदितव्यम् वक्ष्यति (४) "नुः" "चच्छयोः शम्" यथा (५) सुषीन् चक्षुषे व्याचे सुषीँश्चक्षुषे, गवयान् त्वष्ट्रे बृहस्पतये गवयाँस्त्वष्ट्रऽउष्ट्रान् ॥

स्वरऔपशविः ॥ १३२ ॥

औपशविराचार्यः स्वरएव प्रत्ययउपधानुनासिक्यमिच्छति, नुरिति वक्ष्यति अतस्तस्यैव परभूतो यः स्व-

---

(१) १२ । ७० ॥

(२) ४ अ. ९ सू. अन्तस्थामन्तस्थास्वनुनासिकां परसस्थानामिति सूत्रात्प्रागधिकारोऽयम् ॥

(३) अधिकारउपधायाः प्राक् अन्तस्थासंशब्दनात् इति "ख" पुस्तक पाठः ॥

(४) अ. ३ । सू. १३४ । १३५ ॥

(५) २४ । २९ ॥ २४ । २८ ॥

रवक्तः उपधा च तस्यैव ग्राह्या, यथा (१) महान् इन्द्रः महाँ २॥ऽ इन्द्रो वज्रहस्तः, (२) स्वान् अहम् उन्नयामि स्वाँ २॥ऽ अहम्, (३) शत्रून् अप जहि शत्रूँ१॥ रप म्रधो नुदस्व, स्वरइति किम् (४) गवयान् त्वष्ट्रे गवयाँस्त्वष्ट्रे॥

अनुस्वारेण व्यञ्जने ॥ १३३ ॥

नकारात्परे व्यञ्जनेऽनुस्वारेण व्यवधानमिच्छत्यागमिकेन औपशविराचार्यः, अयञ्च उपधानकारयोरितरो भवति यत्र नकारस्य शकारः सकारो वा विहितस्तत्रापि भवति, (५) "अनुस्वार ठं॰रोष्मिस्वति" वचनात्, यथा (६) नृषीन् चक्षुषे नृषीॅंश्चक्षुषे, गवयान् त्वष्ट्रे गवयाॅंस्त्वष्ट्रे॥

नुः ॥ १३४ ॥

नकारोऽधिकृतो वेदितव्यः॥

---

(१) २६ । १० ॥
(२) ११ । ८२ ॥
(३) ७ । ३७ ॥
(४) २४ । २८ ॥
(५) ४ अ. १ । सू. १ ॥
(६) पूर्ववदङ्को बोध्यः ॥

चच्छयोः शम् ॥ १३५ ॥

चकारच्छकारयोः प्रत्यययोर्नकारः शकारमापद्यते अनुनासिकं चोपधा यथा (१) अहीन् च अहींश्च सर्वान्, सुषींश्चचुषे, छकारोदाहरणं मृग्यम्, रूपोदाहरणन्तु विद्यते यथा विद्वान् छकारः विद्वाँश्छकारः ॥

तथयोः सम् ॥ १३६ ॥

तकारथकारयोः प्रत्यययोर्न्नकारः सकारमापद्यते अनुनासिकं चोपधा, यथा (२) गवयान् त्वष्ट्रे गवयाँस्त्वष्ट्रे, (३) अन्यान् ते अन्याँस्ते, थकारस्य रूपोदाहरणम् यथा विद्वान् थकारः विद्वाँस्थकारः ॥

दधन्वान्त्स्ववान्यकारे लोपम् ॥१३७॥

दधन्वान् स्ववान् एतौ नकारौ यकारे प्रत्यये लोपमापद्येते, अत्र च लोपविधानादुपधानुनासिक्यमपि न भवति, यथा (४) चोक्तम् स्वराणामानुनासिक्यं प्रतिजानन्ति सर्व्वदा, वर्जयित्वा तमाकारं यत्र लोपो

---

(१) १६।५ ॥
(२) २४।२८ ॥
(३) १७।११ ॥
(४) एतत्पद्यं वासिष्ठीशिक्षायाम् ॥

विधीयते, यथा (१) दधन्वान् यः दधन्वा यो नर्य्योऽ अप्स्वन्तरा, स्ववान् यथा (२) स्ववांयाक्त्वव्वीङ् ॥

रयिवृधे च ॥१३८॥

रयिष्टध इत्येतस्मिंश्च प्रत्यये पूर्वो नकारो लोपमापद्यते यथा (३) अन्नान् रयिष्टधः पीवोऽ अन्ना रयिष्टधः, उक्तहेतुत्वादत्राप्युपधानुनासिक्यन्न भवति (४) ॥

नपुंसकादिकारस्य ॥१३९॥

नपुंसकादुत्तरो यो नकारस्तस्य संबन्धिन इकारस्य लोपो भवति, यथा (५) एमन्त्सादयामि, भस्मन्त्सादयामि, एमनि भस्मनीति प्राप्ते इकारलोपश्छान्दसः, नपुंसकादुत्तरस्येकारस्य लोपउक्तोऽनपुंसकादपि भवति यथा (६) अश्मन्नूर्ज्जम् अश्मनीति प्राप्ते ॥

---

(१) १९ । २ ॥

(२) ३४ । २६ । नकारविकारसहिताचरितमुपधानुनासिक्यमपि न प्रवर्त्तते । तथाचोक्तम् पाराशरीशिक्षायाम् । उपधारञ्जनं कुर्य्यान्मनोर्विकरणे सति ॥ लोपे प्रकृतिभावे वा नोपधारञ्जनं भवेदिति ॥

(३) २७ । २३ ॥

(४) नैतान्युदाहरणानि मनोऽवगाहते उत्तरसूत्रविरोधात् ॥

(५) १३ । ५३ ॥

(६) १७ । १ ॥

न सप्तम्यामन्त्रितयोः ॥ १४० ॥

सप्तम्यामंत्रितयोर्विभक्त्योः सम्बन्धिनइकारस्य न लोपो भवति, यथा (१) अपान्त्वा सधिषि, अपान्त्वा पार्थसि, एते सप्तम्याउदाहरणे (२) हे पृथिवि आमन्त्रितविभक्तेरुदाहरणम् अनकारार्थआरम्भः (३) ॥

नॄन्पकारे विसर्जनीयम् ॥ १४१ ॥

नॄनित्ययं नकारः पकारे प्रत्यये विसर्जनीयमापद्यते अनुनासिकं चोपधा, यथा (४) नॄन् पाहि नॄँःऽ पाहि शृणुधी गिरः (५) ॥

शत्रून् परिधीन् क्रतून् वनस्पतीन्त्स्वरे रेफम् ॥ १४२ ॥

शत्रून् परिधीन् क्रतून् वनस्पतीन् एते नकाराः स्वरे प्रत्यये रेफमापद्यन्ते अनुनासिकं चोपधा, शत्रून्

---

(१) १३ । ५३ ॥

(२) १ । २५ । उभयथा लक्ष्यलक्षणदर्शनात् यथालक्षणं योज्यमिति निरवद्यम् ॥

(३) पूर्वोक्तसूत्रोदाहरणे अश्मन् शब्दः पुल्लिङ्गः "पाषाणप्रस्तरग्रावोपलाश्मान-इत्यभिधानात् । यच्च निशब्दो बहुलमिति पूर्वमुक्तन्तन्निशब्दस्येति न पौनरुक्त्यमिति ॥

(४) १३ । ५२ । न व्याकरणान्तरसिद्धोपध्मानीयप्रकृतिभावौ विधातव्यौ ॥

(५) ४ अ. ३ सू. अनुनासिकमुपधा, इति वक्ष्यमाणसूत्रेण पूर्वोत्तरयोरुदाहरणयोरुपधाया आनुनासिक्यं भवति ॥

यथा (१) शत्रून् अप जहि शत्रूँ१॥रपक्ष्व÷ । परिधीन् यथा (२) त्वन्वन्न वांतः परिधीँ१॥ रपं÷, क्रतून् यथा (३) अग्ने क्रत्वा क्रतूँ१॥ रनु, वनस्पतीन् यथा (४) ये वा वनस्पतीँ१॥रनु ॥

आकारोपधो यकारम् ॥ १४३ ॥

आकारोपधो नकारो यकारमापद्यते स्वरइत्यनुवर्त्तते अनुनासिकं चोपधा, यथा (५) महान् इन्द्रः महान्यइन्द्रइत्येवं संहिता प्राप्नोति ततो (६) "यवयोः पदान्तयोः स्वरमध्ये लोप"इति यकारलोपे कृते (७) "न

---

(१) ७ । ३७ ॥

(२) १९ । ५३ ॥

(३) १९ । ४० ॥

(४) १३ । ७ । अत्रोदाहरणचतुष्टये सर्वप्राचीनसंहितापुस्तके सार्द्धैका मात्रा लिखिता तत्र प्रमाणं बृहदमोघनन्दिनीशिक्षावचनं "अनुरङ्गाः पञ्चैकार्द्धमात्रिका भवन्ति इति ज्ञेयम् ॥

(५) ७ । ४० ॥

(६) ४ अ. । १२५ सू. ॥

(७) ३ अ. । ३ सू. । प्रा. ३ अ. ४ सू. । प्रा. ४ अ. ५२ सू. वक्ष्यमाणेन "कण्ठ्यादिवर्णएकारमित्यनेन सूत्रेण सन्धिः प्राप्ता सा न भवति "न परकालइति पूर्वोक्तसूत्रसामर्थ्यान्नैकवद्भावो भवति । ननु महाँ २॥ऽ इन्द्रइत्यत्र यकारलोपे कृते सति उपधारञ्जनं न भवति तत्कथं लुप्तत्वादुपधारञ्जनमिति चेत् इत्थं यत्र साक्षान्नकारमकारलोपस्तत्रोपधारञ्जनं न भवति यत्र वर्णान्तरापत्त्या लुप्यते तत्र भवत्येवेत्यदोषः । अन्यथा स्वरयोः सन्धिरपि स्यात् अतउपधारञ्जनं भवत्येवेति ज्ञेयम् । किन्नाम रङ्गत्वमिति सन्देहे याज्ञवल्क्येनोक्तम् । रङ्गे चैव समुत्पन्ने न ग्रसेत्पूर्वमक्षरम् । स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमुच्चरेत् १ द्विमात्रो मात्रिको वाऽपि नासामू-

परकालः पूर्वकाले पुनरिति" सन्धिर्न भवति ततो महाँ २॥ऽ इन्द्रइत्येतद्रूपं सम्भवति, ननु यथा (१) "दर्धन्वान्त्स्वस्वान्यकारे लोपं"इति नकारलोपे कृते सत्युपधानुनासिक्यन्न प्रवर्त्तते एवमिहापि नकारस्य यकारीभूतस्याश्रवणादुपधानुनासिक्यन्न प्रवर्तते तत्कथमुपधानुनासिक्यमिति लुप्तस्यापि स्वकार्यकरणादित्यदोषः, यदि

लमुपस्थितः । अन्ते प्रयुज्यते रङ्गः पञ्चमैः सर्वनासिकः २ यथा सौराष्ट्रिका नारी-अराँ २॥ऽ इत्यभिभाषते । एवं रङ्गं विजानीयात् ङकारं परिवर्जयेत् ३ अनन्तरो मकारस्तु यो रङ्गस्तत्र रज्यते । सर्वानुनासिकं विद्याच्छेषमन्योपधानिका ४ यरलवाः शषसहा रज्यन्ते चोपधानिकाः । वर्गान्ते रज्यते यस्तु सर्वैः सर्वानुनासिकः ५ न स उत्पद्यते रङ्गः कांस्येन च समन्वितः । मृदुः सार्द्धद्विमात्रः स्याद्वृष्टिमानिति दर्शनात् ६ अस्यार्थः । रङ्गे उत्पन्ने इति । रङ्गो नाम स्वरयोरन्तरा नकारस्य लोपादौ विकारे उपधानुनासिक्यं च । उक्तं च । उच्चारे कर्त्तव्ये पूर्वमक्षरं न ग्रसेत् क्षिप्रोच्चारणं कुर्यात् । किन्तूपधास्वरं दीर्घं प्रयुञ्जीत अनन्तरं नासिक्यं नासिकास्थानं कृत्वोच्चरेत् । द्विमात्रो मात्रिकइति दीर्घो ह्रस्वो वा नासामूलमाश्रितः वर्गपञ्चमैर्युक्तः स्वरान्ते सर्वनासिक्यं प्रयुज्यते । तदेव स्पष्टयति । अनन्तरेऽपीति । मकारव्यवहितस्वरे रङ्गः सर्वानुनासिको ज्ञेयः । शेषोऽन्यः यरलवादौ उपधानुनासिकं नासिकयोच्चार्यते स च मृदुर्द्विमात्रः स्यात् । अथोदाहरणानि वर्गान्ते मकारो ७ । ४० । 'वृष्टिमाँ २॥ऽ ईव, । ६ । २४ । हविष्म्माँ २॥ऽ आविवासति, । यरलवान्ते इति । ८ । १९ । याँ २॥ऽ आवह(ः, । ७ । ३७ । जहि शत्रूँ १॥ रपमृधः, । १७ । १७ । प्रथमच्छदवरूँ २॥ऽ आविवेश, । २३ । १६ । देवाँ २॥ऽ इदोषि पथिभिः, । ३ । ५२ । स्वशाँ २॥ऽ अनु, महाँ २॥ऽ इन्द्रः । एते द्विमात्रप्रायाः । एतच्छाखीयानां द्विमात्राएव । बह्वृचानां एकमात्रा अपि पठ्यन्ते । उग्रं इत्यादि ज्ञेयम् । अत्र रङ्गोच्चारणे शुष्कवैदिका दाक्षिणात्याः प्रमादेन तर्जनीमध्यमयोरङ्गुल्योः प्रक्षेपं कुर्वन्ति तदसङ्गतं कुतः "दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्त्तित"इति याज्ञवल्क्यशिक्षायामुक्तत्वात् । अतस्तर्जन्याएवैकाङ्गुल्याः प्रसारणं कथितमिति पण्डितैर्ज्ञेयम् ॥

(१) प्रा. ३ अ. १३७ सू. ॥

हि यकारो व्यञ्जनकार्यं न कुर्यात् कथमिह स्वरयोः सन्धिर्न स्यात् अतः स्वकार्यकरणादुपधानुनासिक्यमपि भवति यथा (१) वृष्टिमान् इव पर्ज्जन्यो वृष्टिमा २॥ऽ इव ॥

न तमे ॥ १४४ ॥

यन्नकारस्य तकारे प्रत्यये विहितन्तमप्रत्यये न भवति, यथा (२) मदिन् तमानाम् मदिन्तमानान्त्वा, मधुन् तमानाम् मधुन्तमानान्त्वा, तथयोः समित्यस्यापवादः ॥

निर्ज्जगन्न्वान् तमसि ॥ १४५ ॥

निर्ज्जगन्वानित्ययं नकारस्तमसि प्रत्यये न विकारमापद्यते, यथा (३) निर्जगन्वान् तमसः निर्ज्जगन्वान्तमसो ज्योतिषागात् ॥

धामञ्छदूँश्चिकित्वाँस्त्वं पूषन्नर्व्वन्निति च ॥ १४६ ॥

(१) ७ । ४० । अस्मिन् सूत्रे स्वरे इति पदानुवृत्ति (प्रा. ३ अ. १३२) रेतदङ्कसूत्रान्नो चेत्तदा गवयान् त्वष्ट्रे इत्यत्र दोषः स्यात्तदर्थं तत्पदग्रहणम् ॥

(२) ८ । ४८ ॥

(३) १२ । १३ ॥

धामन् शत्रून् चिकित्वान् त्वम् पूषन् अर्वन् एते नकारा न विकारमापद्यन्ते । धामन् यथा (१) धामन्ते विश्वं भुवनम् । शत्रून् यथा (२) शत्रून्ताढि विव्यधो नुदस्व । चिकित्वान् त्वम् यथा (३) आ च वह मित्र महश्चिकित्वान्त्वम् । त्वमिति किम् (४) स प्रथमो बृहस्पतिश्चिकित्वाँस्तस्मै । पूषन् यथा (५) पूषन्तव व्रते वयम् । अर्वन् यथा (६) तव शरीरं पतयिष्णवर्वन्तव चित्तम् । इति चेत्यस्यावयवस्यार्थः । इति शब्दः प्रकारदर्शनार्थः । यथा (७) अधस्तनसूत्रयोस्तकारे नकारस्य प्रकृतिभावः एवमिहापि नकारस्य प्रकृतिभाव एव तथा च व्याख्यातम् । चकारस्तकारापवादावधिद्योतनार्थः ॥

अश्वादौ चाद्ध्याये ॥१४७॥

---

(१) १७ । ९९ ॥

(२) १८ । ७१ ॥

(३) २९ । २५ ॥

(४) ७ । १५ ॥

(५) ३४ । ४१ । अयं नकारविकारनिषेधो मन्त्रे न तु ब्राह्मणे । ब्राह्मणे तु तथयोः समिति प्रा० ३ अ० १३६ पूर्वेण सूत्रेण नकारस्य सकारे जाते पूषँस्तव श्रुते वयमिति तदुक्तं माण्डवीशिक्षायाम् । पूषन्तवेत्यृचो मन्त्रे तस्य प्रकृतिरिष्यते । नेष्यते ब्राह्मणे तेन संस्कारो भिद्यते तयोरिति, तस्य नकारस्य प्रकृतिभावइत्यर्थः ॥

(६) २९ । २२ ॥

(७) प्रा० ३ अ० १४४ । १४५ । ९ । ३ । त्वाचो यन्तुर्यन्त्रिये दधामीत्यादौ तस्य विकारो न भवतीति ज्ञेयम् ॥

स्वर इति वर्त्तते अम्बस्तूपर इत्येतस्मिन्नध्याये नकार-आकारोपधः स्वरे प्रत्यये प्रकृत्या भवति । 'आकारोपधो यकार'मित्यस्यापवादः । यथा (१) शिशुमारान् आलभते समुद्राय शिशुमारानालभते । मण्डूकान् अद्भ्यः मण्डूकानद्भ्यः । स्वरानुवृत्तिरिति किम् (२) गवयाँस्त्वष्ट्रे, सुपर्णोश्चक्षुषे ॥

मनुष्याँस्ताँल्लोकानमित्रानुदि ॥ १४८ ॥

मनुष्यान् तान् लोकान् अमित्रान् एते नकाराः प्रकृत्या भवन्ति उदि उपसर्गे प्रत्यये । मनुष्यान् यथा (३) मनुष्यान् उत् मनुष्यानुदजयताम् । तान् यथा (४) तान् उत् तानुज्जेषम् । लोकान् यथा (५) लोकानुदजयताम् । अमित्रान् यथा (६) क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वान् ॥

आप्नोतीत्योश्च ॥ १४९ ॥

(१) २४ । १९ । उदाहरणद्वयं तस्यैव मन्त्रस्य ॥

(२) उदाहरणद्वयं पूर्वोक्ताङ्कस्यैव ॥

(३) ९ । ३१ ॥

(४) 'तथा ॥

(५) उदाहरणत्रयमेकस्याः कण्डिकाया ज्ञातव्यमिति ॥

(६) ११ । ८२ ॥

आप्नोतौ प्रत्यये इतौ च नकारो न विकारमापद्यते । आप्नोति यथा (१) भक्षान् आप्नोति इडाभिर्भक्षानाप्नोति । इति यथा (२) अपयान् इतिं अदितिः श्रपयानिति ॥

सङ्क्रमे च वैष्णवान् ॥ १५० ॥

वैष्णवानित्ययं नकारो न विकारमापद्यते स्वरे प्रत्यये । सङ्क्रमश्च क्रमे भवति अतः क्रमसंहितायामित्यर्थः यथा (३) वैष्णवान् अव व्वैष्णवानव ॥

गृहानैमि गृहानुपह्वयामहे वर्च्चस्वानहम्मनुष्यानन्तरिक्षमग्निष्वाचानृतुमतः पयस्वानग्ने तानश्विना पतङ्गानसन्दितः स्वर्ग्गानपां पतिः सपत्नानिन्द्रसपत्नानिन्द्राग्नी नभस्वानार्द्रदानुर्व्विद्वानग्नेर्देवानस्रेधता-

(१) १९ । २९ ॥

(२) ११ । ५९ ॥

(३) ५ । २६ सङ्क्रमलक्षणं भाष्यकारेण चतुर्थाध्याये 'सङ्क्रमे च सर्वत्र' इति सूत्रे गलत्पदमतिक्रम्यागलता सह सन्धानं सङ्क्रम इति कथितं तज्ज्ञातव्यम् ॥

नङ्वानाशुरथैतानष्टौ ञ्विरूपानाल-
भतएतावानस्यायुष्म्मानग्मे ञ्वाय-
ञ्व्यानारण्ण्याः प्प्रविद्वानग्निनान-
ङ्वानधोरामौ शत्रूननुयँय्यातुधानान-
स्त्थादस्म्मानरिष्टेभिरिति ॥५१॥

एतेषां द्विपदानां पूर्वं पदान्तीया नकाराः प्रकृत्या भवन्ति । (१) गृहानैमि मनसा मोदमानः । (२) गृहानुपह्वयामहे । (३) वर्च्चस्वानहं मनुष्येषु । (४) मनुष्यानन्तरिक्षमगन् । (५) अग्निष्वात्तानृतुमतो हवामहे । (६) पर्यस्वानग्नऽआगमन्तम् । (७) तानश्विना सरस्वती । (८) तपूंष्यग्ग्नेजुह्वा पतङ्गानसन्दि-

(१) ३ । ४१ ॥
(२) ३ । ४२ ॥
(३) ८ । ३८ ॥
(४) ८ । ६० ॥
(५) १९ । ६१ ॥
(६) २० । २२ ॥
(७) २१ । ४२ ॥
(८) १३ । १० ॥

तः । (१) स्वर्ग्गानपां पतिर्वृषभः । (२) अधा सपत्नानिन्द्राग्ग्नी मे । (३) समुद्रोऽसि नभस्वानार्द्रदानुः । (४) प्राचीमनुप्रदिशं प्रेहि विद्वानग्ने । (५) देवानस्त्वेधता मन्मना । (६) अनड्वानाशुः सप्तिः पुरन्धिः । (७) अथैतानष्टौ विरूपानालभते । (८) एतावानस्य महिमा । (९) आयुष्मानग्ने हविषा वृधानः । (१०) वायव्यानारण्या ग्राम्याश्च ये । (११) प्रविद्वानग्निना । (१२) अनड्वानधो रामौ । (१३) शतून् नु यँव्विश्वे मदन्त्यूमाः । नकारस्य रेफापवादः । इतरत्र तु सर्वत्र यकारापवादः । (१४) अपसेधन्नच्छसो

(१) १३ । ३१ ॥
(२) १७ । ६४ ॥
(३) १८ । ४५ ॥
(४) १७ । ६६ ॥
(५) १८ । ७५ ॥
(६) २२ । २२ ॥
(७) ३० । २२ ॥
(८) ३१ । ३ ॥
(९) ३५ । १७ ॥
(१०) ३१ । ६ ॥
(११) इदमुदाहरणं शाखान्तरीणम् ॥
(१२) २९ । ५९ ॥
(१३) ३३ । ८० ॥
(१४) ३४ । २६ ॥

यातुधानानस्थात् । (१) द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिः ॥

वृद्धं वृद्धिः ॥ ५२ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्यसूत्रे तृतीयोऽध्यायः ॥

आनन्दपुरवास्तव्यवज्रटसूनुना उवटेन कृते मातृमोदाख्ये प्रातिशाख्यनिर्मलभाष्ये तृतीयोऽध्यायः समाप्तः ॥

अनुस्वारꣳ रोष्मसु मकारः ॥ १ ॥

अनितावध्यायइत्यनेन सूत्रेण योऽवधिस्त्वेन वर्णितः । अतोऽवधिपरिज्ञापनार्थमध्यायसमाप्तिः कृता कात्यायनाचार्येण । आह च । अनितावध्यायइति कृतं सूत्रं यतः पुरा । अतस्तदवधिज्ञप्तिः क्रियतेऽध्यायसञ्ज्ञया । (२) अत्रावधिससाधीतं पदमन्तर्विकारिमत् । आचार्येणोच्यते तस्य प्रागुक्त्यादिप्रयोजनम् । मकारो

---

(१) ३४ । ३० ॥

(२) अत्रावधिसमाधीतं पदमन्तर्विकारि यत् इति (ख) पुस्तकपाठः ॥

ऽनुस्वारमापद्यते रोष्मसु प्रत्ययेषु । रेफे यथा (१) अयाम् रसेन । अयाᳫं रसेन वरुणः । ऊष्मसु यथा (२) त्वाम् ग्रस्वन्तः त्वाᳫं ग्रस्वन्तऽ उपयन्ति वाजाः । (३) देवᳫं᳐ सवितारमोण्योः । (४) तपूᳫंषि । (५) उरुᳫं᳐ हि राजा (६) ॥

नुश्चान्तःपदेऽरेफे ॥ २ ॥

---

(१) ९ । ३ ॥

(२) १७ । ७६ ॥

(३) ४ । २५ ॥

(४) १३ । १० ॥

(५) ८ । २३ ॥

(६) अनुस्वारᳫं᳐ रोष्मस्वित्यनेन सूत्रेण मकारोऽनुस्वारमापद्यते । स कीदृशो ऽनुस्वारः यस्यानुस्वारस्य वक्ष्यमाणप्रतिज्ञासूत्रेण "अनुस्वारस्य ᳫं᳐मित्यादेशः शषसहरेफेषु" इत्यनेन सूत्रेण ᳫं᳐कारूपो योऽनुस्वारो ह्रस्वपूर्वः असंयुक्तपरः सार्धमात्राकालः पूर्वश्च स्वरोऽर्द्धमात्राकालः कार्यः । ताᳫंसवितुः । सिᳫंहस्यसि । इमᳫं स्तनम् । अपरे तु । उक्तं च भगवता याज्ञवल्क्येन शिक्षायाम् । अनुस्वारोपरिष्टात्तु संयोगो यत्र दृश्यते । ह्रस्वं तं तु विजानीयात्तᳫंस्येति निदर्शनम् ॥ १ ॥ अनुस्वारोपरिष्टात्तु संवृतं यत्र दृश्यते । दीर्घं तं तु विजानीयात्तᳫंस्येति निदर्शनम् ॥ २ ॥ अनुस्वारोपरिष्टात्तु संवृतं यत्र दृश्यते । दीर्घं तं तु विजानीयात् श्रोता ग्रावाण इति निदर्शनम् ॥ ३ ॥ अनुस्वारस्तु यो दीर्घादक्षराच्च भवेत्परः । स तु ह्रस्वइति ज्ञेयो मन्त्रेष्वेव विभाषया ॥ ४ ॥ वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रिकः । द्विमात्रो मात्रिको ज्ञेयः संयोगाग्रश्च यो भवेत् ॥ ५ ॥ अनुस्वारो द्विमात्रस्तु ऋवर्णे व्यञ्जनोदये । ह्रस्वोऽपि दीर्घो ज्ञातव्यो देवानाᳫं᳐ हृदयेभ्य इति निदर्शनम् ॥ ६ ॥ इदमनुस्वाररूपᳫं᳐कारोच्चारणं भिन्नपदेष्वेव दृश्यते । प्रतिज्ञासूत्रेप्यस्य ᳫं᳐कारस्य त्रैविध्यमाख्यातमुच्चारणं महर्षिणा कात्यायनेन तदग्रे द्रष्टव्यमिति ॥

नकारोऽनुस्वारमापद्यते । चशब्दात् मकारश्च । पदस्य मध्ये अरेफे रेफशब्दस्य पर्युदासात् । ऊष्मस्वेवानुस्वारापत्तिर्भवति । यथा (१) जघ्निवान् सः । जघ्निवाँ सँः । (२) पपिवान् सः । पपिवाँ सँः । (३) तपूम् षि तपूँष्यग्ने । (४) हवीन् षि । हवीँ षिँ । एते नकारप्रकृतयोऽनुस्वाराः ॥

षष्ठांशः ॥ ३ ॥

वनतेर्धातोर्वमतेरुणादेर्यो वशप्रत्ययः । वनतेर्वमतेर्धातोरौणादिकशप्रत्यये नकारप्रकृतिर्मकारप्रकृतिर्वाऽनुस्वारः । सन्देहात्सूत्रकारेण कण्ठरवेण सूत्रं कृत्वा पठितः । अतो नकारप्रकृतिर्वा मकारप्रकृतिर्वाऽनुस्वारः । (५) किम् शिलाय किंशिलायं (६) अंशुस्त । (७) पुंसः । एते मकारप्रकृतयोऽनुस्वारा भवन्ति । एवमन्येऽप्यन्वेषितव्याः । अरेफइति

---

(१) ८ । १९ ॥
(२) ८ । १९ ॥
(३) १३ । १० ॥
(४) १७ । ७५ ॥
(५) १६ । ४३ ॥
(६) २ । २५ ॥
(७) २५ । ४५ ॥

किम् । व्यम्नः । (१) यद्भ्मोऽ अतिसर्प्पति । (२) ॥

अनुनासिका चोपधा ॥ ४ ॥

अतोऽधिकारादयमन्यं विकारं वक्ष्यामो मकारनकारयोस्तत्रानुनासिका चोपधा भविष्यतीत्यधिकृतं वेदितव्यम् । ननु 'अनुनासिकमुपधा प्रागन्तस्थाया' इति उपधाऽनुनासिक्यं विहितमेव किमनेन सूत्रेण क्रियते । एवन्तर्हि व्यवस्थार्थं वचनम् । यस्मिन्पक्षे अनुस्वारो न भविष्यति । तस्मिन्पक्षे उपधाया आनुनासिक्यं भविष्यति । अधिकारार्थोऽयमारम्भः ॥

लोपं काश्यपशाकटायनौ ॥ ५ ॥

काश्यपशाकटायनावाचार्यौ मकारनकारयोर्लोपं मन्येते । अस्मिन्पक्षे वाक्यद्वयम् । अनुनासिका चोपधा भवति । यथा अपाँ रसेन । पक्षे अपाᳫं रसेन । त्वाँ शुभ्र्वन्तः । त्वाᳫं शुभ्र्वन्तः । ताँ सवितुः । ताᳫं सवितुः । त्वाँ हि । त्वाᳫं हि । तपूँषि । तपूᳫंष्यग्ने । अक्रूँस्त । अक्रूᳫंस्त । किँ शिलायं । किᳫं शिलायं । (३) यजूँषि । यजूᳫंषि सामभिः ॥

(१) ११ । ७४ ॥

(२) इदं सूत्रमष्टाध्याय्यां न दृश्यते व्याख्याकर्त्रा तु लिख्यते ॥

(३) २० । १२ । अयं विकल्पपाठो यथाशास्त्रीयो बोध्यः ॥

प्रकृत्या सम्राट्साम्राजि ॥ ६ ॥

सम्राट्शब्दे समः सम्बन्धी मकारो रेफे परभूते प्रकृत्या भवति, तथा साम्राज्यशब्दे समो मकारो रेफे परे सति प्रकृत्या भवति। यथा (१) सम्राडिति सम्। राट्। सम्राट्चक्षुः। (२) साम्राज्यमिति साम्। राज्यम्। साम्राज्यङ्गच्छेति मे। (३) साम्राज्येनाभिषिञ्चामि ॥ (४)

शं चे पकाराद्गुकारोदयात् ॥ ७ ॥

पकाराद्गुकारोदयात्परो मकारः शकारमापद्यते, चकारे परभूते अनुनासिका चोपधा भवति। यथा (५) पुम् चली। पुँश्चली कितवः। चइति किम्। (६) पुर्ठ॰सः। पकाराद्गुकारोदयादिति किम्। (७) प्रमुञ्च। (८) विमुञ्चति ॥

---

(१) २०। ५॥
(२) ४। २४॥
(३) १८। ३७॥
(४) साम्राज्ये इति (ग) (घ) (ङ) पुस्तकपाठः॥
(५) ३०। २२॥
(६) २५। ४५॥
(७) १६। ९॥
(८) २। २३॥

समन्तःपदे कखपफेष्वनूष्मपरेषु ॥ ८ ॥

सकारमापद्यते मकारः पदमध्ये कखपफेषु प्रत्ययेषु किं विशिष्टेषु अनूष्मपरेषु यद्यूष्माणः परभूता न भवन्ति अनुनासिका चोपधा । यथा (१) सम् कृतिः । सँस्कृतिः । पुम् खाताः । पुँस्खाताः । पुम् पुत्राः । पुँस्पुत्राः । पुम् फलाः । पुँस्फलाः ।अनूष्मपरेष्विति किम् । (२) सम् त्सरे । सङ्क्सरेऽब्दतऽइति ॥

नुश्चाम्रेडिते ॥ ९ ॥

नकारः चशब्दान्मकारः सकारमापद्यते अनुनासिका चोपधा आम्रेडिते पदे कखपफेष्वनूष्मपरेषु । पदमध्ये यथा कान् करवाणि । काँस्करवाणि । कान् कानामन्त्रयति । काँस्कानामन्त्रयति । आम्रेडिते किम् । कान्करवाणि । इह यान्युदाहरणानि संहितायां नोपलभ्यन्ते तेषामपि लक्षणं प्रसङ्गात्क्रियमाणं न विरुध्यत एव यथा जलाहरणस्य मत्स्याहरणं पुष्पाहारस्य फलाहरणं च न विरुध्यते ॥

---

(१) ७ । १४ ॥ अन्यान्युदाहरणानि यथाशास्त्रीयकानि ज्ञातव्यानि ॥

(२) इदमुदाहरणं शतपथब्राह्मणीयाग्निरहस्यनामके दशमकाण्डे तृतीयप्रपाठके चतुर्थब्राह्मणस्याष्टादशमखण्डस्योक्तमिति ॥

अन्तस्स्थामन्तस्स्थास्वनुनासिकां परसस्स्थानाम् ॥ १० ॥

अन्तस्थामापद्यते मकारः अन्तस्थासु परभूतासु परस्या अन्तस्थायाः समानस्थानां यदि नामानुनासिकां समानाम् । यथा (१) सम् यौमि । सँय्यौमीदम् । (२) रासभम् युवम् । युञ्जाथाᳬरासभँय्युवम् । (३) सम् व्पामि । सँव्वपामि । (४) तम् लोकम् । तँल्लोकं पुण्यम् । रेफेऽनुस्वारो विहितः ।

हि ॥ ११ ॥

'व्यन्तराः काला' इत्युक्तम् । अतस्तत्कालावधिद्योतनार्थं हिशब्दः ॥

स्पर्शे परपञ्चमम् ॥ १२ ॥

मकारः स्पर्शे प्रत्यये परस्य प्रत्ययभूतस्य पञ्चममापद्यते । परः स्पर्शो यस्मिन्वर्गे तस्य वर्गस्य पञ्चममि-

---

(१) ३ । २२ ॥

(२) ११ । १३ ॥

(३) १ । २१ ॥

(४) २० । २५ ॥

त्यर्थः । यथा (१) व्र॒तम् कृ॑णुत । व्र॒तङ्कृ॑णुत । (२) व्र॒तम् चरिष्यामि । व्र॒तञ्चरिष्यामि । (३) एतम् ते देव । एतन्ते॑ देव सवितः । (४) इदम् पितृभ्यः । इ॒दम्पि॒तृभ्यो॒ नमः॑ । (५) सम् ज्ञानमसि । स॒ञ्ज्ञान॑मसि ॥

तकारो ले लम् ॥ १३ ॥

तकारो लकारे प्रत्यये लकारमापद्यते । यथा (६) आसीत् लोकम् । आ॒सी॒ल्लो॒कम् । (७) परि चित् लोकम् । प॒रि चि॒ल्लो॒कम् । क्रमसंहितोदाहरणम् (८) ॥

नुश्चाऽनुनासिकम् ॥ १४ ॥

नकारो लकारप्रत्यये लकारमापद्यते । यदि

---

(१) ४ । ११ ॥
(२) १ । ५ ॥
(३) २ । १२ ॥
(४) १९ । ६८ ॥
(५) १२ । ४६ ॥
(६) १४ । ३१ ॥
(७) १२ । ४५ ॥
(८) इदमुदाहरणं क्रमपाठस्थं ज्ञेयम् । क्रमलक्षणविधायकं सूत्रमस्मिन्नध्याये १८१ वक्ष्यमाणमिति ॥

समानाऽनुनासिकम् । यथा (१) अस्मिन् लोके । अस्मिँल्लोकेऽस्मिन् च्यवे । (२) त्रीन् लोकान् । त्रीँल्लोकानुदजयत् ॥

ङ्नौ क्काभ्याꣳ सकारे ॥ १५ ॥

ङकारनकारौ यथासङ्ख्यं ककारनकाराभ्यां व्यवधीयेते सकारे प्रत्यये । यथा (३) प्राङ् सोमः । प्राङ्क्सोमोऽअति द्रुतः । (४) प्रत्यङ् सोमः । प्रत्यङ्क्सोमोऽअतिद्रुतः । (५) त्रीन् समुद्रान् । त्रीन्त्समुद्रान्त्समसृपत् । (६) अस्मान् सीते । अस्मान्त्सीते पयसा ॥

न दाल्भ्यस्य ॥ १६ ॥

दाल्भ्यस्याचार्यस्य मते नैतावागमौ भवतः । (७) प्राङ्सोमः । प्रत्यङ्सोमः । त्रीन्समुद्रान् । अस्मा-

(१) ३ । २१ ॥
(२) ९ । ३१ ॥
(३) १९ । ३ ॥
(४) तथा ॥
(५) १३ । ३१ ॥
(६) १२ । ७० ॥
(७) पूर्वोक्तोदाहरणाङ्को द्रष्टव्यः ॥

न्सीते ॥ (१) ॥

रलावृलृवर्णाभ्यामूष्मणि स्वरोदये सर्वत्र ॥ १७ ॥

रेफलकारौ ऋऌवर्णाभ्यां ऋऌसदृशश्रुतिभ्यां यथासङ्ख्यं व्यवधीयेते ऊष्मणि परभूते स्वरपरे सर्वत्र संहितायां पदे च । अन्तःपदे नानापदे च यौ तौ, विधायकावुक्तौ तौ स्वरावुत व्यञ्जनाविति । शृणु । ऋऌस्वरसदृशौ व्यञ्जनावर्द्धमात्रकाविति ब्रूमः । तौ स्वरभक्तिरित्यन्येषु पदेषु प्रसिद्धौ । न चैतौ वर्णौ रेफलकारयोरूष्मणां च मध्यवर्त्तिनावपि सन्तौ संयोगस्य विघातं कुरुतः । स्वरसदृशत्वात् । (२) तथा चाह

---

(१) तथा ज्ञातव्यः । याज्ञवल्क्योऽपि । "नकारान्ते पदे पूर्वे सकारे परतः स्थिते । तसवर्णं विजानीयादस्मान्त्सीते निदर्शनम् ॥" अत्र रूपसिद्धिः । नकारतकारसकारसंयोगः । केवलसानुनासिकनकारसकारसंयोगः । नकारसकारसंयोगः । यथा चरणं पाठः । नकारतकारसंयोगं काण्वशाखिनः पठन्ति । द्वयमितरे । इति पाठो बुधैर्बोध्यः ॥

(२) शौनकमहर्षिणा ऋग्वेदिनामुपकारायाष्टादशपटलात्मकं प्रातिशाख्यं निर्मितम् । तत्रत्यतृतीयपटले सूत्रं १०१ बोध्यम् । स च स्वरभक्तिः पञ्चधा याज्ञवल्क्येनाभिहिता । करिणी कुर्विणी चैव हरिणी हारिणी तथा । या तु हंसपदी नाम सा तु रेफषकारयोः ॥ १ ॥ देवं बर्हिरिति करणी उपवल्हेति कुर्विणी । हरिणी अर्शसइत्याहुर्हरिता शतवल्शेति ॥ २ ॥ वर्षो वर्षीयसि प्राह या तु हंसपदीति च । एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता ॥ ३ ॥ स्वरभक्तिं प्रयुञ्जानस्त्रीन्दोषान्परिवर्जयेत् । इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ॥ ४ ॥ सम्यग्वर्णं प्रयुञ्जीत ब्रह्मलोके महीयते । नैतत्स्वरन्ति पूर्वाङ्गे नो पराङ्गे कथं च न ॥ ५ ॥ न स्वरे न च मात्रायां कथं स्वारो विधी-

शौनकः । "न संयोगं स्वरभक्तिर्विहन्ति" यथा (१) गार्हपत्त्यः । अत्र हकाररेफयोरन्तरावपि स्वरभक्तिः सती रेफहकारयोः संयोगं न विहन्ति । एवमन्यत्रापि द्रष्टव्यम् । (२) अर्शसऽउपचितामसि । (३) शतवल्शः । (४) उपवल्हामसि त्वा । पदमध्योदाहरणम् (५) व्रीहयश्च । (६) सवितुर्वरेण्यम् । (७) प्रार्श्वतः । (८) दिवो वर्ष्मन् । (९) वर्षवृद्धेः । (१०) अश्रुभिर्ह्रादुनीः ॥

प्रगृह्यं चर्चायामितिनापदेषु ॥ १८ ॥

यते । पराङ्गस्य तु यत्पूर्वं पूर्वाङ्गस्य तु यत्परम् ॥ ६ ॥ उभयोरर्द्धसंयोगे स्वारं कुर्याद्विचक्षणः ॥ एतान्यक्षराण्यन्तःपदे नानापदे चोच्चारणं कुर्वन्ति तेषामुदाहरणानि प्रदर्शितानि । एतत्सूत्राशयं ज्ञात्वा केशवेनापि सूत्रमकारि "अहल्शल्पूर्द्धरेफस्य सैकारः प्राक् च" एतत्सूत्रार्थाद्धकारिकापि । 'विहल्शल्पूर्द्धरेफो यः सैकारः प्राक्समुच्चरेत्' इति । अस्योच्चारणप्रकारः प्रतिज्ञापरिशिष्टसूत्रे कात्यायनेन प्रदर्शितः ॥

(१) ३ । ३९ ॥

(२) १२ । ९७ ॥

(३) ५ । ४३ ॥

(४) २३ । ५१ ॥

(५) २ । ९ ॥

(६) २२ । ११ ॥

(७) २१ । ४३ ॥

(८) २८ । १ ॥

(९) २५ । १ ॥

(१०) २५ । ९ ॥

प्रगृह्यसञ्ज्ञकं यत्पदं तच्चर्चायां परभूतायामितिना आगमिकेन व्यवधीयते । चर्चाशब्देन इतिकरणात्परतो या तस्यैव पदस्य द्विरुक्तिः सोच्यते । (१) पदेष्वित्यधिकारार्थं वचनम् । इतः प्रभृति पदाधिकारो वर्त्तते । यथा (२) द्वे ऽइति द्वे । (३) शीर्षे ऽइति शीर्षे । (४) अस्मे ऽइत्यस्मे । त्वे ऽइति त्वे ॥

रिफितं च संहितायामनिरुक्तम् ॥ १९ ॥

रिफितं चशब्दादितिना आगमिकेन व्यवधीयते चर्चायां परभूतायां संहितायामनिर्ज्ञातरेफं यत् यथा (५) पुनरिति पुनः । (६) स्वरिति स्वः । संहितायामनिरुक्तमिति किम् । (७) पुनः । मनः ॥

पदावृत्तौ चान्तरेण ॥ २० ॥

---

(१) अस्मात्सूत्रादारभ्य पदाधिकारः प्रवृत्तः । चर्चालक्षणं 'इति वचर्चायाम्' अ० ३ सू० २० एतद्व्याख्यानावसरे पूर्वं प्रतिपादितम् ॥

(२) १७ । ८४ ॥

(३) तथा पदपाठादङ्को बोध्यः ॥

(४) उदाहरणद्वयस्यैक एवाङ्को ४ । २२ । बोध्यः ॥

(५) ४ । १५ ॥

(६) ३ । ३६ ॥

(७) ४ । १५ ॥

पदस्थावृत्तिर्द्विरुक्तिः तस्यां पदावृत्तौ सत्यां अन्तरेण इति भवति सा च नोक्ता अतस्तत्प्रतिपादनार्थमाह ॥

क्रमोक्तावृत्तिः पदेषु ॥ २१ ॥

क्रमशास्त्रे या पदावृत्तिरुक्ता सा पदेष्वपि भवति । क्रमशास्त्रातिदेशोऽयम् । तत्र चैतदुक्तमग्रे । (१) 'स्थितोपस्थितमवगृह्यस्यान्तःपददीर्घीभावे' 'विनामे' 'प्रगृह्ये' 'रिफिते निरुक्ते' । अवगृह्ये यथा (२) प्रजावतीरिति प्रजा । वतीः । अन्तःपदे दीर्घीभावे यथा (३) मामहानः मंमहान इति ममहानः । विनामे च भवति । यथा (४) सुषाव । सुसावेति सु । सावा । प्रगृह्ये यथा (५) इन्द्राग्नी इतीन्द्राग्नी । रिफिते निरुक्ते भवति यथा (६) पुनरिति पुनः । प्राणः ॥

सुपदावसानवर्ज्जम् ॥ २२ ॥

क्रमोक्तावृत्तिः पदेष्वित्युक्तम् । तस्यायमपवादः । सुपदावसाने वर्जयित्वाऽन्यत्र क्रमोक्तावृत्तिर्भवति । तत्र

---

(१) अत्रैतदध्यायस्थाग्रिमसूत्राणि १८८ । १९० । १९१ । १९२ । १९३ । पञ्चसंख्याकानि स्मृतानि भाष्यकारेण । तानि ज्ञातव्यानि ॥

(२) १ । १ ॥

(३) १७ । ५१ ॥

(४) १९ । २ ॥

(५) ३ । १३ ॥

(६) ४ । १५ ॥

'सुपदे शाकटायन' (१) इति शाकटायनमतेनावृत्तिः । सा च (२) कतमानां भवति । अवसाने तु सर्वशाखिनामावृत्तिर्भवति । तदुभयं निषिध्यते ॥

अनितावन्तर्विकारागमं प्रागुक्त्वा ॥ २३ ॥

'अनितावध्याय'इत्यतआरभ्य यावदध्यायपरिसमाप्तिरस्मिन्नन्तराले यस्य पदस्य अन्तरा विकारआगमो वा विहितस्तदन्तर्विकारागमं पदं पूर्वमुक्त्वा पश्चात्पदावृत्तिः कर्त्तव्या । स्थितोपस्थितं कर्त्तव्यमित्यर्थः । तत्र चोपचरितषत्वणादि विकारजातमुक्त्वा । यथा (३) श्रेयस्कर । श्रेयःकरेति श्रेयः । कर । (४) सुषाव । सुसावेति सु । साव । (५) परमेष्ठी । परमेस्थीति परमे । स्थी । (६) वृष्टिमाँ २॥ऽ इव । वृष्टिमानिवेति वृष्टिमान् । इव । अनितावन्तर्विकारागममिति किम् । अस्यावधेरधस्तादुपरिष्टाच्च प्राग्वचनं मा भूत् । यथाऽवधेरधस्ताद्भवति । 'विसर्ज्जनीयः' । 'चच्छयोः शम् ।'

---

(१) अस्मिन्नध्याये सूत्रं १८९ ज्ञेयम् ॥

(२) काण्वानामिति "ख" पुस्तकपाठः ॥

(३) १० । २६ ॥

(४) १९ । २ ॥

(५) ८ । ४८ ॥

(६) ७ । ३९ ॥

दुश्च्यवनऽइति दुः । च्यवनः । "तथयोः सम्" । तर्वस्तरमिति तर्वः । तरम् । एवमादि । अथोपरिष्टादवधेर्दर्शयिष्यामः । 'अनुस्वारᳫं रोष्मसु मकारः' । सᳫं समिति सम् । सम् । 'नुश्चान्तः पदेऽरेफे' । पपिवाᳫंसऽइति पपि । वाᳫंसः । संस्कृतिः । अस्यावधेर्बहिर्यथा संहितायां पदे भवतीत्यर्थः (१) ॥

विश्पतीवेति च ॥ २४ ॥

विश्पतीवेत्येतच्च पदं प्रागुक्ता पश्चात्पदावृत्तिः कर्त्तव्या । वेष्टकइत्यर्थः । यथा (२) आ विश्पतीव । विश्पतीऽइवेति विश्पती । इव । एतत्पदमस्यावधेर्बहिरन्तः प्रागुक्तिरुच्यते ॥

स्वरश्छकारे चकारेण सर्व्वत्र ॥२५॥

स्वरो व्यवधीयते छकारे प्रत्यये परभूते चकारेणागामिकेन सर्वत्र संहितायां पदे च । यथा (३) अच्छा वदामसि । (४) यच्छा नः शर्म्म सप्रथाः । पदेषु

(१) एतानि पूर्वोक्ततृतीयाध्यायस्थानि सूत्राणि बोध्यानि ॥

(२) ३३ । ४० ॥

(३) १६ । ४ ॥

(४) ३५ । १७ ॥

दाहरणं यथा (१) आच्छच्छन्दः । प्रच्छच्छन्दः । (२) वर्मणाच्छादयामि । संहितोदाहरणम् (३) । ककुप्छन्दः । पदाधिकारात्पदेष्वेव चकारेण व्यवधानं मा भूदिति सर्वत्र ग्रहणात्संहितापदक्रमेष्वपि भवति (४) ॥

यस्यातिहायसहेति न ॥ २६ ॥

यस्य अतिहाय सह इत्येतैः पदैरुपहितः स्वरः छकारे प्रत्यये न चकारेण व्यवधीयते । यस्य यथा (५) यस्य छाया । अतिहाय यथा (६) अतिहाय छिद्रा गात्राणि । सह यथा (७) सह स्तोमाः सह छन्दसः ॥

विश्वाऽऊष्मान्तं परिद्विषस्त्वं त्वां यदयो विराजत्त्यनिराऽअवीवृधन्नपरिष्टाः सुक्षितयऽ आशाऽ ओ-

---

(१) १५ । ५ ॥

(२) १७ । ४६ ॥

(३) १५ । ४ । एतान्युदाहरणानि पदपाठाद्बोध्यानि ॥

(४) चकारेणेत्येकवचननिर्देशात्संयोगरूपं द्वित्वं भवतीति ज्ञेयम् । पुनर्द्वित्वं तु 'स्वरात्संयोगादि'रित्यनेन वक्ष्यमाणसूत्रेण प्राप्तं परन्तु न "सवर्णे" इति निषेधात् ॥

(५) २५ । ११ ॥

(६) २५ । ४१ ॥

(७) ३४ । ४८ ॥

षधीराभाह्यमीवा हि मायास्तेऽ सीतेषु ॥ २७ ॥

विश्वा इत्येतत्पदं ऊष्मान्तं भवति परिद्विषादिषु प्रत्ययेषु । परिद्विषशब्दे यथा (१) येन विश्वाः परिद्विषः । त्वं यथा (२) विश्वास्त्वमग्रजाऽउपावरोह । त्वां यथा (३) विश्वास्त्वामग्रजाऽ उपावरोहन्तु । यद्वजयो यथा (४) विश्वा यद्वजयस्पृधः । विराजति यथा (५) धियो विश्वा विराजति । अनिरा यथा (६) व्यस्यन्विश्वाऽ अनिराः । अवीष्टधन्यथा (७) इन्द्रँविश्वाऽअवीवृधन् । परिष्ठा यथा (८) अति विश्वाः परिष्ठाः । सुक्षितयो यथा (९) विश्वाः सुक्षितयः पृथक् । आशा यथा (१०) विश्वाऽ आशाःप्र-

---

(१) ४ । २९ ॥

(२) ६ । २४ ॥

(३) तथाङ्को बोध्यः ॥

(४) १९ । ६९ ॥

(५) २० । ७७ ॥

(६) ११ । ४४ ॥

(७) १२ । ४८ ॥

(८) १२ । ७५ ॥

(९) १२ । १०७ ॥

(१०) २७ । ७ ॥

मुञ्चन् । ओषधीर्यथा (१) पृष्टो विश्वाऽओषधीराविवेश । आभाहि यथा (२) विश्वाऽ आभाहि प्रदिशश्चतस्रः । अमीवा यथा (३) विश्वाऽ अमीवाः । हिमाया यथा (४) विश्वा हि मायाः । ते यथा (५) विश्वास्ते स्पृधः श्नथयन्त । असि यथा (६) अभि विश्वाऽ असि स्पृधः । ननु 'स्वरसंस्कारयोश्छन्दसि नियम' इति स्वरसंस्कारावधिकृतौ वेदितव्यौ न चायं स्वरो न संस्कारः । अत्र हि इदमूष्मान्तं पदमिदं स्वरान्तं पदमित्येतदुच्यते । अप्रस्तुताभिधानमेतत् । उच्यते पदानां संदिह्यमानानां निश्चयो नैव दोषायेति तावत्पश्यामः । अतः साधुपदनिश्चयलक्षणमिति । अनभिज्ञस्य बोधनार्थम् ॥

पृथिव्या स्वरान्तरं सम्भवः शुक्रो मन्थी पृथिवीं परो देवेभिरित्येतेषु ॥ २८ ॥

---

(१) १८ । ६६ ॥

(२) २७ । १ ॥

(३) कारावानामुदाहरणम् ॥

(४) खाण्डिकेयशाखिनामुदाहरणम् ॥

(५) ३३ । ६१ ॥

(६) ३३ । ६० ॥ इमे ह्युदाहरणाङ्काः पदाधिकारात्पदपाठादवगन्तव्याः ॥

पृथिव्या इत्येतत्पदं स्वरान्तं भवति सम्भवादिषु पदेषु परेषु । सम्भव यथा (१) पृथिवी मा विभ्रत पृथिव्या सम्भवं । शुक्री यथा (२) सञ्जृम्भमानो दिवा पृथिव्या शुक्रः । मन्थी यथा (३) सञ्जृम्भमानो दिवा पृथिव्या मन्थी । पृथिवीं यथा (४) पृथिव्या पृथिवीम् । परो देवेभिर्यथा (५) पृथिव्या परो देवेभिः । स्वरान्तमिति किम् । (६) नाभा पृथिव्याऽ समिधाने ॥

च विश्वा वो ब्रह्म विश्वा हरी युक्तास्ते शफानां जजान नु कमित्येतेष्विमा ॥ २९ ॥

च विश्वादिषु प्रत्ययेषु परेषु इमा इत्येतत्पदं स्वरान्तं भवति । च विश्वा यथा (७) इमा च विश्वा भु-

(१) ४ । १३ ॥
(२) ७ । १२ ॥
(३) ७ । १७ ॥
(४) १५ । ६ ॥
(५) १७ । २६ ॥
(६) ११ । ७१ । इमान्युदाहरणान्यपि पदपाठाज्ज्ञातव्यानि ॥
(७) ९ । २३ ॥

वनानि । वो यथा (१) इमा वो हव्या चकृमा जुषस्व । ब्रह्म यथा (२) इमा ब्रह्म पीपिहि सौभगाय । विश्वा यथा (३) यऽ इमा विश्वा भुवनानि जुह्वत् । हरी यथा (४) इमा हरी वहतस्ता नोऽ अच्छ । युक्ता यथा (५) सवना कृतेमा युक्ता ग्रावाणः । ते यथा (६) इमा ते वाजिन्नव मार्जनानि । शफा यथा (७) इमा शफानाᳪ सनितुः । जजान यथा (८) न तं विदाथ यऽ इमा जजान । नु कं यथा (९) इमा नु कं भुवना सीषधाम ॥

हवेमोतेमा च ॥ ३० ॥

हवेमा उतेमा एते च द्वे पदे यथागृहीतमेव स्वरान्ते भवतः । हवेमा यथा (१०) श्रुतम्मे मित्रावरुणा

(१) १९ । ५३ ॥
(२) १४ । २ ॥
(३) १७ । १६ ॥
(४) ३३ । ६९ ॥
(५) ३४ । १९ ॥
(६) २९ । १६ ॥
(७) पूर्वोक्ताङ्को बोध्यः ॥
(८) १७ । २८ ॥
(९) २५ । ४४ । इमान्युदाहरणानि पदपाठादूह्यानि ॥
(१०) २१ । ८ ॥

इवेमा । उतेमा यथा (१) विश्वकर्म्मन्नुतेमा ॥

विष्णो ते बभूव नासत्त्या भिषजा नऽआवोढं या देवा हविषो नो मृडातो नोऽअच्छ विमुञ्चेत्येतेषु ता ॥ ३१ ॥

विष्णो इत्यादिषु प्रत्ययेषु परेषु ता इत्येतत्पदं स्वरान्तं भवति । विष्णो यथा (२) ता विष्णो पाहि । ते यथा (३) सर्वा ता ते ब्रह्मणा सूदयामि । बभूव यथा (४) परि ता बभूव । नासत्त्या यथा (५) ता नासत्त्या सुपेशसा । भिषजा यथा (६) ता भिषजा सुकर्म्मणा । नऽआवोढं यथा (७) ता नऽआवोढमश्विना । या देवा यथा (८) इति ता या देवा दे-

(१) १७ । २० ॥
(२) २ । ६ ॥
(३) २५ । ४० । अयमुदाहरणाङ्कः संहितापाठाद्बोध्यः ॥
(४) १० । २० ॥
(५) २० । ७४ ॥
(६) २० । ७५ ॥
(७) २० । ८३ ॥
(८) २१ । ५७ ॥

वदानानि । हविषो यथा (१) स्रुचेव ता हविषोऽअ-ध्वरेषु । नो ग्रभातो यथा (२) ता नोऽग्रभा तऽइह-स्थ । अच्छ यथा (३) इमा हरी ऽवहतस्ता नोऽअ-च्छ । विमुञ्च यथा (४) नियुद्भिर्वायविह ता विमु-ञ्च ॥

ता ता च ॥ ३२ ॥

एतौ च ता ता शब्दौ पदावयवभूतौ स्वरान्तौ भव-तः । यथा (५) ता ता पिण्डानां प्रजुहोम्यग्नौ ॥

धिष्ण्या व्वरिवो व्विदं धिष्ण्या युवमिति च ॥ ३३ ॥

एतौ च यथागृहीतौ धिष्ण्याशब्दौ स्वरान्तौ भव-तः । यथा (६) धिष्ण्या व्वरिवो व्विदम् । यथा (७) तदश्विना शृणुतं धिष्ण्या युवम् । इतिशब्दः पदा-

---

(१) २५ । ३८ ॥

(२) ३३ । ५५ ॥

(३) ३३ । ६९ ॥

(४) २७ । २२ । इमे ह्युदाहरणाङ्काः पदपाठादवगन्तव्याः ॥

(५) २५ । ४२ ॥

(६) २० । ७४ ॥

(७) २५ । १५ । अत्राङ्काः पदपाठाद्बुधैर्ज्ञेयाः ॥

धिकारप्रकरणसमाप्तिज्ञापनार्थः ॥

भाव्युपधश्च रिह्विसर्ज्जनीयः ॥ ३४ ॥

भावी उपधाभूतो यस्य स भाव्युपधः कोऽसौ विसर्जनीयः । रिह्विसर्जनीयश्च 'विसर्ज्जनीयो रिफित' इत्यतश्चारभ्य यः परिभाषितः एतौ विसर्जनीयावधिकृतौ वेदितव्यौ । अधिकारसूत्रमेतत् (१) ॥

रेफे लुप्यते दीर्घश्चोपधा ॥ ३५ ॥

रेफे प्रत्यये लुप्यते विसर्जनीय उभयरूपोऽपि भाव्युपधो रिह्विसर्जनीयश्च उपधाभूतश्च स्वरो दीर्घमापद्यते । भाव्युपधो भवति यथा (२) रुरुः रौहुः । रुरूरौहुः कूर्यिः । (३) मतिभिः रिहन्ति । मतिभी रिहन्ति । रिह्विसर्जनीयो भवति यथा (४) प्रातः रात्रिः । प्राताराात्रिः । (५) पुनः रक्तम् । पुनारक्तम् । रूपोदाहरणमेतत् । उपरितनसूत्रे प्रयोजनं भविष्यति । भावीत्यादिकिम् । (६) परि नो रुद्रस्य ॥

---

(१) इदं सूत्रं यदत्र स्मृतं तत्पूर्वमुक्तम् ॥

(२) २४ । ३९ ॥

(३) ७ । १६ ॥

(४) इदमुदाहरणं लौकिकम् । जटायामुदाहरणानि भवन्ति ॥

(५) इदमप्युदाहरणं पूर्वोक्तवद्बोध्यम् ॥

(६) १६ । ५० । इति प्रत्युदाहरणमपि 'ग' 'घ' पुस्तके नास्तीति ॥

रेफꣳ स्वरघौ ॥ ३६ ॥

रेफमापद्यते उभयरूपो विसर्जनीयः स्वरेषु परभूतेषु घिसञ्ज्ञकेषु च परभूतेषु । स्वरे भवति यथा (१) अग्निः एकाक्षरेण । अग्निरेकाक्षरेण । (२) प्रातः अग्निम् । प्रातरग्निम् । प्रातः इन्द्रम् । प्रातरिन्द्रम् । घिसञ्ज्ञकेषु भवति यथा (३) विचक्षुः वनेषु । विचक्षुर्वनेषु । (४) सवितः वामम् । वाममद्य सवितर्वामम् । भावीत्यादिकिम् । दिवो मूर्द्धा । (५) ॥

कण्ठ्यपूर्व्वो यकारमरिफितः ॥ ३७ ॥

अवर्णः कण्ठ्यः अवर्णपूर्वो विसर्जनीयो अरिफितो यकारमापद्यते । स्वरेषु यथा (६) स्विन्नः आदित्यानाम् । स्विन्नयादित्यानामित्येवं स्थिते यवयोः पदान्तयोरित्यादिना यकारलोपः । ततः स्विन्नऽआदित्या-

---

(१) ९ । ३१ ॥

(२) ३४ । ३४ ॥

(३) ३ । १५ ॥

(४) ८ । ६ ॥

(५) इति प्रत्युदाहरणं 'ग' 'घ' पुस्तके नास्तीति ज्ञेयम् ॥ १८ । ५४ । इमान्युदाहरणानि संहितायां बोध्यानि ॥

(६) २४ । ३९ ॥

नामिति रूपं सिद्ध्यति । (१) इन्द्रः एकम् । इन्द्र एकं सूर्य्यम् । (२) याः ओषधीः । या ओषधीः पूर्वाः । (३) याः अफलाः । या अफला अपुष्पाः ॥

लोपन्धौ ॥ ३८ ॥

अरिफितः कण्ठ्यपूर्वो विसर्ज्जनीयो लोपमापद्यते धिसञ्ज्ञकेषु प्रत्ययेषु । यथा (४) अयक्ष्माः मा । अयक्ष्मा मा वः । (५) शततेजाः वायुः । शततेजा वायुरसि । अरिफित इति किम् । (६) मा ह्वार्मा ते यज्ञपतिः । (७) ॥

भूमेश्चाकारेऽपृक्ते ॥ ३८ ॥

भूमिशब्दसम्बन्धी विसर्ज्जनीयो लुप्यते । आकारेऽपृक्तसञ्ज्ञके परे । यथा (८) भूमिः आददे । दिवि सद्भूम्याददे । आकारेऽपृक्ते इति किम् । (९) भूमि-

(१) १७ । ९२ ॥
(२) १२ । ७५ ॥
(३) १२ । ८९ ॥
(४) १ । १ ॥
(५) १ । २४ ॥
(६) १ । २ ॥
(७) लोपशास्त्रस्य बलवत्त्वान्न पूर्वसूत्रेण यकारः ॥
(८) २६ । १६ ॥
(९) २३ । १० ॥

रा वर्पनम्महत् ॥

यकाराकारयोर्ज्जास्पत्त्ये पदे ॥४०॥

जास्पत्त्ये पदे यकारस्य च लोपो भवति । जायास्पत्त्यमिति प्राप्ते यकाराकारयोर्ल्लोपे कृते जास्पत्त्यमिति रूपं भवति । यथा (१) सञ्जास्पत्त्यꣳ सुयममा कृणुष्व । (२) ॥

अलोपो माँस्पचन्याः ॥४१॥

अकारलोपो माँस्पचनीशब्दे द्रष्टव्यः । माँसपचनी इति प्राप्ते यथा (३) यन्नीक्षणं माँस्पचन्याः । (४) ॥

सर्व्वो अकार ओकारम् ॥ ४२ ॥

सर्वः अकारः ओकारमापद्यते । सर्वग्रहणात्सोपधो विसर्ज्जनीयो धिसञ्ज्ञकेषु प्रत्ययेषु । यथा (५)

---

(१) ३३ । २२ ॥

(२) अत्र यकाराकारयोर्लोपः सकारागमश्च निपात्यते ॥

(३) २५ । २६ । माँसपचनीयामिति 'ग' पुस्तकपाठः ॥

(४) अत्र ऋक्प्रातिशाख्यसूत्रेण "माँस्पचन्यामाँश्च स्वेमाँश्चतोश्च" इत्यनेन एतेषां पदानामादिस्वरोऽनुनासिको वेदितव्यः संहितायां पदे च । अतोऽनुस्वाराभावाद् "नुस्वारस्यꣳ मित्यादेशः शषसहरेफेषु" इत्यनेन वक्ष्यमाणप्रातिशाख्यसूत्रेण ꣳकारादेशो न भवतीति बुधैर्बोध्यम् ॥

(५) १ । १ ॥

अघशर्ठ॑ंसः ध्रुवाः । अघशर्ठ॑ंसो ध्रुवाः (१) मातरिश्वनः घर्म्मः । मातरिश्वनो घर्म्मः । अरिफित इति किम् । (२) पुनर्म्मनः । (३) ॥

अकारे च ॥ ४३ ॥

अकारे च प्रत्यये सर्वो अकार ओकारमापद्यते । यथा (४) वेदः असि । वेदोऽसि । (५) अग्ने गुवोऽअग्ने पुवः । अरिफितइति किम् । (६) पुनरग्ने । (७) पुनरायुः ॥

एषो ह च ॥ ४४ ॥

एष इत्ययं विसर्ज्जनीय ओकारमापद्यते ह इत्येतस्मिन्पदे प्रत्यये । अवश्यमत्र 'एष चे' त्यनेन एषशब्द-

(१) १ । २ ॥

(२) ४ । १५ ॥

(३) अस्मिन् सूत्रे अकारग्रहणान्न दीर्घोपधग्रहणम् । ननु पूर्वेषु लोपशास्त्रस्य बलवत्वान्नायं विधिः । शृणु पूर्वविधेरप्राप्तत्वाद्विशेषावगमाच्च । न लोपशास्त्रस्य बलवत्त्वं किन्तूत्तरसूत्रस्य बलवत्त्वं बोध्यम् ॥

(४) २ । २१ । 'एदोद्भ्यां पूर्व्वमकार' इत्याकारस्य पूर्वरूपता बोध्याऽथ च 'एदोद्भ्यामकारो लुगभिनिहितः' इति प्रथमाध्यायस्थेन चतुर्दशोत्तरैकशततमेन सूत्रेणाभिनिहितः स्वरो भवतीति सुधीर्ज्ञेयम् ॥

(५) १ । १२ ॥

(६) १२ । ९ ॥

(७) ४ । १५ ॥

स्य व्यञ्जनमात्रे विसर्ज्जनीयस्त्रोपो विहितः तेनात्र ओ-कारो निपात्यते । यथा (१) एषो ह देवः' । (२) ॥

स्वो रुहावहश्चरात्र्याम् ॥ ४५ ॥

स्वरित्ययं विसर्जनीयो रुहौ प्रत्यये ओकारमापद्यते । अहरित्ययं च रात्रिप्रत्यये । यथा । (३) स्वः रुहाणाः । स्वो रुहाणाऽ अधिनाकम् (४) स्वः रोहाव । जायऽएहि स्वो रोहाव (५) अहः रात्रे । श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे । (६) अहो रात्रेऽ ऊर्व्वष्ठीवे । (७) अहो रात्रास्ते कल्पन्ताम् ॥

स्वरे भाव्यन्तस्थाम् ॥ ४६ ॥

स्वरेऽसवर्णे प्रत्यये भावी अन्तस्थामापद्यते । यथा (८) त्रि अम्बकम् । त्र्यम्बकँ यजामहे । (९) वाजी

(१) ३२ । ३ ॥

(२) अस्मिन्सूत्रे हकारेतिग्रहणं किमर्थं 'स्यएषचे'त्यनेनसूत्रेण एतत्सम्बन्धी विसर्जनीयो व्यञ्जनमात्रे लोपमेति तन्मा भूदेतदर्थं हकारग्रहणमित्येतच्छास्त्रज्ञैर्ज्ञेयम् ॥

(३) ११ । २२ ॥

(४) इदमुदाहरणं शाखान्तरीणम् ॥

(५) ३१ । २२ ॥

(६) १८ । २३ ॥

(७) २७ । ४५ ॥

(८) ३ । ५९ ॥

(९) ११ । ४४ ॥

अर्वन् । आशुर्भवऽव्वाज्यर्व्वन् । (१) ह्व अन्नः । ह्वन्नः सर्पिरासुतिः । (२) वीडु अङ्गः । स्थिरो भव व्वीडुङ्गः ॥

सन्ध्यक्षरमयवायावम् ॥ ४७ ॥

ए ओ ऐ औ एतानि च यथाक्रमं स्वरे प्रत्यये अय् अव् आय् आव् इत्येवमापद्यते । यथा (३) इडे आ इहि । इडऽएहि । (४) कृशानो एते । कृशानवेते । (५) सरस्वत्यै अग्रजिह्वम् । सरस्वत्याऽअग्रजिह्वम् । (६) हिरण्यरूपौ उषसः । हिरण्यरूपाऽउषसः । अत्र च 'यवयोः पदान्तयो'रित्यादिना यकारवकारलोपः । 'न वकारस्यासस्थानऽएकेषामिति' न वकारस्य लोपः ।

उदात्तस्यान्तस्थभावे स्वरितं परमनुदात्तम् ॥ ४८ ॥

(१) ११ । ७० ॥
(२) ११ । ४४ ॥
(३) ३ । २७ ॥
(४) ४ । २७ ॥
(५) २५ । १ ॥
(६) १० । १६ ॥

उदात्तस्य स्वरस्थान्तस्थापत्तौ सत्यां परं यदनुदात्त-मक्षरं तत्स्वरितं भवति । (१) त्रि अम्बकम् । त्र्यम्ब-कम् । (२) देवी एतु । देव्येतु सूनृता । (३) द्रु अ-न्नः । द्र्वन्नः । (४) नु इन्द्र । योजान्न्विन्द्र । ननु 'यु-वर्णौ यवौ क्षैप्र' इत्यत्र स्वरितो विहितः पुनः किम-र्थमिदमुच्यते 'स्वरितं परं परमनुदात्तमिति' द्वयोः स्वरयोः सन्धावयं स्वरितो निगद्यते तत्र न ज्ञायते किं पूर्वस्य स्वरस्य स्थाने स्वरित उत उत्तरस्य तत्र यत्प-रमक्षरं अनुदात्तं तत्स्वरितं भवतीति सूत्रारम्भार्थः ॥

कण्ठ्य ऋकारे ह्रस्वम् ॥ ४९ ॥

कण्ठ्यः स्वरः ऋकारे प्रत्यये ह्रस्वस्वरमापद्यते । यथा (५) विश्वकर्मा ऋषिः । विश्वकर्मऽऋषिः । (६) स्वाहा ऋषभम् । स्वाहऽ ऋषभमिन्द्राय । (७) येन ऋषयः । येनऽऋषयस्तपसा । (८) यत्र ऋष-

(१) ३ । ५९ ॥
(२) ३३ । ८९ ॥
(३) ११ ॥ ७० ॥
(४) ३ । ५२ ॥
(५) १३ । ५८ ॥
(६) २१ । ४० ॥
(७) १५ । ४९ ॥
(८) १८ । ५२ ॥

यः । युवऽऋषयो जम्मुःऽ । ह्रस्वस्य स्थाने ह्रस्वो विधीयमानोऽन्यस्याः संहिताया निवृत्तिं करोति विवृत्तिसंहितैवात्र भवति न स्वरसंहिता ॥

अथैकमुत्तरश्च ॥ ५० ॥

अथानन्तरमुत्तरो वर्णः चशब्दात्पूर्वश्च एकं वर्णं विकारभूतमापद्यते, इत्येतदधिकृतं वेदितव्यम् ॥

सिम्० सवर्णे दीर्घम् ॥ ५१ ॥

'सिमादितोऽष्टौ स्वराणा'मित्युक्तम् । सिम् सञ्ज्ञकः स्वरः सवर्णे स्वरे प्रत्यये परे पूर्व उत्तरश्च एकं वर्णं दीर्घमापद्यते । यथा (१) प्र अर्प्पयतु । प्रार्प्पयतु । (२) तव अयम् । तवायम् । (३) नासत्या अश्वावत् । नासत्याश्वावत् । (४) स्रुचि इव । स्रुचीव घृतम् । (५) हि इम् । वि हीमिद्धःऽ । (६) अनु उत् । अनूज्जेषम् ॥

अनुनासिकवत्यनुनासिकम् ॥५२॥

---

(१) १ । १ ॥

(२) २६ । २३ ॥

(३) २० । ८१ ॥

(४) २० । ७९ ॥

(५) १२ । ६ ॥

(६) २ । १५ ॥ एतत्सूत्रोदाहरणेषु स्थानैक्ये प्रयत्नभेदेऽपि 'सवर्णवर्णे'त्यनेन ज्ञापकेन दीर्घत्वम् ॥

अनुनासिकवत्येकीभावे पूर्वस्य परस्य एकमनुनासिकमापद्यते । यथा (१) उप अꣳशुः । उपाꣳशुःऽ । (२) उप अꣳशुना । उपाꣳशुना समंस्कृतत्त्वम् । 'अनुनासिका चोपधे'त्यादिना एकस्मिन्पक्षे उपधाऽनुनासिक्यं एकस्मिन्पक्षे अनुस्वारो विहितः । तत्र यस्मिन्पक्षे उपधाऽनुनासिक्यं तमधिकृत्योच्यते । एतदनुनासिकवत्यनुनासिकमिति ॥

कण्ठ्यादिवर्णं एकारम् ॥ ५३ ॥

कण्ठ्यात्पर इवर्णः पूर्वस्वरस्य परस्य कण्ठ्य एकमेकारं वर्णमापद्यते । यथा (३) स्वरुण इह । स्वरुणेह बोधि । (४) आ इदम् । एदमगन्म ॥

उवर्णं ओकारम् ॥ ५४ ॥

कण्ठ्यादुत्तरे उवर्णे कण्ठ्य उवर्णस्यैकमोकारमापद्यते । यथा (५) त्वा ऊर्ज्जे । त्वोर्ज्जे । (६) त्वा उत्तरतः । मित्रावरुणौ त्वोत्तरतःऽ ॥

---

(१) १५ । १९ ॥
(२) १७ । ८९ ॥
(३) १८ । ४९ ॥
(४) ४ । १ ॥
(५) १ । १ ॥
(६) २ । ३ ॥

समुद्रस्येमँ स्त्वेमँ स्त्वोद्मानिति च ॥ ५५ ॥

'सन्ध्यक्षर ऐकारौकारा'विति वक्ष्यति तस्य पुरस्तादपवादभूतउत्तरसन्ध्यक्षरस्वरूप एकादेशो निपात्यते । यथा (१) समुद्रस्य एमन् । समुद्रस्येमन् । (२) त्वा एमन् । अपान्त्वेमन् (३) त्वा ओद्मन् । अपान्त्वोद्मन् (४) ॥

एजत्योजोरेकेषाम् ॥ ५६ ॥

अवर्णात्पूर्वस्मादेजत्योजोः प्रत्यययोरेकेषामाचार्याणाम्मतेन उत्तरसवर्ण आदेशो भवति । यथा (५) न एजति । नेजति । ओजः यथा (६) सह ओजः । व्यागोजः सहोजः । एकेषामिति किम् । (७) तदेजति तन्नैजति । व्यागोजः सहौजः ॥

---

(१) १३ । १७ ॥

(२) १३ । ५३ ॥

(३) १३ । ५३ ॥

(४) किन्नाम निपातनत्वम् । अन्यथा प्राप्तस्यान्यथोच्चारणं निपातनमिति ॥

(५) ४० । ६ ॥

(६) ३६ । १ ॥

(७) पूर्वोक्तमुदाहरणद्वयं ज्ञेयम् ॥

सन्ध्यक्षर ऐकारौकारौ ॥ ५७ ॥

अवर्णः सन्ध्यक्षरे प्रत्यये पूर्व उत्तरश्च एकमक्षरमापद्यते । ऐकारम् । औकारञ्च । अत्र चत्वारि सन्ध्यक्षराणि द्वावेतौ विकारौ ऐकारौकारौ तत्र यथासम्भवा'द्विकारौ यथासन्न'मिति एकारे ऐकारे च प्रत्यये ऐकारो भवति । ओकारे औकारे च प्रत्यये औकारो भवति । एकारे भवति यथा (१) स्वाहा एकताय । स्वाहैकताय । ऐकारे भवति यथा (२) इन्द्राय ऐन्द्रम् । इन्द्रायैन्द्रम् । ओकारे भवति यथा (३) इन्द्र ओजिष्ठ । इन्द्रौजिष्ठ । औकारे भवति यथा (४) प्र औक्षन् । प्रौक्षन् (५) ॥

वाहौ च स्वरभूते ॥ ५८ ॥

वाहौ च प्रत्यये स्वरभूते पूर्वः कण्ठ्य उत्तरश्च वाहेः सम्बन्धी उवर्ण एकमौकारमापद्यते । यथा (६) तुर्य्य ऊहौ । तुर्य्यौहौ । (७) पष्ठ ऊहौ । पष्ठौहौ । स्वर-

(१) २२ । ३४ ॥

(२) १९ । १८ ॥

(३) ८ । ३९ ॥

(४) ३१ । ९ ॥

(५) 'सन्ध्यक्षरमेकारौकारौ' इति 'ख' पुस्तकपाठः ॥

(६) १८ । २६ ॥

(७) १८ । २७ ॥

भूत इति किम् । (१) पष्ठवाट् च मे । 'उवर्ण ओकार' मित्यस्यायमपवादः ॥

आरमृकारोऽपृक्तात् ॥ ५९ ॥

अपृक्तात्पदात्पर ऋकार आरमापद्यते सहापृक्तेन । यथा (२) आ ऋत्यै । आर्त्यै परिविक्तम् । अत्र स्वरो रेफस्तकारमारोहति (३) ॥

ऌकारश्चाल्कारम् ॥ ६० ॥

इदं सूत्रं केचिन्न पठन्ति व्यर्थत्वात् । ऌकारश्चाल्कारमापद्यते । आ ऌकारः । आल्कारः ॥

एदोद्भ्यां पूर्व्वमकारः ॥ ६१ ॥

एकारौकाराभ्यां पर अकारः पूर्व्वरूपमापद्यते । यथा (४) ते अवन्तु । तेऽवन्त्वस्मान् । (५) ते अप्सरसाम् । तेऽप्सरसाम् । (६) वेदः असि । वेदोऽसि ।

---

(१) १८ । २७ ॥

(२) ३० । ९ ॥

(३) 'कण्ठ्य ऋकारे ह्रस्व'मित्यस्यापवादः । यस्या ऽवश्यं प्राप्तौ सत्यां यो विधिरारभ्यते स तस्यापवादः ॥

(४) १८ । ५७ ॥

(५) २४ । ३७ ॥

(६) २ । २१ ॥

(१) सुपः असि । सुपोऽसि । (२) 'सर्वो अकार ओकारम्' । 'अकारे चे'त्यनेन च ओकारः (३) ॥

तौ चेदुदात्तावनुदात्ते स्वरितौ ॥ ६२ ॥

तौ यदि एकारौकारौ उदात्तौ भवतः तदाऽनुदात्ते अकारे परे स्वरितौ भवतः । यथा (४) वेदो असि । वेदोऽसि । (५) सुपो असि । सुपोऽसि । (६) ते अप्सरसाम् । तेऽप्सरसाम् । 'एदोद्भ्यामकारो लुगभिनिहित'इति स्वरितत्वं विहितमेव । इह त्वपवादार्थं तदुच्यते (७) ॥

न देशे भवति ॥ ६३ ॥

देशे इत्ययमेकारः अभवदित्येतस्मिन्प्रत्यये न स्वरितो भवति । यथा (८) देशे अभवत् । सो देशेऽभ-

---

(१) २ । २ ॥

(२) सर्वोऽकार ओकारमिति 'क' पुस्तकपाठः ॥

(३) एतत्प्रकरणे यानि विसर्गान्तानि पदानि तेषां सर्वो अकार ओकारमित्यनुवर्त्तमाने अकारे चेत्यनेन ओकारान्तत्वम् । कारग्रहणेन तत्कालमात्रस्य ग्रहणं ज्ञातव्यमिति विवेकः ॥

(४)

(५)

(६) उदाहरणत्रयस्य चिन्हस्योदाहरणत्रयं पूर्वोक्तं ज्ञातव्यमिति ॥

(७) तदनु गृह्यन्ते इति 'ख' पुस्तकपाठः ॥

(८) ३४ । ११ ॥

वत्सरित् ॥

गाहमानः शिवो भरन्तो द्वेषोभ्यो जम्भयन्तो व्वाजे व्वाजजितो मदन्तः शोचेऽवसे सुषुवे ज्ज्योते सुपर्णो व्वीरुधः सुवीरो धातवे सूनवे द्रूणानऽआशवो व्वहतः सङ्क्रन्दनो बाहवो युद्ध्योऽद्रुहः ॥ ६४ ॥

एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । अभिनिधानं च पूर्वरूपता । गाहमानो यथा (१) गाहमानोऽद्रयः । शिवो यथा (२) अर्हिंठ० सन्नः शिवोऽतीहि । भरन्तो यथा (३) भरन्तोऽस्मायेव तिष्ठते । द्वेषोभ्यो यथा (४) द्वेषोभ्योऽन्यकृतेभ्यः । जम्भयन्तो यथा (५) जम्भयन्तोऽहिम् । व्वाजे यथा (६)

(१) १७ । ३९ ॥
(२) ३ । ६१ ॥
(३) ११ । ७५ ॥
(४) ५ । ३५ ॥
(५) ९ । १६ ॥
(६) ९ । १८ ॥

र्वाजेवाजेऽवत । वाजजितो यथा (१) वाजजितोऽहं-
नः । मदन्तो यथा (२) मदन्तोऽग्ने मा ते । शोचे य-
था (३) भद्रशोचेऽपूपम् । अवसे यथा (४) अवसे-
ऽग्निमन्वारभामहे । सुषुवे यथा (५) सुषुवेऽग्ने-
सोमम् । ज्योते यथा (६) ज्योतेऽदिति सरस्वति ।
सुपर्णो यथा (७) सुपर्णोऽसि गरुत्मान् । वीरुधो
यथा (८) वीरुधोऽस्यैसन्द्वत्त । सुवीरो यथा (९)
सुवीरोऽवीरहा । धातवे यथा (१०) सरस्वति तमिह
धातवेऽकः । सूनवे यथा (११) सूनवेऽग्ने सूपायनो
भव । दूणानो यथा (१२) दूणानोऽसत्तासि । आशवो

---

(१) ९ । १३ ॥
(२) ११ । ७५ ॥
(३) १२ । २६ ॥
(४) ९ । २६ ॥
(५) ९ । २३ ॥
(६) ८ । ४३ ॥
(७) १२ । ४ ॥
(८) १२ । ९४ ॥
(९) ४ । ३७ ॥
(१०) ३८ । ५ ॥
(११) ३ । २५ ॥
(१२) १३ । ९ ॥

यथा (१) आशवोऽस्तम् । त्वहतो यथा (२) त्वहतोऽप्रतिधृष्टशवसम् । सङ्क्रन्दनो यथा (३) सङ्क्रन्दनोऽनिमिषः । बाहवो यथा (४) बाहवोऽनाधृष्या यथाऽसथ । अयुध्यो यथा (५) अयुध्योऽस्माकꣳ सेनाः । अद्रुहो यथा (६) अद्रुहोऽनमीवाऽदूषो मही । ननु 'एङोद्भ्यां पूर्व्वमकार' इत्यनेनैवाभिनिहितः सिद्धः किमर्थं गाहमानादिष्वुत्तरस्याकारस्याभिधानमुच्यते । नैवाभिनिहितः सिद्धः 'प्रकृतिभाव ऋच्च' इति प्रकृतिभावमृच्चु वक्ष्यति तस्यायं पुरस्तादपवादः ॥

त्वोऽहꣳ सोऽहꣳ सोऽस्माकं तेऽभिगरो वोऽवाचि ॥ ६५ ॥

एते द्विपदा यथागृहीतमेवाभिनिधीयन्ते । वोऽहं यथा (७) तेषाँव्विष्टिम्प्रियाणां वोऽहम् । सोऽहं यथा

(१) १५ । ४१ ॥
(२) ८ । ३५ ॥
(३) १७ । ३३ ॥
(४) १७ । ४६ ॥
(५) १७ । ३९ ॥
(६) १२ । ५० ॥
(७) २ । ४ ॥

(१) सोऽहँव्वाजम् । सोऽस्माकं यथा (२) उपस्त्तिर-स्तु सोऽस्माकम् । तेऽभिगरो यथा (३) अनुष्टुप्ते-ऽभिगराः । अर्व्वाची यथा (४) आवोऽर्व्वाची सुम-तिः ॥ (५) ॥

येऽन्नात्रयोः ॥ ६६ ॥

ये इत्येतस्मात्परयोः अन्नात्रसम्बन्धी अकारोऽभि-निधीयते । अन्न यथा (६) येऽन्नेषु । अत्र यथा (७) येऽत्र स्थ पुराणा ये च नूतनाः ॥

अविद्याऽसम्भूत्योश्च ॥ ६७ ॥

अविद्या असम्भूतिसम्बन्धी अकारोऽभिनिधीयते । चशब्दात् ये इत्येतस्मात्परः । अविद्या यथा (८) ये ऽविद्यामुपासते । असम्भूतिं यथा (९) येऽसम्भूतिमु-

(१) १८ । ३५ ॥

(२) १२ । १०१ ॥

(३) ८ । ४७ ॥

(४) ८ । ४ गाहमान इत्यारभ्य यत्पूर्वरूपतोक्ता तत्र लुप्ताकारलेसनेनाभिनिधानं ज्ञातव्यम् । (क) पुस्तके अभिनिधानश्च पूर्वरूपता इति पाठोऽपपाठो ज्ञातव्यः ॥

(५) पाणिनीयसूत्रं पूर्वरूपविधायकं सामान्यमतो विशेषाभिनिधायकमिदम् ॥

(६) १६ । ६२ ॥

(७) १२ । ४५ ॥

(८) ४० । १२ ॥

(९) ४० । ९ ॥

पासते । इत्येतयोरिति किम् (१) अथो येऽअस्य सत्वानः ॥

उपस्थेऽन्तस्तेभ्योऽकरम् ॥ ६८ ॥

एतौ च द्विपदौ यथागृहीतमेवाऽभिनिधीयेते (२) । उपस्थेऽन्तो यथा (३) घोषे मातुर्यथोपस्थेन्तरस्याम् । तेभ्योऽकरं यथा (४) अहन्तेभ्योऽकरन्नमः ॥

नमोऽस्त्वसौत्रामण्याम् ॥ ६९ ॥

नमोऽस्तु एतच्च द्विपदं यथागृहीतमेवाभिनिधीयते । सौत्रामण्यां चेन्न भवति यथा (५) नमोऽस्तु सर्पेभ्यः । (६) असौत्रामण्यां किम् । (७) नमोऽअस्त्वद्य ये ॥

विश्वेऽग्रे विशो रायोऽनग्नौ ॥ ७० ॥

विश्वे इत्यादिभ्य एकारौकारेभ्यः परोऽकारोऽभि-

(१) १६ ॥ ८ ॥

(२) एते द्विपदे इति 'ख' पुस्तकपाठः ॥

(३) १२ । ३९ ॥

(४) १६ । ८ ॥

(५) १३ । ६ ॥

(६) स्वाद्वीन्त्वेत्यारभ्याध्यायत्रयं सौत्रामणिसञ्ज्ञकम् ॥

(७) १९ । ६८ ॥

निधीयतेऽग्नौ चेन्न भवति (१) युञ्जानः प्रथममित्यत आरभ्य स्वाहीन्त्वेति यावदग्निरुच्यते । विश्वे यथा (२) विश्वेऽसुहुर्म्मम् । अग्रे यथा (३) तेऽअग्रेऽश्व-मयुञ्जन् । विष्णो यथा (४) अथा नऽइन्द्रऽइद्विष्णोऽस-पत्नाः । रायो यथा (५) त्वष्टा सुदत्त्रो विदधातु रायोऽनु । अनग्नाविति किम् । (६) विश्वेऽअद्य मरुतः । (७) मयि गृह्णाम्यग्रेऽअग्निम् । (८) भवा पायुर्विष्णोऽअस्याः । (९) अस्मे रायोऽअमर्त्य ॥

सूर्य्योऽग्नेऽभौ ॥ ७१ ॥

सूर्यो अग्ने इत्येताभ्यां परः अभिशब्दस्याकारोऽभिनिधीयते । सूर्यो यथा (१०) सूर्य्योऽभिताप्सीत् । अ-

---

(१) युञ्जानः प्रथममित्येकादशाध्यायमारभ्याष्टाध्याय्यग्निचयनसञ्ज्ञकास्तान्मन्त्रान्वर्जयित्वाऽभिनिधानं भवति ॥

(२) ८ । १९ ॥

(३) ९ । ७ ॥

(४) ७ । २५ ॥

(५) ८ । १४ ॥

(६) १८ । ३१ ॥

(७) १३ । १ ॥

(८) १३ । ११ ॥

(९) १२ । १०९ ॥

(१०) १३ । ३० ॥

ग्ने यथा (१) अग्नेऽभ्यावर्त्तिन् । अभाविति किम् । (२) चक्षोः सूर्य्योऽअजायत । (३) अग्नेऽअच्छा व्वदेह नः ॥

रिषो यवसे पुरुप्रियोऽन्नपतेऽर्ण-वे ॥ ७२ ॥

एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । रिषो यथा (४) मा सुरिषोम्व । यवसे यथा (५) प्रोथद्श्वो न यवसेऽविष्यन् । पुरुप्रियो यथा (६) पुरुप्रियोऽग्ने । अन्नपते यथा (७) अन्नपतेऽन्नस्य । अर्णवे यथा (८) अर्णवेऽन्तरिक्षे भवाः ॥

ऽयपरे च ॥ ७३ ॥

एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । स चे-

(१) १२ । ७ ॥
(२) ३१ । १२ ॥
(३) ९ । २९ ॥
(४) ११ । ६८ ॥
(५) १५ । ६२ ॥
(६) ११ । ७२ ॥
(७) ११ । ८३ ॥
(८) १६ । ५५ ॥

दकारो वकारपरो यकारपरो वा भवति । यथा (१) सहस्रयोजनेऽवधन्वानि । (२) तिग्मतेजोऽयस्मयम् (३) ॥

गवे मे मनसो व्वाजयन्तः सोम्यासः पाशिनो व्विदानोऽनृते मूजवतो वृष्णोऽपाको दीदिवस्त्रयस्त्रिंशो ब्रह्मणे यको रथो व्विश्वतः पादो व्वसन्तः ॥ ७४ ॥

एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । गवे यथा (४) गवेऽश्वाय । मे यथा (५) व्विष्णो मेऽङ्गानि । मनसो यथा (६) मनसोऽसि व्विलायकः । वाजयन्तो यथा (७) व्वाजयन्तोऽश्वाम । सोम्यासो यथा (८) सोम्यासोऽग्निष्वात्ताः । पाशिनो यथा

(१) १६ । ५४ ॥

(२) १२ । ६३ ॥

(३) 'प्रकृतिभाव ऋक्षु' इत्यस्यापवादभूतमिदं सूत्रं ज्ञातव्यमिति ॥

(४) ३ । ५९ ॥

(५) २० । ८ ॥

(६) २० ३४ ॥

(७) १८ । ७४ ॥

(८) १९ । ५८ ॥

(१) पाशिनोऽति धन्वेव । विदानो यथा (२) सँविदानोऽनु द्यावापृथिवी । अनृते यथा (३) अश्रद्धामनृतेऽदधात् । मूजवतो यथा (४) मूजवतोऽतीहि । वृष्णो यथा (५) त्वष्टाऽदधच्छुष्ममिन्द्राय वृष्णोऽपाकः । अपाको यथा (६) अपाकोऽचिष्टुर्व्यशसे । दीदिवो यथा (७) स नः पावक दीदिवोऽग्ने । त्रयस्त्रिंशो यथा (८) त्रयस्त्रिंशोऽस्तोताः । ब्रह्मणो यथा (९) अस्मै ब्रह्मणोऽस्मै क्षत्राय । युक्तो यथा (१०) युक्तोऽसको शकुन्तकः । रथो यथा (११) दूडभो रथोऽस्मात् । विश्वतो यथा (१२) विश्वतोऽदब्धासः । पादो यथा

---

(१) २० । ५३ ॥
(२) १९ । ५४ ॥
(३) १९ । ७७ ॥
(४) ३ । ६१ ॥
(५) २० । ४४ ॥
(६) २० । ४४ ॥
(७) १७ । ९ ॥
(८) २१ । २८ ॥
(९) ७ । २१ ॥
(१०) २३ । २३ ॥
(११) ३ । ३६ ॥
(१२) २५ । १४ ॥

(१) पादो॑ऽस्य॒ विश्वा॑ भूतानि॑ । वसन्तो यथा (२) वसन्तो॑ऽस्यासीत् ॥

अवोस्त्वग्ने गृहपतेऽभि सत्त्वानोऽहं नोऽजस्रया विमानोऽजस्रः सुतेऽश्विना नमोऽग्नये तेऽग्ने वृक्षस्य प्रथमोऽन्तस्त्तेऽन्येन ॥ ७५ ॥

एतेषां च द्विपदानां उत्तरपदादिर्यथागृहीतमेवाकारोऽभिनिधीयते । अवोऽस्तु यथा (३) मर्हि॑ त्रीणा॒मवो॑ऽस्तु । अग्ने गृहपते यथा (४) अग्ने॑ गृहपते॒ऽभि द्युम्नम् । सत्त्वानो यथा (५) अ॒स्य सत्त्वा॑नो॒ऽहम् । नोऽजस्रया यथा (६) पुरो नो॑ऽजस्रया सूर्म्या॑ यविष्ठ्य । विमानोऽजस्रो यथा (७) वि॒मानो॑ऽजस्रो घ॒र्मो

(१) ३१ । ३ ॥
(२) ३१ । १४ ॥
(३) ३ । ३१ ॥
(४) ३ । ३९ ॥
(५) १६ । ८ ॥
(६) १७ । ७४ ॥
(७) १८ । ६८ ॥

ष्कविः । सुतेऽश्विना यथा (१) तनूपा भिषजा सुतेऽश्विनोभा । नमोऽग्नये यथा (२) ब्रह्मा क्षश्च नोऽवतु । तेऽग्रं यथा (३) माता च ते पिता च तेऽग्रम् । तेग्रे वृक्षस्य यथा (४) तेऽग्रे वृक्षस्य क्रीडतः । वृक्षस्येति किम् । (५) तेऽग्रेऽश्वमयुञ्जन् । प्रथमोऽन्तो यथा (६) सुभूः स्वयम्भूः प्रथमोऽन्तः । तेऽन्ये यथा (७) महिमा तेऽन्येन ॥

पणयो जह्नीमोऽम्बिक ॥ ७६ ॥

पणयः जह्नीमः अम्बिके एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । पणयो यथा (८) अपेतो यन्तु पणयोऽसुम्नाः । जह्नीमो यथा (९) अत्त्वा जह्नीमोऽग्निवा ये । अम्बिके यथा (१०) अम्बेऽ अम्बिके-

(१) २० । ५६ ॥
(२) २३ । १३ ॥
(३) २३ । २४ ॥
(४) २३ । २५ ॥
(५) ९ । ७ ।
(६) २३ । ६३ ॥
(७) २३ । १५ ॥
(८) ३५ । १ ॥
(९) ३५ । १० ॥
(१०) २३ । १८ ॥

ऽम्बालिके ॥

नो नुमोऽदुग्धाऽइव प्रचेतसोऽश्वा-
न्नरोऽस्माकं व्वृषपाणयोऽश्वाः प्र-
दिशोऽनूदितेऽनागाऽअन्धसोऽर्चाप-
नस्य तेऽद्द्धा यज्ञियेभ्योऽमृतत्त्वं-
व्विपश्चितोऽभि जनोऽनमीवऽआयु-
वोऽनु नोऽद्य देशेऽभवद्धयुनेऽजनि-
ष्ट व्विद्मनाऽपसोऽजायन्त पूर्व्या-
सोऽरेणवो नोऽश्मानोऽदितिर्न्नो-
हिः ॥ ७७ ॥

एते च द्विपदा यथा गृहीतमेवाभिनिधीयन्ते । नो नुमोऽदुग्धाऽइव यथा (१) अभि त्वा शूर नो नुमोऽदुग्धाऽइव । प्रचेतसोऽश्वान् यथा (२) अश्वाजनि प्रचेतसोऽश्वान् । नरोऽस्माकं यथा (३) नो नरो-

(१) २७ । ३५ ॥
(२) २९ । ५० ॥
(३) २९ । ५७ ॥

ऽस्माकमिन्द्र । वृषपाणयोऽश्वा यथा (१) वृषपाणयोऽश्वा रथेभिः । प्रदिशोऽनु यथा (२) प्रदिशोऽनु सर्वाः । उदितेऽनागा यथा (३) यद्द्य सूरऽउदितेऽनागाः । अन्धसोऽर्वा यथा (४) अन्धसोऽर्वा विश्वानराय । मनस्य तेऽद्धा यथा (५) मनस्य तेऽद्धा देव मह्याँ २॥ऽ असि । यज्ञियेभ्योऽमृतत्वम् यथा (६) यज्ञियेभ्योऽमृतत्वꣳ सुवसि भागमुत्तमम् । विपश्चितोभिर्यथा (७) पावकवर्णाः शुचयो विपश्चितोऽभिस्तोमैः । जनोऽनमीवो यथा (८) सर्वऽइज्जनोऽनमीवः । आयवोऽनु यथा (९) आयवोऽनुष्टुवन्ति । नोऽद्य यथा (१०) अनु नोऽद्यानुमतिः । देवोऽभवद्यथा (११) सो देवोऽभवत्सवितृ । व्ययुनेऽजनिष्ट यथा

(१) २९ । ४४ ॥
(२) ३२ । ४ ॥
(३) ३३ । २० ॥
(४) ३३ २३ ॥
(५) ३३ । ३२ ॥
(६) ३३ । ५४ ॥
(७) ३३ । ८१ ॥
(८) ३३ । ८६ ॥
(९) ३३ । ९७ ॥
(१०) ३४ । ९ ॥
(११) ३४ । ११ ॥

(१) इडायास्पुत्रो व्युनेऽजनिष्ट । विश्वनाऽपसोऽजायन्त यथा (२) विद्मनाऽपसोऽजायन्त मरुतः । पूर्व्यासोऽरेणवो यथा (३) पूर्व्यासोऽरेणवः सुकृताः । नोऽश्मा यथा (४) नोऽश्मा भवतु नस्तनूः । नोऽदितिर्यथा (५) अधि ब्रवीतु नोऽदितिः । नोऽहिर्यथा (६) उतनोऽहिर्बुध्न्यः ॥

ब्राह्मणः ॥ ७८ ॥

ब्राह्मण इत्येतस्मादोकारात्परोऽकारोऽभिनिधीयते । यथा (७) ब्राह्मणोऽस्य मुखम् ॥

यजुष्षु च ॥ ७९ ॥

'गाहमान' इत्यादिभिः सूत्रैरेकसम्बन्ध्यभिनिधानमुक्तम् । इदानीं यजुष्वाह । यजुष्षु च विशेषेण एकारादोकाराच्च परोऽकारोऽभिनिधीयते । यथा (८)

(१) ३४ । १४ ॥
(२) ३४ । १२ ॥
(३) ३४ । २७ ॥
(४) २९ । ४९ ॥
(५) पूर्वोक्तोदाहरणाङ्को द्रष्टव्यः ॥
(६) ३४ । ५३ ॥
(७) ३१ । ११ ॥
(८) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥

व्येद्‌: असि । व्येद्दोऽसि । यथा (१) कः असि । कोऽसि । यथा (२) ते अप्सरसाम् । तेऽप्सरसाम् ॥

सङ्क्रमे च सर्व्वत्र ॥ ८० ॥

गलत्पदमतिक्रम्यागलता सह सन्धानं सङ्क्रमः । 'त्रिपदाद्यावर्त्तमाने सङ्क्रम' इति वक्ष्यति तत्र सङ्क्रमे एकारौकाराभ्यां परोऽकारोऽभिनिधीयते । च शब्दात्सर्वत्र यजुष्षु ऋक्षु च । यजुष्षु भवति यथा (३) सूर्ह्वे यदर्य्ये । अत्र पदेषु सङ्क्रमो भवति । यथा (४) सूर्ह्वेऽर्य्ये । (५) तार्क्ष्यः अरिष्टनेमिः । अत्र क्रमसंहितायामभिनिहितो भवति । यथा (६) सूर्ह्वेऽर्य्ये । तार्क्ष्योऽरिष्टनेमिः । ऋक्षु भवति यथा (७) यज्ञः अभि । यज्ञोऽभि । सङ्क्रम इति किम् । (८) स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः ॥

---

(१) तथा ॥

(२) तथैव ॥

(३) २० । १४ । अत्र पदपाठस्याङ्को बोध्यः ॥

(४) इदमपि तथा ॥

(५) २५ । १९ ॥

(६) तथैव ॥

(७) १७ । ९० । अत्रापि पदपाठादङ्को बोध्यः ॥

(८) २५ । १९ ॥

प्रकृतिभाव ऋक्षु ॥ ८१ ॥

'गाहमाना'दिभिः सूत्रैर्ऋक्ष्वभिनिहितोऽभिहितः । ततोऽन्यत्र ऋक्षु प्रकृतिभावो भवति । यथा (१) उपप्रयन्तोऽअध्वरम् । (२) आरेऽअस्मे च शृण्वते ॥

जुषाणश्चानध्वनि ॥ ८२ ॥

'यजुष्षुचे'त्यनेन सूत्रेण यजुष्ष्वभिनिधानमुक्तम् । तदपवादभूतमिदमारभ्यते । जुषाणशब्दसम्बन्धी ओकारः अनध्वनि प्रत्यये प्रकृत्या भवति । यथा (३) जुषाणोऽअप्तुराज्यस्य वेतु स्वाहा । अनध्वनीति किम् । जुषाणोऽध्वाज्यस्य वेतु स्वाहा । इदमुदाहरणं शाखान्तरीयम् ॥

ते चानुदात्तमनुदात्ते ॥ ८३ ॥

ते इत्येतच्च पदं अनुदात्तं चेत्प्रकृत्या भवति अनुदात्ते च प्रत्यये । यथा (४) या तेऽअग्नेऽयः शया । अनुदात्तमिति किम् । (५) तेऽप्सरसाम् ॥

---

(१) ३ । ११ ॥

(२) तथा ॥

(३) ५ । ३४ ॥

(४) ५ । ७ ॥

(५) २४ । ३७ ॥

हेडऽआपो गुर्वोऽपाग्ने धीरासो देवासऽउरो रक्षाणो मो व्वैश्वानरो व्वृषभो व्वचः प्प्राणऽउदानोऽङ्गऽइमा मे व्वृष्णो दशमास्योन्धऽआविद्धोऽरिष्टोऽअर्ज्जुनः प्प्रत्याश्रावः स्विष्टो घासे प्प्रणीतस्त्तेब्भ्यो नमोऽअस्तु दूरे नोऽअद्य यज्ञे सधस्त्थे सोऽअद्ध्वरायेन्द्रे हिरण्यपर्णो द्वारो देवोऽब्दो रथिब्भ्यो महद्भ्यः सꣳसदः ॥ ८४ ॥

एते च एकारौकारा ऋक्षु यजुष्षु च प्रकृत्या भवन्ति अकारे प्रत्यये। अत्र च यत्र द्वयोः पदयोः पाठः सूत्रे तत्र नियमार्थः स तेनैव पदेन परभूतेनाधस्तनपदस्य प्रकृतिभावः । एकपदे समाम्नाये त्वकारान्ते प्रकृतिभावः। हेडो यथा (१) देवस्य हेडोऽअवं यासिसीष्ठाः ऋक्ष्वयं प्रकृतिभावः। 'व्यपरे चे'त्यनेनाभिनि-

(१) २१ । ३ ॥

क्षिते प्राप्ते (१) देवीरापोऽअपान्नपात् । द्वितीयमुदाहरणं आपो । यथा (२) आपोऽअस्मान् । शुवो यथा (३) देवीरापोऽअग्ग्रे शुवोऽअग्ग्रे पुवः । अपाग्ने यथा (४) अपाग्नेऽ अग्निम् । धीरासो यथा (५) तासुधीरासोऽ अनु दिश्य । देवासो यथा (६) यत्र देवासोऽअजुषन्त । उरो यथा (७) द्यावापृथिवीऽउरोऽ अन्तरिक्ष । रक्षाणो यथा (८) रक्षाणोऽअप्ययुच्छन् । मो यथा (९) मोऽअहन्तवं वीरम् । वैश्वानरो यथा (१०) वैश्वानरोऽअदब्धः । वृषभो यथा (११) अस्तभ्नाद्यांवृषभोऽअन्तरिक्षम् । वचो यथा (१२) उग्रं वचोऽअपावधीत् । प्राणो यथा (१३) प्राणोऽअङ्गेऽअ-

(१) ६ । २७ ॥
(२) ४ । २ ॥
(३) १ । १२ ॥
(४) १ । १७ ॥
(५) १ । २८ ॥
(६) ४ । १ ॥
(७) ४ । ७ ॥
(८) ४ । १४ ॥
(९) ४ । २२ ॥
(१०) ४ । १४ ॥
(११) ४ । ३० ॥
(१२) ५ । ८ ॥
(१३) ६ । २० ॥

ङ्गे । उदानो यथा (१) उदानोऽअङ्गेऽअङ्गे निधीतः । इमा मे यथा (२) इमा मेऽअग्नऽइष्टका: । वृष्णो यथा (३) वृष्णोऽअꣳशुभ्यां॑म् । दशमास्यो यथा (४) दशमास्योऽअस्त्रत् । अन्धो यथा (५) अन्धोऽअच्छेतः । आवित्तो यथा (६) आवित्तोऽअग्निः । (७) अरिष्टोऽअर्जुनः । द्विपदमेतत् । प्रत्याश्रावो यथा (८) प्रत्याश्रावोऽअनुरूपः । स्विष्टो यथा (९) स्विष्टोऽअग्निरग्निना । घासे यथा (१०) घासेऽअज्राणाम् । प्रणीतो यथा (११) प्रणीतोऽअग्निरग्निना । तेभ्यो नमोऽअस्तु यथा (१२) तेभ्यो नमोऽअस्तु ते नोऽवन्तु । तेभ्यो नमो इति किम् । (१३) नमोऽस्तु नील-

(१) ६ । २० ॥
(२) १७ । २ ॥
(३) ७ । २ ॥
(४) ८ । २८ ॥
(५) ८ । ५४ ॥
(६) १० । ९ ॥
(७) १० । २१ ॥
(८) १९ । २४ ॥
(९) २१ । ५८ ॥
(१०) २१ । ४४ ॥
(११) १९ । १७ ॥
(१२) १५ । १५ ॥
(१३) १६ । ८ ॥

ग्ग्रीवाय । दूरे यथा (१) दूरेऽअमित्रश्च गणः । नो यथा (२) सम्मितासो नोऽअद्य । यज्ञे यथा (३) यज्ञेऽअस्मिन् । सधस्थे यथा (४) पृथिव्याः सधस्थेऽअङ्गिरस्वत् । सो यथा (५) सोऽअग्निराय परिणीयते । इन्द्रे यथा (६) सुदेवमिन्द्रेऽअश्विना । हिरण्यपर्णौ यथा (७) हिरण्यपर्णौऽअश्विभ्याम् । द्वारो यथा (८) देवीर्द्वारोऽअश्विना । देवो यथा (९) देवोऽअग्निःस्विष्टकृत् । अब्दो यथा (१०) सजूरब्दोऽअयवोभिः । रथिभ्यो यथा (११) नमो रथिभ्योऽअरथेभ्यः । महद्भ्यो यथा (१२) महद्भ्योऽअर्भकेभ्यः ।

---

(१) १७ । ८३ ॥
(२) १७ । ८४ ॥
(३) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥
(४) ११ । ६१ ॥
(५) ३३ । ७५ ॥
(६) २१ । ४८ ॥
(७) २१ । ५६ ॥
(८) २१ । ४९ ॥
(९) २१ । ५८ ॥
(१०) १२ । ७४ ॥
(११) १६ । २६ ॥
(१२) पूर्वोक्तमुदाहरणं बोध्यम् ।

सठं॰सद्रो यथा (१) सठं॰सद्रोऽअष्टमी (२) ॥

छन्दोऽअङ्कुपमङ्काङ्कमक्षीव्र- यः ॥ ८५ ॥

छन्दइत्ययमोकारः अङ्कुपं अङ्काङ्कं अक्षीवयइत्येतेषु प्रकृत्या भवति । अङ्कुपं यथा (३) काव्यं छन्दोऽअङ्कुपम् । अङ्काङ्कं यथा (४) तन्द्रं छन्दोऽअङ्काङ्कम् । अक्षीवयो यथा (५) प्रतिमा छन्दोऽअक्षीवयश्छन्दः । एतेष्विति किम् (६) सठंस्तुप्छन्दोऽनुष्टुप्छन्दः ॥

का द्‌ध्रुवीती सदना होतारा ज्ज्या स्वधा पृथिवी प्रतिमेमसदन्नइया- माकम्मौद्‌र्ध्वमियमवस्त्तादुतास्मि- षु ॥ ८६ ॥

(१) २६ । १ ॥

(२) अस्मिन्सूत्रे अरिष्टेऽर्जुनइति पूर्वरूपवटितपाठः सोऽपपाठः 'घ' पुस्तकस्थो बुधैर्ज्ञातव्य इति ॥

(३) १५ । ४ ॥

(४) १५ । ५ ॥

(५) १४ । १८ ॥

(६) १५ । ५ ॥

का ध्रुवा ऊती सदना होतारा ज्या स्वधा पृथिवी प्रतिमा एतानि पदानि प्रकृत्या भवन्ति । ईम् असदन् अश्याम अकर्म ऊर्ध्वम् इयम् अवस्तात् उत अस्ति इत्येतेषु प्रत्ययेषु यथासङ्ख्यम् । का यथा (१) काऽईमे । ध्रुवा यथा (२) ध्रुवाऽअसदन् । ऊती यथा (३) ऊतीऽअश्याम रयिम् । सदना यथा (४) सुगा वो देवाः सदनाऽअकर्म । होतारा यथा (५) दैव्या होताराऽऊर्ध्वम् । ज्या यथा (६) ज्याऽइयम् । स्वधा यथा (७) स्वधाऽअवस्तात् । पृथिवी यथा (८) पृथिवीऽउत द्यौः । प्रतिमा यथा (९) न तस्य प्रतिमाऽअस्ति ।

प्रगृह्यपदं स्वरे ॥ ८७ ॥

प्रगृह्यं पदं स्वरे प्रत्यये प्रकृत्या भवति । यथा (१०)

---

(१) २३ । ५५ ॥
(२) २ । ६ ॥
(३) १८ । ७४ ॥
(४) ८ । १८ ॥
(५) २७ । १८ ॥
(६) २९ । ४० ॥
(७) ३३ । ७४ ॥
(८) ३३ । ४२ ॥
(९) ३२ । २ ॥
(१०) ७ । ३१ ॥

इन्द्राग्नीऽ आगतम् । (१) स्वर्त्येऽ अन्न्यान्न्या । स्वरसन्धेरपवादः ॥

न रोदसीमे ॥ ८८ ॥

रोदसी इत्येतत्पदं प्रगृह्यं इमे इत्येतस्मिन्पदे न प्रकृत्या भवति । यथा (२) राये नु यञ्जज्ञतूरोदसीमे । इमे इति किम् । (३) आ पप्रिवान्नोदसीऽ अन्तरिक्षम् ॥

विश्पतीवोपस्थिते ॥ ८९ ॥

विश्पती इत्येतत्पदं इवे परभूते उपस्थिते इतिकरणे प्रकृत्या भवति । यथा (४) विश्पतीऽ इवेति विश्पतीऽ इव । उपस्थित इति किम् । (५) आ विश्पतीव बीरिटे ॥

उकारोऽपृक्तोऽस्पर्शात् ॥ ९० ॥

---

(१) ३३ । ५ ॥

(२) २७ । २४ ॥

(३) १७ । ५९ ॥

(४) ३३ । ४० । अस्योदाहरणस्य पदपाठे सत्वात् पदपाठादयमङ्गोऽवगन्तव्यः ॥

(५) ३३ । ४४ । किन्नामोपस्थितत्वम् । उक्तं च ज्योत्स्नायाम् । उपस्थितं सेतिकारं केवलं तु पदं स्थितम् । तत्स्थितोपस्थितं नाम यत्रोभे आह संहितेति ॥

उकारोऽपृक्त एकवर्णः अस्पर्शात्परः प्रकृत्या भवति स्वरे प्रत्यये । यथा (१) न वाऽ उंऽ एतत् । (२) एतवाऽ उंऽ अग्नी । अपृक्त इति किम् । (३) योजान्विन्द्र । अस्पर्शादिति किम् । (४) किस्वा व्यपन्नं महत् ॥

प्लुतमितौ ॥ ९१ ॥

प्लुतान्तं पदं प्रकृत्या भवति इतौ प्रत्यये । यथा (५) व्विवेशा ३ इतिं । तेषु व्विश्वम्भुवनमाविवेशा ३ ॥

ओकारश्च ॥ ९२ ॥

ओकारः पदान्तीयः प्रकृत्या भवति इतौ प्रत्यये । यथा (६) चित्रभानो इति । (७) कृशानो इतिं । इतावित्यनुवृत्तिः कस्मात् स्वरमात्रे मा भूत् इतावित्येव

(१) २३ । १६ ॥

(२) १७ । ९७ ॥

(३) ३ । ५१ ॥

(४) २३ । ९ ॥

(५) २३ । ४९ । अत्र अस्मिन्नुदाहरणे इतिपरत्वं नास्ति संहितायां न पदपाठेऽपि न क्रमपाठवेलायां इतिपरत्वं वेष्टने ज्ञातव्यम् ॥

(६) २० । ७८ ॥

(७) ४ । २७ । इत्युदाहरणद्वयस्याङ्कः पदपाठाद्बोध्यः ॥

(१) क्ष्मानवेते वं÷ ॥

उकारोऽपृक्तो दीर्घमनुनासिकम् ॥ ९३ ॥

उकारोऽपृक्त एकवर्णो दीर्घमनुनासिकं चापद्यते । यथा (२) ऊँ इति । इतावित्येव । यथा (३) न वा ऽउ एतत् । नात्र दीर्घमनुनासिकं च । इतावविद्यमानत्वात् ॥

इतेश्च परं पदं चर्चायाम् ॥ ९४ ॥

इतिकरणाच्च परं उ इत्येतत्पदमपृक्तं दीर्घमनुनासिकमापद्यते पदचर्चायाम् । चर्चापदस्वरूपमुक्तम् (४) एतदुक्तं भवति वेष्टने यदितिकरणात्परं पदं चर्चा तदेवमुच्यते । तत्पदस्वरूपज्ञापनार्थम् । यत्र तु तथाभूतं पदस्वरूपं न भवति तत्र उ इत्येतत्स्वरूपं हि तत्पदं भवति । अयं चार्थोऽनेन सूत्रावयवेन ज्ञाप्यते । इतिकरणात्परतो यत्पदवचनं तत्स्वरूपज्ञापनार्थमिति । (५) उत् । ऊँ इत्यूम् । त्यम् जातवेदसमिति

(१) ४ । २७ ॥

(२) ८ । ४० । इदमुदाहरणं पदपाठादवगन्तव्यम् ॥

(३) २५ । ४४ ॥

(४) चर्चालक्षणसूत्रं 'इतिवच्चर्चायाम् प्रा. २ अ. । २१ सूत्राङ्को बोध्यः ॥

(५) ८ । ४० ॥

जात । श्वेदसम् । पदचर्यायामिति किम् । (१) उद्धृति ॥

तकारवर्गश्चकारवर्गे चकारवर्गम् ॥ ९५ ॥

तकारवर्गः पदान्तीयः चकारवर्गे प्रत्यये परे चकारवर्गमापद्यते । यथा (२) तत् चक्षुः । तच्चक्षुः । (३) आरात् चित् । आराच्चिद्द्वेषः । (४) आच्छत् छन्दः । आच्छच्छन्दः । (५) उत् जिहानाः । प्रवयामुज्जिहानाः । झकारादि ञकारादि च पदानामुदाहरणं संहितायां न विद्यते । नकारस्य चकारछकारप्रत्यययोः सन्धिरुक्तः । 'नुः' । 'चछयोः शम्' । (६) । जकारे उदाहरणम् । यथा (७) वाजान् जयतु । वाजाञ्जयतु । (८) ॥

---

(१) इदमुदाहरणं लौकिकम् ॥

(२) ३६ । २४ ॥

(३) २० । ५२ ॥

(४) १५ । ५ ॥

(५) १५ । २४ ॥

(६) पूर्वोक्तं द्वितीयाध्यायस्थं सूत्रद्वयं ज्ञेयम् ॥

(७) ५ । ३६ ॥

(८) अत्र स्थान्यादेशयोर्यथासङ्ख्यम् । निमित्तकार्यिणोस्तु न 'शकारे चे'त्यस्याप्येतत्सूत्रे शषत्वेन निमित्तानां षट्त्वात् । योगविभागस्तु तावत् उत्तरसूत्रानुवृत्त्यर्थः ॥

शकारे च ॥ ९६ ॥

शकारे च प्रत्यये परे तकारवर्गश्चकारवर्गमापद्यते । यथा (१) तत् शकेयम् । तच्छकेयं तन्मे । (२) उत् शिषः । माऽमीषां कञ्चनोच्छिषः । (३) स्वधावान् शुक्रः । स्वधावाञ्छुक्रः । (४) पिशङ्गान् शितिराय । पिशङ्गाञ्छितिराय । (५) आदित्यान् श्मश्रुभिः । आदित्याञ् श्मश्रुभिः ॥

परश्चास्पर्शपरश्छम् ॥ ९७ ॥

परश्च शकारः अस्पर्शपरश्छकारमापद्यते । यथा (६) तच्छकेयम् । माऽमीषां कञ्चनोच्छिषः । स्वधावाञ्छुक्रः । पिशङ्गाञ्छितिराय । अस्पर्शपरइति किम् । (७) आदित्याञ् श्मश्रुभिः ॥

उदस्तभाने लोपम् ॥ ९८ ॥

(१) १ । ५ ॥

(२) १७ । ४५ ॥

(३) ३३ । ५ ॥

(४) २४ । ११ ॥

(५) २५ । १ ॥

(६) पूर्वोक्तसूत्रोदाहरणानि ज्ञेयानि ॥

(७) पूर्वोक्तमुदाहरणं बोध्यम् ॥

उद् उपसर्गात्परस्तभाने प्रत्यये सकारो लोपमापद्यते । यथा (१) उत् स्तभान । ज्योतिषा दिवमुत्तभान । (२) उत् स्तम्भनम् । उत्तम्भनम् ॥

अश्वात्स्थे तकारं॰ सञ्ज्ञायाम् ॥ ९९ ॥

अश्वशब्दादुत्तरः सकारः तकारमापद्यते सञ्ज्ञायां स्थे प्रत्यये । अश्वः अश्वनव्यापारोऽग्निरस्मिँस्तिष्ठतीत्यश्वत्थो वृक्षः । यथा (३) अश्वत्थे वो निषदनम् । सञ्ज्ञायां किम् । अश्वस्थः पुरुषः । (४) ॥

स्वरात्सँय्योगादिर्द्विरुच्यते सर्व्वत्र ॥ १०० ॥

इत उत्तरं द्विर्भावप्रकरणं वर्त्तिष्यते । स्वरात्परः संयोगादिभूतो वर्णो द्विरुच्यते सर्वत्र । अधस्तनविधानं पदान्तपदाद्योः । इदं तु सर्वत्र पदान्तपदाद्योर्मध्ये च पदान्तपदाद्योर्भवति । यथा (५) सम्म्यक् स्रवन्ति ।

---

(१) १७ । ७२ ॥

(२) ४ । ३६ । इदमुदाहरणं 'ग' 'घ' पुस्तके नास्तीति सुधीभिर्बोध्यम् ॥

(३) १२ । ७९ ॥

(४) लौकिकमुदाहरणम् ॥

(५) १३ । ३८ ॥

सम्यक्क् स्रवन्ति । द्वौ ककारौ सकारो रेफश्च संयोगः । तत्र पूर्वककारो द्विरुक्तिजः । (१) अनुष्टुप्प्प्रारदी । द्वौ पकारौ शकारश्च संयोगः । तत्र प्रथमः पकारो द्विरुक्तिजः । पदमध्ये भवति यथा (२) अश्श्व÷ । द्वौ शकारौ वकारश्च संयोगः । तत्र प्रथमः शकारो द्विरुक्तिजः । स्वरादिति किम् । (३) सुभिश्श्रुरकसं । अत्र शकाररेफौ संयोगः । (४) ॥

परं तु रेफहकाराभ्याम् ॥ १०१ ॥

रेफहकाराभ्यां परं व्यञ्जनं द्विरुच्यते न तु रेफहकारौ । यथा (५) ऊर्ज्जं । रेफो द्वौ जकारौ संयोगः । तत्र प्रथमो जकारः क्रमजः । (६) सूर्य्यं÷ । रेफो द्वौ यकारौ संयोगः । तत्र पूर्वो यकारः क्रमजः । (७) बाह्व्वोः । हकारो द्वौ वकारौ संयोगः । तत्र प्रथमो वकारः क्रमजः । (८) ॥

---

(१) १३ । ५७ ॥

(२) २४ । १ ॥

(३) ३३ । १५ ॥

(४) अत्र सूत्रे सर्वत्रपदेन प्रकृतौ विकृतौ च द्वित्वविधानं ज्ञेयम् ॥

(५) १ । १ ॥

(६) ३१ । १२ ॥

(७) २४ । १ ॥

(८) अत्र सूत्रे तु एवार्थः । बाह्वोरित्युदाहरणे रेफहकारयोः प्रत्यक्षश्रुतिनिमित्तत्वेन सामान्यप्राप्तकार्यित्वबाधः । तेन रहभिन्नव्यञ्जनस्यैवानेन द्वित्वम् । ३ । २२ ।

ऊष्मान्तस्थाभ्यश्च स्पर्शः ॥१०२॥

ऊष्माणः शषसहाः । अन्तस्था यरलवाः । एतेभ्यः परः स्पर्शो द्विरुच्यते । यथा (१) पृश्निः । एकः श-कारो द्वौ नकारौ संयोगः । तत्र प्रथमो नकारः क्रम-जः । (२) अश्मा । शकारो द्वौ मकारौ संयोगः । तत्र प्रथमो मकारः क्रमजः । (३) पार्ष्ण्या । रेफः षकारो द्वौ णकारौ यकारश्च संयोगः । तत्र प्रथमो णकारः क्रमजः । (४) सस्निंतमम् । सकारो द्वौ न-कारौ संयोगः । तत्र प्रथमो नकारः क्रमजः । (५) राष्ट्रदा राष्ट्रम् । षकारो द्वौ टकारौ रेफश्च संयोगः । तत्र प्रथमष्टकारः क्रमजः । (६) हस्ते । सकारो

अति ह्रस्वम् । ३० । २२ । अत्रैतयोर्न द्वित्वम् । स्वरे परे रेफात्परेषां ऊष्मणामनेन द्वित्वं प्राप्तं तत्र रेफस्य एकारसहितोच्चारणविधानाद्रेफधर्माभावात् ११ । ३७ । दर्शतम् । २१ । २५ । वर्षाभिः । यत्र तुल्यरत्वं तत्र विधानाभावाद्द्वित्वं भवत्येव । २५ । १ । वर्षैः । १६ । ३८ । वर्ष्याय । अत एव पाणिनिना 'शरोची' ति द्वित्वनिषेधः कृतः । उक्तं चामरेशकृतशिक्षायाम् । परं रेफहकाराभ्यां व्यञ्जनं तूष्मवर्जितम् । द्वित्वमापद्यते रेफहकारौ तु न कुत्र चित् १ इति ॥

(१) २४ । ४ ॥

(२) १८ । १३ ॥

(३) २५ । ४० ॥

(४) १ । ८ ॥

(५) १० । २ ॥

(६) ११ । ११ ॥

द्वौ तकारौ संयोगः । तत्र प्रथमस्तकारः क्रमजः । ह-कारस्य द्विर्भावो निषिद्धः । यकारस्य परभूतैः स्पर्शैः संयोगो न विद्यते । रेफस्य द्विर्भावो निषिद्धः । (१) शल्मलिः । लकारो द्वौ मकारौ संयोगः । तत्र प्रथमो मकारः क्रमजः । (२) उल्बम् । लकारो द्वौ बकारौ संयोगः । तत्र प्रथमो बकारः क्रमजः । (३) दृधि क्राव्णः । वकारो द्वौ णकारौ संयोगः । तत्र प्रथमो णकारः क्रमजः । (४) ॥

जिह्वामूलीयोपध्मानीयाभ्यां च ॥ १०३ ॥

जिह्वामूलीयादुपध्मानीयाच्च परः स्पर्शो द्विर्भवति । जिह्वामूलीयाद्भवति यथा (५) मयि वः कामधरणम् । जिह्वामूलीयो द्वौ ककारौ संयोगः । तत्र प्रथमः ककारः क्रमजः । (६) ततः खनेम । जिह्वामूलीयः ककारखकारौ संयोगः । तत्र प्रथमः ककारः

---

(१) २३ । १३ ॥

(२) १० । ८ ॥

(३) २३ । ३२ ॥

(४) अस्मिन् सूत्रे चकार एवार्थको भिन्नार्थक्रमबोधकश्च । तेन नोष्मान्तस्था द्वित्वमापद्यन्ते । इति फलितार्थः ॥

(५) ३ । २७ ॥

(६) ११ २२ ॥

क्रमजः । उपध्मानीयाद्भवति यथा (१) याऽ ओषधीः पूर्व्वा जाताः । उपध्मानीयो द्वौ पकारौ संयोगः । तत्र प्रथमः पकारः क्रमजः । (२) याः फलिनीः । उपध्मानीयः पकारफकारौ संयोगः । तत्र प्रथमः पकारः क्रमजः । एतौ च जिह्वामूलीयोपध्मानीयौ काण्वादिविषयौ तथा हि वक्ष्यति (३) 'तस्मिँल्लृल्हजिह्वामूलीयोपद्ध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम्' । इति ॥

यैस्तु परं तैर्न्न पूर्व्वम् ॥ १०४ ॥

यैस्तु संयुक्तं परं व्यञ्जनं द्विरुच्यते यैः संयोगे सति परस्य द्विर्भाव उक्तः तैः संयुक्तं न पूर्वव्यञ्जनं द्विर्भवति । ऊष्मणामन्तस्थानां च परस्य स्पर्शस्य द्विर्भाव उक्तः । तत्र यद्युभयतः संयुक्ता ऊष्माणोऽन्तस्था वा स्पर्शा भवन्ति । तत्र प्रथमस्य स्पर्शस्य द्विर्भावः प्राप्नोति स्वराव्यवधानात्स निषिद्ध्यत इति सूत्रार्थः । (४) पक्ष्माणि । (५) सुक्ष्मा । (६) अयक्ष्माः । तत्र ककारषकार-

(१) १२ । ७५ ॥
(२) १२ । ८९ ॥
(३) इदं सूत्रं प्रातिशाख्यस्याष्टमाध्यायस्थं द्वादशसङ्ख्याकं ज्ञातव्यम् ॥
(४) १९ । ८९ ॥
(५) १ । २७ ॥
(६) ४ । १२ ॥

मकारौ संयोगः । तत्र ककारस्य द्विर्भावः प्राप्नोति स निषिध्यते । उक्तं च । यत्र चोभयतः स्पर्शाः सँय्युक्ताः शषसाः सह । न तत्राद्यः क्रमो ज्ञेयो न परो बोधितो बुधैः । (१) ॥

नास्वरपूर्व्वा ऊष्मान्तस्थाः ॥१०५॥

ऊष्मणामन्तस्थानां च परस्य स्पर्शस्य द्विर्भाव उक्तः । तदपवादोऽयं योगः । अस्वरपूर्वा ऊष्माणोऽन्तस्थाश्च परान्स्पर्शान्न द्विर्भावयन्ति । (२) स्थालीभिः स्थालीः । अत्र सकारथकारौ संयोगः । (३) दिवः स्कम्भनीः । सकारककारौ संयोगः । अस्वरपूर्वा इति किम् । (४) विष्णोः स्थानम् । (५) विष्णोः । (६) पवित्रे स्थः । (७) राष्ट्रम् । अत्र द्विर्भावो भवति ॥ विसर्जनीयात्परः स्पर्शो व्यञ्जनपरः सन् द्विरुच्यते ।

---

(१) अत्र सूत्रे क्रमजनामकमक्षरं भवति तद्द्वित्वाज्जातं 'क्रमजं च' इदं सूत्रं क्रमजलक्षणं पूर्वोक्तं प्रथमाध्यायस्थं चतुरुत्तरशतसङ्ख्याकं ज्ञातव्यमिति ॥

(२) १९ । २७ ॥

(३) १ । १९ ॥

(४) २ । ८ ॥

(५) ५ । २१ ॥

(६) १ । १२ ॥

(७) १० । २ ॥

यथा (१) विष्णोः क्कर्म । (२) नीलक्कोः क्क्रिमि । विसर्जनीयो द्वौ ककारौ रेफस्य संयोगः । यथा (३) देवं सवितः प्प्रसुव । (४) युञ्जानः प्प्रथमम् । विसर्जनीयो द्वौ पकारौ रेफस्य संयोगः । व्यञ्जनपर इति किम् । (५) न्यङ्कुः ककुटः । गौरमृगः पिङ्गः । (६) वसोः पवित्रम् । (७) यः फलिनीः । अत्र द्विर्भावो न भवति ॥ (८) ॥

ङ्नौ चेद्ध्रस्वपूर्व्वौ स्वरे पदान्तौ ॥१०६॥

ङकारनकारौ पदान्तीयौ द्विर्भवतो ह्रस्वस्वरपूर्वौ स्वरे प्रत्यये । यथा (९) युङ्ङसि । (१०) तमु त्वा-

---

(१) १२ । ५ ॥

(२) २४ । ३० ॥

(३) ९ । १ ॥

(४) ११ । १ ॥

(५) २४ । ३२ ॥

(६) १ । २ ॥

(७) १२ । ८९ ॥

(८) एतत्सूत्रवृत्तौ 'ऊष्मान्तस्थाभ्यश्च स्पर्शः' इति पूर्वोक्तसूत्रात्स्पर्शपदमधिकृत्य विसर्गाद्व्यञ्जनपरः स्पर्शो द्विरुच्यते तत्स्पर्शपदं किमर्थं नो चेत्तदा 'निस्तानिहि' 'निस्तप्तम्' एतयोरप्युदाहरणयोर्द्विर्भावो भविष्यति इत्यनिष्टं स्यात्तदर्थं स्पर्शपदग्रहणम् ॥

(९) १० । २४ ॥

(१०) ११ । ३२ ॥

दृध्यङ्ङृषिः । द्वौ ङकारौ । (१) अश्मन्नूर्ज्जम् । (२) अच्चन्नमीमदन्त । द्वौ नकारौ । ह्रस्वपूर्वाविति किम् (३) सुप्राङ्ङजो मेम्यत् । (४) तानुर्ज्जेषम् ॥

सँय्योगपूर्व्वऽव्यञ्जनान्ताऽवसानगताः स्वरा द्विमात्राः ॥१०७॥

संयोगात्पूर्वः संयोगपूर्वः । यथा (५) अग्निः । (६) व्विऽस्नुना । व्यञ्जनमन्ते यस्य स व्यञ्जनान्तः । यथा (७) दृध्यङ् । अवसानं प्राप्तोऽवसानगतः । यथा (८) पाहि । (९) रक्ष । एते स्वरा द्विमात्रा काला भवन्ति न तु दीर्घा गुरव एते भवन्ति । अत्रोच्यते । गुरवो द्विगुणकालाः । व्यञ्जनद्विरुक्तिप्रसङ्गेन स्वराणामपि गौरवमुक्तं तत्र हि द्विगुणः कालो भवति ॥

---

(१) १७ । १ ॥
(२) ३ । ५१ ॥
(३) २५ । २५ ॥
(४) ९ । ३१ ॥
(५) २३ । १६ ॥
(६) १० । ३० ॥
(७) ११ । ३० । अयमङ्कः पदपाठाद्बोध्यः ॥
(८) १ । १ ॥
(९) १ । ४ ॥

प्रथमैर्द्वितीयास्तृतीयैश्चचतुर्थाः ॥ १०८ ॥

संयोगस्यादिभूतस्य वर्णस्य द्विर्भावो ह्युक्तः सोऽन्यथाऽपि क्वचिद्भवतीत्याह । प्रथमैः स्ववर्गीयैः सह द्वितीया द्विरुच्यन्ते । तृतीयैश्च स्ववर्गीयैः सह चतुर्था द्विरुच्यन्ते । यथा (१) विख्याय । विक्ख्यायं । ककारखकारौ यकारस्य संयोगः । (२) आच्छ्र्याति । चकारछकारौ यकारस्य संयोगः । (३) व्विष्फ्फुरन्ति । षकारः पकारफकारौ संयोगः । यथा (४) गोष्ठ्ठानम् । (५) आखरेष्ठ्ठः । षकारटकारठकाराः संयोगः । (६) पात्थ्यः । (७) रात्थ्यः । तकारथकारौ यकारस्य संयोगः । चतुर्था यथा (८) आजिग्घ्र । गकारघकारौ रेफस्य संयोगः । डकारस्यापि सम्भवः । (९) मी-

(१) ११ । २० ॥
(२) २३ । ३९ ॥
(३) २९ । ४१ ॥
(४) १ । २५ ॥
(५) २ । १ ॥
(६) ११ । ३४ ॥
(७) २३ । १३ ॥
(८) ८ । ४२ ॥
(९) १६ । ५० । अयमप्यङ्कः पदपाठाद्बोध्यः ॥

इड्व॑ऽ । डकारढकारौ वकारश्च संयोगः । (१) अर्हृध्वनस्पातु । दकारधकारौ वकारश्च संयोगः । (२) व्विब्भ्राट् । बकारभकारौ रेफश्च संयोगः ॥

नानुस्वारः ॥ १०९ ॥

संयोगपूर्वं इत्यनुवर्त्तते । संयोगपूर्वोऽनुस्वारो न द्विरुच्यते । यथा (३) इमꣳ स्तनम् । (४) सोमानꣳ स्वरणम् । असंयोगपूर्वस्य ह्यनुस्वारस्योपरिष्टाद्वक्ष्यति । 'अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वा चार्द्धमात्रे'ति । यथा (५) हꣳसः' ॥

सवर्णे ॥ ११० ॥

सवर्णे प्रत्यये न द्विरुक्तिर्भवति । अन्तस्थासंयोगोऽत्रोदाहरणम् । 'स्ववर्गीये चानुत्तम' इति स्पर्शानां वक्ष्यति । यथा (६) सम् यौमि । सँय्यौमि । द्वौ यकारौ संयोगः । (७) सम् व्वपामि । सँव्वपामि । द्वौ वकारौ संयोगः ॥

(१) ४ । १९ ॥
(२) ३३ । ३० ॥
(३) १७ । ८७ ॥
(४) ३ । २८ ॥
(५) १० । २४ ॥
(६) १ । २२ ।
(७) १ । २१ ॥

ऋवर्णे ॥ १११ ॥

ऋवर्णे प्रत्यये न द्विरुक्तिर्भवति । यथा (१) अनिष्टृतः । षकारटकारौ संयोगः । 'ऊष्मान्तस्थाभ्यश्च स्पर्शः' इति प्राप्तस्य प्रतिषेधः ॥

ऌवर्णे ॥ ११२ ॥

ऌवर्णे प्रत्यये न द्विरुक्तिर्भवति । यथा (२) ऋद्धिः । (३) क्लृप्तम् । 'विसर्जनीयाद्व्यञ्जनपर' इति प्राप्तिः । ऌकारस्य मध्ये लकारस्यार्द्धमात्रां पश्यताऽऽचार्येण निषेधः कृतः । वक्ष्यति च 'ऋऌवर्णौ रेफलकारौ सश्लिष्टावश्रुतिधरावेकवर्णौ' (४) ॥

यमे ॥ ११३ ॥

यमे प्रत्यये न द्विरुक्तिर्भवति । यथा (५) सक्थ्ना दे-

---

(१) २७ । ४ ॥
(२) १८ । १२ ॥
(३) १८ । ११ ॥

(४) अस्मिन्वक्ष्यमाणसूत्रे 'ऋऌवर्णे इति' 'क' पुस्तकपाठः । तस्मिन्नेव सूत्रे अश्रुतिधराविति 'ख' पुस्तकपाठः । ऋकारऌकारयोः परयोर्यत्र द्विरुक्तिर्भवति न भवति व्यञ्जनस्य तत्र प्रमाणममरेशकृतायां प्रातिशाख्यानुसारिण्यां वर्णरत्नप्रदीपिकाख्यायां शिक्षायाम् । ऋवर्णे न द्विरुक्तिः स्यात् ङनकारौ विहाय च । ऌवर्णेऽपि तथैव स्यात्क्लृप्तं चानिष्टृतं यथा । १ । इत्यादि बुधैर्ज्ञेयम् ॥

(५) २३ । २९ । यमलक्षणं वक्ष्यमाणम् । सक्थ्नेत्यत्र ककारथकारौ थकारसम-

दिश्यते नारी । ककारः थकारयमौ नकारश्च संयोगः । तत्र 'स्वरात्संयोगादि' रिति द्विरुक्तिः प्राप्ता सा यमे प्रत्यये निषिध्यते । यथा (१) सञ्ज्ञानमसि । जकारञकारयमौ ञकारश्च संयोगः । अत्रापि 'स्वरात्संयोगादि' रिति जकारस्य द्विरुक्तिः प्राप्ता सा यमे प्रत्यये इति नास्ति विरोधः । रुक्मपात्मप्रभृतीन्युदाहरणानि ददन्ति तेषां 'सँय्योगादिः पूर्वस्य' 'यमश्च' त्यनेन सह विरोधः प्राप्नोति ॥

विसर्ज्जनीयः ॥ ११४ ॥

विसर्जनीयो न द्विरुच्यते । व्यञ्जनत्वाद्विसर्जनीयस्य द्विरुक्तौ प्राप्तायां प्रतिषेधोऽयम् । यथा (२) द्विवः ककुत्पतिः पृथिव्याः । (३) याः फलिनीः । (४) ॥

सङ्ख्यस्वकारप्रतिरूपथकारनकाराः संयोगः तत्र थकारस्य न द्वित्वम् । ककारस्य द्वित्वं न भवत्येव तत्र प्रमाणममरेशकृतशिक्षावचनम् । सक्थ्ना देदिश्यते नारी ककारोऽत्रैक एव हि । यमे परे निषेधस्तु पुनर्द्वित्वनिवारकः । १ । इति सुधीर्बोध्यम् ॥

(१) १२ । ४६ । अस्मिन्नुदाहरणे जकारसमसङ्ख्यगकारप्रतिरूपञकाराः संयोगः तत्र जकारस्य न द्वित्वम् ॥

(२) ३ । १२ ॥

(३) १२ । ७८ ॥

(४) अत्र विसर्गादीनां व्यञ्जनानामुच्चारणेऽङ्गुलिप्रक्षेपे च प्रमाणमुक्तं याज्ञवल्क्यशिक्षायाम् । मुष्ट्याकृतिर्मकारे तु नकारे तु नखग्रहः । अनुस्वारेऽङ्गुष्ठक्षेप ऊष्मान्तेऽङ्गुलिमोक्षणम् । १ । ककारान्ते टकारान्ते कर्णेऽधोऽङ्गुलिनामनम् । पञ्चाङ्गुल्यं

स्ववर्गीये चानुत्तमे ॥ ११५ ॥

स्ववर्गीये च प्रत्ययेऽनुत्तमे पूर्वौ वर्णौ न द्विरुच्य-

पकारे तु तकारे कुण्डलाकृतिः ।२। ऊर्द्ध्वक्षेपाच्च योष्मा स्यादधः क्षेपाच्च या भवेत्। एकैकामुत्सृजेद्धीरः स्वरिते तूभयं क्षिपेत् । ३ । अङ्गुष्ठाकुञ्चनं लघावनुस्वारे त्वपा-ꣳ रसम् । दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्त्तितः । ४ । तर्जन्यङ्गुष्ठयोः स्पर्श-उदात्तं प्रतिचक्षते । नीचं तु मध्यमे कुर्याच्छेषं नीचतरं क्रमात् । ५ । ह्रस्वादग्रे भवे-द्दीर्घो दीर्घादग्रे भवेल्लघुः । संयोगे च परे ह्रस्वः सिꣳह्मासि निदर्शनम् । ६ । स्वरितं यद्भवेत्किञ्चिद्धकारसहसंयुतम् । ऊष्माणं तं विजानीयान्निक्षेप उभयोरपि । ७ । त्रिविधा तु भवेदूष्मा प्रचिता वलका तरा । स्वरिते प्रचितां विद्यान्निपाते वलकां विदुः । ८ । उत्थाने तु तथा तारैताभिस्तिसृभिरूष्मभिः । मात्रामादौ विदित्वा तु ततः क्षेपं प्रयो-जयेत् । ९ । एकत्वं भजते काचित्काचिद्द्वित्वे प्रतिष्ठिता । समानकान्तिका काचि-त्काचिदूष्मप्रदायिनी । १० । यथा बालस्य सर्पस्य उच्छ्वासो लघुचेतसः । एवमूष्मा प्रयोक्तव्या हकारं परिवर्जयेत् । ११ । स्वरिते समभिक्षिप्ते संयोगो यत्र दृश्यते । द्वि-मात्रिके भवेदेका मात्रिके तूभयं क्षिपेत् । १२ । अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् । शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलम्बिताम् । १३ । ऐन्द्री तु मध्यमा वृ-त्तिः प्राजापत्या विलम्बिता । अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निन्दिता । १४ । वि-वृत्तिप्रत्ययादूष्मां प्रवदन्ति मनीषिणः । तामेव प्रतिषेधन्ति अइउऋओ निदर्शन-म् । १५ । एतेषां पद्यानां स्पष्टार्थः । अमुमेवार्थं पाणिनिरप्यवदत् । अयोगवाहा वि-ज्ञेया आश्रयस्थानभागिनः । न विद्यते योगस्संयोगो वर्णान्तरेण येषां ते अयोगवाहा इत्यनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाश्चत्वारः । आश्रयस्य ककारादेः स्थानं भा-जितुं शीलं येषां ते आश्रयस्थानभागिनः । अन्ये आचार्या यमवर्णानामयोगवाहान्म-न्यन्ते तेषां मतेन अयोगवाहशब्दः प्रत्यस्तमितावयवो रूढिशब्दोऽश्ववर्णवद्वेदित-व्यः । विसर्गोच्चारणे प्रमाणं माध्यन्दिनीयशिक्षायामपि । अवर्णाच्च ऋकाराच्च विसर्गः कण्ठ्य एव सः । इवर्णाच्च तथोवर्णात्तथा चैकारपूर्वकः । १ । औकारपूर्वकश्चैव ता-लव्यो भवति ध्रुवम् । एकाराच्च कण्ठतालुर्विसर्गो भवति ध्रुवम् । २ । कण्ठ्योष्ठ्यस्तु तथौकाराद्विसर्गो भवति ध्रुवम् । देवो वः सविता चात्र हकारसदृशो भवेत् । ३ । देवीस्तिस्रो विसर्गस्तु हिकारसदृशो भवेत् । आखुस्ते पशुरित्यादौ हुकारसदृशो भवे-त् । ४ । विसर्गश्चाग्नेरित्यादौ हेकारसदृशो भवेत् । विसर्गो बाह्वोरित्यादौ होकारस-

ते । यथा (१) तत् देवानाम् । तद्देवानामवो अद्य । द्वौ दकारौ संयोगो द्विरुक्तेर्निषिद्धत्वात् । (२) अन्तरिक्ष्यम्प्रुरीततां । मकारपकारौ संयोगः । अनुत्तम इति किम् । (३) तन्नो मित्त्रो वरुणः । अत्र द्विरुक्तिर्भवत्येव ॥

अवसितं च ॥ ११६ ॥

निरर्थकं व्यञ्जनमवसानगतमवसितशब्देनोच्यते । अवसितं व्यञ्जनं न द्विरुच्यते । यथा (४) ऊर्क् । रेफककारौ संयोगः । अवसितमिति किम् । (५) ऊर्क् च मे । 'परं तु रेफहकाराभ्यामि'ति प्राप्तिः । रेफस्याव

दृशो भवेत् । ५ । अथ स्वैर्दक्षैरित्यादौ हिकारसदृशो भवेत् । विसर्गो द्यौष्पितेत्यादौ हुकारसदृशो भवेत् । ६ । हकारो नैव मन्तव्य इति शास्त्रव्यवस्थितिः । फणिनिश्श्वाससदृशो विसर्गो भवति ध्रुवम् । ७ । कनिष्ठिकामोचनं तु नीचे च प्रचये सति । नमः कूप्याय प्रथमो द्वितीयो जाग्रतस्तथा । ८ । तर्जनीमोचनं कुर्यादुदात्ते तु विसर्गके । देवो घर्म्मस्तथा ह्रस्वे स्वरिते तूभयं क्षिपेत् । ९ । अश्वो मर्त्यो भवेल्लक्ष्यं स्वारे दीर्घे कनिष्ठिकाम् । उभयोरपि ह्रस्वे च वकारे स्वरिते सति । १० । दीर्घेऽपि चोभयोः क्षेप इति शास्त्रव्यवस्थितिः । यथा स्फटिकदण्डादिरुपाधिवशतो भवेत् । ११ । तद्वदूष्मा प्रयोक्तव्या हिहुहेहो निदर्शनम् । वसोः पवित्रं वै तत्र ह्युदाहरणमुच्यते । १२ । इत्यादिवाक्यैरङ्गुलिप्रक्षेपे प्रमाणं बोध्यम् ॥

(१) ३३ । १७ ॥

(२) २५ । ८ ॥

(३) ३३ । ४२ ॥

(४) १८ । ९ ॥

(५) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥

द्विरुक्तिर्न भवति ॥

नान्तःपदे स्वरपञ्चमान्त- स्थासु ॥ ११७ ॥

स्वरे प्रत्यये पञ्चमे च पदे अन्तस्थासु च प्रत्ययभूतासु यदुच्यति तदन्तःपदे न भवति पदान्तीयस्य स विकार इत्यर्थः। यथा (१) पूषन् । षकारस्य प्रथमस्य स्वरे तृतीयभाव उक्तः सोन्तःपदे न भवति । पञ्चमे यथा (२) त्वमग्न्यां समञ्जन् । (३) आक्नीं ऽइमे व्विष्फुरन्तीऽ अमित्रान् । अत्र 'पञ्चमे पञ्चम' मिति पञ्चमभाव उक्तः सोऽन्तःपदे न भवति । अन्तस्थासु यथा (४) इषे त्वा (५) आ प्यायस्व । प्रथमस्य तृतीयभाव उक्तः सोऽन्तःपदे न भवति । वक्ष्यमाणप्रकरणस्यास्यापवादभूतोऽयं योगः । अधिकारसूत्रमेतत् ॥

स्पर्शोऽपञ्चमः स्वरघौ तृती- यम् ॥ ११८ ॥

---

(१) ३४ । ४१ ॥
(२) २० । ४५ ॥
(३) २९ । ४१ ॥
(४) १ । १ ॥
(५) १२ । १११ ॥

अपञ्चमः स्पर्शः स्वरे प्रत्यये धिसञ्ज्ञके च तृतीयमापद्यते । स्वरे परे भवति यथा (१) उत् एनम् । उद॑नमुत्त॒रान्न॑य । (२) समुद्रात् ऊर्म्मिः । समु॒द्रा॒दू॒र्म्मिः । धौ परे यथा (३) यत् ग्रामे । यद्ग्रामे॑ । (४) यत् वर्म्मी । यद्वर्म्मी । (५) ॥

जिति प्रथमम् ॥ ११९ ॥

जित्सञ्ज्ञके प्रत्यये स्पर्शोऽपञ्चमः प्रथममापद्यते यथा (६) अनुष्टुप्प्रेऽभिगरः । (७) ऊर्क् च मे । (८) तत्स॑वितुः । (९) अनुष्टुप्शारदी ॥

---

(१) १७ । ४९ ॥

(२) १७ । ८९ ॥

(३) ३ । ४५ ॥

(४) २९ । ३८ ॥

(५) पूर्वोक्तेऽधिकारसूत्रे पदान्ते किम् । ३४ । ४१ । पूषन् । पदादेः परस्य वर्गतृतीयभावो न । २० । ४५ । त्मन्या समञ्जन् । तस्य दकारो न भवति 'पञ्चमे पञ्जम' मिति तकारस्य नकारो न भवति । धौ किम् । ८ । ४७ । अनुष्टुप्ते । तकारान्ते पदे पूर्वे चकारे परतः स्थिते । मोक्षं तत्र न कुर्वीत यच्च पपौ २५ । ३७ । निदर्शनम् । अपञ्चमः किम् । १३ । ५१ । त्वम् यविष्ठ । अत्र मकारस्य वकारो न भवति । स्वरे किम् । ३ । ३५ । तत्स॑वितुः ऽ ॥

(६) ८ । ४७ ॥

(७) १८ । ९ ॥

(८) ३ । ३५ ॥

(९) १३ । ५७ ॥

असस्थाने मुदि द्वितीयं शौनकस्य ॥ १२० ॥

असमानस्थाने मुत्संज्ञके प्रत्यये स्पर्शोऽपञ्चमो द्वितीयमापद्यते शौनकस्याचार्यस्य मतेन । यथा (१) सम्यक् स्रवन्ति । सम्यख् स्रवन्ति । (२) अनुष्टुप् शारदी । अनुष्टुफ् शारदी । असस्थान इति किम् । (३) तत्सवितुः । केचिदत्र तृतीय'मवसाने चे' त्येतत्सूत्रं पठन्ति सोऽपपाठः । यतः 'प्रथमोत्तमाः पदान्तीया' इत्यधस्तादुक्तम् । (४) ॥

पञ्चमे पञ्चमम् ॥ १२१ ॥

---

(१) १३ । ३८ ॥

(२) १३ । ५७ ॥

(३) ३ । ३५ ॥

(४) अस्मिन्सूत्रे असस्थाने किम् । १२ । ६८ । इत्सृण्य÷ । उक्तं च याज्ञवल्क्यशिक्षायाम् । ककारान्ते पदे पूर्वे सकारे परतः स्थिते । खसवर्णं विजानीयाद्विषख् सीसेन दर्शनम् । १ । टकारान्ते पदे पूर्वे सकारे परतः स्थिते । ठसवर्णं विजानीयात्सम्राट्सम्भृतो निदर्शनम् । २ । तकारान्ते पदे पूर्वे सकारे परतः स्थिते । थसवर्णं विजानीयात्तथ्सवितुर्निदर्शनम् । ३ । पकारान्ते पदे पूर्वे शकारे परतः स्थिते । फसवर्णं विजानीयादनुष्टुफ् शारदी यथा । ४ । इति । शौनकस्येति किम् । तत्सवितुः । इत्यादिपूर्वोक्तान्येवोदाहरणानि । वस्तुतस्तु तत्सवितुरित्यत्र दन्त्यसकारः पूर्वतकारसमानस्थानीयः । नकारान्ते पदे पूर्वे सकारे परतः स्थिते । तसवर्णं विजानीयात्त्रीन्त्समुद्रान्निदर्शनम् । इति ॥

पञ्चमे स्पर्शे प्रत्यये अपञ्चमः स्पर्शः पञ्चममापद्यते । यथा (१) व्वाक् मात्त्या । व्वाङ् मात्त्या । (२) ब्वट् महान् । ब्वण्णमहान् । (३) तत् मित्वस्य । तन्निमत्त्वस्य ॥

हश्च तस्मात्पूर्व्वचतुर्थम् ॥ १२२ ॥

हश्च तस्मादपञ्चमात्स्पर्शात्तृतीयभूतादुत्तरः सन्नधस्तनस्य स्पर्शस्य चतुर्थमापद्यते । यथा (४) उत् हर्षय । उद्धर्षय । (५) अवाट् हव्यानि । अवाड्ढव्यानि ॥

नर्कारपरो जातूकर्ण्यस्य ॥ १२३ ॥

ऋकारपरो हकारः अपञ्चमस्पर्शादुत्तरो न चतुर्थमापद्यते । न च पूर्वस्तृतीयं जातूकर्ण्यस्याचार्यस्य मतेन । यथा । (६) सम सुस्रोत् हृदः । सममुंस्रोद्धृदः । जातूकर्ण्यस्येति किम् (७) सममुंस्रोद्धृ-

(१) १३ । ५८ ॥
(२) ३३ । ३९ ॥
(३) ३३ । ३८ ॥
(४) १७ । ४२ ॥
(५) १९ । ६६ ॥
(६) १८ । ५८ ॥
(७) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥

द्रौ वां ॥

हि ॥ १२४ ॥

'ह्यन्तराः काला' इत्यधस्तादुक्तं कालशब्दस्येहाऽवधिवचनः । अतोऽवधिपरिज्ञापनार्थमिदं सूत्रम् । अवधेः प्रयोजनं 'न परकालः पूर्वकाले पुन' रित्यधस्तादेवोक्तम् ॥

यवयोः पदान्तयोः स्वरमध्ये लोपः ॥ १२५ ॥

यकारवकारयोः पदान्तभूतयोः स्वरमध्ये वर्त्तमानयोर्लोपो भवति । अश्रवणमनुच्चारणं भवतीत्यर्थः । अधस्तात्सूत्रकारेण यौ यकारवकारौ विहितौ तयोरनेन लोपः क्रियते । पदान्तीययोर्यकारवकारयोरसम्भवात् । यथा (१) 'आकारोपधो यकारम्' । यथा । (२) महाँयिन्द्रः । महाँ२॥ऽइन्द्रः । (३) स्वाँय् अहम् । स्वाँ२ ॥ऽअहम् । तथा 'कण्ठ्यपूर्वो यकारमपिरिक्षितः' । (४) श्विवय् आदित्यानाम् । श्वित्र ऽ-

---

(१) प्रा० अ० ३ सू० १४३ ॥

(२) ७ । ३९ ॥

(३) ११ । ८२ ॥

(४) २४ । ३९ ॥

आदित्यानाम् । (१) ता य् अस्य । ता ऽअस्य सूददो-हसः । 'सन्ध्यक्षरमयवायावम्' । (२) इड य् एहि । इड ऽएहि । (३) अदित य् एहि । अदित ऽएहि । (४) भूम्या य् आवृन् । भूम्या ऽआवृन् (५) विष्णो व् उरुगाय ॥ विष्णो ऽउरुगाय । (६) ता व् उभौ । ता ऽउभौ चतुरः । लुप्तयोश्च यकारवकारयोर्यः स्वरसन्धिः प्राप्नोति स 'न परकाल' इत्यादिना निषिध्यते ॥

न वकारस्यासस्थान एकेषाम् ॥ १२६ ॥

वकारस्य पदान्तस्य असस्थाने स्वरे प्रत्यये लोपो न भवत्येकेषामाचार्याणां मतेन । यथा (७) विष्णवेते दाधर्थ । (८) क्रशानवेते वः । असस्थान इति कि-

(१) १२ । ५५ ॥
(२) ३ । २७ ॥
(३) तथा ॥
(४) २४ । २६ ॥
(५) ८ । १ ॥
(६) २३ । २० ॥
(७) ५ । १६ ॥
(८) ४ । २७ ॥

म् । (१) व्विष्ण॑ऽउरुगाय । (२) हि॑र॑ण्यरूपाऽउष-स॑÷ । (३) ॥

असौ च शाकटायनः ॥ १२७ ॥

असावित्येतस्य पदस्य असस्थाने प्रत्यये वकारो न लुप्यते । शाकटायनस्य मतेन । (४) असौ॑ एहि॑ । असावेहि॑ । एके एतत्सूत्रं पठन्ति सोऽपपाठः पूर्वेणैव सिद्धत्वात् । (५) ॥

प्रऽउगमिति यकारलोपः ॥ १२८ ॥

प्रयुगमित्येतस्मिन्पदे यकारलोपः प्रत्येतव्यः कर्त्तव्यो वा । प्रयुज्यत इति प्रयुगम् । तत्र युजेर्यकारो लुप्यते । यथा (६) प्र ऽउगमुक्थमव्व्यथायै । 'न पर-

---

(१) ८ । १ ॥

(२) १० । १६ ॥

(३) एकेषामिति किम् । एकशब्दोऽत्र प्रधानवाची तेन प्रधानाचार्यस्य महर्षिकात्यायनस्य मतेन वकारलोपनिषेधोऽत्र प्रत्युदाहरणे न भवतीति सुधीभिर्बोध्यम् ॥

(४) ३८ । २ ॥

(५) एतस्मिन्सूत्रे शाकटायनपदेन तच्छिष्यस्य बोधः पुराणे तथा दर्शनात् । तेन शिष्याचार्ययोरेकमतत्वादेकमतेऽप्येवमेव । यद्वा केचिच्छाकटायन इति काण्वाचार्यस्यैव नामान्तरं वदन्ति तन्मतेऽपि वकारस्य लोपो न भवति तथैवोच्चारणत्वात् । परन्तु इतिशब्दे परे विकल्पेन वकारलोपो भवति इति सप्तमाध्याये वक्ष्यति ॥

(६) १५ । ५ ॥

काल इत्यनेन’ स्वरसन्धिर्न भवति ॥ (१) ॥

अनादेशेऽविकारः ॥१२९॥

इत उत्तरं स्वराणामुदात्तानुदात्तस्वरितप्रचितानामेकीभावगतं विकारं विवक्षुः परिभाषां चकाराऽऽचार्योऽनादेशेऽविकार इति । यत्रोदात्तादीनां स्वराणां सन्धावादेशो न क्रियते तत्राविकारः प्रत्येतव्यः । यथा (२) अग्निर्मूर्द्धा दिवः ककुत् । तथा (३) इयमुपरि ॥

प्रागुवर्णादक्षराणामेकीभावः ॥१३०॥

उवर्णोपलक्षितात्सूत्रात् ‘उदात्तश्चानुदात्तश्च स्वरित’ मित्येतस्मात्प्राग्यदित ऊर्ध्वमनुक्रमिष्यामस्तत्राक्षराणामेकीभावोऽधिकृतो वेदितव्यः । ‘स्वरोऽक्षर’ मित्यधस्तादुक्तमित्यतः स्वराणामेकीभावोऽधिकृतो वेदितव्यः । अधिकारसूत्रमेतत् । (४) ॥

---

(१) इत्यादिना स्वरसन्धेरभाव इति ‘ख’ पुस्तकपाठः । प्रयुगमिति ‘ख’ पुस्तकपाठो बोध्यः ॥

(२) ३ । १२ ॥

(३) १३ । ५८ ॥

(४) अथ वा वर्णग्रहणादनपृक्तादुवर्णात्परेषामक्षराणां प्राग्भूतस्यादिभूतस्याक्षरस्य उवर्णेन सहैकीभावो भवति । स्थानकरणाभ्यामेकीभावयोग्यो वकार एव । अत्र ‘यवयोः पदान्तयोः स्वरमध्ये लोप’ इत्यनेन उवर्णस्य लोप इति सिद्धे पुनः सन्ध्यर्थम् ।

स्वरितवान्स्वरितः ॥ १३१ ॥

स्वरितवानेकीभावः स्वरितो भवति । यथा (१) पत्थ्या इव । पत्थ्येव सूरेः । (२) चम्वी इव । चम्वीव सोमः । जात्योदाहरणे यथा (३) ब्रह्म अस्रुज्यत ब्रह्माऽस्रुज्यत । (४) न्यूत्यवे असितः । न्यूत्यवेऽसितः । तैरोव्यञ्जनोदाहरणे ॥

उदात्तवानुदात्तः ॥ १३२ ॥

उदात्तोऽस्मिन्नस्तीति उदात्तवान् । उदात्तवाने-

तेन 'न परकालः पूर्वकाले पुन' रित्यस्य प्रवृत्तिरिति ज्ञापित एकीभाव इति । उतमु वै प्रयाजमिष्यति । 'स्वरे भाव्यन्तस्था'मिति 'वाहौ च स्वरभूते' इत्यनेन उवर्णवकारयोः परस्य दृष्टत्वात् । इदं च प्रायो लक्ष्यादर्शनाद्ब्राह्मणे एव । 'अथ ब्राह्मणस्वरसंस्कारनियमः' इति भाषिकसूत्रकर्त्ता कात्यायनः शातपथब्राह्मणगतानां स्वराणां संस्कारस्य च पार्थक्येन नियममभिधत्ते । तथार्षीणां तथा मनुष्याणामिति मन्त्रे तु विश्वकर्म्मऽऋषिः । एवं सर्ववर्णस्वरसाम्येऽपि मन्त्रे मात्राकालो विलम्बः । ब्राह्मणे तु सन्निकर्षोच्चारणम् । पूषंस्तवेत्यृचो मन्त्रे सकारलोप इष्यते । ब्राह्मणे तु सकारो भिद्यते । तयोर्यथा च कृपणं त्वा अध्वर्युर्यजमानात् । कृपाणं तु वै । इति पदच्छेदः । चक्षुः सु वा एषः । वैश्वानरस्य तु वा एषः । मानुषो न्वा एषः । क्वचिल्लोपः । सुवर्णम् । अमुमर्थं तैत्तिरीयप्रातिशाख्यकृत् आह । "तु न पूर्व उदात्तयोर्वकार इति" उदात्तयोस्तुन्वोः परभूतो वकारो लुप्यते । स तु वै । स वै यजते । इत्यादीन्युदाहरणानि शतपथब्राह्मणस्यैव । तेनोदात्तयोरेव तुन्वोरेकीभावो नान्यत्रेति ध्येयम् ॥

(१) ११ । ४ ॥

(२) २० । ७० ॥

(३) १४ । २२ ॥

(४) २४ । ३७ ॥

कीभाव उदात्तो भवति । स चोदात्तः पुरस्तात्पश्चाद्वा भवति । इतरत्रोदात्तानुदात्तस्वरितप्रचिताः । यथा (१) उभयत्रोदात्तो भवति । ये अन्नेषु । येऽन्नेषु । (२) इणानः अस्त्ता । इणानोऽस्त्ताऽसि । उदात्तपूर्वोऽनुदात्तपरो भवति यथा (३) प्र अर्प्पयतु । प्रार्प्पयतु । (४) आ इदम् । एदम् । उदात्तपरोऽनुदात्तपूर्वो यथा (५) त्वा आशाभ्यः । त्वाशाभ्यः । (६) मे अङ्गानि । मेऽङ्गानि सर्व्वतः । उदात्तपूर्वः स्वरितपरो यथा (७) सु ऊर्व्याय । नम ऽऊर्व्याय च सूर्व्याय च । अवग्रह एतदुदाहरणम् । स्वरितपूर्व उदात्तपरो यथा (८) अद्यूत्ये अवसे । अद्यूत्येऽवसे । (९) सुप्त्वा इति । सुप्त्वेति पदसंहितायामुदाहरणम् । अत्रोदात्तस्वरितसन्धौ 'विप्रतिषेध ऽउत्तरं बलवदलोप' इति परिभाषासूत्रेणोदात्त एव भवति । उदात्तशास्त्रस्य प-

(१) १६ । ६१ ॥
(२) १३ । ९ ॥
(३) १ । १ ॥
(४) ४ । १ ॥
(५) १ । १८ ॥
(६) २० । ७ ॥
(७) १६ । ४५ ॥
(८) ३४ । २९ ॥
(९) १ । ३ ॥

रत्वात् । न तु स्वरितः । स्वरितशास्त्रस्य पूर्वत्वात् । उदात्तपरः प्रचितपूर्वो यथा (१) ओजिष्ठ ओजिष्ठः । इन्द्रौजिष्ठौजिष्ठः । (२) वाजजितः अद्ब्वनः । वाजिनो वाजजितोऽद्ब्वनः । अधस्तनयोगापवादः ॥

इवर्णमुभयतो ह्रस्वमुदात्तपूर्वमनुदात्तपरं स्वरितम् ॥ १३३ ॥

इकारो वर्णो यस्याक्षरस्येति इवर्णमक्षरम् । बहुव्रीहिरयमक्षरप्रधानः । इवर्णमक्षरं स्वरितं भवति । कथं भूत उभयतो ह्रस्वम् । उभयत इवर्णो ह्रस्वस्याक्षरस्येत्युभयतो ह्रस्वम् । उदात्तपूर्वो यस्याक्षरस्येत्युदात्तपूर्वमक्षरम् । अनुदात्तपरो यस्येत्यनुदात्तपरमक्षरम् । यथा (३) स्रुचि इव । स्रुचीव घृतम् । (४) अभि इन्धताम् । अभीन्धताम्मुखे । उभयतो ह्रस्वमिति किम् । (५) हि ईम् । हीमिद्द्वः । उदात्त पूर्वमिति किम् । (६) इमे ऽइतीमे । (७) वीड्वायेति वि ।

(१) ८ । ३९ ॥
(२) ९ । १३ ॥
(३) २० । ७० ॥
(४) ११ । ६१ ॥
(५) १२ । ६ ॥
(६) २९ । ३४ ॥
(७) १६ । ३८ ॥

ईक्षिताय । अधस्तनयोगापवादः ॥

व्वीक्षितायेति च ॥ १३४ ॥

वीक्षितायेत्ययं च एकीभावः स्वरितो भवति यथा (१) व्वीक्षितायेति वि । ईक्षिताय । उदात्तपूर्वोऽनुदात्तपर एकीभावो भवति । उभयतो ह्रस्वस्तु न भवति । अतो निपात्यते ॥

उदात्ताच्चानुदात्तᳫ स्वरितम् ॥ १३५ ॥

अक्षराणामेकीभावस्य पूर्वो विधिः । इदानीमक्षराणां व्यञ्जनव्यवहितानां यः स्वरसंहितायां भवति स उच्यते । उदात्ताच्चाक्षरात्परं व्यञ्जनव्यवहितमनुदात्तमक्षरं स्वरितं भवति । यथा (२) स्वाहा । (३) व्वाजः । (४) पयः । (५) नमः । (६) मो षु णः । मो षूणः । (७) हि ष्म । हि ष्मातेः ॥

---

(१) २२ । ८ ॥
(२) ४ । ५ ॥
(३) १८ । १ ॥
(४) १८ । ३५ ॥
(५) १६ । १ ॥
(६) ३ । ४५ ॥
(७) ३ । ४५ ॥

निहितमुदात्तस्वरितपरम् ॥ १३६ ॥

निहन्यते स्वरितमुदात्तपरं स्वरितपरं च । (१) स्वाहा सोमाय । (२) नमः हिरण्यबाहवे । नमो हिरण्यबाहवे । (३) अस्त्थूरि णौ गार्हपत्यानि सन्तु । (४) भासे त्वा ज्योतिषे त्वा । (५) स्वर्णं घर्मः । (६) स्वर्ग्यायेति स्वः । ग्याय । (७) प्रसवेऽश्विनोः । (८) अयुञ्जोऽस्माकम् । (९) परमेष्ठ्यभिधीतः । (१०) स्रुचीवेति स्रुचि । इव घृतम् । (११) दिवीवेति दिवि इव चक्षुः । एवमेतत्तैरोव्यञ्जनजात्याभिनिहितक्षैप्रप्रश्लिष्टाः स्वरिता उदात्तेऽनुदात्तीभूताः प्रदर्शिताः । अथेदानीं स्वरिते यथासम्भवं

(१) १० । ५ ॥
(२) १६ । १७ ॥
(३) २ । २७ ॥
(४) १३ । ३९ ॥
(५) १८ । ५० ॥
(६) ११ । २ ॥
(७) १ । १० ॥
(८) १७ । ३९ ॥
(९) ८ । ५४ ॥
(१०) २० । ७० ॥
(११) ६ । ४ ॥

प्रदर्श्यन्ते । (१) भूर्भुवः स्वः द्यौरिव । (२) स्वर्ग्यं घर्मः स्वाहा स्वरणार्कः ॥

अनवग्रहे ॥ १३७ ॥

यदेत'न्निहितमुदात्तस्वरितपर'मित्यधस्तादुक्तम् । एतदेके आचार्या अनवग्रहे मन्यन्ते । अवग्रहे तु स्वरित एव भवति । यथा (३) तनूनपादिति तनू । नपात् । (४) तनूनप्त्रऽइति तनू । नप्त्रे । एतच्च परमतम् । यत औज्जिहायनकैरिदमुक्तम् । अवग्रहो यदा नीचउच्चयोर्मध्यतः क्वचित् । ताथाभाव्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनमिति । (५) ॥

स्वरितस्य चोत्तरो देशः प्रणिहन्यते ॥ १३८ ॥

स्वरितस्य यउत्तरो भागः स निहन्यते । उदात्ते

(१) ३ । ५ ॥

(२) १८ । ५० । इमेऽङ्काः पदपाठाद्बोध्याः क्वचित्संहितापाठाच्चोदाहरणीया, ज्ञेयाः ॥

(३) २१ । १० । अयमङ्कः पदपाठाद्बोध्यः ॥

(४) ५ । ५ । अयमपि तथा ॥

(५) अनवग्रहमेके, इति 'ख' पुस्तकपाठः । एकशब्दोऽत्रान्यवचनः तेन काण्वादीनामवग्रहेऽप्यनुदात्त एव भवतीति गम्यते । याज्ञवल्क्यशिक्षावचनात्पदपाठे तु कम्पः स्वरो भवतीति ॥

स्वरिते वा परभूते एकेषामाचार्याणां मतेन । अत्र च जात्याभिनिहितच्चैप्रप्रश्लिष्टा एवोदाहरणम् । तथाभूतं तेषां शाखिनां हि स्मरणम् । यथा (१) स्वर्णं घर्म्मः । (२) प्रसवेऽश्विनोः । (३) परमेष्ठ्यभिधीतः । (४) स्रुचीवेति स्रुचि । इव । वाजसनेयिनान्तु अनुदात्त एव भवति । 'निहितमुदात्तस्वरितपर' मित्यनेन सूत्रेणानुदात्त एवेति ज्ञेयम् ॥

स्वरितात्परमनुदात्तमुदात्तमयम् ॥ १३९ ॥

स्वरितादक्षरात्परं व्यवहितं यदनुदात्तमक्षरं तदुदात्तमयं भवति । उदात्तमयं प्रचितमेकश्रुतीति पर्यायाः (५) वायवस्थ । व्यञ्जनव्यवहितं प्रायो निदर्शनं दृश्यते । यथा (६) अग्ने अङ्गिरः ॥

अनेकमपि ॥ १४० ॥

स्वरितादक्षरात्परं व्यञ्जनव्यवहितं यदनुदात्तम-

(१) १८ । ४६ ॥
(२) १ । ११ ॥
(३) ८ । ५४ ॥
(४) २० । ७० ॥
(५) १ । १ ॥
(६) १२ । ८ ॥

क्षरमेकमनेकं वा तत्सर्वमनुदात्तमयं भवति । प्रचितं भवतीत्यर्थः । यथा (१) व्वाजे वाजेऽवत व्वाजिन(ः । (२) त्वामद्य ऽऋषऽआर्षेयऽऋषीणाम् ॥

नोदात्तस्वरितोदयम् ॥ १४१ ॥

स्वरितादक्षरात्परस्यानुदात्तस्योदात्तमयत्वं विधायाधुना तदपवादमिति । उदात्तोदयं स्वरितोदयं च नोदात्तमयं भवति किन्त्वनुदात्तमेव भवति । उदात्तोदयं भवति यथा (३) सरस्वति तमिह धातवेऽकः । (४) व्वाजे वाजेऽवत व्वाजिनो नो धनेषु । स्वरितपरं यथा (५) रथौजाश्च सेनानीग्ग्रामण्यौ । (६) उपयामगृहीतोऽसि सहस्याय त्वा । (७) ॥

द्विवर्णमेकवर्णवद्धारणात्स्वरमद्ध्ये समानपदे ॥ १४२ ॥

'स्वरात्संय्योगादि' रित्यादिना प्रकरणेन यस्य द्वि-

(१) ९ । १८ ॥
(२) २१ । ६१ ॥
(३) ३८ । ५ ॥
(४) ९ । १८ ॥
(५) १५ । १५ ॥
(६) ७ । ३० ॥
(७) 'अनेकमपी'ति प्राप्तापवादभूतमिदं शास्त्रम् ॥

र्भाव उक्तः तस्यैतदुच्यते । वर्णो द्विवर्णसंयोग एकवर्ण-वत्कर्त्तव्यः । मुखसञ्चारणाविशेषात्स्वरयोर्मध्ये वर्त्त-मानमेकस्मिन्पदे भवति । एतच्चाभिधानमुच्यते इत उत्तरं द्वयोर्वर्णयोरेकीभावः प्रायशो निरूप्यते । यथा (१) व्यात्तम् । (२) कुक्कुटः । द्विवर्णस्वरमध्य इति किम् । (३) आज्यम् । (४) मुञ्ज्युःऽ । अत्र जकार-स्य द्विर्भवति न तु स्वरयोर्मध्ये यकारेण व्यवधानात् । समानपदग्रहणेन च संहिता लभ्यते । पदविच्छेदे न भवति यथा (५) इमम् । मे । इमम्मे वरुण ॥

ऐकारौकारौ च ॥ १४३ ॥

ऐकार औकारश्च द्विवर्णौ सन्तौ एकवर्णवद्धारणादे-कवर्णौ भवतः । एकप्रयत्ननिर्वर्त्यौ भवतः । यथा (६) कस्मै । (७) तस्मै । (८) आनन्दनन्दौ आण्डौ ॥

डढौ ळळ्हावेकेषाम् ॥ १४४ ॥

(१) ३१ । २२ ॥
(२) १ । १६ ॥
(३) २ । ८ ॥
(४) १८ । ४२ ॥
(५) २१ । १ ॥
(६) १ । ६ ॥
(७) इदमपि तथा ॥
(८) २० । ९ ॥

डकारढकारौ एकेषामाचार्याणां मतेन यथासंख्यं ळकारळ्हकारावापद्येते । स्वरमध्ये समानपद इत्यनुवर्त्तते । यथा (१) इळे । (२) अषाळ्हा । स्वरमध्ये समानपद इति किम् । यथा (३) व्वनस्पते व्वीडुङ्गः । मीढ्वस्तोकाय । एतच्च परमतम् । तथा हि वक्ष्यति । (४) तस्मिँल्ळळ्हजिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानामिति । (५) ॥

द्विसकारं०शास्स्वरास्स्वेति ॥१४५॥

द्वौ सकारौ अस्मिन्पदद्वय इति द्विसकारं पदद्वयम् । कतमत्तदित्यत आह । शास्व । रास्व । यथा (६) आ च शास्वा च । (७) रास्वेयत्सोम । शासे रासेश्चैकः प्रकृतिसकारः प्रथमः स्वेति प्रत्ययस्य द्विती-

(१) ८ । ४३ ॥

(२) १३ । २६ ॥

(३) १६ । ५० ॥

(४) इदं सूत्रमष्टमाध्यायस्थं बोध्यम् ॥

(५) इदं माध्यन्दिनभिन्नानामेकेषाम्मतं, शाकलवाष्कलादीनामाचार्याणाम्मतेन तेषां 'तस्मिन्नि' त्यादिनाष्टमाध्यायस्थेन सूत्रेण निषेधात् "द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ढकारो ळकारतां ळ्हकारतामेति स एव चास्य ळकारः सन्नूष्मणां सम्प्रयुक्त" इति ऋग्वेदप्रातिशाख्ये शौनकाचार्यो निरूपितवान् तन्मतेऽवग्रहेऽपि स्वरमध्यस्थत्वाद्भवतीति बोध्यम् ॥

(६) २१ । ६१ ॥

(७) ४ । १६ ॥

यः तृतीयः क्रमजः प्राप्नोति सोऽन्यत्र निषिध्यतेऽनेन सूत्रारम्भसामर्थ्येनेति । (१) ॥

ऋऌवर्णौ रेफलकारौ संश्लिष्टावश्रुतिधरावेकवर्णौ ॥ १४६ ॥

ऋकारे ऌकारे च यथासङ्ख्यं रेफलकारौ कण्ठ्याणुमात्रयोर्मध्येऽर्द्धमात्रिकौ संश्लिष्टौ एकीभूतौ अविद्यमानपृथक्श्रुतिधरौ एकश्रुतिभूतौ भवतः । तथा हि वैय्याकरणा "उरण्रपर" इति रेफमधिकं विदधति । यथा (२) कृत्तिवासाः । (३) ऋद्धिः । (४) कॢप्तिः । (५) ॥

मात्राणुमात्रा वर्णापत्तिनाम् ॥ १४७ ॥

'ऋऌवर्णौ रेफलकारा' वित्यनेन सूत्रेण ऋऌवर्ण-

---

(१) एतस्मिन्सूत्रे केचित् चकारमधिकं वदन्ति तदसमीचीनं दृश्यते अनार्षपाठादिति बोध्यम् ॥

(२) ३ । १ ॥

(३) १८ । ११ ॥

(४) इदमपि तथा ॥

(५) तथा च वैय्याकरणानां गुणे क्रियमाणे 'उरण्रपर' इति पृथङ् न कर्त्तव्यं तत्र रेफस्य सत्त्वात् । कृत्तिवासा इत्यत्र ककाररेफऋकाराः । कॢप्तिरित्यत्र ककारळकारऌकाराः सन्तीति ज्ञेयम् । एवं रळयोरपि ऋऌवर्णौ कण्ठ्यार्द्धमात्रिकावश्रुततरौ संयोगविघातमकुर्वन्तौ स्वरभक्तिसञ्ज्ञौ वेदितव्यौ । अमुमेवार्थमभिज्ञाय याज्ञवल्क्यमहर्षिणा शिक्षायां स्वरभक्तिरूपेण पञ्चधा प्रतिपादितेति बोध्यम् ॥

योरेफलकारौ विद्येते । इत्येतत्प्रतिपादितमिदमिदानीं चिन्त्यते कियती मात्रा कस्यास्य कियती मात्रा रेफलकारयोस्तत्प्रसङ्गेनान्याऽपि वर्णापत्तिश्चिन्त्यते । वर्णापत्तीनां त्रयः काला भवन्ति मात्रार्द्धमात्राणुमात्रोपलक्षिताः एतच्च 'विकारी यथासन्न' मित्यनेन व्यवस्थाप्यते । (१) ॥

अनुस्वारो ह्रस्वपूर्व्वोऽध्यर्द्धमात्रा पूर्व्वा चार्द्धमात्रेति ॥ १४८ ॥

'नानुस्वार' इत्यनेन सूत्रेण संयोगपरस्यानुस्वारस्यार्द्धमात्राकाल इत्यवधारितत्वादयमसंयोगपरार्थ आरम्भः । अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्राकालो भवति । पूर्वश्च ह्रस्वोऽर्द्धमात्राकालो भवति यथा । (२) माऽपर्थंऽसो इभ्रुत्राः' । (३) मठं॰ह्ष्ठो मत्सदन्वंसः ॥

दीर्घादर्द्धमात्रा पूर्व्वा चाध्यर्द्धा ॥ १४९ ॥

दीर्घात्स्वरात्परोऽनुस्वारोऽर्द्धमात्राकालो भवति ।

---

(१) किन्नामापत्तित्वं वर्णस्य वर्णान्तरभाव आपत्तिः तत्रोच्चारणकाले विलोमेन मात्रादयः काला भवन्ति द्विवर्णमेकवर्णवद्धारणं कण्ठ्यादिवर्ण एकवर्णवत्सन्धारयेत्संहितायां कर्त्तव्यायामिति सुज्ञैर्ज्ञेयम् ॥

(२) १ । १ ॥

(३) २७ । ४० ॥

यथा (१) मा॑ऽसम् । (२) त्वा॑ऽ ह्नि ॥

द्वियकारम् ॥ १५० ॥

द्वौ यकारौ समाहृतौ द्वियकारम् । इत उत्तरं द्वियकारमधिकृतं वेदितव्यम् ॥

आप्प्याय्यमानो य्मो रय्यै धाय्या रूपꣳ श्रवाय्यं नृपाय्यं पौरुषेय्या हृदय्या सहरय्या निचाय्य सान्नाय्य सन्ताय्येति च ॥ १५१ ॥

एते द्वियकाराः संयोगा भवन्ति । क्रमजस्तृतीयः प्राप्नोति स निषिध्यते । यथा (३) आप्प्याय्यमानो य्मः । (४) रय्यै त्वा पोषाय त्वा । (५) य्जेति धाय्या रूपम् । (६) तन्नो गीर्भिः श्रवाय्यम् । (७)

---

(१) २० । १३ ॥
(२) ३३ । १३ ॥
(३) ८ । ५७ ॥
(४) १४ । २२ ॥
(५) १९ । २४ ॥
(६) १९ । ६४ ॥
(७) २० । ८१ ॥

वर्त्तीं रुद्रा नृपाय्यम् । (१) पौरुषेय्या गृभः । (२) नमो हृदय्याय च । (३) सहरय्या निवर्त्तस्व । (४) अग्नेर्ज्योतिर्निचाय्यं । (५) सान्नाय्य[illegible]तावा अमावास्या । (६) मैत्रः घर्मं सि सन्ताय्यमाने । (७) ॥

एकः ॥ १५२ ॥

इत उत्तरमेकयकाराः संयोगा भवन्तीत्यधि[illegible] वेदितव्यम् । अधिकारसूत्रमेतत् ॥

ज्योतिश्च्यवनः श्येनः श्याम[illegible] श्यामाकाः श्येतो ज्ज्येष्ठो ज्ज्योग्ज्याच्छ्यति ॥ १५३ ॥

एते संयोगा एकयकारा भवन्ति । अस्वरपूर्वार्थ[illegible] आरम्भः । स्वरपूर्वास्तु 'स्वरपूर्वाश्च यचजा' इत्यने-

(१) २१ । ४३ ॥
(२) १६ । ४४ ॥
(३) १२ । १० ॥
(४) ११ । १ ॥
(५) इदमुदाहरणं शतपथब्राह्मणस्य बोध्यम् ॥
(६) ३८ । ५ ॥
(७) अत्र 'स्वरात्सँयोगादि'ना द्वित्वं प्राप्तमनेन निषिध्यते ॥

नैव भेत्स्यन्ति । कस्त्वाच्छ्यतीत्येतदधिकमुदाहरणं विहितम् । प्रचुराण्येवोदाहरणानि । (१) बृहज्ज्योतिः करिष्यतः । (२) दुश्च्यवनः पृतनाषाट् । (३) इन्दुर्दक्षः श्येनऋतावा । (४) श्यामं च मे लोहं च मे । (५) श्यामाकाश्च मे । (६) श्येतो मल्हविः सारस्वतः । (७) यो ह वै ज्यैष्ठ्यं च श्रैष्ठ्यं च । (८) ज्योतिः सन्दृशि जीव्यासम् । (९) ज्याऽयष्ठ० सम्मने । (१०) कस्त्वाऽऽच्छ्यति । इति विहितान्युदाहरणानि । (११) ॥

जुषस्व यविष्ठ्य शोचा यविष्ठ्येति च ॥ १५४ ॥

---

(१) ११ । ३ ॥
(२) १७ । ३९ ॥
(३) १८ । ५३ ॥
(४) १८ । १३ ॥
(५) १८ । १२ ॥
(६) परकीयशाखोदाहरणम् ॥
(७) इदमपि तथा ॥
(८) ३६ । १९ ॥
(९) २९ । ४० ॥
(१०) २३ । ३९ ॥
(११) अस्मिन्सूत्रीयान्तिमोदाहरणे आङो भिन्नपदस्थत्वात्सूत्रकारेण महर्षिणा कात्यायनेन छ्यतीत्येवोदाहरणं प्रकटीकृतमिति सुज्ञैर्बोध्यम् ॥

एतौ द्वौ यविष्ठ्यशब्दसंयोगावेकयकारौ भवतः । (१) तज्जुषस्व यविष्ठ्य । (२) बृहच्छोचा यविष्ठ्य । एताविति किम् । (३) सूर्म्या यविष्ठ ॥

स्येति ण्यत्वं च ॥१५५॥

स्य इत्ययं पदावयवो णत्वं च पदावयवभूतं गृह्यते । एतौ च संयोगावेकयकारौ भवतः । (४) कस्य । (५) यस्य । (६) हिरण्यम् । (७) ओरण्योः कविक्रतुम् ॥

स्वरपूर्वाश्च शचजाः समानपदे द्विरुक्ताः ॥१५६॥

स्वरपूर्वाः शकारचकारजकारा एकस्मिन्पदे वर्त्तमाना द्विरुक्ताः सन्त एकयकारा भवन्ति । यथा (८)

---

(१) ११ । ७३ ॥
(२) ३ । ३ ॥
(३) १७ । ७६ । इदं प्रत्युदाहरणं 'ख' पुस्तके नास्तीति ज्ञेयम् ॥
(४) २३ । ४७ ॥
(५) ७ । २९ ॥
(६) ३४ । ५२ ॥
(७) ४ । २५ ॥
(८) १८ । ७४ ॥

अश्याम तद्कामम्। (१) पश्येम शरदः शतम्। (२) प्राच्यै दिशे। (३) आच्या जानु। (४) भुज्युः सुपर्णः। स्वरपूर्वाः समान पद इति किम्। (५) तन्वन्तुः। (६) तन्नुषस्व। (७)॥

व्यञ्जनपराश्च न ॥१५७॥

व्यञ्जनपराश्च शचजाः चशब्दाद्व्यञ्जनपूर्वा वा द्विरुक्तास्सन्तो यकारा न भवन्ति। (८) अद्दश्रमस्य केतवः। (९) प्रशस्त दर्शतम्। (१०) अर्चीरंषि। (११) कूर्चः। (१२) वञ्जनः। (१३) वर्ज्जयन्ति॥

---

(१) ३६ । २४ ॥

(२) २२ । २४ ॥

(३) १९ । ६२ ॥

(४) १८ । ४२ ॥

(५) ३६ । ३४ ॥

(६) ११ । ७३ ॥

(७) "दीर्घादाचार्य्याणा" मिति पाणिनीयसूत्रेण द्वित्वविधानपक्षे अप्राप्तस्य द्वित्वस्य शकारादेरेकयकारता मा भूदतो द्विरुक्तितोक्तेति विज्ञैर्विभावनीयम् ॥

(८) ८ । ४० ॥

(९) ११ । ३७ ॥

(१०) इदमुदाहरणं शाखान्तरीयम् ॥

(११) इदमपि तथा ॥

(१२) १० । २१ ॥

(१३) इदमपि शाखान्तरीयम् ॥

कश्यपस्यानार्षेये जातूकर्ण्य-स्य ॥ १५८ ॥

कश्यपशब्दस्यार्षेयवर्जं जातूकर्ण्यस्याचार्यस्य मतेन यकारो न भवति एतदुक्तं भवति कश्यपे वाच्ये द्विरुक्तौ सत्यां यकारो न भवति । यथा (१) अपामुद्रो मासाङ्कश्यपः । अनार्षेय इति किम् । (२) त्र्यायुषञ्जमदग्नेः कश्यपस्य । अत्र त्वृष्यभिधानं कश्यपशब्दो जमदग्न्यादिभिः सहोच्चारणात् । जातूकर्ण्यस्येति किम् । (३) कश्यपो रोहित् । 'स्वरपूर्वाश्च शचजा' इत्यस्यापवादः । (४) ॥

उच्चैरज्जुमज्जानश्च ॥ १५९ ॥

उच्चैः रज्जुः मज्जानः इत्येतानि पदानि सयकाराणि न भवन्ति । यथा (५) उच्चैर्घोषाय । (६) वाल्वजी-

---

(१) २४ । ३७ ॥

(२) ३ । ६२ ॥

(३) २४ । ३७ ॥

(४) एवं च यथाशास्त्रं पाठव्यवस्था माध्यन्दिनानां यकारोपधः । काण्वानां केवलशकारोपध एवेति ॥

(५) १६ । १९ ॥

(६) इदं शाखान्तरीयम् ॥

भीरज्जुभिर्व्युता भवति । (१) रज्जुसन्दानमादाय । (२) रज्जुसर्ज्जनम् । (३) अस्थि मज्जानम्मासरैः । इदमपि 'स्वरपूर्व्वाश्च शचजा' इत्यस्यापवादभूतम् ॥

मर्त्तो व्वुरीत मर्त्तेष्वग्निः परो मर्त्तस्ते मर्त्त इति च ॥१६०॥

एते मर्त्तशब्दाः सयकारा न भवन्ति । यथा (४) मर्त्तो व्वुरीत सक्ख्यम् । (५) मर्त्तेष्वग्निरम्मतो निधायि । (६) परो मर्त्तः परः श्वा । (७) यदा ते मर्त्तो ऽअनु । एत इति किम् । (८) देव ऽआ मर्त्त्येष्वा । (९) तन्मर्त्त्यस्य । (१०) सोमो देवो ऽअमर्त्त्यः ॥

अन्तःपदेऽपञ्चमः पञ्चमेषु वि-

---

(१) इदमपि तथा ॥
(२) ३० । ७ ॥
(३) १९ । ८२ ॥
(४) ४ । ८ ॥
(५) १२ । २४ ॥
(६) २१ । ५ ॥
(७) २९ । १८ ॥
(८) ४ । १६ ॥
(९) ३१ । १७ ॥
(१०) २१ । १४ ॥

च्छेदम् ॥ १६१ ॥

पदमध्येऽपञ्चमः स्पर्शः पञ्चमेषु स्पर्शेषु प्रत्ययेषु विच्छेदमापद्यते । विच्छेदो यम इत्यनर्थान्तरम् । रु-क्क्मइत्यत्र 'स्वरात्सँय्योगादि'रित्यादिना ककारस्य द्वि-र्भावे कृतेऽनेन सूत्रेण द्वितीयस्य ककारस्य यम इत्ययं कार्यक्रमः क्रियते । यथा (१) युञ्ज्ञः' । जकारयमौ ञकारश्च संयोगः । (२) दद्ध्भा । दकारधकारयमौ नकारश्च संयोगः । अन्तःपद इति किम् । (३) त्म-न्या समञ्जन् । अत्र द्वित्वाभावात्तकारमकारौ सं-योगः । (४) ॥

---

(१) ८ । ४ ॥

(२) इदमुदाहरणं सूत्रोक्तम्बोध्यम् ॥

(३) २० । ४५ ॥

(४) 'स्वरात्सँय्योगादि' रित्यनेन सूत्रेण द्विर्भूतस्य द्वितीयस्य वर्णस्य यमसञ्ज्ञा भवति । रुक्क्मइत्यत्र यमककारमकाराः संयोगाः । यमाश्चत्वारः । कुंखुंगुंघुं इति । गौतमोऽपि । अथानन्त्याश्चत्वारस्ते यमाः कुंखुंगुंघुं इत्यनन्त्यसंयोगानन्तरपूर्वोऽन्त्यान्तरे व्यवधानवर्जिते तत्र यमा वर्त्तन्ते न सन्देह इति । अनन्तसंयोगमध्ये यमः पूर्वगुण इत्यौदव्रजिरपि । नारदश्च भवेत्पूर्वमन्त्यश्च परतो यदि । तत्र मध्ये यमास्तिष्ठेत्सवर्णः पूर्ववर्णयोः । १ । वर्गान्त्याः शषसैः सार्द्धमन्तस्थैश्चापि संयुतान् । दृष्ट्वा यमा निवर्त्तन्ते आदेशिकमिवाध्वगाः । २ । अयमपि वर्णागमोविधीयतेऽस्माच्छास्त्रात् । चत्वारश्च यमा इति वर्णान्तरत्वेनोपदेशः संयोगशास्त्रात् । भगवता याज्ञवल्क्येन सप्तविधाः संयोगपिण्डा उपदिष्टाः । अयस्पिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो मृत्पिण्डो वायुपिण्डो वज्रपिण्डश्चेति । तल्लक्षणानि च यमान्विद्यादयस्पिण्डान्त्सान्तस्थान्दारुपिण्डकान् । अन्तस्था यमवर्जन्तु ऊर्णापिण्डं विनिर्द्दिशेत् । १ । अन्तस्थयमसंयोगे विशेषो नोपलभ्यते । अशरीरं यमं विद्यादन्तस्थं पिण्डनायकम् । २ । ज्वाला-

ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोषः ॥ १६२ ॥

एवमधस्तनसूत्रेण यमापत्तिं विधायाधुना यत्र यमा नेष्यन्ते तत्र दोषमाह । ऊष्मभ्यः परेषु पञ्चमेषु 'ऊष्मान्तस्थाभ्यश्च स्पर्शा' इत्यनेन सूत्रेण पञ्चमानां स्पर्शानां द्विरुक्तौ कृतायां प्रथमानां स्पर्शानां यमापत्तिः सम्भवति स चात्र दोषः । (१) ॥

पिण्डान्सनासिक्यान्त्सानुस्वारश्च मृण्मये । सोपध्मानान्वायुपिण्डान् जिह्वामूले तु वज्रिणः । ३ । अयस्पिण्डो यथा ८ । १० । पत्न्कीवन् । तकारवर्गसमसंख्ययमककाररूपतकारनकारेकाराः । २३ । २९ । सक्थ्ना । थकारवर्गसमसंख्यखकारप्रतिरूपथकारयमनकाराः संयोगाः । १ । ५ अग्ने इत्यत्र गकारयमगकारनकाराः । १ । १३ । पराजघ्नुः । गकारसमसंख्यघकारनकाराः । यज्ञइत्यत्र जगञाः । अत्र चवर्गतृतीयो जकारस्तस्य संख्यासवर्णो गकारसमावेशः । वर्णक्रमे यकारः जकारपूर्ववर्गसमसंख्यसवर्णयमगकारञकाराः । अत्र जकारयमगकारञकारसंयोगे स्थानकरणपरित्यागेन वर्णान्तरोत्पत्तिः । यथा ताम्रत्रपुसंयोगे कांस्यस्योत्पत्तिरेवम् । वर्गान्त्याः शषसैरिति किम् । उदङ् ध्रक् । अन्तस्थैरिति किम् । वर्ष्मन्पृथिव्याः । दारुपिण्डो यथा अश्वः । सूर्यः । ऊर्णापिण्डो यथा अस्मिन् । अन्यस्मिन् । अमुष्मिन् । ज्वालापिण्डो यथा ब्रह्म । वह्निः । गृह्णानीति । वायुपिण्डो यथा देव सवितः प्र । युञ्जानः प्रथमम् । वज्रपिण्डो यथा दिवः ककुत् । माध्यन्दिनव्यतिरिक्तानां चैतत् । तेषां जिह्वामूलीयोपध्मानीयनिषेधात् । मृत्पिण्डो यथा सँस्कर्त्ता । त्रयस्त्रिꣳशौ । उक्तं च प्रथमेन इकारेण सकारेणैव संयुतम । एतत्स्वारं समासाद्य त्रिणवत्रयस्त्रिꣳशाविति निदर्शनम् । अस्यार्थः । सानुस्वारश्च मृन्मय इत्युपदेशः । प्रथमेन इकारेण अकारेण वा युतेन सकारेण संयुतं एतत्स्वारं अनुस्वारं अनु भवतीत्यनुस्वारं स्वरान् अनुलक्ष्यीकृत्य प्राप्ताऽन्वर्थसञ्ज्ञा । 'स्वरानुगतोऽयोगवाहः ꣳकारविसर्गं उपलभ्य मृत्पिण्डो बोध्य इति ॥

(१) स चात्र दोषस्तम्परिजिहीर्षेत् । यथा प्रश्नः । अत्र नकारसदृशोऽनुनासिकः

स्फोटनं च ककारवर्गे वा स्पर्शात् ॥ १६३ ॥

स्फोटनं च स्पर्शानां दोषमापद्यते ककारवर्गे परभूते । स्फोटनं नाम पिण्डीभूतस्य संयोगस्य पृथगुच्चारणं स्फोटनाख्यो दोषो वा न दोषः । यथा (१) काण्डात्काण्डात् । (२) वषट्कृतम् । (३) युक्तश्लोमानम् । यथा सूत्रकारप्रस्थानं तथा स्फोटनं दोषः 'स्वरात्संय्योगादि'रिति द्विरुक्तेर्विधानं न च स्फोटने सति द्विरुक्तिः सम्भवति तथा चोक्तं याज्ञवल्क्येन "यमान्विद्यादयस्पिण्डान्त्सान्तस्थान्द्वाक्पिण्डवत् । अन्तस्था यमवर्ज्जन्तु ऊष्मपिण्डं विनिर्द्दिशेत्"। यथाऽयस्पिण्डादीनामाश्लेषस्तथैतेषां व्यञ्जनानामिति श्लोकार्थः । (४) ॥

परसवर्णश्च तदुभयं ऊष्मणामनुनासिके परे सति क्रियते चेत्स्थानकरणादसाम्येऽपि कृतं स्यादिति दोषविशेषः । इतरेषां तु स्पर्शत्वस्पृष्टसामान्याद्भवतीत्यदोषः । ऊष्मभ्य इति किम् । अन्तस्थाभ्यो दोषो मा भूत् । प्रति दीव्ने । विविल्म्मने । इत्यत्र वळयोः स्पृष्टत्वाभावेऽपि परेण समानस्थानत्वमन्तरङ्गमस्ति तेनात्र यमापत्तिर्न दोषः सत्यप्यत्रापञ्चमत्वान्न यमव्यवहारः किन्तु क्रमज एवेति बोध्यम् ॥

(१) १३ । २० ॥

(२) ७ । २६ ॥

(३) १९ । ८९ ॥

(४) अत्र यम इव स्फोटनेऽपि स्वरात्संयोगादिरित्यादिना सूत्रेण द्वित्वं न प्रवर्त्तेत इति भावार्थः ॥

स्वरात्स्वरे परे समानपदे जोय-न्नतु ऋकारे ॥ १६४ ॥

वाशब्दो विकल्पार्थः पूर्वसूत्रादिहानुवर्त्तते । स्वरात्परो जकारो वा यकारमापद्यते । स्वरे परभूते समानपदे न तु ऋकारे परे । यथा (१) अजो ह्यग्नेरजनिष्ट । स्वरादिति किम् । (२) अब्जा गोजाः । स्वर इति किम् । (३) भुज्युः । (४) आज्यम् । समानपद इति किम् । (५) तदिन्द्रेण जयत । नत्वृकार इति किम् । (६) विजृम्भमाणाय । (७) ॥

ख्यातेः खयौ कशौ गार्ग्यः सकृख्योक्ख्यमुक्ख्यवर्ज्जम् ॥ १६५ ॥

ख्या प्रकथनइत्यस्य धातोः खकारयकारौ संयो-

(१) १३ । ५१ ॥
(२) १० । २४ ॥
(३) १८ । ४२ ॥
(४) २ । ८ ॥
(५) १७ । ३४ ॥
(६) २२ । ७ ॥
(७) अस्मिन्सूत्रे पूर्वसूत्राद्वापदमनुवर्त्य रूपद्वयं भवति प्रकृतिरूपं संहिताग्रन्थाद्बोध्यं, विकृतिरूपं यथा अयोह्यग्नेः । अजीजनो हि । इदमप्युदाहरणान्तरं बोध्यम् ॥

गमाहुः केचित् । यथा (१) विक्ख्याय चक्षुषा । (२) आक्ख्यातम् । ककारश्चकारौ संयोगार्थं गार्ग्य आह । विक्शाय चक्षुषा । आक्शातम् । एतानि पदानि वर्जयित्वा (३) सक्ख्यम् । (४) उक्ख्यम् । (५) मुक्ख्यम् । अधस्तनयोगे जकारस्य यकारापत्तिरुक्ता या चास्मिन्योगे ख्यातेः क्शापत्तिरुक्ता एते चरकाणां इतरेषां माध्यन्दिनानां न भवत इति । (६) ॥

त्रिपदाद्यावर्त्तमाने सङ्क्रमः ॥ १६६ ॥

'सꣳहितायाम्' मित्यत आरभ्य संहिताया लक्षणं विधायाधुना पदसंहितालक्षणं विधित्सयेदमाह । त्रिपदप्रभृत्यावर्त्तमाने ग्रन्थे सङ्क्रमो भवति । आवर्त्तमानानि पदानि अतिक्रम्यानावर्त्तमानेन पदेन सह सन्धिर्भवतीत्यर्थः । यथा (७) व्ययम् । स्याम । पतयः । रयीणाम् । स्वाहा । रुद्र । यत् । (८) तस्मै । ते ।

(१) ११ । २० ॥

(२) इदं लौकिकोदाहरणं बोध्यम् ॥

(३) समानं ख्यायत इति सख्यम् । न तु सख्युरिदमिति ॥

(४) उत्कर्षेणाख्यायत इति । नतूखायां भव इति ॥

(५) मुदा ख्यायत इति मुख्यः । न तु मुखे भवो मुख्य इति यकारस्यार्थोऽभिप्रेतः ॥

(६) क्शापत्तिस्तु चरकाणां शाखिनां न तु माध्यन्दिनीयशाखिनां भवतीति दिक् ॥

(७) इमान्युदाहरणानि पदपाठस्थानि दशमाध्यायोक्तानि ॥

(८) इदं पदद्वयं पदपाठस्थं ज्ञेयम् ॥

इन्द्रो । हविषा । विधेम । (१) बर्हिषदः । पितरः । (२) इन्द्र । आ । याहि । चित्रभानो । सुताः । इमे । त्वायवः । अण्वीभिः । तना । पूतासः । धिया । इषितः । अयं तावदुत्सर्गः ॥

द्विपदैकपदान्न्यप्यनुवाके ॥ १६७॥

द्वे पदे समाहृते द्विपदं एकं च तत्पदं च एकपदं द्विपदानि च एकपदानि च बहुवचनोपदेशात् त्रिवर्त्तमानानि सङ्क्रम्यन्ते । अतिक्रम्यन्त इत्यर्थः । विराट्त्त इति हि वक्ष्यति । (३) वाजः । च । मे । प्रसवः । प्रयतिः । एकपदं यथा (४) मा । छन्दः । प्रमा । प्रति मा । अनुवाक इति किम् । (५) वसोः । पवित्रम् । असि । द्यौः । पृथिवी । (६) कुक्कुटः । असि । विराट्त्त इति किम् । (७) वृतम् । कृणुत ।

---

(१) इदमपि तथा ॥

(२) २० । तथा ॥

(३) इमानि पदपाठस्य क्रमसन्धानार्थमुदाहरणानि प्रदर्श्यन्ते । १८ । १ ॥

(४) १४ । १४ ॥

(५) १ । २ ॥

(६) १ । १६ ॥

(७) ४ । ११ ॥

व्रतम् । कृणुत । (१) सोम॑: । पवते । सोम॑: । पवते । (२) इषे । त्वा । ऊर्ज्जे । त्वा ॥

अनन्तरे ॥ १६९ ॥

उभयोरपि योगयोरयं योगविशेषः । 'त्रिपदाद्या-वर्त्तमान' इति यदुक्तं तदनन्तरे पुनरुक्तो भवति । आ-नन्तर्य्यं चार्थकृतं शब्दकृतं च गृह्यते । यत्रानन्तरोऽर्थो व्यवहितो वा बुद्धौ विपरिवर्त्तते तदर्थकृतमानन्त-र्य्यम् । यथा (३) गन्धर्व्वः । त्वा । विश्वावसुः । प-रि । दधातु । अरिष्ट्यै । यजमानस्य । परिधिः । असि । अग्निः । इडः । ईडितः । इन्द्रस्य । बा-हुः । असि । दक्षिणः । मित्रावरुणौ । त्वा । अ-नन्तरेऽर्थे एतदुदाहरणम् । व्यवहिते तु । यथा (४) मधुः । च । माधवः । च । वासन्तिकौ । ऋतू । (५) शुक्रः । शुचिः । ग्रैष्मौ । स्वयमातृणाद्यासु एवं स्व-महर्षिणा प्रथमादिचितिषु ऋतव्योपधाने दृष्टासु क-

---

(१) ७ । २० ॥
(२) १ । १ ॥
(३) २ । ३ ॥
(४) १३ । २३ ॥
(५) १४ । ५ ॥

खिडकासु अर्थकृतमानन्तर्यं द्रष्टव्यम् । शब्दकृतं तु यथा (१) हविष्कृत् । आ । इहि । कुक्कुटः । अस्ति 'द्विपदैकपदान्यप्यनुवाके' इत्यत्रार्थानन्तर्यमुच्यते । यथा (२) कः । त्वा । युनक्ति । सः । कस्मै । तस्मै । (३) त्वम् । अग्ने । द्युभिः । आशु शुक्षणिः । (४) याः । ओषधीः । पूर्वाः । जाताः अत्र या इत्येतदोषधिविषयं पदम् । याः फलिनीरित्येतदपि ओषधिविषयं तदर्थव्यवधानान्न लुप्यते । अतो याः । फलिनीः । अफलाः इत्यत्र सन्निधानाल्लुप्यते । यद्येवं अपुष्पाः । याः । पुष्पिणीः । इत्यत्र कस्माद्या इत्येतत्पदं न लुप्यते शृणु । (५) याः । फलिनीः । याः । अफलाः । याः । अपुष्पाः । याः । च । पुष्पिणीः । एवं चत्वारोऽत्र याःशब्दा अर्थदृष्टा भवन्ति । तत्र प्रथमस्य द्वितीयेन सम्बन्धः । तृतीयस्य चतुर्थेन सम्बन्धः । तत्र तृतीयं या इत्येतत्पदं न विद्यत इत्येतस्य ख्यापनार्थं चतुर्थं न लुप्यते या इत्येतत्पदम् । शब्दानन्तर्यं तु यथा (६)

(१) १ । १४ । १५ ॥
(२) १ । ६ ॥
(३) ११ । २४ ॥
(४) १२ । ६६ ॥
(५) १२ । ८० ॥
(६) ३८ । २ ॥

अश्विभ्यां पिन्वस्व सरस्वत्यै । इन्द्राय । स्वाहा । इन्द्रवत् । यः । ते । (१) दिवः । सꣳस्पृशः । पाहि । मधु । गर्भः । देवानाम् । (२) ॥

अपराङ्गे ॥ १७० ॥

अपरस्य अन्यस्याङ्गभूते पुनरुक्ते सङ्क्रमो भवति । यथा (३) स्वाहा । यज्ञम् । मनसः । उरोः । अन्तरिक्षात् । द्यावापृथिवीभ्याम् । वातात् । आ । रभे । अत्र स्वाहाकारः अपराङ्गम् । अपराङ्गत्वाल्लोपः । अपराङ्ग इति किम् । (४) स्वाहा । आकूत्यै । प्रयुजे । अयं च स्वाहाकारः अपराङ्गं न भवति केवलत्वात् ॥

अस्वरविकारे ॥ १७१ ॥

न विद्यते स्वरविकारो यस्मिन्पुनरुक्ते तदस्वरवि-

---

(१) ३७ । ६ । ७ ॥

(२) इदमपि छन्दसि प्रायिकं लक्ष्यानुरोधेन लक्षणानुवर्त्तनं यथा वसोः । पवित्रम् । असि । द्यौः । असि । वसोः । पवित्रम् । असि । शतधारम् । इत्यादीनि पदानि पदपाठे कण्वशाखीया न सङ्क्रमयन्ति अतः कारणात्परम्परया पाठः । उक्तं च पुराणसमुच्चये । सृष्ट्यर्थं ब्रह्मणे प्रादाद्वेदान्मोहनिवृत्तये । आदिनारायणो यत्नान्निर्दयास्तत्त्वदर्शिनः ॥ १ ॥ पुराणेषु स्फुटं ह्येतदुक्तवान्बादरायणः । विवेकयन्प्राणिनश्च बहुलं सूत्रयत्यलम् ॥ २ ॥ इति ॥

(३) ४ । ६ ॥

(४) ४ । ७ ॥

कारं पुनरुक्तं तस्मिन्पुनरुक्ते सङ्क्रमो भवति । यथा (१) तेजः । असि । शुक्रम् । अमृतम् । धाम । नाम । अस्वरविकार इति किम् । (२) सुक्ष्मा । च । असि । शिवा । च । असि । स्योना । (३) देवाः । यज्ञम् । अतन्वत । भेषजम् । (४) यत् । पुरुषेण । हविषा । देवाः । यज्ञम् । अतन्वत ॥

अलिङ्गविकारे ॥ १७२ ॥

लिङ्गविकारो न विद्यते यस्मिन्पुनरुक्ते तदतिक्रम्यते । यथा (५) अग्ने । भागः । असि । दीक्षायाः । आधिपत्यम् । ब्रह्म । स्पृतम् । त्रिवृत् । स्तोमः । इन्द्रस्य । विष्णोः । चत्रम् । पञ्चदशः । अत्र स्पृतशब्दो नपुंसकविषयो नोऽतिक्रम्यते । अलिङ्गविकार इति किम् । (६) आदित्यानाम् । मरुताम् । गर्भाः । स्पृताः । देवस्य । सवितुः । बृहस्पतेः । समीचीः । दिशः । स्पृताः । एकत्र शब्दः पुरुषविषयः । एक-

(१) १ । ३१ ॥
(२) १ । २७ ॥
(३) २० । १० ॥
(४) ३० । १३ ॥
(५) १४ । १९ ॥
(६) १४ । २० ॥

त्र स्त्रीविषयो नो गृह्यतेऽपि न लुप्यते । (१) सम् । ते । पयांꣳसि । सम् । ऊँ । यन्तु । व्वाजाः । इष्टयांनि । अत्र त्रयाणां सम्शब्दानां मध्ये प्रथमो नपुंसकविषयो द्वितीयः पुरुषविषयोऽतो गृह्यते । तृतीयो नपुंसकविषय एव अतो लिङ्गस्याभेदादतिक्रम्यते ॥

असमाने ॥ १७३ ॥

असमानविषये आवर्त्तमाने पुनरुक्ते संक्रमो भवति । यथा (२) आयुः । यज्ञेन । कल्पताम् । प्राणः । चक्षुः । श्रोत्रम् । पृष्ठम् । अत्र आयुरादयो यज्ञश्रुतेरसमानाः । असमान इति किम् । (३) यज्ञो यज्ञेन कल्पताम् । अत्र यज्ञो यज्ञेनेति । यज्ञश्रुतेः समानोऽतो गृह्यते ॥

त्रिरावृत्ते ॥ १७४ ॥

त्रिरावृत्ते पुनरुक्ते संक्रमो भवति । 'द्विपदैकपदान्यप्यनुवाके' इत्यस्यायं शेषः यथा (४) इषे । ऊर्ज्जे । रय्यै । पोषाय । आयुः । त्रिवृत् । त्रिरावृत्त इति कि-

(१) १२ । १०३ ॥

(२) ९ । २० ॥

(३) इयमपि तथा ॥

(४) १४ । १७ ॥

म् । (१) इषे । त्वा । ऊर्ज्जे । त्वा । वायवः ॥

गूढे ॥ १७५ ॥

गूढेऽपि त्रिरावृत्ते सङ्क्रमो भवति । गूढं नाम यत्र तृतीयपदस्यावृत्तिरनुषङ्गापेक्षितत्वात्पदस्याधस्तनपदानुषङ्गेण भवति । यथा (२) इयम् । ते । राट् । यन्ता । असि । यमनः । ध्रुवः । धरुणः । अत्रासिशब्दो यन्ता ध्रुव इत्यनयोः पदयोः संलग्नः पठ्यते । यमनधरुणपदयोस्तु अनुषज्यते । अनुषङ्गापेक्षिणौ हि तौ । अतः स एवं गूढस्त्रिरावर्त्तमानः सत्या द्विरावृत्तौ व्यतिक्रम्यते । गूढ इति किम् । (३) इषे । त्वा । ऊर्ज्जे । त्वा ॥

पदसमूहे ॥ १७६ ॥

पदसमूहः पदसङ्घातः । यत्रैकादि पदं बहु कृत्वा आवर्त्तते स पदसमूहोऽत्राभिप्रेतः । 'त्रिपदाद्यावर्त्तमान' इत्यनेनैवैतस्य गतार्थत्वात् । यथा (४) शतरुद्रियाध्याये । नमो हिरण्यबाहवे सेनान्ये ।

(१) १ । १ ॥ इमान्युदाहरणानि पदपाठाद्बोध्यानि ॥

(२) ९ । २२ ॥

(३) १ । १ ॥

(४) १६ । १७ ॥

(१) वाजः । च । मे । प्रसवः । प्रयतिः । ननु स्वरिति स्वः । च । मे । यज्ञेन । कल्पताम् । इत्यत्र कस्मान्न लोपो भवति । शृणु । अविकारार्थं च पुनरुक्तस्य ग्रहणमित्युपरिष्टाद्वक्ष्यति । तेन सूत्रेणेह पुनरुक्तं गृह्यते । एवमर्थविशेषात्पुनरुक्तस्य ग्रहणं भवति । अर्थसामान्यात्पुनरुक्तस्यातिक्रमः । तथा चोक्तम् । द्रव्यदेवतार्थलिङ्गवचनस्वरकर्तृभेदैः पुनरुक्तस्य ग्रहणं भवति । आह च । पुनरुक्तानि लुप्यन्ते पदानीत्याह शाकलः । अलोप इति गार्ग्यस्य काण्वस्यार्थवशादिति । (२) ॥

सꣳहितायाम् ॥ १७८ ॥

आर्ष्यां च संहितायां पुनरुक्ते आवर्त्तमाने सङ्क्रमो भवति । यथा (३) लोकन्ता ऽइन्द्रम् । (४) हिरण्यगर्भ ऽइत्येषः (५) मा मा हिꣳसीदित्येषा (६) य-

---

(१) १८ । १ ॥

(२) एकादिपदं समूह्यते समुदाह्रियते बहूनि पदानि वा कृत्वाऽऽवर्त्यते स पदसमूहइत्युच्यते तत्र सङ्क्रमो भवति । इदं सूत्रं 'द्विपदैकपदान्यप्यनुवाक' इत्यस्यापवादभूतम् । एवमर्थविशेषसामान्याभ्यां पुनरुक्तस्य संक्रमासंक्रमौ ज्ञेयाविति ॥

(३) १२ । ५४ । लोकं पृण । १२ । ५५ । ता ऽअस्य १२ । ५६ । इन्द्रँविश्वाः ॥

(४) ३२ । ३ । २४ । १० । ११ । १२ । १३ ॥

(५) १२ । १०२ ॥

(६) ८ । ३६ । ३७ ॥

स्मान्न जात ऽइत्येषः) । एवं च कृत्वा ब्रह्मयज्ञसंहितायां गलिता ऋचोऽध्येतव्याः । ब्रह्मयज्ञसंहितायाः परिपूर्णतायै इति बोध्यम् । (१) ॥

अवसानार्थं पुनर्ग्रहणम् ॥ १७८ ॥

एवमधस्तादर्थनिबन्धनं पुनरुक्तस्य ग्रहणं चोक्त्वेदानीं संहितार्थमाह । संहिताऽवसानार्थं च न पुनरुक्तस्य ग्रहणं भवति । यथा (२) आकूत्यै । प्रयुजे । अग्नये । स्वाहा । मेधायै । मनसे । दीक्षायै । तपसे । सरस्वत्यै । पूष्णे । अग्नये । स्वाहा । अग्नये स्वाहेत्येतदत्र पुनरुक्तमवसानार्थं गृह्यते । बृहस्पतये । हविषा । विधेम । स्वाहा । नात्रावसानादन्यत्प्रयोजनमस्तीति ॥

अविकारार्थं च ॥ १७९ ॥

पदाविकारज्ञापनार्थं च पुनरुक्तं गृह्यते । यथा (३) इषाय । ऊर्ज्जाय । स्वरिति स्वः । स्वाहा । मूर्द्ध्ने व्यश्नुविने । अत्र स्वरित्येतस्य पदस्य परतो यत्स्वा-

(१) एवं 'तम्प्रत्क्नथायँव्वेन' इत्यादिषु सर्वानुक्रमोक्तसूत्रात "एताः प्रतीकचोदिता ब्रह्मयज्ञेऽध्येतव्याः सर्वत्रैव कात्यायनमहर्षिणा प्रतिपादितमिति ॥

(२) इमान्यप्युदाहरणानि पदपाठादवगन्तव्यानि ॥

(३) २२ । २७ ॥

हाकारस्य ग्रहणं तदविकारार्थम् । यदिह स्वाहाकारो लुप्यते । तदा क्रमसंहितायामप्यस्य पदस्य विकारः स्यात् । (१) स्वर्म्मूर्द्धन्नै । मूर्द्धन्नै व्व्यश्नुविने । तथा च सति हष्टरेफत्वादस्य पदस्य क्रमसंहितायां वेष्टको न स्यात् । अतः पदक्रमसंहिताया विकारार्थं स्वाहेत्यस्य पदस्य ग्रहणम् । (२) ॥

उत्सर्गश्च ॥ १८० ॥

उत्सर्गः परित्यागः । परित्यागस्याधस्तनसूत्रविहितस्य लक्षणस्य भवति । केषां चिदाचार्याणां मतेन । यथा (३) स्वर्म्मूर्द्धन्नै । मूर्द्धन्नै व्व्यश्नुविने । एवं च कृत्वा विकल्पेनैतल्लक्षणम् । (४) ॥

क्रमः स्मृतिप्रयोजनः ॥ १८० ॥

क्रम इत्ययमधिकार आऽध्यायपरिसमाप्तेः । संहिताध्ययने प्रयोजनं प्रसिद्धम् । यज्ञे स्वाध्याये च संहि-

---

(१) इदमपि तथा ॥

(२) यथा माध्यन्दिनशाखिनामुदाहरणम् । अत्र स्वरित्येतस्य परतो यत्स्वाहाकारग्रहणं तत्पदाधिकारार्थं बोध्यम् । यदेह स्वाहाकारशब्दस्य लोपः स्यात्तदा क्रमसंहिताया वाचको न स्यात् । अतः कारणात् क्रमसंहिताधिकारसंरक्षणार्थं स्वाहेत्यस्य पदस्य ग्रहणे विकारः स्यात् । इत्यवगन्तव्यं बुधैः ॥

(३) पूर्वोक्तमुदाहरणम् ॥

(४) पूर्वोक्तलक्षणांशस्य परित्यागः काण्वादिशाखिनां मतेन अन्येषां शाखिनां मतेन यथाशास्त्रं पाठो बोध्यः ॥

तायाः सम्बन्धात्पदाध्ययने संहितार्थपरिज्ञानं प्रयोजनमिति गम्यते । उक्तं च भाष्यकारेण "पदानि स्वं स्वमर्थङ्गमयन्तीति" । पदानि स्वं स्वमर्थमभिधाय चित्तवृत्तिव्यापाराद्वाक्यार्थमवगमयन्ति । अथेदानीं पदार्था अवगताः वाक्यार्थमवगमयन्तीति पदपूर्वकं पदार्थपरिज्ञानं पदार्थपरिज्ञानपूर्वकवाक्यार्थपरिज्ञानं दर्शयति । एवं संहितापाठे पदपाठे च प्रसिद्धं प्रयोजनम् । न तथा क्रमपाठ इत्यत आह । स्मृतिः प्रयोजन इति । स्मृतिः प्रयोजनमस्येति स्मृतिप्रयोजनः । संहिताविषयं दृढस्मरणं करोति पदविषयं च । प्रयोजनदिगियं सूत्रकृता प्रदर्शिता । प्रयोजनानि तु अन्यान्यानि बहूनि यथा द्वयोर्द्वयोः पदयोर्वर्णसंहितोदात्तादिस्वरसंहिता च क्रमं मुक्त्वा नान्येन ज्ञायते । संहितावसानं च । उत्तमं चैतत् । पदकारणं क्रमः, क्रमणं क्रमः, सम्मानं च शिष्टानां मध्ये क्रमं करोति । व्याकरणस्मृतिश्च क्रमाध्यायिनि प्रत्ययं विदधाति । तदधीते तद्वेद इत्युपक्रम्य "क्रमादिभ्यो वुन्निति" अत्र क्रममधीते क्रमकः । पदमधीते पदकः । सिद्धक्रमस्याध्ययनं दर्शयति । अतो हि क्रमो बहुप्रयोजनवान् (१) ॥

---

(१) एवं क्रमपाठस्य प्रयोजनं वर्णयित्वा त्रयाणामार्षीसंहितापदसंहिताक्रमसंहितानां पठने यत्फलं भवति तन्महर्षिणा कात्यायनगुरुणा योगियाज्ञवल्क्येन स्वशिक्षायां प्रतिपादितं यथा "संहिता नयते सूर्यं पदानि शशिनः पदम् । क्रमोऽपि नयते सू-

द्वे द्वे पदे सन्दधात्युत्तरेणोत्तरमाऽव-सानादपृक्तवर्ज्जम् ॥१८२॥

द्वे द्वे पदे सन्दधाति कथं सन्दधाति उत्तरेणोत्तरं पदं सन्दधाति । ततस्तेनान्यदुत्तरमेवमवसानं यावत् अपृक्तं वर्ज्जयित्वा । अपृक्ते वक्ष्यति । यथा (१) उपत्त्वा । त्वाऽग्ने । अग्ने हविष्मतीः । हविष्मतीर्घृताचीः । घृताचीर्यन्तु । यन्तुहर्य्यत । हर्य्यतेति हर्य्यत । अपृक्तमिति किम् । (२) सोमाय हꣳसान् । हꣳसानालभते । आलभते । (३) कर्म्मणऽआप्यायध्वम् । आप्यायध्वम् । प्यायध्वमघ्न्याः । (४) उदुत्त्वा । ऊँऽ इत्यूँ । त्वा । विश्वे । (५) उदुत्त्यम् । ऊँऽ इत्यूँ । त्यम् । जातवेदसम् । (६) तमुत्त्वा । ऊँऽ इत्यूँ । त्वा । दध्य-

क्षमैंत्यत्तत्पदमनामय" मिति । सन्धीयन्ते पदानि यस्यां सा संहिता तल्लक्षणं प्रथमाध्याये 'वर्णानामेकप्राणयोगः संहितेत्य'नेनसूत्रेणोक्तं सा पादसंहिता ऋक्षु भवति यजुष्ष्वपि भवति । एवं पदसंहिता लक्षणं 'पदविच्छेदोऽसंꣳहित' इत्यनेन शास्त्रेण च प्रतिपादितमिदानीं वक्ष्यमाणसूत्रेण द्विपदक्रमसंहितोच्यते ॥

(१) ३ । ४ ॥
(२) २४ । २२ ॥
(३) १ । १ ॥
(४) १२ । २७ ॥
(५) ७ । ४१ ॥
(६) ११ । ३० ॥

ङ् । (१) ॥

अपृक्तमध्यानि त्रीणि स त्रिक्रमः ॥१८२॥

अपृक्त आकार उकारश्च अपृक्त एषां मध्य इत्यपृक्तमध्यानि तद्गुणसंविज्ञानो बहुव्रीहिः । लम्बकर्णवत् । त्रीणिमध्यानि स त्रिक्रमो भवति । यथा (२) सोमाय हꣳसान् । हꣳ सानालभते । आलभते । (३) कर्मणऽआ प्यायध्वम् । आ प्यायध्वम् । (४) उदुत्वा । उँ ऽइत्यू । त्वा विश्वे । (५) तमु त्वा । उँ इत्यू । त्वा दध्यङ् ॥

पुनराकारेणोत्तरम् ॥ १८३ ॥

आकार उकारश्चापृक्तौ तयोरुकारस्य प्रगृह्यत्वादुपरिष्टाद्वेष्टकं वक्ष्यति । आकारस्य यद्वक्तव्यं तदाह त्रिक्रमं कृत्वा पुनराकारेणोत्तरं पदं सन्दधाति । य-

---

(१) एतदुत्तरं आ उ इत्यपृक्तवर्णमध्यकं पदत्रयात्मकं वक्ष्यमाणसूत्रोदाहरणं चोच्यते ॥

(२) २४ । २२ ॥

(३) १ । १ ॥

(४) ११ । २७ ॥

(५) ११ । २९ ॥

था (१) सोमाय हꣳसान् । हꣳसानालभते । आ लभते । (२) कर्म्मण ऽआ प्यायद्ध्वम् । आ प्यायद्ध्वम् । (३) ॥

मोषूणाभिषुणौ च ॥ १८४ ॥

एतौ त्रिक्रमौ भवतः । यथा (४) मोषूण÷ । मो ऽइति मो । सु न÷ । नऽइन्द्र । (५) अभी षुण÷ । सु न÷ । नः सखीनाम् ॥

चत्वार्य्यपृक्तपूर्व्वे नकारपरे सौ ॥ १८५ ॥

चत्वारि पदानि सन्दधाति सुइत्येतस्मिन्पदेऽपृक्तपूर्व्वे नकारपरे च । यथा (६) ऊर्द्ध्व ऽऊषुण÷ । ऊँ ऽ-

---

(१) पूर्वोक्तप्रथमाङ्कस्य पदोदाहरणं द्रष्टव्यम् ॥

(२) तथैव द्वितीयाङ्कोदाहरणम् ॥

(३) आकारेणेति पदं कथं सूत्रे उपात्तं नो चेत्तदा 'उदुत्वा' इत्यस्मिन्नुदाहरणे पुनः पदपाठीयवेष्टनात्मकस्यापृक्तसञ्ज्ञकस्य स्वेति पदेन सहोच्चारणं भविष्यत्यतः पदपाठस्यान्यथोच्चारणे दोषो मा भूदतो ग्रहणं सूत्रे कृतमिति ॥

(४) ३ । ४५ ॥

(५) २७ । ४० ॥

(६) ११ । ३९ ॥

इत्यूँ । सु नः । न ऽऊतये । (१) एताद्दचासऽऊषुणः । ऊँ ऽइत्यूँ । सु नः । नः सदचासः । (२) गोमदूषुणासत्या । गोमदिति गो । मत् । ऊँ ऽइत्यूँ । सुना-सत्या । नासत्याश्वावत् ॥

मकारपरे चैके ॥१८६॥

सु इत्येतस्मिन् पदे अष्टत्वपूर्वे मकारपरे च एके आचार्याश्चत्वारि पदानि सन्दधति । यथा (३) मही-मूषु मातरम् । ऊँ ऽइत्यूँ । सु मातरम् । मातरꣳ सुव्रतानाम् । मकारपर इति जघन्यश्चायमेकीयः पक्षः । यतश्चतुःक्रमेषु सर्वेषु पूर्वो भावी उत्तरं सुपदं ततो नकारादिपदम् । यथा (४) गोमत् । ऊ । सु । नास-त्येति । तत्र उकारो भावी सुपदस्य षत्वे निमित्तम् । सुपदे षत्वं नकारादौ पदे णत्वे निमित्तम् । तत्र यदि चतुःक्रमो न स्यात्तर्हि णत्वं विहन्येत । ततस्तु आर्षी संहिता न स्यात् । चतुःक्रमे तु सा स्मृता भवति । न च कश्चिदिह सुशब्दं विना मकारादेः पदस्य विकारः

---

(१) १७ । ७७ ॥

(२) २० । ८२ ॥

(३) २१ । ४ ॥

(४) पूर्वोक्तद्वादशाङ्कपदपाठोदाहरणं ज्ञेयम् ॥

सम्भवति । अतस्त्रिक्रम एवायम् । (१) मह्हीमूषु । ऊँ ऽइत्यूँ । सु मातरम् । एवं त्रिक्रमेष्वपि प्रयोजनान्यन्वेष्टव्यानि । (२) ॥

पुनः सुपदेनोत्तरम् ॥१८७॥

यत्र सुपदनिमित्तस्त्रिक्रमश्चतुःक्रमो वा कृतस्तत्र पुनः सुपदेनोत्तरं पदं सन्दधाति । यथा (३) मो षूणः । मो ऽइति मो । सुनः । (४) अभीषुणः । नः सखीनाम् । (५) गोमदूषुणासत्या । गोमदिति गो । मत् । ऊँऽइत्यूँ । सु नासत्या ॥

पूर्वस्योत्तरसंहितस्य स्थितोपस्थितमवगृह्यस्य ॥ १८८॥

एवं द्वित्रिक्रमाद्यनन्तरं परिशिष्टं क्रमविधिमाह । पूर्वस्योत्तरपदस्य त्रिपदचतुष्क्रमसम्बद्धस्य सतः पश्चात्स्थितोपस्थितं कर्त्तव्यम् । स्थितोपस्थितशब्देन वेष्ट-

(१) पूर्वोक्तमुदाहरणम् ॥

(२) अस्मिन्सूत्रे एकेग्रहणात्कण्वशाखीयाश्चतुःक्रमं पठन्ति । न माध्यन्दिनशाखीयाः पठन्ति । यथाशाखीयानां पाठो बोध्यः । एवं चतुष्क्रमे विषयेऽपि प्रयोजनं बुधैर्मृग्यमिति ॥

(३) ३ । ४५ ॥

(४) २७ । ४० ॥

(५) २० । ७२ ॥

कोऽभिधीयते । यथा (१) श्रेष्ठतमाय कर्म्मणे । श्रेष्ठतमायेति श्रेष्ठ । तमाय । (२) उपप्रयन्तो ऽअध्वरम् । उपप्रयन्त ऽइत्युप । प्रयन्तः । एतच्च पदप्रदर्शनार्थं क्रियते ॥

सुपदे शाकटायनः ॥ १८९ ॥

सुपदे स्थितोपस्थितं शाकटायन आचार्यो मन्यते । पूर्व्वस्योत्तरसंहितस्येति वर्त्तते । यथा (३) गो षूणः । गो ऽइति गो । स्विति सु । (४) गोमदूषु णासत्या । गोमदिति गो । मत् । ऊ ऽइत्यू । स्विति सु । एतच्च पदस्वरूपज्ञापनार्थं विनापि वेष्टकेन पदस्वरूपं ज्ञायते इति शाकटायनमतं न साधीयः ॥

अन्तःपददीर्घीभावे ॥ १९० ॥

पूर्व्वस्योत्तरसंहितस्य स्थितोपस्थितमिति वर्त्तते । पदमध्ये दीर्घीभावोऽन्तःपददीर्घीभावस्तस्मिन्नन्तःपददीर्घीभावे पूर्वस्योत्तरसंहितस्य स्थितोपस्थितं कर्त्तव्यम् । यथा (५) मामहन्तामदितिः । ममहन्तामिति

(१) १ । १ ॥
(२) ३ । ११ ॥
(३) ३ । ४५ ॥
(४) २० । ७२ ॥
(५) ३३ । ३८ ॥

समइन्ताम् । (१) सादन्न्यं विदथ्यम् । सदन्न्यमिति सदन्न्यम् ॥

विनामे ॥१९१॥

पूर्व्वस्योत्तरसंहितस्य स्थितोपस्थितमिति वर्त्तते। विनामशब्देन दन्त्यस्य मूर्द्धन्यभाव उच्यते। विनामश्चैष इत्थंभूतो गृह्यते। यत्र निमित्तनैमित्तिकावेकपदस्थौ भवतः पूर्वपदस्य विनामे उत्तरपदसंहितस्य स्थितोपस्थितं कर्त्तव्यम्। यथा (२) सिषासन्तो वनामहे। सिसासन्त ऽइति सिसासन्तः। (३) सुषाव सोमम्। सुसावेति सुसाव ॥

प्रगृह्ये ॥ १९२ ॥

'प्रगृह्य' मित्यधिकृत्य यद्विहितं तस्यायं विधिः। पूर्व्वस्योत्तरसंहितस्य स्थितोपस्थितमिति वर्त्तते। पूर्वे प्रगृह्ये उत्तरपदसंहिते स्थितोपस्थितं कर्त्तव्यम्। यथा (४) इन्द्राग्नी ऽअपात्। इन्द्राग्नी ऽइतीन्द्राग्नी।

---

(१) ३४ । २१ ॥
(२) २६ । १७ ॥
(३) १९ । २ ॥
(४) ३३ । ८३ ॥

(१) उद्वुत्त्वा । ऊँ ऽइत्यूँ । त्वा व्विश्वे (२) अमी रो-चने । अमी ऽइत्यमी । रोचने दिवः) ॥

रिफिते निरुक्ते ॥ १९३ ॥

'विसर्ज्जनीयो रिफित' इत्यस्मिन्नधिकारे यानि रिफितानि पदानि विहितानि तेषामत्र ग्रहणम् । 'पूर्व्वस्योत्तरसं०हितस्य स्थितोपस्थित' मिति वर्त्तते । सप्तमीकृतविभक्तिव्यत्ययम् । पूर्व्वे रिफिते पदे निरुक्ते संहितायामनिर्ज्ञातरेफे उत्तरपदसंहिते स्थितोपस्थितं कर्त्तव्यम् । यथा (३) अन्तस्ते । अन्तरित्यन्तः) । ते द्यावापृथिवी । (४) नेष्टुः पिब । नेष्टुरिति नेष्टुः । पिब ऽऋतुना । सर्व्वे एते वेष्टकाः पदप्रकृतिज्ञापनार्थाः ॥

अवसाने च ॥ १९४ ॥

"विरामोऽवसान"मित्युच्यते । अवसाने विरामे स्थितोपस्थितं कर्त्तव्यम् । संहितावसानज्ञापनार्थम् । (५) अग्नये जातवेदसे । जातवेदसऽइति जात । वेदसे ॥

---

(१) १२ । २७ ॥

(२) १३ । ७ । इमान्यप्युदाहरणानि पदपाठाद्बोद्धव्यानीति ॥

(३) ७ । ५ ॥

(४) २६ । २० ॥

(५) ३ । २ ॥

यथासमाम्नातं क्रमावसानंऽ सङ्क्रमेषु ॥ १९५ ॥

अवसाने सन्धिः सङ्क्रम इत्युच्यते । गलत्पदमतिक्रम्यागलता सह सन्धानं सङ्क्रमः । क्रमसन्धिविषयभूतेषु येन प्रकारेण क्रमावसानं परिपठितं तेनैव भवति । यथा (१) विश्वधा÷ परमेण । ह्वार्षीच्छतधारम् । अधस्तनसूत्रापवादः । (२) ॥

---

(१) १ । २ । ३ ॥

(२) अनेनैव सूत्रेण यस्मिन्मन्त्रेऽवसानं न भवति पदानां क्रमपाठे तत्सन्देहापनोदार्थं प्रसङ्गाच्चत्वारिंशदध्यायोक्तानि क्रमसन्धानानि प्रदर्श्यन्ते । विश्वधाः परमेण । १ । ह्वार्षीच्छतधारम् । २ । सहस्रधारन्देवः । ३ । अधुक्षः सा । ४ विश्वधाया ऽइन्द्रस्य । ५ । राध्यतामिदम् । ६ । एमि कः । ७ । तस्मै कर्म्मणे । ८ । वाम्प्रत्युष्टम् । ९ । अरातय ऽउरु । १० । एमि धूः । ११ । धूर्वामो देवानाम् । १२ । देवहूतममहुतम् । १३ । हविर्द्धानँविष्णुः । १४ । हस्ताभ्यामग्नये । १५ । गृह्णामि भूताय । १६ । रश्मिमभिर्द्दैवीः । १७ । देवयुवँद्युष्मा: । १८ । स्थाग्नये । १९ । अग्नीषोमाभ्यां दैव्याय । २० । वेरवाहूः । २१ । वेरवग्नेः । २२ । शमीष्व हविष्कृत् । २३ । इहि कुक्कुटः । २४ । वह दधुवम् । २५ । वधायाग्ने । २६ । अन्तरिक्षं धर्त्रम् । २७ । दिवँविश्वाभ्यः । २८ । वेत्तु धान्यम् । २९ । व्यानाय दीर्घाम् । ३० । रसेन रेवती(ः । ३१ । पृच्यन्तां जनयत्यै । ३२ वधः पृथिवि । ३३ । मौगप । ३४ । वध्यासमररो । ३५ । स्कन्गायत्रेण । ३६ । जागतेन सुक्ष्मा । ३७ । साङ्जर्म्यानिशिता । ३८ । माज्जर्म्यदित्यै । ३९ । पश्यामग्नेः । ४० । यजुषेयजुषे सवितुः । ४१ । स्वा । तेजं÷ । ४२ । इति द्विचत्वारिंशत्प्रथमाध्याये ॥

गन्धर्वैः । ईडित ऽइन्द्रस्य । २ । दक्षिणो मित्रावरुणौ । ३ । अभिशस्त्यै स-

वृद्धँव्वृद्धिः ॥ १९६ ॥

इत्युक्तार्थम् ॥

वितुः । ४ । ध्रुवा ध्रुवा । ५ । माञ्जिर्मे नमः । ६ । सचन्तामस्म्माकम् । ७ । अश्नाम्म्येतम् । ८ । ब्रह्म्मणे तेन । ९ । ऊहाम्म्यग्नीषोमौ । १० । ऊहामीन्द्राग्ग्न्योः । ११ । इन्द्राग्ग्न्योरिन्द्राग्ग्नी । १२ । इन्द्राग्ग्नी व्वसुभ्यः । १३ । अवतान्व्यन्तु । १४ । मरुद्भिरिन्द्रः । १५ । तस्म्मै पोषाय । १६ । व्वर्च्चोग्ग्ने । १७ । हिमा ऽअचारिषम् । १८ । व्वेदिषदो ये । १९ । इत्येकोनविंशतिर्द्वितीयाध्याये । उषसा सूर्य्यः । १ । गृहपते पुरीष्यः । २ । पतिवेदनमितः । ३ । इति त्रीणि तृतीयाध्याये ॥ चतुर्थेऽध्याये क्रमसन्धानाभावः । पुरूरवामन्थामि । १ । रजः शया हरिशया । २ । देववीतये सिर्ठं॰ हि । ३ । ध्रुवो व्वैष्णवम् । ४ । ध्रुव ऽऐन्द्रम् । ५ । हव्यवाहनः श्वात्रः । ६ । अभूग्रथायथम् । ७ । इति सप्त पञ्चमाध्याये ॥ षष्ठे ऽध्याये क्रमसन्धानाभावः । मादयस्वोदानाय । १ । भून्महेन्द्राय । २ । इति द्वे क्रमसन्धाने सप्तमेऽध्याये ॥ अष्टमेऽध्याये क्रमसन्धानाभावः । इन्द्रस्य सत्यप्प्रसवसः । १ । इन्द्रँव्वाजाजितः । २ । इति द्वे नवमाध्याये ॥ इति दशमाध्याये क्रमसन्धानाभावः । जागतेन हस्ते । १ हिरण्ययीमानुष्टुभेन । २ । इति द्वे एकादशाध्याये । परिचिक्रोकम् । १ । इत्येकं द्वादशे । दिशामि साहस्रम् । गवयुमूर्णायुम् । २ । उष्ट्रमजः । ३ । शरभन्त्वम् । ४ । इति चत्वारि त्रयोदशेऽध्याये ॥ अन्तरिक्षँव्वायुः । १ । व्वायूराज्ञी । बृहती नभः । इति त्रीणि चतुर्द्दशाध्याये ॥ अग्ग्नेरेवः । १ । रथे चित्रो मेनका । २ । असमरथः प्प्रम्म्लोचन्ती । ३ । अरिष्टनेमिर्व्विश्वाची । ४ । सुषेण ऽउर्व्वशी । शैशिरौ परमेष्ठी । ६ । दिवः सूर्य्यः । ७ । दिवं ध्रुवे । इत्यष्टौ क्रमसन्धानानि पञ्चदशाध्याये । षोडशसप्तदशाध्याये क्रमसन्धानाभावः ॥ स्वस्तोमः । १ । रथन्तरँव्वेट् । इति द्वे अऽष्टादशे ॥ ऊनविंशतिमेऽभावः । व्वायुर्ज्जग्ग्मत् । १ । स्वप्ने सूर्य्यँ । २ । शूद्रेऽर्य्ये । ३ । आपोऽयक्षि । ४ । इति चत्वारि विंशतिमेऽध्याये ॥ एकविंशतिमेऽध्याये क्रमसन्धानाभावः ॥ स्वाहाकृतः स्वगा । १ । प्राणाय यज्ञे । २ । इति द्वे द्वाविंशेऽध्याये ॥ चतुष्प्पदश्चन्द्रमाः । १ । चन्द्रमारात्री । २ । व्वायुः सूर्य्यः । ३ । इति त्रीणि त्रयोविंशेऽध्याये ॥ चतुर्विंशतिपञ्चविंशतिषड्विंशतिशप्तविंशत्यध्यायेषु क्रमसन्धानाभावो बोध्यः ॥ शुचिमुष्णहा । १ । देवी त्रिष्टुभा । २ । इति द्वे अष्टाविंशाध्याये ॥ एकोनत्रिंशत्रिंशदेकत्रिंशद्द्वात्रिंशत्त्रयस्त्रि-

इति कात्यायनकृते प्रातिशाख्यसूत्रे चतुर्थोऽध्यायः ॥ ४ ॥

इत्यानन्दपुरवास्तव्यवज्रटसूनुनोव्वटेन कृते मातृमोदाख्ये प्रातिशाख्यभाष्ये चतुर्थोऽध्यायः समाप्तः ॥

समासेऽवग्रहो ह्रस्वसमकालः ॥ १ ॥

संहितापदलक्षणं वक्तव्यमिति शास्त्रमारब्धं कात्यायनेनाचार्य्येण तत्र संहितायामित्यधिकृत्य 'पदान्तपदाद्योः सन्धि'रित्यादिना ग्रन्थेन संहितालक्षणमशेषमुक्तं तथा 'क्रमः स्मृतिप्रयोजन' इत्यादिना ग्रन्थेन क्रमलक्षणमुक्तम् । तथाऽ'र्थः पद' मिति पदलक्षणमुक्तम् । स्वरश्च 'स्वरितवर्ज्जमेकोदात्तं पद'मित्यनेनाध्यायेन विहितः । अर्थविशेषाच्चतुःप्रकारं तत्पदं भवतीत्युपरिष्टाद्वक्ष्यति । 'क्रियावाचकमाख्यातमुपस-

शत्पंचत्रिंशत्स्वध्यायेषु न सन्तीति क्रमसन्धानानि बुधैर्बोध्यानि ॥ ऊतिभिः कया । १ । ईक्षऽईक्षामहे । २ । इति द्वे षट्त्रिंशदध्याये । पाहि मधु । १ । स्वाहा रात्रिः । २ । इति द्वे सप्तत्रिंशेऽध्याये ॥ सरस्वत्यसौ । १ । इत्येकमष्टत्रिंशेऽध्याये ॥ एकोनचत्वारिंशेऽध्याये क्रमसन्धानाभावः ॥ अविद्यां विद्यायाम् । १ । ऊँ ३ क्रतो । क्रतोस्मर क्रतोऽइतिक्रतो । स्मर क्लिबे । ३। क्लिबे कृतम् । इति चत्वारि क्रमसन्धानानि चत्वारिंशेऽध्याये ॥ इति सर्वमेकीकृत्य । ११५ । पञ्चदशाधिकैकशतसङ्ख्याकानि क्रमसन्धानानि ज्ञेयानि ॥ एभ्योऽन्यत्र आर्षसंहितावसानानुसारेण निर्णयोऽवधार्य्यः ॥ इति क्रमसंहितायामयन्नियमः । क्रमपूर्वाएवाष्टौ विकृतयो व्याडिमहर्षिणा प्रतिपादितास्ता ग्रन्थान्ते सोदाहरणलक्षणा दास्यामो वयमिति ॥

र्गो विशेषकृत् ॥ सत्त्वाभिधायकं नाम निपातः पादपूरण' इति तत्राख्यातं भवति यथा पाहि। रच्छ यज। यच्छेति,। उपसर्गा भवन्ति यथा। 'परोपापावप्रतिपरी'त्यादयः। निपाता भवन्ति यथा। 'वा च कमुचितसमस्मादि'त्यादयः। नाम त्रिप्रकारं भवति। कृत्तद्धितसमाससञ्ज्ञाभेदेन भिन्नम्। कृतः। यज्ञः वेदः। याज्ञा। भूतिः। तद्धिताः। आग्नेयः। अग्नीषोमीयः। ऐन्द्राग्नः। वैश्वदेवः। समासा भवन्ति यथा विश्वकर्म्मा विमनाः। विहायाः। सहङ्। तत्र समासपदेऽवग्रहो भवति द्वयोः पदयोर्बहूनां वा परस्पराकाङ्क्षया सम्बद्धानां यत्र द्वित्र्यादिपदसमूहोच्चारणं स समासः। स च समासश्चतुःप्रकारो भवति यथा अव्ययीभावतत्पुरुषद्वन्द्वबहुब्रीहयः। तत्र पूर्वपदप्रधानोऽव्ययीभावः। यथा समम्भूमि। विष्णुरूपम्। अन्तःपदम्। अनुरूपम्। उत्तरप्रधानस्तत्पुरुषः। यथा अवशंठंसः। व्रतपते। आखरेष्ठः। उपप्रयन्तः। उभयपदप्रधानो द्वन्द्वः। यथा अग्नीषोमौ। इन्द्राग्नी। मित्रावरुणौ। दीक्षातपसोः। अन्यपदप्रधानो बहुब्रीहिः। यथा अनमीवाः। कृष्णग्रीवाः। शितिकक्षः। एवमेतस्मिंश्चतुःप्रकारेऽपि समासपदेऽवग्रहो भवति। द्वयोः पदयोः पृथग्ग्रहणमवग्रहः। नाना ग्रह इत्यर्थः। स च ह्रस्वसमकालो

ह्रस्वाक्षरतुल्यकालो भवति । यथा (१) ऋटक्सामाभ्यामित्यृक् । सामाभ्याम् । सन्तरन्त ऽइति सम् । तरन्तः । अधिकारसूत्रमेतत् ॥

तरतमयोश्चातिशयेऽदक्षिणप्रत्यासङ्गे ॥ २ ॥

तरतमयोश्च प्रत्यययोः परभूतयोरतिशयवाचिनोरवग्रहो भवति । न चेद्दक्षिणशब्दस्तत्र प्रत्यासक्तो भवति । यथा (२) पूर्णतरमिति पूर्ण । तरम् । (३) वह्नितममिति वह्नि । तमम् । (४) सस्नितममिति सस्नि । तमम् । अतिशय इति किम् । (५) कारोतरेण दधतः । (६) यदा पिपेष मातरम् । अदक्षिणप्रत्यासङ्ग इति किम् । (७) द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषान्देवानामुत्तरम् । असमासार्थश्चारम्भः ॥

---

(१) ४ । १ ॥
(२) १८ । १० ॥
(३) १ । ८ ॥
(४) इदं पदपाठस्योदाहरणं तथा ॥
(५) १९ । ८० ॥
(६) १९ । ८ ॥
(७) २५ । ५ ॥

श्वीतमह्रुतमसूतमगोपातमरक्ष्नधातमश्वसुधातमाः पूर्व्वेण ॥ ३ ॥

एतानि पदानि तमपः पूर्वेण पदेनावगृह्यन्ते । श्वीतम यथा (१) देववीतमऽइति देव । श्वीतमः । (२) देवह्रुतममिति देव । ह्रुतमम् । (३) इन्द्राय । सुषूतमम् । सुसूतममिति सु । सूतमम् । (४) सः । सुगोपातमऽइति सु । गोपातमः । (५) रक्षधातममिति रक्ष । धातमम् । (६) वसुधातमऽइति वसु । धातमः ॥

सर्पदेवजनेभ्यश्च ॥ ४ ॥

सर्प्पदेवजनेभ्यइत्येतच्च पदं पूर्वेण पदेनावगृह्यते । यथा (७) सर्प्पदेवजनेभ्यऽइति सर्प्प । देवजनेभ्यः । उपरिष्टाद्वक्ष्यति 'बह्वप्रकृतावागन्तुना पर्व्वणे'त्यस्यापवादः ॥

(१) ११ । ३४ ॥
(२) १ । ८ ॥
(३) ६ । २८ ॥
(४) ८ । २९ ॥
(५) २६ । २० ॥
(६) २७ । १४ ॥
(७) ३० । ६ ॥

तूणवद्ध्ममुत्तरेण ॥ ५ ॥

तूणवध्ममित्येतत्पदं उत्तरेण पदेनावगृह्यते । यथा (१) क्रोशाय । तूणवद्ध्ममिति तूणव । ध्मम् ॥

रायस्पोषदे विजावेति च ॥ ६ ॥

रायस्पोषदे विजावा इत्येते च पदे चशब्दादुत्तरेण पदेनावगृह्येते । यथा (२) रायस्पोषदऽइति रायस्पोष । दे । (३) स्यात् । नः । सूनुः । तनयः । विजावेति वि । जावा ॥

बहुप्रकृतावागन्तुना पर्वणा ॥ ७ ॥

बहूनि पदानि यत्र तद्बहुप्रकृतिपदं तत्र आगन्तुना पर्वणा समासलक्षणेन यत्पश्चात्कालिकं पदं भवति तेनावग्रहो भवति । यथा (४) प्रजापतिरिति प्रजा । पतिः । (५) प्रजापतिगृहीतयेति प्रजापति । गृहीतया । समासलक्षणेन यदाऽऽगन्तुकं पदं तदि-

(१) ३० । १८ ॥
(२) ५ । १ ॥
(३) १२ । ४४ ॥
(४) ३१ । १९ ॥
(५) १३ । ३९ ॥

ह गृह्यते न तु पाठेन तेनैतद्भवति । यथा (१) सुप्रज्ञाऽइति सु । प्रजाः । (२) सुप्रायनाऽइति सु । प्रायनाः ॥

तद्वति तद्धिते न्यायसंहितं चेत् ॥ ८ ॥

तद्वतीत्यत्र एकस्य वतिशब्दस्य तन्त्रेणोच्चारणं द्रष्टव्यम् । तद्वति मत्त्वर्थीये तद्धिते वतौ च परभूतेऽवग्रहो भवति न्यायसंहितं व्याकरणशास्त्रोक्तसन्धिमत्पदं चेद्भवति । यथा (३) मधुमदिति मधु । मत् । (४) हिरण्यवदिति हिरण्य । वत् । वतौ खल्वपि यथा (५) वरिष्ठाम् । अनु । सव्रतमिति सम् । व्रतम् । तद्वतीति किम् । (६) एतावान् । अस्य । महिमा । न्यायसंहितमिति किम् । (७) ऊर्जस्वन्तम् । (८) पयस्व-

(१) ३ । ३७ ॥

(२) २१ । ५ इदमुदाहरणं 'ख' पुस्तके नास्तीति बुधैर्ज्ञेयम् ॥

(३) १३ । २६ ॥

(४) ८ । ५७ ॥

(५) ११ । १० ॥

(६) ३१ । ३ ॥

(७) ६ । २८ ॥

(८) इदमपि तथा ॥

त्वम् । (१) मरुन्तत्त्वम् ॥

शस्त्वन्त्वातातिषु च ॥ ९ ॥

शस् । त्वम् । त्वा । ताति । एतेषु तद्धितेषु अवग्रहो भवति । शस् यथा (२) कर्ति । होतारः । ऋतुशऽइत्यृतु । शः । त्वम् यथा (३) मर्त्यस्य । देवत्त्वमिति देव । त्वम् । त्वा यथा (४) देवत्वेति देव । त्वा । यन्तम् । ताति यथा (५) ज्येष्ठतातिमिति ज्येष्ठ । तातिम् ॥ बर्हिषदम् ॥

धात्वर्थे यकारे स्वरपूर्वे ॥ १० ॥

प्रातिपदिकं सुब्धातुर्भवतीति कृत्वा यकारउपादीयते स धात्वर्थो यकारः "सुप आत्मनः क्यजि" त्यादिभिः सूत्रैर्यो विहितः स इह गृह्यते । तस्मिन्धात्वर्थे यकारे प्रत्यये स्वरपूर्वेऽवग्रहो भवति । यथा (६)

---

(१) ७ । ३६ । अस्मिन्नुदाहरणे 'स्पर्शोऽपञ्चमः स्वरधौ तृतीय'मिति सूत्रेण शास्त्रसिद्धोऽपि तृतीयवर्णो दकारो न कृतोऽतो नावग्रहो भवतीति सुधियो विभावयन्तु ॥

(२) २३ । ५२ ॥

(३) ३१ । १७ ॥

(४) ६ । १८ ॥

(५) ७ । १२ ॥

(६) २० । ३९ ॥

इषायमाणः । इषयमाणऽइति इष । यमाणः । (१) अघायतः । अघयतऽइत्यघ । यतः । धात्वर्थइति इति किम् । (२) यत्क्रन्दः प्रथमं जायमानः । स्वरपूर्वे इति किम् । (३) इन्द्राय पच्यते मधु । वाच्यति । रूपोदाहरणम् ॥

ऽवाꣳसौ च भूतकाले स्वरेण ह्रस्वादनुपि ॥ ११ ॥

वांसौ च प्रत्यये परभूतेऽवग्रहो भवति । भूतकालार्थाभिधायिनि स्वरेण ह्रस्वात्स्वराद्ध्रस्वात्परभूते स्वरेण वा ह्रस्वेनोपहिते । एवं तृतीया पञ्चम्यर्थे इति विभक्तिव्यत्ययेन योजना । अनुषि वाꣳसौ उषिपरभूतेऽवग्रहो न भवति । यथा (४) यज्ञिवाꣳसऽइति यज्ञि । वाꣳसः । (५) पपिवाꣳसऽइति पपि । वाꣳसः । (६) ससृवाꣳसऽइति ससृ । वाꣳसः । भूत-

(१) ३ । २६ ॥
(२) २९ । १२ ॥
(३) २१ । ५२ ॥
(४) ८ । १९ ॥
(५) इदमपि तथा ॥
(६) ९ । १८ ॥

कालइति किम् । (१) सुविद्वाꣳसइति सु । वि-द्वाꣳसं । स्वरेण ह्रस्वादिति किम् । (२) जिगी-वाꣳसं । स्वरादिति किम् । (३) चिकित्वान्त्सादं-यं । अनुषीति किम् । (४) सूर्यं । आत्मा । ज-गतः । तस्थुषः ॥

प्रत्नपूर्वविश्वेमर्त्तुभ्यस्था ॥१२॥

एभ्यः परः स्थाप्रत्ययोऽवगृह्यते । प्रत्न यथा (५) प्रत्नथेति प्रत्न थां । (६) पूर्वथेति पूर्व । थां । (७) विश्वथेति विश्व । थां । (८) इमथेतीम । थां । (९) ऋतुथेत्यृतु । था । इन्द्रः । वनस्पतिः । शशमानः । परिस्रुतेति परि । स्रुतां ॥

ह्रस्वव्यञ्जनाभ्यां भकारादौ

---

(१) १७ । ६३ ॥
(२) इदं शाखान्तरोदाहरणम् ॥
(३) ११ । ३२ ॥
(४) ७ । ४४ ॥
(५) ७ । १२ ॥
(६) इदं तथा ॥
(७) इदमपि तथा ॥
(८) इदमपि तथैव ॥
(९) २० । ५८ । इमान्यप्युदाहरणानि पदपाठाद्बोध्यानि ॥

ञ्विभक्तिप्रत्यये ॥ १३ ॥

ह्रस्वात्स्वराद्व्यञ्जनाच्च परभूते भकारादिविभक्तिप्रत्ययेऽवग्रहो भवति । ह्रस्वाद्भवति यथा (१) तच्चभ्यऽइति तच्च । भ्यः । (२) अग्निभिरित्यग्नि । भिः । व्यञ्जनाद्भवति यथा (३) तिष्ठद्भ्यऽइति तिष्ठत् । भ्यः । (४) धावद्भ्यऽइति धावत् । भ्यः । ह्रस्वव्यञ्जनाभ्यामिति किम् । (५) रथकारेभ्यऽइति रथ । कारेभ्यः । (६) कुलालेभ्यः । भकारादौ विभक्तिप्रत्ययइति किम् । (७) कर्णा गर्दभः । (८) कुम्भो वनिष्ठुः । भकारादाविति किम् । (९) अग्निषु ॥

स्विति चानतौ ॥ १४ ॥

सु इत्येतस्मिंश्च विभक्तिप्रत्ययेऽनतावग्रहो भवति ।

(१) १६ । २७ ॥
(२) इदमपि तथा ॥
(३) १६ । २३ ॥
(४) इदमपि तथा ॥
(५) १६ । २७ ॥
(६) इदमपि तथा ॥
(७) २४ । ४० ॥
(८) १९ । ८५ ॥
(९) इदं प्रत्युदाहरणं (ख) पुस्तके नास्तीति ॥

यथा (१) अप्स्वन्तम् । सु । अग्ने । सधिः । (२) अभि । प्र । इहि । निः । दह । हृत्स्वसिति हृत् । सु । अनताविति किम् । (३) ऋप्सु । (४) अग्निषु । (५) स्नुषु । विभक्ताविति किम् । (६) असुम् । ह्रस्वव्यञ्जनाभ्यामिति पूर्वसूत्रादनुवर्त्तते । ताभ्यामिति किम् । यासु । (७) ॥

वर्णसङ्ख्ययेऽन्न्यतरतः ॥ १५ ॥

वर्णसमासः सङ्ख्यासमासश्चान्यतरतो विकल्पेनावगृह्यते । वर्णसमासो भवति यथा (८) धूम्ररोहितऽइति धूम्र । रोहितः । कर्कन्धुरोहितऽइति कर्कन्धु । रोहितः । सङ्ख्यासमासो भवति यथा (९) पञ्चदशेति पञ्च । दश । त्रयोदशेति त्रयः । दश । (१०) ॥

---

(१) १२ । ३१ ॥

(२) १७ । ४१ ॥

(३) ३२ । इदं शाखान्तरीयमुदाहरणम् ॥

(४) इदमपि तथा ॥

(५) १७ । १३ ॥

(६) ८ । १८ ॥

(७) इति प्रत्युदाहरणं 'ख' पुस्तके नास्तीति विज्ञा जानन्तु ॥

(८) २४ । २ । इदमुदाहरणद्वयमेकाध्यायस्थैकाङ्कम् ॥

(९) १८ । २४ ॥

(१०) इदमपि तथा ॥

अनुदात्तोपसर्गे चाख्याते ॥ १६ ॥

अनुदात्त उपसर्गोऽस्येत्यनुदात्तोपसर्गमाख्यातं तस्मिन्नवग्रहो भवति । यथा (१) यत् । अश्वाय । व्वासः । उपस्तृणन्तीत्युप । स्तृणन्ति । (२) अभि । मूलम् । निहतस्येति नि । हतस्य । अवधावतीत्यव । धावति ॥

गिरि त्रशयोः ॥ १७ ॥

गिरिशब्दोऽवगृह्यते त्रशयोः प्रत्यययोः परयोः । यथा (३) शिवाम् । गिरित्रेति गिरि । त्र । (४) गिरिशेति गिरि । श । अच्छ । व्वदामसि ॥

इवकाराम्रेडितायनेषु च ॥ १८ ॥

इव कार आम्रेडित अयन एतेषु सुप्रत्ययेषु परभूतेषु अवग्रहो भवति । इवे यथा (५) सुचीवेति सुचि । इव । घृतम् । चम्वीवेति चम्वी । इव । सो-

(१) २५ । ३७ ॥
(२) २५ । ३२ ॥
(३) १६ । ३ ॥
(४) १६ । ४ ॥
(५) २० । ७० ॥

मं÷ । कारे यथा । (१) हिङ्कारायेति हिम् । कारा॑य । (२) व्वषट्‌कारेभिरिति वषट् । कारेभिं÷। आह्नतीरित्या । हुतीः । आम्रेडिते यथा (३) यज्ञायज्ञेति यज्ञा । यज्ञा । व्वः । (४) सर्ठं समिति सम् । सम् । इत् । (५) यतोयतऽइति यत÷। यतः । अयने यथा (६) आयनायेत्या । अयनाय । (७) प्रायनायेति प्र । अयनाय ॥

एकात्समीची ॥ १९ ॥

एकशब्दात्परः समीचीशब्दोऽवगृह्यते । यथा (८) शिशुम् । एकम् । समीचीऽइति सम् । ईची । एकादिति किम् । (९) स्वर्व्विदेति स्वः । व्विदा । समीचीऽइति समीची । उरसा । त्मना ॥

---

(१) २२ । ७ ॥
(२) १९ । १७ ॥
(३) २७ । ४१ ॥
(४) १५ । २६ ॥
(५) ३६ । १२ ॥
(६) २२ । ७ ॥
(७) इदमपि तथा ॥
(८) १२ । २ ॥
(९) ११ । २८ ॥

त्वायवः शँय्योर्बर्हिर्द्धाऽस्मयुं मृन्मयीं सुम्नयाऽऽशुया साधुया धृष्णुया विशालमनुया ॥ २० ॥

एतानि पदानि सावग्रहाणि भवन्ति । त्वायवो यथा (१) सुताः । इमे । त्वायवऽइति त्वा । युवः । शँय्योर्यथा (२) शिवम् । शग्मम् । शँय्योरिति शम् । योः । बर्हिर्द्धा यथा (३) इदम् । अहम् । तप्तम् । वाः । बर्हिर्द्धेति बर्हिः । धा । यजत्रात् । अस्मयुँर्यथा (४) अग्निम् । भरन्तम् । अस्मयुमित्यस्म । युम् । मृन्मयीं यथा (५) महीम् । मृन्मयीमिति मृत् । मयीम् । योनिम् । अग्नये । सुम्नया यथा (६) धीराः । देवेषु । सुम्नयेति सुम्न । या । आशुया यथा (७) तव । भमासः । आशुयेत्याशु । या । सा-

---

(१) २० । ७८ ॥

(२) ३ । ४२ । इमान्युदाहरणानि पदपाठाद्बोध्यानि ॥

(३) ५ । ११ ॥

(४) ११ । ११ ॥

(५) ११ । ५६ ॥

(६) १२ । ५४ ॥

(७) १३ । ९ ॥

धुया यथा (१) आ । सीद । साधुयेति साधु । या । धृष्णुया यथा (२) चित्र । वज्रहस्तेति वज्र । हस्त । धृष्णुयेति धृष्णु । या । मह्यः । विशालंय्यथा (३) वृष्टिः । विशालमिति वि । शालम् । पुरुषः । अनुया यथा (४) अहः । अनुयेत्यनु । या । रात्र्या । रात्रीम् । उभिर्जा । वसुभ्य इति वसु । भ्यः ॥

मृगयुमुभयादतोऽपामार्गंकिम्पूरुषमिति च ॥ २१ ॥

एतानि पदानि सावग्रहाणि भवन्ति । मृगयुंय्यथा (५) मृत्यवे । मृगयुमिति मृग । युम् । उभयादतो यथा (६) ये । के । च । उभयदत इत्युभय । दतः । अपामार्ग्ग यथा (७) अपामार्ग्ग । अपमार्ग्गेत्यप । मार्ग्ग । त्वम् । अस्मत् । किम्पूरुषंय्यथा (८) प-

(१) १४ । १ ॥
(२) २७ । ३७ ॥
(३) १४ । ८ ॥
(४) १५ । ६ ॥
(५) ३० । ५ ॥
(६) ३१ । ८ ॥
(७) ३५ । १० । इमानि सर्वाण्युदाहरणानि पदपाठाज्ज्ञेयानि ॥
(८) ३० । १४ ॥

र्वतेभ्यः । किम्पूरुषम् । किम्पुरुषमिति किम् । पुरुषम् ॥

पारावतानाग्निमारुताऽइत्येति जातूकर्ण्यस्य ॥ २२ ॥

पारावतान् आग्निमारुता इत्येते पदे सावग्रहे भवतो जातूकर्ण्यस्याचार्यस्य मतेन । यथा (१) अहन्ने । पारावतान् । (२) कल्माषाः । आग्निमारुताऽइत्याग्नि । मारुताः । जातूकर्ण्यस्येति किम् (३) पारावतान् । आग्निमारुताः । (४) ॥

अधीवासमित्येके ॥ २३ ॥

अधीवासमित्येतत्पदमेके आचार्याः सावग्रहं कुर्वन्ति । (५) अधिवासमित्यधि । वासम् । या । हिरण्यानि । एकइति किम् । अधीवासम् । (६) ॥

---

(१) २४ । २५ ॥

(२) २४ । ७ ॥

(३) पूर्वोक्तमुदाहरणं पदपाठस्य बोध्यम् ॥

(४) अनयोः पूर्वोक्तोदाहरणयोर्यथाशास्त्रं व्यवस्था, माध्यन्दिना द्वितीयोदाहरणस्यावग्रहं कुर्वन्ति न प्रथमस्येति बोध्यम् ॥

(५) २५ । ३७ ॥

(६) पूर्वोक्तमेव ॥

प्रतिषेधे नावग्रहः ॥ २४ ॥

'समासेऽवग्रह' इति योऽवग्रहाधिकारः कृतस्तस्यायमपवादः । प्रतिषेधवाचिना नञा निपातेन सह समासे सति अवग्रहो न भवति । यथा (१) न रक्षसा । अरक्षसा । मनसा । (२) न इराः । अनिराः । अमीवाः । निषीदन् । अत्र "न लोपो नञ" इति नकारलोपः । "तस्मान्नुडची"ति नुडागमः । प्रतिषेधेनेति किम् । (३) अनिशितऽइत्यनि । शितः । असि ॥

उत्तरेण चाकारेण ॥ २५ ॥

प्रतिषेधवाचिनो नञ्निपातादुत्तरेण चाकारेण सह समासेऽवग्रहो न भवति । यथा (४) अनाततायं । धृष्णवे । (५) अनाधृष्यः । जातवेदाऽइति जात । वेदाः ॥

द्वापूर्वम् ॥ २६ ॥

(१) ११ । २१ ॥
(२) ११ । ४४ ॥
(३) १ । २९ ॥
(४) १६ । १४ ॥
(५) २७ । ७ ॥

द्वापदपूर्वं समासपदं नावगृह्यते । यथा (१) द्वा-दश । (२) द्वाविंऽशः । (३) द्वाविंऽशत् ॥

सङ्ख्यापूर्वश्च धा ॥ २७ ॥

सङ्ख्यापूर्वपदो धापदोत्तरपदः समासो नावगृह्यते । यथा (४) अष्टधा । द्विवम् । (५) कति । त्रेधोमासः । कतिधा । समिद्धऽइति सम् । इद्धः । सङ्ख्यापूर्वइति किम् । (६) इदम् । अहम् । तम्नम् । स्वाः । बर्हिर्इति बर्हिः । धा ॥

द्वन्द्वानि द्विवचनान्तानि स्वरान्तपूर्वपदानि ॥ २८ ॥

द्वन्द्वसमासपदानि द्विवचनान्तानि स्वरान्तपूर्वपदानि नावगृह्यन्ते । यथा (७) अयम् । वाम् । मित्रा-

---

(१) १७ । २५ ॥
(२) १४ । १८ ॥
(३) १७ । २५ ॥
(४) ८ । ५५ ॥
(५) २३ । ५० ॥
(६) ५ । ११ ॥
(७) ७ । ८ ॥

वरुणा । (१) इन्द्राग्नीऽआगतम् । (२) अग्नीषोमयोः । उज्जितिम् । इन्द्राग्नीति किम् । (३) अह्रुतमसि । हविर्द्धानमिति हविः । धानम् । स्वरान्तपूर्वपदानीति किम् । (४) ऋतकवसामयोरित्यृक् । सामयोः । शिल्पे ॥

तद्धिते चैकाक्षरवृद्धावनिहिते ॥ २९ ॥

समासादुत्तरकालं तद्धिते उत्पन्नेऽवग्रहो न भवति यत्र तद्धितजनितैकाक्षरे पूर्वपदे वृद्धिर्भवति । यदि च तत्पूर्वपदेन सह अनिहितं भवति अव्यवहितं भवति यदि पूर्वपदवृद्ध्या उत्तरपदमव्यवहितं भवतीत्यर्थः । यथा (५) त्रैष्टुभेन च्छन्दसा । (६) मे । भागः । सौभाग्यं पसः । तद्धितइति किम् । (७) गायत्री । त्रिष्टुप् । त्रिस्तुबिति त्रि । स्तुप् । (८) सुभगेति

(१) ७ । ३० ॥
(२) २ । १५ ॥
(३) १ । ९ ॥
(४) ४ । ९ ॥
(५) ११ । ७ ॥
(६) २० । ८ ॥
(७) २३ । ३१ ॥
(८) २५ । १४ ॥

सु । भर्गा । एकाक्षरद्वाविति किम् । (१) मयुःऽ । प्राजापत्यऽइति प्राजा । पत्यः । अनिङ्गितइति किम् । साम्राज्यमिति साम् । राज्यम् । अत्र पूर्वपदोत्तरपदयोर्व्यञ्जनेन व्यवधानं कृतम् ॥

अञ्चतिसह्त्योः क्लोपे ॥ ३० ॥

अञ्चतेर्धातोः सहतेश्च कृत्प्रत्ययलोपे सति अवग्रहो न भवति । अञ्चतेर्न भवति यथा (२) प्राङ् (३) प्रत्यङ् । सहतेः खल्वपि यथा (४) ऋताषाट् । ऋतधामा । (५) दुश्च्यवनःऽ पृतनाषाट् । अञ्चतिसह्त्योरिति किम् । (६) सुकृदिति सु । कृत् । देवः । सविता । क्लोप इति किम् । (७) आरच्चेत्था । अच्च । जानु (८) पृतनासह्यायेति पृतना । सह्याय । (९) ॥

(१) २४ । ३१ । इमान्यप्युदाहरणानि पदपाठस्थानि ज्ञेयानीति ॥

(२) १९ । २ ॥

(३) १० । २९ ॥

(४) १८ । ३६ ॥

(५) १७ । ३६ ॥

(६) २७ । १२ ॥

(७) १९ । ५० ॥

(८) १८ । ६२ ॥

(९) अत्र इकृश्तिपौ धातुनिर्देशः । अञ्चुगतिपूजनयोः । सहमर्षणे इत्येतयोर्ग्रहणम् । अनयोः कठन्तकिप्प्रत्ययलोपे नावग्रहः ॥

अनुरुसुभ्याम् ॥ ३१ ॥

उरु सु इत्येताभ्यां परयोरञ्चतिसहत्योः ऋल्लोपे सत्यवग्रहो भवति । यथा (१) उरुव्यञ्चमित्युरु । व्यञ्चम् । अश्येत् । (२) सुहच इति सु । हचः । श्वेनः । आवः । (३) सुप्राङिति सु । प्राङ् । अजः । अधस्तनयोगस्यापवादः ॥

समिदाभ्याँव्वत्सरः ॥ ३२ ॥

सम् इदा एताभ्यां परो वत्सरशब्दो नावगृह्यते । यथा (४) सँव्वत्सरः । असि । इदावत्सरः । समिदाभ्यामिति किम् । (५) परिवत्सरइति परि । वत्सरः । इद्वत्सरइतीत् । वत्सरः ॥

प्राग्निभ्यामनिन्धौ प्रश्लेषे ॥ ३३ ॥

प्र अग्नि इत्येताभ्यां प्रश्लिष्टसन्धाववग्रहो न भवति । इन्धिदीप्तावित्यमुन्धातुं वर्जयित्वा । प्रशब्दा-

---

(१) १५ । २२ ॥

(२) १३ । २ ॥

(३) २५ । २३ ॥

(४) २७ । ४४ ॥

(५) पूर्वोक्तोदाहरणाङ्को बोध्यः ॥

ङ्गवति यथा (१) प्राणः । अग्निशब्दाङ्गवति यथा (२) आग्नीध्रम् । यत् । सरस्वति । प्राग्निन्ध्यामिति किम् । (३) वीध्रायेति वि । ईध्राय । अनिन्धाविति किम् । (४) प्रेद्धऽइति प्र । इद्धः । प्रश्लेषइति किम् । (५) प्रायणाय । प्रायनायेति प्र । अयनाय ॥

पाङ्क्त्वानुदद्रोऽभ्राय सं॰श-याात् ॥ २४ ॥

पाङ्क्त्वान् उद्रः अभ्राय एतानि पदानि संशयान्नावगृह्यन्ते । पङ्क्तेः पूर्वपदं त्वायतेरुत्तरपदं । पातेर्वा पूर्वपदं तनोतेरुत्तरपदम् । तथा उद्रः उत् ऊर्ध्वं द्रवतीति उद्रः उत्शब्दः पूर्वपदं द्रवतेरुत्तरपदम् । यद्वा उत् रातीति उद्रः । उत् पूर्वपदं रातेरुत्तरपदम् । तथा अभ्रशब्दः अपो बिभर्त्ति धारयतीत्यभ्रः । अप्शब्दः पूर्वपदं बिभर्त्तेरुत्तरपदम् । यद्वा । अभ्रवभ्रमभ्रचरगत्यर्थाः । इत्यभ्रतेरेवाभ्रम् । एवमेतानि पदानि पूर्वोत्तरपदसंशयान्नावगृह्यन्ते । हेतुवचनाद-

(१) १९ । २ ॥
(२) १९ । १६ ॥
(३) १६ । ३८ ॥
(४) ७० ॥
(५) २२ । ७ ॥

न्यत्रापि यत्र संग्रयस्तत्रावग्रहो न भवति । यथा (१) अन्तरिक्षाय प्राङ्लान् । (२) अपामुद्रो मासाम् । (३) अम्भाय स्वाहा । एतान्युदाहरणानि पदसंहितायां अन्यान्यपि यथा सम्भवमूह्यानि चेति ॥

जनयत्त्याऽओषधयो वृषायिषत च नाहमभ्यमजावयो वल्गम् ॥ २५ ॥

एतानि पदानि नावगृह्यन्ते । यथा (४) जनयत्यै । त्वा । (५) ओषधयः । प्रति । मोदध्वम् । (६) आ । वृषायिषत । (७) नहि । तेषाम् । अमा । चन । (८) कदा । चन । स्तरीः । असि । (९) पावकः । अस्मभ्यम् । शिवः । भव । 'ह्रस्वव्यञ्जनाभ्यां भकारादौ विभक्तिप्रत्यय' इत्यस्यापवादः । अजाव-

(१) २४ । २६ ॥
(२) २४ । ३७ ॥
(३) २२ । २४ ॥
(४) १ । २२ ॥
(५) ११ । ४४ । ओषतेर्धयतेर्निष्पन्नत्वादवग्रहप्राप्तेरपवादः ॥
(६) २ । ३० । 'अनितावन्तर्विकारागमं प्रागुत्कैरित्यस्यापवाद' इति ॥
(७) ३ । ३२ ॥
(८) ३ । ३२ ॥
(९) ४ । १७ ॥

यो यथा (१) उपह्वताऽइत्युपं । ह्वताः । अजावयः । 'समासेऽवग्रहः' इत्यस्यापवादः । वल्गं यथा (२) इदमहन्तं वल्गमुत्किरामि । (३) ॥

समानोऽनश्वमेधे ॥ ३६ ॥

समानशब्दोऽश्वमेधमन्त्रम्मुक्त्वाऽन्यत्र नावगृह्यते । यथा (४) यत्मे समानः । यमसमानः । अनश्वमेधइति किम् । (५) समानो यज्ञेन कल्पताम् स्वाहा । समानऽइति सम् । आनः । एकस्मै । द्वाभ्याम् ॥

वायुरसजातः समुद्रमहोरात्रे विश्वानरो विश्वाहाऽऽग्रणोऽसपत्ना गोधा गोधूमाऽआशुशुक्षणिर्न्यग्रोधः पुरोडाशः प्रावणेभिरशितम तस्करा मस्मसाऽश्वत्थऽ-

(१) ३ । ४२ ॥
(२) ५ । २३ ॥
(३) वल्गमुद्वपामीति शाखान्तरीणपाठः । वल्गतेर्वृणोतेर्वृण्वन् गच्छतीति वल्गः ॥
(४) ५ । २३ ॥
(५) २२ । ३३ ॥

उपस्तिम्माकिर्व्विश्वामित्रो गोपा-
म्प्रऽउगमङ्गानि कक्षीवन्तमधात्य-
वीरवन्नीहारेण प्रावृता वनावनऽ-
ईदङ्चान्न्यादृङ्शुघनासः कुयवं कु-
चरः प्रियङ्गवो नीवाराऽएकादश
षोडश चन्द्रमाऽआयुवो ऽयाग्न्रो
ऽनड्वान्न्गविष्ठिरः कपर्द्दिने पुलस्त-
ये निषङ्गिणे कुलालेभ्यः कर्म्मारे-
भ्यः पुञ्जिष्ठेभ्यो द्वीप्याय नी-
प्याय किंशिलायैल्वृदाः शूकारा-
य शूकृताय चराचरेभ्यः पारावता-
न्नगोलत्तिकाऽऽखुरजगरो ऽत्रपन्न्य-
वो दाक्षायणाऽआयुधं सुरामं बृ-
हस्पतिर्व्वनस्पतिर्न्नराशंसः सुरा-

भिर्न्नारिष्टायै ॥ ३७ ॥

वायुरित्यादीनि पदानि नावगृह्यन्ते। वायुर्यथा (१) वायुः पूषा स्वस्तये। असजातो यथा (२) यमसंजातो निचखान। समुद्रं यथा (३) समुद्रं गच्छ स्वाहा। अहोरात्रे यथा (४) अहोरात्रे पार्श्वे। विश्वानरो यथा (५) अर्चा विश्वानराय। विश्वाहा यथा (६) विश्वाहा शर्म यच्छतु। आग्रयणो यथा (७) आग्रयणोऽसि। असपत्ना यथा (८) असपत्नाः समनसस्करत्। गोधा यथा (९) गोधा कालका। गोधूमा यथा (१०) गोधूमाश्च मे। आशुशुक्षणिर्यथा (११) त्वमाशुशुक्षणिः। न्यग्रोधो

---

(१) ३३ । ४४ ॥
(२) ५ । २३ ॥
(३) ६ । २१ ॥
(४) ३१ । २२ ॥
(५) ३३ । २३ ॥
(६) १७ । ४८ ॥
(७) ७ । २० ॥
(८) ७ । २५ ॥
(९) २४ । ३५ ॥
(१०) १८ । १२ ॥
(११) ११ । २७ ॥

यथा (१) न्यग्ग्रोधश्चमसैः । पुरोडाशी यथा (२) पचन्पुरोडाशान् । प्रावणेभिर्य्यथा (३) प्रावणेभिः । सजोषसः । अशीतम यथा (४) अग्नेऽइच्छायोऽशीतम । तस्करा यथा (५) तस्कराँ२॥ऽ उत । मस्मसा यथा (६) सर्व्वन्तम्मस्मसा कुरु । अश्वत्थे यथा (७) अश्वत्थे वो निषदनम् । उपस्तिर्य्यथा (८) उपस्तिरस्तु सोऽस्माकम् । माकिर्य्यथा (९) अग्ने माकिष्टे व्यथिः । विश्वामित्रो यथा । (१०) विश्वामित्रऽऋषिः । गोपाँय्यथा(११) गोपाम्तस्य दीदिवम् । प्रउगँय्यथा (१२) प्रउगमुक्थमव्व्यथायै । अङ्गानि य-

---

(१) २२ । १४ ॥
(२) २१ । ५९ ॥
(३) १२ । ५० ॥
(४) २ । २० ॥
(५) ११ । ७७ ॥
(६) ११ । ७९ ॥
(७) १२ । ७९ ॥
(८) ११ । १०१ ॥
(९) १३ । ११ ॥
(१०) १३ । ५७ ॥
(११) ३ । २३ ॥
(१२) १५ । ११ ॥

था (१) अङ्गानि च मे । कक्षीवन्तँय्यथा (२) कक्षीवन्तँय्यऽऔशिजः । अदधाद्यथा (३) अश्वस्तामनूतेऽदधात् । पवीरवद्यथा (४) लाङ्गलं पवीरवत् । नीहारेण यथा (५) नीहारेण प्रावृता । द्वे पदे अनन्तर्हिते यथा (६) घनाघनः क्षोभणः (७) दृढ्वान्न्याह्वेडः । द्वे पदे यथा (८) सिन्धोरिव प्राध्वने शूघनासः । कुयवँय्यथा (९) कुयवश्च मे । कुचरो यथा (१०) मृगो न भीमः कुचरो गिरिष्ठाः । प्रियङ्गवो यथा (११) प्रियङ्गवश्च मे । नीवारा यथा (१२) नीवाराश्च मे । एकादश यथा (१३) एकादश च मे ।

---

(१) १८ । ३ ॥
(२) ३ । २८ ॥
(३) १९ । ७७ ॥
(४) १२ । ७१ ॥
(५) १७ । ३१ ॥
(६) १७ ३३ । अनन्तर्हिते द्वे पदे नावगृह्येते ॥
(७) १६ । ८१ । अत्रापि तथैव बोध्यम् ॥
(८) १७ १४ । अस्मिन्नपि तथा ॥
(९) १८ । १० ॥
(१०) ५ । २० ॥
(११) १८ । १२ ॥
(१२) इदमपि तथैव ॥
(१३) १८ । २४ ॥

षोडश यथा (१) षोडश च मे । चन्द्रमा यथा (२) चन्द्रमा ऽअप्स्व । आयुवो यथा (३) आयुवो नाम । व्याघ्रा यथा (४) व्याघ्रा हेतिः । अनड्वान्यथा (५) अनड्वानघोरामौ । गविष्ठिरो यथा (६) गविष्ठिरो नमसा । कपर्दिने यथा (७) नमः कपर्दिने च पुलस्तये । द्वे पदे यथा (८) निषङ्गिणे । (९) कुलालेभ्यः । (१०) कर्मारेभ्यः । द्वे पदे अनन्तर्हिते यथा (११) नमः कुलालेभ्यः । कर्मारेभ्यः । पुञ्जिष्ठे यथा (१२) पुञ्जिष्ठेभ्यश्च । ह्रीप्याय । यथा (१३)

---

(१) १८ । २५ । 'वर्णसङ्ख्येऽन्यतरत' इति विकल्पविधायकशास्त्रेणावग्रहः प्राप्तः षट्त्रिंशत्सप्तत्रिंशदङ्कयोरुदाहरणयोः परन्तु तस्यापवादभूतमिदं सूत्रमिति ग्रन्थकाराणामाशयः ॥

(२) ३३ । ९० ॥

(३) १८ । ३९ ॥

(४) १५ । १७ ॥

(५) २९ । ५९ ॥

(६) १५ । २५ ॥

(७) १६ । ४३ ॥

(८) १६ । २० ॥

(९) १६ । २७ ॥

(१०) इदमपि तथा ॥

(११) तथा ॥

(१२) इदमपि तथा ॥

(१३) १६ । ३१ ॥

द्वीप्याय च । नीप्याय यथा (१) नीप्याय च । किंशिलाय यथा (२) किंशिलाय च । ऐलबृदा यथा (३) ऐलबृदा ऽआयुर्युधं । ऋकाराय यथा (४) ऋकाराय स्वाहा ऋकृताय । चराचरेभ्यो यथा (५) चराचरेभ्यः स्वाहा । पारावतान्यथा (६) अह्ने पारावतान् । गोलत्तिका यथा (७) गोलत्तिका ते-ऽप्सरसाम् । आखुर्यथा (८) आखुस्ते पशुः । अजगरो यथा (९) अजगरो वसूनाम् । विपन्यवो यथा (१०) तद्विप्रासो विपन्यवः । दाक्षायणा यथा (११) यद्दाबध्नन्दाक्षायणाः । आयुधंयथा (१२) परमे वृक्ष ऽआयुधन्निधाय । सुरामंयथा (१३) यत्सुराम-

(१) १६ । ३७ ॥
(२) १६ । ४३ ॥
(३) १६ । ६० ॥
(४) २१ । ८ ॥
(५) २२ । २९ ॥
(६) २४ । २५ ॥
(७) २४ । ३७ ॥
(८) ३ । ५७ ॥
(९) २४ । ३८ ॥
(१०) ३४ । ४४ ॥
(११) ३४ । ५२ ॥
(१२) १६ । ५१ ॥
(१३) १० । ३४ ॥

ऽव्यपिबः । बृहस्पतिर्य्यथा (१) बृहस्पते ऽअति य-
त् । वनस्पतिर्य्यथा (२) वनस्पतिः शमितादेवः । नराशंसो यथा (३) नराशंसस्य महिमानम् । सुरभिर्य्यथा (४) यऽईमाहुः सुरभिः । नरिष्ठायै यथा (५) नरिष्ठायै भीमलम् । यैश्च हेतुभिरेतानि पदानि नावगृह्यन्ते तान्हेतूनन्यपदव्याजेन विचिख्यासुराचार्य्यो वक्ष्यमाणसूत्रैर्वक्ष्यति । येषु च पदेषु वक्ष्यमाणहेतवो न सन्ति ते जातिवचनाः प्रत्येतव्याः । यथा (६) गोधूमपारावतादयः ॥

उत्तम्भनादीन्न्यादिसंशयात् ॥ ३८ ॥

उत्तम्भनादीनि पदानि आदिसंशयान्नावगृह्यन्ते । यथा (७) वरुणस्योत्तम्भनमसि । (८) उत्त्याय

(१) २६ । ३ ॥
(२) २९ । ३५ ॥
(३) २९ । २७ ॥
(४) २५ । ३५ ॥
(५) ३० । ६ ॥
(६) १७ । १२ ॥
(७) ४ । ३६ ॥
(८) ११ । ६४ ॥

बृहती भव । (१) उत्स्थिताय स्वाहा । एतानि त्रीणि पदान्युदाहरणानि । उत्पूर्वपदानि स्तम्भेत्युत्तरपदं प्रथमसुदाहरणम् । तिष्ठत्युत्तरपदे उत्तरे तत्रो"दः स्थास्तम्भोः पूर्वस्ये"ति सकारस्य पाणिनिः पूर्वरूपतां विदधाति । अन्ये तु सकारलोपं विदधति । अतउत्तरपदस्यादिसंशयादेतानि पदानि नावगृह्यन्ते । यथैतान्येवमन्यान्यपि द्रष्टव्यानि ॥

विश्वौजाइत्यन्न्यायसमासात् ॥३९॥

विश्वौजाइत्येतत्पदमन्यायसमासान्नावगृह्यते । विश्वौजा इति प्राप्ते यथा (२) विश्वौजाः । इन्द्रोऽसि विश्वौजाः ॥

दित्यौही तुर्यौही पष्ठौही हृदयौपशेनेति च ॥ ४० ॥

एतानि च पदान्यन्यायसमासान्नावगृह्यन्ते । अत्र च 'उवर्णओकार'मिति ओकारे प्राप्ते औकारोऽन्यायसमासजः । (३) ॥

(१) २२ । ८ ॥

(२) १० । २८ ॥

(३) अस्मिन्सूत्रोक्तोदाहरणाङ्का द्रष्टव्याः । १८ । २६ ॥ द्वितीयोदाहरणं तथैव ॥ १८ । २७ ॥ २५ । ८ ॥

दुष्टरो विष्टरो विष्टपो विष्ट-
म्भो विष्टम्भनमिम् ॥ ४१ ॥

दुष्टरइत्यादीनि पदानि नावगृह्यन्ते । अत्राचार्येण कारणन्नोपन्यस्तम् । तत्र तावद्दुष्टरपदं धातुसंश्रयान्नावगृह्यते । दुरुपसर्गः पूर्वपदन्तरतेः स्तृणातेर्वोत्तरपदमतो धातुसंश्रयान्नावगृह्यते । विष्टरादीनि तु अन्यायषत्वसंहितानि । अतः षत्वागमोऽपि पदकारैर्न्न कृतः । (१) ॥

ऊवध्यमुगणाऽउखऽइष्कृतिरिष्क-
त्तारमुदरमित्युपसर्गैकदेशलो-
पात् ॥ ४२ ॥

एतानि पदान्युपसर्गैकदेशलोपान्नावगृह्यन्ते । तत्र इष्कृतिः । इष्कर्त्तारमित्यनयोः पदयोर्निरुपसर्गस्य नकारलोपान्नावग्रहः शेषाणामुद उपसर्गस्यान्त्यवर्णलोपान्नावग्रहः । ऊवध्यँय्यथा (२) ऊवध्याँव्वातंठ० सव्ववन्तदारात् । उगणा यथा (३) नमऽउगणाभ्यः ।

(१) ९ । ३७ ॥ कारावमाध्यन्दिनास्तु षत्वागमार्थमवगृह्णन्ति । विष्टरादीनि तु न । १४ । २३ ॥ १४ । ९ ॥ १४ । ५ ॥ इमे सूत्रोक्तोदाहरणाङ्का ज्ञेया इति ॥

(२) १९ । ८४ ॥

(३) १६ । २४ ॥

उखे यथा (१) अभीन्धतामुखे । दुष्कृतिर्य्यथा (२) दुष्कृतिर्न्नाम वः । दुष्कर्त्तारँय्यथा (३) दुष्कर्त्तारमध्वरस्य । उदरँय्यथा (४) पृष्टीर्म्मे राष्ट्रमुदरम् ॥

सँस्कृतम्। सँस्कृतिर्म्माँस्पचन्न्याः पूँश्चलूमित्यनुनासिकोपधत्वात् ॥ ४२ ॥

एतानि पदानि अनुनासिकोपधत्वान्नावगृह्यन्ते । अत्र च 'मध्ये मकारादुकारोदया' दित्यादिभिः सूत्रैरुपधानुनासिकत्वमुक्तम् । पक्षे चानुस्वारः, अतो वाजसनेयिनामुपधानुनासिकत्वान्नावग्रहः । काण्वानां तु वक्ष्यमाणसूत्रेण । संस्कृतँय्यथा (५) तन्नौ सँस्कृतम् । संस्कृतिर्य्यथा (६) सा प्रथमा सँस्कृतिः । मांस्पचन्या यथा (७) माँस्पचन्न्याऽऽउखायाः । पूँश्चलूँय्यथा (८)

(१) ११ । ६१ ॥
(२) १२ । ७४ । इदमुदाहरणं पदपाठस्थं बोध्यम् ॥
(३) १२ । १०१ । इदमपि तथैव ॥
(४) २० । ८ ॥
(५) ४ । ३४ ॥
(६) ७ । १४ ॥
(७) २५ । ३६ ॥
(८) ३० । २० ॥

नम्मीयं पूँश्स्वलूर्ठ० हसाय ॥

अनुस्वारागमत्वादित्येके ॥ ४४ ॥

अनुस्वारागमत्वाद्धेतोरेवैक आचार्या एतान्येव पदानि नावगृह्णन्ति । सर्ठ०स्कृतम् । संर्ठ०स्कृतिः । माꣳस्पचन्न्याः । पूꣳस्वलूम् । काण्वादीनामयं पाठो बोध्यः ॥

परीत्तोऽवत्तानाꣳ सुविताय सग्ग्धिरिति च ॥ ४५ ॥

एतानि पदानि यथायोगं कारणैर्नावगृह्यन्ते । तत्र तावत्परीत्तः । अवत्तानाम् । सग्धिः । एतानि धात्वेकदेशलोपान्नावगृह्यन्ते । सुवितायेत्येतत्पदं सुइताय सुगताय वा गृह्यते । सुताय प्रजायै वा इति धातुसंशयान्नावगृह्यते । यथा (१) श्येने परीत्तोऽअचरत् । (२) अङ्गादङ्गादवत्तानाम् । (३) अग्निः सुदक्षः सुविताय । (४) सग्धिश्च मे सपीतिश्च मे । इति शब्दोऽन्यपदप्रदर्शनार्थः । यथैतानि पदानि एतैर्हेतु-

(१) ९ । ९ ॥
(२) २१ । ४३ ॥
(३) १५ । २७ ॥
(४) १८ । ९ ॥

भिन्नाविगृह्यन्ते । एवमन्यान्यपि द्रष्टव्यानि । तथा चोक्तम् । आदिमध्यान्तलुप्तानि समासान्यायभाञ्जि च । नावगृह्णन्ति कवयः पदान्यागमवन्ति च ॥१॥ (१) ॥

वृद्धं वृद्धिः ॥ ४६ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्यसूत्रे पञ्चमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यवज्रटसूनुनोव्वटेन कृते मातृमोदाख्ये प्रातिशाख्यभाष्ये पञ्चमोऽध्यायः समाप्तः ॥

अनुदात्तमाकृख्यातमामन्त्रितवत् ॥ १ ॥

'स्वरितवर्ज्जमेकोदात्तम्पद' मित्यत्र नामाख्यातोपसर्गनिपातानां सामान्येन स्वरोऽभिहितः । यथा 'नो नौ मे मर्त्य' इत्यादिभिर्नाम्नां विशेषस्वरोऽभिहितः ।

(१) परीत्त इत्यत्र परि उपसर्गको दाण् धातुः । परिदत्तइत्यर्थः । अवत्तानामित्यत्र च अवउपसर्गपूर्वको दाण् दाने धातुः । अवदत्तानामित्यर्थः । सुवितायेत्यत्र षूङ् प्राणिगर्भविमोचने । षु प्रसवैश्वर्ययोर्वा । प्रसवित्रे । ऐश्वर्याय वेत्यर्थः । सुहुताय वा यदाऽर्थस्तदा हु दानादानयोः । ओहाक् त्यागे धातुः । सग्धिरित्यत्र च सजग्धिरिति प्राप्ते जयिक्षये ज्ञाधातुर्वा जनिप्रादुर्भावे वा । एषूदाहरणेषु धातुसंशयान्नावगृह्यन्ते महर्षयः । एतानि सर्वाण्युदाहरणानि पदाधिकारत्वात्पदपाठस्थानि बोध्यानीति ॥

यथा 'वा च कमुचिदि'त्यादिसूत्रेण निपातानां च विशेषस्वरोऽभिहितः । तथा नामाख्यातोपसर्गाणां विशेषस्वरोऽभिहितः । अतस्तत्प्रतिपादनार्थमाह । 'अनुदात्तमाख्यातमामन्त्रितव'दिति । आमन्त्रितपदवदनुदात्तमाख्यातं पदं भवति । यैरेव कारणैरनुदात्तमामन्त्रितं भवति तैरेव कारणैराख्यातमपीत्यर्थः । 'पदपूर्वमामन्त्रितमनानार्थे पादादा' वित्यामन्त्रितस्यानुदात्तत्वमुक्तमिहाऽपि तथैव भवति । एतदुक्तं भवति पूर्वपदमाख्यातमनुदात्तम्भवति तच्च नानार्थे न भवति । अपादादौ च भवति पदपूर्वम्भवति (१) । तद्यथा । मा वंस्तेन ऽईशत । (२) गोपतौ स्यात । अनानार्थइति किम् । (३) पाहि यज्ञं पाहि यज्ञपतिम् । अपादादाविति किम् । (४) रुद्धामा तऽओहैः । (५) सुषाव सोममद्रिभिः ॥

उपसर्गउपसर्गे ॥ २ ॥

उपसर्गोऽनुदात्तो भवत्युपसर्गे प्रत्यये । एतच्च समा-

---

(१) १ । १ ॥

(२) इदमपि तथा ॥

(३) २ । ६ ॥

(४) १५ । ४४ ॥

(५) १९ । २ ॥

सपदे एव द्रष्टव्यम् । यथा (१) सम्अच्च्यंवञ्चम् । (२) सम्अयाताग्ने प्रथः । अत्र समुपसर्ग उपसर्गोऽनुदात्तः । उपसर्ग इति किम् । (३) प्रयतिः । प्रसितिः ॥

आम्रेडिते चोत्तरः ॥ ३ ॥

आम्रेडिते च पदे उत्तर उपसर्गोऽनुदात्तो भवति । यथा (४) सर्ठ०समिति सम् । सम् । (५) उपोपेत्युप । उप । अधस्तनयोगापवादः ॥

कृदाख्यातयोरश्चोदात्तयोः ॥ ४ ॥

उदात्ते कृत्प्रत्यये चाख्याते परभूते उपसर्गोऽनुदात्तो भवति । कृति भवति यथा (६) स्वः । आ । भरन्तः । (७) विभ्राजमानः सरिरस्य मध्ये । आख्याते भवति यथा (८) ये चार्वते पचनठं० सम्भरं-

---

(१) १५ । ५३ ॥
(२) इदमपि तथा ॥
(३) १८ । १ । तथा ॥
(४) ६ । १८ ॥
(५) ३ । ३४ ॥
(६) १५ । ४४ ॥
(७) १५ । ४७ ॥
(८) २५ । २९ ॥

ल्ति । (१) यद्वैवच्चमुदरस्यापवाति । कृदाख्यातयोरिति किम् । (२) अनुगावोऽनु भर्गः कनीनम् । उदात्तयोरिति किम् । (३) प्रयतिः । प्रसितिः । (४) शिवाऽ शग्माम्परि दधे । यत्र चानुदात्तत्वमुपसर्गस्य न भवति । तत्र पृथक् पदत्वमपि भवति । 'स्वरितवर्ज्जमेकोदात्तं पद' मिति परिभाषितत्वात् ॥

नाभ्येकाक्षरश्च स्वरसन्धेये-ऽकृति ॥ ५ ॥

अभ्युपसर्ग एकाक्षरश्चोपसर्गः स्वरात्मके उपसर्गे स्वरसन्धेये चाकृति प्रत्यये नानुदात्तो भवति । अभेः स्वरात्मके भवति यथा (५) अभि । आ । वर्त्तस्व । अभेः स्वरसन्धेये अकृति भवति यथा (६) याभिः । मित्त्रावरुणौ । अभि । असिञ्चन् । (७) अभि । ऐतेताम् । मनसा । एकाक्षरस्य स्वरात्मके भवति

---

(१) २५ । ३३ ॥
(२) २९ । १९ ॥
(३) १८ । १ ॥
(४) ४ । २ ॥
(५) १२ । १४ ॥
(६) १० । १ ॥
(७) ३२ । ७ ॥

यथा (१) वि । आ । अकरोत् । (२) नि । असीदत् । एकाक्षरस्य स्वरसन्धेयेऽक्षति भवति यथा (३) सत्यधर्म्मा वि आनट् । (४) यत् । पुरुषम् । वि । अदधुः । अधस्तनयोगापवादः ॥

आ पूतजातयोः ॥ ६ ॥

आ इत्ययमुपसर्ग्गः पूतजातयोः प्रत्यययोर्न्नानुदात्तो भवति । यथा (५) आ पूतः एमि । (६) आ जातो विश्वा ॥

अधिनिप्रप्रति श्रिताऽत्तिभानवपचतेषु ॥ ७ ॥

अधि नि प्र प्रति एते उपसर्ग्गाः श्रित अत्ति भानव पचत एषु प्रत्ययेषु नानुदात्तो भवति । अधि यथा (७) अधि श्रिताः । नि यथा (८) विश्वन्न्यत्ति-

(१) १९ । ७५ ॥
(२) १७ । १६ ॥
(३) १२ । १०२ ॥
(४) ३१ । १० ॥
(५) ४ । २ ॥
(६) १२ । १३ ॥
(७) २० । ३२ ॥
(८) १७ । १६ ॥

णाम् । प्र यथा (१) प्रभानवः । प्रति यथा (२) प्रति पचता गृभीषत ॥

उज्जेषमावर्त्तऽआपनीफणत्सनिष्यदत्सँव्वतं प्रयाणꣳसञ्चरन्तꣳसꣳरभद्ध्वं प्रसितिँव्विक्रमस्वेत्येतेष्वनु ॥ ८ ॥

उज्जेषम्, आवर्त्ते, आपनीफणत्, सनिष्यदत्, सँव्वतम्, प्रयाणम्, सञ्चरन्तम्, सꣳरभद्ध्वम्, प्रसितिम् । व्विक्रमस्व, एतेषु प्रत्ययेषु अन्वित्ययमुपसर्गो नानुदात्तो भवति । उज्जेषँय्यथा (३) अग्नीषोमयोरुज्जितिमनूज्जेषम् । आवर्त्ते यथा (४) सूर्य्यस्यावृतमन्वावर्त्ते । आपनीफणद्यथा (५) पथामङ्काꣳस्यन्वापनीफणत् । सनिष्यदद्यथा (६) अनु सꣳसनिष्यदत् । सँव्वतँय्यथा (७) वरिष्ठामनु सँव्वतम् । प्र-

(१) १५ । २४ ॥
(२) २१ । ६० ॥
(३) २ । १५ ॥
(४) २ । २७ ॥
(५) ९ । १४ ॥
(६) इदमपि तथैव ॥
(७) ११ । १२ ॥

याणँय्यथा (१) अनु प्रयाणमुषसो विराजति । सञ्च-रन्तँय्यथा (२) समानँय्योनिमनु सञ्चरन्तम् । सꣳ रभध्वँय्यथा (३) इन्द्रꣳ सखायोऽअनु सꣳ रभध्वम् । प्रसितिँय्यथा (४) तृष्वीमनु प्रसितिन्द्रूणानः । वि-क्रमस्व यथा (५) पृथिवीमनु विक्रमस्व ॥

ओपप्रोदात्ते ॥ ९ ॥

आ उप एतौ प्रोपसर्गौ उदात्ते प्रत्यये नानुदात्तौ भवतः । आ यथा (६) आ प्रयातु परावतः । (७) आ प्रयच्छदक्षिणात् । उप यथा (८) उप प्रयाहि । (९) उप प्रागाच्छसनम् ॥

अभिप्रेह्युपसम्प्रयातप्रत्यातनु-ष्वासुपात्र ॥ १० ॥

(१) १२ । ३ ॥
(२) १३ । ५ ॥
(३) १७ । ३८ ॥
(४) १३ । ९ ॥
(५) १२ । ५ ॥
(६) १८ । ७२ ॥
(७) ५ । १९ ॥
(८) ३४ । १९ ॥
(९) २९ । २३ ॥

अभिप्रेहि उपसम्प्रयात प्रत्यातनुष्व आसुषाव एते चोपसर्गा यथागृहीता नानुदात्ता भवन्ति । यथा (१) अभि प्रेहि निर्दह । (२) उप सम्प्रयाताग्ने पथः । (३) उदग्ने तिष्ठ प्रत्यातनुष्व । (४) आ सुषाव सोममद्रिभिः । (५) ॥

प्रकृत्याऽऽख्यातमाख्याता-तपूर्व्वम् ॥ ११ ॥

यदुक्तम'नुदात्तमाख्यातमामन्त्रितव'दिति तस्यायमपवादः । आख्यातपूर्वमाख्यातं प्रकृतिस्वरं भवति । उदात्तपूर्वं भवति यथा (६) पिबन्तु । मदन्तु । व्यन्तु ॥

उदात्ताच्चामन्त्रितादनन्तरम् ॥१२॥

उदात्तस्वराच्चामन्त्रितपदादनन्तरमाख्यातं पदं प्रकृतिस्वरं भवति । यथा (७) अग्ने पवस्व (८) होत-

(१) १७ । ४४ ॥
(२) १५ । ५३ ॥
(३) १३ । १२ ॥
(४) १९ । २ ॥
(५) इमान्युदाहरणानि 'सं०हितायां' मित्यधिकारसूत्रबलात्संहितोदाहरणानि बोध्यानीति ॥
(६) २१ । ४२ । इमान्युदाहरणत्रयाण्येकाध्यायस्थानि ॥
(७) ८ । ३८ ॥
(८) २१ । २८ ॥

र्यंज ॥

एकान्तरादपि ॥ १३ ॥

एकेन पदेन व्यवहितादप्यामन्त्रितपदात्परमाख्यातं प्रकृतिस्वरं भवति । यथा (१) ब्रह्मन्नश्वं भन्त्स्यामि । (२) देवाः । सधस्थाः । विद । रूपम् । अस्य । अपिशब्देन विकल्पो ज्ञेयः । क्वचिद्भवति क्वचिन्न भवति । यथा । (३) दूडे । आ । दूहि ॥

यद्वृत्तोपपदाच्च ॥ १४ ॥

यदो वृत्तं यद्वृत्तं सर्वविभक्त्यन्तं सर्वप्रत्ययान्तं च गृह्यते । यत् । यम् । येन । यतः । यथा । यत्र । यदि । इत्यादि । यद्वृत्तोपपदात्परमाख्यातं पदं प्रकृत्या भवति । (४) यमाज्जर्मानवस्तीर्णबर्हिषम् । (५) येनऽऋषयस्तपसा सत्रमायन् । (६) यतो जातोऽअरोच-

---

(१) २२ । ४ ॥
(२) १८ । ६० ॥
(३) ३ । २८ ॥
(४) १५ । ४९ ॥
(५) १५ । ४९ ॥
(६) ३ । १४ ॥

था: । (१) यथाऽयँव्वायुरेजति । (२) यत्राऽऋषयो ज-
जग्मुः । (३) यदि दिवा यदि नक्तमेनाᳫंसि चकृ-
म । अत्र सर्वत्र यदि यदृ्च्छब्दस्याख्यातपदेन सह स-
म्बन्धो भवति तदेवाख्यातपदं विक्रियते न तु सन्नि-
धिमात्रेण । यथा (४) यदेकस्याधिधर्म्मणि तस्यावय-
जनमसि । तथा चोक्तम् । यस्य येनार्थसम्बन्धो दूर-
स्थस्यापि तस्य तत् ॥ अर्थतो (५) ह्यसमर्थानामान-
न्तर्य्यमकारणमिति ॥ १ ॥

हेश्च ॥ १५ ॥

हिशब्दाच्च परमाख्यातं पदं प्रकृत्या भवति । य-
था (६) आपो हिष्ठा मयोभुवः ॥

उत्तरेऽपि ॥ १६ ॥

उत्तरेऽपि हिशब्दे आख्यातं पदं प्रकृत्या भवति ।
यथा (७) इन्द्वो वा मुशन्ति हि ॥

---

(१) ८ । २८ ॥
(२) १८ । ५८ ॥
(३) २० । १५ ॥
(४) २० । १७ ॥
(५) असमानानामिति 'ग' 'घ' पुस्तकपाठः ॥
(६) ११ । ५० ॥
(७) ७ । ८ ॥

नेत् ॥ १७ ॥

नेदित्यस्मान्निपातसमाहारात्परमाख्यातपदं प्रकृतिस्वरं भवति । यथा (१) एषनेत्त्वदपचेत यांतै ॥

समनसस्करत् ॥ १८ ॥

करदित्येतदाख्यातं पदं समनस इत्येतत्पूर्वं प्रकृत्या भवति । यथा (२) असपत्नाःऽ समनसस्करत् । समनसइत्येतत्पूर्वमिति किम् । (३) सुचक्षो भेषजं करत् ॥

द्वयोः पूर्व्वर्ठं समुच्चये ॥ १९ ॥

द्वयोराख्यातयोः समुच्चयेऽर्थे वर्त्तमानयोः पूर्वमाख्यातं पदं प्रकृत्या भवति । समुच्चयो नाम द्वयोराख्यातयोरेकस्मिन्नर्थे समावेशः । यथा (४) शर्म्म च स्थःऽ । वर्म्म च स्थः । (५) शम् । च वक्षं परि च वक्षं ॥

---

(१) २ । १७ ॥
(२) ७ । २५ ॥
(३) २१ । २२ ॥
(४) ११ । २७ ॥
(५) ८ । २२ । इमान्युदाहरणान्यपि पदपाठस्थानि बोध्यानि ॥

वा विचारणे ॥ २० ॥

द्वयोराख्यातयोर्विचारणेऽर्थे वर्त्तमानयोः पूर्वमाख्यातम्प्रकृत्या भवति, वा शब्देन चेदाख्यातयोर्योगो भवति । संहितायां प्रायश्चउदाहरणानि न लभ्यन्ते । रूपोदाहरणानि तु दीयन्ते । देवदत्तो भुङ्क्तां वा यज्ञदत्तो वा भुङ्क्ताम् ॥

अहविनियोगे ॥ २१ ॥

द्वयोराख्यातयोर्विनियोगेऽर्थे वर्त्तमानयोः पूर्वमाख्यातं प्रकृत्या भवति । अहशब्देन चेदाख्यातयोर्योगो भवति । विनियोगो नाम द्वयोः पुरुषयोरेकस्मिन्कर्मणि एकस्य पुरुषस्य सम्बन्धः । अन्यस्मिन्कर्मण्यपरस्य सम्बन्धः । रूपोदाहरणन्दीयते । यथा 'देवदत्तोऽह ग्रामं गच्छतु' यज्ञदत्तोऽह गाः पालयतु ॥

एवावधारणे ॥ २२ ॥

द्वयोराख्यातयोरवधारणेऽर्थे वर्त्तमानयोः पूर्वमाख्यातं प्रकृत्या भवति । एवशब्देन चाख्यातयोर्योगो भवति । अवधारणं नाम द्वयोः कर्मणोर्द्वयोश्च कर्त्रोरेकस्मिन्कर्मण्येकः कर्त्ताऽवध्रियते परस्मिन्नन्यः । यथा देवदत्तएव ग्रामं गच्छतु, यज्ञदत्त एव भुङ्क्ताम् ॥

उपपदाप्रयोगेऽपि च ॥ २३ ॥

च वा ह अह एव एतानि च प्रभृतीनि यान्युपपदानि उक्तान्याख्यातस्य विकारीणि तेषामर्थो यदि कथं चिदवगम्यते । तथा चोक्तम् । उपसर्गात्परो यस्तु पदादिरपि दृश्यते । उच्चस्थानास्थितो यत्र गुरुन्तत्रैव कारयेत् । इति तदा एतेषामुपपदानामुच्चारणेऽपि आख्यातं न विक्रियते । तथा रूपोदाहरणम् । सुखं भवथ । पवित्रकं भवथ । चशब्दोऽत्र लुप्तः । इत्थं भूतानि छन्दस्युदाहरणानि द्रष्टव्यानि ॥

परोपापावप्रतिपर्य्यन्न्वप्यध्या-ङ्प्रसन्निर्दुरुन्निविस्वभि ॥ २४ ॥

परा उप अप अव प्रति परि अनु अपि अधि आङ् प्र सम् निर् दुर् उद् नि वि सु अभि एते विंशतिरुपसर्गाः प्रकृतिस्वरा भवन्ति । अस्य चोत्सर्गस्य 'उपसर्गा उपसर्गे' इत्यादिकः पुरस्तादपवादो द्रष्टव्यः । प्रकृतिस्वरस्तु व्याकरणपरिपठितोऽत्र गृह्यते । तथा च तत्सूत्रम् । "निपाता आद्युदात्ता." "उपसर्गाश्चाभिवर्ज्ज"मिति । तथा चोक्तम् । एकारोऽथ चकारो वा रेफो दीर्घपरेषु च । समुपसर्गेत्येतष्टेद्गुरुरेव न संशयः ॥ १ ॥ उक्तानामुपसर्गाणामनित्यमुपसर्गगुरु । यथा (१) अनु योजान्विन्द्र ते हरी । विं-

(१) ३ । ५३ । अत्र कश्चिद्विशेष उक्तो लघुमाध्यन्दिनीयशिक्षायाम् । उपसर्गपरो

मतेरुपसर्गाणामुच्चा एकाक्षरा नव । आद्युदात्ता द-
शैवैषामन्तोदात्तस्त्वभीत्ययम् ॥ २ ॥

द्विस्पर्शम् ॥ २५ ॥

द्वौ स्पर्शौ यस्मिन्पदे तद्द्विस्पर्शं पदम् । अधिकारश्च-
वमेतत् ॥

ऽवेत्तु ऽवित्त्वाऽस्मद्र्यक्पात्रमभि
त्र्यम्मृत्तिकाद्ध्वन्दात्त्रं॰समावव-
र्त्यृद्धिर्वृद्धिरराद्ध्याऽअर्द्धंशुद्धबुद्धन-
कृत्तं निषण्णस्विन्नान्नसन्ना-
द्दृश्य ॥ २६ ॥

एतेषु पदेषु द्वौ स्पर्शौ भवतः । वेत्तु यथा (१) प्र-
तिं त्वा पर्व्वती वेत्तु । द्वौ तकारौ संय्योगः । वित्त्वा
यथा । (२) वित्त्वा गातुमित । द्वौ तकारौ वकारश्च

यस्तु पदादिरपि दृश्यते । ईषत्स्पृष्टा यथा विद्यात्पदच्छेदात्परा भवेदिति १ । यदेव
लक्षणं यस्य वकारस्यापि तद्भवेत् । इति । सर्वेषूपसर्गेषु परेषु यकारस्य जकारसदृशो-
च्चारणम् । अन्तस्थवकारस्य च द्वित्ववद्गुरूच्चारणं भवति परन्तु उपसर्गद्वयं विहाय
भवति तदुक्तममरेशेन स्वकृतवर्णरत्नप्रदीपिकायां शिक्षायां "अनु योजान्विन्द्र ते तु
उप यज्ञं विना तथा" । इति ॥

(१) १ । १९ ॥

(२) २ । २१ ॥

संय्योगः ॥ अस्मद्र्यक् यथा (१) अस्मद्द्र्यग्ग् वावृधे । पार्त्वँय्यथा (२) आसन्ना पार्त्वञ्जनयन्त देवाः । द्वौ तकारौ रेफस्य संय्योगः । अभित्यँय्यथा (३) अभि त्यन्देवम् । द्वौ तकारौ यकारस्य संय्योगः, स्तित्तका यथा (४) अश्मा च मे स्तित्तका च मे । द्वौ तकारौ संय्योगः । ध्वँय्यथा (५) व्विमुच्च्यध्वमघ्न्या देवयानाः । दकारधकारौ वकारस्य संय्योगः, दात्रँय्यथा (६) सोमस्य दात्त्रमसि स्वाहा । द्वौ तकारौ रेफस्य संय्योगः । समावर्त्ति यथा (७) समाववर्त्ति पृथिवी । रेफो द्वौ तकारौ संय्योगः । ऋद्धिर्य्यथा (८) सवस्यऽर्द्धिरसि । दकारधकारौ संय्योगः । वृद्धिर्य्यथा (९) वृद्धञ्च मे वृद्धिश्च मे, दकारधकारौ संय्योगः । अराद्ध्यै यथा (१०) अराद्ध्याऽएदिधिषुः पतिम् । दकारधकारौ यकारस्य-

(१) ७ । ३९ ॥
(२) ७ । २४ ॥
(३) ४ । २५ ॥
(४) १८ । १३ ॥
(५) १२ । ७३ ॥
(६) १० । ६ ॥
(७) २० । १३ ॥
(८) ८ । ५२ ॥
(९) १८ । ४ ॥
(१०) ३० । ९ ॥

सँय्योगः । अर्द्धो यथा (१) अन्तश्च पराऽर्द्धश्चैता मे । रेफदकारधकाराः सँय्योगः, शुद्धो यथा (२) शुद्धवालः सर्व्वशुद्धवालः । दकारधकारौ सँय्योगः । बुद्धो यथा (३) प्रबुद्धाय स्वाहा । दकारधकारौ सँय्योगः । नक्तँय्यथा (४) मधु नक्तमुतोषसः । द्वौ ककारौ तकारश्च सँय्योगः । निषण्णो यथा (५) निषण्णाय स्वाहा । द्वौ णकारौ सँय्योगः । स्विन्नो यथा (६) स्विन्नः स्नातो मलादिव । द्वौ नकारौ सँय्योगः । अन्नँय्यथा (७) अन्नपतेऽन्नस्य । द्वौ नकारौ सँय्योगः । सन्नो यथा (८) सन्नः सिन्धुः । द्वौ नकारौ सँय्योगः । 'स्वरात्सँय्योगादि'रित्यस्य प्रायशोऽपवादभूतमेतत्सूत्रम् ॥

न क्षवृचिश्विसतयेभ्यस्तैकम् ॥२७॥

क्ष वृ चि श्वि स त य एतेभ्यः परस्तशब्दो न द्वि-

(१) १७ । २ ॥
(२) २४ । ३ ॥
(३) २२ । ७ ॥
(४) १३ । २८ ॥
(५) २२ । ८ ॥
(६) २० । २० ॥
(७) ११ । ८३ ॥
(८) ८ । ५९ । इमान्युदाहरणानि सूत्रपठितानि महर्षिसंहितायां ज्ञातव्यानीति ॥

रुच्यते एकमेव व्यञ्जनं भवति । त्व यथा (१) त्वमस्य योनिरसि । ह्व यथा (२) ह्वलँव्वेधेत् । चि यथा (३) चित्रं देवानाम् । श्वि यथा (४) श्वित्रऽआदित्यानाम् । स यथा (५) सत्वस्यऽक्षतिद्धिः । त यथा (६) तत्र गच्छं । य यथा (७) यत्र पूर्व्वे परेताः । 'स्वरात्संय्योगादि'रित्यस्यायमपवादः । (८) ॥

ईर्ष्याय वार्ध्रीनसोद्रादश्वरा-श्वेत् ॥ २८ ॥

ईर्ष्याय वार्ध्रीनस उद्रः एते स्पर्शाः सँय्योगादयो न द्विरुच्यन्ते । यद्व्यवचनास्सेद्भवन्ति । ईर्ष्याय यथा (९) नमो व्वीर्ध्याय च, धकाररेफौ यकारस्य सँय्योगः । वार्ध्रीनसो यथा (१०) व्वार्ध्रीनसस्ते । रेफधकारौ रेफस्य

(१) १० । ८ ॥

(२) इदमपि तथा ॥

(३) ७ । ४२ ॥

(४) २४ । ३९ ॥

(५) ८ । ५२ ॥

(६) १३ । ३१ ॥

(७) इदमपि तथा ॥

(८) एतदप्यनुसारिणी अमरेशकृतवर्णरत्नप्रदीपिकाख्यशिक्षाकारिकापि । क्षत्र-वृत्रस्तथा श्वित्राचित्रसत्रस्तथैव च । यत्र तत्र पदेष्वेषु व्यञ्जनं न द्विरुच्यते । इति ॥

(९) १६ । ३८ ॥

(१०) २४ । ३९ ॥

सँय्योगः । उद्रो यथा (१) अपामुद्रो मासाङ्कश्यपः । चरद्रव्यवचना इति किम् । (२) समुद्राय शिशुमारान् । अत्र समुद्रशब्देन पार्थिवः समुद्र उच्यते ॥

उपोत्थित उत्तम्भनमुत्तभानो-त्थायोत्थितायेति त्रीणि ॥२९॥

उपोत्थितः उत्तम्भनम् उत्तभान उत्थाय उत्थिताय एतेषु पदेषु त्रीणि स्पर्शाख्यानि व्यञ्जनानि भवन्ति । उपोत्थितो यथा (३) क्रयायोपोत्थितोऽसुरः । द्वौ तकारौ थकारश्च सँय्योगः । उत्तम्भनँय्यथा (४) वरुणस्योत्तम्भनम् । त्रयस्तकाराः सँय्योगः । उत्तभान यथा (५) दिवमुत्तभान तेजसा । त्रयस्तकाराः सँय्योगः । उत्थाय यथा (६) उत्थाय बृहती भव । द्वौ तकारौ थकारश्च सँय्योगः । उत्थिताय यथा (७) उत्थिताय स्वाहा । द्वौ तकारौ थकारश्च सँय्योगः ॥

---

(१) २४ । ३७ ॥
(२) २४ । २१ ॥
(३) ८ । ५५ ॥
(४) ४ । ३६ ॥
(५) १७ । ७२ ॥
(६) ११ । ६४ ॥
(७) २२ । ८ ॥

बर्हिरङ्ङ्क्ताम्भद्द्रेण पृङ्ङ्क्तं पङ्ङ्क्तिः समङ्ङ्धि परिवृङ्ङ्धि पाङ्ङ्क्वामिति द्वावनुनासिकौ पूर्वावारपन्तीवर्ज्जमिति च ॥ ३० ॥

बर्हिरङ्क्ताम् भद्द्रेण पृङ्क्तम् पङ्क्तिः समङ्धि परिवृङ्धि पाङ्क्त्रान् । एवं जातीयकेषु स्पर्शात्पूर्वौ द्वावनुनासिकौ ङकारौ भवतः । आरपन्तीशब्दं वर्जयित्वा । बर्हिरङ्क्ताँ यथा (१) सम्बर्हिरङ्ङ्क्ताम् । भद्द्रेण पृङ्क्ताँ यथा (२) सम्मा भद्द्रेण पृङ्ङ्क्ताम् । पङ्ङ्क्तिर्यथा (३) पङ्ङ्क्तिश्छन्दः । समङ्धि यथा (४) पयसा समङ्ङ्धि । परिवृङ्धि यथा (५) परिवृङ्ङ्धि हरसा । पाङ्क्त्रान्यथा (६) अन्तरिक्षाय पाङ्ङ्क्त्रान् । आरपन्तीवर्जमिति किम् (७) ऋतस्य सामन्त्सरमारपन्ती ॥

(१) २ । २२ ॥
(२) ९ । ४ ॥
(३) १४ । १७ ॥
(४) १३ । ४१ ॥
(५) इदमपि तथैवोदाहरणम् ॥
(६) २४ । २६ ॥
(७) २२ । २ । इमान्युदाहरणान्यार्षीय संहितायां बोध्यानीति ॥

वृद्धँ्वृद्धिः ॥ ३१ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्य सूत्रे षष्ठोऽध्यायः समाप्तः॥ ६ ॥

इत्यानन्दपुरवास्तव्यवज्रटसूनुनोव्वटेन कृते मातृमोदाख्ये प्रातिशाख्यभाष्ये षष्ठोऽध्यायः समाप्तः ॥६॥

अथावसानानि ॥ १ ॥

अथ शब्दोऽधिकारार्थः । पदावसानान्यधिकृतानि वेदितव्यानि । पदान्तस्येतिकरणस्यादेश्च यः सन्धिः स उच्यतइति यावत् ॥

कण्ठ्यस्वरमेकारेण परिगृह्णीयात्प्लुतवर्ज्जम् ॥ २ ॥

कण्ठ्यो ह्रस्वोऽकारो दीर्घश्चाकारः स्वरस्तमेकारेण परिगृह्णीयात्प्लुतमाकारं वर्ज्जयित्वा । यथा (१) यच्छन्तां पञ्च । पञ्चेति पञ्च । (२) द्रविणस्युर्व्विप-

(१) १ । ८ ॥
(२) ३३ । ८ ॥

न्यया । व्विपन्न्ययेति विपन्न्यया । प्लुतवर्ज्जमिति किम् । (१) व्विवेशा ३ इति विवेशा ॥

ईवर्णमीकारेण ॥ ३ ॥

ईवर्णमीकारेण परिगृह्णीयात् । यथा (२) पप्ल्र्न्याहि । पाहीति पाहि । (३) अभिश्वना सूनृतावती । सूनृतावतीति सू । नृतावती ॥

उवर्णँव्वकारेण ॥ ४ ॥

उवर्णं वकारेण परिगृह्णीयात् । यथा (४) तव द्युम्नान्युत्तमानि सन्तु । सन्त्विति सन्तु ॥

औकारं च ॥ ५ ॥

औकारं च वकारेण परिगृह्णीयात् । यथा (५) अभि षिञ्चाम्यसौ । असावित्यसौ ॥

ह्रस्वकण्ठ्योपधं विसर्ज्जनीयान्तम-

(१) २३ । ४९ ॥
(२) १ । १ ॥
(३) ७ । १० ॥
(४) ३३ । १२ ॥
(५) ९ । ३० ॥

रिफितं विवृत्त्या ॥ ६ ॥

विसर्जनीयान्तम्पदं ह्रस्वाकारोपधं रिफितं यन्न भवति तद्विवृत्त्या परिगृह्णीयात् । यथा (१) होता य॒जिष्ठो॑ऽअध्व॒रेष्वीड्यः॑ । ईड्य॒ऽइतीड्यः॑ । (२) शुक्र॒न्दुदु॒ह्रेऽअह्र॑यः । अह्र॑य॒ऽइत्यह्र॑यः । अरिफितमिति किम् । (३) सतश्च॒ योनि॒मसतश्च॒ वि वः॑ । व॒रिति॒ वः । (४) सु॒रुचो॒ वे॒नऽआवः । आ॒वरि॒त्याव॑ः ॥

दीर्घकण्ठ्योपधं विसर्ज्जनीयान्तमेकारान्तमैकारान्तं प्लुतं प्रगृह्यं च ॥ ७ ॥

दीर्घाकारोपधं विसर्जनीयान्तं च यत्पदं तद्विवृत्त्या परिगृह्णीयात् । एकारान्तमैकारान्तं प्लुतं प्रगृह्यं च । एतानि च पदानि विवृत्त्या परिगृह्णीयात् । दीर्घकराठ्योपधं विसर्जनीयान्तमुदाहरणं यथा (५) य॒तो जा॒तोऽअरो॑चथाः । अरो॑चथा॒ऽइत्यरो॑चथाः । ए-

(१) ३ । १५ ॥
(२) ३ । १६ ॥
(३) १३ । ३ ॥
(४) इदमपि तथा ॥
(५) ३ । १४ ॥

कारान्तँव्यथा (१) मन्त्रँव्वोचेमाग्नये । अग्नय इत्यग्नये । ऐकारान्तँव्यथा (२) उभा राधसः सह मादयद्ध्यै । मादयद्ध्या इति मादयद्ध्यै । प्लुतँव्यथा (३) भुवनमा विवेशा३ । विवेशा इति विवेशा३ । प्रगृह्यँव्यथा (४) अन्न्यान्न्याँव्वत्सस्मुप धापयेते । धापयेते इति धापयेते ॥

औकारान्तश्चैके ॥ ८॥

औकारान्तं च पदमेके आचार्या विहृत्त्या परिगृह्णन्ति । यथा (५) अभिषिञ्चाम्म्यसौ । असा इत्यसौ । एक इति किम् । असावित्त्यसौ ॥

भाव्युपधं च रिद्विसर्ज्जनीयान्तानि रेफेण ॥ ९॥

अकारव्यो भावीत्युक्तम् । भाव्युपधं रिद्विसर्जनीयान्तं रिफितविसर्जनीयान्तं च यत्पदं तद्रेफेण परिगृ-

(१) ३ । ११ ॥
(२) ३ । १३ ॥
(३) २३ । ४९ ॥
(४) ३३ । ५ ॥
(५) ९ । ३० ॥

ह्णीयात् । यथा (१) अग्निमीडे पूर्व्वचित्तिन्नमोभिः । नमोभिरिति नमः । भिः । (२) सद्यक्कः । करिति कः, (३) सतश्च योनिमसतश्च व्वि वः । व्वरिति वः ॥

प्रथमान्तन्तृतीयेन ॥ १० ॥

प्रथमान्ताः कचटतपाः तृतीयान्ता गजडदबाः वर्ग्गप्रथमान्तं पदं स्ववर्ग्गतृतीयेन वर्णेन परिगृह्णीयात् । यथा (४) व्विश्वा इषांसि प्र मुमुग्ध्यस्मत् । अस्मदित्यस्मत् । (५) समंम्हतत्त्वमानट् । आनडित्यानट् ॥

उत्तमान्तमुत्तमेन ॥ ११ ॥

उत्तमान्तं पदमुत्तमेनैव परिगृह्णीयात् । यथा (६) व्वर्त्री वृद्रा नृपाय्यम् । नृपाय्यमिति नृपाय्यम् ॥ (७) ॥

---

(१) १३ । ४३ ॥

(२) ३३ । ५९ ॥

(३) १३ । ३ । इमान्युदाहरणान्यार्षसंहिताया बोध्यानीति ॥

(४) २१ । २ ॥

(५) १७ । ८९ ॥

(६) २० । ८१ ॥

(७) एवं सर्वत्र पदक्रमादिविकृतिषु सन्धिकार्यं ज्ञेयमिति, परिग्रहोऽवग्रह इत्यनर्थान्तरम् । स कुत्र भवति कुत्र न भवति तल्लक्षणं चैतच्छास्त्रीयपञ्चमाध्यायादौ 'स-

वृद्धँव्वृद्धिः ॥ १२ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्य-सूत्रे सप्तमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यवज्रटसूनुनोव्वटेन कृते मातृमोदाख्ये प्रातिशाख्यभाष्ये सप्तमोऽध्यायः समाप्तः ॥

अथातो वर्णसमाम्नायँव्व्याख्यास्यामः ॥

अथातः शब्दादुक्तार्थौ वर्णा यस्मिन्समाम्नाये पठ्यन्ते स वर्णसमाम्नायस्तं व्याख्यास्याम इति प्रतिज्ञा समाधानार्थम् ॥

तत्र स्वराः प्रथमम् ॥ १ ॥

व्याख्यायन्त इति शेषः । तद्यथा । अइति । आइति । आ३इति । इइति । ईइति । ई३इति । उइति । ऊइति । ऊ३इति । ऋइति । ॠइति । ऋ३इति । लृइति । लॄइति । लृ३इति ॥ (१) ॥

मात्रेऽवग्रहो ह्रस्वसमकाल’इत्युक्तम् ॥

(१) लृकारवर्णस्य पाणिनिना दीर्घता न स्वीकृता परन्तु कात्यायनेनाभिमतेति ॥

अथ सन्ध्यक्षराणि ॥ २ ॥

व्याख्यायन्त इति सूत्रशेषः । एइति । ए३इति । ऐइति । ऐ३इति । ओइति । ओ३इति । औइति । औ३इति ॥ (१) ॥

इति स्वराः ॥ ३ ॥

व्याख्याता इति सूत्रशेषः ॥ (२) ॥

अथ व्यञ्जनानि ॥ ४ ॥

व्याख्यायन्त इति सूत्रशेषः । तद्यथा । किति खिति गिति घिति ङिति कवर्गः । चिति छिति जिति झिति ञिति चवर्गः । टिति ठिति डिति ढिति णिति टवर्गः । तिति थिति दिति धिति निति तवर्गः । पिति फिति बिति भिति मिति पवर्गः ॥ (३) ॥

इति स्पर्शाः ॥ ५ ॥

व्याख्याताः इति सूत्रशेषः ॥

---

(१) एच्प्रत्याहारान्तर्गतानां एकारादिवर्णचतुष्टयानां नास्ति ह्रस्वत्वम् ॥

(२) व्यञ्जनशब्दोपतापयोः । व्यज्यते शब्द्यतेऽनेन व्यञ्जनमिति करणेऽच्प्रत्ययो भवति ॥

(३) 'व्यञ्जनं कादी'ति प्रथमाध्यायस्थसूत्रात्कादीनामेव व्यञ्जनत्वमिति सूचितम् ॥

अथान्तस्थाः ॥ ६ ॥

व्याख्यायन्त इतिशेषः । यिति रिति लिति विति ॥

अथोष्माणः ॥ ७ ॥

व्याख्यायन्त इति शेषः । शिति षिति सिति हिति ॥

अथायोगवाहाः ॥ ८ ॥

व्याख्यायन्त इति शेषः । अकारादिना वर्णसमाम्नायेन संहिताः सन्त एते वहन्त्यात्मलाभं प्राप्नुवन्त्ययोगवाहाः । तथाहि ॥

ᳵक इति जिह्वामूलीयः ॥ ९ ॥

इति ककारपूर्वं जिह्वामूलीयं दर्शयति तथा ॥

ᳶप इत्युपध्मानीयः ॥ १० ॥

इति पकारपूर्वमुपध्मानीयं दर्शयति एवमन्यत्रापि द्रष्टव्यम् ॥

अं इत्यनुस्वारः ॥ ११ ॥

इति स्वरपूर्वमनुस्वारं दर्शयति ॥

अः इतिविसर्ज्जनीयः ॥ १२ ॥

इतिस्वरपूर्वं विसर्जनीयं दर्शयति ॥

हुँ इति नासिक्यः ॥ १३ ॥

अयम्टक्शाखायां प्रसिद्धः ॥

कुँखुँगुँघुँ इति यमाः ॥ १४ ॥

इति यमसञ्ज्ञका वर्णा विंशतिसङ्ख्यका भवन्तीत्येतच्चतुर्थाध्याये व्याख्यातम् ॥

एते पञ्चषष्टिवर्णा ब्रह्मराशिरात्मवाचः ॥ १५ ॥

य एते पञ्चषष्टिवर्णास्ते समस्ता एव त्रयीलक्षणो ब्रह्मराशिः । एत एव कदाचिदानुपूर्व्या व्यवस्थिताः सन्त ऋग्यजुःसामाख्या भवन्तीत्यर्थः । लौकिक्या अपि वाचोऽयमेवात्मा । एतदेव स्पष्टीकर्त्तुमाह ॥

यत्किञ्चिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ॥ १६ ॥

यत्किञ्चिद्वाङ्मयं लोके इत्यादि, एते पञ्चषष्टिवर्णा लोके वेदे च प्रतिज्ञाता । यत्किञ्चिद्वाङ्मयं लोके इत्यादिना ते च लोके लोकैरनियतदेशकालाः प्रयुज्यमानाः सन्तो दृष्टाः । अतो वेदे तन्नियमार्थः स्या-

ध्यायविधिः क्रियते ॥

शुचिना ॥ १७ ॥

स्नानाचमनादिभिः शौचयुक्तेन ब्रह्मचर्य्यवता त्रैवर्णिकेन स्वाध्यायोऽध्येतव्यः ॥

शुचौ देशे ॥ १८ ॥

अनुपहतदेशे स्वाध्यायोऽध्येतव्यः । तथा चोक्तम् । द्वावेतौ वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः । स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥ १ ॥

शूद्रपतितयोरसंश्रावं स्वाध्यायोऽध्येतव्यः ॥ १९ ॥

शूद्रपतितादयो न शृण्वन्ति तथा स्वाध्यायोऽध्येतव्यः ॥

ज्ञाने ॥ २० ॥

एवं स्वाध्यायविधिमुक्त्वाऽधुना वेदस्य ग्रन्थतोऽर्थतस्य परिज्ञाने फलमाह ॥

पौरुष्यम् ॥ २१ ॥

पुरुष आत्मा तस्य विवेकस्य साधकं पौरुष्यं मुक्तिप्रदमित्यर्थः (१) ॥

(१) तत्र प्रमाणं संहितायां ३१ अध्याये १८ ऋचि । तमेव विदित्वाति मृत्युमे-

स्वर्ग्यम् ॥ २२ ॥

स्वर्गसाधकञ्च (१) ॥

यशस्यम् ॥ २३ ॥

यशः कीर्तिस्तस्याः साधकम् । (२) ॥

आयुष्यम् ॥ २४ ॥

आयुषो वर्द्धनम् । यद्वेदस्यार्थज्ञाने तन्मुक्तिसाधकं स्वर्गसाधकं च भवति ॥

तथा विभक्तिपरिज्ञानम् ॥ २५ ॥

पदार्थज्ञानं तन्मुक्तिसाधकम् । यत्प्रकृतिप्रत्ययादिपरिज्ञानं तत्स्वर्गयश आयुषां साधकमित्ययं विभागो ज्ञानस्य द्रष्टव्यः । (३) ॥

अथापि भवति ॥ २६ ॥

अयमेवार्थः प्रकृत्या । अन्योऽपि श्लोको भवति, वेद-

ति नान्यः पन्था विद्यतेऽयनायेति श्रुतेः ॥

(१) यं यं क्रतुमधीयीत तस्य तस्याप्नुयात्फलम् । इत्युक्तेः ॥

(२) यशः शब्देन कीर्तिरप्युपलक्ष्यते । यशःकीर्त्योर्जीविन्मृतप्रशंसयोरपि साधकं भवति ॥

(३) तथा च महर्षिभगवता पतञ्जलिना महाभाष्येऽप्युक्तम् । एकः शब्दः सम्यगुच्चारितः स्वर्गे लोके च कामधुग्भवतीति ॥

स्वाध्ययनाद्धर्मः सम्प्रदानात्तथा श्रुतेः ॥

वर्णशोऽक्षरशो ज्ञानाद्विभक्तिपदशोऽपि च ॥ २७ ॥

वेदस्य पाठमात्रात्तावद्धर्मो भवति तथा शिष्येभ्यः सम्प्रदानात् । तथा श्रवणात्तथा वर्णपरिज्ञानात्तथाऽक्षरपरिज्ञानात् विभक्तिपरिज्ञानाच्च पदपरिज्ञानाच्चोत्तरोत्तरं धर्मो भवति । इत्येतदेवानुवर्त्तते ॥

त्रयोविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः ।
द्विचत्वारिंशद्व्यञ्जनान्येतावान्वर्णसङ्ग्रहः ॥ २८ ॥

शब्दस्वरूपचिन्तकैस्त्रयोविंशतिः स्वरा अकारादय उक्ताः । द्विचत्वारिंशद्व्यञ्जनानि कादीनि एतावान्वर्णसङ्घातः ॥

तस्मिँल्लहल्जिव्हामूलीयोपद्ध्मानीयनासिक्या न सन्ति माद्ध्यन्दिनानाम् ॥ २९ ॥

ऌकारो दीर्घः प्लुताश्चोक्तवर्ज्जम् ॥ ३० ॥

अधस्तनश्लोकरूपसूत्रेण वर्णानुक्त्वा अधुना ये माध्यन्दिनानामनिष्यन्ते वर्णास्तान्निराकर्त्तुमाह। ढकारष्टवर्गीयो ळकारश्च तत्प्रकृती ळ्हळकारौ जिव्हामूलीयो य उपध्मानीयश्च नासिक्यश्च एते वर्णा न सन्ति माध्यन्दिनानाम् ॥ किमेतावन्त एव नेत्युच्यते । ऌकारो दीर्घः । लाजीञ्छाचीनित्येवमादयो ये पठितास्तान्प्लुतान्वर्ज्जयित्वा अन्ये प्लुता न सन्ति माध्यन्दिनानाम् ॥

वर्णदेवताः ॥ ३१ ॥

प्रक्रतानां वर्णानां देवता वक्ष्याम इति सूत्रशेषः ॥

आग्नेयाः कण्ठ्याः ॥ ३२ ॥

कण्ठस्थाना वर्णा अग्निदेवत्या भवन्ति ॥

नैर्ऋत्या जिव्हामूलीयाः ॥ ३३ ॥

जिव्हामूलस्थाना वर्णा निर्ऋतिदेवत्या भवन्ति ॥

सौम्यास्तालव्याः ॥ ३४ ॥

तालुस्थाना वर्णाः सोमदेवत्या भवन्ति ॥

रौद्रा दन्त्याः ॥ ३५ ॥

दन्तस्थाना वर्णाः रुद्रदेवत्या भवन्ति ॥

ओष्ठ्या आश्विनाः ॥ ३६ ॥

ओष्ठस्थाना वर्णा अश्विदेवत्या भवन्ति ॥

वायव्या मूर्द्धन्याः ॥ ३७ ॥

मूर्द्धस्थाना वर्णा वायुदेवत्या भवन्ति ॥

शेषा वैश्वदेवाः ॥ ३८ ॥

एतानि स्थानानि विहाय येऽन्यस्थानजन्या वर्णास्ते वैश्वदेवा भवन्ति । स्पष्टार्थान्येतानि सूत्राणि ॥

तत्समुदायोऽक्षरम् ॥ ३९ ॥

तेषां वर्णानां एकीभावलक्षणः समुदायोऽक्षरं भवति । तद्यथा कखगघङेत्यादि ॥

वर्णो वा ॥ ४० ॥

वर्णसमुदायो वा वर्णो वाऽक्षरम्भवति । तद्यथा । अआइईउऊ इत्येवमादि । वर्णसमुदायोऽक्षरं भवति । कखगघङ दभा । एवमादि । व्यवस्थितविभाषा चेयम् । स्वरः केवलोऽप्यक्षरं भवति । व्यञ्जनसमुदायस्तु स्वरसंहित एवाक्षरं भवति । तथा च प्रतिपादि-

तम् । 'स्वरोऽक्षरम्' । 'सहाद्यैर्व्यञ्जनैः' । 'उत्तरैश्चावसितै'रिति । प्रथमाध्याये एवेति ॥

अक्षरसमुदायः पदम् ॥ ४१ ॥

अक्षराणां समुदायः पदं भवति । तद्यथा । (१) इषे त्वा । ऊर्ज्जे । त्वा । (२) वाजः । च । मे ॥

अक्षरँ्वा ॥ ४२ ॥

अक्षरं वा पदं भवत्यक्षरसमुदायो वा पदं भवति । (३) इन्द्रं । आ याहि । (४) यः । उ । विद्यायाम् । एता ः । अक्षरसमुदायः पदं भवति । (५) इषे । त्वा ऊर्ज्जे । त्वा ॥

तच्चतुर्द्धा ॥ ४३ ॥

तदेतत्पदं चतुर्द्धा भिद्यत इति सूत्रशेषः ॥

नामाख्यातोपसर्गनिपाताः ॥ ४४ ॥

नामपदँय्यथा गौरश्वः पुरुषः हस्तीत्येवमादि ।

---

(१) । १ ॥

(२) १८ । १ ॥

(३) २५ । ५ ॥

(४) ४० । १० ॥

(५) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥

आख्यातपदं यथा पचति पठति गच्छति धावति वल्गतीत्येवमादि। उपसर्गपदं यथा प्र परा आ अभीत्येवमादि। निपातपदं यथा वा च कम् उचित् इत्यादि। नामाख्यातोपसर्गनिपाता इति बहुवचनं पदचतुष्टयापेक्षम्॥

तत्र प्रति विशेषः॥ ४५॥

तत्र च वाक्यपदचतुष्टयं प्रति यो विशेषः स प्रतिपाद्यते वक्ष्यमाणेन सूत्रेणेति वाक्यशेषः॥

क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्। सत्त्वाभिधायकं नाम निपातः पादपूरणः॥ ४६॥

अथ व्यवस्थया पदचतुष्टयस्य लक्षणं कर्तुमाह। क्रिया। कालः। कर्त्ता। सङ्ख्या। उपसर्गो विशेष इत्याख्यातार्थः। तत्र क्रियैव प्रधानमुपसर्गस्तु क्रियाया एव विशेषंकरोति। यथा पचतीत्यत्र पाचकः प्रतीयते। पुनः प्रपचतीत्युक्ते आदिकर्त्ता प्रतीयते। एवं गच्छत्यागच्छतीत्यादिषु द्रष्टव्यम्। सत्वं धातुः। कारकं विभक्तिरिति नाम्नोऽर्थः। तत्र सत्त्वमेव विशेषतोऽभि-

धीयते । निपातस्त्वर्थासम्भवे पादपूरणो भवति ॥

चतुर्द्दश निपाता येऽनुदात्तास्तेऽपि सञ्चिताः ।

निहन्यते खल्वाख्यातमुपसर्गचतुष्टये ॥ ४७ ॥

एवं नामाख्यातोपसर्गनिपातानामर्थभेदं व्याख्यायाधुना स्वरसंस्कारावपि तत्रोक्तावेवैतौ प्रतिपादयति चतुर्द्दशेति । चतुर्द्दश निपाता येऽनुदात्तास्तेऽपि अधस्तात्सञ्चिता एव वा च कमुचिदित्यादिसूत्रेण । निपातग्रहणमुपलक्षणम् । नाम्नामपि स्वरः सूत्रविहितएव यथा 'नो नौ मे मदर्थे त्विद्येके' ष्वित्यादिना । यच्च पदचतुष्टये आख्यातमुक्तं तन्निहन्यते अनुदात्तं भवति उपसर्गादीनां पदानां परभूतम् । उपसर्गे विशेषकृत् । सत्त्वाभिधायकन्नाम निपातः पादपूरणः इत्येतन्नामानुपूर्वीमङ्गीकृत्यैतदुक्तम् । निहन्यते खल्वाख्यातमुपसर्गाणां चतुष्टय इति । खलुशब्द उपलक्षणार्थः । उपसर्गाणामपि तत्र स्वरो विहित इति 'उपसर्गा उपसर्गे' इत्यादिना । एतदुक्तम्भवति । यदधस्तान्मया प्रतिज्ञातं 'स्वरसंस्कारयोश्छन्दसि नियम' इति कृत्स्नं प्रतिपादितमित्यर्थः । अतः कृत्स्नमिदं शा-

स्त्रमिति कृत्वा आदर्त्तव्यं शिष्यैः ॥

अथ पदगोत्राणि ॥ ४९ ॥

एवं पदचतुष्टयगोत्राणि वच्यन्त इति सूत्रशेषः ॥

भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते । वासिष्ठ उपसर्गस्तु निपातः काश्यपः स्मृतः ॥ ५० ॥

भरद्वाजेन दृष्टमाख्यातं भारद्वाजगोत्रं वा भारद्वाजसगोत्रं वा तथा भृगुणा दृष्टं नाम भार्गवगोत्रं भार्गवसगोत्रं वा तथा वसिष्ठेन दृष्टा उपसर्गा वासिष्ठगोत्रं वासिष्ठसगोत्रं वा तथा काश्यपेन दृष्टा निपाताः काश्यपगोत्राः काश्यपसगोत्रा वा ॥

अथ पददेवताः ॥ ५१ ॥

अथ पदानां देवता वच्यन्त इति सूत्रशेषः ॥

सर्वन्तु सौम्यमाख्यातं नाम वायव्यमिष्यते ॥ आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ॥ ५२ ॥

सर्वमाख्यातं सोमदैवत्यम् । सर्वन्नाम वायुदैवत्यम् ।

अग्निदैवत्या उपसर्गाः । निपाता वरुणदैवत्याः ॥

अथ वर्णदेवताः ॥ ५३ ॥

इत्याद्युपासनार्थमुक्तम् । एवं ह्युपासिताः सन्तोऽर्थानभिज्ञस्यापि पुरुषस्य फलप्रदा भवन्ति । (१) यो वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्त्तं वाऽऽपद्यते प्रमीयते पापीयान्भवतीत्येवमादिदोषेण सम्बध्यते । घृतकुल्या मधुकुल्या इत्येवमादिभिस्तु गुणैः सम्बद्ध्यत एव ॥

इत्याह स्वरसँस्कारप्रतिष्ठापयिता भगवान्कात्यायनः ॥ ५४ ॥

एवं स्वरसंस्कारयोः प्रतिष्ठापयिता भगवान्कात्यायनः । इदं शास्त्रमाह ॥

वृद्धँवृद्धिः ॥ ५५ ॥

इत्युक्तार्थः ॥ (२) ॥

---

(१) कात्यायनप्रणीतसर्वानुक्रमीयप्रथमकाण्डकायां सामवेदीयदैवतब्राह्मणं प्रमाणं चेति बुधैरभ्युपेयम् ॥

(२) इति सर्वानुक्रमे १ कण्डिकायां बोध्यम् । योमन्त्रदैवतज्ञः स स्वर्गलोकैरपीड्यते । न हि कश्चिदविज्ञाय याथातथ्येन देवताः । श्रौतानां कर्मणां विप्रः स्मार्तानां चाश्नुते फलमिति च । व्याकरणापेक्षया इदं शास्त्रं वृद्धमतः कारणादेतच्छास्त्रा-

इति कात्यायनकृतौ प्रातिशाख्य-सूत्रेऽष्टमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यवज्रटसूनुनोव्वटेन कृते मातृमोदाख्ये प्रातिशाख्यभाष्येऽष्टमोऽध्यायः समाप्तः ॥

अथ प्रतिज्ञासूत्रपरिशिष्टम् ॥

अथ प्रतिज्ञापरिशिष्टसूत्रस्य भाष्यम् ॥

अम्बायोनिं जगद्योनिमयोनिं योनिजं जनम् ।
योनित्वासान्नायते तं वन्देऽहं हंसरूपिणम् ॥ १ ॥
योनियोगवशं धत्ते योनिजायोनिजं जगत् ।
सोमसोममहं वन्दे जङ्गमाजङ्गमात्मकम् ॥ २ ॥

तत्र भगवानाचार्यः कात्यायनः प्रत्यूहसङ्घातविघाताय चिकीर्षितसमाप्त्यै च मङ्गलार्थस्यानन्तर्यार्थस्य चाथशब्दस्यैकदृन्तगतफलद्वयन्यायेनैकशेषेण तन्त्रेणावृत्त्या वा वदज्ञिज्ञस्यबुद्धिसमाधानाय प्रतिजानीते ॥

अथ प्रतिज्ञेति ॥ १ ॥

विधास्यत इति सूत्रशेषः । यतः प्रणवस्याथशब्दस्य

ध्येतॄणां वृद्धिरवश्यं भवति ॥ इति श्रीकाशीपुरवास्तव्यसारवाविप्रवरश्रीविश्वेश्वरपाठककनिष्ठसूनुना व्यासोपाह्वश्रीयुगलकिशोरपाठकेन प्रणीता प्रातिशाख्यकीर्तिप्रकाशाख्यटिप्पणी समाप्ता ॥

द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्य्यातौ यतो माङ्गलिकावुभौ । १ । प्रणवो वेदेष्वथशब्दो भाष्येष्विति भाष्यन्ते वेदार्था यैस्तानि भाष्याणि तेष्वथशब्दो मङ्गलार्थः पुनस्तमेवाथशब्दमादाय श्रौतस्मार्त्तसूत्रकथनानन्तरं प्रातिशाख्यसूत्रकथनानन्तरञ्चैतस्यावसरो यतस्तन्निरूपितकर्मनियुक्तमन्त्रेषु स्वरसंस्कारनियमावश्यं भावतयाऽनुपदिष्टस्वरसंस्थानसंस्काराकाङ्क्षैतदर्थमयमारम्भः। मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथोऽथेति त्रिकाण्डीस्मरणादुभयवचनो अथशब्दः, अयं हि कल्पानष्टादशपरिशिष्टानि च प्रणीतवतो भगवतः कात्यायनस्याशयो, यत्र कुत्रापि समानजातीयः साधारणधर्मउक्तआकाङ्क्षितो न्यायविद्भिर्ज्ञात्वाऽनुष्ठास्य इति । स्वतन्त्रेच्छता चानियमेनोक्तो हेतुः । “आतश्चोपसर्ग” इति कर्मण्यङि, प्रतिज्ञानं प्रतिज्ञा समधिगम्येऽर्थे प्रतिज्ञाशब्दो भाक्तइत्याहुः। यज्ज्ञानेनोत्तरमध्ययनादिधर्मनिरूपितानां स्वरादीनां ज्ञानं जायतेऽतः प्रतिज्ञानामसूत्रं विधास्यत इति शिष्यबुद्धेरेकाग्रता क्रियते। केचित्तु पाठादेवानन्तर्य्यसिद्धौ मङ्गलार्थएवाथशब्द इत्याहुः । (१) “स्वरसंस्कारयोश्छन्दसि नियमात्स वेदे भवतीत्यतो वेदलक्षणमाचष्टे ॥

मन्त्रब्राह्मणयोर्वेदनामधेयम् ॥ २ ॥

---

(१) प्राति० १ अ० । सू० १ ॥

मन्त्रश्च ब्राह्मणं च तयोर्वेद इति नामधेयम् । तदुक्तं परिशिष्टे । मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते । यजुर्वेदः स विज्ञेय अन्ये शाखान्तराः स्मृताइति । तथा च वेदो द्विधा मन्त्रात्मको ब्राह्मणात्मकश्च तत्राद्यः कर्म्माङ्गभूतद्रव्यदेवतास्मारकः । मन्त्रेण स्मृतं कर्म कर्त्तव्यमिति नियमार्थं वचनम् । (१)मन्त्रान्तैः कर्म्मादिः सान्निपात्योऽभिधानादिति कल्पकृदुक्तेः । स च संहितादिरूप इषेत्वादिः । न च (२) "वसन्ताय कपिञ्जलानालभत" इत्यादिकस्यापि मन्त्रत्वापत्तिरिति वाच्यम् । न वयं सकलस्येषेत्वादिकस्य मन्त्रत्वं ब्रूमः । किन्तु ब्राह्मणभागव्यतिरिक्तस्य (३) "ब्रह्मणे ब्राह्मण" मिति ब्राह्मणाध्यायद्वयस्य ब्राह्मणत्वमाचार्योक्तं तथापि मन्त्रधर्माः सर्वे भवन्ति मन्त्रान्तर्गतत्वात् । एवमेव ब्राह्मणान्तर्गतमन्त्रभागानामपि ब्राह्मणधर्मा एव भवन्ति । द्वितीयश्चतुर्धा विधिनिषेधार्थवादनामधेयात्मा । आद्यो द्विविधो मुख्योऽमुख्यश्च । लिङ् । लोट् । लेट् । तव्यत्तवै प्रत्ययो मुख्यः । स च यजेतेत्यादिरूपः । विद्यते चात्रांशद्वयम् । यजिनिरूपितं प्रत्ययनिरूपितं च । प्रत्ययेऽप्यंशद्वयम् । आख्यातत्वलिङ्त्वाभ्याम् । प्रथमं दशलडादिषु । द्वितीयं लिङ्त्वं च । आख्यातत्वलि-

---

(१) कात्यायनमहर्षिप्रणीतस्य षड्विंशदध्यायात्मकस्य श्रौतसूत्रस्य प्रथमाध्यायस्य तृतीयकण्डिकायाम् ॥

(२) संहि० २३ अ । २० मन्त्रः ॥

(३) सं ३० अ० । ५ मंत्रः ॥

ङ्त्वाभ्यां भावेनैवोच्यते । अतो लिङादीनां भावनाविधायकत्वेन मुख्यं विधित्वम् । तदुक्तानि "स्वर्गकामो यजेते"त्यादीनि वाक्यान्यपि विज्ञातभावनापेक्षितांशत्रयसापेक्षकत्वाद्विशिष्टभावनानुष्ठापकत्वाच्चामुख्यविधिरित्युच्यते । स पुनस्त्रिविधः । अपूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्चेति भेदात् । तल्लक्षणानि । विधिरत्यन्तमप्राप्तौ परिसङ्ख्येति गीयत इति । उदाहरणानि । "व्रीहीन्प्रोक्षति" । "व्रीहीनवहन्ति" । "पञ्च पञ्च नखा भक्ष्या" इति । "अश्वाभिधानीमादत्त" इति । पुनराद्यस्त्रिधा । विनियोगप्रयोगाधिकारविधिभेदात् । सोऽयं विधिः प्रवर्त्तनात्मकः । निषेधस्तु "ब्राह्मणो न हन्तव्यो" "न हिंस्यात्सर्वाणि भूतानि" इत्यादिरूपः । अर्थवादस्तु विधिस्तावकः प्ररोचनाविशेषजनकः । "ब्रह्मवर्चसीहैव भवति" "य एवं विद्वानग्निहोत्रं जुहोतीत्यादिः" । नामधेयन्तु गुणफलोपधानार्थम् । यथा "अग्निहोत्रं जुहोतीत्यादिः । सर्वोऽप्ययं वेद एव तस्मिन्किमित्याह ॥

तस्मिन्शुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ॥ २ ॥

तस्मिन्मन्त्रब्राह्मणात्मके याजुषाम्नाये यजुषामनियतपादावसानानामयं याजुषस्तस्मिन्याजुषे आम्नाये- आम्नायशब्दो वेदवचनः "श्रुतिः स्त्री वेद आम्नाय-

इति त्रिकण्डिकास्मृतेः । अत्र तस्मिन्निति ग्रहणाद्या
जुष इति वक्तव्ये यजुषामेवायन्नियमः प्राप्नोति । न तु
तदन्तर्गतऋङ्मन्त्राणामपि वक्ष्यमाणवर्णविकारादि-
संस्कारांल्लक्षयति । यद्वा तस्मिन्याजुषाम्नाये याजुषेषु
आम्नायः यजुर्वेदेषु मुख्यः, अत्राम्नायशब्दो मुख्यवचनः।
"आम्नायश्श्रुतिमुख्ययो"रित्यभिधानात् । एकोत्तरश-
तसङ्ख्याकशाखासु मुख्ये । प्रपञ्चितं चास्य मुख्यत्व-
म् । "मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते" इत्यस्य
व्याख्यावसरेऽस्माभिरित्युपरम्यते । किं च माध्यन्दि-
नशाखामेव मुख्यामभिदधात्याचार्यप्रवृत्तिः तथा हि ।
ये मन्त्रा माध्यन्दिनशाखायामुक्ताः "प्रत्युष्टमित्याद-
यः, ते प्रतीकमात्रेणोदिताः । ये तु माध्यन्दिनशाखातः
कण्वशाखायामधिकाः समधीताः "यस्ते प्राण"मित्या-
दयस्ते सम्पूर्णा एव भगवता सूत्रे उपनिबद्धा ये तु का-
ण्वशाखातो माध्यन्दिनशाखायामधिकाः समधीताः
"शिवो नामेत्यादयस्ते तु द्वयोः शाखयोः समाम्नातम-
न्त्रा इव प्रतीकमात्रेणोपनिबद्धा इति द्वयोः शाखयोः
समभुख्यप्रवृत्तित्वे माध्यन्दिनशाखायामप्यनधीता इ-
व माध्यन्दिनशाखामन्त्राः सूत्रे भगवता उपनिबद्धा
भवेयुः । यस्तु सूत्रकृता काण्वमाध्यन्दिनशाखयोः
समाम्नातो "अस्मात्त्वमधि जातोऽसीति मन्त्रः सूत्रे
उपनिबद्धस्तस्य पत्न्यामप्यनूहप्रवृत्त्यर्थत्वेन प्रयोजनव-
त्त्वान्न दोषः। अत एवोक्तं भर्तृयज्ञपितृभक्तिवासुदेवक-

कोपाध्यायदेवयाज्ञिकादिभिर्भाष्यकारैः सकलमन्त्रपाठः पत्न्यामप्यनूहप्रज्ञप्त्यर्थंइति । अत एवोक्तं वसिष्ठेन "माध्यन्दिनी तु या शाखा सर्वसाधारणी हि सेति सङ्क्षेपः । प्रकृतमनुसरामः । स्वरप्रक्रियेत्यनेनान्वयः । स्वर इति संस्कारस्याप्युपलक्षणम् । उत्पत्तिविशिष्टत्वात् । तथा च प्रातिशाख्यसूत्रम् । "स्वरसꣳस्कारयोश्छन्दसि नियमः" । अस्यार्थः । स्वरा उदात्तादयः । संस्कारा वर्णागमादेशलोपविकारप्रकृतिभावप्रभृतयः । अनयोश्छन्दसि वेदे नियमः । तत्र यजुषामनेकत्वात्कस्मिन्स्वरप्रक्रियेत्यत आह । 'शुक्ले' इति । शुक्लसञ्ज्ञके इत्यर्थः । तथा(१)"येमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते इति । पञ्चदशयजुषां शुक्लसञ्ज्ञा विधत्ते । अस्यार्थस्तु इमानिकाख्यादीनि शुक्लानि शुद्धानि यजूंषि वाजसनेरपत्येन याज्ञवल्क्येन ऋषिणाऽऽख्यायन्ते शिष्येभ्य उपदिश्यन्ते इति विद्यारण्यश्रीपादैर्व्याख्यातः । वाजमन्नं सनिर्दानमस्यास्तीति वाजसनिरिति महीधराचार्य्यो मन्त्रभाष्ये व्याख्यातवन्तः । परिशेषादितरत्कृष्णम् । तथा च यजुर्हि द्विविधम् । शुक्लं कृष्णं च । "शुक्लं कृष्णमिति द्वेधा यजुश्च समुदाहृतम् । शुक्लं वाजसनं ज्ञेयं कृष्णं तु तैत्तिरीयकम् । तत्र हेतुः । बुद्धिमालिन्यहेतुत्वात्तद्यजुः कृष्णमीर्यते । व्यवस्थित प्रकरणं तद्यजुः

(१) शतपथब्राह्मणस्य चतुर्दशकाण्डे बृहदारण्ये पञ्चमप्रपाठके ॥

शुक्लमितीर्यते । इत्यादिस्मृतेश्च । तज्ज्ञान्तरमप्यस्य । “आयातयामानि तु भानुशुभ्राण्यन्यानि जातान्यतिनीरसानि । यजूंषि तेषामथ याज्ञवल्क्यो ह्ययातयामानि रवेरवापेति” भविष्यद्वचनाद्विज्ञायते । परिशेषादितरत् यातयाममिति । आख्यायिका चास्य द्वादशस्कन्धवाराहपुराणमहाभारतविष्णुपुराणादिषु प्रसिद्धेति विस्तरभयान्न लिख्यते । शुक्लानामपि पञ्चदशभेदात्मकत्वान्न ज्ञायते कस्मिन्नित्यतस्तं विशेषयति । माध्यन्दिनीयके इति । शुक्लस्यैवावान्तरभेदे माध्यन्दिनीयसंज्ञे यजुर्वेदाम्नाय इत्यर्थः । मध्यन्दिनसंज्ञेन ‘महर्षिणा लब्धो याज्ञवल्क्याच्छाखाविशेषो माध्यन्दिनो यजुर्वेदस्तमधीयन्ते विदन्ति वा शिष्यपरम्परया वर्त्तमानास्ते माध्यन्दिना उच्यन्ते । “स्वाध्यायोऽध्येतव्य” इत्यादिनाऽध्येतव्यत्वेन माध्यन्दिनानामयं माध्यन्दिनीयः । स एव माध्यन्दिनीयकस्तस्मिन्माध्यन्दिनीयके । स्वार्थे कप् । “तस्येद” मित्यण् । “तदधीत” इत्यण् । सम्भाव्यन्ते चात्रैते प्रत्ययाः । एवं विशिष्टे याजुषाम्नाये । मन्त्रे । ये मन्त्रा इषे त्वादिखम्ब्रह्मान्तास्तेषु । ब्राह्मणे प्रातिस्विकरूपेण स्वराणां वक्ष्यमाणत्वान्मन्त्र इत्युक्तं जात्यभिप्रायेणैकवचनम् । ‘स्वरप्रक्रिया’ । स्वराणामुदात्तादीनां प्रक्रिया प्रयोगः कथ्यत इति शेषः । ननु स्वराणामुक्तत्वात्पुनरुक्तिरिति चेन्न । “उच्चैरुदात्त” इति लक्षणोक्तिः । “हस्ते न ते” इति प्रदर्शनोक्तिः ।

अधुना हृदयाद्यङ्गविशेषे स्वरप्रदर्शनार्थमारम्भः । स्थानस्याभ्यर्हितत्वेन प्रथममनुदात्ताधिकरणमाह ॥

हृद्यनुदात्तः ॥ ४ ॥

हृदि हृदये । "पद्दन्न" इत्यादिना हृदयस्य हृदादेशः । सामीप्ये सप्तमीयम् । हृदयसमीपे दक्षिणहस्तेनानुदात्तप्रदर्शनं भवतीति भावः । तथा चानुदात्तस्वरवर्णोच्चारणवेलायां हस्तस्थानं हृदयसमीपे भवति । "हस्तेन ते" इति सूत्राद्धस्तेन । "दिशामनुक्तौ प्राची स्यात्तथा हस्तस्तु दक्षिण" इति परिभाषया दक्षिणेन । तल्लक्षणंयथा याज्ञवल्क्येनोक्तम् । चुलुनौका स्फुटो दण्डी स्वस्तिको मुष्टिकाकृतिः ॥ इत्येते हस्तदोषाः स्युः परशुश्चेति सप्तमः ॥ १ ॥ उत्तानं सोन्नतं किञ्चित्सुव्यक्ताङ्गुलिरञ्जितम् ॥ स्वरविच्च स्वरं कुर्यात्प्रादेशोद्देशगामिनम् ॥ २ ॥ मनुष्यतीर्थोच्चं कृत्वा पितृतीर्थोदकं भजेत् । नामितं करपृष्ठे तु सुव्यक्ताङ्गुलिमोक्षणम् ॥ ३ ॥ अङ्गुष्ठस्योत्तरं पर्व तर्जन्युपरि यद्भवेत् । प्रादेशस्य तु सो देशस्तन्मात्रं चालयेत्करम् ॥ ४ ॥ अनुदात्तो हृदि ज्ञेयो मूर्द्धन्युदात्त उदाहृतः ॥ स्वरितः कर्णमूले स्यात्सर्वास्ये प्रचयः स्मृतः ॥ ५ ॥ तत्रैव । उदात्तं तु भ्रुवोः प्रान्ते प्रचं नासाग्रमेव च ॥ स्वरितं त्र्यङ्गुलं विन्द्यान्निपाते तु षडङ्गुलम् ॥ ६ ॥ उत्थाने तु नवाङ्गुल्यमितत्स्वारस्य लक्षणम् । षडङ्गुलं तु जात्य-

स्य हस्तानुपथगस्य च ॥ ७ ॥ चतुर्थभागमात्रं तु भूयस्तेनैव वर्त्तयेत् । इति ॥

मूर्द्धन्युदात्तः ॥ ५ ॥

उदात्तादीनि स्वरनामधेयानि (१) "उदात्तश्चानुदात्त" इत्यादौ संव्यवहारार्थः, स च मूर्द्धि मुखप्रदेश इत्यर्थः मुखस्यापि मस्तकावयवत्वेन प्रसिद्धेः । अत एवोक्तं मूर्द्धन्युदात्त उदाहृत" इति भगवता याज्ञवल्क्येन । यथा (२) वायवस्थ । द्वयोरप्युदाहरणयोरनुदात्तोदात्तौ वैदिकप्रक्रियायां प्रसिद्धौ हृदि मूर्द्धि च क्रमेण प्रदर्श्येते । स्वरितस्वरहस्तप्रदर्शनमाह ॥

श्रुतिमूले स्वरितः ॥ ६ ॥

उदात्तानुदात्तधर्मविशिष्टः स्वरितः श्रुतिमूले दक्षिणकर्णमूलसमीपे दर्शनीय इति । यथा (३) वायवस्थेत्यत्रान्तिमो वकारः स्वरितः कर्णमूले प्रदर्श्यते । ननु प्रचयकथनान्न्यूनमिति चेन्न । तस्यैतद्भेदात् । अतएवाऽऽह्याज्ञवल्क्यपादाः । "अथातस्त्रैस्वर्य्यलक्षणं व्याख्यास्यामइति । उदात्तस्यानुदात्तस्य स्वरितस्य तथैव च । लक्षणं वर्णयिष्यामि दैवतं स्थानमेव चे"ति ॥ १ ॥ त्रीनेवापि च नारदीयशिक्षायाम् । "अतऊर्ध्वं प्रवक्ष्या-

(१) प्रा० ४ अ० सू० १३२ ॥
(२) १ । १ ॥
(३) तथैव ॥

मि आर्चिकस्य स्वरत्रयम् । उदात्तश्चानुदात्तश्च तृतीयः स्वरितः स्वरः ॥ १ ॥ सएवोदात्तइत्युक्तः सएवं स्वरितात्परः । स्वरितः प्रोच्यते तज्ज्ञैर्न चात्रान्यत्स्वरान्तरम् ॥ २ ॥ इति । तथा प्रचयस्यावान्तरभेदस्य प्रातिशाख्येऽभिधानं, तथा जात्यादीनां स्वरितभेदानामभिधानादिह नोच्यन्त इत्याह ॥

एवं जात्यादयोऽभिहिताः ॥ ७ ॥

एवं प्रचयजात्यादयः स्वरितभेदा अभिहिता उक्ताः पूर्वं प्रातिशाख्ये इति शेषः । ते च । जात्यः क्षैप्रोऽभिनिहितस्तैरोव्यञ्जनएव च । तैरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तम इति नारदेनोक्ताः । एतेषां लक्षणानि प्रातिशाख्येऽभिहितानि नाष्टमस्तु (१) तथाभाव्यः । कम्पस्वरूपस्य तथाभाव्यस्य वाजसनेयिनां संहितापाठे निराकृतत्वात् । उक्तं च माध्यन्दिनशिक्षायाम् । (२) औज्जिहायनकैर्माध्यन्दिनमतानुसारिभिः । अवग्रहो यदा नीच उच्चयोर्मध्यतः क्वचित् ॥ १ ॥ तथाभाव्यो भवेत्कम्पस्तनूनप्त्रे निदर्शनम् । इति । पदपाठे तु भवति कम्प इति । एतेषां स्वरित भेदानां हस्तप्रदर्शनं तु "स्वरितस्य चोत्तरो देशः प्रणिहन्यते" इति सूत्रे प्रातिशाख्यविवरणे स्पष्टम् । तद्यथा । उदात्तादनुदा-

(१) ताथा भाव्यस्तथाभाव्यश्चेतिपाठद्वयं समीचीनं दृश्यते ॥

(२) औज्जिहायनकैरौजिहायनकैरित्युभयथा पाठः शतद्वयवर्षात्मकस्य प्राचीनतरशुद्धद्वयस्य पुस्तकस्य च पाठः ॥

त्ते तु वामाया भ्रुव आरभेत् । उदात्तात्स्वरितोदात्ते क्रमाद्दृक्षिणतो न्यसेत् ॥ १ ॥ प्रणिघातः प्रकृष्टो निघातः । नीचतामतितरां मनुष्यदानवद्वस्तो न्युब्जापरपर्य्यायः । केषु चिद्देशेषु पित्तदानवदित्यादि । एतेषां प्रातिशाख्येऽभिधानादेते नोक्ता इति । एतेषां लक्षणानि याज्ञवल्कीयशिक्षायां नारदीयशिक्षायां चोक्तानि । सयकारटं० सर्वं वाप्यक्षरं स्वरितं भवेत् । न चोदात्तं पुरस्तस्य जात्यः स्वारः स उच्यते ॥ १ ॥ उदाहरणानि यथा मनुष्यानिव । चम्वी इति, धान्यमसि । कन्याऽइव वहतु । इउवर्णौ यदोदात्तावापद्येते यवौ क्वचित् । अनुदात्ते प्रत्यये नित्यं विन्द्यात्क्षैप्रस्य लक्षणम् ॥ २ ॥ यथा त्र्यम्बकम् । द्र्वन्नः । ए ओ आभ्यामुदात्ताभ्यामकारो रिफितश्च यः । अकारो लुप्यते यत्र तं चाभिनिहितं विदुः ॥ ३ ॥ यथा (१) तेऽवन्तु । (२) कुक्कुटोऽसि ॥ उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं भवेत् । एषः सर्वबहुस्वारस्तैरोव्यञ्जनउच्यते ॥४॥ यथा (३) इडे । रन्ते । हव्ये काम्ये । चन्द्रे । ज्योते । अवग्रहात्परो यत्र स्वरितः स्यादनन्तरम् । तैरोविरामं तं विन्द्यादुदात्तो यद्यवग्रहः ॥ ४ ॥

---

(१) १९ । ५७ ॥
(२) १ । १६ ॥
(३) ८ । ४३ ॥

यथा (१) गोमदिति गो । मत् । (२) गोपताविति गो । पतौ । इकारं यत्र दृश्येत इकारेणैव सँय्युतम् ॥ उदात्तमनुदात्तेन प्रश्लिष्टं तं निबोधत ॥ ६ ॥ यथा (३) अभि इन्धताम् अभीन्धताम् । स्वरिते चेत्स्वरे चैव विवृत्त्या यत्र दृश्यते ॥ पादवृत्तो भवेत्स्वारः श्विलऽआदित्येति निदर्शनम् ॥ ७ ॥ यथा (४) पुत्र ऽईधे । अलमनया प्रसङ्गागतचिन्तया प्रकृतमनुसरामः । यथा मन्त्रे हृदि उदात्तादयो भवन्ति तथा ब्राह्मणेऽपि भवन्तीत्याह ॥

ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ ॥ ८ ॥

उदात्तानुदात्तौ (५) भाषिकलक्षणलक्षितौ स्वरावेव स्वारौ स्वार्थेऽण् । ब्राह्मणे शतपथे भवतः । पूर्वं "द्वा"विति सूत्रेणोक्तमेवार्थं स्पष्टतायै अनूच्यते । मूर्द्धनि हृदि च भवत इत्यनुवृत्त्या लभ्यते । चरकाणां ब्राह्मणे

(१) २० । ८१ ॥

(२) १ । १ ॥

(३) ११ । ६१ ॥

(४) ११ । ३२ ॥

(५) भाषिकं नाम ब्राह्मणस्वरलक्षणविधायकं एतत्प्रतिज्ञासूत्रपरिशिष्टस्य भाषिकसूत्रपरिशिष्टम् । "अथ ब्राह्मणस्वरसंस्कारनियम" इत्यादि त्रिकण्डिकात्मकं सभाष्यं वक्ष्यमाणमग्रे मुद्रापयिष्यमाणं ज्ञातव्यं बुधैरिति ॥

तु मन्त्रवत्त्रैस्वर्यमिति । खाण्डकीयौखीयानां चातुःस्वर्यमपि क्वचित् । वाष्कलादिब्राह्मणानां तानरूपैकस्वर्यमिति, साम्नां मन्त्रेऽपि सप्तस्वर्यं प्रातिशाख्येऽभिहितम् । एवं मन्त्रब्राह्मणात्मके वेदे स्वरप्रक्रियामुक्त्वा वेदाङ्गकल्पेऽप्येवमेव स्यादतआह ॥

तानस्वराणि छन्दोवत्सूत्राणि ॥ ९ ॥

सूत्राणि सूचनात्सूत्रमुच्यतइति । सूत्राणि कल्पाख्यानि श्रौतस्मार्तप्रतिपादकानि छन्दोवच्छन्दसा तुल्यानि स्वरसंस्कारनियमेनेति शेषः । छन्दसि नियमस्तथा सूत्रेष्वपि तन्नियमो भवति वेदाङ्गत्वात् । सूत्रोपादानाच्छङ्ग्राहिकन्यायेनेतरेषु वेदाङ्गेषु छन्दादिषु स्वरसंस्कारौ नियमेन भवतीति गम्यते । छन्दोवदित्यत्र "येन तुल्य"मिति भवति नोदात्तादीनामप्यात्तेपो भविष्यतीत्युक्तं, तानस्वराणीति तानएकश्रुतिः स्वरो येषां तानि तानस्वराणि तथाच संस्काराः "अनुस्वारस्य ॱ मित्यादेशादिरूपाः छन्दसि यथा तथा ऽत्रापि भवन्ति परं तु उदात्तादित्रैस्वर्यन्न भवति किन्तु एकस्वर्यं किं तत् तानस्वर्यं यथा चाङ्कराचार्य्यपादाः । (१) तानो वा नित्यत्वादेकश्रुतिदूरात्सम्बुद्धौ यज्ञकर्म्मणि सुब्रह्मण्या सामजपन्यूँखयाजमानवर्ज्जम् । स्पष्ट एवार्थः ॥

(१) कात्यायनश्रौतसूत्रस्य प्रथमाध्यायस्य दशमीकण्डिकान्तर्भूतमिदं सूत्रम् ॥

इतिकात्यायनकृते प्रतिज्ञापरिशिष्टसूत्रे प्रथमा कण्डिका समाप्ता ॥

इत्यनन्तदेवयाज्ञिकविरचिते प्रतिज्ञापरिशिष्टसूत्रभाष्ये प्रथमा कण्डिका समाप्ता ॥

अथ कतिचिदवशिष्टसंस्कारानाह ॥

अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहल्सँय्युक्तस्य सँय्युक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणे जकारोच्चारणम् ॥ १ ॥

अथ स्वरप्रक्रियाकथनानन्तरं स्वरपदोपलक्षितसंस्कारप्रक्रियोच्यत इति शेषः । यद्वा पञ्चदशयजुःशाखासाधारणसंस्कारकथनानन्तर्यार्थोऽयमथशब्दः । यद्येते संस्काराः प्रातिशाख्ये निबद्धा भवेयुस्तदा सर्वेषां काण्वादीनामपि स्युरितरोऽपि तेषां पृथगेवोपदेशो युक्तइति । ननु प्रातिशाख्यस्यान्वर्थसञ्ज्ञाकरणेन प्रतिशाखं भिन्नत्वात्कथं तेषां धर्मप्राप्तिरिति चेन्नैतदेवम् ।

यतः प्रतिपञ्चदशशाखायां भिन्नानि प्रातिशाख्यानि नोपदिष्टानि किं तु श्रौतस्मार्त्तसूत्रवत्प्रातिशाख्यसूत्रमपि पञ्चदशशाखासाधारणं समाम्नातम् । विज्ञापयति चामुमर्थमाचार्यप्रवृत्तिः । तथाहि "देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्वमित्येके" अस्मिन्नेकपदग्रहणमन्यशाखापरमिति भाष्यकृतः । एवं (१) वायवस्थेत्युपायवस्थेति चैके इत्यादि । एवं प्रातिशाख्यसूत्रेऽपि शाखान्तराभिप्रायेण "हरिशयेत्येके" इत्यादिषु एकपदमन्वोचत् । एकस्यामेव शाखायां मतान्तरेण पाठान्तरमिति विरोधीति सङ्क्षेपः । प्रतिशाखासु भवं प्रातिशाख्यमिति सम्भवाभिप्रायेण बहुवचनान्तयोगेनापि निर्वाह इत्यास्तान्तावत् ॥ अन्तस्थानामाद्यस्योच्चारणे जकारोच्चारणमित्यनेनान्वयः कर्त्तव्यमितिशेषः । न च न ज्ञायतेऽन्तस्था इति पदार्थबोधस्य वाच्यम् । ज्ञायतेऽन्तस्था इति वक्तव्यम् । कथं ज्ञायतेऽन्तस्था इति ज्ञापयन्त्येवाचार्याः । यदाहुः प्रथमाध्याये "उपदिष्टा वर्णा"इति, अष्टमाध्याये "अथातो वर्णसमाम्नायं व्याख्यास्याम" इति, "तत्र स्वराः"। अइति । आइति । आ३इति । इइति । ईइति । ई३इति । उइति । ऊइति । ऊ३ इति । ऋइति । ऋ२इति । ॠ३ इति । ऌइति । ॡइति । ॡ३इति । एइति । ए३ इति । ऐइति । ऐ३ इति । ओइति । ओ३इति । औइति ।

---

(१) तैत्तिरीयकण्वशाखिनोः संहितायाः पाठः ॥

ओ३इति ॥ "अथ स्पर्शाः" । किति खिति गिति घिति ङिति कवर्गः । चिति छिति जिति झिति ञिति चवर्गः । टिति ठिति डिति ढिति णिति टवर्गः । तिति थिति दिति धिति निति तवर्गः । पिति फिति बिति भिति मिति पवर्गः । "अथान्तस्थाः" । यिति रिति लिति विति । "अथोष्माणः" । शिति षिति सिति । हिति । इति व्यञ्जनानि । "अथायोगवाहाः" । अकारादिस्वरयोगे स्वरूपं वहन्ति ते केवलाः । ᳵकइति जिव्हामूलीयः । ᳶपइत्युपध्मानीयः । अं इत्यनुस्वारः । अः इतिविसर्जनीयः । ऊँ इति नासिक्यः । कुँखुँगुँघुँ एते यमाः । इत्यन्तस्थादीन् "निर्देश इतिना" "कारेण च" । आभ्यां सूत्राभ्यां वर्णनिर्देशः । तथा चान्तस्थामाद्यस्य यकारस्य स्थाने यकारोच्चारणं भवति । अत्र लाघवाद्यकारस्येतिवक्तव्ये लिपिभ्रमात्साहश्याद्वाऽन्यस्य यकारादिकस्य मा भूदित्यन्तस्थानामाद्यस्येति ग्रहणम् । एवमन्यत्राप्यूह्यम् । सर्वस्य प्राप्तमतस्तं विशेषयति पदादिस्थस्येति । सुबाद्यन्तस्य पदस्यादिः पदादिस्तस्मिन्निति, पदादिस्थस्य यथा (१) युञ्जानः प्रथमम् । अत्र पदादिस्थत्वाद्यकारस्य स्थाने जकारोच्चारः । पदादिस्थस्येति किम् । (२) तत्त्वायं । धियः । अत्र मा भूत् । (३)अस्मिन्यज्ञे

(१) ११ । १ ॥

(२) इदमपि तथा ॥

(३) १९ । ५७ ॥

इत्यत्रातिप्रसङ्गाद्भागासिद्धेर्वा पुनर्विशिनष्टि । अन्यहलसँय्युक्तस्येति । अन्येन हला व्यञ्जनेनासँय्युक्तस्य योगमप्राप्तस्य यथा । इदमुदाहरणं प्रत्युदाहरणं च । (१) अस्मिन्यज्ञे । स्वधया । (२) घृताचीर्य्यन्तु । हर्य्यतेत्यत्र पदादिस्थत्वाभावान्न स्यादतस्तं पुनर्विशिनष्टि । सँय्युक्तस्येति । रेफो रकारः ऊष्मणामन्त्यो हकार आभ्यां युक्तस्यापि अविशेषेण पदादिस्थत्वादिविशेषमन्तरेणादिमध्यावसानेषु पदस्थस्येत्यर्थः । जकारोच्चारणम् । यथा (३) सूर्य्य वर्डा । (४) हर्य्यत । घृताचीर्य्यन्तु । व्युत्क्रमेणान्तमध्यादीनामुदाहरणानि । घृताचीर्य्यन्तु त्वित्यत्रोभयत्र प्रयोजकम् (५) कृणुह्यह्वरन्नं । (६) गेह्याय च (७) तेन मह्यँव्वेदो भूयाः । इति क्रमेणादिमध्यावसानेषु हकारयुक्तोदाहरणम् । एताभ्यामेव युक्तस्येति किम् । (८) भर्गो देवस्य । (९) अह्यवोचत् ।

(१) इदमपि तथा ॥
(२) ३ । ४ ॥
(३) ३३ । ३९ ॥
(४) पूर्वोक्तमुदाहरणं ज्ञेयम् ॥
(५) २९ । २७ ॥
(६) १६ । ४४ ॥
(७) २ । २१ ॥
(८) ३ । ३६ ॥
(९) १६ । ५ ॥

अत्र मा भूत् । आभ्यां युक्तत्वेऽपि । (१) अग्निर्ज्योतिरित्यत्र मा भूदिति काकाक्षिगोलकन्यायेन पुनरुपात्तेन अन्यहल्संयुक्तेति विशेषणेन सम्बध्यते । (२) अग्निर्ज्योतिः । (३) व्वष्ष्यीय च । न केवलमाभ्यामत आह । ऋकारेण चेति । ऋकारेण संयुक्तस्य यकारस्य च । अत्रापि चकारादविशेषेणेत्यादिकमन्वेति । यथा (४) सामान्यृग्भिः । अत्र लाघवेन रेफोष्मान्त्यऋकारैः परे इति वक्तव्ये भिन्नपदोपादानेनान्यहल्संयुक्तस्येति न विशेषणीयमिति ध्वन्यते । तथा च सामान्यृग्भिरित्यत्रान्यहल्योगेऽपि चवर्गतृतीयोच्चारणं भवतीति । अत्र संयुक्तपदेन योगोऽभिधीयते । पारिभाषिकोऽपि क्वचित् । अन्यहल्संयुक्तस्येति विशेषणात् (५) ध्रुव्यौ, (६) नृपाय्यमित्यादिषु न स्यादत आह ॥

द्विर्भावेऽप्येवम् ॥ २ ॥

एवं पदादिमध्यावसानेषु यकारं द्विर्भावे द्वित्वे स-

(१) ३ । ९ ॥

(२) पूर्वोक्तमुदाहरणं बोध्यम् ॥

(३) १६ । ३९ ॥

(४) २० । १२ ॥

(५) २ । १७ ॥

(६) २० । ८१ ॥

ति ज्ञेयम् । द्वित्वसिद्धमसिद्धं वोपादीयते । यथा (१) धाय्याः (२) नृपाय्यम् । (३) धुर्य्यौ । प्रातिशाख्ये ऽपि भगवता कात्यायनेन याज्ञवल्क्येन चेषत्स्पृष्टस्य यकारस्य पदादिस्थले पञ्चदशशाखासाधारण्येन स्पृष्टप्रयत्नता विहिता । अतः सम्प्रदायविद एवं विधे यकारे स्पृष्टप्रयत्नज्ञापनाय मध्ये बिन्दुं प्रक्षिपन्ति । स्पृष्टप्रयत्नं स्थानैक्याच्चवर्गतृतीयसदृशं यकारं पठन्ति च । अन्तस्थप्रकरणसङ्गत्याऽऽह ॥

अथापरान्तस्थस्यायुक्तान्यहलः सँय्युक्तस्योष्मऋकाररेफैरसहितोच्चारणम् ॥ ३ ॥

---

(१) १९ । २४ ॥

(२) पूर्वोक्तम् ॥

(३) तयोदाहरणं ज्ञेयम् ॥

(४) १ । २२ । सँय्यौमीत्यत्र "अन्तस्थामन्तस्थास्विति प्रा० ४ अ० १० सूत्रेण सानुनासिको द्वितीयो यकारः । १० । ८ । जराय्य्वसि । अत्र स्वरात्सँय्योगादिरित्यनेन प्रा० अ०४ सू० १०० त्रेण द्वित्वम्भवति । अत्र कश्चन विशेषोऽमोघनन्दिन्यां शिक्षायामुक्तः । उपसर्गात्परस्य यकारस्य न जकारोच्चारणम् । १७ । ९ । उप यज्ञ॒ठ० हविश्च नः । द्विर्भावेऽयन्निषेधो न भवति । १ । २२ । सँय्यौमि । पदान्तत्वेन सिद्धे पुनर्जकारोच्चारणविधानं तेनोपसर्गात्परत्वेऽपि ८ । ३५ । स्तुतीरूपं यज्ञं च मानुषाणाम् । ३ । ५ । अनु योजान्विन्द्रेत्यत्र चवर्गतृतीयोच्चारणं कर्त्तव्यमत एवामरेशकृतवर्णरत्नप्रदीपिकायां प्रातिशाख्यानुसारिण्यां शिक्षायां प्रतिपादितम् । अनु योजान्विन्द्र ते तु उप यज्ञं तथा विना । अवग्रहे च १ । १२ । देवयुवमि-

अथाद्यान्तस्थकथनानन्तरं अपरान्तस्थस्य द्वितीयान्तस्थस्य रेफस्येति यावत्। कीदृशस्य अयुक्तान्यहलः अयुक्तं योगमप्राप्तं अन्यद्धल् यस्मिन् अयुक्तान्यहल् तस्यायुक्तान्यहलः तस्य ऊष्मणाकारैः सँय्युक्तस्य ऊष्माणः पूर्वोक्ताः शषसहाः तैर्युक्तस्य एकारसहितोच्चारणं एकारसहितमुच्चारणं कर्त्तव्यमिति शेषः। अत्रापि मण्डूकप्लुतिन्यायेनाविशेषेणादिमध्यावसानेष्वित्यनुवर्त्तते। उदाहरणम्। यथा (१) सृज प्रशस्त दर्शतम्। इत्यत्र दरेशतमित्येवं पाठो न तु रेफसहितः। एवमन्यत्र। (२) वर्षो वर्षीयसि। सकारोदाहरणे षकारोदाहरणमेव भवति। तथा च इण् कवर्गाभ्यां परस्य षस्य मूर्द्धन्य इति स्मृतिः। इण् मध्ये रेफस्य पाठेन तदुत्तरस्य सकारस्य षकार एव स्यात्। पूर्वेणाणुग्रहाः सर्वे परेणैणुग्रहाः स्मृता इति च। (३) ब-

---

ति देव। युवम्। इत्यत्र यकारस्य जकारोच्चारणम्। अथो पूर्वकस्य यकारस्य न-जकारोच्चारणम्। यथा १६। ८। अथो ये अस्य सत्वानः। अत्र याज्ञवल्क्येन शिक्षायां विकल्पेन जकारोच्चारणं कृतम्भवति, अथ मासनशब्देभ्यो विभाषाम्रेडिते यवौ। अथ मा स न शब्दपूर्वकस्य विकल्पेन। जकारोच्चारणं भवति यथा २०। ८२। न यत्परं। १५। ३२। स योजते अत्रोदाहरणद्वये जकारोच्चारणं न भवति। ६। २८। स यन्ता। ७। १७। मनो न येषु। अत्रोदाहरणद्वये जकारोच्चारणं भवति। अत्र विकल्पे विषये सम्प्रदाय एव प्रामाणिकानां शरणमिति॥

(१) ११। ३६॥

(२) ६। ११॥

(३) २। १॥

ह्विरसि । ब॒र्हिषे त्वा । (१) अ॒यं ते॒ योनिर्ऋ॒त्वियः॑ । (२) निर्ऋ॑ते तु॒भ्यम् । अयुक्तान्यहल् इति किम् । (३) व्रष्ठ्याय च । (४) य॒ज्ञपतिर्ह्वार्षीत् । (५) अनु॑ मार्ष्टु । अत्र मा भूत् । एभिर्युक्तस्येति किम् । (६) ऊ॒र्ज्जे त्वा । प्रार्प्पयतु । अत्र मा भूत् । उक्तं च माध्यन्दिनशिक्षायाम् । "शषसहा यत्र दृश्यन्ते रेफेणाङ्कितमस्तकाः । स्वरं भक्तं प्रयुञ्जीत सँय्योगे नैव कारयेत्" । तथैव सङ्गत्याह ॥

एवं तृतीयान्तस्थस्य क्वचित् ॥ ४ ॥

एवं संयुक्तासंयुक्तस्थले तृतीयान्तस्थस्य लकारस्य क्वचित् लक्ष्यानुरोधेन पूर्वोक्तं एकारसहितोच्चारणं कर्तव्यमिति यथा (७) श॒तव॑ल्शो॒ विरो॑ह स॒हस्र॑वल्शः । (८) उप॑ वल्हामसीत्यत्र वलेहामसीत्युच्चारः । एवमन्यमप्युदाहरणमूह्यम् । अत्र रलयोः सावर्ण्यान्नित्यताज्ञापनार्थं पुनर्ग्रहणम् । एकारोच्चारणादेशप्रसङ्गा-

(१) ३ । १४ ॥
(२) १२ । ६२ ॥
(३) १६ । ३९ ॥
(४) १ । २ ॥
(५) ८ । १४ ॥
(६) १ । १ ॥
(७) ५ । ४१ ॥
(८) २३ । ४९ ॥

दाह ॥

ऋकारस्य तु सँय्युक्तासँय्युक्तस्याविशेषेण सर्वत्रैवम् ॥ ५ ॥

तु पुनः ऋकारसंयुक्तस्य असंयुक्तस्य च अविशेषेण सर्वत्रादिमध्यावसानेषु एवं एकारसहितोच्चारणं कर्त्तव्यमित्यनुषङ्गः । यथा (१) ऋताषाट् । ऋतधाम । इदमसंयुक्तोदाहरणम् । संयुक्तोदाहरणँय्यथा (२) सृज प्रशस्त । (३) कृणुहि । (४) पितृन् । (५) सामान्यृग्भिरित्यादि । अत्र ऋताषाडित्यादिपाठः । "ऋऌवर्णयोः सावर्ण्यात्प्रायशो लव्याभावाच्च ऌकारग्रहणम् (६) । पुनरेतस्य प्रसङ्गादाह ॥

अथान्त्यस्थान्तस्थानां पदादिमध्यान्त्यस्थस्य त्रिविधं गुरुमध्यमलघवृ-

(१) १८ । ३७ ॥

(२) ११ । ३६ ॥

(३) १० । ३२ ॥

(४) १९ । ७० ॥

(५) २० । १२ ॥

(६) एवं तृतीयान्तस्थस्य ऌकारस्य क्वचिदुदाहरणानि ऌत्वपराणि तत्र ऌे इत्युच्चारणम् । ५ । ४५ । शतवल्शः । २३ । ४९ । उप वल्हामसि । वार्त्तिकेन सावर्ण्यात् ऌकारस्यापि ऌे इत्युच्चारः । १८ । ११ । कॢप्तं च मे कॢप्तिश्च मे ॥

त्तिभिरुच्चारणम् ॥ ६ ॥

अथ तृतीयान्तस्थादेशकथनानन्तरं अन्तस्थानामन्त्यस्य वकारस्येति यावत्। त्रिविधं प्रकारं गुरुमध्यमलघुवृत्तिभिः प्रयत्नैरुच्चारणं कर्त्तव्यमित्युच्यते। एतच्च क्रमेण ज्ञेयम्। तदुक्तमृषिणा याज्ञवल्क्येन। "वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः। आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतर इति। (१) वायवस्थ। देवो वं÷। अन्तस्थादेशोपदेशानन्तरमूष्मप्रसङ्गादाह ॥

अथो मूर्द्धन्योष्मणोऽसँय्युक्तस्य टुमृते सँय्युक्तस्य च खकारोच्चारणम् ॥ १२ ॥

अथो अन्तस्थादेशोपदेशानन्तरं मूर्द्धन्योष्मणो मूर्द्धन्यश्चासौ ऊष्मा च मूर्द्धन्योष्मा तस्य मूर्द्धन्योष्मणः षका-

---

(१) १। १। अत्रापि कश्चन विशेषोऽमोघनन्दिन्यां शिक्षायाम्। उपसर्गपरो यस्तु स वकारो लघुर्मतः। ये ये पदादिस्थयकारविषये निषेधास्ते वकारेऽपि प्रत्येतव्याः। यथा ३३। ५५। प्र वायुमच्छा। ११। १३। अथा वयम्। विशेषस्तु संहितापाठे वः। वाम् वा। वै। वि। वौ। एषूदाहरणेषु वकारा लघवो भवन्ति। यथा १। १। देवो वं÷। ७। ११। या वाम्। ९। ७। वातो वा मनो वा। २३। १७। न वा ऽउ ऽएतत्। २७। ३३। ता विमुञ्च। अत्रापि तदेव शिक्षाप्रमाणम्। वोवां वा वै मन्त्रपाठे लघवो गुरवः पदे। पदपाठे तु वाम् इत्यादीन्युदाहरणानि स्वयमूह्यानि ॥

रस्येति यावत् । (१) "षटौ मूर्द्धनी"ति सूत्रात् षकारो मूर्द्धन्यः स्थानकरणपरित्यागेनार्द्दस्पृष्टषकारस्थाने कवर्गीयप्रतिरूपकं खकारोच्चारणं कर्त्तव्यम् । सर्वत्र प्राप्तौ विशिनष्टि । असँय्युक्तस्येति । न संयुक्तोऽसंयुक्तस्तस्य । यथा (२) इषे त्वा । (३) सहस्रशीर्षा पुरुषः । (४) त्विभर्ष्यस्त्वं इत्यत्र न स्यादतआह । टुम्हते सँय्युक्तस्येति । टुं टवर्गं विना संयुक्तस्य हल्युक्तस्य च भवति । यथा (५) शष्पाय च । टवर्गग्रहणं किम् । (६) कृष्णोऽसि । (७) श्रेष्ठतमाय । (८) प्रत्युष्टम् । उगितत्त्वाद्वर्णग्रहणम् । (९) "प्रथमग्रहणे वर्ग"मिति प्रातिशाख्येयसूत्रात् । उक्तं च माध्यन्दिनीयशिक्षायाम् । "पदस्याद्यन्तमध्ये स्यात्खकारोच्चारणं षिति । तृतीयवर्गयोगे तु षएव स्यात्तदैव ही" ति । षकारस्थाने स्यादित्यर्थः । इति शब्दात्तेन वर्णनिर्द्देशः कार्य इति प्रातिशाख्यात् । सर्वत्र संयुक्त इति

(१) प्रा० १ अ० सू० ६७ ॥
(२) १ । १ ॥
(३) ३१ । १ ॥
(४) १६ । ३ ॥
(५) १६ । ४२ ॥
(६) २ । १ ॥
(७) १ । १ ॥
(८) १ । ७ ॥
(९) प्रा० १ अ० सू० ६४ ॥

पदं एकादि हल्परतया ज्ञेयम् । संयुक्तशब्देन वर्णयोगग्रहणं न तु पारिभाषिको "हलोऽनन्तराः संयोग" इति (१)॥ एवमादेशाः कदा भवन्ति इत्यपेक्षायामाह ॥

अध्ययनादिकर्म्मस्वर्थवेलायां प्रकृत्या ॥१२॥

एते संस्कारा अध्ययनादिकर्मसु यजनयाजनजपादिसङ्ग्रहार्थमादिपदोपादानं अर्थवेलायां मन्त्रार्थवेलायां प्रकृत्या प्रकृतिरूपेण । मधोः अरिः । पदकाले, मध्वरिः । संहिताकाले लोकोदाहरणम् । वेदेतु प्र अर्पयतु । प्रार्पयतु । तथा अर्थकाले अग्निमीडे । अग्निमीळे । इत्यादिवत्सर्वे पूर्वोक्ता वर्णाः पूर्वप्रकृत्याः स्युरिति भावः । अस्ति चास्यार्थचिन्तने महत्फलमावश्यकता च । तदुक्तं समावर्त्तनसूत्रे "वेदꣳ समाप्य स्नाया"दित्यत्र भाष्ये ॥ (२) ॥

(१) अत्रापि कश्चिद्विशेष उक्तो लघुमाध्यन्दिनीयशिक्षायाम् । षकारस्य खकारः स्याट्टुकयोगे तु नो भवेत् । टवर्गयुक्तस्योदाहरणं भाष्ये प्रोक्तं ककारयुक्तोदाहरणं तु क्षकाराक्षरे षकारयुक्तमुच्चारणीयम् । अवयवसम्भवनेऽपि मातृकादौ गणनादेकवर्णत्वादवयवविभागाभावे न खकारोच्चारणं भवति । ककारयोगे खकारोच्चारणाभाव इति नियमस्तु न १६ । ४५ । शुष्क्र्यर्याय च । इत्यादौ विपरीतसंयोगे ककारयोगेऽपि खकारोच्चारणसत्वात् ॥

(२) पारस्कराचार्य्यकृतगृह्यसूत्रस्य द्वितीयकाण्डीयसप्तम्याः कण्डिकाया हरिहरकृतभाष्ये स्पष्टमुक्तम् ॥

इति कात्यायनकृतौ प्रतिज्ञापरिशि-
ष्टसूत्रे द्वितीया कण्डिका ॥ २ ॥

इति प्रतिज्ञापरिशिष्टसूत्रभाष्ये द्वितीया कण्डिका समाप्ता ॥ २ ॥

अथोगवाहस्यानुस्वारस्यादेश वक्तुमारभते ॥

अथानुस्वारस्य ऽंमित्यादेशः
शषसहरेफेषु ॥ १ ॥

अथोष्मादेशोपदेशानन्तरं अनुस्वारस्य ऽंमिति ऽंकार आदेशः स्यादूष्मसु परेषु इति सूत्रात् ऽंमित्युपदेशः सनिमित्तमादेशं विभजते ॥

तस्य त्रैविध्यमाख्यातऽं ह्रस्वदी
र्घगुरुभेदैर्द्दीर्घात्परो ह्रस्वो ह्रस्वा-
त्परो दीर्घो गुरौ परे गुरुः ॥ २ ॥

तस्य ऽंकारस्य ह्रस्वदीर्घगुरुभेदैस्त्रैविध्यं त्रिः प्रकारत्वमाख्यातमुक्तम् । ह्रस्वादीनां लक्षणान्युक्तानि "एकमात्रो ह्रस्व"इत्यादिना । वस्तुतस्तु गुरुदीर्घयोर्भेदो नास्ति तथाऽप्युपाधिभेदाद्भेदो मन्तव्यः । अस्ति चात्रो

प्राधिः । सञ्ज्ञाभेदो निमित्तभेदो लिपिभेदश्च । तृतीयस्तु इदानीं प्रायशः प्रविश्लेष्टस्तथापि प्राचीन-सम्प्रदायानुरोधाद्विज्ञायते । तत्र दीर्घादक्षरात्परो दीर्घो भवति गुरौ संयुक्ताक्षरे परे गुरुर्भवति न तु दीर्घे परे असम्भवात् । अत एव दीर्घादक्षरादित्यव गुरोरक्षरादिति न भवति । क्रमेणोदाहरणानि । यथा (१) त्रिंशद्धाम इत्यत्र त्रिꣳ॰ शद्धाम । (२) पिꣳ॰ षन्तेति । (३) भूयासꣳ॰ सुगृहपतिः । (४) शतꣳ॰ हिमाः । (५) सꣳ॰ रायस्पोषेण । इत्यादिषु ह्रस्वात्प-

---

(१) ३ । ८ ॥

(२) हविर्यज्ञकाण्डस्य १ प्रपाठकस्य ६ ब्राह्मणस्य ४ खण्डस्य । अनुस्वाररूपस्य ꣳ॰कारस्यार्द्धमात्रिकता भवति व्यञ्जनं चार्द्धमात्रिकमिति शास्त्रात्, तथापि प्रातिशाख्यस्य ४ अ॰ १४८ । १४० "अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धो मात्रा पूर्वा चार्द्धमात्रेति" । "दीर्घादर्द्धमात्रा पूर्वा चाध्यर्द्धेति" द्वाभ्यां सूत्राभ्यां सार्द्धैकमात्रा प्रतिपादिता, अत एव याज्ञवल्क्यमहर्षिणा शिक्षायां गुरौ ꣳकारे लघौ ꣳकारे दीर्घे ꣳ॰कारे च क्रमेणाङ्गुष्ठाङ्गुलिप्रक्षेप उक्तः । अनुस्वारेऽङ्गुष्ठक्षेपश्चाङ्गुष्ठाकुञ्चनं लघौ । दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्त्तित इति । रङ्गलक्षणं पाणिनिनोक्तं यथा सौराष्ट्रिका नारी तक्राँ इत्यभिभाषते । एवं रङ्गाः प्रयोक्तव्याःखे अराँ ऽइव खेदया । १ । एवं कङटणतनपमेषु हल्वर्णेषु तर्जन्यङ्गुल्यधो नामनं मुष्ट्याकारं नखग्रहणं कुण्डलाकारं पञ्चाङ्गुलिमेलनमेतत्सर्वं क्रमशो हस्तप्रदर्शनमूर्द्धरेतसां योगिनां त्रिकालज्ञानां महर्षिणामनुभवसिद्धमिति । आसामङ्गुलिमुद्राणां शिक्षोक्तं लक्षणं मया । प्रातिशाख्येऽष्टमाध्याये लिखितं विदुषां मुदे । १ । इति ॥

(३) २ । २८ ॥

(४) २ । २७ ॥

(५) ३ । २० ॥

रो दीर्घः । (१) पृथिव्याᳪ शतेन पाशैः । (२) यजूᳪषि नाम । (३) सस्वाᳪसः । (४) बर्हिरङ्क्ताᳪ हविषा । (५) विषाᳪ रयीणाम् । इत्यादिषु दीर्घात्परो ह्रस्वः । (६) भेषजᳪ श्रिया । (७) कल्पताᳪ श्रोत्रम् । (८) दᳪष्ट्राभ्याम् । (९) पुरोडाशैर्हवीᳪष्या । (१०) सोमानᳪ स्वरणम् । (११) सप्तर्षीणाᳪ स्तुतेन । (१२) सिᳪह्यसि । एवं रेफे परे संयोगोदाहरणमथोह्य-

(१) १ । २५ ॥
(२) १२ । ४ ॥
(३) ८ । १८ ॥
(४) २ । २२ ॥
(५) ३ । १३ ॥
(६) २१ । ३८ ॥
(७) २२ । ३३ ॥
(८) ११ । ७८ ॥
(९) १९ । २० ॥
(१०) ३ । २३ ॥
(११) ३ । २० ॥
(१२) ५ । १० । अत्रापि कश्चिद्विशेषोऽमोघनान्दिन्यां शिक्षायाम् । अनुस्वारो द्विमात्रः स्याद्वर्णव्यञ्जनोदये । उदाहरणं १६ । ४६ । देवानाᳪ हृदयेभ्यः । २५ । ३६ । यन्नीक्षणं माँस्पचन्या इत्यत्र तु न ᳪकारोच्चारणम् । अनुस्वाराभावात् । ऋग्वेदप्रातिशाख्यसूत्रेण नकारलोपादिस्वरानुनासिकत्वयोर्विधानात्तदनुसारस्यैवौचित्यात् । अत्र विशेषानुक्तेः । प्रातिशाख्ये "अलोपो माँस्पचन्या" इति सूत्रटिप्पण्यां मया ऋग्वेदप्रातिशाख्यस्य सूत्रमुक्तं तस्मादत्र नोक्तमिति ॥

म् । शषसहरेफेष्विति किम् । (१) भार्गं प्रजावंतीः । (२) शतधारम् । सहस्रधारम् । अत्र मा भूत् । एतादृक्स्थले किं स्यादत आह ॥

परसवर्णेषत्प्रकृत्या चान्यत्र ॥ ३ ॥

अन्यत्र यवलपरत्वाभावे परसवर्णेषत्प्रकृत्या परसवर्णा ईषती चासौ प्रकृतिश्च तया उच्चारणं भवति । यथा (३) युञ्जान इत्यत्र किञ्चित् अकारोच्चारणमनुस्वारस्यादेशः परसावर्ण्यात् । (४) भागम्प्रजावंतीः (५) तन्वा समिद्धिः । (६) त्वाङ्गन्धर्वा इत्यादि । अयोगवाहप्रसङ्गादाह ॥

विसर्गेष्वीषद्विरामः ॥ ४ ॥

विसर्गेषु अः इत्यादिषु ईषद्विरामः किञ्चिद्विरम्यते विसर्गस्य स्पष्टोच्चारणार्थम् । यथा (७) वसोः प-

(१) १ । १ ॥
(२) १ । ३ ॥
(३) ११ । १ ॥
(४) १ । १ ॥
(५) ३ । ३ ॥
(६) १२ । ९८ ॥
(७) १ । २ ॥

वित्त्रम् । (१) पुरुषः सोसावहम् । ईषत्सङ्कल्याऽऽह ॥

पदाद्यस्य सँय्युक्ताकारस्येषद्दीर्घता च भवति ॥ ५ ॥

अकारस्य ईषद्दीर्घता भवति ईषद्दीर्घोऽप्युच्चारणं कर्त्तव्यम् । (२) अश्मन्नूर्ज्जम् इत्यत्र मा भूदत आह संयुक्तेति । अत्रापि सँय्युक्तशब्देन योगः व्यञ्जनयुक्तस्येत्यर्थः । (३) व्वायवस्थेत्यत्र मध्यमवकारान्तर्गताकार-

---

(१) ४० । १७ । अयोगवाहा विज्ञेया आश्रयस्थानभागिन इति । पाणिनीयशिक्षायामुक्तत्वादेकमात्रिकस्याग्रे एकमात्रिको विसर्गः प्राप्तः परन्तु स्थानत्वेन विभागः कृतः पाणिनिना न तूच्चारणत्वेन उच्चारणं तु विसर्गस्य नान्तरीयकार्द्धमात्राकालापेक्षया किञ्चिदाधिकमवसानं कृत्वाऽग्रिमवर्णोच्चारणं कार्यमित्यदोषः । अत्रापि कश्चन विशेष उक्तो महर्षिणा भगवता योगियाज्ञवल्क्येन । ऊर्ध्वक्षेपाच्च यश्चोष्मा अधक्षेपाच्च यो भवेत् । एकैकामुत्सृजेद्धीरः स्वरिते तूभयं क्षिपेत् । १ । द्विमात्रिके भवेदेकां मात्रिके तूभयं क्षिपेत् । स्वरितं यद्भवेत्किञ्चिद्वकारसह संयुतम् । २ । तत्रोष्माणि विजानीयान्निक्षेप उभयोरपि । कर्त्तव्यस्तूभयोः क्षेपो वायव्व्यैरिति दर्शनम् । ३ । जात्ये च स्वरिते चैव यकारो यत्र दृश्यते । कर्त्तव्यस्तूभयोः क्षेपः सदस्यैरिति दर्शनम् । ४ ॥ अस्यार्थः । उदात्तात्परे विसर्गे तर्जन्यङ्गुल्याः प्रसारणम् । तत्र हेतुः उदात्तं प्रदेशिनीं विद्यादिति पाणिनीयशिक्षोक्तत्वात् । अनुदात्तात्स्वरात्प्रचयाच्च परे कनिष्ठिकाया अङ्गुल्याः प्रसारणम् । ह्रस्वात्स्वरितस्वरात्परे विसर्गे सत्युभयोस्तर्जनीकनिष्ठिकयोरङ्गुल्योः प्रक्षेपः । दीर्घात्स्वरात्परे विसर्गे कनिष्ठिकाङ्गुल्याः प्रक्षेपः । वकारयुक्ताद्दीर्घादपि परे विसर्गे उभयोः प्रक्षेपः । यकारयुक्तजात्यस्वरिताद्दीर्घादपि परे विसर्जनीये द्वयोरङ्गुल्योः प्रक्षेपः कर्त्तव्य इति ॥

(२) १७ । १ ॥

(३) १ । १ ॥

स्य मा भूदत आह पदाद्यस्येति । (१) व्विभ्राडित्यत्र मा भूदत आह्वाकारस्येति । यथा (२) व्वसोः पवित्रम् । अत्र वकारपकारयोरीषद्दीर्घोच्चारणं यथा भवति तथा पठनीयम् । एवं (३) परमेष्ठ्यादिषु ज्ञेयम् । अत एवाध्यायसमाप्तौ संहितायां दीर्घपाठे इति सम्प्रदायविदो लिखन्ति ॥

ईषद्दीर्घता च भवति ॥ ६ ॥

द्विरभ्यासो ग्रन्थपरिसमाप्तिसूचकार्थः । (४) अन्ये विस्तरशः स्वरसंस्काराः पञ्चदशशाखासाधारण्येन प्रातिशाख्ये उपनिबद्धा इति ॥

इति श्रीकात्यायनकृतौ प्रतिज्ञापरिशिष्टसूत्रे तृतीया कण्डिका समाप्ता ॥

इति श्रीमदनन्तदेवयाज्ञिकविरचिते प्रतिज्ञापरिशिष्टसूत्रभाष्ये तृतीया कण्डिका समाप्ता ॥

---

(१) ३३ । ३० ॥

(२) १ । २ ॥

(३) १ । २ ॥

(४) ईषद्दीर्घत्वं नाम किम् । एकमात्राकालापेक्षया किञ्चिदधिककालोच्चारणीयं स्यात् । इति प्रतिज्ञापरिशिष्टसूत्रभाष्यटिप्पणी समाप्ता ॥

अथ भाषिकपरिशिष्टसूत्रम् ॥

अथ भाषिकपरिशिष्टसूत्रभाष्यँल्लिख्यते ॥

वन्दे विष्णुं सदानन्दं भक्तकल्पमहीरुहम् । यच्छायामाश्रितैर्लभ्यं नरैरर्थचतुष्टयम् ॥ १ ॥ कुपिताहिफणाच्छाया समीकृत्यापरं सुखम् । सेवन्ते तत्पदं धीरास्तमनन्तं भजेऽन्वहम् ॥ २ ॥ याज्ञवल्क्यं मुनिं नत्वा कात्यायनमुनीनपि । व्याख्यास्ये भाषिकं सूत्रं कात्यायनमुनीरितम् ॥ ३ ॥ मन्त्रलक्षणभिन्नत्वाच्छतपथब्राह्मणस्य तु । तल्लक्षणाय मुनिना प्रणीतं भाषिकं खलु ॥ ४ ॥ तस्येदमादिमं सूत्रम् ॥

अथ ब्राह्मणस्वरसंस्कारनियमः ॥ १ ॥

अथशब्द आनन्तर्यार्थः । अथ मन्त्रलक्षणप्रणयनानन्तरं शतपथब्राह्मणस्वरसंस्कारनियमः क्रियतइति सूत्रशेषः । मन्त्रलक्षणानन्तर्यञ्चैतस्य भाषिकलक्षणस्य सूत्रप्रस्थानादेव ज्ञायते । तथा हि वक्ष्यति । "जात्याभिनिहितक्षैप्रप्रश्लिष्टाश्चे"ति सूत्रेण पूर्वसिद्धं जात्यादिकमनूद्य भाषिकसञ्ज्ञाम् । तथा स्वरितानुदात्तौ चेति सूत्रेण पूर्वसिद्धस्वरितानुदात्तावनूद्य ब्राह्मणे उदात्तं विधास्यति । तेन तदुपजीव्यत्वात्तदानन्तर्यमेतस्य साधूक्तम् । "द्वौ" ब्राह्मणे उदात्तानुदात्तौ

द्वावेव स्वरौ वेदितव्यौ। न नु मन्त्रलक्षणे द्वितीयाध्यायादौ स्वरनियमस्याभिहितत्वान्नेदमारब्धव्यम्। निराकाङ्क्षत्वादित्यतआह ॥

उक्तो मन्त्रस्वरः ॥ २ ॥

न च पूर्वोक्तेनेदमन्यथा सिद्धम् । पूर्वोक्तलक्षणस्य मन्त्रविभागविषयत्वात् । अतो नैराकाङ्क्षाभावादुक्तव्यमेवेदम् । किं च (१) "करणश्च ऋकारे ह्रस्व" मिति विद्यमाने यत्किञ्चत्तुषु क्रियते । (२) "तथर्षीणां तथा मनुष्याणाम्" । तथा (३) "यवयोः पदान्तयोः स्वरमध्ये लोप" इति सूत्रे विद्यमाने (४) "इन्द्रश्चैव प्रजापतिस्त्रयस्त्रिंश॰श्राविति" । तथा (५) "व्यायविहृता विमुञ्चे" त्येवमादौ संस्कारवैलक्षण्यदर्शनाच्चारब्धमेवेदम्। ननूक्तो मन्त्रस्वर इति न वक्तव्यम् । प्रकृते प्रयोजनाभावादित्यतआह ॥

तेनात्र सिद्धम् ॥ ३ ॥

तेन मन्त्रस्वरलक्षणेन सिद्धं स्वरमनूद्यात्र शतपथब्राह्मणे स्वरलक्षणं प्रणीयते इति सूत्रशेषः । तत्रा-

(१) प्राति॰ अ॰ ४ । सू॰ ४९ ॥

(२) ब्रा॰ का॰ २ प्रपा॰ ३ ब्रा ४ । कण्डिका ५ ॥

(३) प्रा॰ अ॰ ४ । सू॰ १२५ ॥

(४) ब्रा॰ का ३ प्रपा॰ । ब्रा ६ । कण्डिका ८ ॥

(५) २१ । ३३ ॥

द्वौ सञ्ज्ञोच्यते ॥

उदात्तानुदात्तौ भाषिकस्तत्सन्धिः ॥ ४ ॥

उदात्तश्चानुदात्तश्चेत्युदात्तानुदात्तौ पूर्वं कथितौ तयोः सन्धिस्तत्सन्धिः एकवर्णरूपः स भाषिकसञ्ज्ञः स्यात् । सञ्ज्ञाप्रयोजनमुत्तरत्र भविष्यति । यथा (१) अर्य्यमा आयुः । मा नो मित्रो वरुणोऽअर्य्यमायुः तथा (२) भासा । अन्तरिक्षम् । भासान्तरिक्षमा पृण ॥ (३) गव्हरेष्ठा । उग्रम् । गव्हरेष्ठोग्रम् । इत्यादि स्वबुध्या ज्ञेयम् । उदात्तग्रहणं किम् । (४) बुध्यस्व । अग्ने । उद्बुध्यस्वाग्ने । अत्र द्वयोरनुदात्तयोर्भाषिकसञ्ज्ञा माभूदिति । उदात्तानुदात्तौ किम् । (५) जातवेदः । अवाट् । त्वमग्न ऽईडितो जातवेदोऽवाट् । अनुदात्तोदात्तसन्धित्वान्न भाषिकसञ्ज्ञा । सन्धिरिति किम् । ध्रुवा । असदन् । (६) ध्रुवा ऽअसदन् ।

(१) २५ । २४ ॥
(२) १७ । ७२ ॥
(३) ५ । ८ ॥
(४) १५ । ४८ ॥
(५) १९ । ५६ ॥
(६) २ । ६ ॥

(१) काऽइँमरे । अत्रासन्धित्वान्न भाषिकसञ्ज्ञा । कथं भवितव्यम् । (२) उद्दिवंऽस्तभानान्तरिक्षमित्यादौ । इत्यत आह ॥

अनुदात्तावन्तरेणोदात्तः ॥ ६ ॥

अनुदात्तोदात्तयोः पूर्वमेकादेशः । तस्मिन्सति "उदात्तवानुदात्त" इत्युदात्त एव । तत्र भवतीति सूत्रकृदेकादेशसन्धिर्भाषिकसञ्ज्ञो भवतीत्युक्तवान् । एवं भाषिकसञ्ज्ञामुक्त्वा क्वचिदपवादमाह ॥

आ प्र पूर्वआख्यातपरो न ॥७ ॥

आ प्र उपसर्गौ पूर्वौ यस्य स आ प्र पूर्वः । आख्यातपरं यस्य स आख्यातपरः । आ प्र पूर्व आख्यातपर उदात्तान्तानुदात्तसन्धिर्भाषिकसञ्ज्ञो न स्यात् । यथा (३) आ । अप्राः । आप्रा द्यावापृथिवी (४) प्र उक्षामि । अग्नये त्वा जुष्टं प्रोक्षामि । (५) प्र अर्पयतु । प्रार्पयतु । आ प्र पूर्व इति किम् । (६)

---

(१) २३ । ५५ ॥
(२) ५ । २७ ॥
(३) ७ । ४२ ॥
(४) २ । १ ॥
(५) १ । १ ॥
(६) १३ । १६ ॥

ध्रुवा । असि । ध्रुवाऽसिं धरुणा । (१) पूषाऽसि । (२) युन्ताऽसिं । (३) स्वधया कृतासिं । आख्यातपरइति किम् । (४) आ अयम् । आऽयङ्गौः पृश्निरक्रमीत् । (५) एदमंगन्म । प्रेषे भगाय । अत्र न निषेधः ॥

समासश्चानाख्यातपरो न ॥ ८॥

चकार आ प्रयोरुपसर्गयोरनुकर्षणार्थः । आ प्र पूर्वः समासश्च अनाख्यातपरोऽपि न भाषिकसञ्ज्ञः स्यात् । अनाख्यातग्रहणं आख्याताधिकारनिवृत्त्यर्थम् । अपिशब्द आख्यातपरो यदि समासो दृश्यते सोऽपि न भाषिकसञ्ज्ञः स्यात् । इत्येतदर्थः (६) आ इष्टः । एष्टा रायः । आ सम्यक् इष्टा एष्टा इति समासः । (७) आ इष्टयः । एष्टयो नाम । (८) प्र इद्धः । प्रेद्धोऽअग्ने । (९) प्र इत्यै । आ इत्यै ।

---

(१) ३८ । ३ ॥
(२) १९ । २२ ॥
(३) ११ । ७१ ॥
(४) ३ । ६ ॥
(५) ४ । १ ॥
(६) ५ । ७ ॥
(७) इदमपि तथैवोदाहरणम् ॥
(८) १८ । ४३ ॥
(९) २७ । ४९ ॥

प्रेत्याऽएत्यै। समास इति किम्। (१) एदम्बर्हिर्न्निषीदत। (२) प्रेषे भगाय ॥

अपूर्वश्च समासो नैव ॥९॥

अ इति ह्रस्वाकारो गृह्यते। तथा च अकारः पूर्वो यस्य सन्धेः सोऽयमपूर्वः तादृशसमाससन्धिर्न भाषिकसञ्ज्ञः स्यात्। (३) विश्श्व। आयुः। सर्व्व। आयुः। स नो विश्श्वायुः सप्प्रथाः स नः सर्व्वायुः सप्प्रथाः। विश्श्व आयुर्यस्येति बहुव्रीहिः समासः। तथा (४) शता आयुषम्। शतायुषं कृणुहि चीयमानः। (५) चित्राः। ऊतयः। चित्रोतयो वामजाताः। (६) दृढ आयुम्। दृढायुमनु दृढयो जुष्टा भवन्तु जुष्टयः। अपूर्व इति किम्। (७) दिवीव चक्षुराततम्। ह्रस्वपूर्व इति किम्। (८) मातेव

---

(१) ७।३४॥
(२) ५।७॥
(३) ३८।२०॥
(४) १३।४१॥
(५) १२।१०८॥
(६) ५।२९॥
(७) ६।५॥
(८) १२।६१॥

पुत्त्रम् । (१) पितेव सूनवे । (२) व्यस्नेव विक्रीणावहै । समासइत्यनुवर्त्तमाने पुनः समासग्रहणमपूर्वसन्धिमात्रप्रतिपत्त्यर्थम् । तेन । (३) इहेहैषां कृणुहि भोजनानीत्यादि सर्वमुदाहरणं ज्ञातव्यम् । न शब्दैवकारौ अनवधारणार्थौ । (४) नेव वा इदमग्रे सदाऽऽसीन्नेव सदाऽऽसीत् । नेत्यनुवर्त्तमाने पुनर्न्नेतिवचनमुत्तरत्र प्रतिषेधनिष्टत्त्यर्थम् ॥

जात्याभिनिहितक्षैप्रप्रश्लिष्टाश्च ॥ १० ॥

चशब्दो भाषिकसञ्ज्ञानुकर्षार्थः । जात्यादयश्चत्वारः स्वरिता भाषिकसञ्ज्ञाः स्युः । तल्लक्षणानि तु पूर्वमेवाभिहितानि । "एकपदे नीचपूर्वः सयवो जात्यः"। "एदोद्भ्यामकारो लुगभिनिहितः"। "युवर्णौ यवौ क्षैप्रः"। "इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः"। इति क्रमेणोदाहरणानि। तत्र जात्यो यथा। (५) धान्यमसि । (६)

(१) ३ । २४॥

(२) ३ । ४९ ॥

(३) १० । ३२ ॥

(४) शतपथब्राह्मणस्य दशमकाण्डाग्निरहस्यस्य तृतीयप्रपाठकस्य पञ्चमब्राह्मणस्य प्रथमखण्डस्योदाहरणम् ॥

(५) १ । २० ॥

(६) ३ । ३७ ॥

भूर्भुवः स्वः सुप्रजाइत्यादि अभिनिहितो यथा (१) प्रसवेऽश्विनोः। (२) पूष्णोऽग्नये। (३) ओवेदोऽसि। (४)कोऽसि। इत्यादि। क्षैप्रो यथा (५) त्र्यम्बकँयजामहे। (६) इवन्नः सर्पिरासुतिः। इत्यादि। प्रश्लिष्टो यथा (७) अभीन्धतामुखे। (८) दिवीव चक्षुः। जात्यक्षैप्रयोः 'स्वरितानुदात्तौ च' त्यनेनौवोदात्तत्वे सिद्धे पुनर्ग्रहणं निघातसिध्यर्थम्। अभिनिहितप्रश्लिष्टयोस्तूदात्तानुदात्तसन्धित्वाद्भाषिकसञ्ज्ञायां प्राप्तायामन्यत्र भाषिकसञ्ज्ञाया अनित्यत्वज्ञापनार्थं पुनर्ग्रहणम्। तेनात्र न सम्भवति। यथा (९) सवितासि सत्यप्रसवः। (१०) इत्यादि सोम इन्द्रदेवितासि सुन्वतो इन्द्रबर्हिष इति। (११) आहमजानि गर्भधम्॥

(१) १। १०॥
(२) ४। ७॥
(३) २। २१॥
(४) ७। २२॥
(५) ३। ६०॥
(६) ११। ७०॥
(७) ११। ६१॥
(८) ६। ५॥
(९) १०। २९॥
(१०) इदमुदाहरणम् काण्वानाम्॥
(११) २३। १९॥

उतो यो मो नो सो च ॥ ११ ॥

उतो यो मो नो सो इत्येतेषां पञ्चानामोकारो भाषिकसञ्ज्ञः स्यात् । यथा (१) उतो तऽइषवे नमः । (२) यो मम तनूः । (३) मोऽअहन्त्वं । (४) नोऽएवासाधुना कनीयान् । (५) सोऽदेभ्योऽभवत् ॥

ओञ्चैकेषाम् ॥ १२ ॥

ओङ्कारश्च केवलो भाषिकसञ्ज्ञः स्यात् । एकेषामाचार्य्याणां मतेन । एकशब्दोऽनैकदेशवचनः । तेन काण्वाचार्यमतेन न भाषिकसञ्ज्ञइत्यर्थः । यथा (६) सप्तदशाक्षराराण्यों श्रावयेति । (७) बोधयतातिथिम् । अस्मिन् । एकेषां किम् । काण्वानां मा भूदिति । यथा (८) ता वाएताः पञ्च व्याहृतयः, ओं श्रावयास्तु श्रौषट् यज ये यजामहे वौषडिति । अथेदानीं भाषिकसञ्ज्ञाप्रयोजनमाह ॥

---

(१) १६ । १ ॥
(२) ५ । ६ ॥
(३) ४ । २२ ॥
(४) इदमपि काण्वानाम् ॥
(५) ३४ । ११ ॥
(६) इदमुदाहरणं तथैव ज्ञेयम् ॥
(७) ३ । १ ॥
(८) इदमुदाहरणं तथैवेति ॥

उदात्तमेतत् ॥ १३ ॥

यद्देतदुदात्तानुदात्तावित्यादिप्रबन्धेन भाषिकसूत्रमुपक्रान्तं तदुदात्तं स्यात् । यथा क्रमेणोदाहरणानि । (१) अर्य्यमायुः । (२) भासान्तरिक्ष मा पृ॑ण । (३) चित्रामाऽहँ॑ष्टये । (४) सिठँ० हटँ०सेमम्पात्वटँ० हसः । (५) धान्यमसि । (६) भूर्भुवः स्वः सुप्रजाः । प्रसवेऽश्विनोः । वेदोसि । (७) कुमार्य्यः परियन्ति । (८) त्र्यम्बकँ॑य्यजामहे । (९) द्रुन्नः सर्पिरासुतिः । (१०) अभीन्धतामुखे ॥

स्वरितानुदात्तौ च ॥ १४ ॥

मन्त्रविषये यौ स्वरितानुदात्तावुक्तौ तावपि यतप-

---

(१) १७ । ७१ ॥
(२) १७ । ७४ ॥
(३) १ । १० ॥
(४) १ । २० ॥
(५) ३ । ३७ ॥
(६) १ । १० ॥
(७) इदमपि तथैव ॥
(८) ३ । ६० ॥
(९) ११ । ७० ॥
(१०) ११ । ६१ ॥

थब्राह्मणे उदात्तौ स्तः । तत्र स्वरितो यथा (१) अकन्नकर्म कर्मकृतः । (२) वाजेवाजेऽवत (३) अग्ने नय सुपथा राये अस्मान् । अनुदात्तो यथा (४) एष ते रुद्र भागः । (५) एष ते निर्ऋते भागः । (६) सह वाचा मयोभुवा ॥

उदात्तमनुदात्तमनन्त्यम् ॥ १५ ॥

मन्त्रधर्मेण यदुदात्तमभिहितं तच्छतपथब्राह्मणेऽनुदात्तं स्यात् । अनन्त्यम् । अन्ते स्थितमन्त्यं तद्वर्ज्यमनन्त्यम् । अनवसितमित्यर्थः । यथा (७) इड्ये । काम्ये । इडे । रन्ते । चन्द्रे । अदिति । सरस्वति । महि । यथा (८) स्वान । भ्राज । अङ्घारे । बम्भारे । हस्तेत्यादि । अनन्त्यमिति किम् । (९) चक्षुर्मित्रस्य वरुणस्याग्नेः । (१०) विश्वानि देव वयुनानि विद्वान् ।

(१) ३ । ४७ ॥
(२) ९ । १८ ॥
(३) ५ । ३६ ॥
(४) ३ । ५६ ॥
(५) ९ । ३५ ॥
(६) ३ । ४७ ॥
(७) ८ । ४४ ॥
(८) ४ । २७ ॥
(९) ७ । ४२ ॥
(१०) ५ । ३६ ॥

(११) विश्वं जगदभि पित्वे मनीषा । एवमेकोदात्तस्यानुदात्तत्वमभिधाय बह्वुदात्तेषु नियममाह ॥

अन्त्यं॰ सं॰ हतानाम् ॥ १६ ॥

द्वयोर्बह्वनामुदात्तानामेकत्र युक्तानां पौर्वापर्येणावस्थितानां मध्ये यदन्त्यमुदात्तं मन्त्रे तद्वर्णोऽनुदात्तं स्यात् । पूर्वेषामुदात्तानां स्वरविशेषानुपदेशान्मन्त्रस्वर एव भवति । यथा (१) आ ब्रह्मन् । (२) व्रते तवानागसोऽअदितये । (३) लाजी३ञ्छाचीन्यव्यं गव्यं । (४) आयाद्याम्भास्या पृथिवीम् । (५) अग्ने युक्ष्वा हि ये तवाश्वासः । इत्यादि विवेक्तव्यम् । अथेदानीं भाषिकसञ्ज्ञे परे विशेषमाह ॥

भाषिके चोभयेषाम् ॥ १७ ॥

उदात्तानुदात्तौ भाषिकस्तत्सन्धिरित्यादिना भाषिक उक्तः । तस्मिन्परे उभयेषामुदात्तानामनुदात्ता-

---

(१) ३३ । ३५ ॥
(२) २२ । २२ ॥
(३) १२ । १३ ॥
(४) २३ । ८ ॥
(५) १५ । ५७ ॥
(६) १३ । ३६ ॥

नां च । अनुदात्तएव स्यात् । तत्रोदात्तानां यथा (१) चित्रामाहँऽस्ट्रणे । (२) सिठँ०हठँ० सेमम्पात्वठँ०हं-स: । इत्यादि । अनुदात्तानाँयथा (३) भासान्तरिंक्ष-मा ष्टण । (४) अर्थ्यमायु÷ । (५) धान्यमसि । (६) वैष्णाऽव्यौ । (७) सवितारमोरायो÷ । (८) निरग्राभ्या-स्त्य । (९) पयस्या बृहस्पतये (१०) स्तऽउपस्था÷ । इ-त्यादिमन्त्रलक्षणेनानुदात्तत्वे सिद्धे पुनरनुदात्तवि-धानम् । 'स्वरितानुदात्तौ चे'त्यस्यापवादार्थम् ॥

एकस्यापि ॥ १८ ॥

एकशब्दोचोक्तान्यवचनः । आभ्यामेक इति वत् । तदन्यस्य स्वरित एव । तथा चोदात्तानुदात्ताभ्यामेको-ऽन्यः स्वरितस्तस्यापि भाषिके परेऽनुदात्तादेशः स्या-

---

(१) १७ । ७४ ॥
(२) १९ । १० ॥
(३) १७ । ७२ ॥
(४) २५ । २४ ॥
(५) १ । २० ॥
(६) १ । १३ ॥
(७) ४ । २५ ॥
(८) ६ । २९ ॥
(९) २९ । ६० ॥
(१०) २४ । ४ । इमान्युदाहरणानि शुक्लयजुरार्षीयसंहितायां बोध्यानीति ॥

त्। यथा (१) भूत्यै। येदम्। नमो भूत्यै येदं चकार। (२) रायः। प्रेषे। एष्टा रायः प्रेषे भगाय। (३) भुवः। स्वः। भूर्भुवः स्वः। स्वरितस्योदात्तानुदात्तोभयसंप्रयोगे जाते त'द्भाषिके चोभयेषा'मित्यनेनैव निघाते सिद्धेऽपि यदारभ्यते। पुनस्तद्भाषयति निहन्यमानोऽपि केनचित्प्रकारेण। केनचिन्निमित्तेनायं स्वरितएवेति। किमेतस्य ज्ञापने प्रयोजनम्। उच्यते॥

स्वरितस्य चाभिनिहितत्वम्॥१९॥

स्वरितस्वरस्य भाषिकस्याभिनिघातः स्यात्। एवं निघातेऽपि सति स्वरितत्वं स्वरितस्य चाभिनिहितत्वम्। अभिनिहितस्य भाषिकसञ्ज्ञा भवतीति भावः। यथा (४) प्रसवेऽश्विनोः। (६) एष्ट्वेऽग्निमन्नादम्॥ (७) सरस्वत्यै पूष्णोऽग्नये॥

तेषां च प्रागुत्तमादनन्तराणां च

(१) १२। ६५॥
(२) ५। ७॥
(३) ३। ३७॥
(४) १। १०॥
(५) ३। ५॥
(६) ४। ७॥

कम्पनम् ॥ २० ॥

तेषां च प्रागुक्तानां बह्वनां पौर्वापर्येणावस्थिता-नामुत्तमात्पूर्वेषामनन्तराणां जात्यन्तरेणाव्यवहिता-नामनुदात्तानां कम्पनं स्यात् । कम्पनं नामानुदात्ता-दप्यनुदात्तत्वम् । यथा (१) प्रतिष्ठापयति स्वर्णर्कः स्वाहेति । (२) यद्देवोदेत्यथ वसन्तः । (३) अद्धा हि तद्ब्रह्मन्त्वोद्धा तद्यदात्मा (४) आदित्यो ह त्वैवैषोऽग्निश्चितः । (५) सैषा त्रय्येव विद्या तपति । (६) एवंविकेष्टकः । (७) सोऽनुवीक्ष्य नान्यदात्मनोऽपश्य-दित्यादि ॥

उदात्तपूर्वस्यानुदात्तस्य च ॥ २१ ॥

उदात्तः पूर्वो यस्यानुदात्तस्य सोऽयमुदात्तपूर्वः । तादृशानुदात्तस्य भाषिके परे कम्पनं स्यात् । यथा (८) किञ्च न । आममत् । मो च नः किञ्च नाममत् । (९)

(१) तथोदाहरणम् ॥
(२) तथा ॥
(३) तथैव ॥
(४) तथा ॥
(५) २० काण्डे । ३ प्रपाठके । ४ ब्राह्मणे । २ द्वितीयखण्डे ॥
(६) तथा २२ खण्डे ॥
(७) तथा ॥
(८) तथा ॥
(९) तथैवोदाहरणं बोध्यम् ॥

इति कात्यायनकृते भाषिकपरिशि-
ष्टसूत्रे प्रथमा कण्डिका ॥ १ ॥

इत्यनन्तदेवकृते भाषिकपरिशिष्टसूत्रभाष्ये प्रथमा-
कण्डिका ॥ १ ॥

अथाख्यातपदविकरणाः ॥ १ ॥

आख्यातं च तत्पदं चेति विग्रहः । तस्य विकरणा विकाराः । आख्यातपदविकरणाः के पुनस्ते ह्यादयो वक्ष्यमाणाः । अथशब्दोऽत्राधिकारान्तरज्ञापनार्थः । ब्राह्मणाधिकारो निवृत्तः । अथेदानीं मन्त्रलक्षणसमाम्नाये आख्यातपदविवरणा व्याख्यायन्ते । आख्यातपदलक्षणमन्यत्रोक्तम् । क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते । त्रीनत्र पुरुषान्वक्ति कालतस्तु विशिष्यते । १ । इति । कः पुनराख्यातपदस्य विकारः । अनाख्यातात्परस्याख्यातपदस्यानुदात्तत्वमविकारः । शेषो विकारः । ननु प्रातिशाख्य एव "प्रकृत्याऽऽख्यातमाख्यातपूर्व"मिति प्रकृत्या आख्यातपदविकरणमुक्तम् । एवं सतीह पुनर्वचनमनर्थकमिति चेत् । अत्रोच्यते । तत्राभिनिहितेभ्योऽधिका एव वक्तव्याः । ते यदि शुद्धा अभिधीयेरन् तदाऽभिनिहितानां परिसङ्ख्यानमाशङ्कयेत । अतस्तद्दोषपरिजिहीर्षुराचार्यो-

ऽभिनिहितानभिहितसाधारणलक्षणं करोति स्म ॥

अर्थादिः ॥ २ ॥

अर्थस्यादिरर्थादिः । अर्थादौ वर्त्तमानमाख्यातमनुदात्तं विकारं प्राप्नोति । यथा (१) भवत्यात्मना परास्य द्विषन्भ्रातृव्यः । (२) सन्त्येव घृतस्तोका इव न्वत् । (३) स्याद्वैव प्रायश्चित्तिः । (४) भवति ह्यास्सुवर्गमित्यादि ॥

पादादिः ॥ ३ ॥

पादस्यादिः पादादिः । पादादौ विद्यमानमाख्यातं विक्रियते । यथा (५) ददातु । पुनर्नः पितरो मनो ददातु दैव्यो जनः । तथा । (६) अगन्महि । सं वर्चसा पयसा सन्तनूभिरगन्महि मनसा सं शिवेन । (७) योज । सुतो यासि वशाँ २॥ ऽअनु योजान्विन्द्र ते हरी ॥

---

(१) तथा ॥

(२) तथैव ॥

(३) तथोदाहरणं ज्ञातव्यम् ॥

(४) ३ । ५६ ॥

(५) ९ । २४ ॥

(६) ३ । ५२ ॥

(७) ११ । ४९ ॥

हि ॥ ४ ॥

हिशब्दात्परमाख्यातं विक्रियते । यथा (१) आपो हिष्ठा मयोभुवः । (२) विडीमिद्बोऽश्रंक्रयत् । (३) शिरो हि प्रथमं जायमानस्य जायते । हिशब्दात्पूर्वमपीति वक्तव्यम् । यथा (४) इन्द्रवो वामुशन्ति हि ॥

हन्त ॥ ५ ॥

हन्तशब्दात्परमाख्यातं विक्रियते । यथा (५) हन्त तेऽनया कात्यायनान्तं करवाणीति । (६) हन्ताहमिमं द्वौ प्रश्नौ प्रवक्ष्यामि । (७) हन्तैनं ब्रह्मौघमाह्वयामहा इति । (८) हन्तास्येन्द्रियं वीर्यꣳ सोमपीथमन्नाद्यꣳ हराणीति । अत्र परत्वमर्थतो द्रष्टव्यम् ॥

नेत् ॥ ६ ॥

नेदित्यस्मात्परमाख्यातं विक्रियते । यथा (९) ने-

(१) १२ । ६ ॥
(२) ७ । ८ ॥
(३) ब्राह्मणोदाहरणम् ॥
(४) इदमपि तथैव ॥
(५) तथा ॥
(६) तथैव ॥
(७) ३ । १६ ॥
(८) ब्राह्मणोदाहरणम् ॥
(९) १० । ३२ ॥

त्वदपचेतयाते । (१) नेदन्योन्यर्ठ० ह्रि न सानीति । (२) नेदति रेचनीति ॥

कुवित् ॥ ७ ॥

कुविदित्यस्मात्परमाख्यातं विक्रियते । यथा (३) कुविदङ्ग यवमन्तो यवञ्चिद्यथा दान्ति । (४) कुविन्मे पुत्रमधीदिति । (५) कुविन्मेऽनुमहूतः सोममवभक्ष-दिति ॥

अह ॥ ८ ॥

अहइत्यस्मात्परमाख्यातं विक्रियते । यथा (६) न-क्षत्रमाहास्य भवतीत्यादि ॥

समुच्चये ॥ ९ ॥

समुच्चयार्थाच्चकारात्परमाख्यातं विक्रियते । यथा (७) घर्मश्च स्थोर्व्वश्च स्थइति । (८) सुष्मा चासि

(१) ब्राह्मणोदाहरणम् ॥
(२) इदमपि तथा ॥
(३) १० । ३२ ॥
(४) ब्राह्मणोदाहरणम् ॥
(५) इदमपि तथा ॥
(६) ११ । ३० ॥
(७) १ । २८ ॥
(८) ३ । ५६ ॥

शिवा चासि ॥

आमन्त्रितसस्वरम् ॥ १० ॥

स्वरेण सह वर्त्तत इति सस्वरं आमन्त्रितं च तत्स्वरं च आमन्त्रितसस्वरं आद्युदात्तमित्यर्थः । आमन्त्रितसस्वरात्परमाख्यातं विक्रियते । यथा (१) मघवन्वन्द्विषीमहि । (२) अग्ने युद्क्ष्वा हि । (३) अग्ने भरन्तु चित्तिभिः । (४) अग्ने नय । (५) अग्ने प्रवस्व ॥

जिज्ञासितम् ॥ ११ ॥

ज्ञातुमिष्टं जिज्ञासितं जिज्ञासितमाख्यातं विक्रियते । यथा (६) कथमस्यैषा वसोर्द्धारा सँव्वत्सरमनिमाप्नोति । (७) कथं महतोक्थेन सम्पद्यते ॥

विचारितम् ॥ १२ ॥

विचारविषयकमाख्यातं विक्रियते । यथा (८) अ-

(१) ३ । ५६ ॥
(२) ३ । २ ॥
(३) १२ । ३० ॥
(४) ५ । ३५ ॥
(५) ८ । ३८ ॥
(६) ब्राह्मणोदाहरणम् ॥
(७) इदमपि तथैव ॥
(८) ३४ । ७४ ॥

धः॰ स्विदासी३दुपरि स्विदासी३त् । (१) तदाहुः कथं कुर्यादित्वा यज्ञपथा । यजेना३नयेना३इति ॥

अवधारितम् ॥ १३ ॥

अवधारणार्थकमाख्यातं विक्रियते । यथा (२) यजेत हैव न ह्यन्यदपक्रमणं भवति । यजेदित्याहुः ॥

यद्योगः ॥ १४ ॥

यच्छब्दस्य योगो यद्योगः स च यच्छब्दः सर्वप्रत्ययान्तो गृह्यते । यद्योगे सत्याख्यातं विक्रियते । यथा (३) विश्वा यद्जयस्पृधः । (४) योऽस्मान्द्वेष्टि यं च व्वयं द्विष्मः (५) यत्रा नियुद्भिः सचसे शिवाभिः । (६) यतरा नौदवीयः परा पश्चात् । (७) यतनो वै सम्पत्तयोः परा जयते । (८) यतद्यदस्वति । (९) यतर-

---

(१) ब्राह्मणस्यैव ॥
(२) तथा ॥
(३) १९ । ७१ ॥
(४) ६ । २३ ॥
(५) १२ । १५ ॥
(६) ब्राह्मणस्य ॥
(७) तथा ॥
(८) तथैव ॥
(९) तथा ॥

था कामयते । (१) यतमथा कामयेत । (२) याद्दशद्दै जायते । इत्यादि ॥

विनियोगः ॥ १५ ॥

विनियोगार्थकमाख्यातं विक्रियते । विनियोगो नाम मन्त्रादित्वदेवतापदादित्वादिकः । यथा (३) स वा इन्द्राग्निभ्यामुप दधाति । (४) विश्वकर्म्मणा सादयति । (५) तूष्णीं दर्भस्तम्बमुप दधाति । (६) यजुषाऽभि जुहोति । (७) तूष्णीमुदचमसान्निनयति । (८) यजुषा वपति ॥

वाक्यशेषः ॥ १६ ॥

वाक्यशेषो यस्मिन्नाख्यातउपलभ्यते तदाख्यातं विक्रियते । यथा (९) अथ प्रातराग्नेयः पुरोडाशो भवत्यैन्द्रꣳ सान्नाय्यम् ॥ (१०) द्वावुत्तरस्यां वेद्यां पादौ

---

(१) तथा ॥
(२) तथैव ॥
(३) तथा ॥
(४) तथा ॥
(५) तथा ॥
(६) तथैव ॥
(७) तथा ॥
(८) तथा ॥
(९) तथैव ज्ञेयम् ॥
(१०) ब्राह्मणस्य ॥

भवतो द्वौ दक्षिणस्याम् (१) चितो गार्हपत्यो भवत्यो भवत्यचित आहवनीयः ॥

अनुबन्धइति ॥ १७ ॥

अनुबध्यतेऽनेनेत्यनुबन्धः । आख्यातार्थस्य नित्यतां यः शब्दो ब्रवीति सोऽनुबन्धः । तस्मात्परमाख्यातं विक्रियते । यथा श्वः श्वः श्रेयान्भवति । इतिकरणमाख्याताधिकारपरिसमाप्त्यर्थम् । एवं यत्र यत्र समाम्नाये आख्यातविकारो दृश्यते तत्र तत्र तथैव द्रष्टव्यम् । न्यायसाम्यात् । यथा (२) इमं मे वरुण श्रुधी हवम् ॥

एतआषोडशादक्षरात्पदं विकुर्वन्ति ॥ १८ ॥

एते हि शब्दादय आषोडशाक्षरादाख्यातपदं विकुर्वन्ति। आषोडशादभिविधिर्मर्यादा वा । तमेवारभ्य आषोडशादक्षरात् । यथालाभमुदाहरणानि दीयन्ते (३) हन्तास्येन्द्रियं वीर्य्यꣳ सोमपीथमन्नाद्यꣳ हराणीति । स यो हैवमेतꣳ सँव्वत्सरमध्यात्मं प्रतिष्ठितं व्वेद । नेदति रेचयानीति । नेत्त्वदपचेत

(१) शतपथब्राह्मणस्यैवोदाहरणम्बोध्यम् ॥

(२) २१ । १ ॥

(३) ब्राह्मणोदाहरणम् ॥

यातै ॥

आपञ्चविꣳशादिति भारद्वाजः ॥ १९ ॥

ह्वादय आपञ्चविंशादाख्यातपदं विकुर्वन्तीति भारद्वाजआचार्यो मन्यते । यथा (१) येना नः पूर्वे पितरः पदज्ञाऽअर्चन्तो गाऽअविन्दन् । तथा (२) यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति । इति ॥

आद्वाविꣳशादित्यौपशविः ॥ २० ॥

ह्वादय आद्वाविꣳशादक्षरादाख्यातं विकुर्वन्ति । इत्यौपशविराचार्यो मन्यते । यथा (३) सँय्यो हैवमेतꣳ सप्तदशं प्रजापतिमधिदैवतं चाध्यात्मं च प्रतिष्ठितं वेद ॥

आमर्य्यादास्थयोः पदयोर्बहूनां चापूर्वपदं विक्रियते ॥ २१ ॥

मर्यादा त्रिधा । षोडशाक्षरा । पञ्चविंशत्यक्ष-

(१) ३४ । १७ ॥

(२) २५ । २५ ॥

(३) शतपथब्राह्मणस्यैवोदाहरणम् ॥

रा । द्वाविंशदक्षरायाम् । द्वाविंशदक्षरायां पक्षे विक्रियते । पाक्षिकत्वादपरिपूर्णे इतरे मर्यादे । अत्राङ्गीषदर्थे वर्तते । आमर्यादा ईषन्मर्यादेत्यर्थः । ईषन्मर्यादायां तिष्ठत इत्यामर्यादास्थे । तयोरामर्यादास्थयोराख्यातपदयोः पूर्वमाख्यातमपि द्वाविंशदक्षरान्तं विक्रियते । ह्यादिभिर्योगे सतीत्यनुवर्त्तते । तत्र द्वयोर्यथा । (१) स यत्सायमस्तमिते जुहोत्यग्नावेवैभ्यऽएतत्प्रविष्टेभ्यो जुहोति । अथ यत्प्रातर्जुहोत्यस्य जीवनस्य देवेभ्यो जुहवामि । बहूनामाख्यातानां यथा (२) स यत्सायमस्तमिते जुहोति गर्भमेवैतत्सन्तमभि जुहोति गर्भं सन्ततमभि करोति । (३) अथ यत्प्रातरनुदिते जुहोति प्रजनयत्येवैनमेतत्सोऽयं तेजो भूत्वा विभ्राजमान उदेतीति ॥

सर्वाणीत्यौपशविः ॥ २२ ॥

अत्र सर्वाण्यप्यामर्यादास्थितान्याख्यातपदानि ह्यादियोगे विक्रियन्ते । इत्यौपशविराचार्यो मन्यते । यथा (४) यस्मिन्नर्द्धे यजन्ते तेषां वा उन्नेतोत्तमो दीक्षते प्रथमोऽवभृथादुदायतामुदैति । (५) ये देवासो

(१) इदमपि तथैव ॥

(२) तथा ॥

(३) तथा ॥

(४) ब्राह्मणोदाहरणम् ॥

(५) ७ । १९ ॥

द्विर्व्येकांदशस्तथ पृथिव्यामिति ॥

इति कात्यायनकृतौ भाषिकपरिशिष्टसूत्रे द्वितीया कण्डिका ॥

इत्यनन्तदेवकृते भाषिकपरिशिष्टसूत्रभाष्ये द्वितीया कण्डिका ॥

विनियोगे तु पूर्वपदम् ॥ १ ॥

विनियोगेऽर्थे गम्यमाने पूर्वमाख्यातं विक्रियते नोत्तरं तु शब्दोऽवधारणे । यथा (१) तूष्णीं दर्भस्तम्बमुप दधाति । यजुषाभि जुहोति । (२) तूष्णीमुदचमसान्निनयति । यजुषा वपति । (३) स वाऽइन्द्राग्निभ्यामुपदधाति । (४) विश्वकर्मणा सादयति ॥

जिज्ञासितयोश्च ॥ २ ॥

जिज्ञासितयोराख्यातयोः पूर्वमाख्यातं विक्रियते नोत्तरं यथा । (५) जुहवानी३माहौषा३मिति । (६)

(१) शतपथस्यैवोदाहरणम् ॥
(२) तथा ॥
(३) तथा ॥
(४) तथा ॥
(५) तथैव ॥
(६) तथा ॥

कतमस्यैतत्कर्म्म सँवत्सरमग्निमाप्नोति। (१) कथठं॰ स वरेणाग्निना सम्पद्यते॥

अन्तरहितयोश्च ॥ ३ ॥

अन्तर्हितं भिन्नजातीयेन व्यवहितमित्यर्थः। अन्यजातीययोराख्यातयोः पूर्वमाख्यातं विक्रियते न द्वितीयम्। यथा (२) पुरुषो ह नारायणं प्रजापतिरुवाच। (३) यजस्व यजस्वेति। (४) अथ यज यजेत्येवोत्तरानाह॥

विचारितसमुच्चयोश्च ॥ ४ ॥

विचारिते समुच्चिते चेति द्वन्द्वसमासः। विचारार्थकयोः समुच्चयार्थकयोश्चाख्यातयोः पूर्वं विक्रियते न-द्वितीयम्। तत्र विचारयोर्यथा (५) यजेदाज्यभागौ ज्या३ इति यजेता३ न यजेता३ इति। समुच्चयोर्यथा (६) शर्म्म च स्थोव्वर्म्म च स्थ:। (७) सुश्मा चासि शिवा चासि॥

---

(१) तथा॥

(२) तथा॥

(३) तथा॥

(४) तथा॥

(५) तथा॥

(६) ११।३०॥

(७) १।२८॥

निर्वचनेऽनूबन्धो वाक्यशेषोऽवध्यर्थश्चावधारणो न विकुरुत इति भारद्वाजः ॥ ५ ॥

निर्वचनं नामार्थस्यान्वाख्यानम् । तच्च विधिरूपेण वाऽनुवादरूपेण वा पूर्वपदस्थानमित्यर्थः । अनुबन्धतदृत्यनुबन्धः । पुनः पुनरावर्त्तनमित्यर्थः । अनुबन्ध इत्यत्र "अन्येषा मपि दृश्यते" इति पाणिनीयसूत्रेण दीर्घः । निर्वचनेऽनुबन्धो वाक्यशेषो यस्मिन्नाख्याते तदाख्यातं न विकुरुते । इति भारद्वाजाचार्यो मन्यते । तथाऽवध्यर्थो योऽवधारणो यस्मिन्नाख्याते दृश्यते तदपि न विक्रियते । इति भारद्वाजो मन्यते । अवधिरत्र कालविशेष उच्यते । विनियोगो वाक्यशेष इति प्राप्तापवादोऽयम् । क्रमेणोदाहरणानि । (१) देवा दीक्षां निरमिनादित्यै प्रापणीयम् । इत्यग्रे क्षपत्यर्थेति । भारद्वाजोक्तिर्विक्रियते वा । वस्ताजिने पुष्टिकाममभिषिञ्चेत्कृष्णाजिने ब्रह्मवर्चसकाममुभयोरुभयकाममिति । प्रथमस्योदाहरणम्, द्वितीयोदाहरणं यथा (२) एवमेव मध्यन्दिने सवनगृहीतएवैतस्मादच्छावाकयोत्तमो ग्रहो भवत्यथ तृतीयां वसती

(१) ब्राह्मणोदाहरणानि ॥

(२) इमान्यपि तथा ॥

वरीणामवनयतीति ॥

भूयोवादी वरीयोवादी कनीयो-वादी चानवधारणाः॥ ६ ॥

भूयो बहुतरं वदतीति भूयो वादी, गुरुतरं वदतीति वरीयो वादी, कनीयोऽल्पतरं वदतीति कनीयोवादी । एते भूयोवाद्यादयोऽनवधारणाः । अवधारणकार्यकारिणो न स्युः । भूयोवाद्यादयः परं भूतमाख्यातं न विकुर्वन्तीत्यर्थः । क्रमेणोदाहरणानि (१) तस्य भूयोभूयएव तेजो भवति । परः परएव वरीयस्तेपो भवति कनीयः कनीयस्तेपो भवतीति 'अनुबन्ध' इति प्राप्तस्यापवादकमेतत् । नेत्यनुवर्त्तमाने पुनरवधारणार्थ इति नञ् अनित्यत्वसूचनार्थः । तेन शाखान्तरे पूर्वोक्तोदाहरणे आख्यातपदं विक्रियतेऽपीति गम्यते । अनवधारणा इति किम् । अन्यत्रापि यत्र विकारो दृश्यते तत्रावधारणेऽपि सति न विकारो माभूदिति । यथा (२) एवꣳ॰ सउद्दीपयति । एवꣳ॰ हैव श्रिया यशसा भवति । एवꣳ॰ हैव स जायते । एवꣳ॰ हैवं कीर्त्या यशसा श्रिया स्वः स्वः श्रेयान्भवतीत्यादिज्ञेयानि ॥

---

(१) तथाभूतानि ॥

(२) एतान्यप्युदाहरणानि शतपथब्राह्मणस्य बोध्यानि ॥

परिसमाप्त्यर्थश्चान्यतमो ह्यादीनां न विकरोति ॥ ७ ॥

हिहन्तेत्यादयो विकारकारिण इत्युक्तम् । क्वचित्तस्यायमपवादः । ह्यादीनां मध्येऽनन्यतमएकतमः परिसमाप्त्यर्थश्चेदाख्यातं न विकरोति । बह्वष्वप्याख्यातेषु येनाख्यातेन सम्बध्यते तदेवाख्यातं विकरोति । समीपस्थितान्यप्यन्याख्यातानि न विकुर्वन्ति । तस्मिन्नेव स्वसम्बद्धाख्याते परिसमाप्त्यर्थत्वात् । यथा (१) किꣳ हि हरेयदन्तरिक्षꣳ हरामि दिवं हरामीति हरेत् । हन्तास्मै प्रतिष्ठां कल्पयानीति सलिलꣳ हि न सानीत्याह । कुम्भे पुनरमब्रवीदिति चुक्रोधेत्यादि ॥

यमपदयोः स्वराद्योरल्पस्वरतरं प्रकृत्या ॥ ८ ॥

द्विरुक्तं पदं यमपदमित्युच्यते । स्वरआदिर्ययोः पदयोस्ते स्वरादी । अतिशयेन अल्पाः स्वरा यत्र पदे दृश्यन्ते तदल्पस्वरतरमिति विग्रहः । स्वराद्ययोर्मध्ये यदल्पस्वरतरं तत्प्रकृत्या स्यात् । अत्र सूत्रे तरग्रहणं तुल्यसङ्ख्येष्वपि मात्राधिक्यादुत्तरस्य नाल्पस्वरत्वमि-

(१) ब्राह्मणस्योदाहरणम् ॥

ति भावः । यथा (१) तदेकैकयैवेमाँल्लोकान्त्स तनोति । एकैकयैवेमाँल्लोकान्त्स्पृणुते । तस्मादेकैकामेवानवानमनुब्रूयात् । अत्र पूर्वस्यैकशब्दस्योत्तरैकशब्दापेक्षया मात्राल्पत्वात्प्रकृतिस्वरत्वं ज्ञेयम् । अत्रैका चैका चेति समासे सति "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादि"ष्विति सूत्रेण टाप् । लोपे पूर्वस्यैकशब्दस्यैकमात्रत्वमुत्तरस्य द्विमात्रत्वमिति विवेकः । समाख्यातप्रसङ्गादनाख्यातसमार्थोऽयमारम्भः ।

स्वराद्यस्वराद्योश्च सममात्रयोः पूर्वं नेष्टमिति भारद्वाजः ॥ ९ ॥

स्वर आदिर्ययोः पदयोस्ते स्वरादी तादृशे ये न भवतस्ते अस्वरादी । चकारः समुच्चयार्थः । समाः सममात्रा ययोस्ते सममात्रे । स्वराद्योरस्वराद्योश्च सममात्रयोर्यमपदयोर्मध्ये पूर्वपदं प्रकृतिस्वरं नेष्टमिति भारद्वाजो मन्यते । अस्वरादिसममात्रार्थोऽयमारम्भः । तत्र स्वराद्योः सममात्रयोर्यथा (२) उपोपेन्नु मघवन् । अस्वराद्योः सममात्रयोर्यथा (३) प्रप्रायम-

(१) इदमपि तथा ॥

(२) ३ । ३४ ॥

(३) १२ । ३४ ॥

ग्निः । (१) सꣳ समिद्युवसे वृषन् । सममावयोः किम् । उप । उत । उपोत । प्रप्रति ॥

यथार्थं चतुर्विधं पदं विपर्य्यस्तम् ॥ १० ॥

नामाख्यातोपसर्गनिपातरूपं चतुर्विधं पदं यथार्थं मन्त्रे स्वरतो व्याख्यातम् । तद्ब्राह्मणे स्वरतो विपर्य्यस्तं स्यात् । स च विपर्यासो व्याख्यातः पूर्वभाषिके । उदात्तमेतत् । स्वरितानुदात्तौ च । उदात्तमनन्त्यम् । अन्त्यꣳ संहतानाम् । भाषिके चोभयेषामिति ॥

कण्ठ्यस्वरोऽऋत्सवर्णे ॥ ११ ॥

'अथ ब्राह्मणस्वरसंस्कारनियम' इति प्रतिज्ञा तयोः स्वरसंस्कारयोर्मध्ये पूर्वं स्वरनियममुक्त्वा । अथेदानीं संस्कारमाह । 'कण्ठ्यस्वरोऽऋत्सवर्णे' । इति । कण्ठे भवः कण्ठ्यः । कवर्गादिव्युदासार्थं स्वरग्रहणम् । कण्ठ्यस्वरो वर्णो ह्रस्वो दीर्घो वाऽऽस्यादुत्तरेण ऋवर्णेन सह । ब्राह्मणे इत्यनुवर्त्तते । यथा (२) यत्किञ्च ऋतुषु । यत्किञ्चर्तुषु क्रियते च । यत्किञ्चर्त्तसत्याभ्यां जय्यꣳ सर्वꣳ हैवमेतज्जयतीत्या-

(१) १५ । २८ ॥ इमान्युदाहरणानि यथायोग्यानि ज्ञेयानि ॥

(२) शतपथस्योदाहरणम् ॥

दि ह्रस्वोदाहरणम् । दीर्घोदाहरणान्यथा (१) तथा ऋषीणाम् । तथार्षीणान्तथा मनुष्याणाम् । यथा ऋतुं प्राप्य । यथार्तुं प्राप्य । कथमस्वरइति किम् । यदि ऋतः । यदृतो भूरिति । चतुर्गृहीतमाज्यं गृहीत्वाऽऽहवनीये जुहुवथ । सवर्णे किम् । ऋतवः सँव्वत्सरो यजमानस्तमृतवो याजयन्ति । ब्राह्मणे किम् । (२) यत्रा सप्तऽऋषीन्परऽएकमाहुः ॥

वकारस्य पदान्तस्य स्वरमध्ये लोपः ॥ १२ ॥

स्वरयोर्मध्ये वर्त्तमानस्य पदान्तस्य वकारस्य ब्राह्मणे लोपः स्यात् । यथा (३) द्वौ इति । द्वा इति । कत्येव देवा याज्ञवल्क्येति द्वा इत्योमिति होवाच । त्रयस्त्रिंश्ठ० शोइति । इन्द्रश्चैव प्रजापतिस्त्रयस्त्रिंश्ठ० शाविति । वायो इह । नियुद्भिर्वायविह ता विमुञ्चेत्यादि । ब्राह्मणे किम् । मन्त्रे तु "नियुद्भिर्वायविह ता विमुञ्च ॥

शेषं सामान्यशास्त्रात् ॥ १३ ॥

---

(१) इदमपि तथैव ॥

(२) १७ । २४ ॥

(३) इमानि सर्वाण्युदाहरणानि शतपथब्राह्मणस्यैव सम्यक् ज्ञातव्यानीति ॥

अर्वाक्तु विशेषादन्यच्छेषम् । सामान्यशास्त्रादेदाङ्गत्वात्पाणिनीयव्याकरणशास्त्रात्सिद्धमवगन्तव्यमिति सूत्रार्थः ॥ तच्च द्विविधदृष्टत्वेत्यादि स्वयमूह्यम् ॥ इदानीं वर्णधर्मानाह ॥

अकारैकारौकारर्कारल्कारा अवर्णधारणाः ॥ १४ ॥

अवर्णस्य धारणा अवर्णधारणाः । अकारश्चैकारश्चौकारश्च ऋकारश्च लृकारश्चेति तथेति द्वन्द्वसमासः । अकारादयः पञ्चवर्णा अवर्णधारणा अष्टादशधा भिद्यन्ते इत्यर्थः । भेदास्तु । ह्रस्वदीर्घप्लुता इति पूर्वमकारस्य त्रयो भेदाः । ततस्तेषां ह्रस्वदीर्घप्लुतानामुदात्तानुदात्तस्वरिता इति प्रत्येकं च त्रयो भेदाः । एवं नव भेदाः । इति नवभेदभिन्नोऽकारः सानुनासिकनिरनुनासिकभेदेन द्विधा भिद्यते । इत्यकारस्याष्टादश भेदाः । तथा इकारोकारऋकारलृकाराणामपि भेदा ज्ञातव्या इति सूत्रार्थः । यथाऽऽपिशलिनोक्तम् । ऋवर्णलृवर्णयोर्दीर्घा भवन्तीति । तदिह न विद्यते । इत्यकारादिपञ्चग्रहणात् । एऐ ओऔ इति सन्ध्यक्षराणां ह्रस्वाभावाद्द्वादशैव भेदा भवन्तीति ज्ञापितम् । उक्तप्रसङ्गादन्यत्राप्यतिदिशति ॥

शतपथवत्ताण्डिभाल्लविनां ब्राह्म-
णस्वरः ॥ १५ ॥

शतपथेन स्वरतस्तुल्यं वर्त्तत इति शतपथवत् । "तेन तुल्यं क्रिया चेद्वतिः" रिति पाणिनीयसूत्रस्मरणात् । ताण्डिभाल्लविनः ताण्डिनश्च भाल्लविनश्चेति विग्रहः । तेषां शतपथब्राह्मणस्वरः स्यात् । अन्यत्राप्युक्तम् । द्वितीयप्रथमावेतौ ताण्डिभाल्लविनां स्वरौ ॥ तथा शतपथावेतौ स्वरौ वाजसनेयिनाम् । १ इति सामगशाखीयनारदशिक्षायाम् । प्रसङ्गात्सामस्वरमाह ॥

सप्त सामनाम ॥ १६ ॥

यद्वा चयने "नान्योऽध्वर्य्योर्गायेते"ति यजुर्वेदेऽपि सामगानं विहितम् । अतस्तल्लक्षणमुच्यते । इति नानुपपत्तिः । यत्तु प्रातिशाख्ये "सप्त" इति सूत्रेणेदं प्रपञ्चितत्वान्न वक्तव्यमिति । तदपि न । तत्र सामान्येनोद्दिष्टानामेषः प्रपञ्च इति न कोऽपि क्षुद्रोपद्रवः । साम्नां सप्तस्वरा इत्युक्तम् । के ते इत्याकाङ्क्षायामाह ॥

षड्जऋषभगान्धारमध्यमपञ्चम-

धैवतनिषादाः ॥ १७ ॥

षड्जऋषभश्चेत्यादिद्वन्द्वः समासः । प्रसङ्गात्तेषां स्थानान्याह ॥

तेषां योनयः ॥ १८ ॥

तेषां षड्जादिसप्तसामस्वराणां योनयः कारणभूतानि स्थानान्युच्यन्त इति सूत्रशेषः । विशिष्य तान्येवाह ॥

कण्ठात्षड्जः ॥ १९ ॥

कण्ठस्थानात्षड्जस्वरोऽभिव्यज्यते ॥

शिरसऽऋषभः ॥ २० ॥

शिरस्स्थानादृषभोऽभिव्यज्यते ॥

नासिकायां गान्धारः ॥ २१ ॥

नासिकास्थानाद्गान्धारोऽभिव्यज्यते ॥

उरसो मध्यमः ॥ २२ ॥

उरस्स्थानान्मध्यमोऽभिव्यज्यते ॥

धैवतो ललाटात् ॥ २३ ॥

ललाटस्थानाद्धैवतोऽभिव्यज्यते ॥

निषादः सर्व्वतइति ॥ २४ ॥

निषादः स्वरस्तु कण्ठादिसर्वस्थानादभिव्यज्यते । इतिशब्दः सामस्वरप्रकरणज्ञापनार्थः । प्रसङ्गात्तैत्तिरीयब्राह्मणस्वरमाह ॥

मन्त्रस्वरवद्ब्राह्मणस्वरश्चरकाणाम ॥ २५ ॥

चरकाणां ब्राह्मणस्वरो मन्त्रेण तुल्यो भवति । तेषामेव विशेषमाह ॥

तेषां खाण्डिकेयौखेयानां चातुस्वर्य्यमपि क्वचित् ॥ २६ ॥

तेषां चरकाणां मध्ये खांडिकेयौखेयानां ब्राह्मणे चत्वारः स्वरा उदात्तानुदात्तस्वरितप्रचिताख्या भवन्ति । क्वचिद्ग्रहणात्त्रैस्वर्य्यमपि । अत्र चत्वारः स्वराः समाहृता इति चातुस्स्वर्य्यमिति विग्रहः । तदन्यशाखिनां ब्राह्मणस्वरमाह ॥

ततोऽन्येषां ब्राह्मणस्वरः ॥ २७ ॥

अन्येषामुक्तव्यतिरिक्तशाखिनां आश्वलायनादीनां

तानो ब्राह्मणस्वरो भवति । तान एकश्रुतिरित्यर्थः ।
अथाङ्गोपाङ्गानां स्वरमाह ॥

तानऽएवाङ्गोपाङ्गानां तानऽएवाङ्गोपाङ्गानामिति ॥ २८ ॥

शिक्षा कल्पो व्याकरणं नैरुक्तं छन्दो ज्यौतिषमिति षडङ्गानि प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायस्तर्कइत्युपाङ्गानि । तेषामङ्गोपाङ्गानां तान एव स्वरो भवति । द्विरभ्यासः शास्त्रपरिसमाप्त्यर्थः । इतिशब्दः शास्त्रवेदिनामभ्युदयसूचनार्थः । तदेते श्लोका भवन्ति । उदात्तः स्वर्य्यते नीचो नीच उच्चस्वरो भवेत् । ब्राह्मणस्य स्वरो ह्येष ज्ञायते वेदपारगैः । १ ॥ ऋषिप्रोक्तयनुसारेण स्वरसञ्ज्ञां द्विजः पठेत् । स वेदफलमाप्नोति ह्यन्यथा नरकं व्रजेत् । २ । एवं तु ब्राह्मणं सम्यक्स्वरार्थं ज्ञानपूर्वकम् ॥ योऽधीते वेदवित्स स्यादन्यथा स्थाणुरुच्यते ॥ ३ ॥ अम्बा भागीरथी यस्य नागदेवात्मजः सुधीः ॥ तेनानन्तेन विहितं भाषिकं सूत्रमुत्तमम् ॥ ४ ॥ अनेन प्रीयतां देवो रमानाथः सदा मम ॥ ब्रह्मादिवन्दितपदो देवदेवशिखामणिः ॥ ५ ॥ वचनप्रसूनयाऽनन्ताख्येन सूरिणा रचिता ॥ भ्रियतां हृदये सदये कमलामहितेन पुरुषेण ॥ ६ ॥

इति कात्यायनकृतौ त्रिकण्डिकाभाषिकपरिशिष्टसूत्रे तृतीया कण्डिका समाप्ता ॥

इतिश्रीमत्प्रथमशाखिना नागभट्टात्मजेन श्रीमदनन्तभट्टेन विरचितं त्रिकण्डिकाभाषिकपरिशिष्टसूत्रभाष्यं समाप्तम् ॥

अथ जटाद्यष्टविकृतीनां लक्षणानि लिख्यन्ते । तत्र विकृतीनां पाठे फलं पङ्क्तिपावनत्वम् । जटादिविकृतीनां ये पारायणपरायणाः ॥ महात्मानो द्विजश्रेष्ठास्ते ज्ञेयाः पङ्क्तिपावनाः । १ । इत्यादित्यपुराणात् । अन्यान्यपि विष्णुलोकादिफलानि वाराहपुराणपाराशरस्मृत्यादिषु । तासां विकृतीनां नामानि प्रदर्श्यन्ते । जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ॥ अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥ २ ॥ क्रमः पूर्वो यासांताः आसां क्रमः प्रकृतिरित्यर्थः । तत्र प्रथमत्वाज्जटालक्षणमाह ॥

क्रम यथोक्त प्रब्रूयाद्व्युत्क्रमेण क्रमेण च ॥

सलक्षणं सर्वसन्धौ जटा सा प्रोच्यते बुधैः ॥ १ ॥

क्रमं यथोक्तं द्वित्रिचतुष्क्रमात्मकं पुनश्च तमेव वैपरीत्येन पुनश्च क्रमेण एवं त्रिवारं त्रिवारं सर्वसन्धिषु लक्षणयुक्तं पठेत्सा जटा तत्वज्ञैरुच्यते । उदाहरणं यथा (१) व्वायवस्त्थ स्त्थव्वायवो व्वायवस्त्थ ॥

स्वापूर्वांशं पदद्वन्द्वं स्वागर्भे त्रिचतुष्क्रमे ॥ पुनरुक्तमसन्देहार्थं जटात्व न चार्हति ॥ २ ॥

सु आ इति पदद्वयगर्भे त्रिक्रमे "मोषूणः" "सोमेनातनच्मि" इत्यादौ तथा चतुष्क्रमे "गोमदूषुणा सत्या" इत्यादौ सु आ पूर्वांशं पदद्वयं असन्देहार्थं द्विपदत्वभ्रमवारणाय "सुन" "आतनच्मि" इति पुनरुच्चारितं जटाभावं नार्हति । असन्देहार्थं इति हेतुगर्भं विशेषणम् । यथा (२) "उदुत्यम्" इत्यादौ द्विपदत्वभ्रमवारणाय "ॐ३इत्यूँ" इति मध्यस्थस्य वे-

---

(१) १ । १ । पदपाठे ज्ञातव्यमिदमुदाहरणम् ।

(२) ७ । ३८ ॥

ष्टनम् । तथा इदं न तु क्रमः । अतो न जटा कार्या । इति ॥

अथ जटायां कति सन्धय इति प्रदर्शनार्थं जटायां पठ्यमानान् क्रमान्नामतो निर्दिशति ॥

अनुक्रमश्चोत्क्रमश्च व्युत्क्रमोऽभि-
क्रमस्तथा ॥
सङ्क्रमश्चेति पञ्चैते जटायां क-
थिताः क्रमाः ॥ २ ॥

वायवस्स्थ । इत्यनुक्रमः, । स्थस्स्थ । इत्युत्क्रमः, । स्थ वायवः । इति व्युत्क्रमः, वायवो वायवः । इत्यभिक्रमः, । वायवस्स्थ । इति सङ्क्रमः । कस्मिन्क्रमे किं प्रमाणमित्याह ॥

न स्थितोपस्थिते ये स्युर्जटायां व्यु-
त्क्रमे न ते ॥

ये विधयः स्थितोपस्थिते न भवन्ति ते जटायां व्युत्क्रमे न पठनीयाः । उदाहरणं यथा (१) जास्प-

(१) ३३ । १० ॥

तृत्यꣳ सुयमꣳ सुयमं जाः पश्यं जास्पत्यꣳ सुयमम् । (१) व्वसवेऽहर्प्पतयेऽहः पतये व्वसवे व्वसवेऽहर्प्पतये । (२) इतन्नूषाहौ धूः सह्वावितमितन्नूषाहौ । (३) दार्व्वाघाटस्ते ते दार्व्वाघातो दार्व्वाघाटस्ते । (४) व्वायवो व्वनर्षदो व्वनसदो व्वायवो व्वायवो व्वनर्षदः । (५) ऋतस्पते त्वष्टुस्त्वष्टुऋतपतऽऋतस्पते त्वष्टुः । (६) उभेसुश्चन्द्र सुचन्द्रोभेऽउभे सुश्चन्द्र । (७) बृहतीन्दुदुचन्दुधुचन्बृहतीम्बृहतीन्दुधुचन् । (८) श्रेयस्कर भूयस्कर भूयःकर श्रेयस्कर श्रेयस्कर भूयस्कर । (९) आयुष्पाऽआयुरायुरायुः पाऽआयुष्पाऽआयुः । (१०) सिषासन्तो व्वनामहे व्वनामहे सिसासन्तः सिषासन्तो व्वनामहे । (११) श्व-

(१) ३ । २० ॥
(२) ४ । ३३ ॥
(३) २४ । ३५ ॥
(४) ३३ । १ ॥
(५) २७ । ३४ ॥
(६) १५ । ४३ ॥
(७) ३३ । २८ ॥
(८) २५ । २५ ॥
(९) २२ । १ ॥
(१०) २६ । १७ ॥
(११) ११ । ६२ ॥

ग्नेः ऽ पुरीषवाहणः पुरीषवाहणोऽग्नेरग्नेः ऽ पुरीषवाहणः । (१) एनमायुनगयुनगेनमेनमायुनक् । (२) मामहन्तामदितिरदितिर्म्मामहन्तामहन्तामदितिः (३) देवीऽ उषासाऽउषसौ देवी देवीऽउषासौ । (४) पर्ज्जन्यो वृष्टिमाँ २ ॥ ऽइव वृष्टिमानिव पर्ज्जन्यः पर्ज्जन्यो वृष्टिमाँ २ ॥ ऽइव । एतस्यापवादमाह ॥

वर्ज्जयित्वा व्विश्प्यतीव ॥

इदमुदाहरणं वर्ज्जयित्वा यत्र स्थितोपस्थिते अनुच्चार्य्यमाणेऽपि एकादेशो व्युत्क्रमे उच्चारणीयः । (५) व्विश्पतीव वीरिट्टे व्वीरिट्टे व्विश्पतीव विश्पतीव वीरिट्टे ॥

विशेषविषयान्विधीन् ॥ ४ ॥

वैकल्पिकान्व्याकरण ॥

प्रमाणं मध्यगतये ॥ सन्धौ ॥

उत्क्रमव्युत्क्रमाभिक्रमेषु सन्धिविषये व्याकरणे वै-

(१) २८ । १३ ॥

(२) ३३ । ३८ ॥

(३) २१ । ५० ॥

(४) ७ । २९ ॥ इमान्यासु विकृतिषु पदपाठस्योदाहरणानि बुधैर्बोध्यानीति ॥

(५) ३३ । ४० ॥

कल्पिकान् जिह्वामूलीयोपध्मादीन् प्रातिशाख्ये विशेषविषयान् "प्रकृत्या कखयोः पफयोश्चे" त्यादिविशेषविहितान् त्यक्त्वा अन्यत्र व्याकरणं प्रमाणं पूर्वोक्तेषु प्रातिशाख्यमेव । कामंधुक्षो धुक्षः कांक्षामंधुक्षः । च पुष्पिणीः पुष्पिणीश्च च पुष्पिणीः । अत्रोदाहरणद्वये जिह्वामूलीयोपध्मानीयौ न । सहस्रधारन्देवो देवः सहस्रधारꣳसहस्रधारन्देवः । अत्र "वा शरी"-त्यस्य वैकल्पिकत्वात्पक्षे सत्वं "अविकारꣳ शाकल्यः शषसेषु" इति विशेषविहितत्वान्न । स्यमहो महस्त्यस्त्य महः । अत्र "खर्परे शरि विसर्गस्य विसर्ग"इत्यस्य वैकल्पिकत्वात्पक्षे सत्वविसर्गौ "लुङ्मुदि जित्परे" इत्युक्तत्वान्न । चक्रे व्यायꣳव्यान्व्यायꣳस्ताँश्चक्रे चक्रे व्यायꣳस्तान् । "अत्रानुनासिकात्परोऽनुस्वार" इति पक्षेऽनुस्वारः । "अनुनासिकमुपधेत्युक्तत्वान्न । श्रौत्र्यनुष्टुबनुष्टुप्श्रौत्री श्रौत्र्यनुष्टुप् । अत्र "शश्छोटी"ति तवर्गो "त्परश्श्वासस्पर्शपरश्छम्" इति विशेषविधानान्न । सम्भियमाणः सम्भ्राट् सम्भ्राट्त् सम्भियमाणः सम्भियमाणः सम्भ्राट् । अत्र "डः सि धुट्" इति "ङ्नौ ताभ्याꣳ सकारे" इति विशेषविहितत्वान्न । उदुत्यन्त्युदुदुत्यम् । अत्र "मय उञो वो वा" इत्यस्य वैकल्पि-

कत्वात्पक्षे प्रकृतिभावः "उकारोऽपृक्तोऽस्पर्शात्" इत्युक्तत्वान्न । ऋतसदन्यृतसदनमृतसदनमृतसदन्यृतसदन्यृतसदनम् । अत्र "ऋत्यक" इति पाक्षिकः प्रकृतिभावो न । "कण्ठ्य ऋकारे ह्रस्वम्" इति विशेषविधानात् । अत एव । ऋताषाडृतधामाऽऋतधामाऽऋताषाडृताषाडृतधामा । अत्र पाक्षिको गुणो न । ऋग्यानालभते लभतऽअऽऋग्यानृग्यानालभते । अत्रार् इति न प्रातिशाख्यस्थत्वात् । "उपसर्गादृति धातौ" इत्यस्य तु धातुत्वाभावान्न प्राप्तः । पोषेण रायो रायः पोषेण पोषेण रायः । अत्र "रायः सहस्रपोषपुत्रयो": । इति न प्रातिशाख्यस्थत्वात् । यूपऽआप्यतऽआप्यते यूपो यूपऽआप्यते । ऊरू पादौ पादाऽऊरूऽऊरू पादौ । अत्र "लोपः शाकल्यस्य" त्यस्य वैकल्पिकत्वात्पक्षे श्रवणं प्राप्तं "यवयोः पदान्तयोः स्वरमध्ये लोप" इत्युक्तत्वान्न भवति । अस्मिन्योनौ योनावस्मिन्नस्मिन्योनौ । अत्र पूर्वोक्तेन वकारलोपः प्राप्तः । "न वकारस्याऽसस्थान एकेषाम्" । इति विहितत्वान्न भवति । छन्त्यर्वन्नर्वञ्छन्त्सि च्छन्त्यर्वन् । रुक्मोऽअन्तरन्ता रुक्मो रुक्मो ऽअन्तः । षोडशाक्षरेण षोडशं षोडशं० षोडशाक्षरेण षोडशाक्षरेण षोडश-

म् । इत्यादौ व्याकरणानुसृतत्वाच्च । "चक्षुयोः शम्" "रेफे लुप्यते दीर्घं चोपधा" "अनुस्वारꣳ रोष्मसु मकार" इत्यादि भवति । एवमन्यदप्यूह्यम् ॥

आद्यान्त्ययोः प्रातिशाख्यं मानम् ॥

अनुक्रमसङ्क्रमयोस्तु प्रातिशाख्यं प्रमाणम् । संहिताधर्मवत्वात् । उक्तान्युदाहरणानि । समेष्वपि प्रतिज्ञासूत्रगा धर्माः । सर्वेष्वपि पञ्चसु क्रमेषु जकारादिपठनरूपा धर्माज्ञेयाः । प्रतिज्ञासूत्रगा इत्युपलक्षणं शिक्षाख्यधर्माणामपि । उक्तान्येवोदाहरणानि (१) ॥

---

(१) "क्रमः स्मृतिप्रयोजनः" इत्युक्तं तत्र स्मरणं पदसन्धिस्वरसन्ध्यादिना दृढं जातं इति व्याडिराचार्यः क्रमप्रकृतिका अष्टौ विकृतीराह जटामालेति पद्येन तत्राद्या जटाविकृतिस्तल्लक्षणमाह । ब्रूयात्क्रमविपर्यासं क्रममीदृग्विनिर्दिशेत् । जटाख्यां विकृतिं धीमान् विज्ञाय क्रमलक्षणम् । स्पष्टार्थः । क्रमविपर्यासक्रममित्यस्यैवप्रपञ्चं विवक्षुः पूर्वोक्तमर्थमनूद्य धर्मविशेषमाह । अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् ॥ विलोमे पदवत्सन्धिरनुलोमे यथा क्रमम् । अनुलोमे आद्यन्तक्रमयोः पाठे यथा क्रमं प्रातिशाख्योक्तलक्षणविशिष्टक्रमकालीनसन्ध्यनतिक्रमेण सन्धिर्ज्ञातव्यः । विलोमेऽनुपदवत् पदेन तुल्यम् । पदपाठे यथा पदानि वर्त्तन्ते तादृशपदानामेव सन्धिः कर्त्तव्येति । हयग्रीवोऽप्यमुमर्थमाह । यथा । क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ॥ अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेवं हि जटाभिधीयते ॥ १ ॥ क्रमे यथोक्ते "द्वे द्वे पदे सन्दधात्युत्तरेणोत्तरमावसानादपृक्तवर्ज्जं" मित्यादिनोक्ते पदजातं पदद्वयं वा पदत्रयं वा द्विरभ्यसेत् द्विवारं पठेदुत्तरं पदं पूर्वं च ततः प्रथमं द्विरभ्यस्य उत्तरेऽवसेत् । अभिक्रमे क्रमशास्त्रं प्रधानं स्याद्व्युत्क्रमे व्याकरणं प्रमाणम् । उक्तः क्रमे व्युत्क्रमणे विशेषः स्वराः प्रकारद्वितयेऽप्यभिन्नाः । निगदव्याख्यानम् । पूर्वेण "स्वरसंस्कारयोश्छन्दसि नियम" इति संस्कारादिना नानारूपतायां विलोमपाठे विशेषमाह । षत्वं

सर्वस्वरेषु तु ॥ ५ ॥

सर्वेषु स्वरविषयेषु तु पुनः प्रातिशाख्यमेव प्रमाणं तद्विचारस्तु स्वरप्रकरणे उक्तः । यान्युदाहरणानि संहितायां न दृश्यन्ते तानि प्रदर्श्यन्ते । अञ्जानाऽ अभ्यभ्यञ्जानाऽ अञ्जानाऽ अभि । विस्वः स्वर्विविस्वः । युञ्जोऽभ्यभि यञ्जो युञ्जोऽभि । तेऽप्सरसामप्सर-

णत्वं च दीर्घत्वं क्रमसन्धौ यदुच्यते । व्युत्क्रमे तत्र कर्त्तव्यं स्वरं क्षैप्रादिकं भवेत् । क्रमसन्धौ अनुलोमपाठे षत्वं "भाविभ्यः सषठे० समानपदे" इति । णत्वम् । "ऋषरेभ्यो नकारो णकारऽठे० समानपदे" इत्युक्तम् । तथा दीर्घत्वं "दीर्घमि"त्यधिकृत्य "अश्वरश्मिसुमती"त्यादिसूत्रसन्दर्भेण विहितं विलोमपाठे तत्र कर्त्तव्यम् । पदस्वरूपं व्याकरणोक्तविधिना पठेदित्यर्थः । एवं चकारात् लोपागमविकारप्रकृतिभावाअपि विलोमपाठे न भवन्ति तुल्याधिकारात् । "अनितावध्याये" इत्यस्यापवादः । उदाहरणं तु प्रातिशाख्योक्तं ज्ञेयम् । स्वरं क्षैप्रादिकं भवेदिति । स्वरसन्ध्यादि "उदात्तवानुदात्तः" । "स्वरितवान्त्स्वरितः" इत्यादिक्षैप्रादिषु "युवर्णौ यवौ क्षैप्रः" इत्यादि । अनुलोमवत्प्रतिलोमेऽपि भवति यथा त्र्यम्बकं॑य्यजामहे यजामहे त्र्यम्बकन्त्र्यम्बकं॑य्यजामहे । इत्याद्युदाहरणानि सर्वत्रैव बोध्यानीति ॥ अवसानेऽर्द्धर्चे च ऋक्षु यजुष्षु वा स्थितोपस्थितं कर्त्तव्यम् । वेष्टनापरपर्यायेण भवतीत्यर्थः । त्रिक्रमे चतुष्क्रमे च जटापाठे हयग्रीवो विशेषमाह "त्रिभिः पदैः स्यादुत्क्रमणं यत्र तत्र मध्यं त्वनभ्यस्य च पूर्वमभ्यसेत् । अर्थाच्च मध्यस्य भवेद्द्विरुक्तिता सन्देहदं त्विङ्गनेन प्रदर्शयेत् । अस्यार्थः । यत्र त्रिभिः पदैः क्रमणं स्यात्तत्रान्त्यपदं द्विरुक्त्वा पश्चान्मध्यपदं त्वनभ्यस्य सकृदेव चोक्त्वा आद्यं अभ्यसेत् । द्विर्ब्रूयात् तत्र पदत्रयं गृहीत्वा अनभ्यस्य अभ्यासरहितस्य मध्यस्य तत्सन्धानद्वारा पूर्वमभ्यस्य क्रमवदन्तेऽवसानं कुर्यात् । उत्क्रमणम् व्युत्क्रमणतो मध्यस्य द्विरुक्तिता भवेत् । अन्ते पदेऽवसाय ततः सन्देहदं सन्दिग्धं मध्यमपदं निश्चयेन इङ्गनेन पृथक्कालेन प्रदर्शयेत् पदस्वरूपं प्रकटीकुर्यात् यथा । कर्म्मणऽ आप्यायद्ध्वमप्यायद्ध्वमा कर्म्मणे कर्म्मणऽआप्यायद्ध्वम् ॥

सान्ते तेऽप्सरसाम् । अभीन्वतामीन्वतामभ्यभीन्वताम् । इत्यादिप्रकारेण बोध्यम् । प्रातिशाख्येऽनुक्तत्वाद्व्याकरणस्थान्विधीन्दर्शयति ॥

सवर्णेऽपृक्त उः स्पर्शात्स्वरे यातिवतामिह ॥

जटायां सवर्णे स्वरे परे स्पर्शात्परः उ इति शब्दो वकारभावं याति । यथा उदुत्यन्त्यम्बुदुदुत्यम् । अत्र "मय उञो वो वे"ति वकारो भवति । (१) ॥

---

(१) त्रिचतुष्कमपञ्चक्रमादौ जटाप्रकारं हयग्रीवोऽप्याह । चतुष्कमे त्रिक्रमे च तथा पञ्चक्रमेऽपि च ॥ आद्यन्ताभ्यां त्रिवृन्मध्यं ब्रूयात्क्रमविपर्ययैरित्यस्य स्पष्टार्थः ॥ उकारस्योदाहरणं यथा "उदुत्यत्यम्बुदुदुत्यम् । इत्यादि चतुष्कमेऽपि यथा ऊर्द्ध्वऽऊषुणो नःसूऽऊर्द्ध्वऽऊर्द्ध्वऽऊषुणं ÷ । पंचपदक्रमजटोदाहरणं त्वृग्वेदिनां भवति न वाजसनेयिशाखिनाम् । अथ गलत्पदे विशेषमाह व्याडिर्भगवान् । समयादौ क्रमे यद्वत्तस्मयात्परतस्तथा ॥ जटायां समयादिस्थं शुद्धेन परिवर्त्तयेत् । अस्यार्थः । समयशब्दो गलत्पदवाचकोऽध्येतृप्रसिद्धः । गलत्पदादौ क्रमाध्ययने यद्वद्येन प्रकारेण "यथा समाम्नातं क्रमावसानर्ठ० सङ्क्रमेण्वि"त्यादिना विधानं अङ्गीक्रियते जटायामपि तादृगेवाङ्गी कर्त्तव्यम् । समयादुदाहरणम् । सा विश्वायुर्विश्वायुःसा सा विश्वायु ÷ । समयात्परतस्योदाहरणं यथा विश्वायुर्विश्वकर्म्मा विश्वकर्म्मा विश्वायुर्विश्वायुर्विश्वकर्म्मा । मध्यपदस्य विशेषमाह स एव । समयक्रमणं नास्ति समयाद्द्विक्रमं विना ॥ त्रिक्रमं समयादिस्थमादिना संहितां पठेत् ॥ समयस्य गलत्पदस्य क्रमणं पुनः पुनरुत्तरोत्तरपदसन्धानं शुद्धक्रमवन्नास्ति समयादिपदं वर्जयित्वा ततः समयादौ यदि क्रमो भवति तं त्रिक्रमव्युत्क्रमसङ्क्रमैरित्यादिपदेन सह त्रिवारं पठेदित्यर्थः । दूरऽउऽअ-

स एव सन्धिनान्यैक्यमापन्नोऽपि प्रगृह्यकः ॥ ६ ॥

सन्धिविधायकेन शास्त्रेण अन्येन सहैक्यमापन्नोऽपि उ इतिशब्दः प्रगृह्यः । यथा ऊर्ध्वऽऊषुणो नः स्व ऊर्ध्वऽऊर्ध्वऽऊषुणः । उदुत्वात्वोउदुदुत्वा । अत्र उका-

न्तिकेऽन्तिकऽउदूरे दूरऽउऽअन्तिके । इत्यादि ज्ञेयम् । स्वरे यातिवतामिहेत्यत्र वतामिति षष्ठ्यन्तो न बोध्यः । किन्तु वकारस्य भावो वता इति भावार्थस्ता प्रत्ययः । तां वकारतां याति प्राप्नोतीत्यर्थः १ । अथ विलोमशेषजटायां कथं सन्धिः कार्यइत्याह । व्युत्क्रमे पदवत्सन्धिः स्वरक्षैप्रादिरिष्यते ॥ ढकारादिविधानं तत्स्वरान्तः परिवर्त्तनम् । अस्यार्थः । विलोमक्रमसन्धौ अनुलोमपदपाठवत्सन्धयः क्षैप्रादिस्वराश्च भवन्ति तल्लक्षणानि तु प्रथमाध्याये जात्याभिनिहितक्षैप्रप्रश्लिष्टतैरोव्यञ्जनतैरोविरामपादवृत्तानां स्वराणामुक्तानि । तद्वज्जटादिविकृतिष्वपि । आद्येषु चतुर्षु स्वरितेषु ऋग्वेदिनामेव भवति अन्येषान्तु स्वरमात्रमेव तेषामुदाहरणानि पूर्वोक्तवज्ज्ञातव्यानि । तथा डढयोः स्थाने ळळ्हौ समानपदे "डढौळळ्हावेकेषा"मित्यनेन सूत्रेण परिवर्त्तनपाठो जटायामनुलोमविलोमे च संहितावत्काण्वाः पठन्ति न तु माध्यन्दिनाः कुतो वाजसनेयिनां "तस्मिँल्लळ्हे"स्याष्टमाध्यायस्थसूत्रेण निषेधात् । अथ विलोमे प्रगृह्यं यत्पदं तन्निमित्तः प्रकृतिभावश्च केषामस्ति केषान्नास्तीति विशेषमाह । त्र्यक्षरान्तं प्रगृह्याणामुकारामन्त्रितस्य च ॥ विलोमे पदसन्धौ तु प्रगृह्यत्वं न विद्यते ॥ विलोमे यथावस्थितएव पाठः । विलोमे पदवत्सन्धिरित्यस्यापवादभूतं यथा "इदूदेद्द्विवचनं प्रगृह्य"मित्यनेन वेष्टने एव प्रगृह्यसञ्ज्ञायां प्रकृतिभावनियमो नान्यत्रेति कात्यायनोक्तमेवार्थं वदति । ढकारस्य तु स्पर्शात्परस्य न द्रष्टव्यः । उदाहरणानि पूर्वोक्तानि बोध्यानीति, यद्वा क्रमपाठोपविषयो नोक्तस्तद्विधिश्च दौर्मित्राचार्योक्तनिषेधोऽपि ऋग्वेदीयेशैनकोक्तत्वात् । सङ्क्रमं व्युत्क्रमवद्ब्रूयादिति गार्ग्यवचनं तदापस्तम्बादिविषयम् । ननु जटाद्यष्टविकृतीनां लक्षणानि प्रातिशाख्ये न प्रोक्तानि महर्षिणा कात्यायनेन तदप्रमाणमिति, उच्यते "कळ्हृप्तं आ स्वगृह्योक्तं यस्य कर्म प्र-

रस्य ओकारस्य च "अन्तादिवच्च"त्यनेन परादिवत्वादेकाजनिपातत्वेन "निपातएकाजनाङ्" इति प्रगृह्यत्वम् (१) ॥

ओकारान्तनिपातानां व्युत्क्रमेऽस्ति प्रगृह्यता ॥

यथा उपो ते तऽउपो ऽउपो ते । अथो ये येऽथोऽअथो ये । "ओत्" इत्यनेन प्रगृह्यत्वम् । "ओकारस्य" इत्यनेन विहितप्रगृह्यत्वनिमित्तप्रकृतिभावस्तु इतौ प्रकृतिभावविधानादन्यत्र न । अत एव विष्णावेते इत्यत्र अवादेशः । अथोऽअन्नस्येत्यादौ तु "प्रकृतिभावश्च" इत्यनेन प्रकृतिभावत्वम् ॥

सपूर्व्वाकारओङ्कारः प्रयात्योम्भावमत्र हि ॥ ७ ॥

पूर्वेण अकारेण सहितः ओं शब्दो जटायां ओ-

कीर्तितम् ॥ तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्" इति क्रमपर्यन्तलक्षणोक्तमेवाध्ययनमस्ति न जटादिविकृतीनामतआह आलस्येन कात्यायनेनानुक्तत्वात् । कात्यायनसमानकालीनमहर्षिणा व्याडिना सामान्येनेतिहासमुखेन च प्रतिपादनादविरोधाच्चेति शम् ३ ॥

इति पाठकोपाव्हयुगलकिशोरव्याससङ्कलितप्रातिशाख्यकीर्तिप्रकाशटिप्पण्यां जटाद्यष्टविकृतिशास्त्रार्थः समाप्तः । संवत् १९४४ कार्तिकशुक्लपूर्णिमायाम् ॥

ऋभावं प्रयाति । यथा ओम्प्रप्रोमोम्प्र । अत्र "ओमाङोश्च" इत्यनेन पररूपत्वम् ॥

अयमेव हि शास्त्रार्थः सर्वासु विकृतिष्वपि ॥

जटोक्त एव शास्त्रार्थो मालादिसप्तसु विकृतिषु बोध्यः ॥

माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा ॥
आवर्त्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसङ्क्रमाः ॥ ८ ॥

अस्यार्थः । यथा पुष्पाणां माला ग्रन्थिनी परस्परसम्बद्धकारिणी तथा पदानां परस्परसम्बद्धकारिणी या विकृतिः सा मालेत्युच्यते । तस्याः पठनप्रकारमाह । तस्यां मालायां जटोक्तपञ्चक्रममध्ये त्रयः क्रमव्युत्क्रमसङ्क्रमा आवर्त्तन्ते पदावृत्त्या पठ्यन्ते । यथा । सुसमिद्धाय शोचिषे । शोचिषे सुसमिद्धाय । सुसमिद्धाय शोचिषे । सुसमिद्धायेति सु । समिद्धाय । शोचिषे घृतम् । घृतꣳ शोचिषे । शोचिषे घृतम् । घृतं

तीव्रम् । तीव्रङ्घृतम् । घृतन्तीव्रम् । तीव्रं जुहोतन । जुहोतन तीव्रम् । तीव्रञ्जुहोतन । जुहोतनेति जुहोतन ॥ अग्नये जातवेदसे । जातवेदसेऽग्नये । अग्नये जातवेदसे । जातवेदसऽ इति जात । वेदसे ॥ अथ क्रममालालक्षणमाह ॥

ब्रूयात्क्रमविपर्यासावर्द्धर्चस्यादितोऽन्ततः॥ अन्तं चादिन्नयेदेवं क्रममालेति गीयते ॥ ९ ॥

अस्यार्थः । अर्द्धर्चस्य आदितः क्रमं अन्ततः विपर्यासं क्रमेण पठेत् । अनेन प्रकारेण क्रमं अन्तं नयेद्विपर्यासं आदिं प्रापयेत्सा क्रममालेति ऋषिभिरुच्यते । यथा । त्रिꣳशद्धाम । धीयतऽइति धीयते । धामवि । धीयते पतङ्गाय । वि राजति । पतङ्गाय वाक् । राजति वाक् । वाग्राजति । वाक्पतङ्गाय । राजति वि । पतङ्गाय धीयते । विधाम । धीयतऽइति धीयते । धाम त्रिꣳशत् ॥ प्रति वस्तोः । द्युभिरिति द्यु । भिः । वस्तोरह । द्युभिरह । अह द्युभिः । अह वस्तोः । द्युभिरिति द्यु । भिः । वस्तोः ॥ अथ शिखालक्षणमाह ॥

पदोत्तरां जटामेव शिखामार्य्याः प्रचक्षते ॥

अस्यार्थः । पूर्वोक्तां जटामेव अन्ते एकपदाधिकां शिखां विकृतिं बुद्धिमन्त आहुः । यथा । अन्तश्चरति चरत्यन्तरन्तश्चरति रोचना । अन्तरित्यन्तः । चरति रोचना रोचना चरति चरति रोचनास्य । अस्य प्राणात्प्राणादस्यास्य प्राणादपानती । प्राणादपानत्यपानती प्राणात्प्राणादपानती । अपानतीत्यप । अनती ॥ व्यख्यन्महिषः । अख्यन्महिषो महिषोऽख्यदख्यन्महिषो दिवम् । महिषो दिवन्दिवम्महिषो महिषो दिवम् । दिवमिति दिवम् ॥ अथ रेखालक्षणमाह ॥

क्रमाद्द्वित्रिचतुःपञ्चपदक्रममुदाहरेत् ॥
पृथक्पृथग्विपर्य्यस्य रेखामाहुः पुनः क्रमात् ॥ १० ॥

अस्यार्थः । क्रमेण द्विपदत्रिपदचतुष्पदपञ्चपदक्रमानुक्त्वा प्रतिक्रमे पृथक् पृथक् विपर्यासेन पठित्वा पुनः क्रमं पठेत् । तां विकृतिं रेखामाहुः । यथा । म-

धु नक्तम् । नक्तम्मधु । मधु नक्तम् । नक्तमुतोषसः । उषसऽउत नक्तम् । नक्तमुत । उतोषसः । उषसो मधुमत्पार्थिवꣳ रजः । रजः पार्थिवम्मधुमदुषसः । उषसो मधुमत् । मधुमत्पार्थिवम् । मधुमदिति मधु । मत् । पार्थिवꣳ रजः । रजऽइति रजः ॥ मधु द्यौरस्तु नः पिता । पिता नोऽस्तु द्यौर्मधु । मधुद्यौः । द्यौरस्तु । अस्तु नः । नः पिता । पितेति पिता । अथ ध्वजलक्षणमाह ।

ब्रूयादादेः क्रमं सम्यगन्तादुच्चारयेदिति ॥ वर्गे वा ऋचि वा यस्य पठनं स ध्वजः स्मृतः ॥ ११ ॥

अस्यार्थः । वर्गे ऋचि वा आदेः क्रमं अन्तपर्य्यन्तं ब्रूयात् । अन्तात्सम्यग्यथोक्तं क्रममेव उच्चारयेत् आदिपर्य्यन्तं पठेत् । एवं यस्य पठनं स ध्वजः ध्वजाख्यविकृतिर्बोध्या । यथा । विष्णोः कर्माणि । सखेति सखा । कर्माणि पश्यत । युज्यः सखा । पश्यत यतः । इन्द्रस्य युज्यः । यतो व्रतानि । पस्पशऽइति पस्पशे । व्रतानि पस्पशे । व्रतानि पस्पशे । यतो व्रतानि । पस्पशऽइति पस्पशे । व्रतानि पस्पशे । व्रतानि प-

स्पशे । यतो व्रतानि । पस्पशऽइति पस्पशे । पश्यत यतः । इन्द्रस्य युज्यः । कर्माणि पश्यत । युज्यः सखा । विष्णोः कर्माणि । सखेति सखा ॥ अथ क्रमदण्डलक्षणमाह ॥

क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम् ॥ आऽर्द्धर्चादेवमुक्तोऽयं क्रमदण्डोऽभिधीयते ॥ १२ ॥

क्रममनुलोममुक्त्वा विपर्य्यस्य विलोममुक्त्वा पुनः क्रमं पठित्वा चकारादनुलोमविलोमैः अर्द्धर्चसमाप्तिपर्य्यन्तं ब्रूयात् । द्वितीयार्द्धर्चादेवमेवोक्त्वाऽनुलोमविलोमैरर्द्धर्चान्तम्पठित्वा एवं क्रमदण्डइत्युच्यते । स यथा । यज्ञा नः । नो यज्ञ । यज्ञा नः । नो मित्रावरुणा । मित्रावरुणा नो यज्ञ । यज्ञा नः । नो मित्रावरुणा । मित्रावरुणा यज्ञ । यज्ञ मित्रावरुणा नो यज्ञ । यज्ञा नः । नो मित्रावरुणा । मित्रावरुणा यज्ञ । यज्ञा देवान् । देवान्यज्ञ मित्रावरुणा नो यज्ञ । यज्ञा नः । नो मित्रावरुणा । मित्रावरुणा यज्ञ । यज्ञा देवान् । देवाँ २॥ ऽऋतम् । ऋतन्देवान्यज्ञ मित्रावरुणा नो यज्ञ । यज्ञा नः । नो मित्रावरुणा । मित्रावरुणा यज्ञ । यज्ञा देवान् । दे-

वाँ २॥ ऽऋतम् । ऋतम्बृहत् । बृहद्दत्तं देवान्यक्ष मित्रावरुणा नो यज्ञं । यज्ञान् । नो मित्रावरुणा । मित्रावरुणा यज्ञं । यज्ञं देवान् । देवाँ २॥ ऽऋतम् । ऋतम्बृहत् । बृहदिति बृहत् ॥ अग्ने यक्षि । यक्ष्यग्ने । अग्ने यक्षि । यक्षि स्वम् । स्वँय्यक्ष्यग्ने । अग्ने यक्षि । यक्षि स्वम् । स्वन्दमम् । दमᳪ स्वँय्यक्ष्यग्ने । अग्ने यक्षि । यक्षि स्वम् । स्वन्दमम् । दममिति दमम् ॥ अथ रथलक्षणमाह ॥

पादशोऽर्द्धर्चशो वाऽपि सहोक्त्या दण्डवद्रथः ॥

पादे पादे अर्द्धर्चे वा क्रमविपर्यासौ दण्डवत्सह उक्तौ चेत्स विकृतिविशेषो रथइत्युच्यते । यथा । समिधाग्निम् । समिधेति सम् । इधा । अग्निᳪ समिधा । इतैर्बोधयत् । बोधयत इतैः । समिधाऽग्निम् । समिधेति सम् । इधा । अग्निन्दुवस्यत । दुवस्यताग्निᳪ समिधा । इतैर्बोधयत । बोधयतातिथिम् । अतिथिम्बोधयत इतैः । समिधाग्निम् । समिधेति सम् । इधा । अग्निन्दुवस्यत । दुवस्यत इतैः । इतैर्बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथि-

म् ॥ इति पादानुसारतः ॥ अर्द्धर्चानुसारतो लिख्यते ॥ ऋधगित्था । इत्थऽऋधक् । यो नूनम् । नूनंयः । ऋधगित्था । इत्थासः । सऽइत्थऽऋधक् । यो नूनम् । नूनं मित्रावरुणौ । मित्रावरुणौ नूनंयः । ऋधगित्था । इत्थासः । समर्त्यः । मर्त्यः शशमे । शशमे देवतातये । देवतातये शशमे मर्त्यः सऽइत्थऽऋधक् । यो नूनम् । नूनं मित्रावरुणौ । मित्रावरुणावभिष्टये । अभिष्टयऽआचक्रे । आचक्रे हव्यदातये । हव्यदातयऽआचक्रेऽभिष्टये मित्रावरुणौ नूनंयः । ऋधगित्था । इत्थासः । समर्त्यः । मर्त्यः शशमे । शशमे देवतातये । देवतातयऽइति देव । तातये ॥ यो नूनम् । नूनं मित्रावरुणौ । मित्रावरुणावभिष्टये । अभिष्टयऽआचक्रे । आचक्रे हव्यदातये । आचक्रऽइत्या । चक्रे । हव्यदातयऽइति हव्य । दातये ॥ उभयोः पादार्द्धर्चयोरपि द्वितीयः प्रकारः कथ्यते ॥ मित्रꣳ हुवे । वरुणं च । हुवे मित्रम् । च वरुणम् । मित्रꣳ हुवे । हुवे पूतदक्षम् । वरुणं च । च रिशादसम् । पूतदक्षꣳ हुवे मित्रम् । रिशादसञ्च वरुणम् । मित्रꣳ हुवे । हुवे पूतदक्षम् । पूतदक्षँ वरुणम् । पूतदक्ष-

मिति पूत । दक्षम् । व्वरुणञ्च । च रिशादसम् । रिशादसमिति रिशा । दसम् । इत्येकः प्रकारः । अथ द्वितीयः प्रकारः । मित्रो व्वरुणः । इन्द्रो बृहस्पतिः । व्वरुणो मित्रः । बृहस्पतिरिन्द्रः । मित्रो व्वरुणः । व्वरुणो भवतु । इन्द्रो बृहस्पतिः । बृहस्पतिर्व्विष्णुः । भवतु व्वरुणो मित्रः । व्विष्णुर्बृहस्पतिरिन्द्रः । मित्रो व्वरुणः । व्वरुणो भवतु । भवत्वर्य्यमा । इन्द्रो बृहस्पतिः । बृहस्पतिर्व्विष्णुः । व्विष्णुरुरुक्रमः । अर्य्यमा भवतु व्वरुणो मित्रः । उरुक्रमो व्विष्णुर्बृहस्पतिरिन्द्रः । मित्रो व्वरुणः । व्वरुणो भवतु । भवत्वर्य्यमा । अर्य्यमेत्यर्य्यमा ॥ इन्द्रो बृहस्पतिः । बृहस्पतिर्व्विष्णुः । व्विष्णुरुरुक्रमः । उरुक्रमऽइत्युरु । क्रमः ॥ उभयोरपि तृतीयः प्रकारः । अन्तश्चरति । चरत्यन्तः । अन्तश्चरति । अस्य प्राणात् । प्राणादस्य । अस्य प्राणात् । चरति रोचना । रोचना चरत्यन्तः । अन्तश्चरति । अन्तश्चरति । अन्तरित्यन्तः । चरति- रोचना । प्राणादपानती । अपानती प्राणादस्य । रोचनास्य । अस्य प्राणादपानती । अपानतीत्यप । अनती । इत्येकः । अथ द्वितीयः । धानावन्तं करम्भि-

णम् । करम्भिणन्धानावन्तम् । धानावन्तं करम्भिणम् । इन्द्र प्रातः । प्रातरिन्द्र । इन्द्र प्रातः । करम्भिणमपूपवन्तम् । अपूपवन्तं करम्भिणं धानावन्तम् । धानावन्तं करम्भिणम् । करम्भिणमपूपवन्तम् । प्रातर्जुषस्व । जुषस्व प्रातरिन्द्र । इन्द्र प्रातः । प्रातर्जुषस्व । अपूपवन्तमुक्थिनम् । उक्थिनमपूपवन्तं करम्भिणं धानावन्तम् । धानावन्तं करम्भिणम् । धानावन्तमिति धाना । वन्तम् । करम्भिणमपूपवन्तम् । अपूपवन्तमुक्थिनम् । अपूपवन्तमित्यपूप । वन्तम् । उक्थिनमित्युक्थिनम् । जुषस्व नः । नो जुषस्व प्रातरिन्द्र । इन्द्र प्रातः । प्रातर्जुषस्व । जुषस्व नः । नऽइति नः ॥ अथ द्विविधघनलक्षणमाह ॥

अन्तात्क्रमं पठेत्पूर्वमादिपर्य्यन्तमानयेत् ॥ आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥ १४ ॥

यथोक्तं क्रममेव अन्तमारभ्य आदिपर्यन्तं पूर्वं पठेत् । तत आदिमारभ्य अन्तपर्य्यन्तं क्रमं पठेत् पण्डितास्तं घनमाहुः ॥ यथा अतिथिमित्यतिथिम् । बोधयताति-

थिम् । घृतैर्बोधयत । दुवस्यत घृतैः । अग्निन्दुवस्यत । समिधाग्निम् । समिधेति सम् । इधा । अग्निन्दुवस्यत । दुवस्यत घृतैः । घृतैर्बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथिम् । जुहोतनेति जुहोतन । हव्या जुहोतन । आस्मिन्हव्या । आस्मिन् । अस्मिन्हव्या । हव्या जुहोतन । जुहोतनेति जुहोतन । इति प्रथमः प्रकारः । अथ लोकप्रसिद्धद्वितीयघनलक्षणमाह ॥

शिखामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत् ॥ अयं घन इति प्रोक्तऽइत्यष्टौ विकृतीः पठेत् ॥ २५ ॥

अस्यार्थः । शिखां पूर्वोक्तामुच्चार्य्य विपर्य्यासेन तानि पदान्युच्चार्य्य पुनः क्रमेण तानि पदान्युच्चारयेत् । अयं विकृतिविशेषो घनइति प्रोक्तो महर्षिभिर्व्याडिभिरिति । उदाहरणं यथा । दस्रा युवाकवो युवाकवो दस्रा दस्रा युवाकवः सुताः सुता युवाकवो दस्रा दस्रा युवाकवः सुताः । युवाकवः सुताः सुता युवाकवो युवाकवः सुता नासत्या नासत्या सुता यु-

वाक्वो युवाक्व॒: सुता नासत्या । सुता नासत्या नासत्या सुता:॒ सुता नासत्या इक्तबर्हिषो इक्तबर्हिषो नासत्या सुता:॒ सुता नासत्या इक्तबर्हिष॒:। नासत्या इक्तबर्हिषो इक्तबर्हिषो नासत्या नासत्या इक्तबर्हिष॒:। इक्तबर्हिषऽइति इक्त। बर्हिष॒:॥ आयातँय्यातमायातꣳ रुद्द्रवर्त्तनी रुद्द्रवर्त्तनी यातमायातꣳ रुद्द्रवर्त्तनी। यातꣳ रुद्द्रवर्त्तनी रुद्द्रवर्त्तनी यातँय्यातꣳ रुद्द्रवर्त्तनी॥ रुद्द्रवर्त्तनीऽ इति रुद्द्र वर्त्तनी॥ एवं प्रकारेणाष्टौ विकृती: पठेत्॥ वेदवेदाङ्कन्दुवर्षे मार्गे मास्यसिते दले॥ पञ्चम्यां रविवारे तु गुरुभे कर्कचन्द्रके॥ १॥ विश्वम्भरस्यानुजेन सुतेन सुधिया मुदे॥ युगलप्राक्किशोरेण पाठकेन कृता सताम्॥ २॥ टिप्पणी प्रातिशाख्यस्य सम्यक्कीर्त्तिप्रकाशिका॥ तां मुद्रयित्वा प्रथिता लोके लौहाक्षरै: शुभै:॥३॥ कात्यायनकृतं सूत्रं प्रतिज्ञानामकं शुभम्॥ अनन्तदेवरचितं सद्भाष्येणैव सँय्युतम्॥ ४॥ भाषिकं परिशिष्टं च तत्कृतं भाष्ययुक्तथा॥ शतपथब्राह्मणस्य स्वरादिज्ञानकारणम्॥ ५॥ जटादिविकृतीनां तु सम्यज्ज्ञानँय्यथाऽऽप्यते॥ महर्षिणा व्याडिना यज्जटापटलसञ्ज्ञकम्॥ ६॥ तज्ज्ञात्वं समनुज्ञाय हयग्रीवेण भाषितम्॥ दौर्मिञ्चिणा गौतमेन रामेणापि सु

भाषितम् ॥ ७ ॥

॥ श्रीगणेशमहम्भजे ॥

अथ कात्यायनमहर्षिप्रणीतमृग्यजुःपरिशिष्टन्नवमं प्रातिशाख्योपयुक्तं शिष्याणां परिज्ञानार्थं च ऋग्यजुर्लक्षणविशिष्टमारभ्यते ॥

अथादित्ये यजुर्वेदे भेदे माध्यन्दिनीयके(१) ॥ वक्ष्याम्यृग्यजुषां सम्यग्विभागं तु यथाश्रुतम् ॥ १ ॥ ऋगादेशे यजुर्ज्ञेयमनादेशे तु केवलम् ॥ ऋतौ यजुरुद्धारे (२) ग्रोषा विद्याहचः कविः ॥ २ ॥ उपयामः स-

(१) अथ शिक्षां प्रवक्ष्यामि वासिष्ठस्य मतं यथा । इति पद्यं क्वचित्पुस्तके लिखितं तदसमीचीनं कुतः शिक्षालक्षणधर्मरहितत्वात् । शिक्षालक्षणं तु महर्षिणा कात्यायनेन प्रसवोत्थानपरिशिष्टे सप्तदशाख्येऽभिहितम् । तद्यथा स्वरसंस्कारलघ्वनुनासिकानुस्वारविसर्जनीयदन्त्यमूर्द्धन्यतालुकण्ठ्योष्ठ्ययमोपध्मानीयजिह्वामूलीयानां यज्ञस्वरसंस्कारोच्चारणार्था शिक्षेति ॥ अथेति । अथशब्दो मङ्गलार्थः । पार्षदपरिशिष्टानन्तरमेतस्य कथनमित्यानन्तर्यार्थश्चेति । आदित्यइति । आदित्यात्सूर्यनारायणात्प्राप्तो यजुर्वेदो येन महर्षिणा योगिना याज्ञवल्क्येनासावादित्यस्तस्मिन्नादित्ये । तत्र प्रमाणं शतपथब्राह्मणस्य चतुर्दशकाण्डे बृहदारण्ये ‘‘आदित्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येन ख्यायन्ते । इति ॥

(२) ऋते यजुरुच्चाद्धारे इति ‘ख’ पुस्तकपाठः । भेदे इति । यजुर्वेदस्य षडशीति भेदाउक्ता महर्षिणा कात्यायनेन चरणव्यूहपरिशिष्टे,परन्तु शुक्लयजुर्वेदस्य पञ्चदश भेदा भवन्ति तन्मध्ये तृतीया शाखा माध्यन्दिनीयात्मिका तस्मिन्माध्यन्दिनीयके ऋग्यजुःपरिशिष्टमुच्यते ॥

योनिश्च स्वाहाकारश्च योऽन्यभाक् ॥ ऋक्सम्बन्धं यजुर्ज्ञेयं यच्च वक्ष्याम्यतोऽब्रुवन् ॥ ३ ॥ द्व्यवसाना ऋचः सर्वा यजुरन्यत्तदाश्रितम् ॥ वर्गादिष्टासु नैवं स्यात्तत्रादिष्टे यजुर्भवेत् ॥ ४ ॥ ज्ञेयान्येकावसानानि स्वाध्यायोपरमात्क्वचित् ॥ अवसानानि वक्ष्यामि द्विपदैकपदां तथा ॥ ५ ॥ ऋगर्द्धे चानुवाकानामन्तेषु यजुषां (१) तथा ॥ अवसानं विजानीयादाम्नायनियमेन तु ॥ ६ ॥

पुरा क्रूरस्येत्येका प्रथमे, वीतिहोत्रमित्येषा ते, मरुतां पृषतीरिति च, युम्परिधिमिति यजुरन्ताऽग्नेः प्रियमिति यजुः, स ए स्वभागास्थेषेति स्वाहा वाडिति यजु,र्देवा गातु विदऽइति द्वे, संवर्चसेत्येका, ये रूपाण्येका,ऽन्ते द्वे, ॥ १ ॥ समिधाग्निमिति चतस्र, आयङ्गौरिति तिस्रो,ऽग्निर्ज्योतिरिति सप्त पूर्वा पञ्चैकपदा, उप प्रयन्तऽइति षडि,न्धाना इति त्र्यवसानो,पत्वेति सप्तपदाश्चतस्रो द्विपदाः, सोमानमिति

---

(१) एतस्य ऋग्यजुःपरिशिष्टस्य प्रातिशाख्ये प्रयोजनं किमित्यपेक्षायाम् । प्रा० ४ सू० "प्रकृतिभावऋक्षु" अस्मिन्त्सूत्रे ऋक्पदेन ऋग्लक्षणं वक्तुमुचितं तद्यथा नियताक्षरपादावसानत्वमृक्त्वम् ॥ एवमेव प्रा० अ० ४ सू० यजुष्षु चे"त्यस्मिन्त्सूत्रे च यजुःपदेन यजुर्ल्लक्षणं यथा अनियताक्षरपादावसानत्वं यजुष्ट्वम् । के चन एतेषां छन्दो न विद्यतइति प्रवदन्ति तन्मते पादो नास्ति यजुषि पादाभावाच्छन्दो नास्ति परन्तु छन्दसोऽभावे मन्त्रत्वन्न तन्मन्त्रकृतकर्मभिः कर्त्तुः फलमपि न भवति । तत्र प्रमाणं कातीयसर्वानुक्रमे प्रथमखण्डे "एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजते तस्य ब्रह्म निर्व्वीर्य्यंयातयामं भवत्यथान्तराऽश्वगर्त्तं वापद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान्भवति । अथ विज्ञायैतानि योऽधीते तस्य वीर्य्यवदथ योऽर्थवित्तस्य वीर्य्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते इति ॥

नवा,ऽऽगन्मेति तिस्रो, गृह्णा मेति तिस्र, उपहूता इति त्र्यवसाना, प्रघासिनश्चतस्रः, पूर्णा दर्वि द्वे, अ-क्षन्नमीमदन्त षड, वरुद्रमिति चतस्र,स्त्र्यायुषमि-त्येका ॥ २ ॥ एदमिति द्वे त्र्यवसाने, ऽआपऽइत्येका, ऽऽपो देवीरिति द्वे, दैवीन्धियं, श्वात्त्राः पीता, ऽअ-ग्नेत्व, न्त्वमग्नऽएषा ते, व्वस्व्यसि, समक्ख्ये,ऽभित्य-मेकशः, परिमेति तिस्र, ऽअस्तभ्नादिति चतस्रो, न-मो मित्त्रस्येत्येका, यातऽइति च ॥ ३ ॥ भवतन्नऽइति द्वे, अर्ठ०शुरिति चतुरवसाना, युञ्जन्ति तिस्रो, व्वि-ष्णोर्नु कमिति च पूर्वे यजुरन्ते विष्णवे त्वेति यजुरुभ-यतः, परित्वेत्येका, त्वर्ठ० सोमेति पञ्च, जुषाणाऽ इ-त्येकपदो,रु व्विष्णावित्येका, ॥ ४ ॥ देवमिति यजुः, कोऽसीत्येको, दुत्यमिति चतस्रः, कदा चनेति तिस्रो यजुरन्ता, ऽआदित्येभ्यस्त्वेति यजुरन्तेऽर्था,च्छन्दस्या,-अहं परस्ता,त्सँव्वत्सेत्येकशः, समिन्द्रणऽइति सप्त, कर्ठ० हीत्येका,ऽग्नेरनीकमिति चतस्र,ऽएजतु द्वे पूर्वा त्र्यवसाना, मरुतो यस्येति द्वे,यस्मान्नेति च द्वि-तीया यजुरन्ता, सह प्राणेनेति यजु,राजिघ्रेति द्वे, ऽउपस्ह्रजन्निति तिस्रोऽन्या त्र्यवसाना, जयोरोजसे-त्येका, चतुस्त्रिर्ठ० शदिति चतस्रः ॥ ५ ॥ देव सवि-तरेका, ध्रुवसदमिति त्रीणि यजूंषि, पुरोरुषि पु-रोरुक्त्यान्येषु, व्वाजस्य न्वित्येका,ऽप्स्वन्तरिति च, व्वातो वेति तिस्रऽ, एषस्य व्वाजी, व्वाजस्येमामिति

सप्ता,ग्ने सहस्वेत्येका,ऽपो देवाः, सधमादऽइत्येक-
श्चो, हिरण्यरूपाविति, मित्त्रोऽसि वरुणोसीति यजु-
षी, प्रपर्व्वतस्येत्येका, प्रजापतेनेति यजुर्म्मध्या त्वन्याऽ-
श्वमेधे व्याख्याताऽयममुष्य पिताऽसावस्य पितेति
यजुर्षी ते, हर्ठ०सो, निषसादेत्येकश्चो, वायुः पू-
तो, युवर्ठ० सुराममिति द्विशः ॥ ६ ॥ युञ्जतऽइति
सप्त,र्च्चौ स्तोममित्येका, हस्तऽ आधायेति यजुरन्ताऽनु-
ष्टुभेनेति यजुः, प्रतूर्व्वन्निति चतस्रोऽन्त्या यजुर्ग्गर्भो,
ऽव्वन्तरिक्षँव्वोह्रीत्येतावद्यजु,रन्वग्निरित्येकादशा,पा-
म्पृष्ठमिति तिस्र,स्त्वामग्नऽ इति षडपो देवीरि-
ति दश, नवमी व्यवसानाऽन्त्यैकपादौ,पथयऽइति
तिस्रऽ, आपो हीत्यष्टौ, ह्रत्वायेत्येका, मित्रस्येति ति-
स्रो, विश्वो देवस्येत्यध्यायान्ताः ॥ ७ ॥ व्विष्णोः
क्रमोऽसि, व्विश्वकर्म्मणे, सञ्ज्ञानं, चिदसि, सजू-
रब्दऽइत्युद्धृतानि यजूर्ठ०षि, द्वितीये सुपर्णोऽसीति
चतुरवना, नमो भूत्याऽइत्येकपदा, मयि गृह्णामीति
त्रयोदशा, ऽग्निर्म्मूर्द्धेत्येका, भुवो यज्ञस्येति च, ध्रुवासी-
ति तिस्रः, काण्डात्काण्डादिति चतस्रो,ऽषाढाऽसी-
त्येका, मधु व्वाताऽइत्येकादश, सम्यक्स्रवन्ति न-
वमस्या षड, पान्त्वा, पञ्चानाञ्चाध्यायान्तानां नानां-
दिगुपरमान्तेषु यजूर्ठ०षि लोकन्ताऽइन्द्रमिति तिस्रः ॥
८॥ ध्रुवक्षितिरिति पञ्चाश्विनीनामेकं लोकन्ताऽइन्द्र-
मिति तिस्र, ऽइन्द्राग्नीऽइत्येका, मूर्द्धाऽसीति द्वे, लो-

कन्ताऽइन्द्रमिति, लोकन्ताऽइन्द्रमिति चा,ऽग्ने जातानिति द्वे, अग्निर्मूर्द्धेत्येकचिर्ठ०शदग्निर्ठं० होतारमिति व्यवसाना द्विपदा व्याख्याता, येनऽऋषयोऽष्टौ, लोकम्पृणेति चतस्रो, नमस्तऽइति प्राङ्नमस्कारेभ्यो, द्रापेऽअन्धसस्पतऽइति प्राक् प्रत्यवरोहेभ्योऽ, श्मन्निमा मे, नृषदेवेडिन्द्रन्दैवीरित्युद्धृतानि यजूंषि सप्त सप्तेति ॥ ९ ॥ वाजस्य न्विति सप्त, स नोभुवनस्येत्येका, यास्तऽइति चतस्रोऽग्निँय्युनज्मीत्यध्यायान्ता, ऋचोनामेत्युद्धृत्य यजुरेकोऽपरं, स्वाद्वीन्त्वेत्येका, परितऽइति षड्, या व्याघ्रमिति द्वे, देवा यज्ञमित्याध्यायान्ता,त्पितृभ्यः स्वधा नम इत्युद्धृते यजुरेकमपर,मिदर्ठं० हविरिति व्यवसाना, रेतो मूत्रमिति च द्वे, जनस्य योनिरेका, कोऽसीति षडन्त्या व्यवसाना, त्वया देवाऽइति व्यवसाना, लोमानीत्येका, यद्देवाऽइति तिस्रो, यदापऽइत्येका, सुमित्रिया नऽइति, द्रुपदादिवेति तिस्रोऽध्यादधामीत्याध्यायान्तादिमम्मऽइति प्राक् प्रैषेभ्यः ॥ १० ॥ इमामगृभ्णन्नित्येका, योऽअर्वन्तमित्येका, हिरण्यपाणिर्न्नव, युञ्जन्तीति तिस्रः, कः स्विदिति चतस्रः, सर्ठं०शितऽइति तिस्रोऽम्बऽइत्येको, रसकक्ष्याऽइत्यध्यायान्तादुद्धृत्य प्रैषर्ठं०, हिरण्यगर्भऽइत्याद्यास्सर्ठं०हिताध्यायान्ता, ऽइमा नु कमिति च षड्द्विपदाः, प्रियो देवानामित्येका, तँव्वऽइत्यध्यायान्ताः, समास्त्वेति

प्रागग्न्यभिमर्शना,त्वमिद्धोऽग्नेऽन्वितिति प्रागाग्नेयाद्दे-
व सवितरिति प्राक्प्रैषेभ्यः ॥ ११ ॥ सहस्रशीर्षेत्य-
ध्याय,स्तद्देवेति च, न तस्येति द्विपदा, अस्याजरास-
ऽइत्यध्यायो, यज्जाग्रतऽइति च, व्वायुः पुनातु, प्रजा-
पतौ, सुमित्रिया नोऽप नः शोशुचदघमित्युद्धृता-
नि यजूंषि दश, यन्मऽइत्येका, तत्सवितुरिति षड-
न्येकपदा, शन्नऽइति नवा,न्हानीति द्विपदा, नमस्त-
ऽइति तिस्रो, युञ्जतऽइत्येका, प्रैत्विति च, धर्त्ता दिव-
ऽइति, हृदे त्वा, यत्ते, व्विश्वाऽआशाऽइत्येकशो,ऽ-
श्विना घर्म्ममिति द्वे, ऽअभीममिति व्यवसाना, चत्व-
स्येति चतस्र, ऽउद्वयमित्येका, यावतीति द्वे, मनसः
काममित्येका, मयित्यदित्येको,ग्ग्रश्चेति च ॥ १२ ॥
ईशा व्वास्यमिति चतुर्दशाग्ने नयेति द्वे, यथोक्तरी-
त्या च काचिदनियतावसाना स्यात्तासाञ्चानामक्ष-
रसङ्ख्यया विद्यादृचा स्तोममिति दृश्येद्गायत्री प्रियो
देवानामित्यनुष्टुप् तदप्येते श्लोकाः ॥१३॥ पादा यत्रा-
वियुक्ताः स्युरक्षरैर्न्निग्रहो भवेत् ॥ छन्दसां परिमा-
णस्य दृश्यते हि यथा क्वचित् ॥ १ ॥ परमेष्ठ्यऽष्टगा-
दीनामाग्नेयं ब्राह्मणन्तथा ॥ नाना छन्दर्ग्यजुर्भ्यां च
ब्राह्मणस्य सदा स्मृतम् ॥ २ ॥ देवा यज्ञमिति चैत-
द्ब्राह्मणन्नैककर्मभाक् ॥ सोमसौत्रामणी सम्पत्त्यै
तदभावादृचोऽब्रुवन् ॥ ३ ॥ अथ वा सर्व्वमन्त्राणान्त्वा-
मेवं प्रकल्पयेत् ॥ उत विद्वान्प्रशंसीयश्छन्दोविचिति-

यं प्रति ॥ ४ ॥ छन्दोभूतमिदं सर्व्वं वाङ्मयं स्याद्वि-
जानतः ॥ नाच्छन्दसि न चापृष्टे शब्दश्चरति कश्चन ॥
५ ॥ अपि चास्मिन्यजुर्वेदे सर्वो मन्त्रो यजुर्भवेत् ॥
यजुषाऽध्वर्य्युकर्मेति श्रुतौ कल्पेऽति कीर्त्तितम् ॥ ६ ॥
यजुषाऽनड्वाहौ युनक्ति यजुषा क्रियते यजुञ्रा ॥ जप-
ति यजुर्भिर्ज्जुहोति यजुष्कृत्यै यज्ञस्य सन्तत्यै ॥ ७ ॥
यः कश्चित्पादवान्मन्त्रो युक्तश्चाक्षरसङ्ख्यया ॥ (१)
सुवियुक्तावसानां च तामृचं परिचक्षते ॥ ८ ॥ यः
कश्चित्करणो मन्त्रो न च पादाक्षरैर्य्युतः ॥ अनियु-
क्तावसानस्तं यजुः परिकल्पयेत् ॥ ९ ॥ व्यवसिता
नियताऽक्षरार्द्धमाना सुविभक्तावसाना पादाक्षरपादा
ऋचः ॥ यजुरन्यदुपैत्यस्य कश्चिदतः स्वयमेव शतैर्वि-
वित्तयामयोः ॥ १० ॥ ऋचो यजूंषि प्रतिवेदशाखं
दृष्टं विपर्य्यस्य ऋषिप्रसादात् ॥ एतद्धितं ब्रह्म सना-
तनाद्यं तानृषिर्वेद नमोऽस्तु तस्मै ॥ ११ ॥ द्वे
सहस्रे शते न्यूने मन्त्रे वाजसनेयके ॥ ऋग्गणः प-
रिसङ्ख्यातः शेषमन्यदृचो यजु ॥ १२ ॥ अष्टौ सह-
स्राणि शतानि चाष्टावशीत्यन्यान्यधिकानि यजूं-
षि ॥ एतत्प्रमाणं यजुषां तु केवलं सशुक्रियं सखिलं
याज्ञवल्क्यम् ॥ १३ ॥ हारीतमाद्यं परमं पवित्रं वि-
द्यात्प्रमाणं यजुषामृचां यः ॥ स ब्रह्मसन्तानमिहाब्र-
वीच्च सालोक्यतामृग्यजुषां च गच्छतीति सालोक्यता-

(१) विनियुक्तावसानां इति 'ख' पुस्तकपाठः ॥

ऋग्यजुषां च गच्छतीति ॥ १५ ॥ इति महर्षिकात्यायनप्रणीतमष्टादशपरिशिष्टान्तर्गतं नवममृग्यजुःपरिशिष्टं समाप्तम् ॥

अथाष्टादशपरिशिष्टान्तर्गतं चतुर्थमनुवाकाध्यायपरिशिष्टमारभ्यते ॥

अथानुवाकान्वक्ष्यामि ब्रह्मणा विहितान्पुरा(१) ॥ विप्राणां यज्ञकालेषु जपहोमार्चनादिषु ॥ १ ॥ इषे त्वैका, वसोः पवित्रं तिस्रो, ऽग्ने व्रतपते सप्त, पवित्रे स्थो द्वे, शर्म्मासि तिस्रो, धृष्टिरसि शर्म्मासि द्विकौ, देवस्य त्वा तिस्रो, देवस्य त्वा पञ्च, प्रत्युष्टꣳ रक्षस्तिस्रो, दशैकविꣳशत् ॥ १० । ३१ । १ ॥ कृष्णोऽसि षड, ग्ने वाजजित्तिस्रो, मयीदमग्नीषोमयोः पञ्चका, वग्ने दब्धायो चतस्रः, सँव्वर्च्चसा पञ्चाग्नये कव्यवाहनाय षट्, सप्त, चतुस्त्रिꣳशत् ॥ ७ । ३४ । ३ ॥ समिधाग्निम्भूर्भुवः स्वश्चतुष्का,ऽग्निर्ज्ज्योतिर्द्वे, ऽउपप्रयन्तः षड्विꣳशति, भूर्भुवः स्वस्तस्रो, गृहा मा तिस्रः, प्रघासिनः पञ्च, पूर्णा दर्व्वि द्वे ऽक्षन्नमीमदन्त षडे, षते सप्त, दश, त्रिषष्टिः ॥

(१) एतत्परिशिष्टस्यापि प्रातिशाख्ये प्रयोजनम् ४ अ० सू० १६७ द्विपदैकपदान्यप्यनुवाके" इति ॥

१०। ६३। ३॥ एदन्हे, मह्हीनां पयस्वतस्त्र, ऽआकू-
त्याऽक्तकृसामयो द्विकौ, व्रतं कृणुत षडे, याते च-
तस्रो, वस्व्यसि तिस्र, ऽएष ते द्वे, शुक्रन्त्वा चतस्रो,
ऽदित्यास्त्वगष्टौ, दश, सप्तत्रिꣳशत् ॥ १०। ३७।
४॥ अग्नेस्तनूरापतये चतुष्कौ, तप्तायनी द्वे, इन्द्रघो-
षस्तिस्रो, युञ्जतेऽष्टौ, देवस्य त्वा चतस्रो, देवस्य त्वा
पञ्च, विभूरसि चतस्रो, ज्योतिरसि षडु,रु विष्णो
तिस्रो, दश, त्रिचत्वारिꣳशत् ॥ १०। ४३। ६॥
देवस्यत्वा षडु,पावीरसि पञ्च, माऽहिः षट्, सन्ते ति-
स्रः, समुद्रङ्गच्छ हविष्मतीर्द्विकौ, हृदे त्वा पञ्च,
देवस्य त्वाऽष्टा,वष्टौ, सप्तत्रिꣳशत् ॥ ६। ३७। ६॥
वाचस्पतयऽउपयामगृहीतोऽसि त्रिका,वावायोऽयँ-
वाग्द्विकौ, या वामेका, तम्प्रत्नथा चतस्रो, ऽयँ वेनो ये
देवासस्त्रिका,विन्द्राय मूर्द्धानन्द्विकौ, यस्तऽएका, प्रा-
णाय तिस्रो, मघवऽ, इन्द्राग्नीऽआगत, माघौ, मा-
सश्चर्षणीधृतो, विश्वेदेवासऽआगते,न्द्रमरुत्वो, म-
रुत्वन्तं वृषभं, मरुतान्त्वौजसे, सजोषाऽइन्द्र, मरु-
त्वाँ २॥ ऽइन्द्र, महाँ २॥ ऽइन्द्रो, महाँ २॥ इन्द्रऽ-
एकैको, दुत्त्यमष्टौ, पञ्चविꣳशति,रष्टाचत्वारि-
ꣳशत् ॥ २५। ४८। ७॥ उपयामगृहीतोऽस्यादि-
त्येभ्यः पञ्च, वाममद्य द्वे, सुशर्म्माऽस्येका, बृहस्पति
सुतस्य द्वे, हरिरसि चतस्रः, समिन्द्रणोऽष्टौ, माऽहि,
रेजतु दशमास्यः पञ्चका, वातिष्ठ, युद्रवा द्वौ, न्द्रमिद्दे-

कैका, यस्मान्न इ ऽअग्ने पवस्वो, त्तिष्ठन्नष्टश्चमुदुत्त्य-मेकैका, ऽऽजिघ्र द्वे, व्विनऽइन्द्र, व्वाचस्पतिं व्वि-श्वकर्म्मन्नेकैका, ऽग्नयेत्त्वा चतस्र, ऽइह रतिस्तिस्रः, परमेष्ठी दश, त्रयोविᳬशति, त्त्रिषष्टिः ॥ २३ । ६३ । ८ ॥ देव सवितस्तस्र, ऽइन्द्रस्य व्वज्जः पञ्च, देवस्याहं दशा, पथे तिस्रो, व्वाजस्येममष्टा, वग्निरे-काक्षरेणैष ते चतुष्को, सविता द्वे, अष्टौ, चत्त्वारिᳬशत् ॥ ८ । ४० । ६ ॥ अपो देवास्तस्रः, सोमस्य त्विषिः पञ्चा, वेष्टाः सप्त, सोमस्य त्वा चतस्रऽइन्द्रस्य व्वज्जः पञ्च, स्योनाऽसि चतस्रः, सवित्त्रैका, ऽश्विभ्यां चतस्रो, ऽष्टौ, चतुस्त्रिᳬशत् ॥ ८ । ३४ । १० । ११९ ॥ युञ्जानऽएकादश, प्रतूर्त्तᳬषोडश, देवस्य त्वा दशा, पो देवीर्द्वादशा, ऽऽपो ह्येकादशा, दिति-र्द्वा पञ्चा, कूतिमष्टादश सप्त, त्र्यशीतिः ॥ ७ । ८३ । ११ ॥ दृशानः सप्तदश, दिवस्परि द्वादश, समिधा-ग्निं पञ्चदशा, पेत सप्तदशासुन्वन्तं त्रयोदश, याऽ-ओषधीः सप्तविᳬशति, र्म्मा मा षोडश, सप्त, सप्तद-शᳬशतम् ॥ ७ । ११७ । १२ ॥ मयि गृह्णामि प-ञ्चदश, ध्रुवाऽसि मधु व्वाताऽएकादशको, समस्य क्षस्तवन्ति नवे, मम्मा षड, पान्त्वैका, ऽयम्पुरः पञ्च, सप्ता, ष्टापञ्चाशत् ॥ ७ । ५८ । १३ ॥ ध्रुवक्षितिः षट्, सजूर्ऋतुभिर्म्मूर्द्धावयो द्विका, विन्द्राग्नीऽआयुर्म्मे षट्का, वाशुस्त्रिष्टदेका, ऽग्नेर्भागोऽस्येकया चतुष्का,

वष्टा,वेकविंश॰शत् ॥ । ३१ । १४ ॥ अग्ने जाता-न्पञ्च, रश्मिना सत्याय चतस्रो,राडूयस्थयम्पर: पञ्च-का, वाग्निमूर्द्धैकोनविंश॰श,द्वेनऽक्तषयोऽष्टौ, तपश्च नव, सप्तपञ्चषष्टिः ॥ ७ । ६५ । १५ ॥ नमस्ते षोड-श, हिरण्यबाहवऽउष्णीषिणे, तक्षभ्यो, ज्येष्ठाय, प-ञ्चकाः, स्रुत्याय चतस्रः, शम्भवायैका, पार्य्याय प-ञ्च, द्रापेऽअन्धसो विं॰शतिर्नव, षट्षष्टिः ॥ ८ । ६६ । १६ ॥ अश्मन्नूर्ज्जन्दश, नमस्ते पञ्चा,ग्निस्ति-ग्मेन नव,चक्षुषः पिताष्टा,वाशुः शिशानः सप्तदशो, देवं क्रमद्वमग्निना पञ्चदशकौ, शुक्रज्योतिः सप्ते मर्ध्स्तनं त्रयोदश, नवै, कोनशतम् ॥ ८ । ६८ । १७ ॥ वाजः सत्यमृक्कर्च्चं चतुष्का, ऽअश्माग्निस्त्रि-का, वं॰शुः पञ्चै,का चतस्रो, वाजाय द्वे, वाजस्य न्वष्टा, इताषाट्त्रयोदशा, ग्निंर्युनज्मि सप्त, यदाकू-ताद्वात्रिंहत्याय दशकौ, त्रयोदश, सप्तसप्ततिः ॥ १३ । ७७ । १८ ॥ ६७ ॥ स्वाद्वीन्त्वैकादश, देवा यज्ञं विं॰शतिः, सुरावन्तं॰ सप्तदशौ, दीरतां त्रयोदशा,चच्चा-जानु दश, सोमो राजाऽष्टौ, सीसेन तन्त्रं॰ षोडश, सप्त, पञ्चनवतिः ॥ ७ । ६५ । १९ ॥ चत्रस्य योनि-स्त्रयोदश, यद्देवा दशा, ऽथ्यादधाम्यष्टौ, यो भूतानां चतस्रः, समिद्धऽइन्द्रऽएकादशा, यात्वष्टौ,समिद्धोऽअ-ग्निर्द्वादशा,श्विना हविस्त्रयोदशा,श्विना तेजसै-कादश, नव, नवतिः ॥ ८ । ६० । २० ॥ इममे समि-

ह्वोऽअग्निरेकादशकौ, वसन्तेनऽऋतुना षड्ढोता य-
क्षत्समिधाऽग्निं द्वादशाऽश्विनौ छागस्य सप्त, देवं
बर्हिस्त्वतुर्दश, षडेकषष्टिः ॥ ६ । ६१ ॥ २१ ॥ २२ ॥
तेजोऽसि पञ्च, अग्नयऽएका, हिङ्काराय द्वे, तत्सवि-
तुर्दश, त्रिभूर्म्मीनैका, काय द्वे, शेषास्त्रयोदशैकैका,
ऽएकोनविंशतिशतं,चतुस्त्रिंशं शतं ॥ १९ । ३४ ।
२२ ॥ हिरण्यगर्भो यः प्राणतो द्विकौ, युञ्जन्त्यष्टौ
वायुष्ट्वा पञ्च, प्राणाय तिस्र, ऽउत्सक्थ्या द्वादश,
गायत्री कस्त्वा षट्कौ, कः स्विदष्टौ, कास्विद्दश, सुभूः
स्वयम्भूस्तिस्र,ऽएकादश, पञ्चषष्टिः ॥ ११ । ६५ । २३ ॥
अश्वस्तूपरो, धूम्रान्वसन्ताय, समुद्राय शिशुमा-
रा,न्मयुः प्राजापत्यो, दशकाश्चत्वारश्चत्वारिंशं
शतं ॥ ४ । ४० । २४ ॥ शादन्दद्भिर्न्नवैकैका, हिरण्य-
गर्भस्तस्र, ऽआनो दश, मा नो मित्रो, यदश्वस्या-
ष्टकौ, यत्ते षडिमा नु कन्द्वे, पञ्चदश, सप्तचत्वारिंशं
शतं ॥ १५ । ४७ । २५ ॥ ४९ ॥ अग्निश्च पञ्चदशो-
ष्वा तऽएकादश, द्वौ, षड्विंशंशतिः ॥ २ । २६ ॥
२६ ॥ समास्त्वा दशो, ह्वोऽअस्य, पीवोऽअन्ना द्वादश-
का, वभि त्वैकादश, चत्वारः, पञ्चचत्वारिंशं शतं ॥
४ । ४५ । २७ ॥ होतायक्षदेकादश, देवं बर्हिर्द्वा-
दश, पुनरप्येवं, चत्वारः, षट्चत्वारिंशं शतं ॥ ४ ।

४६ । २८ ॥ समिद्धोऽअञ्जन्नेकादश, यदक्रन्दस्त्रयोदश, समिद्धोऽअद्य द्वादश, केतुङ्कृण्वंश्चतुर्व्विंशति, श्चत्वारः, षष्टिः ॥ ४ । ६० । २९ । देव सवितः षट्, तपसे कौलालठं० षोडश, द्वौ, द्वाविंठं० शतिः ॥ २ । २२ । ३० ॥ सहस्रशीर्षा षोडशा, दृभ्यः सम्भृतः षड्, द्वौ, द्वाविंठं० शतिः ॥ २ । २२ । ३१ ॥ तद्देव सप्त, स्वेनस्तन्नव, द्वौ, षोडश ॥ २ । १६ । ३२ ॥ अश्वाजरासः सप्तदशा, पश्चि द्वादश, स्विभ्या, ट्चतुर्द्दश, प्रवाहजऽएकादश, प्रवायुं, प्रवीरया पञ्चदशका, वानस्त्रयोदश, सप्त, सप्तनवतिः । ७ । ९७ । ३३ ॥ युञ्जाग्ग्रतः, पञ्चनद्यः, सोमो धेनु, माक्षण्णेन, पूषन्तव, दशका, नतदष्टौ, षड्, ष्टापञ्चाशत् ॥ ६ । ५८ । ३४ ॥ अपेतो दशा, पाद्यं द्वादश, द्वौ द्वाविंठं० शतिः ॥ ॥ २ । २२ । ३५ ॥ ऋचंव्वाचठं० षोडश, द्यौः शान्तिरष्टौ, द्वौ, चतुर्व्विंठं० शतिः ॥ २ । २४ । ३६ ॥ देवस्य त्वा दश, यमाय त्वैकादश, द्वा, वेकविंठं० शतिः ॥ २ । २१ । ३७ ॥ देवस्य त्वाऽष्टौ, यमाय त्वा, ऋतस्य त्वा दशकौ, त्रयो, ऽष्टाविंठं० शतिः ॥ ३ । ३८ ॥ स्वाहा प्राणेभ्यः षड्, रश्मिश्च, सप्त, द्वौ, त्रयोदश ॥ २ । १३ । ३९ ॥ ईशा वास्यमष्टा, वन्धन्तमो नव, द्वौ सप्तदश ॥ २ । १७ । ४० । ११ ॥ दशाध्याये समाख्याता अनुवाकास्तु सङ्ख्यया ॥ शतं दशानुवाका-

श्च नवान्ये च मनीषिभिः ॥ १ ॥ ११९ ॥ सप्तषष्टिस्त्रि-
तौ ज्ञेयाः ६७ सौत्रे द्वाविंशतिस्तथा ॥ २२ ॥ अ-
श्वऽएकोनपञ्चाश ४९ त्पञ्चत्रिंशत्खिले ३५
स्मृताः ॥ २ ॥ शुक्रियेषु तु विज्ञेया एकादश ११
मनीषिभिः ॥ एकीकृत्य समाख्यातं त्रिशतं त्र्यधिकं
३०३ मतं त्रिशतं त्र्यधिकं मतम् ॥ ३ ॥ इति महर्षि
कात्यायनप्रणीतमष्टादशपरिशिष्टान्तर्गतं चतुर्थमनुवा-
काध्यायपरिशिष्टं समाप्तम् ॥

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS:

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

Nos. 48, 59, 64, &. 79.

महर्षिशौनकप्रणीतम् ऋक्प्रातिशाख्यम् ।

उव्वटकृतभाष्ययुतम् ॥

श्रीपण्डितयुगलकिशोरपाठकान्तेवासिना श्रीहिन्दुकालेज मध्यवर्त्तिं श्रीरणवीरपाठशाला-
यां वेदशास्त्राध्यापकेन श्रीमत्पण्डितप्रभुदत्त शर्म्मणा संशोध्य प्रकाशितम् ॥

ŚAUNAKA'S PRÂTIŚÂKHYA
OF THE RIGVEDA,

WITH THE COMMENTARY OF UVVATA.

EDITED AND ANNOTATED BY THE LATE PANDIT

YUGALAKIŚORA VYÂSA,

And His Esteemed Pupil Pandit

PRABHUDATTA ŚARMÂ,

PROFESSOR OF VEDA, CENTRAL HINDU COLLEGE, BENARES.

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidya vilas Press,

BEENARS.

1903.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

॥ श्रीः ॥

॥ भूमिका ॥

किञ्चिदूनं वर्षत्रितयं जातं श्रौतस्मार्ततत्त्वविदग्रेसरै वैदिकधुरन्धरै रस्मद्गुरुवरैः श्रीयुगलकिशोर पाठक इति सुगृहीतनामधेयैः पदव्याकृति-स्वरशिक्षादिविषय व्युत्पित्सूनां वैदिकजनानां सुबहूपकृतये महतायासेनत्रिचतुराण्यादर्शपुस्तकानि संपाद्य तेभ्योऽति शुद्धं पुस्तकमेकं लेखयित्वा ग्रन्थस्यास्य ऋग्वेदप्रातिशाख्यस्य मुद्रापणे तत्परै रभूयत। दुर्लभातिप्राचीनग्रन्थरत्नानां जगति प्रचारार्थं बद्धपरिकरः श्रीयुत हरिदासनामा गुप्तः श्रीयुतव्रजभूषणदासाज्ञया स्वकीय (बनारस सीरीजनामक) संग्रहे ग्रन्थमिमं स्वीचक्रे मुद्रयित्वा प्रकाशयितुम्। परन्तु दुर्दैववशादस्माकं प्रथमाङ्कपर्य्यन्तमेव कतिपयपत्त्राणि मुद्राप्य रुग्णशरीरतया श्रीगुरुचरणा विहाय विनश्वरं देहमिमं श्रीशिवसायुज्यभावं प्राप्नुवन्।

प्रारब्ध-मुद्रणस्य परमोपकारिणोऽमुष्य ग्रन्थस्य गुरुभक्तिलेशात्ततः प्रभृति शोधनादिकार्यं यथावकाशमहमुद्युक्तोऽभवम्। अथैतत्सौलभ्यकर्तृत्वेनास्मद्गुरुचरणानां यशस्सौरभोद्गारं विस्तारयन् ग्रन्थोऽयमीश्वरानुग्रहेण शनकैरविन्दच्च समाप्तिम्। ग्रन्थस्यास्य सूत्रकारः त्रिकालदर्शी महर्षिः शौनकः प्रसिद्ध एवे

तिहास पुराणादिषु प्रेक्षावतामिति न तत्र वक्तव्यमस्ति ।

भाष्यकारश्च वेदार्थमीमांसा साम्राज्यासीनो भगवानुव्वटाचार्य्यः कस्मिन् समये कतमं जनपदमलङ्कारेति विशेषतो मयान निर्द्धारित स्तथापि विद्यारण्य—श्रीमाधवाचार्य्य समकालिको महीधराचार्य्यात्प्राचीनः शुक्लयजुः संहिताभाष्य—यजुर्वेदप्रातिशाख्यादि निबन्धकृदुव्वटाचार्य्योऽस्तीति यजुः संहिताभाष्यारम्भ एव ।

प्रणम्य लक्ष्मीं नृहरिं गणेशं ।

भाष्यं विलोक्योव्वट माधवीयमिति महीधरोक्त्या स्फुटीभवति । उपक्रान्तोऽस्यास्य मध्ये मध्ये निरीक्षणादिसाहाय्यद्वारा हिन्दूकालिजमध्यवर्त्ति श्रीरणवीरपाठशालायां व्याकरणशास्त्राध्यापकैरस्मद्गुरुवर श्रीअनन्तरामशर्म्मभिः । पुस्तके ऽस्मिन् सीसकाक्षर योजकदोषेण ममदृष्टिदोषाद्वा क्वचिदशुद्धय उपलभ्येरन् ताः शोधयित्वा गुणैकपक्षपातिनो महाशया विपश्चितः श्रमं मे सफलीकुर्वन्त्विति सप्रश्रयमभ्यर्थये सज्जनान् । प्रीयतां चासुना व्यापारेण सर्वान्तर्यामी विश्वेश्वरः श्रीशङ्कर इति निवेदयते ।

श्रीकाश्याम
सं० १९६० आग्रहायण
सुदि १० रवौ

आदिगौडोपाधिक
श्रीप्रभुदत्तशर्म्मा मिश्रः ।

ऋग्वेदप्रातिशाख्यम् ।

उव्वटकृतभाष्ययुतम् ॥

श्रीगणेशाय नमः ।

श्रीशौनकाय नमः ॥

ॐम् ॥ सूत्रभाष्यकृतः सर्वान्प्रणम्य शिरसा शुचिः । शौनकं च विशेषेण येनेदं पार्षदं कृतम् । १ । तथा वृत्तिकृतः सर्वांस्तान्सूत्रयशसस्तथा ॥ तेषां प्रसादादेतेषां स्वशक्त्या वृत्तिमारभे । २ । लेख्यदोषनिवृत्त्यर्थं विस्तारार्थं क्वचित्क्वचित् । बहूदाहरणार्थं च योज्यते च मया पुनः । ३ । तस्याः समापने शक्तिं तएव प्रदिशन्तु मे । लब्ध्वा काममहं तेभ्यः प्रमेयं पारमीप्सितम् । ४ । चम्पायां न्यवसत्पूर्वं वत्सानां कुलमृद्धिमत् । यस्मिन्द्विजवरा जाता बह्वृचाः पारमोत्तमाः । ५ । देवमित्र इति ख्यातस्तस्मिञ्जातो महामतिः । स वै पारिषदे श्रेष्ठः सुतस्तस्य महात्मनः । ६ । नाम्ना तु विष्णुमित्रः स कुमारइति शब्द्यते । तेनेयं योजिता वृत्तिः सङ्क्षिप्ता पार्षदे स्फुटा । ७ । परिगृह्णंतु विप्रेन्द्राः सुप्रसन्ना इमां मम । अज्ञानाद्यदयुक्तं स्यात्तदृजूकृत्य गृह्यताम् । ८ । शास्त्रावतारसंबन्धविषयं च प्रयोजनम् । ज्ञात्वा ग्राह्यं भवेच्छास्त्रमिति शिष्टानुशासन-

च्यते, लक्षणपूर्वकं ह्यर्थपरिज्ञानं, तथाचोक्तं (१)"स्वरो व-
म्। ६। तस्मादादौ तावच्छास्त्रावतार उच्यते। शौन-
को गृहपतिर्वै नैमिषीयैस्तु दीक्षितैः। दीक्षासु चोदि-
तः प्राह सत्रे तु द्वादशाहिके इतिशास्त्रावतारं स्म-
रन्ति। अथ सम्बन्ध उच्यते इह हि द्विजानां वेदाभ्या-
सः सकलपुरुषार्थसिद्धेः कारणमिति वैदिकसिद्धान्तः,
स च पुरुषार्थश्चतुर्विधः। धर्मार्थकाममोक्षा इति तद-
प्युक्तमृग्विधाने यथा पवमाननामाने दिष्टहृद्यपुरुषसू-
क्तादिषु, वेदाभ्यासो हि पञ्चधाविहितः। अध्ययनं
विचारोऽभ्यसनं जपोऽध्यापनमिति, तथाच स्मर्यते वेद-
स्वीकरणं पूर्वं विचारोऽभ्यसनं जपः। तद्दानं चैव शि-
ष्येभ्यो वेदाभ्यासो हि पञ्चधेति, तदपि वक्ष्यति
एकः श्रोता दक्षिणतो निषीदेदित्यादिना अध्ययनं
अभ्यासार्थे द्रुतां वृत्तिं। इत्यभ्यसनं, प्रयोगार्थे
तु मध्यमामिति जपादि, अध्यापनं पारायणं वर्तयेद्ब्र-
ह्मचारीत्येवमादिना तस्मादधीतवेदस्य हि सति साम-
र्थ्ये संपूर्णफलेच्छया विचारस्यावसरः प्राप्तः। स
च विचारो द्विविधः। अर्थतो लक्षणतश्चेति तथाचोक्तं
स्थाणुरयं भारहारः किलाभूदित्यादिना। तथा च ल-
क्षणं योऽनवेत्यृक्षु न कर्मफलभाग्भवेत्। लक्षणज्ञो हि
मन्त्राणां सकलं भद्रमश्नुते इति, तस्मात्तावत्पूर्वं लक्षणमु-

(१) इदं पद्यमसरेशोभिमिश्रायानस्ति अग्रे तत्प्रयोगार्थ एव चेति पा
ठान्तरमवधेयम्॥

र्णोऽक्षरं मात्रा, दैवं योगार्षमेव च। मन्त्रं जिज्ञासमा-
नेन वेदितव्यं पदे पदे इति" सर्वशास्त्रादौ नमस्कारं
करोत्याचार्यः यथा स्वयंभुवे ब्रह्मणे विश्वगोप्त्रे यथा
च सर्वात्मानं विश्वसृजं स्वयंभुवं यथा च पितृदेवर्षि-
साध्येभ्य इति, अतः अत्रापि शौनकाचार्यो भगवान् शा-
स्त्रादौ नमस्कारं चकार अविघ्नार्थं च। परावरे इ-
ति च॥

परावरे ब्रह्मणि यं सदाहुर्वेदात्मानं वे-
दनिधिं मुनीन्द्राः। तं पद्मगर्भंपर-
मन्वादिदेवं प्रणम्यर्चां लक्षणमा-
ह शौनकः॥ १॥

परं च अवरं च परावरं ब्रह्म, परं च अवरं च प-
रावरं ब्रह्म, परं नाम मनसाध्यानगम्यं सदसदात्मकं वे-
दान्तेषु यदुच्यते यदेतद्धृदयं मनश्चेत्यादि, तथाच। म-
हापुरुषइति यमवोचामेत्यादि, ततो ज्योतिरजरं प्राहु-
र्यद्योगात्समुपाश्नुतइति, "स ब्रह्मामतमत्ययोनिसदसदोः
ध्रुवं महद्ब्रह्मेतुस्थाणु विश्वे सन्ति ज्योतिरुत्तममिति च"।
अवरं तु पुनःकरणम्। यदुपांशुध्वनिनादो यद्दधि मं-
द्रमध्यमोत्तमस्थानेषु जपादिकर्मसु यत्प्रयुज्यते शब्दा-

ष्यमग्निमीलइत्यादि । तदुक्तम् "द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्मपरं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्मणि गच्छतीति" । शब्दब्रह्मज्ञानपूर्वकं परब्रह्मज्ञानम् । तस्मिन्परावरे ब्रह्मणि यं वेद ब्रह्माख्यं सदा सर्वदा आहुर्वदन्ति स्तुत्यादिभिः स्तुवन्ति विचारयन्ति । मीमांसन्ते एतज्ज्ञैव बहुवहृचा महदुक्ते मीमांसन्तइतियथा । क आहुर्मुनीन्द्राः मुनिप्रधाना ऋषयो मन्त्रद्रष्टारः । कैर्नामभिरित्युच्यते, वेदात्मा वेदनिधिः पद्मगर्भः परमं आदिदेवइत्येवमादिभिः । वेदानां आत्मा वेदात्मा वेदाइति विद्यते ज्ञायते लभ्यते वा एभिर्धर्मादिपुरुषार्थाइति वेदाः । मन्त्रब्राह्मणयोर्वेदनामधेयं, तत्र ह्यव्यभिचारेण तत्स्वरवर्णमात्रापूर्वकः पाठः सर्वकालं सर्वदेशेषु । प्रतिचरणमविभागेनैकैको मन्त्रराशिर्वेदइत्युच्यते, आत्मा "अतसातत्यगमने" सततं सर्वदा सर्वदेशे सर्वकाले च भोक्तृत्वेन स्रष्टृत्वेन च अतति गच्छतीत्यात्मा तं वेदात्मानं, वेदनिधिं वेदानां निधिः वेदनिधिः वेदानां स्थानमित्यर्थः, जनयति पोषयति च । तथाच व्यासः । सृष्ट्यादौ ब्रह्मणो वेदा मुखेभ्यस्स विनिर्गताः । तत्रैव च लयं यान्ति प्रलये समुपस्थिते-इति, तं वेदनिधिं पद्मगर्भं पद्मगर्भः पद्मगर्भः पद्मगर्भादुत्पन्नः । तथाच "विष्णोर्जले शयानस्य नाभेः पद्मं समुत्थितम् । तस्मिन्ब्रह्मा समुत्पन्नस्तेन दृष्टं चराचर-

मिति" तं पद्मगर्भं, परमं स एव देवानां परमं अन्ये देवा अवमाइत्यर्थः । तं परमं तु शब्दो विशेषणार्थः । आदिदेवमिति स एव हि आदौ उत्पन्नः । पश्चादन्ये देवाइति देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा, तमेवं गुणविशिष्टं ब्रह्माख्यं प्रणम्य प्रणामान् कृत्वा प्रकर्षेण नमनं प्रणमनम् नमस्कारं कृत्वेत्यर्थः, ततः किं कृतवानित्युच्यते ऋचां लक्षणमाह शौनकइति परिमितावरपादादिर्ऋचविहिताः मन्त्राः । तथाचोक्तं । यः कश्चित्पदवान्मन्त्रो युक्तश्चाक्षरसंपदा, स्वरयुक्तोऽवसानेन तामृचं प्रतिजानतइति, लक्षणम् च स्वरवर्णाक्षरमात्राइति आह ब्रवीति वदति उच्चारयतीत्यर्थः । शौनकआचार्यो भगवान् शुनकस्यापत्यं शौनकः । नामग्रहणम् स्मरणार्थम् । "यावदस्मिंल्लोके पुरुषः पुण्येन कर्मणा श्रूयते तावदयं स्वर्गे लोके वसतीतिश्रुतिः" तथाचोक्तं, दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणाम् । यावत्स शब्दो भवति तावत्पुरुषउच्यते इतियथा महिदासऐतरेयआहेति यथा च मनुराह प्रजापतिः । ऋचां लक्षणमाहेतीयमाचार्यस्य प्रतिज्ञा, अत ऊर्ध्वं यदुच्यते तत्सर्वमृचां लक्षणम् वेदितव्यं संहिता पदप्रकृतिरित्येवमादि तत्सर्वं ऋचां लक्षणम्, वेदितव्यं यथा अग्न्याधेयप्रभृतीन्याह वैतानिकानि यथाच गृह्याणि वक्ष्यामइति प्रतिज्ञा करोति तथा सर्वत्र वेदि-

तव्यं, एवं शास्त्रादौ नमस्कारं प्रतिज्ञां च कृत्वा शास्त्रप्रयोजनमाह । माण्डूकेयः संहितामित्यादि तथाच "सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् । यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यतामिति" माण्डूकेयश्चाचार्यो भगवान् संहितायां द्यावापृथिव्योः संहितां वायुमाह ब्रवीति, "अथातः संहिताया उपनिषत्पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति मांडूकेयइति" तथाऽऽकाशं वास्यमाण्ड्यएव तथा तयोरेव द्यावापृथिव्योराकाशं च संहिताश्चास्योपासनस्य मांडव्यो नामाचार्यइच्छति चशब्दाद्वायुं च समानतामनिले चाम्बरे च मत्वा ऽऽगस्त्यो विपरिहारं तदेवाह समानतां समाने तुल्ये एते संहिते अनिले चाम्बरे च एवं मत्वा आगस्त्यः अगस्त्यपुत्रः विपरिहारं दत्तवान् तदेव नान्यइतिविविधः परिहारो विपरिहारः । अविपरिहारं मत्वा अपरित्यक्तो वायुराकाशे तत्वे अध्यात्मक्लृप्तौ शूरवीरसुतस्य वाङ्मनसयोर्विवदन्त्या,ऽउत्पूर्वे अध्यात्मक्लृप्तौ शूरवीरः अध्यात्मविषये क्लृप्तिः कल्पना प्राणः संहिता शूरवीरोनामाचार्यस्तस्य सुतस्य विवदन्ति विवादं कुरुतः । वाङ्मनसयोरानुपूर्व्ये क्रमे । कथं अध्यात्मं वाक्पूर्वरूपं मनउत्तररूपं प्राणः संहितेत्येकः अपरस्तद्विपरीतमाह । मनः पूर्वरूपं वागुत्तररूपमिति एवमथातः संहिताया उपनिषदित्यस्यार्थः सूचितः । तस्य प्रयोजनं कि-

ल वक्ष्यति, पूर्वमक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण सा संहितेति, तत्र पृथिव्यां दृष्टिर्वृष्टेः फलं तत्फलप्राप्तिः स्यादिति, वक्ष्यति च स य एवमेतां संहितां यो वेदेति, अथेदानीं संहितापदक्रमस्वरूपमाह "सन्धेर्विवर्तनं निर्भुजं वदन्ति शुद्धाक्षरोच्चारणं च प्रतृण्णं उभयमन्तरेणोभयं व्याप्तमन्ते परे अन्ननाकोभयाख्याः । निर्भुजसंहिताध्ययनमुच्यते, सन्धेर्विवर्त्तनं द्वयोः पदयोरक्षरयोर्वा सन्धिर्मध्यमवकाशोऽन्तरमित्यनर्थान्तरं तस्य सन्धेर्विवर्तनं । अविच्छेदाध्ययनं तन्निर्भुजं वदन्ति आचार्याः पाठकाः । द्विविधा संहिता, अक्षरसंहिता, पदसंहिता च, अत्राक्षरग्रहणमुपलक्षणं वर्णयन्ति सन्धिविहत्या तु निर्भुजं वदन्तीति केचित्पठन्ति अर्थस्तु स एव शुद्धाक्षरोच्चारणं शुद्धे द्वे अक्षरे पदे वा सन्धिमकुर्वता उच्चारणं अभिव्याहरणं तत्प्रतृण्णं, प्रतृण्णं पदाध्ययनमुच्यते उभयं व्याप्तं संहिता च पदं च केनेत्याह, उभयमन्तरेण क्रमाध्ययनेन उभयव्याप्तं स्थितं वेदितव्यं यद्धि सन्धिं विवर्तयति तन्निर्भुजस्य रूपं, अथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्य रूपमग्र उएवोभयमन्तरेणोभय व्याप्तं भवतीति उभयमन्तरेणोभयं व्याप्तमग्रेइति केचित्पठति सएवार्थः । अग्रे प्रथममेव क्रमात् अनेन व्याप्तं भवतीति वेदितव्यं,तथा परे कामा अन्न नाकोभया-

ख्याः । पराः कामा ये उक्ताः अन्नकामः नाककामः स्वर्गकाम इत्यर्थः । उभयकाममन्नकामः स्वर्गकामश्च तथाचोक्तं, अन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्तरेणेति, एतत्सर्वं विज्ञेयमितिवाक्यशेषः । प्राणः षकारे बलं णकारे यच्च, तच्च विविज्ञेयं प्राणस्य षकारः सञ्ज्ञाः" । षकारः प्राणआत्मेतिश्रुते:" । सबलां सप्राणां संहितां वेदायुष्यमितिविद्यात् । बलं णकारः । णकारेण बलवती संहिता, वायोर्हि प्राणस्य बलवत्वं कार्यं, स्पृष्ट करणं षकारः प्राणआत्मा, तथाचोक्तं, ये ऊष्माणः सप्राण इति, तथा णकाराख्येन बलेन बलवती णकारस्य स्पर्शः स्पृष्टं करणं कर्त्तव्यमित्यर्थः । तथाचोक्तं "तस्यै वा एतस्यै संहितां वेदायुष्यमितिविद्यादिति" तथाच" ते यदृहयमनुसंहितस्ऋचो धीमहे, यच्च मांडूकेयीयमध्यायं प्रब्रूम इति" मांडूकेयीयमितिकथमित्युच्यते, अथ वै वयं ब्रूमो निजवक्ताः स्म इतिहस्माह, ह्रस्वो मांडूकेयः पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपेअन्तरेण येन सन्धिं विवर्तयति, येन स्वरात्स्वरं विजानाति येन मात्रामात्रां विभजते सा संहितेति, स यएवमेतां संहितां वेदसन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन न सर्वमायुरेतीतिप्रशंसा वाक्प्राणयोश्च होमः परस्परं, तच्च विज्ञेयं, वाचि

प्राणो हूयते प्राणे च वाग्घूयते। तथाचोक्तं "तद्यदैत-दधीते वा भाषते वा वाचि तदा प्राणो भवति वाक्तदा प्राणं देढि, अथ यत्र तूष्णीं वा भवति स्वपिति वा प्राणे तदा वाग्भवति प्राणस्तदा वाचं देढि। तथाच किमर्था वयमध्येष्यामहे, किमर्था वयं यक्ष्यामहे, वाचि हि प्राणं जुहुमः प्राणे वा वाचं योह्येव प्रभवः सएवाप्ययइति, एवं च संहितोपनिषदि योऽर्थः स एवाचार्येण प्रदर्शितइति विज्ञापनार्थं,शिष्य किल तत्प्रयोजनं वेदे योऽर्थोऽभिहितः स एव शास्त्रे प्रतिबद्धइतिज्ञापनार्थं च, यथा अथात्र्यचउदाहरन्ति यथा चाग्न्याधेयप्रभृतीन्याह वैतानिकानीति यथा" शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोरिति" कथमितिचेत् यदुच्यते वैदिककर्मानुष्ठानात्पुरुषनिश्श्रेयसार्थफलावाप्तिरेष वैदिकः सिद्धान्तः। तत्र विध्यर्थवादाः श्रूयन्ते निन्दाप्रशंसापृष्टाख्यातासाराभीक्ष्णसंप्रश्नसंशयाइति तदुक्तं "विधिर्निंदा प्रशंसा च पृष्टमाख्यातमित्यपि। असाराभीक्ष्णसंप्रश्ना ब्राह्मणे संशयश्च यइति" यस्मात्केवलैर्वेदवाक्यैर्न शक्यतेऽनुष्ठातुं विच्छिन्नत्वाद्वेदवाक्यानां गूढार्थत्वाच्च,अतः कविभिराचार्यैर्वेदार्थकुशलैर्वेदार्थेभ्यो निष्कृष्य कर्मार्थं सुबोधानि इमानि विद्यास्थानानि प्रवर्तितानि, शिक्षा कल्पो व्याकरणं निरुक्तञ् छन्दो ज्योतिषं धर्मशास्त्रम् पुराणं न्यायविस्तरो मीमांसादीनि,

कानि पुनः प्रयोजनानि विद्यास्थानानामनुप्रवर्त्तंते अत आह, शिक्षा स्वरवर्णोच्चारणोपदेशकं शास्त्रम्, कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्, व्याकरणं च शब्दार्थव्युत्पत्तिकरं शास्त्रम्, निरुक्तम् पदविभागमन्त्रार्थदेवतानिरूपणार्थं शास्त्रम्, छन्दो गायत्र्यादीनां छन्दसां ज्ञानशास्त्रम्, ज्योतिषं कालपरिज्ञापनार्थं शास्त्रम्, धर्मशास्त्रमाचाराद्युपदेशकं शास्त्रम्, पुराणं स्थित्युत्पत्तिप्रलयादिसूचकं शास्त्रम्, न्यायविस्तारः प्रमाणैरर्थपरीक्षणं करोति शास्त्रम्, मीमांसा वेदवाक्यार्थविचारणाय शास्त्रम्, इत्येवमादीनि प्रयोजनानि विद्यास्थानानां अतआचार्यो भगवान्शौनको वेदार्थवित् सुहृद्भूत्वा ब्राह्मणेभ्योऽर्थवादानुत्सृज्य विधिं समाहृत्य पुरुषहितार्थमृग्वेदस्य शिक्षाशास्त्रम् कृतवान् इतिप्रदर्शनार्थं वर्णयन्ति अन्यथा वेदार्थो नशक्यते ज्ञातुं, तथाचोक्तम् "न प्रत्यक्षमनृषेरस्ति मन्त्रइति" यथाच" योगेन दाक्षिण्येन दमेन बुध्या बाहुश्रुत्येन तपसा नियुज्यत"इति प्रसङ्गाद्बहु लपितमिदानीं प्रकृतमुच्यते, गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च । लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः, स्वरितोदात्तनीचत्वं श्वासो नादस्तथोभये । वर्णानां गुरुत्वं चाधिक्यं हि यथा गुरूणि दीर्घाणीत्येवमादि, तथा साम्यं समत्वमित्यर्थः । ह्रस्वत्वं दीर्घत्वं लोपश्च, आगमश्च विकारश्च, वर्णानां

लोपो यथा चितृकंभनेन स्कभीयानिति, आगमः । अस्कतोषमिति, विकारः । सुषुमायातमिति, प्रकृतिः । प्रकृत्येतिकरणादौ प्रगृह्याइति यथा प्रो अस्मै, इन्द्राग्नी अपादियमिति, विक्रमः क्रान्तः प्राक्रतोपथइति, याः फलिनीः । अगस्त्यः खनमानः क्रमश्च वेदितव्यः । यथा स्वरानुस्वारोपहितः इति,हित्ववर्णानां यथा आप्रद्रव परावतः । स्वरितत्वं उदात्तत्वं नीचत्वं अनुदात्तत्वमित्यर्थः । यथा उदात्तश्चानुदात्तश्चेत्यादि, श्वासत्वं, नादत्वं,तथोभयत्वं,श्वासनादत्वं,श्वासो घोषाणामित्येवमादि, एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता, एतत्सर्वं यदनुक्रांतं मांडूकेयः संहितामितृयेवमादि, तत्सर्वं विज्ञेयं विविधं वेदितव्यमित्यर्थः, केनेत्यतआह छन्दोभाषां योऽधीते नेत्यर्थः । नान्येन द्विविधा हि भावा लौकिको वैदिकी च, या वैदिकी सा छन्दोभाषेत्युच्यते, "यथाचोक्तं लोकवेदयोरिति" । विज्ञेयमितिसर्वत्रानुषज्यते पुरस्तादुपरिष्टाच्च । छन्दोज्ञानमाकारं । भूतज्ञानं छन्दसा व्याप्तिं स्वर्गामृतप्राप्तं । छन्दसां ज्ञानंछन्दोज्ञानं यथा गायत्र्यादि । तथा छन्दसामाकारं श्वेतादि । भूतज्ञानं छन्दसां यथा सर्वाणि भूतानि मनोगतिश्चेत्यादि । तथा छन्दसां व्याप्तिं । यथा गुर्वक्षराणां गुरुवृत्तिसर्वमित्यादिस्वर्गप्राप्तिं चामृतप्राप्तिं च स्वर्गामृतत्वप्राप्तिः यथा "स्वर्गं जयत्येभिरथामृतत्वमि-

त्यादि" । तत्र विज्ञेयं यस्मात् तस्मात् । अस्य ज्ञानार्थं इदमुत्तरत्र वक्ष्यते, शास्त्रम् अखिलं शैशरीये । अस्य कस्य मांडूकेयः संहितामित्येवमादेरनुक्रांतस्य ज्ञानार्थं ज्ञानप्रयोजनार्थेत्यर्थः । इदं शास्त्रम् पार्षदाख्यं अखिलं संपूर्णं कृत्स्नं उत्तरत्रवक्ष्ये वक्ष्यामइत्यर्थः । शैशरीये पारायणपाठे इतिवाक्यशेषः । शैशरीयायां संहितायामित्यर्थः । शैशरीया संहिता तद्दृष्टत्वात् । तथा पुराणे उक्तं । मुद्गलो गोखलो वात्स्यः शालीयः शिशिरि"स्तथा । पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्त्तकाइति । तथा च । ऋग्वेदे शैशरीयां संहितामिति, यथा ऋग्वेदे पारायणे शाकल्ये शैशरीयकमिति च, पदक्रमविभागज्ञो वर्णक्रमविचक्षणः । स्वरमात्राविशेषज्ञो गच्छेदाचार्यसंपदं । पदानां क्रमः पदक्रमः । अनुपरिपाट्या संहिता, पदसंहिता वर्णसंहिता च, वर्णानां क्रमोवर्णक्रमः । वर्णसंहिता विचक्षणइत्यर्थः । अथवाऽन्यथा योजना । पदानां क्रमस्य च पदाध्ययनस्य च विभागो विविधो भागो विभागः । एवं यो जानाति स च पदक्रमविभागज्ञः वर्णक्रमविचक्षणइति संहिताध्ययनविचक्षणइत्यर्थः । एवमध्ययनत्रितयं च प्रकृतं निर्भुजं प्रतृण्णं उभयमुत्तरं च तस्मादेवमुच्यते । स्वरमात्राविशेषज्ञः । स्वराश्च मात्राश्च स्वरमात्राः । स्वरा उदात्तादयः । मात्रा ह्रस्वादयः । एवं विशेषं योजना-

-नाति सगच्छेद्व्रजेत्। ब्रगच्छेदित्युच्यते। आचार्यसंपदम् आचार्यत्वं कुर्यादित्यर्थः। अन्यथा अधिकार्येव न भवति। तथाचोक्तं याजनाध्यापनाभ्यासच्छन्दसायातयाम च। "स्थाणुं वर्च्छति गर्त्तं वा पात्यते प्रमीयते वेत्यादि" तथाचोक्तम्। "वटवः पण्डिता मूर्खा अन्योन्याध्यापकाश्च ये। दोषं कुर्वंति ते मूढास्तस्माद्वृद्धं तु सेवयेदिति"। अथवा गच्छत्याचार्यसंसदमितिपाठः। गच्छति व्रजति प्राप्नोति आचार्याणां संसदं सभास्थानम् सुमंत्वादयआचार्या यत्र तिष्ठंति तत्रेत्यर्थः एवं वृद्धप्रशंसा। यथा ऋङ्मयो यजुर्मयः साममयइति। यथा च स य एवमेतां संहितां वेदेति। एवं शास्त्रप्रयोजनमुक्त्वा शास्त्रसंव्यवहारार्थं वर्णक्रमार्थं चाक्षरसमाम्नायमाह ॥

अकारर्कारौविउएओऐऔ ॥

अकारश्च ऋकारश्च अकारर्कारौ। अऋइति अथ इकारश्च उकारश्चएकारश्च ऐकारश्च औकारश्चेति। इउएओ इति एवमनेन क्रमेणाष्टौ वर्णा वेदितव्याः ॥

पदाद्यंतयोर्न लृकारःस्वरेषु ॥

पदस्य आदौ अन्ते च लृवर्णः स्वरेषु न गृह्यते। पदमध्ये भवतीति वेदितव्यं। उत्तरत्रापि विचारयिष्यामः ॥

आकारादीन्दीर्घरूपान्द्वितीयान्ह्र-स्वेषु ॥

अकारादयो ह्रस्वा उक्ताः तेषु तेषु ह्रस्वेषु आकारादयो दीर्घरूपाः । तान्द्वितीयान्विजानीयात् । किमुक्तं भवति । अकारो ह्रस्वः तस्य आकारो दीर्घो द्वितीयः । तथाऋकारो ह्रस्वस्तस्य ॠकारो दीर्घो द्वितीयः । तथा इकारो ह्रस्वः तस्य ईकारो दीर्घो द्वितीयः । तथा उकारो ह्रस्वः । तस्य ऊकारो दीर्घो द्वितीयः । अआऋॠइईउऊइत्येतत्सिद्धं भवति ॥

पञ्चस्वपि तानि सन्ति ॥ २ ॥

तानि कानि दीर्घाणीत्यर्थः । पञ्चस्वपि ह्रस्वेषु द्वितीया भवन्ति किंपुनश्चतुर्षु । अपि शब्दो लृकारस्य विकल्पार्थः । यदि दीर्घो वर्त्तते । वक्ष्यति ऋकारलृकारावि॑ति । तथा ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णाविति ॥

कखौ गघौङः ॥

ककारश्च खकारश्चकखौ । तथा गकारश्च घकारश्च गघौ । ङकारश्च कखगघङः । एवं पञ्चभिर्वर्णैः प्रथमः पञ्चवर्गो वेदितव्यः ॥

चछौ जझौ ञः ॥

चकारश्च छकारश्च चछौ। जकारश्च झकारश्च जझौ। ञकारश्च चछजझञः, एवं पचभिर्वर्णैर्द्वितीयः पञ्चवर्गः ॥

टठौडढौ णः॥

टकारश्च ठकाश्च टठौ । डकारश्च ढकारश्च डढौ णकारश्च टठडढणः एवं पञ्चभिर्वर्णैस्तृतीयः पञ्चवर्गः ॥

तथौ दधौ नः॥

तकारश्च थकारश्च तथौ । दकारश्च धकारश्च दधौ नकारश्च तथदधनः एवं पञ्चभिर्वर्णैः चतुर्थः पञ्चवर्गः ॥

पफौ बभौ मः॥

पकारश्च फकारश्च पफौ। बकारश्च भकारश्च बभौ मकारश्च पफबभमः एवं पञ्चभिर्वर्णैः पञ्चवर्गः ॥

यरलवाः॥

यकारश्च रेफश्च लकारश्च वकारश्च यरलवा एते चत्वारो वेदितव्याः ॥

हशषसाः॥

हकारश्च शकारश्च षकारश्च सकारश्च हशषसाः एते चत्वारः अनेन क्रमेण वेदितव्याः ॥

अः ꣵकः ꣶपः अम् ॥

अ इति विसर्जनीयः । ꣵक इति जिह्वामूलीयः, ꣶप इत्युपध्मानीयः, । अं इत्यनुस्वारः । एवमपरे चत्वारः अनेन क्रमेण वेदितव्याः ॥

इति वर्णराशिक्रमश्च ॥ ३॥

इत्येवमुक्तक्रमेण प्रकारेण वर्णराशिर्वेदितव्यः । अकाराद्यनुनासिकान्तः । वर्णानां राशिः सङ्घातः समूहः वर्णकोशः वर्णसमाम्नायइत्यनर्थान्तरं । वर्णक्रमश्च अयमेव वेदितव्यः । उक्तप्रकारेण । वक्ष्यति । ऋकाराद्यो दशनामिनः स्वराइति । तथा परश्चैकारमोजयोः, ओकारं युग्मयोरिति । अन्त्याः सप्त तेषामघोषाइति । तथा प्रथमपञ्चमौ च द्वावूष्मणां इत्येवमादिष्वयं क्रमो वेदितव्यः ॥

इति श्रीदेवमित्रसुतविष्णुमित्रकृते-
प्रातिशाख्ये वर्गद्वयवृत्तिः ॥

एवं वर्णसमाम्नायमुक्त्वा तत्र लघुनोपायेन सञ्ज्ञापरिभाषाभ्यां शास्त्रे संव्यवहारसिद्धिं मन्यमानः सञ्ज्ञासञ्ज्ञिसम्बन्धार्थमाह । अष्टौ समानाक्षरमित्यादि । इतिपरावरं ब्रह्मणीत्यारभ्य सकलदेशीयवैदिकैः पठ्यमानस्य वर्गद्वयस्य व्याख्या । अथ भाष्य-

म् । नमो भगवते मङ्गलेश्वरश्रीमद्दिव्यलक्ष्मीनृसिंहाय । श्रीवेदपुरुषाय नमः ॥

अष्टौ समानाक्षराण्यादितः ॥ १ ॥

किमर्थमिदमारभ्यते । शिक्षाछन्दोव्याकरणैः सामान्येनोक्तलक्षणः तदेवमिहशाखायामिति शास्त्रप्रयोजनं । प्रातिशाख्यप्रयोजनमनेन श्लोकेनोच्यते । शिक्षादिभिर्यत्सामान्येनोत्सर्गेणोक्तम् लक्षणम् । यथा तावच्छिक्षायां "ऋमूर्द्धन्यारटुरषा" । सामान्येन सर्वशाखासु रेफो मूर्द्धन्यइत्युक्तः । तथाऽन्यस्यां शिक्षायां दन्तमूलीयउक्तः । एवं सर्वाः शिक्षा वर्णेषु स्थानकरणानुप्रदानादिसर्वासु शाखासु विदधाति । न तु नियमतः । कस्यां शाखायां रेफो मूर्द्धन्यः कस्यां दन्तमूलीयइति । अतएतद्व्यवस्थापकमारभ्यते । दन्तमूलीयस्तु तकारवर्गः । सकाररेफलकाराश्च रेफं वर्त्स्यमेके । एवमस्यां शाखायां दन्तमूलीयो वा वर्त्स्यो वा रेफइत्येतदवधारितम् । तथा सर्वैश्छन्दोविचित्यादिभिः पिङ्गलयास्कसैतवप्रभृतिभिर्यत्सामान्येनोक्तम् लक्षणम् । तथा षट्सप्तत्यक्षरा चातिधृतिर्भवति । तथाच तत्रैवोक्तं "। (१)पादः" । "इत्यादिपूरणः" एवं सामान्यलक्षणे "सतिसह्हि शक्वरी न मारुतमिति" चातिछन्दसि अ-

---

(१) पिङ्गलाचार्यकृतछन्दःसूत्रे स्तः ॥

ष्टापदायां ऋचि सन्देहः किमियं अष्टापद्यक्षरा अत्यष्टिः पादानामविकर्षेण । आहोस्वित्पादानां विकर्षेणातिधृतिः । अस्मिन्सन्देहे इदम् विप्रुषलक्षणमारभ्यते । "सखेचसहिमर्द्दस्य मध्यमो वर्ण उच्यते" । इत्येवमस्यां शाखायां पादविकर्षेणातिधृतिरियं तथा व्याकरणेयत्सामान्येन । यथा "ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति" । अस्यार्थः । ऋग्विषये तु नुघमक्षुतङ् आख्यातानि पिपृतगायतइत्येवमादीनि तङ्शब्देनगृह्यन्ते कुत्र उरुष्याणएतानि व्यञ्जने परे दीर्घमापद्यन्ते, तु आतून इन्द्र, घ आघाये अग्निं । मक्षूमक्षूराणुहि इत्यादि तद्व्यवस्थापयितुमिदमारभ्यते । न सर्वमेतानि पदानि अस्यां शाखायां दीर्घा भवन्ति, यथा, तु तत्सुप्रयः प्रतथा, नु अधिश्रोचानुसुन्वते, घ आघत्वावांतमनाप्तः । ननु मक्षुशब्दस्य सामान्यलक्षणेनैव दीर्घभाव उक्तः । नचात्रापवादोऽस्ति तत्र ह्येवं पठ्यते, "मक्ष्वित्युकारः प्लवते सर्वत्राऽप्यपदांतभाक्" अतो मक्षुशब्दस्य व्यर्थं प्रयोजनं नैषदोषः, सामान्यलक्षणानुवादेनैव विशेषलक्षणम् विधातुं शक्यते नान्यथा सोऽयं मक्षुशब्दस्यानुवादो द्रष्टव्यः । एवमन्यत्रापि सामान्यविशेषलक्षणसाम्ये परिहारोद्रष्टव्यः । एवं भिन्नाच्छन्दोव्याकरणैर्यत्सर्वेषु शाखासु सामान्येन लक्षणमुच्यते तदेवास्यां शाखायामनेन व्यवस्थाप्यत इत्येतत्प्रयोजनमस्यांमस्य तथा चाथर्वणप्रातिशाख्ये" इद-

मेवप्रयोजनमुक्तं "एवमिहेति च विभाषासामान्येन" अस्य सूत्रस्यार्थः । सामान्येन लक्षणेन यद्विकल्पप्राप्तं तदेवं अस्यां शाखायां व्यवस्थितं भवतीति प्रातिशाख्यप्रयोजनमुक्तं । अथवा नैवैतदङ्गं शिक्षाछन्दोव्याकरणैः सामान्येनोक्तलक्षणस्य विशेषव्यवस्थापकं किं तु स्वतंत्रमेवैतदन्यच्छास्त्रनिरपेक्षं, तथाहि शिक्षाछन्दोव्याकरणैर्यन्न विहितं तदिह विधीयमानं दृश्यते यथा क्रमः । क्रमहेतुः । पारायणमित्येवमादिकं, अङ्गता चास्यान्यशास्त्रसव्यपेक्षस्य नैव स्यादकारणत्वात्, कृत्स्नतां वेदाङ्गानां अनियतामार्षतां च स्वयमेवशौनको दर्शयिष्यति 'कृत्स्नं च वेदाङ्गमनियमार्षमिति, अनयोः पक्षयोर्यतरः पक्षः । शेषान् ततरोग्राह्यः । उक्तं शास्त्रप्रयोजनं, प्रथमपटले तु संज्ञाः परिभाषाश्चोच्यते, तदर्थमिदमारभ्यते । अष्टौ समानाक्षराण्यादितः । अष्टाविति संख्या, समानाक्षराणीति संज्ञा, आदित इति पञ्चमी पञ्चम्यास्तसिलिति हि वैयाकरणाः पठन्ति, अयकोऽर्थः । आदित आरभ्य वर्णसमाम्नायस्याष्टाक्षराणि समानाक्षरसंज्ञकानि भवन्ति, यथा अ आ ऋ ॠ इ ई उ ऊ समानाक्षरसंज्ञायाः प्रयोजनं 'समानाक्षरे सस्थानइति' अथवा आदित इति नैवायं पञ्चम्यर्थे तसिल् किन्तर्हि सप्तम्यर्थं तत्रापि हि लक्षणम् स्मर्यते तसिल्प्रकरणे "आद्यादिभ्य उपसङ्ख्यानमिति" । तत्र चैतान्युदाहरणानि, आदितो म

ध्यतः पृष्ठतइति यतोऽयं सप्तम्यर्थ एव अस्मिन्पक्षे एषा। वर्णसमाम्नायस्यादौ अष्टाक्षराणि समानाक्षरसंज्ञकानि भवन्ति ॥

ततश्चत्वारि संध्यक्षराण्युत्तराणि ।

ततस्तेभ्यः समानाक्षरेभ्य उत्तराणि चत्वारि संध्यक्षरसंज्ञकानि भवन्ति, अकारस्य इकारेण उकारेण एकारेण ओकारेण च सह सन्धौ यान्यक्षराणि निष्पद्यन्ते तानि तथोच्यते यथा एओऐऔ संध्यक्षरसंज्ञायाः प्रयोजनं, 'संध्यानि संध्यक्षराण्याहुरेकइति, ततइत्यनयैव पञ्चम्या संध्यक्षराणां समानाक्षरैः सहानन्तर्ये सिद्धे यदुत्तराणीति वदति तदन्तरा लृलॄइत्यनयोः स्वरयोः प्रतिषेधार्थं तथाच यत्नं करिष्यति । ऋकारादयो दश नामिनः स्वराइति ॥

एते स्वराः ॥

यएते समानाक्षरसंध्यक्षरसंज्ञका वर्णाः ते द्वादश स्वरसंज्ञा वेदितव्याः । उदात्तानुदात्तस्वरितप्रचयाएष्वक्षरेषु स्थिताः, स्वर्यंते शब्द्यन्तइतिस्वराः । यथा अआऋॠइईउऊएऐओऔइति । स्वरसंज्ञायाः प्रयोजनं, 'स्वरानुस्वारोपहितो द्विरुच्यतइति, ननु कथं वर्णसमाम्नायमनुपदिश्यैवाष्टौ समानाक्षराण्यादितइति उपदिष्टस्य हि व्यपदेशएवमुपपद्यते आदितइति ना-

नुपदिष्टस्य तथा चत्वारि संध्यक्षराण्युत्तराणीत्युत्तरव्यपदेशो नैव घटते नैषदोषः । उपदिष्टो वर्णसमाम्नायो लौकिको विद्यते, तत्र यावन्तो वर्णा अस्यां शाखायामुपयोक्ष्यन्ते तावतां संज्ञां कर्त्तुं तमेव वर्णसमाम्नायमुरीकृत्याद्याष्टौ समानाक्षराण्यादितः । तथा तामेवानुपूर्वीमङ्गीकृत्य चत्वारि संध्यक्षराणीति उत्तरशब्दमाह, ननु यदि लौकिकोऽत्र वर्णसमाम्नायो गृह्यते एवं तर्हि तयाऽऽनुपूर्व्या भवितव्यं, तत्र च ऌकारात्परौ ऋकारॠकारौ समामनन्ति उऊऋॠइति तथा ऐकारात्पूर्वमेकारं ऊकारात्पूर्वमोकारं एऐओऔइति, सकारात्परं हकारं समामनन्ति शषसहइति । सत्यं, आचार्यप्रवृत्त्या क्रमोऽन्यथाऽनुमीयते तद्यथा ऋकारादयो दशनामिनः स्वराइति, यद्याकारात्परौ पठ्यते तदानीं दश नामिनः स्वराः संपद्यन्ते, तथा सन्ध्येष्वकारोऽर्द्धमिकारे, उत्तरं युजोरुकारइति, यदि एओऐऔ एवं पाठो भवति तदानीं युजोरुत्तरमर्द्धमुकारः सम्पद्यते, तथा यदि शकारात्पूर्वो हः पठ्यते तदानीं ह स्पृष्टं वा प्राग्घकाराच्चतुर्णामयं पाठक्रमउपपद्यतइति, सोऽयमाचार्यप्रवृत्त्या पाठक्रमोऽनुमीयमानो लौकिकवर्णसमाम्नायस्य द्विधा पाठं गमयति, अतोऽयं लौकिको वर्णसमाम्नायो गृह्यते तथा तयाऽनुपूर्व्या तन्न दुष्टमिति, उभे अप्येते आनुपूर्व्यौ लौकिकस्य वर्णसमाम्नाय-

स्य दृष्टव्ये ॥

इपरो दीर्घवत् प्लुतः ॥

इकारपरः प्लुतो दीर्घवत्प्रत्येतव्य. सर्वसादृश्यार्थः । यथा इकार इतिना सह सन्धौ दीर्घमेकमीकारं निरनुनासिकमापद्यते, तथाऽयमपि प्लुत ईकारं निरनुनासिकमापद्यतइत्यर्थः, क्रमसंहितायां परिग्रहस्य पूर्वे वचने ईत्वभूतो भवति द्वितीयेऽनुनासिकस्त्रिमात्रश्च, यथा विन्दतीतिविन्दती ॥ ३ ॥

अनुस्वारो व्यञ्जनं वा स्वरो वा ॥

अं इत्यनुस्वारो वर्णसमाम्नाये पठ्यते । स कांश्चित्स्वरधर्मान् गृह्णाति । कांश्चिद्व्यञ्जनधर्मान् । तद्यथा ह्रस्वत्वं दीर्घत्वं प्लुतत्वमुदात्तत्वं स्वरितत्वमिति स्वरधर्माः । तथाऽर्द्धमात्राकालता स्वरवर्णेनोदात्तानुदात्तस्वरितत्वं संयोगश्चेति व्यञ्जनधर्माः । तत्रोभयधर्मयोगादुभयस्वभावं स्वरव्यञ्जनयोरन्यद्वर्णान्तरं प्रकाशयति । अनुस्वारो व्यञ्जनं वा स्वरो वेति वर्णस्वरूपकथनेन प्रयोजनं । तेन स्वरग्रहणेन च न गृह्यते । अनुस्वारो व्यञ्जनग्रहणेन न गृह्यते । एके वर्णाञ्छास्त्रतिकान्नकार्यानित्यत्र वर्णग्रहणेनानुस्वारोऽपि गृह्यतइति । ननु सर्वः शेषो व्यञ्जनान्येवेति व्यञ्जनग्रहणेनानुस्वारग्रहणमस्तु । कोगुणइतिचेत् । सूत्र-

मेतन्नारब्धव्यं स्यात् । व्यञ्जनग्रहणेन ग्रहणात् । "स-व्यञ्जनः सानुस्वारः शुद्धो वेति" । अनुस्वारो व्य-ञ्जनं चाक्षरांगमिति । संयोगानुस्वारपराणि यानी-त्येवमादिसूत्रेष्वनुस्वारग्रहणं न कर्त्तव्यं स्यात् । व्य-ञ्जनग्रहणेनैव सिद्धत्वात् । स्वरानुस्वारोपहितो द्विरु-च्यते, संयोगादिरित्यत्रानुस्वारस्य व्यञ्जनत्वे इत्यपि वचनात्परस्य संयोगादेर्द्विरुक्तिर्भविष्यति ननु अनु-स्वारस्यैवेत्येवमनुस्वारस्य व्यञ्जनत्वेन सर्वमभिप्रेतं सि-ध्यति । अतो व्यञ्जनग्रहणेनैवानुस्वारग्रहणं भवतु कि-मनेन योगेनानुस्वारो व्यञ्जनं वा स्वरो वेति । सत्यमे-तत् यदि नामानुस्वारस्य स्वरूपं न कथितं स्यात् । तस्मात्स्वरव्यञ्जनातिरिक्तमन्यद्वर्णान्तरमेतदित्येतत्ख्या-पनपरमेवैतत्सूत्रमितिसिद्धान्तितम् ॥

सर्वः शेषो व्यञ्जनान्येव ॥

उपयुक्तेतरवचनः शेषशब्दः स्वरानुस्वारव्यतिरिक्तः स-र्वः शेषो वर्णराशिर्व्यञ्जनसञ्ज्ञको वेदितव्यः ॥ व्य-ञ्जयन्ति प्रकटान्कुर्वन्त्यर्थानिति व्यञ्जनानि सर्वशब्दो-पमादीनां परिग्रहणार्थः । तेषां यद्यप्यत्र सञ्ज्ञाधि-कारे ग्रहणं न कृतं तथापि स्थानाधिकारे ग्रहणं कृतमेव । नासिक्ययमानुस्वारानिति । लृकारस्य मा-त्रिकस्य ऌकारस्य लुतस्य च सर्वशब्देन ग्रहणं न भ-

रिष्यति । स्वरशब्देन ग्रहणात् । धातौ स्वरः कल्पयताल्लृकारइति लृकारस्य स्वरसञ्ज्ञा । तथा तिस्रः प्लुतवच्च्यै स्वरइतिप्लुतस्य स्वरसंज्ञा । अतश्च स्वरग्रहणेनैव ग्रहणाद्व्यञ्जनत्वं भवति । व्यञ्जनान्येवेत्यवधारणं । अनुस्वारस्योभयरूपतामुज्ज्वलयति । व्यञ्जनसञ्ज्ञाप्रयोजनं 'दीर्घं ह्रस्वो व्यञ्जनइति' ॥

तेषामाद्याः स्पर्शाः ॥

तेषां व्यञ्जनानामाद्या वर्णाः । स्पर्शसञ्ज्ञका वेदितव्याः । स्पृष्टकरणाः स्पर्शाः । कादयो मान्ताः । स्पर्शसञ्ज्ञाप्रयोजनं, स्पर्शाः पूर्वे व्यञ्जनान्युत्तराणीति ॥

पञ्च ते पञ्चवर्गाः ॥

ते च स्पर्शाः पञ्चवर्गाः पञ्चभिः स्पर्शैर्वर्ग एषामिति पञ्चवर्गाः कियन्तस्ते वर्गाइतिपञ्च । तथा कखगघङ चछजझञ । टठडढण । तथदधन । पफबभम । वर्गसञ्ज्ञाप्रयोजनं 'वर्गे वर्गे च प्रथमावघोषौ,इति ॥

चतस्रोऽन्तस्थास्ततः ॥

ततस्तेभ्यः स्पर्शेभ्योऽनन्तराश्चतस्रोऽन्तस्थासञ्ज्ञका वर्णा यरलवा वेदितव्याः । स्पर्शोष्मणां अन्तर्मध्ये तिष्ठन्तीति अन्तस्थाः, व्यञ्जनान्येवैतानि स्त्रीलिङ्गानि निर्दिष्टानि यथा यरलवाः । अन्तस्थसञ्ज्ञाप्रजोजनं । अन्त-

स्थासु रेफवर्ज्जं परास्विति ॥

उत्तरेऽष्टाऊष्माणः ॥

अन्तस्थाभ्य उत्तरेऽष्टौ ऊष्माणो वेदितव्याः । ऊष्मा वायुस्तत्प्रधाना वर्णा ऊष्माणः यथा ह्शषसाः ᳵ: ᳶ: अंइति । ऊष्मसञ्ज्ञाप्रयोजनम् 'तमेवोष्मणामूष्मणीति' । यस्तु चतस्रोऽन्तस्था तत उत्तरे इत्येवं सूत्रमिच्छति तस्य चतस्रोऽन्तस्थास्तत इत्यनयोः पदयोस्त्रीलिङ्गबहुवचनान्तत्वात् उत्तर इत्यस्य पदस्य पुल्लिङ्गबहुवचनान्तत्वात्सम्बन्धो दुर्लभः । अतश्चतस्रोऽन्तस्थास्तत इत्यत्रैव सूत्रच्छेदः ॥

अन्त्याः सप्त तेषामघोषाः ॥

तेषामेवोष्मणामन्त्याः सप्तोष्माणोऽघोषसञ्ज्ञा वेदितव्याः । यथा शषसाः ᳵ: ᳶअंइति । अघोषसञ्ज्ञाप्रयोजनं 'अघोषे रेफरेफो चेति' ॥

वर्गे वर्गे च प्रथमावघोषौ ॥

वर्गे वर्गे प्रथमद्वितीयौ वर्णौ अघोषसञ्ज्ञौ वेदितव्यौ । यथा कखचछटठतथपफेति । पारिशेष्यादन्यानि घोषवत्सञ्ज्ञानि व्यञ्जनानि ॥

युग्मौ सोष्माणौ ॥

वर्गे इतिवर्त्तते । युग्मौ द्वितीयचतुर्थौ वर्णौ सोष्मा-

णौ वेदितव्यौ । अन्वर्थञ्चेयं । ऊष्मा वायुस्तेन सहवर्त्तत इति सोष्माणः । यथा । खघछझठढथधफभेति । सोष्मसञ्ज्ञाप्रयोजनं 'सोष्मा तु पूर्वेण सहोच्यत' इति ॥

अनुनासिकोऽन्त्यः ॥

वर्गे वर्गे इतिवर्त्तते । प्रतिवर्गमन्त्यो वर्णः अनुनासिकसञ्ज्ञो वेदितव्यः । ङञणनमेति । अनुनासिकसञ्ज्ञाप्रयोजनं' परेषु स्पर्शेष्वनुनासिकेष्विति' इयमन्वर्थसञ्ज्ञा । नासिकां अनु यो वर्णो निष्पद्यते स्वकीयस्थानमुपादाय स द्विस्थानोऽनुनासिक इत्युच्यते । तथाचोक्तं "मुखनासिकावचनोऽनुनासिकइति' ॥

तस्मादन्यमवसाने तृतीयं गार्ग्यस्पर्शम् ॥

ऊष्मान्तस्थासोष्मेत्यत्र प्रथमतृतीयपञ्चमान्स्पर्शान् पदान्तीयान्वक्ष्यति । तत्र प्रथमतृतीयविकल्पार्थमिदमारभ्यते । तस्मादनुनासिकादन्त्यात्स्पर्शादन्यं पदावसाने वर्त्तमानं स्पर्शं गार्ग्य आचार्यः स्वं तृतीयं मन्यते । तथा वाग् । षड् तद् । ककुब् । तस्मादन्यमितिकिं । तान् । तम् ॥

प्रथमं शाकटायनमः ॥

शाकटायनश्चाचार्यः प्रथमं मन्यते । यथा वाक् । षट् । तत् । ककुप् ॥

ओजा ह्रस्वाः सप्तमान्ताः स्वराणाम् ॥

ओजा विषमाः स्वराणां मध्ये ह्रस्वसञ्ज्ञा वेदितव्याः । सप्तमपर्यंताः यथा अऋइउइति । ह्रस्वसञ्ज्ञाप्रयोजनं 'ह्रस्वपूर्वस्तु सोभारमिति' ॥

अन्ये दीर्घाः ॥

ह्रस्वसञ्ज्ञकेभ्यो येऽन्ये स्वरा दीर्घसञ्ज्ञा वेदितव्याः । यथा आॠईऊएओऐऔइति । दीर्घसञ्ज्ञाप्रयोजनं 'दीर्घं ह्रस्वो व्यञ्जनइति' ॥

उभये त्वक्षराणि ॥

येइह ह्रस्वदीर्घसञ्ज्ञाः स्वरा निर्द्दिष्टा, यौ च वक्ष्यमाणकौ स्वरौ, यातौ स्वरः कल्पयतालृकारइति तिस्रः प्लुतउच्यते स्वरइति लृकारईप्लुतौ एते उभये तु अक्षरसञ्ज्ञा वेदितव्याः । यथा अआऋॠइईउऊएओऐऔइति लृई इति । ननु कस्मात्प्राकृता एव स्वरा दीर्घा ह्रस्वाश्च उभयग्रहणेन नान्तर्भाव्यते, येनासौ व्यवहितावपि लृकारप्लुतौ उभयग्रहणेनान्तर्भाव्येते इति । शृणु । तन्त्रान्तरे "स्वरोऽक्षर"मिति स्वरमात्रस्याक्षरसञ्ज्ञा विधीयते । अयमपि "सव्यञ्जनः सानुस्वा-

रः शुद्धो वाऽपि स्वरोऽक्षरमिति" स्वरस्याक्षरसञ्ज्ञां विधास्यति । नचाक्षरसञ्ज्ञां विनोदात्तादयः स्वरास्तदाश्रयाः स्युस्तउच्यन्तेऽक्षराश्रयाइतिवचनात् । किं च गुरुलघुपूर्वांगपराङ्गचिन्तामक्षरस्यैवेदानीं वक्ष्यति । तस्मादक्षरसञ्ज्ञाप्राप्त्यर्थं इह लृकारप्लुतौ तूभयशब्देनान्तर्भाव्येते, न तु प्राकृताएव ह्रस्वदीर्घाः स्वरा इति । अक्षरसञ्ज्ञाप्रयोजनं 'यकाराद्यक्षरं परमिति' ॥

गुरूणि दीर्घाणि ॥

यानि दीर्घाण्यक्षराणि तानि गुरुसञ्ज्ञकानि वेदितव्यानि । प्लुतस्याप्यत्र ग्रहणं द्रष्टव्यं । यो हि द्विमात्रं गुरुं कल्पयति, कल्पयत्येवासौ त्रिमात्रमपीति । यथा आ ऋॄ ई ऊ ए ओ ऐ औ इति । गुरुसञ्ज्ञाप्रयोजनं 'गुर्वक्षराणां गुरुष्वीति' ॥

तथेतरेषां संयोगानुस्वारपराणि यानि ॥

यथा दीर्घाणि गुरुसञ्ज्ञकानि तथेतरेषां ह्रस्वानामक्षराणां यानि संयोगपराणि यानि चानुस्वारपराणि तानि गुरुसञ्ज्ञकानि भवन्ति । सँय्योगपराणि प्रप्रवस्त्रिष्टुभमिति । अनुस्वारपराणि । वसुं स्तू-

नुं सहसो जातवेदसमिति, त्वं सोमासिसत्पतिः । पारिशेष्यादन्यानि लघुसञ्ज्ञकानि । 'संहितायां लघोर्लघुरिति' संव्यवहारदर्शनाच्च । ऋषभं मासमानामित्युदाहरणं । नन्वेवं विसर्गपरस्य लघोर्गुरुसञ्ज्ञा न स्यात् । माभूत् । पादमध्ये तु व्यञ्जनपरस्य विसर्गातस्य संयोगपरत्वादेव गुरुसञ्ज्ञासिद्धेः । इतरत्र त्वस्मिन्शास्त्रेऽनुपयुक्तत्वात् । यद्वा नः कारे च गुरावपीति ज्ञापकात् विसर्गपरस्यापि लघोर्गुरुसञ्ज्ञासिद्धेरिति ॥

अनुस्वारो व्यञ्जनं चाक्षराङ्गम् ॥

एवमष्टौ समानाक्षराणीत्यादिना वर्णसमाम्नायमनुक्रम्य सञ्ज्ञां च विधाय ततः 'सर्वः शेषो व्यञ्जनानीत्यादिना' व्यञ्जनगताः सञ्ज्ञाः कृत्वाऽनंतरं 'ओजा ह्रस्वाः सप्तमान्ताः स्वराणा'मित्यादिनाऽक्षरगताः सञ्ज्ञाः कृत्वाऽधुनाऽक्षरव्यञ्जनसंनिकर्षे किं कस्याङ्गमित्येतन्निरूपणायाह । अनुस्वारो व्यञ्जनं चाक्षराङ्गं स्वराङ्गमित्यर्थः । अत्र यानि स्वरमध्यगतानि व्यञ्जनानि न भवन्ति । तान्युदाहरणं प्रहृत्यत्र पकाररेफावकारस्याङ्गं । वर्क्तेत्यत्र वकाररेफककारा अकारस्याङ्गं । चक्रं यदित्यत्र ककाररेफानुस्वारा अकारस्याङ्गं । अव्यञ्जनत्वादनुस्वारस्य ग्रहणं । अङ्गसञ्ज्ञाप्रयोजनं यानि यस्य स्वरस्याङ्गभूतानि व्यञ्जनानि तानि तेनैव

स्वरेण समानस्वराणि भवन्ति । तथाचोक्तं । "स्वरउ-च्चः स्वरो नीचः स्वरः स्वरितएव च । स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरमिति" ॥

स्वरान्तरे व्यञ्जनान्युत्तरस्य ॥

एवं तावद्यत्रैकः स्वरस्तत्र पूर्वाणि पराणि च व्यञ्जनानि तस्यैवांगंभवति । अथ पुनर्यानि स्वरयोर्मध्यगतानि तानि किं पूर्वस्योतोत्तरस्याङ्गमित्यस्मिन् सन्देहे तु इदमारभ्यते । स्वरयोरन्तरे यानि व्यञ्जनानि तान्युत्तरस्यैवाङ्गं भवन्ति । न पूर्वस्य । यथा अयं इति । अयं शब्दस्त्वन्तोदात्तत्वात् यकारउदात्तवत् श्रूयते । अयं देवाय जन्मन इत्यत्र तथैव एकारस्यानुदात्तत्वादङ्कारोऽनुदात्तवच्छ्रूयते । यथा गायन्तित्वेति अकारस्य स्वरितत्वाद्यकारः स्वरितएव श्रूयते ॥

पूर्वस्यानुस्वारविसर्जनीयौ ॥

स्वरान्तरे वर्तमानौ पूर्वस्य स्वरस्याङ्गं भवतः यथाऽनुस्वारस्योदाहरणं भवति, वसं सूनुं सहसः । विसर्जनीयस्य । नृः पात्रम् । न्हः प्रणेत्रमित्येवमादि ॥

संयोगादिर्वा ॥

संयोगादिभूतो वर्णः स्वरान्तरे वर्त्तमानः पूर्वस्य वा स्वरस्याङ्गंभवति । परस्य वा । यथा हुत्वा रथमि-

ति द्वौ तकारौ वकारश्च संयोगः । तत्र क्रमजः प्रथमस्तकारः पूर्वस्याङ्गं तस्य चोदात्तत्वादुदात्तवच्छ्रूयते । द्वितीयः संयोगादिः पूर्वस्य चोदात्तस्य स्वरस्याङ्गमुत्तरस्य चानुदात्तस्वरस्याङ्गमुदात्तानुदात्तवच्छ्रूयत इत्यर्थः । वकारो द्वितीयस्वरस्याङ्गं तस्य चानुदात्तत्वादनुदात्तवच्छ्रूयते । तथा अग्निमीळे इति द्वौ गकारौ नकारश्च संयोगः तत्र प्रथमो गकारः क्रमजः पूर्वस्य स्वरस्याङ्गं तस्य चोदात्तवच्छ्रूयते । द्वितीयो गकारः संयोगादिः स यमीभूतः पूर्वस्य वा स्वरस्याङ्गं परस्य वा उदात्तसन्निहितस्य उदात्तानुदात्तवच्छ्रूयते । द्वितीयो गकारः संयोगादिः स यमीभूतः पूर्वस्य वा स्वरस्याङ्गं परस्य वा उदात्तसन्निहितस्य उदात्तानुदात्तवच्छ्रूयते । नकारो द्वितीयस्य स्वरस्याङ्गं तस्योदात्तत्वादुदात्तवच्छ्रूयते ॥

च परक्रमे द्वे ॥

चकारो भिन्नक्रमः समुच्चयार्थीयः । परस्य च व्यञ्जनस्य यत्र क्रान्तिर्द्विरुक्तिस्तत्र द्वे व्यञ्जने वा पूर्वस्याङ्गं उत्तरस्य वा । यथा आतृत्नी इमे इति, रेफः द्वौ तकारौ नकारश्च संयोगः तत्र 'स्वरभक्तिः पूर्वभागक्षरांग' इति-स्वरभक्तिसहितो रेफः पूर्वस्य स्वरस्याङ्गं तस्य चोदात्तत्वादुदात्तवच्छ्रूयते । क्रमजस्तकारः संयोगादिः स यमीभूतः पूर्वस्य वा स्वरस्याङ्गमुत्तरस्य वा । नकार-

स्तु उत्तरस्य स्वरस्याङ्गं तस्य च स्वरितत्वात्स्वरितवच्छ्रू-
यते, यथा पार्ष्ण्योवेति, रेफः षकारौ द्वौ, णकारो य-
कारश्च संयोगस्तत्र रेफः स्वरभक्त्या सहितः पूर्वस्व-
रस्याङ्गं तस्योदात्तत्वादुदात्तवच्छ्रूयते । षकारौ पूर्वस्य
वा स्वरस्याङ्गं उत्तरस्य वा, संयोगादिर्णकारो यका-
रश्चोत्तरस्य स्वरस्याङ्गं तस्य स्वरितत्वात्स्वरितवच्छ्-
रूयते ।

मात्रा ह्रस्वः ॥

ह्रस्वस्वरो मात्राकालो वेदितव्यः । यथा अऋइउ-
लृइति ॥

तावदवग्रहान्तरम् ॥

अवग्रहो नानाग्रहैः समासवर्तिनोः पदयोः पृथ
क्करणं मात्राकालं भवतीत्यर्थः । पुरः । हितं । रत्नऽधा-
तमम् ॥

द्वे दीर्घः ॥

द्विमात्राकालो दीर्घस्वरो वेदितव्यः । यथा आऋॄई-
ऊएओऐऔइति ॥

तिस्रः प्लुतउच्यते स्वरः ॥

स्वरसञ्ज्ञा प्लुतस्यानेन विधीयते । स च तिस्रो मा-
त्रा भवति ॥

अधः स्विदासी३दुपरि स्विदासी३द-
र्थे प्लुतिर्भीविव विंदतारेत्रिः ॥

तिस्रो मात्राः प्लुतस्वरो भवतीति प्रतिज्ञाय अधु-
नोदाहरणैस्तानेव प्लुतान्दर्शयितुमाह । अधः स्विदा-
सी३ दुपरि स्विदासीत् । नत्वाभीरिवविन्दतीइ, एते-
षूदाहरणेषु अर्थे प्लुतिः, अर्थसमाप्ते प्लुतिः, आख्यातस्या-
न्ते स्वरे प्लुतिरित्यर्थः । उदाहरणैरेव त्रित्वस्य सिद्धत्वा-
दत्त्रिग्रहणं करोति तद्विषयापेक्षयैव । स प्रैषसंहिता-
चतु:षष्ट्यां त्रिरेव प्लुता भवतीति, भीरिव ग्रहणं च
विशेषणग्रहणार्थं अधउपरिशब्दौ विशेषणत्वेनोपादीये-
ते, किंस्विदासीदित्यत्र प्लुतिर्माभूदिति, भयं विंदति
साभिहेत्येवमादि निवृत्त्यर्थम् ॥

स्वरभक्तिःपूर्वभागक्षराङ्गम् ॥

ऋकारवर्णः स्वरभक्तिरुत्तरे वक्ष्यति । सा स्वरभ-
क्तिः पूर्वं रेफं लकारं वा भजते । रेफादुत्तरा रेफसदृ-
शी भवति । लकारादुत्तरा लकारसदृशी भवति । रेफा-
द्वा लकाराद्वा यस्माद्व्यञ्जनादुत्तरा भवति तत्संहिता
सा पूर्वस्य स्वरस्याङ्गं भवतीत्यर्थः । यथा प्रत्यु अदर्शि आ-
र्ष्टिषेणः । वनस्पते शतवल्शो । नारायासो न जल्हवः ।
अन्वर्थसञ्ज्ञा चेयं । स्वरभक्तिः स्वरप्रकारइत्यर्थः ॥

द्राघीयसी सार्द्धमात्रा ॥

तत्र या दीर्घतरा स्वरभक्तिः साऽर्द्धमात्रा काला भवति । यथा प्रत्यु अदर्शि । कर्हि । वनस्पते शतवल्शो ॥

इतरे च ॥

उक्तकालेभ्यो येऽन्ये वर्णास्ते अर्द्धमात्राकाला भवन्ति । कादीनि व्यञ्जनान्युदाहरणम् ॥

अर्द्धोनान्या ॥

द्राघीयस्याः स्वरभक्तेर्याऽन्या स्वरभक्तिः साऽर्द्धोना भवति । पादमात्रा भवतीत्यर्थः, यथा आर्ष्टिषेणः । वर्ष्मन् ॥

रक्तसञ्ज्ञोऽनुनासिकः ॥

अनुनासिको वर्णो रक्त उच्यते । यस्य वर्णस्यानुनासिकसञ्ज्ञा विहिता तस्यानेन रक्तसञ्ज्ञा विधीयते । यथा अनुनासिकोऽन्त्यः । ङञणनमाः । पूर्वस्तस्थानादनुनासिकः स्वरः । महाँ इन्द्रो नृवत् । यन्नीक्षणं माँस्पचन्याः । रक्तसञ्ज्ञाप्रयोजनं 'रक्तं ह्रस्वं द्राघयन्त्युग्रशाकाः' । 'रक्तो रागः समवाये स्वराणामिति' ॥

संयोगस्तु व्यञ्जनसंनिपातः ॥

व्यञ्जनयोर्मेलकः संयोगो भवति । यथा प्रप्रवक्ष्वि-ष्टभमिषं, संयोगमङ्ज्ञाप्रयोजनं 'स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिरिति' ॥

कण्ठ्योकारः ॥

इदानीं वर्णानां स्थानान्युच्यन्ते । कण्ठे भवः कण्ठ्यः । कण्ठस्थानो अकारवर्णः प्रत्येतव्यः । 'ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णाविति' वचनात्यतअकारआकारौ गृह्येते । यथा अआ स्थानकथने प्रयोजनं । 'निरस्तं स्थानकरणापकर्षे' इति ॥

प्रथमपञ्चमौ च द्वावूष्मणाम् ॥

प्रथमो हकारः पञ्चमो विसर्जनीयः एतौ चोष्मणां मध्ये कण्ठस्थानौ वेदितव्यौ । ह । अः । द्वाविति पादपूरणः । प्रथमपञ्चमाविति द्विवचनेनैव द्वित्वस्याभिहितत्वात् ॥

केचिदेता उरस्यौ ॥

केचिदाचार्या एतौ हकारविसर्जनीयौ उरस्थानाविच्छन्ति । ह । अः ॥

ऋकारलृकारावथ षष्ठऊष्मा जि-

ह्वामूलीयाः प्रथमश्चवर्गः ॥ ८ ॥

ऋकारश्च लृकारश्च षष्ठश्चोष्मा जिव्हामूलीयः प्रथमश्च ककारादिवर्गः एते जिव्हामूलस्थाना वेदितव्याः । ऋॠलॄ ᳵ कखगघङ । ननु च 'धातौ स्वरः कल्पयता लृकार इति' लृकारस्य स्वरसंज्ञा कृता । 'चाक्लृपे तेनऋषयो मनुष्या इति' प्रयोगश्च दृश्यते । लृकारस्तु चतुःषष्ठ्यां न दृश्यते । अथ किमर्थमुदाह्रियते । नैष दोषः । यथोदकाहारस्य मत्स्याहरणमविरुद्धं । यथा पुष्पाहारस्य फलाहरणमविरुद्धं, एवमेतदपिप्रसङ्गादुच्यते ॥

तालव्यावेकारचकारवर्गाविकारैकारौ यकारः शकारः ॥

एकारश्च चवर्गश्च इकारश्च ऐकारश्च यकारश्च शकारश्च एते तालुस्थाना वेदितव्या, एचछजझञइऐयशाः ॥

मूर्द्धन्यौ षकारटकारवर्गौ ॥

मूर्द्धि स्थाने षकारश्च टवर्गश्च वेदितव्यौ षटठडढणाः ॥

दन्तमूलीयस्तु तकारवर्गः ॥

दन्तमूलस्थानस्तकारवर्गो वेदितव्यः । तथदधनाः ॥

सकाररेफलकाराश्च ॥

सकारादयश्च वर्णा दन्तमूलस्थाना वेदितव्याः । स-

न्त्याः ॥

रेफवर्त्स्यमेके ॥

एके आचार्या रेफं वर्त्स्यमिच्छन्ति । वर्त्से भवो व-र्त्स्यः । वर्त्सशब्देन दन्तमूलादुपरिष्टादुच्छूनः प्रदेश उच्यते । अवर्कोदन्तमूलीयैरितिदर्शनात् ॥

शेष ओष्ठ्योऽपवाद्य नासिक्यान् ॥

शेषो वर्णराशिः ओष्ठस्थानो वेदितव्यः । किमवि-शेषेण नेत्याह । अपवाद्य नासिक्यान् परिवर्ज्य ना-सिकास्थानान्वर्णानित्यर्थः, कस्य शेषः । उऊओऔप-फबभमवउपध्मानीयाःस्मृति । के ते नासिक्या इत्यस्या-मपेक्षायामाह ॥

नासिक्ययमानुस्वारान् ॥

इतिनासिक्याः । कंखंगंघंइति यमाः । वक्ष्यति हि 'यमः प्रकृत्यैव सदृगिति' । अंइत्यनुस्वार एते नासि-क्याः ॥

इति स्थानानि ॥

अधिकारणं वर्णानां स्थानशब्देनोच्यते । इतिकरणः समाप्त्यर्थः । कंठ्योकारइत्यत आरभ्य परिभाषितं ता-नि स्थानानि वेदितव्यानि ॥

अत्र यमोपदेशः ॥ ९ ॥

कंश्चोकार इत्यत आरभ्य यानि स्थानान्युक्तान्यत्र एषु स्थानेषु यमानां स्थानोपदेशः कर्तव्यः । नासिक्यास्तावत्सर्व एव यमा उक्ताः । द्वितीयं तु प्रकृत्याश्रयं यत्स्थानं तदर्थमिदमुक्तं, तच्च भवद्यथान्तरं भवति । पलिक्नीरित्यत्र ककारस्वरूपो यमः, चखनथुरित्यत्र खकारस्वरूपो यमः, जग्मतुरित्यत्र गकारस्वरूपो यमः । जघ्नुरित्यत्र घकारस्वरूपो यमः । वक्ष्यति । 'यमः प्रकृत्यैव सहेगिति' । एवं विंशतिर्यमा बह्वृचानां भवन्ति स्वरूपैश्चत्वार एव, तदुत्तरत्र यमलक्षणे विचारयिष्यामः । ळकारस्य पूर्वोक्तस्थानापरितोषात्स्थानान्तरं प्रतिपादयितुमाह ॥

जिह्वामूलं तालु चाचार्य आह स्थानं ळकारस्य तु वेदमित्रः ॥

अत्रस्तनं स्थानमुपसंहरन्नाह । आचार्यो वेदमित्रो जिह्वामूलं तालु च ळकारस्य स्थानमाह । कोऽन्यथा ब्रवीति । आचार्यग्रहणं पूजार्थम् ॥

द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स ळकारो ळकारः ॥ १० ॥

ळ्हकारतामेति स एव चास्य ढकारः

सन्नूष्मणा संप्रयुक्तः ॥
इळा साळ्हा चात्र निदर्शनानि वीड्वंग इत्येतदवग्रहेण ॥ ११ ॥

स एवोक्तस्थानो डकारोऽस्य आचार्यस्य मतेन द्वयोः स्वरयोर्मध्यं प्राप्य ळकारभावं याति । किं च स एव डकारो हकारेणोष्मणा संप्रयुक्तः सन् अस्यैवाचार्यस्य मतेन ढकारे तथा सति स एव ढकारः ळ्हकारतां याति । अस्यार्थस्यास्पष्टत्वात्, स्वयमेवोदाहरणानि दर्शयति । इळा साळ्हा चात्र यथासङ्ख्येन ळकार ळ्हकारयोरुदाहरणं । इळां देवीः, सकद्गुभिरुग्रः सहसा साळ्हा । बहुवचनमत्र वक्ष्यमाणोदाहरणापेक्ष्यं । वीड्वंग इत्येतदुदाहरणमवग्रहेण सह भवति । वनस्पते वीळु । अङ्गः । स्वरयोरिति किं । वनस्पते वीड्वङ्गः । मीढ्वस्तोकाय तनयाय ॥

न्यायैर्मिश्रानपवादान्प्रतीयात् ॥

न्याया उत्सर्गाः महाविषया विधयः । अपवादा अल्पविषया विधयः । तानुत्सर्गैर्मिश्रानेकीकृतान्नजानीयात् । अपवादविषयं मुक्त्वोत्सर्गाः प्रवर्त्तन्त इत्यर्थः । स्पर्शाः पूर्वं व्यञ्जनान्युत्तराण्यास्थापितानामवसानं तत्सन्धिविषयमुत्सर्गः । घोषवत्पराः प्रथमास्तृतीयानि-

त्यपवादः, एष स्य स च स्वरात्स्य पूर्वं भवन्ति व्यञ्जन-मुत्तरं यद्भ्यइत्युत्सर्गः । अस्य स्वरमेवापवादमाह । सामवशादिति चैवापवादाननुलोमानामन्वक्षरसन्धीना-मपवादानिति ॥

सर्वशास्त्रार्थं प्रतिकण्ठमुक्तम् ॥

सर्वं च तच्छास्त्रं च सर्वशास्त्रं तस्यार्थः तं सर्वशास्त्रा-र्थं उत्सर्गत्वेन पुरस्कृत्य तस्यैवापवादत्वेन प्रतिकण्ठ-मुक्तं जानीयात् । प्रतिकण्ठशब्देन निपातनमुच्यते । तद्धि कण्ठं कण्ठमिव प्रतिसंगृह्य एकैकस्यैव प्रदृश्य-ते । न इत्याते इत्यवन्वित्या इति प्राप्ते चैप्रसन्धेरपवा-दो दीर्घत्वं च निपात्यते । परीतोषिञ्चतेति, इतः सि-ञ्चतेति प्राप्ते विसर्जनीयस्य सोपधस्यौत्वं निपात्यते । परस्य च षत्वम् ॥

स्थानश्लेषोपदेशे स्वराणां ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णौ

कण्ठ्याकारइत्यादिस्थानोपदेशः । समानाक्षरे स-स्थानइत्यादिश्लेषोपदेशः । एतस्मिन्नुभयरूपे स्व-राणामुपदेशे सति यत्र ह्रस्वस्वरआदिश्यते तत्रोभा-वपि ह्रस्वदीर्घौ सवर्णौ प्रत्येतव्यौ । कण्ठ्योकारइत्युक्तेः ह्रस्वदीर्घावपि गृह्येते । उपलक्षणार्थं चैतत् । तथा-हि । अथः स्विदासीदित्यादीनां प्लुतानां तालुस्थानं

भवतीति । तथा इकारोऽयएकारमकारः सोऽयमत्र- येत्यत्र ह्रस्वदीर्घावपि गृह्येते । स्थानप्रश्लेषोपदेशाद्द- तिकिं । 'ह्रस्वपूर्वस्तु सोकारमिति' ह्रस्वएव गृह्यते ।

असावमुमिति तद्भावमुक्त यथान्तरम् ॥

असाविति प्रथमानिर्दिष्टस्य ग्रहणं, अमुमिति द्वि- तीयानिर्दिष्टस्य । यत्रासौ वर्णो अमुमित्येव वक्ष्यति । तत्र तद्भावमुक्तं जानीयात् । तदित्यनेन द्वितीयानि- र्दिष्टं परामृश्यते । तेन रूपेण भवनं तद्भावः स च प्रथमानिर्दिष्टस्य भवति । तं च तद्भावं यथान्तरं जा- नीयात् । यो यस्यान्तरः संनिकृष्टस्थानकरणानुप्रदा- नैः स तस्य भवति । यथा समानाक्षरे सस्थाने दीर्घ- मेकमुभे स्वरमिति । तत्रायं असावमुमिति त- द्भावमुक्तमिति द्वावकारौ दीर्घमेकं स्वरमापद्यते । तच्च यथान्तरमिति कृत्वा आकारमेवापद्यते । मधु उदकं मधूदकं । अत्र असावमुमिति तद्भावमुक्तमि- ति, द्वावुकारौ दीर्घमेकं स्वरमापद्यते । तं च यथान्त- रमिति कृत्वा ऊकारमेवापद्यते । न्यायैर्मिश्रानपवादा- नित्यत आरभ्य परिभाषासूत्राण्येतानि ॥

प्राग्वच्चैव प्रैषान् ॥

होता यक्षदग्निं समिधा सुसमिधा इत्यादयः प्रैषास्ता-

[illegible]

त्यद्येषु प्राप्नोति । यतस्तत्प्रापणार्थमाह । प्रत्याम्नायः पुनर्वचनं । असतिपुनर्वचने पदवत्पद्यान् जानीया त् । त्वा ऊतासः, त्वोतामोन्यवंता । उकारोदयऊका-रमिति पदसन्धिषु वक्ष्यति । पद्यष्वपि तभ्दवति । अप्रत्याम्नायइतिकिं । वसोरिन्द्र वसुपतिमिति षष्ठ षाष्टाक्षरमिति सुतिः प्राप्ता । विग्रहइति पुनर्वच-नान्न भवति । किमेतावानेवापवादो नेत्याह ॥

ऋते न तोपाचरितक्रमस्वरान् ॥

ऋतेविहाय परित्यज्य न तं उपाचरितं क्रमं स्वर-ञ्च । अन्यत्र पदवत्पद्यान् जानीयात् । इह तु पदस्य यत्कार्यं विधीयते तत्पद्यस्य न भवति । न ते सुदीति-भिः, सुदीदि हि, पदकार्यं पद्येऽपि स्यात्, भिः शा-ब्देनाव्यवहितवर्णेणोपहितत्वात्स्वव्यवहितवर्णेनेति सुशब्द-स्य षत्वं स्यात् । यदहं गोपतिः स्यां । यदि पदकार्यं पद्ये स्यात् अत्रापि पदादयस्य स्वितीतिपतिशब्देनाव-ष्टहवर्णेणोपहितत्वात् स्वितिपदादेः षत्वं स्यात् । णा-त्वे तूदाहरणं नास्ति । उपाध्यायस्तु पितृयाणं इत्यु-दाहरति । पूर्वपदस्याग्निमित्तादुत्तरस्य नकारस्य पदव-त्पद्यानिति पदभावादभिन्नपदवत्वान्नतिर्न प्राप्नोति । ततो ऋते न तदित्यनेन प्राप्यतइत्यनेनाभिप्रायेण । ए-तस्मात् ॥ यत्र च सामान्येन पदस्य कार्यं विधीयते

भवतीति । तथा इकारोदयएकारमकारः सोदयस्त-येत्यत्र ह्रस्वदीर्घावपि गृह्येते । स्थानप्रश्लेषोपदेशश्रुतिकिं । 'ह्रस्वपूर्वस्तु सोकारमिति' ह्रस्वएव गृह्यते ।

अमात्रमुमिति तद्भावमुक्तं यथांतरम् ॥

असाविति प्रथमानिर्दिष्टस्य ग्रहणं, अमुमिति द्वितीयानिर्दिष्टस्य । यथाभो वर्णौ अमुमित्येवं वक्ष्यति । तत्र तद्भावमुक्तं जानीयात् । तदित्यनेन द्वितीयानिर्दिष्टं परामृश्यते । तेन रूपेण भवनं तद्भावः स च प्रथमानिर्दिष्टस्य भवति । तं च तद्भावं यथान्तरं जानीयात् । यो यस्यान्तरः संनिकृष्टस्थानकरणानुप्रदानैः स तस्य भवति । यथा समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरमिति । तत्रायं अचासौ अमुमिति तद्भावमुक्तमिति द्वावकारौ दीर्घमेकं स्वरमापद्यते । तच्च यथान्तरमिति कृत्वा आकारमेवापद्यते । मधु उदकं मधूदकं । अत्र असावमुमिति तद्भावमुक्तमिति, द्वावुकारौ दीर्घमेकं स्वरमापद्यते । तं च यथान्तरमिति कृत्वा ऊकारमेवापद्यते । न्यायैर्मिश्रानपवादानित्यत आरभ्य परिभाषासूत्राण्येतानि ॥

पादवच्चैव प्रैषान् ॥

होता यक्षदग्निं समिधा सुषमिदित्यादयः प्रैषास्तान्पादतुल्यलक्षणान् जानीयात् । कथं यक्षणं त-

त्पद्येषु प्राप्नोति । अतस्तत्प्रापणार्थमाह । प्रत्याम्नायः पुनर्वचनं । असति पुनर्वचने पदवत्पदान् जानीयात् । त्वा ऊतासः, त्वोता मोन्यवता । उकारोदयऊकारमिति पदमन्त्रेषु वक्ष्यति । पदेष्वपि तद्भवति । अप्रत्याम्नाय इति किं । वमोरिन्द्र वसुपतिमिति षष्ठ षाष्टाक्षरमिति सुतिः प्राप्तः । विग्रह इति पुनर्वचनान्न भवति । किमेतावानेवापवादो नेत्याह ॥

ऋते न तोपाचरितक्रमस्वरान् ॥

ऋते विग्रहाय परित्यज्य न तं उपाचरितं क्रमं स्वरञ्च । अन्यत्र पदवत्पदान् जानीयात् । इह तु पदस्य यत्कार्यं विधीयते तत्पदस्य न भवति । न ते सुदीतिभिः, सुदीदिहि, पदकार्यं पदेऽपि स्यात्, भिः शब्देनावग्रहान्तरेणोपहितत्वात्स्वरान्तरेणेति सुशब्दस्य षत्वं स्यात् । यदह्नं गोपतिः स्यां । यदि पदकार्यं पदे स्यात् अत्रापि पदादयस्य स्वितीतिपातिशब्देनावग्रहान्तरेणोपहितत्वात् स्वितिपदादेः षत्वं स्यात् । णात्वे तूदाहरणं नास्ति । उपाध्यायस्तु पितृयाणं इत्युदाहरति । पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य पदवत्पद्यानिति पदभावादभिन्नपदत्वान्नतिर्न प्राप्नोति । ततो ऋते न तदित्यनेन प्राप्यत इत्यनेनाभिप्रायेण । एतद्वास्तु ॥ यत्र च सामान्येन परस्य कार्यं विधीयते

तस्य पदवत्पद्या नित्यनेन पदेष्वपि प्राप्यते तत्प्राप्तं 'स-
हते नत' इत्यनेन पुनर्निषिध्यते । सोऽस्यापवादसूत्रस्य
विषयः । अत्र तु स्वयमेव सूत्रकारोऽवोचत् । 'ऋका
ररेफषकारानकारसमानपदेऽवगृह्ये नमन्ति । अन्तः
पदस्थमिति । अतएतदमदुदाहरणं । उपाचरितः ।
प्रथमस्य परिपतिं । अत्रापि पदकार्यं यदि पदेषु
स्यात्पयस्य इत्यत्रोपाचरितो न स्यात् भिन्नपदत्वात् ।
अन्तः पदं तु सर्वत्रैवोपाचरित इत्यनेनान्तःपदमुपा-
चरितो विधीयते । अतः पदवद्भावः उपधानामुपा
चरितं निषिध्यते । निरवकाशोऽयमन्तः पादविधिरि-
ति चेन्न । अस्रुत्या इव । दुष्प्राप्यो वरूता । त्वं हि रा-
धस्पत इत्येवमादिषु समापाद्योपाचरितेषु स्यात् । अत्र
हि विक्रान्तसन्धिरेव भवति । न तु खण्डनं । क्रमः ।
सुतसोमा अहर्विदः । अत्र यदि पदवत्पद्या स्युः "क्रमो-
द्वाभ्यामभिक्रम्येति" द्वाभ्यां पदाभ्यां स्यात् । स्वरः । पुरो-
हितमितिपुरः । हितम् । अत्र पुरः शब्दस्यान्तोदात्तस्य
हितशब्दोऽनुदात्तो मात्राकालव्यवहितः । तत्र पदवद्भा-
वे सति पूर्वमन्तोदात्तं पश्यमनपेक्ष्यैव हितशब्दोऽनुदात्तः
स्यादतः स्वरग्रहणं । ननु यथा 'सवीयमानानामि' त्यने-
नावग्रहस्य स्वरं वक्ष्यति एवं तर्हि स्पष्टार्थं स्वरग्रहणम् ॥

अष्टात्वाद्यानवसाने प्रगृह्यानाञ्चा-

मभिधायोत्तरसूत्रेषु प्रगृह्यसंज्ञामधिकरोति । अतोऽधिकारसूत्रमेवैतत् । ननु अधिकारसूत्रं परार्थं भवति । एतत्तु स्वार्थमभिधाय परार्थं भवति । अथ कथमधिकारसूत्रमेतदिति । नैष दोषो गुणोऽयं शास्त्रकृतो यदनेनैव सूत्रेण स्वार्थमभिधत्ते अधिकारं च करोति । अतोऽधिकारसूत्रमेवैतदिति । "आह च, उभयार्थं परार्थं वा सूत्रं स्यादाधिकारिकम् । संज्ञासूत्रमपार्थं स्यात्पारिभाषिकमेव च" । "परिभाषां च संज्ञां च कार्यकालं प्रचक्षते । अधिकारः कृतो यत्र ततोऽन्यत्र न गच्छति" ॥

पदं चान्यः ॥

आमन्त्रितमविज्ञातादोकारादन्य ओकारः पदं य इति सोऽपि प्रगृह्यसंज्ञो भवति । ओ ह्विवर्तते रथ्येव चक्रा ॥

अपूर्वपदान्तगश्च ॥

पूर्वपदान्तगश्च यश्चोकारो न भवति स प्रगृह्यसंज्ञो भवति । पूर्वपदोत्तरपदव्यपदेशश्च समास एव भवत्यतोऽयमर्थः । पूर्वपदस्योकारस्य प्रगृह्यसंज्ञा न भवति अन्यत्र सर्वत्र भवति । याँश्चो नु दाधृविर्भरध्यै । एषो उषा अपूर्व्या । अपूर्वपदान्तग इति किं । यदहं गोपतिः स्याम् । कुवित्सु नो गविष्टये । नन्वनेनैव सूत्रेणाव-

तत्र पदवत्पद्यानित्यनेन पद्येष्वपि प्राप्यते तत्प्राप्तं 'सहते नत'इत्यनेन पुनर्निषिध्यते । सोऽस्यापवादसूत्रस्य विषयः । अत्र तु स्वयमेव सूत्रकारोऽवोचत् । 'ऋकाररेफषकारानकारसमानपदेऽवगृह्ये नमन्ति । अन्तःपदस्थमिति । अतएतदमुदाहरणं । उपाचरितः । प्रयस्वः परिपतिं । अत्रापि पदकार्यं यदि पद्येषु स्यात्प्रयस्वइत्यत्रोपाचरितो न स्यात् भिन्नपदत्वात् । अन्तः पदं तु सर्वत्रैवोपाचरितइत्यनेनान्तःपदमुपाचरितो विधीयते । अतः पदवद्भावः उपधानामुपाचरिते निषिध्यते । निरवकाशोऽयमन्तः पादविधिरिति चेन्न । अञ्जस्या इव । दुष्प्राप्यो वहन्ता । त्वं हि राधस्पतइत्येवमादिषु समापाद्योपाचरितेषु स्यात् । अत्र हि विक्रान्तसन्धिरेव भवति । न तु खण्डनं । क्रमः । सुतसोमा अहर्विदः । अत्र यदि पदवत्पद्याः स्युः "क्रमोद्वाभ्यामभिक्रम्येति' द्वाभ्यां पदाभ्यां स्यात् । स्वरः । पुरोहितमितिपुरः । हितम् । अत्र पुरः शब्दस्यान्तोदात्तस्य हितशब्दोऽनुदात्तो मात्राकालव्यवहितः । तत्र पदवद्भावे सति पूर्वमन्तोदात्तपदमनपेक्ष्यैव हितशब्दोऽनुदात्तः स्यादतः स्वरग्रहणं । ननु यथा 'सवीयमानानामि'त्यनेनावग्रहस्य स्वरं वक्ष्यति एवं तर्हि स्पष्टार्थं स्वरग्रहणम् ॥

अष्टात्राद्यानवसाने प्रगृह्यानाचा-

समभिधायोत्तरसूत्रेषु प्रगृह्यसंज्ञामधिकरोति । अतोऽधिकारसूत्रमेवैतत् । ननु अधिकारसूत्रं परार्थं भवति । एतत्तु स्वार्थमभिधाय परार्थं भवति । अथ कथमधिकारसूत्रमेतदिति । नैष दोषो गुणोऽयं शास्त्रकृतो यदनेनैव सूत्रेण स्वार्थमभिधत्ते अधिकारं च करोति । अतोऽधिकारसूत्रमेवैतदिति । "आह च, उभयार्थं परार्थं वा सूत्रं स्यादाधिकारिकम् । संज्ञासूत्रं परार्थं स्यात्पारिभाषिकमेव च" । "परिभाषा च सञ्ज्ञा च कार्यकालं प्रपद्यते । अधिकारः कृतो यत्र ततोऽन्यत्र न गच्छति" ॥

पदं चान्यः ॥

आमन्त्रितभिन्नतादीकारादन्यश्चौकारः पदं चोइति सोऽपि प्रगृह्यसञ्ज्ञो भवति । ओङ्किवर्तते इत्येव चक्रा ॥

अपूर्वपदान्तगश्च ॥

पूर्वपदान्तगस्य यओकारो न भवति स प्रगृह्यसञ्ज्ञो भवति । पूर्वपदोत्तरपदव्यपदेशस्य समासएव भवत्यतोऽयमर्थः । पूर्वपदस्यौकारस्य प्रगृह्यसञ्ज्ञा न भवति अन्यत्र सर्वत्र भवति । यस्योनुदात्तविभक्तौ । एषो उपा अपूर्व्यो । अपूर्वपदान्तग इति किं । यद्दृं गोप-

स्तनयोः स्तनयोर्विषयः सूचितः। एवं तद्धर्मलक्षणाभ्यां सूत्राभ्यां अस्यैव सूत्रस्य प्रपञ्चः कृतः, ते वैविधयः सङ्गृहीतव्या येषां लक्षणं प्रपञ्चस्य॥

षष्ठादयश्च द्विवचोन्तभाजस्त्रयो दीर्घाः॥

षष्ठादयश्च त्रयो दीर्घाः स्वरा द्विवचनाभिधायिनः प्रगृह्यसञ्ज्ञा भवन्ति। इन्द्राबृहस्पती वयं। इन्द्रवायू इमे सुताः। द्वे विरूपे चरतः स्वर्थे। द्विवचोन्तभाजइति किम्। अग्नऽआयाहि वीतये॥

साप्तमिकौ च पूर्वौ॥

एतेषामेव त्रयाणां वर्णानां मध्ये यौ पूर्वौ दीर्घौ स्वरौ तौ प्रगृह्यसञ्ज्ञौ भवतः सप्तम्यर्थाभिधायिनौ चेद्भवतः। दृतिं न शुष्कं सरसी इति। सरस्यामिति प्राप्ते छान्दसः सप्तम्यर्थईकारः। सोममिन्द्र चमू सुतम्। चम्वामिति प्राप्ते सप्तम्यर्थ ऊकारः। छायां तनू-कृत्ये। सोमो गौरी अधिश्रितः। स्तीर्णं राये सुभरं वेदी। साप्तमिकाविति किं। पीत्वी सोमस्य वावृधे॥

अस्मे युष्मे त्वे अमी च प्रगृह्याः॥

अस्मे युष्मे त्वे। अमीइत्येते च ईकारैकाराः प्रगृ-

ह्यसञ्ज्ञा भवन्ति । अस्मे । अस्मे आवहतं रयिं ।
युष्मे । न युष्मे वाजबन्धवः । त्वे । त्वे इद्दूयते हविः ।
अमी । अमी ये पञ्चोक्षणः । प्रगृह्यसञ्ज्ञाधिकारे
पुनः प्रगृह्यग्रहणं ईकारस्य एकारस्य च सप्तम्यर्थनि-
वृत्त्यर्थम् ॥

उपोत्तमं नानुदात्तं न पद्यम्

अस्मे युष्मे इत्यादीनां यदुत्तमस्य पदस्य समीपे पदं
तदनुदात्तं वा पद्यं सत् प्रगृह्यसञ्ज्ञं न भवति । त्रीह
ब्रह्माणो विचरन्त्युत्वे । त्वं तमग्ने अमृतत्व उत्तमे ॥

उकारश्चेतिकरणेन युक्तो रक्तोऽपृक्तो द्राघितः शाकलेन ॥

अपृक्तश्च उकारः प्रगृह्यसञ्ज्ञो भवति स च इति-
करणेन युक्तः । रक्तोऽनुनासिको दीर्घश्च भवति । शा-
कलेन मतेन । ऊँइति । अपृक्तइति किं स्वितिसु । इ-
तिकरणेन युक्तइति युक्तवचनमितिकरणात्परस्याप्यु-
कारस्य दीर्घत्वं रक्तत्वं च भवति । ऊँइत्यूँ । आर्ष्यां च
संहितायां इतिकरणायोगात् । रक्तत्वं दीर्घत्वं प्रगृ-
ह्यसञ्ज्ञत्वं च न भवति । अवेहिन्द्र जलगुलः ॥

ऊष्मा रेफी पञ्चमो नामिपूर्वः ॥

पञ्चम ऊष्मा विसर्जनीयः । नामिपूर्वः सन् रेफि-

सञ्ज्ञो भवति । अग्निरस्मि जन्मना । पूर्वीरहंशरदः । रेफिसञ्ज्ञाप्रयोजनं 'सर्वोपधस्तु स्वरघोषवत्परो रेफं रेफी'॥

महोऽयो वर्जमितरो यथोक्तम्

महः अयः इत्येते पदे वर्जयित्वा उक्तादन्य इतरः अनामिपूर्वो यः पञ्चम ऊष्मा विसर्जनीयः स यथोक्तं वक्ष्यमाणं तथा रेफिसञ्ज्ञो भविष्यतीत्येतदधिकृतं वेदितव्यं । अवर्मह इन्द्र । अयस्कः । इत्येते वर्जयित्वा । ननु कस्मादनयोः पदयोः पुरस्तादपवादः क्रियते, एते हि पदे वक्ष्यमाणानां पदानां विशेषणाभिप्रायेण पठ्यते । नैतत् । यथाभूतं च इतरेषां विशेष्यभूतानां पदानां रूपं तथाभूतमनयोरपि पदयोः । तेषामनामिपूर्वो विसर्जनीयः । यथा च तेषां तथा अनयोरपि पदयोः अवर्मह इत्यत्र निपातनाशंका न कर्तव्येति । एवं तर्हि आचार्य किमर्थं पुरस्तादपवादं करोति । अत्र ब्रूमः । यदेवमनेन प्रकारेण दुःप्रतिपाद्यत्वमस्यार्थस्यायं तावत्प्रधानभूतो दोषः । अन्यच्च ग्रन्थगौरवभयाद्दुष्टमिष्येण, तन्नोदितं महोऽयो वर्जमित्यनयोः पदयोः पुरस्तादपवादो न कर्त्तव्य इति । तच्च ग्रन्थगौरवमनेन प्रकारेण प्रतिपादयतः सुतरामपरिहृतमेवास्ते अतोऽयं लाघविक आचार्यः पुरस्तादपवादं च-

क्षे । मह्योऽयोवर्जमिति ॥

अन्तोदात्तमन्तः ॥

अन्तरित्येतत्पदं अन्तोदात्तं सद्रेफिसञ्ज्ञं भवति । अन्तरिच्छन्ति तं जने । अन्तोदात्तमिति किं । इयं वेदिः परोऽअन्तः पृथिव्याः ॥

अक्षा विपर्यये ॥

अक्षारित्येतत्पदं अधस्तनस्य स्वरविपर्यये सति रेफिसञ्ज्ञं भवति । अन्तोदात्तं वाऽधस्तनपदन्तस्वरविपर्ययेऽनुदात्तं वाऽऽद्युदात्तं वा भवति । अनुदात्तम् । अनूपे गोमानोऽभिरक्षाः । आद्युदात्तं यदक्षारति देवयुः विपर्ययइति किं । न्युप्ता अक्षा अनुदीव आसन् ॥

स्पर्शे चोषः प्रत्यये पूर्वपदः ॥

उषरित्ययं पूर्वपदः सन् स्पर्शे प्रत्यये रेफिसञ्ज्ञो भवति । उषर्बुध आवह । उषर्भुद्भूदतिथिः । स्पर्शइति किं । उषउषो हि वसो । पूर्वपदइति किं । उषो मघोनि । प्रातः प्रातरित्येतत्पदं रिफितसञ्ज्ञं भवति । प्रातरग्निं प्रातरिन्द्रं हवामहे ॥

देवं भाः ॥

भारित्येतत्पदं रिफितसञ्ज्ञं भवति देवमित्येतत्पदं पूर्वं चेत् । देवं भाः परावतः । देवमिति किं । बृहद्-

भा बिभ्रती हविः ॥

बधरादयुदात्तम् ॥

बधरित्येतत्पदं आद्युदात्तं चेद्रिङ्कितसञ्ज्ञं भवति। बधर्जघान तविषीभिरिन्द्रः । आद्युदात्तमिति किं । आरे गोघ्न नृघ्ना बधो वो अस्तु ॥

करनुदात्तम् ॥

करित्येतत्पदं रिङ्कितसञ्ज्ञं भवति अनुदात्तं चेत् । निकाव्या वेधसः शश्वतस्कः । अनुदात्तमिति किं । को अध्वनर्यो देवकामः ॥

अविभः ॥

अविभरित्येतत्पदं रिङ्कितसञ्ज्ञं भवति । पितेव पुत्रमविभरुपस्थे ॥

तदादः ॥

आदरित्येतत्पदं तदित्येतत्पूर्वं चेद्रिङ्कितसञ्ज्ञं भवति । दिवस्परि सुग्रथितं तदादः । तदिति किं । आदो यद्दारु प्लवते ॥

स्तःप्रागाथम् ॥

स्तरित्येतत्पदं प्रागाथं चेद्रिङ्कितसञ्ज्ञं भवति । मानस्तरभिमातये । प्रागाथमिति किं । नास्य ते स्त-

ष्टिमानं परिष्टः ॥

एतशे कः ॥

कतिरित्येतत्पदं एतशे पूर्वं चेद्रिफितसञ्ज्ञं भवति । पुरः सतोरूपरा एत शेकः । एतशइति किं । कोअद्य- नर्यः । कस्नुदात्तमुक्तसुदात्तार्थ आरम्भः ॥

दिवे कः ॥

करित्येतत्पदं रिफितसञ्ज्ञं भवति दिवे पूर्वं चेत् ॥ महे यत्पित्र ईरसं दिवे कः । दिवइति किं । को अ- द्य ॥ उदात्तार्थमारम्भः ॥

अयस्कः

करित्येतत्पदं रिफितसञ्ज्ञं भवति अयइत्येतत्पू- र्वं चेत् । इन्द्राय योनेः प्रदिवोअयस्कः । अयइति किं । कोवस्त्राता । उदात्तार्थ आरम्भः ॥

अत्साः ॥

अत्सारित्येतत्पदं रिफितसञ्ज्ञं भवति । लोपाग्रः सिंहं प्रत्यञ्च मत्साः ॥

अविपूर्वमस्तः ॥

अस्तरित्येतत्पदं रिफितसंज्ञं भवति विपूर्वं न चे- त् । वज्रं यः हि हचनाः हचमस्तः । अविपूर्वमिति किं । पुरुनाहचो अपइत्यस्तः ॥

स्वः स्वारितम् ॥

स्वरित्येतत्पदं रिफितसञ्ज्ञं भवति स्वरितं चे-त् । स्वर्यन्द्रिं सुदृशीकमर्कैः । स्वरितमिति किं । यो नः स्वोअरणा ॥

न समासाङ्गमुत्तरम् ॥

स्वरित्येतत्पदं समासस्योत्तराङ्गं सद्रिफितसञ्ज्ञं न भवति । यः पृष्णिशोस्य प्रस्वस्य धर्मणा । उत्तराङ्गमि-ति किं । मादयस्व स्वर्णरे ॥

स्वरादेशोऽपूर्वपदेषु ॥

योऽयं स्वरादेशः अन्तोदात्तमन्तर्वधराद्युदात्तं स्वः स्वरितं इत्यादेशः स अपूर्वपदेष्विति । पूर्वपदेषु न भवत्येतदुक्तं भवति । यदि पूर्वपदानि भवन्ति तदान्य-स्वरानुदात्तादियुक्तान्यपि रिफितान्येव भवन्ति । अन्त-र्वावत् क्षय दधे । वर्धयंतो वज्रभ्यः । स्वर्जिदभिजित्प-वते ॥

अवर्महः ॥

अवरित्येतत्पदं रिफितसञ्ज्ञं भवति । मह इत्ये-तस्मात्परात्पूर्वं चेत् । अवर्मह इन्द्र दादृहि । महइ-ति किं । अवो बभूथ शतमूते ॥

अनर्द्धर्चान्ते स्वरघोषवत्परमुधः ॥

ऊधरित्येतत्पदं स्वरघोषवत्परं रिफितसञ्ज्ञं भवति । अर्द्धचोन्तं न चेत् । प्रक्षप्याय कथादपिन्वती घर्ष्टितं । ऊधर्नगोनां स्वप्नापितूनाम् । अनर्द्धचीतइति किं । महाच्छ्रुक्रं दुदुह्रे पृश्निरूधः । स्वरघोषवत्परमिति किं । पृथिव्यामतिषितं य ऊधः ॥

न रेफेऽरुपासोऽतृणन्मही ॥

रेफादौ पदे परभूते अरुपास अतृणन्मही इत्येतेषु परभूतेषु च ऊधः शब्दो रिफितसञ्ज्ञो न भवति । रेफे । समूधो रोमशं हतः । दिहंतूधो अरुपासो अस्य । शुच्यूधो अतृणन्नगवाः पृश्निर्यदूधो महीजभार ॥

वरवरावरिति चैकपादेऽप्यपूर्वाण्यसमासांगयोगः ॥

वः अवः आवः इत्येतानि पदानि रिफितसञ्ज्ञानि भवन्ति । कथंभूतानीत्यत आह । एकस्मिन्पादे यदि अप इत्येवं पूर्वाणि भवन्ति । यदि च उभयोरपि समासाङ्गयोगो न भवति । यदि च वः अवः आवः इत्येतानि पदानि समासाङ्गभूतानि न भवन्ति । विअपिदृत्यें ते च पदे यदि समासांगभूते न भवतइत्यर्थः । वः गृणानो अङ्गिरोभिर्दस्म विवरुषसा । योगा उदाजद्वहिवलं वः । अव । विज्योतिषा सवहृत्यन्तमोऽवः ।

अपावरद्रिवो विलं। आवः व्यावर्ह्व्यामतिं। अपद्रुह-स्तमं आवरजुष्टं। एकपादइति किं। अभैष्मापतदुच्छ-लनेह सोवः। व्यपपूर्वीणीति किं। को वस्त्राता। माइन्वोणामवोऽस्तु। आवो यहस्युहत्येकुत्सपुत्रं। अ-समासांगइति किं। अपावरद्रिवो विलं। असमासां-गयोगइत्युभयार्थं कस्मात्। विद्युन्मतस्थो मरुतो र-थेषु वः॥

पथ्यामघोनीदिवि चक्षसा मदेपूर्वो-र्चिषातीतृपामोत्तरेषु न ॥२६॥

पथ्या। मघोनी। दिवि। चक्षसा। मदे। पूर्वः अर्चिषा। अतीतृपाम। इत्येतेषु परभूतेषु, वः अवः, आ-वइत्येतानि पदानि रिफितसञ्ज्ञानि न भवन्ति। प-थ्या। व्युषाआवः, पथ्या३ जनानां। मघोनी। मघोनी अवेदंव्यावोमघोनी। दिवि। व्युषाआवो दिवि जा ऋतेन। चक्षसा। वियद्यावश्चक्षसा सूर्यस्य। मदे यज्ञाय स्तीर्णवर्हिषे दिवोमदे। पूर्वः, उतान्योअस्म-द्यजते विचावःपूर्वः। अर्चिषा। व्युषाश्चन्द्रामघावो-अर्चिषा। अतीतृपामनापाभूतनवोतीतृपाम। एते-षूत्तरेषु किं। विस्वर्यो रोदसी चक्षसावः॥

होतः सनितः पोतर्नेष्टः सोतः सवि-

तर्नैतस्त्वष्टः ॥ मातर्जनितर्भ्रातस्त्रातर-
स्थातर्जरितर्भ्रातर्धर्तः ॥ २७ ॥

होतः । सनितरित्यादीनि षोडशपदानि रिफित-
सञ्ज्ञकानि भवन्ति । होतः, यथा होतर्मनुषोदेवता-
तः, सुसनितरुग्रः, पोतर्यज्ञेति । प्रैषिकं ग्रावो नेष्टः
पिब ऋतुना, ज्यैष्ठेन सोतरिन्द्राय, विश्वानि देव सवि-
तः । ते ते देव नेतः । शिवस्त्वष्टरिहागहि । पितर्मात-
र्यदिहोप । बोधि प्रयन्तर्जनितर्वसूनां । इन्द्रभ्रातरुभय-
त्राते, अर्थं भोजिष्ठत्रातरवित । स्मसिस्थातर्हरीणां ।
प्रबोधय जरितर्जारमिन्द्रं । धातर्विधातः कलशाँ अ-
भक्षयं । धनानां धर्त्तःखसा ॥

जामातर्दुहितर्हर्त्तः प्रशास्तरवितः पि-
तः ॥ दोषावस्तरवस्यर्त्तः प्रयन्तश्चेङ्ग्य-
मुत्तमम् ॥ २८ ॥

जामातः प्रभृति प्रयन्तः पर्यंतान्येतानि पदानि रि-
फितसञ्ज्ञानि भवन्ति । किमविशेषेण सर्वाणि पदानि
नेत्याह । इङ्ग्यशब्देनसावग्रहं पदमुच्यते । उत्तमं प-
दं सावग्रहं भवति तदानीं रिफितसञ्ज्ञं भवति ।
त्वष्टुर्जामातरद्भुत । प्रावाद्य दुहितर्दिवः । पुरान्हर्त्तः

पायुभिः प्रयास्तयजेति प्रैषिकं ॥ योजिष्ठ आतरवितः पितर्मतिर्यदिह्नोप । दोषावस्तर्धियावयं । अवस्कन्तरधिवक्त्रारमस्मयु । बोधि प्रयन्तर्जनितर्वसूनां । इङ्ग्यमुत्तममिति किं । उपप्रयन्तो अध्वरम् । प्रयन्तपदमत्र नावगृह्यते अतो रिफितं न ॥

दीर्घरभारवरीव रद्दर्दर्दरद्धरजागरजीगः॥वारपुनः पुनरस्यरकस्थः सस्वरहः सनुतः सवरस्त्राः ॥ २९ ॥

दीर्घः, अभाः, अवरीवः, अदर्हः, दर्हः, अदर्धः, अजागः, अजीगः, वाः, अपुनः, पुनः, अस्यः, अकः, स्थः, सस्वः, अहः, सनुतः, सवः, अस्त्राः, । इत्येतानि रिफितसञ्ज्ञानि भवन्ति । आमा सुपक्वं शाच्यानि दीर्घः । इषमूर्जं सुक्षितिं विश्वमाभाः । किमावरीवः कुहकस्य । अदर्हृ त्समसृजः । अपापदद्रिं पृक्तदर्हः । उत्संहायास्थाद्व्यृतूँ रदर्धः । अजागराद्धिदेवः । आदित्सुशिष्ठ ओषधीरजीगः । वार्णिमशङ्कदश्छति । अनानुकृत्यमपुनश्चकार । पुनरागाः पुनर्नव । महोरायेचितयन्नत्रिमस्यः । अवद्यमिव मन्यमानागुहाकः । शूरो न युध्यन्नवनो निदस्थः, सस्वश्चिद्धितन्वः । अहश्च कृष्णमहः । सनुतर्युहि तन्ततः, सवर्दुघायाः पयः । आ

वत्से योनिं घृतवन्तमस्थाः ॥

इति श्रीपार्षदव्याख्यायां उवटसुतोव्वटकृतौ परिभाषाप्रथमं पटलम्।

संहिता पदप्रकृतिः ॥

संहिता पदप्रकृतिरित्येतदधिकृतं वेदितव्यम् । आसीमापटलात् । पदानि प्रकृतिभूतानि यस्याः संहितायाः सा पदप्रकृतिः संहिताऽऽच विकारः । तथा हि । षत्वणत्वादयो विकाराः संहिताया एव भवन्ति । प्रकृतिभूतत्वाच्च पदानां सिद्धत्वम् ॥

पदान्तान्पदादिभिः सन्दधदेति यत्सा ॥ कालाव्यवायेन

संहितायाः पदानि प्रकृतिभूतानीत्युक्तं । न तु संहितायाः स्वरूपं प्रतिपादितमित्यत आह । पदान्तान्पदादिभिर्यदेकीकुर्वन्नेति ग्रन्थमनुसरति सा संहितेति । कालाव्यवायेन तु पदानां कालक्रमानुपादानपरिपाट्या । सा चद्विविधा संहिता । आर्षी क्रमसंहिता च । आर्षी अयं देवाय जन्मने । क्रमसंहिता पर्जन्याय प्रप्रगायत । गायत दिवः । संहितासञ्ज्ञाप्रयोजनं 'ऋतेन च द्वैपदसंहिताखौ' ॥

स्वरान्तरं तु विवृत्तिः ॥

अस्यामेव संहितायां यत्स्वरयोरन्तरं वक्ष्यति । त द्विवृत्तिसञ्ज्ञं स्यात् । नू इत्था ते पूर्वथा च । विवृत्ति- सञ्ज्ञाप्रयोजनं "यतो दीर्घस्ततो दीर्घाविवृत्तय" इति ॥

सा वा स्वरभक्तिकाला ॥ १ ॥

सा विवृत्तिः स्वरभक्तिकाला वा स्यात् । स्वरभक्तेः कालः । द्राघीयसी सार्द्धमात्रा अर्द्धेनान्येति तत्रायं वि वृत्तेर्विभागस्त्रिः प्रकारः । उभयतो ह्रस्वाः पादमात्रा कालः प्रउगभुभ्य: । प्रत्युअदर्शि । एकतो दीर्घोऽ र्द्धमात्रा काला । नू इत्था ते । मानोअव्ये । उभयतो दीर्घा, पादोनमात्राकाला । ताईवर्द्धेति । इमा गावः स रमेयारोऽच्छः । विवृत्तिषु प्रत्ययादावदर्शनमिति दोषं व- क्ष्यतः, क्कायोऽव्याविवृत्तिरिति सर्व्यगव्याप्याः न भ- वति ॥

पदान्तादिष्वेव विकारशास्त्रं पदे दृष्टे- षु वचनात्प्रतीयात् ॥

यत्किंचिद्विकारशास्त्रं तत्पदान्तेषु पदादिषु च वे दितव्यं । पदे दृष्टेषु पदावस्थायामुपलब्धेषु । पदेषु दृ ष्टेष्वपि वचनात्प्रतीयात् । वचनमन्तरेण विकारो न भवति पदान्तेषु, वसुः सूनुः सहसः । अर्यमा मनुषः ।

पदादिषु । आपो हि ष्ठा मयोभुवः, परावीरास एतन, पदे इष्टेष्वितिकिं । ताऽअस्य पृतनायुवः, तस्मा अरं गमाम वः । अत्र पदे आकारस्यादृष्टत्वात्स्वरमन्विनं भवति । वचनादितिकिं । अग्निमीळे पुरोहितं । अत्र मकारस्य पदान्तीयस्य वचनमन्तरेण न कश्चिद्विकारः ॥

पदं पदान्तादिवदेकवर्णं प्रश्लिष्टमपि ॥

एको वर्णोऽस्येत्येकवर्णं एकवर्णं यत्पदं तत्पदान्तवत्पदादिवच्च कार्यं लभते । यद्यपि प्रश्लिष्टं भवति । इन्द्रेहि मत्स्यंधसः । उदेति सुभगः ॥

आनुपूर्व्येण सन्धीन् ॥ २ ॥

पदान्तान्पदादिभिः सन्दधदिति यत्ता कालाव्यवायेनेत्यत्र पदपाठक्रमानुपूर्व्येण सन्धय उक्ताः सामान्यतोऽपीदानीं प्रश्लिष्टान् सन्धीनाह । पदानुपूर्व्येण प्रश्लिष्टान् सन्धीन् कुर्यात् । तद्यथा । इन्द्र । आ । इहि । मत्सि । अन्धसः । इन्द्रशब्दस्य तु आकारेण सह सन्धौ कृते इन्द्रा इति भवति । तत इहि अनेन सह सन्धौ इन्द्रेहि भवति । ननु 'पदान्तान्पदादिभिः सन्दधदेति' इत्यनेनाप्येतदेव प्राप्नोति इत्यथ किमर्थोऽयं योगः । शृणु । 'पदं पदान्तादिवदेकवर्ण'मित्यनेन सूत्रेण पदान्तवत्कार्यं लभत इ-

त्येतत्प्रथममुक्त्वा पश्चात्पदादिवदित्युक्तं । अतः संश्लिष्टस्य पदस्य पूर्वमन्तकार्याणि प्रवर्तन्ते पश्चात्पदादिकार्याणि । तथा चानिष्टं रूपं सिध्यति । । अतस्तदपवादार्थमाह । अत्रापि यदानुपूर्व्येण सन्धयो भवन्तीति ॥

एष स्य स च स्वराश्च पूर्वे भवन्ति व्यञ्जनमुत्तरं यदेभ्यः ॥ तेऽन्वक्षरसन्धयोऽनुलोमाः

चतुः प्रकाराः सन्धयो भवन्ति । तद्यथा । द्वयोः स्वरयोर्द्वयोर्व्यञ्जनयोर्व्यञ्जनस्वरयोः, स्वरव्यञ्जनयोरिति । तत्र स्वरव्यञ्जनसन्धिमाह । एषः, स्यः,सः, एतानि च पदानि यदा पूर्वाणि भवन्ति स्वराश्च स्वरान्तानि च यदा पूर्वाणि पदानि भवन्ति । स्वरव्यञ्जनं च यदा उत्तरं एतेभ्यो भवति । तदा ते अनुलोमाः, अन्वक्षरसन्धयः इत्येवं सञ्ज्ञा वेदितव्याः । एष देवो अमर्त्यः, उत स्य वाजी क्षिपणिं तुरण्यति । ससुतः पीतये वृषा । स्वराः पूर्वे न निमिषति सुरणाः । एष स्य स च स्वराश्चेति द्विश्चकारकरणं तुल्ययोगनिवृत्त्यर्थं । तेनैतद्भवति । प्रतिलोमास्तु विपर्यये तएवेत्यत्र एषः स्य स इत्येते न गृह्यन्ते । यदि हि गृह्येरन् ।

गमत्सगोमतीत्यत्र तत्र प्रथमास्तृतीयभावमिति तकारस्य दकारः स्यात्। द्विस्थकारकरणात्त्वयं दोषो न भवति॥

प्रतिलोमास्तु विपर्यये त एव॥ २॥

त एवान्वक्षरसन्धयः प्रतिलोमा यदा भवन्ति। यदा स्वरव्यञ्जनविपर्ययो भवति। पूर्वेषु सन्धिषु स्वराः पूर्वे व्यञ्जनान्युत्तराणि। इह तु व्यञ्जनानि पूर्वाणि स्वरा उत्तर इत्यर्थः। तमिन्द्रं दानमीमहे॥

तत्र प्रथमास्तृतीयभावं प्रतिलोमेषु नियन्ति॥

तत्र तेषु प्रतिलोमेष्वन्वक्षरसन्धिषु प्रथमाः स्पर्शाः पदान्तीयाः तृतीयभावं गच्छन्ति। अर्वागावर्त्तया हरी। इह व्यवालग्निरणः पिता नः, यदङ्ग दाशुषे त्वं। इन्द्रस्य त्रिष्टुबिह॥

अथेतरेषु॥ ऊष्मा परिलुप्यते त्रयाणां स्वरवर्जम्॥

अथेतरेष्वनुलोमेष्वन्वक्षरसन्धिषु ऊष्मा विसर्जनीयो लुप्यते त्रयाणां पदानां। एष स्य स इत्येतेषां। स च स्वरं वर्जयित्वा। सहोमघोरफितइत्यादिना

एष स्य स विसर्जनीयलोपे सति स्वरस्य लोपः प्राप्नोति । अतः स्वरवर्जमित्युच्यते । एष कविरभिष्टुतः । उत स्य वाजी । स वाज्यर्वा ॥

न तु यत्र तानि पद्याः ॥ ४ ॥

इत्येषां मध्ये अन्यतमत्, यत्र यस्मिन्पदे सावग्रहं भवति तत्र विसर्जनीयलोपो न भवति तद्यथा । पशुषो न वाजान् । इत्याद्युदाहरणं द्रष्टव्यं । न तु यत्र तानि पद्यादिति वा पाठः । तदा तु पद्यात्परभूतानि यत्र तानि भवन्ति यत्र न लुप्यते । उदाहरणं तदेव ॥

पुरएताऽऽतितउनाऽप्रउगं नमउक्तिभिः ।
अन्तःपदं विवृत्तयः ॥

स्वरान्तरं तु विवृत्तिरित्युक्तमन्तः पदमध्ये या विवृत्तयस्ताः प्रतिपादयन्त्यवग्रहसन्देहव्युदासार्थं । पुरएतेत्याद्यास्तत्र:, अन्तः पदं पदस्य मध्ये विवृत्तयः । इन्द्र प्रणः पुरएते व, ननु पुरएतासि महतोधनस्य ते, तत्कृतो नोदाहरणं भवति । पदवच्च 'पद्यानिति' परिभाषितत्वात्पदसन्धिरेवायं । सक्तुमिवतितउनापुनन्तः । छन्दः किमासीत्प्रउगं । दाश्नोति नमउक्तिभिः ॥

अतो ऽन्याः पदसन्धिषु ॥ ५ ॥

अतो विवृत्तिचतुष्टयात् या अन्या विवृत्तयस्ताः

पदसन्धिषु वेदितव्याः । युतस्पृषिसुग्रमभिमातिषाहं । कक्षीवन्तं यऔशिजः । इतउत्तरं स्वरसन्धयः प्राक्प्रकृतिभावात् ॥

समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम् ॥

अष्टौ समानाक्षराण्यादित इत्युक्तं । समानाक्षरे समानस्थाने च दीर्घमेकं उभे स्वरमापद्येते । अम्बाजनि प्रचेतसः । सद्यो जज्ञानो विहीमिद्धः । क्षीरं सर्पिर्मधूदकं । समानाक्षर इति किं । त एते वाचमभिपद्य । सस्थान इति किं । इरवं नः सर्पिरासुतिः ॥

इकारोदयएकारमकारः सोदयः ॥

इकारपरश्चकारः एकारमापद्यते । सोदयः सह परेण इकारेण । इन्द्र सामसिं रयिं, एतेनं सृजता सुते ॥

तथा ॥ ६ ॥ उकारोदय ओकारम् ॥

यथा इकारोदय अकारः सोदय एकमेव वर्णमापद्यते । एवमवर्णउकारोदय ओकारमापद्यते । एतायामोपगव्यन्तः ॥

परेष्वैकारमोजयोः ॥

परेषु सन्ध्यक्षरेष्वैकारमापद्यते । अकारः सोदूयः । किमविशेषेण नेत्याह ॥

ओजयोः प्रथमतृतीययोः ॥

एऐइत्येतयोः । आ एनं, ऐनं देवासः, स्मदापरैदपदभ्रचेताः ॥

औकारं युग्मयोः ॥

द्वितीयचतुर्थयोः ओऔइत्येतयोः अकारः ओकारमापद्यते सोदयः । यचौषधीः समग्मत । तं यज्ञं बर्हिषि प्रौचन् ॥

एते प्रश्लिष्टा नाम सन्धयः ॥ ७ ॥

प्रश्लिष्टसञ्ज्ञाः सन्धयो वेदितव्याः एते समानाक्षरे सस्थानइत्यारभ्य । प्रयोजनं प्रश्लिष्टादभिनिहितादिति ॥

समानाक्षरमन्तस्थां स्वामकण्ठ्यं स्वरोदयम् ॥

समानाक्षरलक्षणमुक्तं अन्तस्थामापद्यते । स्वांस्थानेन । अकंठ्यं कंठ्यरहितं अकाराभ्यां विना । स्वरोदयं स्वरपदं, अभ्यार्षेयं जमदग्निवन्नः । अधीन्वनसप्ततिं-चसप्तच । अकण्ठ्यग्रहणं यथासंख्यनिवृत्त्यर्थम् । यथासंख्यं हि संभवति । चतस्रोऽन्तस्थाश्चत्वारश्च स्वराः, ह्रस्वदीर्घौ

सवर्णादिति वचनात् ॥

न समानाक्षरे स्वेस्वे ॥

न भवति चैप्रः समानाक्षरे स्वे स्वे । ननु तत्रो-क्तः प्रश्लिष्टः सन्धिः, सत्यं । उक्तो यदि नाम एवं म-न्यते । मात्रिके प्रश्लिष्टः चरितार्थः, यथा दिवीव सूर्यं दृशे । सूयस्याभिर्न धेनुभिः । द्विमात्रिकेषु चैप्र-स्यावकाशः । तस्मा भूदिति । न समानाक्षरइत्यु-क्तम् ॥

ते क्षैप्राः प्राकृतोदयाः ॥ ८ ॥

ते चैप्राः सन्धयः प्राकृतोदयाः । प्राकृतोदयाः प्रा-कृतस्वरोदयाः । प्राकृतग्रहणं सोदयाधिकारनिवृत्त्य-र्थं । चैप्रसञ्ज्ञाप्रयोजनं 'चैप्राभिनिहितेषु चेति' ॥

विसर्जनीयोऽरिफितो दीर्घपूर्वस्वरो-दयः॥आकारम् ॥

विसर्जनीय अरिफितः दीर्घपूर्वः सञ्चो-पधः स्वरोदयः स्वरपरआकारमापद्यते । तथा, या-ओषधीः सोमराज्ञीः । अरिफितइति किं । वारि न मण्डूकाइच्छति । स्वरोदयग्रहणं समानाक्षराधिकार-निवृत्त्यर्थम् ॥

उत्तमौ च द्वौ स्वरौ॥

ऐऔ आकारमापद्येते स्वरोदयौ। सूर्याय पन्यामन्वेतवाउ। उभा उ नूनम्॥

ताः पदवृत्तयः॥९॥

ता एतास्तिस्रः पदवृत्तय उच्यन्ते। अत्र याभिः सञ्ज्ञाभिः शास्त्रकृद्व्यवहरति तावत्यः स्वव्यवहारार्थाः। याभिर्व्यवहारो नास्ति तासां ज्ञाने धर्मः फलम्॥

ह्रस्वपूर्वस्तु सोऽकारम्॥

ह्रस्वस्वरपूर्वस्तु सः अरिफितो विसर्जनीयः सोपधः स्वरोदयः अकारमापद्यते। य इन्द्र सोम पातमः। अरिफित इति किं। अन्तरिच्छन्ति तं जने॥

पूर्वौ चोपोत्तमात्स्वरौ॥

पूर्वौ च उपोत्तमात्। उत्तमात्पूर्वः स्वरः ऐकारस्तस्मात्पूर्वौ एकारओकारौ स्वरपरौ अकारमापद्येते। अग्न इन्द्र वरुण मित्र देवाः। वायउक्थेभिर्जरन्ते॥

तउद्ग्राहाः॥

तउद्ग्राहसञ्ज्ञाः सन्धयो वेदितव्याः। उद्ग्राहाणां पूर्वरूपाण्यकार इति प्रयोजनम्॥

दीर्घपरा उद्ग्राहपदवृत्तयः॥१०॥

तथा ते एव उद्ग्राहदीर्घपराः सन्तः पदवृत्तयो भवन्ति । कद्रूषते तुज्यते । स्वस्य हस्य भावे प्रतिरन्त आयुः । उग्राणामिन्द्र ओजिष्ठाः ॥

ओष्ठ्ययोन्योर्भुग्नमनोष्ठ्यवकारोऽवान्तरागमः ॥

ओष्ठ्यौ ओकारऔकारौ योनी ययोस्तौ ओष्ठ्ययोनी अकाराकारौ तयोः अनोष्ठ्ये स्वरे परभूते वकारश्च अन्तरागमो भवति । यत ओकारौकारयोः स्थानसंभूतौ अतः कारणात् अकारावोष्ठ्ययोनी, तेन वकारागमः । भुग्नं नाम चैतत्सन्धानं भवति । वायवायाहि दर्शत । ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । अनोष्ठ्य इति किं । वायउक्थेभिर्जरन्ते उभाउपांशु प्रथमापि वा वा ॥

ऋकारउदये कण्ठ्यावकारं तदुद्ग्राहवत् ॥ ११ ॥

कण्ठ्यौ अकाराकारौ ऋकारउदये अकारमापद्यते । तत्सन्धानं उद्ग्राहवत्संज्ञं वेदितव्यं । प्रऋभुभ्योदूतमिव । आनुषा यन्मधुनऋतस्य ॥

उद्ग्राहाणां पूर्वरूपाण्यकारे प्रकृ-

त्या द्वे ओभवत्येकमाद्यम् ॥ प्राच्यपञ्चालपदवृत्तयस्ताः पञ्चालानामोष्ठ्यपूर्वा भवन्ति ॥ १२ ॥

उद्ग्राह्याणां सन्धीनां यानि पूर्वरूपाणि ये पूर्वरूपा अवयवाः ह्रस्वपूर्वौ विसर्जनीयएकारश्चोकारश्च तानि अकारे प्रत्यये प्रकृत्या द्वे भवतः । ओभवत्येकमाद्यं । ताश्च प्राच्यपदवृत्तयः पञ्चालपदवृत्तयश्चोच्यन्ते । एवं सामान्यतउक्त्वा, अथेदानीं विशेषमाह । पञ्चालानामोष्ठ्यपूर्वा भवन्ति । इतरास्तु प्राच्यपदवृत्तयः । पुरोलाशं यो अस्मै । अध्वर्यो अद्रिभिः सुतम् । ते अग्ने पाकभवो मन्दसानाः ॥

अथाभिनिहितः सन्धिरेतैः प्राकृतवैकृतैः ॥ एकीभवति पादादिरकारस्तेऽत्र सन्धिजाः ॥ १३ ॥

अथशब्दो महाधिकारद्योतनार्थः । अभिनिहितसञ्ज्ञकः सन्धिर्वक्ष्यतइतिवाक्यशेषः । स च एतैः प्राकृतवैकृतैरधस्तनैः । एकारौकाराभ्यां प्राकृताभ्यां ह्रस्वपूर्वेण च ओकारभूतेन वैकृतेन च एकीभवति पा-

दादिरकारस्तेनाच चयः सन्यो दृश्यन्ते । सुगन्तन्नेता-वकेभ्यो रथेभ्योऽग्ने । दधासि रत्नं द्रविणं च दाशुषे ऽग्ने । अचाचिन्नोमघोपितोरं । पादादिरिति किं । चिकित्वां सोअचेतसं नयन्ति, आरे अस्मे च शृण्व-ते । अध्वर्युभिरद्रिभिः सुतं । अभिनिहितसञ्ज्ञाप्र-योजनं 'चैप्राभिनिहितेषु चे'ति ॥

अन्तः पादमकारश्चेत्संहितायां ल-घोर्लघु ॥ यकाराद्यक्षरपरं वकारा-द्यपिवा भवेत् ॥ १४ ॥

अन्तः पादं पादमध्ये अधिकारवचनं । अकाराश्चे-त् । अभिनिधीयमानस्याकारस्य विशेषणानि । अका-राल्लघोः परमक्षरं लघु यकारादि वा वकारादि वा यदि भवेत्संहितायां संहितापाठे अथ सः अकारः अभिनिधीयते प्राकृवैकृतैरेकीभवतीत्यर्थः । यकारा-देः, यमैच्छाममनसा सोऽयमागात् । वकारादेः, तं इच्छन्तो वरासः । यस्ते मन्यो ऽविधद्वज्र । तेऽवदन्प्रथ-माः । लघोरिति किं । व्रतैः सीक्षन्तो अव्रतं, लघ्विव-ति किं । दुहोतिदोमिचमह्नोअवद्यात् । यकाराद्यक्ष-रपरं वकाराद्यपीति किं । एनं देवासो अमृतास्नोअ-स्युः । वज्रेण इष्णोअपतानुदस्व । यथा भायीतेअ-

पिबः॥

अन्यादृश्यपि तथायुक्तमावोन्तोपहि-
तात्सतः॥

यकारादि वकारादि वा यदक्षरमुक्तं तदुच्यते यद्यप्यन्यव्यञ्जनादि तदक्षरं भवति। तथा तेनैव प्रकारेण युक्तं भवति। संहितायां लघोर्लघु भवतीत्यर्थः। अथ तदा वोन्तोपहितात्सतः, अवारस्याभिनिधानं भवति, आवएवमन्तो यस्य पदस्य तदावोंतं, तेनोपहित आवोंतोपहितः। तस्मादावोन्तोपहितात्सतः। सयत्र गावोभितोननन्त,तथायुक्तमितिकिं, आगावोऽग्मन्। आवोंतोपहितात्सतइतिकिं। एतं देवासो अमृतासो अस्थुः॥

अयेयोवेऽवइत्यन्तरैकारः सर्वथा भव-
न्॥ १५॥

अये। अयः, अवे। अवः। एवमन्तैः पदैरुपहित अकारःसर्वथा सर्वप्रकारोऽपि सन्नभिनिधीयते। सर्वथा ग्रहणं गुरुलघ्वर्थं। अजीतये हतये पवस्व। ताअञ्जयोरुपायोनसस्त्रुः। यवं श्वेतं यदेवेश्विनाश्वं। पुरूरवोऽनुतेकेतमायं। तदन्तग्रहणादिह न भवति। विपावराहमयोअग्रयाहन्। तद्देवानामवोऽद्याहणीमहे।

वइत्येते न चा न प्र क्व चित्रः सवितैव कः ॥ पदैरुपहितेनैतैः ॥

आ । न । प्र । क्व । चित्रः । सविता । एव । कः । एतैः पदैरुपहितेन वइत्येतेन पदेन उपहितोऽकारोभिनिधीयते । आवोऽहंसमितिंददे । नवोऽश्वाः श्रथयन्तऽहसिस्वतः । प्रवोऽच्छारिरिचे देवयुष्पदं । क्व१वोऽश्वाः क्वाऽभीऽएवः । चित्रो वस्तुयामः । तत्सविताव्रोऽमृतत्वमासुवत् । अत्रैवव्रोऽयुंनह्यामि । कोव्रोंतर्मरुतऋष्टिविद्युतः । एतैः पदैरितिकिं । अच्छावो अग्निमवसे । पादमध्यइतिकिं । उत येशामयोर्वावीनासः । अत्र च प्रकारान्तरेण ज्ञातत्वात् ॥

सर्वैरेवोदयाः परे ॥ १६ ॥

सर्वैरेव प्राकृतविकृतैः एकारौकारैरुपहिताः सन्तः परे पादादिभूता अभिनिधीयन्ते, न ज्ञायन्ते कथमेतेइत्यत आह ॥

अदादववोऽजनयन्तान्यत्या अभेदयोपाऽष्टरवन्त्ववीरता ॥ अमुमुक्तममतयेऽनशामहाअवत्वचोऽव्वोरतेऽवास्य-

वे रथा ॥१७॥

अद्रात्। अवर्चः अजनयन्न। अव्यत्यै। अभेत्। अयोपाष्टिः। अवन्तु। अवीरतां। अमुमुक्तं। अमतये। अनभ्रामहै। अवत्वचः। अवीरते। अवांसि। अवः। अरथाः इति। एतेषां पदानां सर्वैः पदैः उपश्लिष्टः अकारः उदयः सन् अभिनिधीयते। सनः सनितासनये सनोऽद्रात्। अमर्त्यो ऽवर्च ओषधीषु। यन्देवासोऽजनयन्ताग्निम्। उत स्म तेऽव्यत्यै पृणासि। विन्तिम्न न दृषभेणापुरोऽभेत्। श्येनोयोऽपाष्टि हन्ति दस्यून्। पदादौ लक्षणतोऽभिनिश्लिष्टः। पदमध्ये निपातनात्। अधिब्रुवन्तु तेऽवन्त्वस्मान्। माशेषसोऽवीरतापरिणा अग्निं महमुक्तम्। मानो अग्नेऽमतये। येन वस्त्रोऽनभ्रामहै, प्रियोऽवत्वचोभरः। त्वचइतिकं। माशिवासो अवक्रमुः। मानोअग्नेऽवीरतेपरादाः। आदैव्यावृणीमहेऽवांसि। आतेऽवो वरेण्यम्। आनोऽवोभिर्महतः। इत्युदाहरणे। अनश्वासो ये पवयोऽरथाः। अरश्मानोयेऽरथाः॥

वासो वायोभिमुरं कवष्यः संक्रन्दनो धीजवनः स्वधावः॥ उत्सादतऋतावः सगर्भ्यो हिरण्यशृङ्गइति चोपधा-

भिः ॥ १८ ॥

वासोवायः । अभिमुवे । कवष्यः । संक्रन्दनः । धी-
जवनः । स्वधावः । उत्सादतः । ऋतावः । सगर्भ्यः । हि
रण्यशृङ्गइति च । एवं रूपाभिष्वउपधाभिरुपहितश्र-
कारोऽभिनिधीयते । वासोवायोऽवीनां । अभिमुवेऽ
भिभङ्गाय । कवष्योऽक्षोषधावनीः । संक्रंदनोऽनिमिष-
एकवीरः । पूषेवधीजवनोऽसिसोमः । रायस्पूर्धि स्वधा-
वोऽस्तिहिते, उत्सादतोऽगादङ्गादवत्तानां । सम्राॡता-
वोऽनुमागृभाय । सगर्भ्योऽनुसख्यासयूथ्यः । हिरण्यशृङ्गो-
योऽस्य ॥ १८ ॥

येरा रायोध मेधाथि नोऽहिरग्नेऽभि-
दासति ॥ जायमानोऽभवोऽग्नेयं नृतो-
पोंऽहोति पिप्रति ॥ १९ ॥

येराः, रायोध । मेधाथि । नोहिः । अग्नेऽभिदास-
ति । जायमानोऽभवः । अग्नेयं । नृतोपः । अंहोतिपि-
प्रति । एते षट्पदा यथागृहीतमभिनिधीयन्ते । र-
थानां नयेराः । सत्रारायोधये पार्थिवासः । उपप्रागा-
त्सुमन्मेधाथि मन्म । उतनोऽहिर्बुध्न्यः । योनोऽग्ने-
भिदासति । जायमानोऽभवो महान् । त्वयाऽग्नेयं सु-
न्वन्यजमानस्य नृतोपः, तवत्यन्नर्यंनृतोपइन्द्रः । योनोऽ

ष्टोतिपिप्रति ॥

जम्भयन्तोऽहिं मरुतोऽनुभर्त्री यवसे-
विष्यन्वयुने जनिष्ट ॥ वृत्रहत्येर्वाः स-
मरेतमाना मरुतो मदन्नभितोनव-
न्त ॥ २० ॥

एते द्वैपदा यथागृहीते अभिनिधीयन्ते । जम्भय-
न्तोऽहिं हकं रक्षांसि । एषाख्यावोमरुतोऽनुभर्त्री । प्रो-
थद्स्वा नयवसेऽविष्यन् । इडायास्सुनो वयुनेऽजनिष्ट ।
ताभिरूपृष्टत्वपर्ल्येवीर्नः । नयम्बयन्ति समरेतमानाः ।
स्वर्नृषासो मरुतो मदन्ननु । समन्नगावोऽभितो नव-
न्त ॥

अवेत त्वं स्तवसे वाचिमेरपद्दधिरेऽग्ना-
नहुषेऽस्मत्पुरोऽभिनत् ॥ उपतेऽधां
वहते यं यमोऽददातिर्ज्जनुषो यासुत्रितो
ऽनुश्रियोधित ॥ २१ ॥

एते च द्वैपदा यथागृहीतमभिनिधीयन्ते । संह-
अवतेऽध्वन्ना । सत्यशुष्माय तवसे वाचि । उत मेरपद्युव-

तिः । वैश्वानरे न दधिरेऽग्ना वसूनि । सनतमो नज्ञ-षोऽस्मत् । पुरोभिनदर्हन्दस्युहत्ये । उपतेषां सद्ग्मानाम् । वहतेऽयं मघवा सर्वसेनः । नराशंसस्य तुरंगोऽयमोऽदितिः ॥ नय ईषन्ते जनुषो याः सुवितो देवांस्सुवितोनुपत्म । विश्वाऽअभिश्रियोऽधित ॥

वपुषे नु विशायन्त सन्तोऽवद्यानि खेन सः । भरन्तोऽवस्यवोऽवोऽस्तुबुध्न्योऽजो मायिनोऽधमः ॥ २२ ॥

एते द्विपदा अभिनिधीयन्ते । प्रवांवयो वयुषेऽनु पदान् । सद्विधोऽयन्त । अन्तः सन्तोऽवद्यानि पुनानाः । रये रथस्य खेनमः । स्यूरं न कश्चिद्भरन्तो वस्यवः । मद्दि वोणामवोऽस्तु । अद्दिर्बुध्न्योऽजएकपात् । त्वंमायाभिरपमायिनोऽधमः ॥

देवो न यत्पुरुवसोऽसुरघ्नोभूतोऽभिश्वेतोरुषस्तेननोद्य ॥ येजामयस्तेरदन्नोऽधिवक्कारतेऽवर्द्धत तेऽरुणोभिः सदोधि ॥ २३ ॥

एते च द्विपदा यथागृहीतमभिनिधीयन्ते । देवो

न यस्यविताः पुरुहूत पुरूवसोऽसुरघ्नः। मेषो भूतोऽभियन्नयः। कृष्णः श्वेतोरुषोयामः। तेन नोऽद्य विश्वेदेवाः। तेनेति किं। तेनो अद्य ते अपरं। इन्द्रजामयउत ये जामयः। प्रतेरदद्दरुणो यातवेः स प्राविता मघवानोऽधिवक्ता। तेऽवर्द्धंत स्वतवसुः। तेऽरुणोभिर्वरं। राजेव सद्म निषदोऽधिवर्द्धिषि॥

स्वाध्यो ऽजनयन्धन्वनोऽभिमातीरग्नेयदह्मनसोधियोऽध्वनः॥ योह्यंरतेविंदं स्तपसोधिनयोधिपादोऽस्ययोति ब्राह्मणोऽस्यापोऽनयत्॥ २४॥

एते च यथागृहीतमभिनिधीयन्ते। स्वाध्यो जनयन्नह्मदेवाः। ओजस्विरेव धन्वनोऽभिमातीः। विश्वा अग्ने यदह्वारातीः। दह्हेति किं। मह्नोरायः सातिमग्ने अपादधि। उर्वश्या ब्रह्मन्मनसोऽधिजातः। मनो न योऽध्वनः सद्य एति। शतचक्रं योऽह्यः। तेऽविन्दन्मनसा दीध्यानाः। तपसोऽध्यजायत। भूषन्न योऽधि। नेति किं। पावमानीर्योऽअध्येतिऋषिभिः। पादोऽस्य विश्वा भूतानि। इन्द्रो विश्वायोऽति शृराव। ब्राह्मणोऽस्य मुखमासीत्। आपोऽनयत्सधमाः॥

सोऽस्माकं योद्वेषोभ्योऽन्यकृतेभ्यस्ते-
भ्योऽकरं पयस्वन्तोऽमृताश्च ॥

एते च द्वैपदा यथा गृहीतमभिनिधीयन्ते । उपस्ति-
रस्तु सोऽस्माकं । यः । यद्गिति किं । सोऽस्माकमनवद्य ।
द्वेषोभ्योऽन्यकृतेभ्यऽ उरु । इदन्तेभ्योऽकरं नमः । शुक्राः
पयस्वन्तोऽमृताः ॥

अन्योर्वाकेऽथो इतिनोदयेषु पुत्रः प-
राके च परावतश्च ॥ २५ ॥

अथाभिनिहितं सन्धिरित्यनुक्रम्य यदुक्तं पादादिर-
कारएकीभवतीति तस्यापवादः । अन्यः । अर्वाके । अथो ।
एतेषूदयेषु । पुत्रः पराके । परावतः । एतेषु च पूर्व-
पदेषु यथासंख्यमभिनिहितो न भवति । पितरं न
पुत्रोऽअन्यः । यन्नासत्या पराके अर्वाके । आविवास-
न्परावतोऽअथो ॥ २५ ॥

अन्तः पादं च वयो अन्तरिक्षे वयो
अस्या अथ ग्रोहेतयस्त्रयः ॥ वो अन्धसः
शयवे अश्विनो भये अवो आधिसाज्जं
योजामयः पयः ॥ २६ ॥

अन्तः पादमित्युपक्रम्य यदुक्तं तस्यायमपवादः। पादमध्ये च। अग्निं वयो अन्तरिक्षे। अन्तरिक्षइति किं। आवां वयोऽश्वासः। वयो अस्य। ऊर्ध्वो अग्ने वयो अस्य। अस्येति किम्। आवां वगोऽश्वासः। अश्वयो यथा, सतीनमन्युरश्वथायोऽअद्रिं। शतानीका हेतयोऽअस्य। चयः। चत्वारि शृंगा त्रयो ऽअस्य। प्रान्तमावो अन्धसः। अन्धसइति किं। आवोऽहंसमितिन्द्रदे। वहूल्यंते नचानप्रत्यस्यायमपवादः। अये येवेवइत्यन्तैरित्यस्यापवादाः शेषाः। अपिन्व तं शयवे अश्विनागां। यद्वां क्ष्वन्त उभये अधः। यन्नार्षदाय श्रवो अध्यधत्तं। अधीतिकिं। श्रवो मृत्यु। भरद्वाजां-त्वाज्जयो अभ्ययष्ट। जामयो अध्वरीयतां। आसायद्स्य पयो अक्रतस्व॥

प्रकृत्येतिकरणादौ प्रगृह्याः॥

इदानीं प्रकृतिभावः। तत्र प्रथमं पदसंहितामाह। प्रकृत्येतिकरणादौ प्रगृह्याः। इतिकरणादौ परभूते प्रकृत्याप्रगृह्या भवन्ति। इन्द्रो इति। शतक्रतो इति शतऽक्रतो। मोइति। इन्द्राग्नीइति। हे इति॥

स्वरेषु चार्ष्यम्॥

स्वरेषु च परभूतेषु आर्ष्यां संहितायां प्रकृत्या प्र-

गृह्या भवन्ति । ऋषिदृष्टा आर्षी । राजन्ती अस्य भु-
वनस्य रोदसी अस्मे । इन्द्रवायू इमे सुताः । ते इदि-
प्रा ईळते । प्रोअयासीदिन्दुः । सोमो गौरो अधि-
श्रितः ॥

प्रथमो यथोक्तम् ॥

प्रथमः प्रगृह्यः आर्ष्यां संहितायां यथोक्तमेव भव-
ति । कश्च प्रथमः । ओकारआमन्त्रितजः प्रगृह्यइत्या-
दिना यउक्तः । इन्दविन्द्राय मत्सरं । वायउक्थेभि-
र्जरन्ते । अत्राचिन्नो मघोपितोरं । यददोपितो अ-
जगन् । पुरूहूत पुरूवसोऽसुरघ्नः । प्रथमइतिकिं ।
प्रोअयासीदिन्दुः ॥

सहोदयास्ताः प्रगृहीतपदाः सर्वत्रैव ॥

सह उदयेन वर्ततइति सहोदयाः । ताः संहिताः
प्रगृहीतपदरूपज्ञा वेदितव्याः । सर्वत्रैव । पदसंहि-
तायां इतिकरणादौ परभूते स्वरे षु वाष्यां उदयेषु
प्रगृहीतपदा भवन्ति । इन्द्रो इति । शतक्रतो इति
शतक्रतो । इन्द्राग्नी इति । अतप्यमाने अवसावन्ती
अनु ॥

त्र्यक्षरांतास्तु नेवे ॥ २७ ॥

त्र्यक्षरपर्यंताः पुनः प्रगृह्या इवप्रत्यये न प्रकृत्य

भवन्ति । आर्ष्यां संहितायां, दम्पती चक्रतु विदा । आर्ष्यामिति किं । दम्पतीइवेतिदम्पतीऽइव । तथा । उपधीव । उपधीइवेत्युपधो । इव । अन्तरान्ता इति किं । अक्षीइव चक्षुषायातम् ।

आर्ष्यामेव सन्ध्ययकारपूर्वौ विवृत्ते-श्च प्रत्ययः सन्नुकारः ॥

आर्ष्यामेवेत्यवधारणं क्रमसंहितानिवृत्त्यर्थम् । सन्धौ भवः सन्ध्यः । सन्ध्यो यकारः पूर्वो यस्मात् इति सन्ध्ययकारपूर्वउकारः प्रकृत्या भवति । प्रत्यु अदर्श्यायती । अभूर्वौक्षीर्व्युश्आयुः । विवृत्तिस्तु परभूतउकारः प्रकृत्या भवति । अभूदुभाउ अंशवे । सोमं धनसा उ ईमहे । सन्ध्यग्रहणं किं । तामेजराद्यजरं मरायु । यकारपूर्वइति किं । अभूर्वौक्षीः ॥

ऊकारादौ स्विति ॥

ऊकारादौ पदे परभूतेषु इत्येतत्पदं प्रकृत्या भवति । ताभिष्षु ऊतिभिः । ऊकारादाविति किं । स्वूपस्थाभिर्न धेनुभिः ॥

पूषेत्यकारे न चेत्तदेकाक्षरतत्र पूर्वम् ॥ २८ ॥

पूषा इत्येतत्पदं अकारादौ परे पदे प्रत्यये प्रकृत्या भवति । यदि तत्पूषेतिपदं एकाक्षरपदपूर्वं न भवति । तत्र पूर्वं चेन्न भवति । पूषा अविष्टुमाहिनः । स्वस्ति पूषा असुरः । नचेत्तदेकाक्षरतत्र पूर्वमिति किं । नतंपूषाऽपिमृष्यते । तत्र पूषाभवत्सचा ॥

श्रद्धा सम्राज्ञि सुशमी स्वधोती पृथुज्रयी पृथिवी षा मनीषा ॥ अया निद्रा ज्या प्रेप्रेति स्वराणां मुख्ये परे पञ्चमषष्ठयोश्च ॥ २९ ॥

इत्येतानि पदानि प्रकृत्या भवन्ति । स्वराणां मध्ये मुख्ये प्रथमे अकारे पञ्चमषष्ठयोश्च स्वरयोः परभतयोः इकारे ईकारे चेत्यर्थः । श्रद्धा इत्ते मघवन्त्यार्ये दिवि । संम्राज्ञी अधिदेष्टषु । एते शमीभिः सुशमी अभूवन् । स्वधा अवस्तात्प्रयतिः परस्तात् । ऊतो अनूती हिरिशिप्रः । पृथुज्रयी असुर्यं च । द्यावाक्षामा पृथिवी अन्तरिक्षं । ईषा अनोहिरण्ययः । पूर्वीरर्यो मनीषा अग्निः । अया ईशानस्तविषीभिः । मानो निद्रा ईशत, ज्या इयं समने । धन्वन्निव प्रप्रा असि । मुख्ये परे पञ्चमषष्ठयोश्चेति किं । आरादुपस्य धागहि । माध्यामेवेति किं । संम्राज्ञीति सं । राज्ञी ॥

स्वरे पादादा उदये सचेति ॥

सचा इत्येतत्पदं प्रकृत्या भवति । स्वरे पादादौ उदयभूते । उगने काव्ये सचा इन्द्रः । शृणते सूर्यः सचा उद्यत् । स्वरे पादादाउदये इति किं । सचेषु सवनेष्वा । सुप्ये परे पञ्चमषष्ठयोरित्यस्याधिकारनिवृत्त्यर्थं स्वरग्रहणं । केचित्किलपार्षदप्रपञ्चयज्ञप्रयोगे कुर्वंति । इन्द्र इद्धर्यीः सचेत्यतस्याभ्यासेऽपीमं प्रकृतिभावं कुर्वंति तन्न । कथं । संहितायां यद्दृष्टं तदनेन शास्त्रेण साध्यते नानेनादृष्टम् ॥

एवंतं जोषं चर्षणीश्चर्षणिभ्यः ॥ एकारान्तं मित्रयोरस्मद्विनमस्युरित्युपधं चेत्यपृक्तम् ॥ ३० ॥

इतिकरणः पदस्वरूपज्ञापनार्थः । एवमुपधं च आ इत्येतत्पदं अपृक्तं चेत्प्रकृत्या भवति । स्वरे पदादाइत्यनुवर्त्तते । षइत्येवमन्तं ष्वन्तं । तस्मजंयन्न सुष्टवं नद्योष्वा उघान्तं । उतोन्वस्य जोषमाँ इन्द्रः । आयाहि पूर्वीरतिचर्षणीरा आर्यः । संसहस्राकारिषच्चर्षणिभ्य आँ आविः । एषिंदीने गभीरआँ उग्र । उदुत्यच्चक्षुर्मंहिमित्रयोरा एति । नचैतदुदाहरणमिह स्यादेकारौकारौ चेत्यनेन सिद्धत्वात् । तन्न । नहि समानपद-

णानां परित्यागो न्याय्यः । नचैतं विषयं स विधिः प्रवेष्टुं शक्नुयात् । अत्राष्टक्षग्रहणात् । तत्र सामान्येन विधानाच्च । तस्मात्साधूदाहरणं । इमाअस्मै मतयो वाचो अस्मरां ऋचः । आ स एतु यईवदां अदेवः । उपवो विश्ववेदसो न मन्युरां अमृक्षि । स्वरपादादा उइत्यद्भुतिकिं । सोमं वज्रिणा आभरत् । इत्युपधइतिकिं । आरश्मयो गभस्त्या स्थूरयोराध्वन् । अष्टकामिकिकिं । यः प्राणतो निमिषतो महित्वैकः ॥ ६ ॥

एकारोकारपरौ च कंठ्यौ लुशादर्वाक् ॥

एकारस्य उकारस्य परौ ययोः अकारआकारयोः तौ तथोक्तौ लुशाद्दषेः प्राक् प्रकृत्या भवतः । अबुध्नस्य इत्यत्र लुशः । एकारओकारयोर्विशेषणार्थं पादादिग्रहणमिहानुवर्त्तते । आयन्मावेना अरुहन्नृतस्यं एकं । तिस्रो द्यावः सवितुर्द्वा उपस्थां एका । त्वं न इन्द्राभरं ओजः । विश्वे देवानि तविषीवउग्रं ओकः । लुशादर्वागिति किं । यः प्राणतो निमिषतो महित्वैकः । पादादाविति किं । मैनमग्ने विदह । अमितौजा अजायत ॥

गोतमे चामिनंत ॥

गोतमऋषिदृष्टे च अग्निमन्त्येतत्पदं प्रकृत्या भवति । आ ते सुपर्णा अमिनं तँएवैः । पादमध्यप्राप्त्यर्थं पुनर्वचनम् ॥

विभ्वा विधर्ता विपन्या कदा यामा तेत्यृकारेप्यपादादिभाजि ॥ ३१ ॥

एतानि पदानि प्रकृत्या भवन्ति ऋकारादौ प्रत्यये परे । अपि अपादादिभाजीत्यपि शब्दउभयार्थः । ते वाजो विभ्वाँ ऋभुः । आदित्यो असृजद्विधर्त्ता ऋतं । आर्तप्रथमं विपन्याँ ऋतस्य । अग्ने कदाँ ऋतचित् । परितक्म्यायाँ ऋणं च ये । अयामाताँ ऋणुत । ऋकारइति किं । उत त्वष्टोत विभ्वानु ॥

परुच्छेपे भीषापथेत्यकारे ॥

भीषापथेत्येते परुच्छेपे ऋषौ अकारे प्रकृत्या भवतः । वृषान्न भीषाँ अद्रिवः । याहि पथाँ अनेहसा । ऋषिग्रहणादिह न । कदर्यम्णो महस्पथाति । अकारइति किं । दध्येवयं तावनुशासता रजः ॥

एवाँ अग्निमतिषु साप्लुतोपधा ॥

एवाँअग्निमित्येतद्द्वेपदं यथागृहीतं भवति । अग्निमण्डले प्लुतोपधसञ्ज्ञकं सन्धानं भवति । एवाँ अ-

ग्निमजुर्यमुः । एवाँ ग्निवस्त्रूयवः । अग्निग्रहणं किं ।
एवाग्निसहस्यं१वसिष्ठः । प्लुतोपधासञ्ज्ञा प्रयोजनमि-
दानीमेव वक्ष्यति ॥

सचादयो या विहिताविवृत्तयः प्लु-
तोपधान्ता अनुनासिकोपधाः ॥ ३२ ॥

स्वरे पादादावित्यादिना या विहिताः सचादयः ।
एवाँ अग्निमचिषु साप्लुतोपधान्ताः । ता अनुनासिकोप
धा भवन्ति । आनुनासिक्यमुपधानां विधीयते । उदु-
स्त्रिया । सृजते सूर्यः सचाँ उद्यत् ॥

सेदुसास्मिंत्सेमभिसाभिवेगः सेदभवः
सोपमासौषधीरनु ॥ सास्मा अरं सो-
तनः सेन्द्र विश्वासेति सास्माकमनव
द्यसासि ॥ ३३ ॥

यथागृहीतान्येतानि भवन्ति । अत्र विवृत्तिलोपो
निपात्यते । सेदुराजाक्षयति । उदुइतिकिं । सदृभो-
जो यो गृहते । त्वमीशिषे सास्मिन्नासत्सि । धिया
शमीसचते सेमभिः । अभीतिकिं । सइमममादमह्नि ।
असत्सु मे जरितः साभिवेगः । सेदभवोऽयमवथ । अ

भवतीति किं । सदृद्देवेषु गच्छति । जीवयाजं यजते सोपमादिवः । सौषधीरनुरुध्यसे । अग्निरिति किं । सप्तौ-षधीः सोऽपः भवनानि । सास्माअरं बाहुभ्यां । अर-मितिकिं । सोऽस्मै चाहरुच्छदयत् । सौषधः सोतनो-र्मतं । नदीतिकिं । द्भ्यं । याचकर्थ सेन्द्र विश्वाभ्युक्थः । विश्वेतिकिं । सइन्द्रचित्रा अभि । कुहसेतिघोरं । सा-स्माकमनवद्यानुतुजान । अनवद्येतिकिं । उपस्तास्तु सो ऽस्माकं । इत्येतदेवनिपातनं प्रत्युदाहरणमप । अत्रा-पि विसर्जनीयलोपो निपात्यते । अन्यत्र तु विसर्ज-नीयस्य छतौ लक्षाभिनिश्चितः । यस्तात्कणोः प्रथमं साभ्युक्थः ॥

सेदग्ने सेदग्निर्वासिष्ठं सास्माकेभिः सेदुग्रः सेमः॥ सैना सैनं सोदंचं सेमां-सोषा सेशे सेदीशे ॥ २४ ॥

एतानि यथागृहीतं भवन्ति । सेदग्ने अस्तु सुभगः सुदानुः । अग्नइतिकिं । सइत्क्षेति । सेदग्निरग्नीँ र-त्यस्त्वन्यान् । वासिष्ठमितिकिं । सइदग्निः कण्वतमः कण्वसखा । सास्माकेभिरेतरीन । सेदुग्रो अस्तु मरु-तः । उग्रइतिकिं । सइद्देवेषु । सेमं महीरोदसी । सै-नानीकेन सुविदत्रः । सैनं सश्चद्देवो देवं । सेमं नोअध्वरं

यज । सोदञ्चं सिन्धुमरिणात् । सेमामविड्ढि प्रभृतिं, सोषामविन्दत्सस्वः । नसेशे यस्य रंबते । सेदीशे यस्य रोमशं । ईग्रइतिकिं । सइद्वेषु ॥

नूइत्थाते सानो अव्येवो अस्मे वासौ वेद्यस्याम् ॥ धिष्णे मे नूअन्यत्राचित्पादादौ नू इन्द्रेत्यत्र्यांक् ॥ ३५ ॥

यथागृहीतमेतानि पदानि भवन्ति । नूइत्थातइति दीर्घत्वं निपात्यते । सन्धिस्तु पदे अदृष्टस्य न भवति । नू इत्था ते पूर्वथा च । तइति किं । आरे । अद्याकोन्नित्था । सा नो अव्येइति मानावव्यइतिप्राप्ते ओकारो निपात्यते । सन्धिस्तु पूर्ववन्न । दशस्वसारो अधिसानो अव्ये । वोअस्मे अभिनिहितामावो निपात्यते । प्रप्रावो अस्मे स्वयशोभिः । अस्य वासा उ अर्चिषा । वैश्व सौ प्रश्लेषो निपात्यते । वेद्यस्यां प्रगृह्यस्यान्तस्थां निपातयति । स्तीर्णं राये सुभरं वेद्यस्यांधिष्णेमे, इकारलोपो निपातितः । पदान्तपदाद्योरेत्वं वा । आविवासन्रोदसी धिष्ण्येमे । नू अन्यत्राचित्दीर्घो निपात्यते । नू अन्यत्राचिदद्रिवः । पादादौ नू इन्द्र । पादादौ वर्तमानस्य दीर्घत्वं निपात्यते । नू इन्द्र राये वरिवः । पादादाविति किं । यदिन्विन्द्र पृथिवी । ऋत्यर्वाक् । प्रकृतिभावे प्राप्ते अन्तस्थापत्तिर्निपात्यते । वर्हिषदः

पितरजत्यर्चीक् ॥

उदू अयान्नूजेपितं धनर्चं शतर्चंसन्द-
शोणयदशोण्ये ॥ यथोह्विषेयथोचिषि
दशोणिं स्वरोदयं पिबा इमं रथो-
लह ॥३६॥

एतानि यथागृहीतं भवन्ति । उदूअयान् । दीर्घ-
त्वं निपात्यते । सन्धिस्तु पदे अदृष्टस्य नेत्युक्तं । उदू
अयँान्नप्रवक्तेव । अयानितिकिं । उद्वेति सुभगः । रजे-
पितं । विसर्जनीयस्य प्रश्लेषो निपात्यते । अजेषितं ।
रजेषितं । धनर्चं । उत्तरपदादि लोपः । द्विरिश्मश्रु
नार्वाणं धनर्चं धार्चसंपूर्वत् । विचक्रमे शतर्चसं म-
हित्वा । दशोणये । अत्र पञ्चसु औकारे प्राप्ते ओ-
कारो निपात्यते । दशोणये कवये र्कसातौ । दशशिप्र
दशोण्यं । वाचं दूतो यथोह्विषे । पिबा दष्ट्यथोचि-
षे सत्रेतसुन्दशम.यं दशोणिं । स्वरोदयं पिबा इमं ।
ह्वै पदमेतद्यथागृहीतं भवति । इन्द्र सोमं पिबा इमं ।
एदं बर्हि । स्वरोदयमितिकिं । इन्द्र सोमं सोमपते
पिबेमं माध्यन्दिनं । रथोलहऔकारे प्राप्ते ओका-
रः । एना त तुभ्यं रथोलहभद्यैः ॥

वीरास एतन तमू अक्रण्वंस्तनारेवप्रै-षपूरोदसीमे ॥ धन्वर्णसः सरपसः स-चोत प्रथिविर्वालु उतसन्त्तवाजौ ॥ ३७॥

एतानि द्वैपदानि यथागृहीतं भवन्ति । पराबीराम ए-तन । इकारस्य एत्वं । तमू अक्रण्वन्नेषा । दीर्घत्वं । अक्रण्वन्निति किं । तम्वभिप्रगायत । एवेन्नु कं सिन्धु-मेभिस्तनारेव । एत्वं । एकारौकारपरौ चेति सचा-दिविवृत्तिप्रतिषेधः । प्रैषयुर्न विद्वान् । एकारे प्राप्ते ऐकारः । अस्मभ्यं द्यौ बृहती रोदसीमे । प्रगृह्यसन्धेर-पवादः प्रश्लेषः । धन्वर्णसोनद्यः । पद्यादेरकारलोपो दीर्घस्य वा ह्रस्वः । अरमयः सरपसस्तरायेति पूर्ववत् । स्वस्तिधामङ्के सचोतैधि । सचादिविवृत्तेः प्रतिषेधः । पृथवीव प्रगृह्यस्य प्रश्लेषः । वीलू उत प्रतिष्कभे । दी-र्घत्वं । अद्याँइव प्रासृजः सन्त्तवाजौ । प्रश्लेषो निपा-त्यते ।

अश्विनेव पार्वोपवमनानां मह्नो आ-दित्याँ उपमामिवेतयः ॥ स्तनेव अ-व्यञ्च सृजाइयःध्यै सचे न्द्रसानि अ-

ऽयथे स्वधामिता ॥३८॥

एतानि पदानि यथागृहीतं भवन्ति । दह्रा वार्षीभि-रभ्रनेव । सचादिविहृत्तेः प्रतिषेधः । एत्वं च । अग्नि-ष्वात्तानां पीवोपवसनानां । विसर्जनीयस्य लोपः प्रश्लि-षश्च । निपात्यतइतिसर्वत्र । मक्षोश्चादित्यां अदितिं । अकारस्यौत्वं । आते चिकित्व उपमामिवेतयः । ऐका-रे प्राप्ते एकारः । वेतिस्तोतव अंध्यं । अभिनिहिता-भावएकारस्य च अत्वं । मानुर्नमोमुपमृजाद्ययध्यै । षा त्वं । ब्रह्म च नोवसो सचेन्द्रः सचादिविहृत्तेः प्रतिषेधः । इषा पवित्रे अधिमानो अव्यये । औकारस्य योत्वं । अ नुस्वधामितादस्मीयते । अद्यादिपाठात्प्रकृतिभावे प्राप्ते प्रश्लेषः ॥

गोओपशागो ऋजीकप्रवादौ मनीषा आत्वा पृथिवी उत द्यौः ॥ मनीषा वस्यूरणया इहात्र बृहतीइवेति च य-थागृहीतम् ॥ ३९ ॥

इत्येतानि पदानि यथागृहीतं भवन्ति । इतिकार-णसमाप्तिवचनः । चकारः समुच्चयार्थीयः । गोओप-शागोऋजीकइत्युभयोः प्रकृतिभावो निपात्यते । प्रवा-

दवचनाल्लिङ्गविभक्तेरनुपलक्षणं । या ते अष्ट्रागोओपशा । अराविदेवं गोऋजीकमन्धः । इमा हि वाङ्गो ऋजीकाः । अर्वागुपभामनीषा आत्वा, प्रकृतिभावः । मिन्धुः पृथिवी उत द्यौः । प्रकृतित्वं । द्यौरितिकिं । स्तुग्यं, अच्छा बृहती मनीषावस्युः । अडादित्वे प्राप्ते प्रश्लिषत्वं । उक्थेषु रणाया इह । दीर्घत्वं, कदावमोस्रो इयंत आवमचादिविहत्तेः प्रतिषेधः । बृहती इव सूनवे रोदसी । प्रगृह्यलक्षणातः प्रश्लेषे प्राप्ते प्रकृतित्वं । यथागृहीतग्रहणं च काकाचित्वदुभयत्र सम्बद्धं उपरिष्टादधस्ताच्च ।

योनिमारैगगादारैगादैरैगारैदुर्यो-
णआवृणक् ॥ हन्त्यासद्रुपआरुपितम-
नायुधासआसता ॥ ४० ॥

एतानि पदानि यथागृहीतं भवन्ति । स्ससा स्सस्रेज्या यस्योयोनिमारैक् । योनिग्रहणं किं । स्तुग्यं । कनीनीश्वित्यागादारैक् । आरैक्पंथां यातवे सूर्याय । निर्विशेषेणोपादानमर्द्धचोदि ज्ञापनार्थम् । दुर्योणआद्भाङ्क्रभवाचं । दुर्योणद्रुति किं । वज्रेण हत्वा इणक् विष्वणः । हन्ति रक्षो हन्त्यामद्रदन्तं । हन्तीति किं । आतस्तु मे । अग्रेरुपआरुपितं । रूपद्रुतिकिं । अनायु-

धास आसता सचन्तां । अनायुधास इतिकिम् ॥ ८ ॥

अस्त्वा॒स्तो नि॒राविध्य॑द॒भ्यादे॒वं क आ॒सतः॥ न्या॑वृ॒णङ्न॒किरा॒देवो॒ऽ न्या॒विध्य॑देन॒माय॑नक् ॥ ४१ ॥

एतान्यपि यथागृहीतानि । असन्नस्त्वासतं इन्द्र-वक्ता । अस्त्विति किं । देवानां पूर्व्ये युगे सतः । सतश्च योनिमसतश्च । निराविध्यद्गिरिभ्यआ । निरिति किं । भुवद्विश्वमभ्यादेवमोजसा । अभीतिकिं । सनेमि त्व-मस्मदाँ अदेवं । क आसतो वचसः सन्ति । कइतिकिं । सतश्च योनिमसतश्च । इन्द्रो यः शुष्णमशुषन्न्यावृणक् । नीतिकिं । वज्रेण हत्वा वृणक् । ययोः प्रनूनं किरा-देवओहते । नकिरिति किं । अदेवोपदभ्यौ इष्ट । न्याविध्यद्दिलीविशस्य । नीतिकिं । यमेन दत्तं त्रित-एनमायुनक् । एनमिति किं । अयं रथमयुनक्सप्तर-श्मिम् ॥

अ॒हि॒हन्नो॑ रि॒ण॑क्प॒थ आयु॑क्षा॒तामु॒दा-व॒ताः॥ रि॒स्फमा॑रैग्ग आयु॒क्तकु॑रु॒ अव-ण॒मावृ॑णि ॥४२॥

एतान्यपि यथागृहीतानि । योधीतीनामहिह-

न्नारिणक्पथः । पहिहन्निति किं । आयुनतामश्विना । उदावता त्वक्षमा । नजामयेतान्वोरिस्फमारैक् । रिस्फमिति किं । य आयुक्त तु जागिरा । यदिति किं । अयुक्त सप्तशुन्ध्युवः । कुरुश्रवणमावृणि राजानं । अत्र येषां विशेषणपदानां उदाहरणानि न विद्यन्ते तेषां छन्दः परिपूर्तिफलं । योनिमारैगित्यादीनि पदानि यानि तेषु दीर्घत्वं आदिस्वरस्य निपात्यते ॥

शुनश्चिच्छेपं निदितं नरावाशंसं पूषणम् ॥ नराच शंसं दैव्यं ता अनानुपूर्व्यसंहिताः ॥ ४२ ॥

शुनश्चिच्छेपं निदितं सहस्रात् । नरावाशंसं पूषणमगोह्यम् । नरा च शंसं दैव्यं च धर्त्तरि । ता अनानुपूर्व्यसंहिताः । नह्येतेषां पदानां यदाऽऽनुपूर्व्येण संहितास्ति । संहितापदप्रकृतिः पदान्तान्पदादिभिः सन्दधदेतीत्यस्यापवादः । एतस्याः प्रयोजनं अनानुपूर्व्ये पदसन्ध्यदर्शनात् ॥

यतो दीर्घस्ततो दीर्घा विवृत्तयः ॥

स्वरान्तरं विवृत्तिरित्युक्तं तत्र यतो दीर्घस्वरो भवति पुरस्तात्पश्चादुभयतो वा ततो दीर्घविवृत्तयो वेदितव्याः ।

गोषाइंदोन्षाअति । यअानयत्पराअतः । ताआपोदेवी-रिहा । विविधान्युदाहरणानि ॥

द्विपंधयस्तूभयतः स्वरस्वराः ॥४५॥

द्वौसंधीयासांविहत्तीनां ताद्विसंधयः तास्तूभयतः स्वरावेदितव्याः । मध्यगनस्वरस्य उभयतःस्वरीयासांविवृत्तीनांताउभयतः स्वरस्वराः । अभूदुभा उ अंशवे ॥ तस्मा उ अद्य । संज्ञाप्रयोजनं । अर्धचंति कुर्यु रधोद्विषेधौ

प्राच्यपंचालउपधानिभोदयाः शाकल्यस्यस्थविरस्य ॥ ४६ ॥

प्राच्यपंचालपदद्वत्तयोरधस्ता त्प्रतिपादिताविहत्तयः तासांशाकल्यस्यस्थविरस्यमतेन किंचिदुच्यते । प्राच्यपंचाललक्षितानांविहत्तीनां उपधाः तन्निभाः ताद्दशाउदयायासां तास्तथोक्ताः । एषदेवोअमर्त्यः । आंगिरसो जुह्वे वाजे अग्निन् । नो अहप्रविंदसि ।

इतरास्थितिः ॥ ४७ ॥

इतरातु अस्माकंशाकलानांस्थितिः प्राकृतोदयत्वंनाम । एषदेवः आंगिरसोजुव्हे । नोअह ॥

इति वजटपुत्रोव्वटकृतौ प्रातिशाख्यभाष्ये संहितापटलंद्वितीयम् ॥

उदात्तश्चा नुदात्तश्च स्वरितश्चत्रयः स्वराः ॥

आयामविश्रम्भाक्षेपैः स्तउच्यंते ॥ १ ॥

प्रथमपटले संहितापरिभाषाअनुक्रम्य द्वितीयेनसंहितागतलोपागमवर्णविकारानुक्त्वा अथेदानींस्वरसंधिमाह ॥ उदात्तश्चानुदात्तश्चस्वरितश्च संक्षेपतःस्वरास्त्रयोवेदितव्याः । इदानींतानुपलक्षयितुमाह ॥ आयामविश्रंभाक्षेपैस्तउच्यन्ते ॥ आयामोनाम वायुनिमित्तमूर्ध्वंगमनंगात्राणां।तेनउच्यन्ते सउदात्तः ।। विश्रंभोनाम अधोगमनंगात्राणां वायुनिमित्तं नः नी आक्षेपोनाम वायुनिमित्तंतिर्यग्गमनंगात्राणां क्व न्यक्।

अक्षराश्रयाः ॥ २ ॥

स्वरोक्षरमि?युक्तं अक्षरमाश्रयीभूतंयेषांतेतथोक्ताः ॥ स्वराणामक्षरैः सह धर्मधर्मिभावसंबंधो नतुव्यंजनैः ।

एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः ॥ ३ ॥

उदात्तानुदात्तौस्वरौ तंत्रौ तयोः स्वरितः स्वरो निष्पद्यतइत्यतआह । एकाक्षरसमावेशेसति पूर्वयोरुदात्तानुदात्तयोः स्वरितःस्वरोनिष्पद्यते । तेवर्धंतस्वतवसः । ब्राह्मणोस्य । स्रुचावह्वतंचस्रीव । त्र्यंबकंयजामहे इन्द्रः सर्पिरासुतिः ।

तस्योदात्ततरोदात्ता दर्धमात्रार्धमेववा ॥ ४ ॥

तस्यस्वरितस्यस्वरस्य द्विस्वरसंभूतस्यपृथक्व्युत्पादाकथनंक्रियते । उदात्तात्मकाशात् उदात्ततरा आदावर्धमात्रावेदितव्या ॥ त्र्यंबकं । अर्धमेववा । अर्धमात्रा-

वत् द्विमात्रस्यस्वरस्यार्धमयमुदात्तांशः कथितः। तेवह्नंत

अनुदात्तः परः शेषः स उदात्तश्रुतिः।

स्वरितस्य परः शेषोयदर्धमात्रो यदिमात्रिकः सउदात्तश्रुतिः। उदात्तवच्छूयते। यथात्वपुतामयोः संयोगेसति कांस्यस्यधात्वंतरस्योत्पत्ति रेवमिहापिद्रष्टव्या।

नचेत्। उदात्तं वोच्यते किंचित्स्वरितंवाक्षरंपरं॥ ५॥

चेच्छब्दो यदार्थे॥ यदिनभवति उदात्तमक्षरं स्वरितंवापरं। तेवधंत। दिवीवचक्षुः, । इननः सर्पिरासुतिः। यदि उदात्तंस्वरितंवापरंस्यात् तदायोनुदात्तः परः शेषः स्यात्। सचकंपइत्युच्यतेबह्वृचैः। नयोयुछतितिष्यो ३ यथादिवो ३ ज्मेरारंत। अभी ३ दमेकमेकः। अहन्य १ ग्यंभहसा॥ उदात्तपरस्योदाहरणं। शतचक्रंयो ३ ह्योवर्तनिः। स्वरितपरस्योदाहरणं एवंचकृत्वा उदात्तपूर्वाः सर्वएवास्यकंपाः स्युः अनुदात्तपूर्वेषुतुक्रियमाणेषुमात्राधिक्यं स्यात् सचदोषः। अयथामात्रं वचनं स्वराणामितिदर्शयति चोदात्तपूर्वत्वंकंपनंक्रमहेतौ। स्वरैकदेशंस्वरितस्य अचोत्तरंपदानिहन्यादिति।

उदात्तपूर्वं स्वरितमनुदात्तंपदेक्षरं॥६॥

एवमुदात्तानुदात्तसंधौ त्रीन्स्वरानभिधायायेदानीमेकपदप्रभावा नाह। स्वरितानुदात्तस्वरूपव्याचिख्यासया सर्वस्मिन्नेवपदे एकाक्षरमुदात्तंवास्वरितंवाभवति॥ शेषमनुदात्तमयं तावदुत्सर्गः। सर्वानुदात्तस्वरूपं तथाह्यु-

दात्तैर्वा स्वरितैर्व्यपदेशः आद्युदात्तं क्रियते ॥ आद्युदात्तं इंद्र । मध्योदात्तं । अग्निना । अंतोदात्तं । यानु । कः । आदिस्वरितं । स्वर्णरे । मध्यस्वरितं । हृदय्यया । अंतस्वरितं । कन्या । स्वरितएव । क्व । स्वः । द्विरुदात्तं । बृहस्पतिः । त्रिरुदात्तं । इंद्राबृहस्पती । सर्वानुदात्तं । वः । नः । एतएकादशस्वराः पदेषुप्रत्येतव्याः तत्प्रतिपादनार्थमाह । एकस्मिन्पदे उदात्तपूर्वं स्वरितमक्षर मनुदात्तं प्रत्येतव्यम् ॥ सांहितिक स्यास्यायंधर्मो नुदात्तस्यसतः उदात्तपूर्वस्य । इंद्रः । होता ॥

अतोन्य त्स्वरितंस्वारं जात्यमाचक्षतेपदे ॥ ७ ॥

अतः प्रकृतादुदात्तपूर्वात्स्वरितात्स्वरा द्यदन्यदेकस्मिन्नेवपदे स्वरितंस्वारं तज्जात्यमाचक्षते । व्यालिप्रभृतयः । किमन्य त्पदमत्राभिप्रेतं अपूर्वत्वंवानीचपूर्वत्वंवा । अपूर्वोदाहरणं ॥ स्वः । क्व । न्यक् । नीचपूर्वस्य । कन्या । हृदय्यया । जात्यस्वरूपेणैवोदात्तानुदात्तसंगतिंविना जातोजात्यः । यत्तुक्तं । स्वरितस्यो दात्तानुदात्तसंगतिरिष्यते । तदुदात्तपरस्यैवा नुदात्तपरस्य फलं । तस्य उदात्तपरस्य स्वरितपरस्यचकंपः । कन्या ३ वारवायती । क्वा ३ भीशवः ।

उभाभ्यांतुपरंविद्या त्ताभ्यामुदात्तमक्षरं ॥ ८ ॥

अनेकमप्यनुदात्तम् ॥ ९ ॥

तुशब्दोविशेषार्थः । उभाभ्यांतु जात्योदात्तपूर्वाभ्यांतु परंविद्यात् ताभ्यांपरंजानीयात् ॥ उदात्तमक्षर मुदात्तश्रुतिरुदात्तब द्विप्रचितः श्रूयते । अनुदात्तमनेकमपि बहून्यप्यक्षराणि । अत्राप्येतदेवकथ्यते ॥ यथा सर्वस्मिन्नेवपदे एकमक्षरमुदात्तं स्वरितंवाभवति । शेषमनुदात्तमिति ॥ तत्प्रचयंभवति उदात्तात्परं अनुदात्तं स्वरितंस्वरितात्परंप्रचयंभवतीत्यर्थः । मादयस्व । अदब्धव्रतप्रमतिः ॥

नचेत्पूर्वन्तथागतात् ॥१०॥

चेच्छब्दोयदर्थे । यदिनभवति पूर्वंतथागतादक्षरात् स्वरितगतादुदात्तगताद्वा स्वरितत्वंप्राप्तादुदात्तत्वं वाप्राप्तात् ॥ पूर्वंनभवति यदित्वेवंभूताक्षरात्पूर्वंभवति ॥ अथप्रकृत्यैवाऽवतिष्ठते ॥ मादयस्वस्वर्णरे । अदब्धव्रतप्रमतिर्वसिष्ठः ।

उदात्तवत्येकीभाव उदात्तंसंध्यमक्षरम् ॥ ११ ॥

इदानीं पदांतपदाद्योः संधौ उदात्तानुदात्तस्वरितप्रचितानां बलाबलमाह । यस्मिन्नेकीभावे परंपूर्वमक्षरंवोदात्तंभवति । इतरस्तुचतुर्णांस्वराणा मन्यतमः सउदात्तवानेकीभावः तस्मिन्नुदात्तवत्येकीभावे उदात्तंसंध्यक्षरंजानीयात् ॥ द्वयोरुदात्तयोः । तानिनराजुजुषाणोपा । इंद्रेहिमत्स्यंधसः । अत्र मध्यगतआकार उदात्तोधस्तनं स्वरित मुपरितनं चानुदात्तमुदात्तीकरोति ॥(१)शरदोनया तींद्रः । प्रचितउदात्तेनलुप्तः ।

---

(१) नयाति इन्द्रः ।

अनुदात्तोदये पुनः स्वरितं स्वरितोपधे ॥ १२ ॥

उदात्तस्तावत्स्वरांलुंपत्यथस्वरितोनुदात्तं लुंपत्येतद्दर्शयति । अनुदात्तोदये पुनरयंविशेषः स्वरितपदोनुदात्तः स्वरितमापद्यतेत्त्वोरसर्पिर्मधूदकं ।

इकारयोश्चप्रश्लेषेक्षैप्राभिनिहितेषुच । उदात्तपूर्वरूपेशाकल्यस्यैवमाचरेत्॥१३

ह्रस्वयोरिकारयोः प्रश्लेषेक्षैप्रसंधिषुचाभिनिहितसंधिषुच अविशेषेण उदात्तपूर्वरूपेष्वनुदात्तोत्तररूपेषु शाकल्याचार्यमतेन एवमाचरेत् । एवमितिस्वरितनिर्देशः। स्रुचीवघृतं । योजान्विन्द्रतेहरी । तेवर्धंत । इकारयोरितिकिं । सद्योजज्ञानोविह्वीमिद्धोअख्यत् । उदात्तपूर्वरूपेष्वितिकिं । उतेमाहुर्नैषोअस्तीत्येनं । सतुवस्त्राण्यध । हिरण्यशृंगोयोअस्य ।

मांडूकेयस्य सर्वेषु प्रश्लिष्टेषुतथास्मरेत् ॥ १४ ॥

मांडूकेयाचार्यस्यमतेनसर्वेषुप्रश्लिष्टेषुउदात्तपूर्वरूपेषु(१)तथास्मरेत् । नकुर्यात् । इंद्र । विह्वीमिद्धः ।

इत्येकीभाविनोधर्माः ॥ १५ ॥

एवंप्रकाराः एकीभाविनांअक्षराणां धर्माः प्रत्येतव्याः ।

(१) उदात्तंकुर्यात्स्वरितमित्यर्थः ।

उदात्तवत्येकीभावेत्यतआरभ्य समाप्तौइतिशब्दः।

परः प्रथमभाविनः ॥ १६ ॥

परैस्तुदात्तैः एकीभावंप्राप्यते प्रथमभाविनः स्युः। द्वयोराप्याचार्ययो र्मतेनउदात्तभाविनः स्युः ॥ उदात्तवत्येकीभावे इत्येतद्विप्रथमसुक्तं ॥ आव्याजानु। प्रास्यपारं

उदात्तपूर्वं(१)नियतं विवृत्याव्यंजनेनवा ॥ स्वर्यतेंतर्हितंनचेदुदात्त-स्वरितोदयं ॥ १७ ॥

उदात्तः पूर्वीयस्मात् इत्युदात्तपूर्वः। उदात्तपूर्वं नियतंअनुदात्तं विवृत्या व्यजनेनवा अंतर्हितमक्षरंस्वर्यते। यइंद्र। अग्निमीलेपुरोहितं। इंद्रेणासंहि। नचेदुदात्त-स्वरितोदयमितिकिं। ज्याइयंसमनेपारयंती। इंद्रसोमं-सोमंसोमपतेपिबेमं। क १ वोश्वाक्ता ३ भीशवः।

वैवृत्ततैरोव्यञ्जनौ
क्षैप्राभिनिहितौचतान् ॥
प्रश्लिष्टंच यथासंधिः
स्वरानाचक्षते पृथक् ॥ १८ ॥

विवृत्तौभवावैवृत्ताः। स्वरांतरंतु विवृत्तिरित्युक्तं तिरोंतर्धानंव्यञ्जनंयस्येतितैरोव्यञ्जनः। क्षैप्राभिनिहितौ-चप्राश्लिष्टं तानेतान्यथासंधि यस्मिन्संधौयथासंधि त-द्यथा क्षिप्रसंधौभवः क्षैप्रइत्यादिस्वरान्कथयंति। व्या-

---

(१) निहतमिति खपुस्तकपाठः।

लिप्रभृतय: । पृथक्नाना । एतेचाधस्तात्सोदाहरणा: प्रतिपादिता: संज्ञार्थं पुनर्वचनं ।

स्वरितादनुदात्ताना म्परेषांप्रचय:स्वर: । उदात्तश्रुतितोयांत्येकं द्वेवा बहूनि वा ॥ १९ ॥

स्वरितात्परेषामनुदात्तानां प्रचय: स्वरोभवति । संहितायां प्रचय: स्वरोभवति । संहितायां प्रचय: स्वरो ऽधस्तान्नप्रतिपादित इत्यत आह । उदात्तश्रुतितोयांति उदात्तश्रुतीनिभवंति एकमक्षरं द्वेवाक्षरे बहूनिवाक्षराणि । अग्निमीले । नासत्याभ्यांबर्हिरिव । इमंमेगंगेयमुनेसरस्वति । वाजेवाजे वत वाजिनोन: ।

केचित्त्वेकमनेकंवा नियच्छंत्यन्ततोक्षरं । आवाशेषात् ॥ २० ॥

तुशब्दोविशेषणार्थ: केचित्त्वाचार्या एकमक्षर मनेकं वाक्षरंवा द्वेअक्षरे नियच्छंतिनीचीकुर्वंति । अंतत आरभ्य निमित्तमेवोदात्तं स्वरितंविनेत्यर्थ: । आशेषाद्वा यावदेकमक्षरं मनेकंवा अक्षरं द्वे नियच्छंति । एकेनापिप्रचितस्वरूपंदर्शितंभवत्येवेत्यर्थ: ।

नियुक्तं तूदात्तस्वरितोदयं ॥ २१ ॥

तुशब्दोवधारणार्थ: । सर्वएवाचार्या नियुक्तंनिश्चित

अविप्रतिपत्त्यांतुअनुदात्तंकुर्वंति । उदात्तोदयं उदात्त-परंस्वरितपरंच । वाजेवाजेवत वाजिनोनोधनेषु । तमेवऋषिं तमुब्रह्माणा माहुर्यज्ञन्यम् ।

नियमंकारणादेके प्रचयस्वरधर्म-वत् । प्रचयस्वरआचारः शाकल्यान्यतरेतयोः ॥ २२ ॥

नियमंनियमनं अनुदात्तभावं कारणादेकेमन्यंतेआ-चार्याः । किंतत्कारणमितिचेत् प्रचयस्वरधर्मयुक्तमध्य-यनं यथास्यादिति । यदिहि उदात्तस्वरितोदयं प्रचितं-नानुदात्तम्भवेत् । अथ प्रचितोदात्तयोः कोविशेषः स्या-दिति । प्रचितोहि स्वरितोदात्तपरो ऽनुदात्तोभवति नतूदात्तः । एवंचकृत्वा प्रचितस्वरे । आचारोयं शाक-ल्यस्या न्यतरेयस्यच एतत्कारणकोद्रष्टव्यः । उक्तान्ये-वोदाहरणानि ।

परिग्रहत्वेनार्षान्ता तेनवैकाक्षरीकृतात् । परेषान्यसमाचारं व्यालि स्तौचे स्वरौपरौ ॥ २३ ॥

तुशब्दोविशेषणार्थः । एतावानेवविसंवादो यस्तमेन स्वरलक्षणेन सहपरिग्रहोवेष्टकः । एतावान्वेष्टकेविशेषः । अनार्षान्ता दनार्षइतिकरण उच्यते । सचद्व्यक्षरआद्युदा-त्तः पराभ्यासस्यमध्येवर्तमानः पूर्वपदांतमादिनास्पृशति । द्वितीयपदादिमंतेनस्पृशति । तस्यायंविकारः पदसं-

धिकृतः । स च उत्तरपदादि व्यंजनादिस्वरादिर्वाभवति । यदिव्यञ्जनादि सदाप्रश्लेषेप्राप्ते अयमपवादः । अनार्षादितिकरणा त्परेषामक्षराणां न्यासमनुदात्तत्वमाचार्यमन्यते व्यालिराचार्यः । यदातु स्वरादिर्भवति तदा-नेनस्वरादिना एकाक्षरीकृतात् परेषांन्यासमेतितुल्य । तौयदिस्वरौपरौभवतः । उदात्तस्वरितौ ॥ सत्यान्तते-इतिसत्यान्तते । अवपश्यन् । सुप्राव्य ऽ इतिसुप्रऽप्र-व्यः । तेनैवैकाक्षरीकृतात् । अललाभवंतीरीत्यलला-भवंतीः । तौचेत्स्वरौपराविति किं । शतक्रतोइतिशत-ऽक्रतो । अविहर्यंतक्रतोइत्यविहर्यंतक्रतो ।

यथासंधीयमानाना
मनेकीभवतांस्वरः ।
उपदिष्टस्तथाविद्या
दक्षराणामवग्रहे ॥ २४ ॥

इदानीमवग्रहस्वरूपस्वरं यथायेनप्रकारेण संधीय-मानामा मेकीक्रियमाणाना मनेकीभवतां प्रश्लेषमना-प्नुवतां विवृत्तिव्यंजनतिरस्कृतानां स्वरउपदिष्टः । उदा-त्तपूर्वं नियतंविवृत्त्या व्यञ्जनेनवा । स्वर्यतेतच्छितं । स्व-रितादनुदात्ताना मित्यादिना च । तथान्वक्षराणा म-वग्रहे विजानीयात् । ननु योविवृत्तौ स्वरउक्तः सइह-भवत्येव । कस्मादयत्नः कृतः । मात्राकालत्वा द्ध्रस्वभा-वंप्राप्नोति । उषःऽउषः । नावाऽइव । गणऽपतिं । गोऽप-ते । पुरःऽहितं । अनेकीभवतामितिकिं । अन्द्वाम्हा ।

पद्यादींस्तु द्व्युदात्तानां
मसंहितवदुत्तरान् ॥ २५ ॥

पद्यं पदार्धम् । द्व्युदात्तानांपदानां पद्यादीनुत्तरान-संहितवत् संहितवर्जनीयान् । स्वरविधौ । ऋतस्यपंथा-मन्वेतवाउ नैषागव्यूतिरपभर्तवाऽउं । द्व्युदात्तानामिति-किं । अश्वपतेगोपतेउर्वरापते ।

जात्यवद्वातथावान्तौ
तनूशचीति पूर्वयोः ॥ २६ ॥

जात्येनतुल्यंजात्यवत्यथाजात्यस्यांतोनिह्नन्यते । उ-दात्तेपरभूते। एवं तनूशचीपदयोः पूर्वपद्ययोः सतोरं-तोनिह्नन्यते । तथावांतौकुर्यात् । यथाप्रस्ता व्रति-पादितं । तनूनपादुच्यते गर्भआसुरः । इंद्रंकुत्सो-वृत्रहणंशचीपतिं । असंहितव द्वा कुर्यात् । तनून-पादुच्यतेइंद्रंकुत्सोवृत्रहणं । संहितवद्वाकुर्यात् । तनू-नपादुच्यते । वृत्रहणंशचीपतिं । पृथक्त्वा । सदृक्षा-रणांतुल्ययोगनिवृत्त्यर्थम् । तेनैवतत्सिद्धं जात्यवदेवा ध्ययनंयथास्या दितरयोर्माभूदिति । द्व्युदात्तानामेव। तनूनपात्पथऋतस्य । शचीपतेशचीनां । ननु पदा-नांलक्षणं नकर्तव्यं । सिद्धेषु हिपदेषु संहिताप्रवृ-त्तिः । सत्यं । यथापुष्पाहारस्य फलाहरणं । यथावा दार्वाहारस्य मध्वाहरणमेवंतत् ।

त्रिमात्रयो रुत्तरयो रंत्यापि प्र-
चयस्वरे। मात्रन्यस्ततरैकेषाम्॥२७॥

त्रीणित्रिमात्राण्युक्तानि तत्त्रिमात्रयो रुत्तरयोरंत्यापि मात्राप्रचयस्वरे वर्त्तमाना एकेषामाचार्याणाम्मतेन न्यस्ततरानीचतरास्यात् । उपरिस्विदासी ३ त् । नत्वाभीरिवविंदती ३ ॥

उभेव्यालिः समस्वरे ॥ २८ ॥

व्यालिस्त्वाचार्य उभेअंत्येमात्रे उभयोस्त्रिमात्रयोरितराभ्यांसमस्वरे मन्यते । प्रचितस्वरइत्यर्थः । स्विदासी-त् । विंदती ३

असंदिग्धान् स्वरान्ब्रूयात् ॥२९॥

संदेहोनाम अस्पष्टता । उदात्तानुदात्तस्वरित प्रचितान्स्वरान् नसंदेह्यः । नवक्तान्ब्रूयात् ।

अविक्रुष्टान् ॥३०॥

अविक्रुष्टोनाम सुश्लिष्टता स्वराणां स्वरैःसहस्वरसंधीनुपश्लिष्टान् कुर्यादित्यर्थः ।

अकंपितान् ॥३१॥

कंपितान्कंपनंनाम स्वराश्रितपाठदोषः प्रायेण दक्षिणात्यानां भवति । तसुपसंलक्ष्यसवर्ज्यः ।

स्वरितं नातिनिर्हन्यात् ॥३२॥

नातिप्रेरयेत् । स्वरितमा क्षेपेण ।

पूर्वौनातिविवर्तयेत् ॥३३॥

पूर्वावुदात्तानुदात्तौ उक्तौ नातिविवर्तयेत् । आयामविश्रंभाभ्यां नातिदूरंनयेत् ।

जात्योभिनिहितश्चैव चैप्रःप्रश्लि-
ष्टएवच । एतेस्वराः प्रकंपंतेयच्चो-
च्चस्वरितोदयाः ॥

इतिपार्षदव्याख्यायांआनंदपुरवा-
स्तव्योव्वटकृतौप्रातिशाख्यसूत्र-
भाष्येतृतीयंस्वरपटलम् ॥

स्पर्शाः पूर्वेव्यंजनान्युत्तराण्यास्था-
पितानामवशंगमंतत् ॥१॥

चत्वारःसंधय स्तथाहिपूर्वेस्वराः व्यंजनान्युत्तराणि ॥ अनुलोमान्वचरसंधयःपूर्वाणि व्यंजनान्युत्तरे स्वराः प्रतिलोमाश्चस्वचरसंधयः । स्वरसंधिस्तु प्रश्लेषाद्यनेकप्रकारउक्तः । इदानीं परिशिष्टोव्यञ्जनसंधिरुच्यते । स्पर्शाःपूर्वेव्यञ्जनान्युत्तराणि । आस्थापितानां संधानमवशंगमन्नाम तत्संधानंवेदितव्यं । अत्रद्वयोर्व्यञ्जनयो रविकारः सश्चवशङ्गमःसंधि । आरैकपंर्थांयातवे । वषट्तेविष्णावासः । सूर्यायत्पत्येशंसंती । तद्वामजानन्पुत्रः । इममेवकृयाश्रुधी हवं षास्थापितव्यञ्जनसंधयउक्ताः । तेचद्विविधाः । तत्रावशंगमाउक्ताः । वशंगमार्थआरम्भः ।

घोषवत्पराः प्रमासृतीयान्स्वान् ॥२॥

घोषवद्व्यञ्जनपराः प्रथमाः स्पर्शाः तृतीयान्स्पर्शान्स्वानापद्यंते । स्ववर्गी यान् । यद्वाग्वदंति । आचतु-

भिराषद्भिः। यद्वादिवि। स्वानुत्तरसूत्रार्थंकृतंद्वहतुग्रंथांतरमितिपरिभाषयापिसिध्यति।

उत्तमानुत्तमेषूदयेषु ॥३॥

प्रथमस्पर्शाः स्वानुत्तमानापद्यंते। उत्तमेषूदयेषुसत्सु। अर्वाङ्नरादैव्येन। वरामह। अतिसूर्यं। तंनोमित्रोवरुणः। स्वानित्युच्यतेपरवर्गीयेष्वपिपंचमेषूदयेषुसत्सुपदांतीयपंचमोयथास्यान्नतुपरकीयपंचमः। स्पष्टार्थं। सूत्रांतरं।

सर्वैः प्रथमैः स्पर्शैरुपधीयमानः शकारः शाकल्यपितुर्मतेनछकारमापद्यते ॥ ४ ॥

प्रथमागंतमर्वाक्छफाविव। तनायंसोमः स्वमेह्यर्वाङ्कछ्र्वत्तमं॥ घनेनवव्चिवृछुथिह्यमित्रान्।

पदान्तैस्तैरेवतृतीयभूतैस्तेषांचतुर्थानुदयोहकारः ॥५॥

पदस्यांतैरेवप्रथमैः स्पर्शैः नतुङकारेघोषोष्मपरेद्वत्येवमादिरतः पदांतैस्तृतीयत्वंप्राप्तैरुपहितोहकारः तेषामेवप्रथमानांचतुर्थानापद्यतेउदयभूतः शाकल्यपितुर्मतेन। आतूतइंद्रमद्र्यग्घुवानः। आवाड्ढव्यानि। पदांतैस्तैरेवतृतीयभूतैरित्यवाच्यं। हकारस्यचतुर्भावंहत्वापश्चाद्घोषवत्पराः प्रथमास्तृतीयानित्यनेनतृतीयभावंकरिष्यामस्तथातावद्रूपंभवति। लघुचसूत्रंस्यान्नैतदस्ति। परस्यप-

दादेरदृष्टत्वात्। तृतीयभावोदुर्लभः स्यात्। तस्मात्सा-
धूक्तंपदांतिस्तैरेवतृतीयभूतैरिति।

विस्थानेस्पर्शउदयेमकारः सर्वेषा-
मेवोदयस्योतमंस्वम् ॥६॥

विस्थानेअन्यस्थानेस्पर्शेउदयेमकारः सर्वेषामेवाचा-
र्याणांमतेनउदयभूतस्योत्तमंपंचमंस्वमापद्यते। यकुमार-
नवंरथं। अहञ्च्वत्वञ्च्ववृत्रहन्। तन्तेमाता। विस्थानग्र-
हणांचसंधिज्ञापनार्थं। पवर्गेतुअवशंगमेनभवतीति।

अंतस्थासुरेफवर्जंपरासुतांतांपदा-
दिष्वनुनासिकान्तु ॥७॥

सएवमकारोंतस्थासुपदादिभूतासुरेफवर्जितासुपरा-
सुसतीषुतांतामंतस्थामापद्यते। यद्विनामानुनासिकां।
यंय्यंयुजं। भद्रं षांल्लक्ष्मीः। तंवइंद्रं नसुक्रतुं। पदादिग्र-
हणांक्रियतेपदमध्येवसंगमसंधिनिष्टत्यर्थम्। अम्यक्सात-
इंद्र। नोत्रमकारस्यांतस्थाभावः।

तथानकारउदयेलकारे ॥८॥

तेनैवप्रकारेणनकारोलकारे परभूतेलकारमेवानुना-
सिकमापद्यते। स्वग्नीवयोजिगीवांल्लक्षमादत्।

ञकारंशकारचकारवर्गयोः ॥९॥

सएवनकारः ञकारमापद्यतेशकारेचवर्गेप्रत्ययेपरे।
घनेववज्रिञ्छ्नथिहि। मघवञ्छग्धि। आस्मान्ञ्जगम्यात्।

तकारोजकारलकारयोःस्तौ ॥१०॥

नकारः ञकारलकारयोः परभूतयोस्ताविवापद्यते। नकारेञकारं लकारेलकारं। प्रयञ्जिगासि। अंगादं-गाल्लोम्नोलोम्नः।

तालव्येऽघोषउदयेचकारं ॥११॥

चकारछकारशकारा अघोषास्तालव्याश्च एतेषुतकार-श्चकारमापद्यते॥ तच्चचुः। वह्वथमस्तियच्छर्दिः। त-च्छंयोरा। तालव्याद्रुतिकिं। तत्त्वावर्तयामसि। अघो-षद्रुतिकिं। यद्यद्यामि। यद्वोदेवाः।

छकारंतयोरुदयःशकारः ॥१२॥

तयोर्नकारतकारस्थाननिर्दिष्टयोः ञकारचकारयो-रुदयभूतः शकारश्छकारमापद्यते। घनेववज्रिञ्छ्नथिहि। तच्छंयोः। ननुचसर्वैः प्रथमैरुपधीयमानः इत्यनेनसिद्धं। चकारादुत्तरस्यशकारस्यछत्वं। सत्यंसिद्धंयदिनामशा-कल्यपितुर्मतेननैवंवक्तव्यं।

नशाकल्यस्य ॥१३॥

नतुशाकल्यस्याचार्यस्यमतेनशकारश्छकारमापद्यते। वज्रिञ्श्नथिहि। तच्शंयोः।

तानिवसंगमानि ॥१४॥

तानिशब्दलोपोद्रष्टव्यः। छंदोवत्सूत्राणिभवंति। ता-निसंधानानिवसंगमानिवेदितव्यानि। घोषवत्पराः प्रथ-मस्तृतीयानित्येवमादीनि। अस्यापितानांमध्येनच्छत्वा-पठितानियानिव्यञ्जनानिसंयोगंगच्छंति। अतोवसंग-मानीत्युच्यंते।

रेफोष्मणोरुदययोर्मकारोनुस्वा-
रन्तत्परिपन्नमाहुः ॥१५॥

रेफेऊष्मणिचउदयभूते मकारोनुस्वारमापद्यते तत्सं-
धानंपरिपन्नमाहुराचार्याः वशंगमस्यैव द्वितीयासंज्ञा-
कार्यार्थाकृता। सेतिचास्यपरिपन्नोपधाचेत्। परिपन्नंप्रा-
कृतमूष्मसंधिमित्यादिना। वशंगमानीत्यस्याप्यत्वयोगोयु-
क्तरूपः। छंदोभंगभयादधस्तादुक्तः। होतारंरत्नधातमम्
त्वांहत्यदिंद्राणांसातौ। इंद्रोहंति वृषभंशंडिकानां। वसुं-
सूनं सहसः। एवमेव वशाम्यव्यंजनसंध्यनंतरमागमानाह।

ङकारेऽघोषोष्मपरेऽन्तरैके ककारम् १६

ङकारेऽघोषोष्मपरेसति अन्तराङकारस्याघोषोष्मणाश्च
एकेआचार्याः ककारमागममाहुः। तवायंसोमस्त्वमेह्य-
र्वाङ्क्शश्वत्तमं। प्रत्यङ्कसविश्वाभुवना। अघोषग्रह-
णांकिं। दध्यङ्हयन्मध्वाथर्वणः। ऊष्मग्रहणांकिं। प्रत्य-
ङ्चित्वाबिभ्र०।

टकारनकारयोस्तु आहुःसका-
रोदययोस्तकारम् ॥१८॥

टकारनकारयोःपुनःसकारोदययो रंतरातकाराग-
ममाहुरेकेआचार्याः। अत्सेत्वविरित्येनविदध्वप्राट्त्सप्रेति।
त्वंतान्त्संचप्रतिधासि।

ञकारेशकारपरे चकारं ॥१९॥

नकारस्थानगत ञकारग्रहणं। ञकारेशकारपरेसति

अंतराचकारमागममाहु रेकेआचार्याः । घनेवचञ्चिच्छ्नु थिह्यमित्रान् ।

तेन्तःपाताः ॥२०॥

अंतर्मध्येपदयोःपतंतीत्यंतःपाताः एतेंतःपातसंज्ञाः संधयोवेदितव्याः । ङकारेघोषोष्मपरेंतरैकइत्यादयः ।

अकृतसंहितानामूष्मांतानां पटलेस्मिन्विधानं ॥२१॥

येषामूष्मांतानांपदानामधस्तात्संधिर्नविहितः तेषामिहपटले संधानमधिकृतंवेदितव्यं । ओकारंह्रस्वपूर्वस्तथारेफीघोषवत्परःप्रत्येतव्योनतुस्वरपरस्तद्यथा । एषदेवोरथर्यति । नत्वेषदेवोअमर्त्यइति ।

चित्कम्भनंनोष्मलोपः ॥ २२ ॥

चित्कंभनेनेत्यत्र सकारलोपोनिपात्यते । चास्कंभचित्कंभनेन चिद्गृह्यादिहनभवति । उपद्यास्कंभथुःस्कंभनेन।

ककुद्मान् ॥ २३ ॥

ककुद्मानिति दकारोनिपात्यते । स्वानुत्तमानुत्तमेषूदयेष्वितिनकारेप्राप्ते । मुमोदगर्भोवृषभः ककुद्मान् ।

सम्राट्शब्दः परिपन्नापवादः ॥२४॥

सम्राडित्ययंशब्दः परिपन्नस्यवशंगमस्यसंधे रपवादभूतोज्ञातव्यः । विराट्सम्राट्विभ्वीः । शब्दग्रहणं सपूर्वस्यराजतेरेकपदीभूतस्यसर्वप्रत्ययांतस्य सर्वविभक्तिकस्य सर्वलिंगयुक्तस्यच ग्राहकंभवति । सम्राजंत-

मध्वराणां । सम्राजावस्य । सम्राजस्य । सम्राजोरव-श्राक्रणे । सम्राज्ञीश्वशुरेभव । एकपदार्थश्च इहमाभूत् । संराजभीरलघेयाय ।

विसर्जनीय आकारमरेफीघोष-वत्परः ॥ २५ ॥

सहोपधोविसर्जनीयआकारमापद्यते । अरेफीरेफर-हितः । घोषवद्व्यञ्जनपरः ॥ पुनानायंत्यनिविशमानाः । रिफितस्यसंधिर्वक्ष्यति । घोषवत्परइतिकिं । ताविस्वरूपाः पशवः ।

ओकारं ह्रस्वपूर्वः ॥ २६ ॥

सहोपधोविसर्जनीयो ह्रस्वपूर्वओकारमापद्यते । घो-षवत्परः सन् । देवोदेवेभिरागमत् । अरिफितइत्येव । प्रातर्जितंभगं । घोषवत्परइत्येव । यःपंचचर्षणीरभि ।

तौसंधीनियतप्रश्लितौ ॥ २७ ॥

तावेतौ संधीनियतप्रश्लितसंज्ञितौ वेदितव्यौ । पूर्वो-नियतः संधिर्विसर्जनीयआकारमितिद्वितीयप्रश्लितः । ओकारंह्रस्वपूर्वइति ।

सर्वोपधस्तु स्वरघोषवत्परोरेफीरे-फी तेपुनारेफसंधयः ॥२८॥

सर्वोपधो दीर्घोपधो ह्रस्वोपधश्च स्वरघोषवत्परश्चरे-फीविसर्जनीयोरेफमापद्यते । तेपुनःरेफसंधयउच्यंते । स्वरपरः । प्रातरग्निंप्रातरिंद्रंहवामहे । वारिन्मंडूकः ।

अग्निरस्मि । शंनोदेवीरभिष्टये । घोषवत्परः । प्रातर्मित्रावरुणा । अग्निर्वीरं । अश्वावतीर्गोमतीर्नउषासः — स्वरघोषवत्परइतिकिं अग्निस्तुविश्रवस्तमं ।

रेफोदयोलुप्यते ॥२९॥

रिफितोविसर्जनीयोरेफोदयःसन् लुप्यते । युवोरजांसिसुयमासोअश्वाः ।

द्राघितोपधाह्रस्वस्य ॥३०॥

ह्रस्वपूर्वस्य रिफितस्य विसर्जनीयस्य रेफोदयस्यलुप्यतेविसर्जनीयः । उपधादीर्घमापद्यते । प्रातारत्नं । अग्नीरक्षांसि ॥

अकामनियतावुभाविमौ ॥३१॥

अकामश्चनियतश्च उभाविमौसंधीप्रत्येतव्यौ । पूर्वोकामः । द्वितीयोनियतः ।

अघोषेरेफारेफीचोष्माणांस्पर्शउत्तरे ॥ तत्सस्थानमनूष्मपरे ॥३२॥

अघोषेस्पर्शउत्तरेरेफीअरेफीचविसर्जनीय ऊष्माणमापद्यते । तस्याघोषस्यपरत्वावस्थितस्य समानस्थानं । अनूष्मपरेस्पर्शे । ऋषिःकोविप्रः । यःककुभः ॥ अग्निश्चसोम । यद्वोदेवाश्चकृम । देवास्तसर्वे । सनःपर्षत् । अनूष्मपरइतीति । मरुःचोणस्य । शतक्रतुःत्सरत् ।

तमेवोष्माणमूष्मणि ॥३३॥

अघोषेऊष्मणिपरत्वावस्थिते तमेवोष्माणमापद्यते वि-

सर्जनीयः। योवश्शिवतमः॥ देवीष्षूर्वीः। येनस्सपत्नाः। अघोषइतिकिं। अग्निर्होता॥

प्रथमोत्तमवर्गीयेस्पर्शेवा ॥३४॥

विकल्पतःतत्सस्थानमूष्माणामापद्यते विसर्जनीयोरेफारेफीच। यःककुभः। यःपंच।

ऊष्मणिचानते ॥३५॥

अघोषेऊष्मणिच अनतेदंत्यमूर्धन्यापत्तिर्नेति रित्युपरिष्टाद्वक्ष्यति। विकल्पतोविसर्जनीयःस्यात्। योवः। देवीःषलुर्वीः। येनःसपत्नाः। अनतइतिकिं। निष्षिपध्वरीस्ते। व्यापन्नऊष्मसंधिः सविक्रांतः। प्राकृतोपधः॥ व्याशुद्धविसर्जनीयोविक्रांतः व्यापन्नेऊष्मसंधिः सवेदितव्योनाम्ना। यत्रविसर्जनीयोव्यापद्यते। विक्रांतसंधिस्तुप्राकृतोपधोवेदितव्यो विसर्जनीयःश्रूयते।

ऊष्मण्यघोषोदये लुप्यतेपरेनतेपि ३६

ऊष्मणिपरेकथंभूते अघोषोदये नतेलुप्यतेयूष्मविसर्जनीयोलुप्यते। समुद्रस्थः॥ प्रवस्यट्। कस्विद्वृत्तः। निष्ठनिह्वि। अघोषोदयइतिकस्मात्। देवीःषट्। त्रिःसमाद्गः। किमर्थमिदमुच्यते। त्रयःसकारामाभूवन्निति। नैतदस्तिप्रयोजनं। प्रतिषिध्यंतेद्विर्वचनं। नतूष्मास्वरोष्मपरइति। एवंतर्हि परस्यद्विर्वचनार्थं। ऊष्मणोवेति।

सोन्वक्षरसंधिवक्रः ॥३७॥

संधिरन्वक्षरवक्रसंज्ञोवेदितव्यः। तनक्रमः॥ संधिशब्दोद्रष्टव्यः।

अव्यापत्तिः कखपफेषुवृत्तिः ॥३८॥

कखपफेषुपरत्वावस्थितेषु अव्यापत्तिरेववृत्तिः ॥ यः कृतदित् । अगस्त्यःखनमानः । यःपंच ॥ याःफलिनीः । वृत्तिग्रहणंयथाशाखं तथापाठप्रवृत्त्युपलक्षणार्थं । तथाहि । प्रथमोत्तमवर्गौ येस्पर्शैवोष्मणिअव्यापत्तिः कखःपफेषुवृत्तिरित्येवमादयोविकल्पाव्यवतिष्ठंते । यत्रचैकःपाठोभिमतस्तत्रयत्नंकरोति संधिविक्रांतएवैषइति । तस्माद्दृत्यमेवार्थः प्रत्येतव्यः ।

रेफंस्वर्धूःपूरघोषेष्ववग्रहे ॥३९॥

रेफमापद्यतेअघोषेषुप्रत्ययेषुपरेषु स्वरादीनांविसर्जनीयोरेफमापद्यते । स्वः धूः पूः अघोषेषुप्रत्ययेषु । अविग्रहेऽपृथक्पदेसति । स्वः । काव्येनास्वर्चनाः । तिष्ठद्रथंनधूर्षदं । मित्रायुवोनपूर्पतिं । अविग्रहइतिकिं । स्वःसनिष्यवः । पूश्चपृथ्वी ।

नाव्वाइन्दःस्वधितीवाहएवभूम्याददेह्वोभिरूपर्वसूयवः । आवर्त्तमोहोराचाणयदोपितोप्रचेताराजन्वर्त्तिनौरहेतिच ॥४०॥

इतिचविसर्जनीयो यथाप्राप्तंनभवति अतःनिपात्यते । परिष्यसुवानोअव्वाइंदुः । रेफलोपः । प्रस्वधितीवरीयते । मोतसूरोअह्एव । दिविषद्भूम्याददे । ददइतिकिं ॥

भूमिरावपनंमहत् । अह्नोभिरद्भिः । तांत्वासुषर्वसूयवः । गावोनव्रजंव्यूषाआवर्तमः । अहोरात्राणिविदधत् । यद्दोपितोअजगन् । व्ययनस्सभ्यमसुरप्रचेताराजन् । अनुष्येनीसचतेवर्तनीरह ।

यथादिष्टं नामिपूर्वः षकारंसकारमन्योरिफितः ककारे । षकारेच प्रत्ययेंतःपदंतु सर्वत्रैवोपाचरितः ससंधिः ॥४१॥

यथादिष्टं यथोक्तमापद्यते । वक्ष्यमाणेसंधौ नामिपूर्वोविसर्जनीयः षकारमापद्यते । सकारमन्य अनामिपूर्वः अरिफितश्च ककारेपकारेंतःपदंतु सर्वत्रैवेतदधिकृतंवेदितव्यं । उपाचरितसंज्ञः ससंधिर्वेदितव्यः । अथोयूयंस्थनिष्कृतीः । यातंछर्दिष्पाउतनःपरस्पा । निकाव्यावेधसश्शश्वतस्कः यथादिष्टमितिकिं । यःपंच । अरिफितइतिकिं । भोजाजिग्युरंतःपेयं । उपाचरितसंज्ञायाः प्रयोजनं । प्लुतोपाचरितेनतिः ॥

अंतःपादं विग्रहेकारपूर्वः पतिश्शब्देद्वाक्षरपुंस्प्रवादे ॥४२॥

अंतःपादमित्यधिकारवचनं । विग्रहइ अंतःपदंतु सर्वत्रैवेत्यस्यनिवृत्यर्थं ॥ अकारपूर्वोविसर्जनीयः सकारमापद्यते । पतिशब्देप्रत्ययेद्व्यक्षरं पुंस्प्रवादेपुंशब्दस्यवाचिनि । उत्तिष्ठब्रह्मणस्पते । वाचस्पतिंविश्वकर्माणमूतये । अंतः

पादमितिकिं । तंजानतंजानती:प्रत्युदायन्नुषास:पति: । अकारपूर्वइतिकिं । अधीषमाणाया:पति: । द्यचरमितिकिं । ऋतस्यन:पतयोमृडयंतु ॥ पुंस्प्रवादइतिकिं । अत:पत्नीर्दृशस्यत । शब्दग्रहणंपुंस्प्रवादग्रहणंचोत्तरं ।

करंकृतं कृधिकरत्करित्यपिपरेषु ॥४३॥

करं । कृतं । कृधि । करत् । क: । एतेष्वपिपरेषु अकारपूर्वोविसर्जनीय: सकारमापद्यते । अहंन्य १ न्यं-सहसासहस्करं । सोमंनचारुं मघवत्सुनस्कृतं । उ-रुकृदुरुणस्कृधि । कुविन्नोवस्यसस्करत् । निकाव्यावे-धस:शश्वतस्क: ।

पादांतगतेपरीतिच ॥४४॥

पादांतप्राप्ते परीत्यस्मिन्पदेपरभूते अकारपूर्वोविसर्जनीय:सकारमापद्यते । तदुत्तानपदस्परि । पादांतगत-इतिकिं । यदोषधीभ्य:परिजायते । अकारपूर्वइतिकिं दक्षाद्दक्षिति:परि ।

असोंतोरेफवत: पारशब्देपरिकृतानिकरतीतिचैषु । अपादांतीयेष्वपिप्रत्ययेषु ॥४४॥

अरेफवतोरेफरहितस्य असइत्यस्यांत: ससकारमापद्यते । पारशब्देपरभूते परिकृतानिकरतीति एषुपरभूतेषु अपादांतीयेष्वपिसकारमापद्यते । अतारिष्मतमसस्पारमस्य इंद्राविष्णूअपसस्पारेअस्य । अविह्वरं-

तंमनसस्परिध्यया । कृतानि इंद्रस्येव प्रतवसस्कृतानि करति सुपेशसस्करति । असोंतइतिकिं । सुजातासः परिचरंति । सद्योअस्याध्वनः परमस्पथ । यदोषधीभ्यः परि । अरेफवतइतिकिं । रजसः पारईखितं । पादांताधिकारनिवृत्त्यर्थं अपादांतीयग्रहणं ।

वास्तोरित्येतत्पतिशब्दउत्तरे॥४५॥

यथाप्राप्तमुपाचरति । शब्दग्रहणं लिंगविभक्तिवचनग्रहणार्थं । वास्तोष्पतेध्रुवास्थूणा । वास्तोष्पतिंव्रतपांनिरतचन् ।

आविर्हविर्ज्योतिरित्युत्तरश्चेत्ककारः ॥४६॥

आविः । हविः । ज्योतिः । एतेषांविसर्जनीयः षकारमापद्यते । उत्तरोयदिककारः स्यात् । आविष्कर्तमहित्वना । हविष्कृणुध्वमागमत् । ज्योतिष्कर्तायदुश्मसि ।

अथोपांतपश्यंतिशब्दौ ॥ ४७ ॥

अपिचपांतपश्यंतिशब्दौ यद्युत्तरौभवतः । एतेषामेवशब्दानां अथविसर्जनीयः षकारमापद्यते । पांतं । हविष्पांतमजरं पश्यंति ज्योतिष्पश्यन्ति । शब्दग्रहणमुत्तरार्थं ।

इलायागानमसोदेवयुर्द्रुहोमातुरिलस्तानिपदप्रवादे ॥ ४८ ॥

इलायाः । गाः । नमसः । देवयुः । द्रुहः । मातुः

इत्यत: । तान्येतानि प्रवादेउपाचरितंलभते । इडाया-स्पदेसुदिनत्वेअन्हां । अक्तेचिद्गास्पदेभ्योदात् । उपो-एनंजुजुषुर्नमसस्पदे ॥ प्रवोच्छारिरिचेदेवयुष्पदं । मा-नस्तेनेभ्योयेअभिद्रुहस्पदे । मातुष्पदेपरमेअंति । इल-स्पदेसमिध्यसे ।

पूर्वः पुरः पूरितिपूर्वपद्यान्पदानि-चापोद्यनवैतदेवम् ॥ ४९ ॥

पूर्वः । पुरः । पूः इत्येतान् पूर्वपद्यान् अपोद्यपरिव-र्जयित्वा पदानि नववक्ष्यमाणानि वर्जयित्वा एतदुपचा-रप्रकरणं विहितमेवंप्रत्येतव्यं । अपवादविधिरयं सामा-न्यविधेः प्रभवितुमर्हति । अंतः पदंतुसर्वत्रैवास्यविधेस्ता-वदयमपवादः । पूर्वः पूर्वीयजमानोवनीयान् । पुरः प्र-स्रवणावलिं । मित्रायुवोनपूर्पतिंसुशिष्टौ । ननु रेफंस्वर्धूः पूरघोषेष्वविग्रहे इत्यनेनैव सिद्धत्वादिति यश्चोदयेतंप्र-तिब्रूमः । प्रतिकंठंतावन्नभवति । येन सर्वापवादकंस्यात् । सर्वापवादकं हितत्पठितं सर्वशास्त्रार्थं प्रतिकंठमुक्तमिति । अपवादस्तुविसर्जनीयस्यभवति । रेफमापद्यतेवि-सर्जनीयः । स्वर्धूः पूरघोषेष्विति । अथमप्युपाचरितापवादएव । अन्तः पदंतु सर्वत्रैवेत्यस्योत्सर्गस्य । अतोद्वयो-रुत्सर्गयोद्वावपवादौ युक्तावुभावितिनातिरिक्तं ॥ इदानीं-नवपदान्युच्यंते ।

अस्यायः सोमोहृतोऽस्यपूर्व्य-उरुज्योतिर्गातक्षमोवृधोन्यः ॥५०॥

अस्याय:। दीर्घायुरस्यायः पतिः। अस्यादूतिकिं। यस्यातिर्वीर्यांणां। सोमः।सोमः पतीरयीणां। दृहतः। व्यष्टवीरस्यव्रहतः पतिभूः। अस्यपूर्व्यः। उतनोअस्यपूर्व्यः पतिर्दन् अस्येतिकिं। अहंभुवंवसुनः पूर्व्यस्पतिः। उरुज्योतिः। उरुज्योतिः कृणुहिमन्त्रिदेवान्। उर्विं तिकिं। ज्योतिष्कर्तायदुश्मसि॥ जातः। भूतस्यजातः पतिरेकआसीत्। इमः। उपत्वेमः कृणिनोभागधेयं। वृधः। इंद्रासिसुन्वतोवृधः पतिर्दिवः। अन्यः। स्विष्टमद्यान्यःकरत्।

ब्रह्मणो इचातस्ततो विदु वसुः पशु वेतानिकविशब्दउतरे॥५१॥

ब्रह्मणः। वातस्तं तइतिद्वे पदे। विदुः। वसुः। पशुः एतानिउपाचारंलभन्ते। कविशब्देपरभूते। ब्रह्मणः। रच्चाणोब्रह्मणस्कवे। अग्नेवातस्तंतस्कविः। इ इतिकिं। पवमानस्ततः कविः। विदुः। प्रमर्षिष्टाअभिविदुष्कविः सन्। वसुः। सद्मधानोवसुष्कविः। पशुः। पशुष्कविरशयच्चायमानः। शब्दग्रहणात् प्रतिपदिकमात्रंगृह्यते।

पथिशब्दे जिन्वथश्चेतथोमहः।५२।

पथिशब्देप्रत्यये जिन्वथश्चेतथोमहइत्येतानि उपाचारंलभंते। शब्दग्रहणात् प्रातिपदिकमुक्तार्थम्। जिन्वथः। आवर्तनिंमधुनाजिन्वथस्पथः। चेतथः। विश्वांअनुस्वधयाचेतथस्पथः। महः। कद्यंम्णोमहस्पथा।

पृथुशब्देविश्वतोवीलितोरजः।५३।

पृथुशब्देपरभूते विश्वतोवीलितोरजइत्येतेषांविसर्ज-

नीयः सकारमापद्यते । विश्वतः । गिरिर्नविश्वतस्पृथुः पतिर्दिवः । वीलितः । रथचोदः अथनोवीलितस्पृथुः । रजः । विद्यामेषिरजस्पृथ्वहा ।

कामपोषपूर्धिशब्देषुरायः ॥ ५४ ॥

कामपोषपूर्धिइत्येतेषुपरभूतेषु रायइत्येतत्पदंउपाचरति । कामः । रायस्कामोवज्रहस्तं । पोषं । रायस्पोषं यजमानेषु(१)। पूर्धि । रायस्पूर्धिस्वधावोस्ति ।

पादादिरंतश्चदिवस्परीतिच ॥५५॥

दिवस्परीत्येतद्वैपदंनिपात्यते । पादादौपदांतेच वर्तमानं । दिवस्परिसुग्रथितंतदादः । अयंसयोदिवस्परि रघुयामापवित्रआ । पादादिरंतश्चेतिकिं । वृष्टिं दिवःपरिस्रव । ननुसकारपूर्वविसर्जनीयानुवृत्तौ सत्यां पदांतगतेपरीत्यनेनैवसिद्धत्वात् । यदिह्यांतश्चदिवस्परीत्युच्यते । तदतिरिक्तमिति । नातिरिक्तंतस्यावकाशःदिवोअंतेयस्य इत्यादिष्वेवइह्यांतग्रहणेनैव द्वैपदंनिपातितः स्यात् । पादादावेवनतु अंतेतस्मान्नातिरिक्तं ।

दिवस्पृथिव्या अधमस्पदीष्टपूर्वंपादादौयदि ॥५६॥

दिवस्पृथिव्या अधमस्पदीष्टएतद्वैपदंनिपात्यते । अत्रपूर्वंद्वैपदंपादादौयदिस्यात् । दिवस्पृथिव्याः पर्योजउद्धृतं । विश्वस्यजंतोरधमस्पदीष्ट । पूर्वंपादादावितिकिं । प्रये-

(१) पुष्टारयेति खपुस्तकपाठः ।

दिवःपृथिव्यानवव्हृँणा।

सस्पदीष्ट ॥५७॥

एतद्वैपदंनिपात्यते। योनोद्वेष्टयधरःसस्पदीष्ट।

शवसोमहःसहसइलायाःपात्वि-
त्येकंपुत्रशब्देपराणि ॥५८॥

शवसः। महः। सहसः। इलायाः। पातु। एकं।
इत्येतानिपदानिउपाचरंति। किमविशेषेणेत्याह।
पातुइत्येतस्मिन्पदेपरभूते। एकं प्रथमं पदमुपाचरति पु-
त्रशब्देपराण्युपाचरंति। शवसः। वाजोनुतेशवस्पात्वंतं।
महः। महस्पुत्रासोअसुरस्यवीराः। सहसः। सहसस्पुत्रो-
अद्भुतः। इलायाः। इलायास्पुत्रोवयुनेजनिष्ट।

रायस्पामहस्करथोमहस्परंनि-
ष्कृव्यादंनिष्कृथनिष्पिपर्तन ॥५९॥

इत्येतानिपदानि द्वैपदानिनिपात्यते। सरायस्पामु-
पसृजागृणानः। मह्स्करथोवरिव क्वस्विदस्यरजसोम-
हस्परं। निष्कृव्यादमनीनशत्। यदामयतिनिष्कृथ।
निष्पिपर्त्तन। विश्वस्मान्नोअंहसोनिष्पिपर्त्तन।

कबन्धंपृथुकण्वासः पुत्रः पातुपथा-
पयः। पायुः पृष्ठपदंतेषां प्रवादा-
उदयेदिवः ॥ ६० ॥

कवंधं। पृथु। कण्वासः। पुत्रः। पातु। पथा। पयः।

पायुः । पृष्ठं । पदं । इत्येतेषांपदानां प्रवादाः उदयेव-र्त्तमाना दिव इत्येतस्यपदस्य उपाचारंजनयंति । दिवस्कबंधमवदर्षद्दुद्रिणां । पृथु । अरिनंवांदिवस्पृथु । कोणवासः । दिवस्कणवासइंदवः । पुवासः । दिवस्पुवास-असुरस्यवीराः । पातु । सूर्योनोदिवस्पातु । पथा । दिवस्पथावध्वः । पयः । दिवस्पयो दिधिषाणा अवेषन् । पायुः दिवस्पायुर्दुरोणयुः । पृष्ठं । दिवस्पृष्ठं भंदमानः सुमन्मभिः । पदं ।(१) अभिप्रियादिवस्पदं ।

रजसस्पात्यंतस्पाथाः कस्काव्याच-तुरस्कर । स्वादुष्किलनिस्पातुद्यौ ष्पितर्वसतिष्कृता ॥ ६१ ॥

एतानिपदानि यथागृहीतं निपात्यंते । विचक्रमे रजस्पात्यंतौ । अंतस्पथाः । अरिफितस्य विसर्जनीयस्य यदुक्तमंतः पदंतुसर्वत्रैवेति तदिहरिफितस्यदृश्यते । अतोनिपात्यते । अंतस्पथाअनुपथाः । कस्काव्यामरुत-कोइपौंस्या । कनिष्ठआह चतुस्करेति । स्वादुष्किलायं । सरस्वती निदस्पातु । द्यौ ष्पितःपृथिवि । वसतिष्कृता । पर्णोवोवसतिष्कृता ।

तपोष्पवित्रं चिष्पूत्वौ धीष्पीपाय विभिष्पतात् । द्यौष्पिता रजसस्पृष्टो दद्दुष्पजाय नस्करः ॥६२॥

(१) अभिप्रियादिवस्पदा इतिचपाठः ।

एतानिपदानिनिपात्यन्ते । तपोष्पवित्रं विततंदिव-स्पदे । अपालामिंद्र त्रिष्पूत्वी धीष्पीपाय इहदिवेषु मानुषा । यद्वांरथो विभिष्पतात् । द्यौष्पिताजनितासत्यमुचन् । धत्तोदिवो रजसस्पृष्ट ऊर्ध्वः । ददुष्पत्राय साम्ने । अधात्वंहि नस्करः ॥

वसुष्कुवि र्मनुष्पिता पितुष्पिता पितुष्परि । प्रशास्पुरो मयस्करं नभस्पय स्त्रयस्पर: ॥६३॥

एतेचोपचोरा यथागृहीतंभवंति । वसुष्कुवि इसुभिकाममावरत् । यामथर्वा मनुष्पिता । गर्भेमातुः पितुष्पिता । अहमिद्धि पितुष्परि । सद्यश्चाद्व प्रशास्पुर: । प्रेतिकिं । भद्रंभवातिनः पुरः । मयस्करत्परतरेचनाहन् । इरिरोपशंसगुणति नभस्पयः । येत्रिंशति त्रयस्परः ।

नकारआकारोपधः पदांतोपि स्वरोदयः । लुप्यते ॥६४॥

अतउत्तरं नकारविकारा उच्यंते । ईमित्यंतलोप एषुदयेत्वस्मान्मकारलोपात्प्राक् । आकारोपधोनकारः पदांतो:पदांतोपिच विग्रहाधिकारनिवृत्यर्थंपदांतग्रहणं। अंत:पादाधिकारानुवृत्त्यर्थंच । स्वरोदय:सन् लुप्यते । सर्गां इवसृजत सुष्टुतीरुप । महांइंद्रो न्वदा चर्षणिप्रा ॥ आकारोपधइतिकिं । कीतुंकृण्वन्नकेतवे । स्वरोदयइतिकिं अयोदंष्ट्रान्विधावतोवराहून् । अंत:पादाधिकारानुवृत्तिः किं , तयेहविश्वां अवसे यजत्रानासादय ।

अज्रांजग्रसाना जघन्वा न्देवहूतमान् । बढ्रधानां इंद्रसोमाँस्तृषाणान्नो देवदेवान् । हंतदेवांइतिच ॥६५॥

पादान्तेएतेषुपदेषुनकारालुप्यन्तेपादांतीयार्थआरंभः। अज्रान् । आसूर्योवृहतस्तिष्ठदज्रांऽऋजु । जग्रसानान् । सृजःसिंधूंरहिनाजग्रसानांआदित् । जघन्वान् । त्वमपोयद्वृत्रंजघन्वांअत्यांइव । देवहूतमान् । युद्गाहिदेवहूतमांअश्वांअग्ने । वढ्रधानान् । त्वमुत्सांऋतुभि र्बढ्रधानांअरंहः । इंद्रसोमान् । यथापिबःपूर्व्यांइंद्रसोमांएव । इंद्रेतिकिं । सुन्वंतिसोमान्पिबसित्वमेषां तृषाणान् । धन्वान्यज्रांअपृणक्तृषाणांअधोक् । नोदेवदेवांअक्ष । हंतदेवान् ॥ यजामहैयज्ञियान्हंतदेवांईलामहै । हंतेतिकिं । यथायजऋतुभिर्देवदेवानेव ॥ इतिच ॥

एताअान्यदाःपदवृत्तयः ॥६६॥

एताअाज्रानित्यादिका अधस्तनाश्च नकारोपध इत्यादिका अन्यदाःपदवृत्तयउच्यंतेनादिताः ।

विवृत्यभिप्रायेषुचपीवोअन्नांरयिवृधः । दधन्वांयो जुजुवांयः स्ववांयातुदद्वांवेति ॥६७॥

विवृत्यभिप्रायेषुच संधिषु नकारआकारोपधोलुप्यते । यंतस्याव्यञ्जनोदयइत्येषद्वे पदेषु । पीवोअंनारयिवृधः

सुमेधाः । दधन्वाँयोनर्यो अप्स्वं १ तरा । जुजुर्वाँयो मुहुरायुवाभूत् ॥ सुमृलीकः स्ववाँयात्वर्वाङ् । दक्षाँवाय-त्युष्यतिरेवणः ॥

हतं योनौ वचोभि र्यां न्युवन्यूँ-न्वनिषीष्टेति । ईकारोकारोप-हितो रेफमेषु ॥६८॥

हतं । योनौ । वचोभिः । यान् । युवन्यून् । वनिषी-ष्ट । एतेषुपदेषु प्रत्ययभूतेषु ईकारोकारोपहितश्चनकारः रेफमापद्यते । उत्पणीर्हतमूर्म्या मदन्ता । योनौविदस्यूँ र्योनावकृतहथाषात् । पणीर्वचोभिरभियोधदिंद्रः । सखी याँइन्द्रश्चकृषे । युवन्यून् । रुद्रस्यसूनू युँवन्युंरुदश्याः वनिषीष्ट । प्रियँ ।अपिधीँ र्वनिषीष्टमेधिरः ।

स्वरेषुच ॥ ६९ ॥

स्वरेषुप्रत्ययेषु ईकारोकारोपहितो नकारोरेफमाप-द्यते । रश्मीँरिवयच्छतं । अभीशूँ रिवसारथिः । परिधीँर-तिताँ इहि । बंधूँरिमां अवरान् । अंतः पादाधिका-रानुवृत्ते रिहनभवति । अतोनस्रोन्हनतिथीनतः ।

दस्यूँरकोनृँरभिच ॥ ७० ॥

दस्यूँरेकोन्हूँरभिच अनयोश्चद्वैपदयो रेफमापद्यते । त्वं-हनुत्यदटमायोदस्यूँरेकः। पादान्तार्थतोआरम्भः । नॄँ र-भि । येनाव १ र्णततनामनृँरभि। ऋकारोपधत्वा न्न-कारस्य रेफविधानमेतत् ।

ते स्पर्शरेफसंधयः ॥ ७१ ॥

तएते इतंयोनावित्याद्यारभ्य स्पर्शरेफसंधयो वेदितव्याः स्पर्शोष्मसंधीन् स्पर्शरेफसंधीनभिप्रायांश्च परिपातयंतीत्यादिभिः संज्ञाव्यवहारः ।

नास्मानुपैतावान् स्फुरान्गह्वान्देवानयाड्वहान् । हिरण्यचक्रान्मायावान् घोषांस्तानश्विनाविद्वान् पयस्वान्पुत्रानाधेह्यायजीयान्यतीनुरोः ॥ ७२ ॥

अस्मानुप । एतावान् । स्फुरान् । गह्वान् । देवान् । अयाट् । वहान् । हिरण्यचक्रान् । मायावान् । घोषान् । तान् । अश्विना । अविद्वान् । पयस्वान् । पुत्रानाधेहि । आयजीयान् । यतीनुरोः । एतेनकाराः प्रकृत्याभवंति । अस्मान् । धेनुर्वागस्मानुपसुष्टुतैतु । उपेतिकिं । प्र.स्मां- अवपृतनासुप्रविक्षु । एतावान् । एतावानस्य महिमा । स्फुरान् । अनुयद्गावः स्फुरान्ऋजिप्यं । गह्वान् । गह्वानिह- दुषोरातिम् । देवानयाट् । देवानयाड्यां अग्निप्रेर्यंते । अ- याडितिकिं । देवाँआवीतये वह । कस्मैदेवा आवहानाशुहोम । हिरण्यचक्रान् । पश्यंहिरण्यचक्रानयोदंष्ट्रान् । मायावान् । निमायावानब्रह्मादस्युरर्त्त । घोषाः । आयते- घोषानुत्तारायुगा । तानश्विनाप्रैषोनुमेयः । तानश्विना । तानश्विनासरस्वतीमिन्द्रंसुत्रामाणम् । अश्विनेति किं । तांइंद्रसहसेपिव । अविद्वान् । अविद्वानित्था-

परश्चेताः । पयस्वान् । पयस्वानग्न आगहि । पुत्रानाधेहि । दशास्यां पुत्रानाधेहि । आधेहीतिकिं । पुंसः पुत्रां उत । धेहीतिकिं । मृग्यंप्रत्युदाहरणं । आद्दजीयान् । होतुर्होतुरायजीयान् । यतीनुरोः । यतीनुरोः प्रियाधामः प्रियव्रतांमहस्व । सरस्वयतीनुरोः । उरोरितिकिं । मृग्यंप्रत्युदाहरणं ।

चरति चक्रे चमसां श्चोचिच्च-रसि च्यौल श्चतुरश्चिकित्वान् । एतेषुसर्वत्र विसर्जनीयवद्दीर्घोपधः ॥ ७३ ॥

चरति । चक्रे । चमसान् । च । चो । चित् । चरसि । च्यौलः । चतुरः । चिकित्वान् । एतेषुपदेषु परभूतेषु सर्वत्र अंतः पादपदांतिवर्तमानो दीर्घोपधोनकारो विसर्जनीयवत् प्रत्येतव्यः । विसर्जनीयधर्म्मांल्लभते नकारइत्यर्थः । कतमेतेइतिचेत् । अघोषिरेफ्यरेफीचोष्माणं स्पर्शउत्तरे । तस्मिँस्थानूष्मपरेति । चरति । अंतर्महां अरतिरोचनेन । चक्रे । पशूंतांश्चक्रे वायव्यान् । चमसां । विभ्राजमानांश्चमसां अहेवावेनत् । च । अस्मांचतांश्च प्रहिनेषिवस्यआ । चो । यांश्चोनुदाधुविः । चित् । तांश्चिद्देवापिगच्छतात् । चरसि । चरसिमंद्रांश्चरस्योजसा । च्यौलः । भुवोनूँश्च्यौलो विश्वस्मिंभरेज्येष्ठश्च । चतुरः । रायःसमुद्रांश्चतुरः । चिकित्वान् । विद्वांश्चिकित्वान्हर्यश्ववर्धसे । दीर्घोपधइतिकिं । अहंचष्टन्नंनमुचिमुताहन् ।

अस्माँचमसा न्पशून्न ॥७४॥

अस्मान् । चमसान् । पशून् । नात्रनकारो विसर्जनीयवत्कार्यंलभते । अस्मांचतांश्चप्रहि । यदावाख्यच्चमसांचतुर: । पशूंचस्थातॄन्चरथंचपाहि ।

तांस्ते सर्वांस्तांदेवास्त्वं तांस्त्वायस्त्वावदंस्त्वंच ॥७५॥

एतेषांद्वेपदानां नकारोविसर्जनीयवद्भवति । ताँस्ते । तांस्तेअश्याम पुरुकृत्पुरुक्षो । सर्वांस्तान् । सर्वांस्तांइन्द्रगच्छसि । देवास्त्वम् । देवास्त्वंपरिभूरसि । तांस्त्वायस्व । तांस्त्वायस्वसहस्य । आवदंस्त्वम् । आवदंस्त्वंशकुनेभद्रं ।

विसर्जनीयं परेष्विति तेस्पर्शोष्मसंधय: ॥७६॥

येषुपरेषुसंधिषु विसर्जनीयंवर्ययंवक्ष्याम: । येचएतेचरति चक्रेइत्यादयस्त उभयेपिस्पर्शोष्मसंधयो वेदितव्या: । एकत्रस्पर्श एकत्रोष्मेत्यन्वर्थसंज्ञा । एवमधस्तना अपिसंज्ञावेदितव्या: । दिङ्मात्रंत्वेतत् प्रदर्शितम् ।

नृँ:पतिभ्योनृँ:प्रणेत्रं नृँ:पात्रं स्वतवाँ:पायु: । संधिविक्रांतएवैष: ॥७७॥

ऐवेत्यवधारणवचनम् । नात्रद्वितीय: पक्ष: । नृँ:पतिभ्य: । नृँ: पतिभ्योयोनिंकृण्वाने । नृँ:प्रणेत्रम् । नाराशंसंन्रशस्तंनॄँ:प्रणेत्रं । नृँ:पात्रम् । कद्रित्थानॄँ:पात्रंदे-

वयतां। स्वतवाँःपायुः। भुवस्तस्यस्वतवाँःपायुरग्ने।

न्हूँःपाहिशृणुधीतिच ॥७८॥

न्हूँःपाहिशृणुधीगिर इत्ययंविक्रांतसंधिरेव। शृणुधीतिकिं। रक्षानूंःपाह्यसुरत्वमस्मान्।

नकारस्यलोपरेफोष्मभावे पूर्वस्तत्स्थानादनुनासिकस्वरः ॥७९॥

नकारविकारानुक्त्वाऽथेदानीं नकारसमुच्चरितान्स्वरविकारानाह। यत्रयत्रनकारस्य लोपभावउक्तः रेफभावऊष्मभावश्च तत्रतत्र पूर्वोनकारस्थानादनुनासिकःपूर्वः स्वरो वेदितव्यः॥ स्वरग्रहणं व्यञ्जनानुनासिक्यपरिग्रहार्थं। लोपभावेनकारस्य। सर्गाँइवसृजतं। महाँइंद्रोन्नवत्। पीवोअन्नाँरयिवृधः। रेफभावः। रश्मीँरिवयच्छतम। रुद्रस्यसूनूँर्युवन्यूँरुदश्याः। ऊष्मभावः। महाँश्चरस्योजसा। ताँस्त्वेअश्याम। न्हूँःपतिभ्योयोनिम्।

आदिस्वरश्चोत्तरेषांपदेपि ॥ ८० ॥

उत्तरेषांपदानामादिस्वरोनुनासिकोवेदितव्यः। पदेपीत्यपिशब्दप्रयोगः संहितायामेव तद्विधानमितिद्योतनार्थः।

माँस्पचन्या माँश्चत्वेमँश्चतोश्च॥८१॥

माँस्पचन्याः। माँश्चत्वे। मँश्चतोः। एतानिपदानि। माँस्पचन्याः। यन्नीक्षणम्माँस्पचन्याउखायाः। माँश्चत्वे। माँश्चत्वेवापृशनेवावधत्रे। मँश्चतोः। अध्नंमंश्चतोर्वरुणस्यबभ्रुं।

ईमित्यंतलोपएषूदयेषुगर्भंगावोवत्समृजंतिपृच्छते। सखायोविव्याचपुनारिणांतिरथमित्यन्वचरसन्धिरेवसः ॥८२॥

इदानींवर्णलोपउच्यते । ईमित्यस्यांतलोपो भवति एषूदयेषु सत्सु । गर्भं । गावः । वत्सं । मृजंति । पृच्छते । सखायः । विव्याच । पुनः । रिणांति । रथं । इतिकरणः समाप्तिवचनः । अन्वचरसंधिरेव सोयं वेदितव्यः । योधस्तात् प्रतिपादितःएषस्य सचस्वराश्च पूर्वइत्यादिकः॥ गर्भम् । यमीगर्भमृतावृधः । गावः । समीगावो मतयोयंति । वत्सम् । समीवत्संनमातृभिः । मृजन्ति । तमीमृजन्त्ययवः । पृच्छते । समीपृच्छतेसमनेव । सखायः । समीसखायो अस्वरन् । विव्याच । समीविव्याच सवनापुरूणि। पुनः । संवत्सरेवावृधे जग्धमीपुनः । रिणान्ति । एरिणांति वर्हिषि प्रियंगिरा । रथम् । समीरथं न भुरिजोरहेषत ।

पुरुपृथ्वधिपूर्वेषु शकारउपजायते । ऋस्वेचपूर्वपदांते चंद्रशब्दे परेंतरा ॥८३॥

पुरु । पृथु । अधि । एतेषुपूर्वपदेषु सत्सु ऋस्वेच पूर्वपदस्यांते सति चंद्रशब्देचपरे अंतराशकारागमउपजायते । पुरु । महिचेत्रं पुरुश्चंद्रं विद्वान् । पृथु । पृथुश्चंद्रमवसे चर्षणिप्राः । अधि । अधिश्चंदं बृहत्पृथु। ऋस्वेचपूर्वपदांते-

हरिश्चंद्रो मरुद्गणः । ह्रस्वग्रहणं विस्पष्टार्थम् । दीर्घान्तस्य पद्मस्यचंद्रशब्दस्याभावात् । पूर्वपद्यांतइतिकस्मात् । अभिचंद्राभर्तवेनोहिरण्या ।

परीतिपद्ये कृपरे षकारः ॥ ८४ ॥

परीत्येतस्मिन्पूर्वपद्येकृपरेसतिअंतराषकारागमउपजायते । परिष्कृण्वन्ननिष्कृतम् ।

वनेतिरेफःसदशब्दउत्तरे ॥८५॥

वनइत्येतस्मिन्पूर्वपद्ये सदशब्दउत्तरे अंतरारेफोजायते । तिष्ठद्रथं नधूर्षदं वनर्षदं ।

परिष्कृण्वन्ति वेधसः ॥ ८६ ॥

परिष्कृण्वंतीति निपात्यते षकारागमः । परिष्कृण्वंति वेधसअपद्यार्थं वचनं । वेधसइतिकिं । कृण्वं प्रत्युदाहरणं ।

अस्कृतोषसं ॥ ८७ ॥

अस्कृतेति निपात्यते । सकारागमः । निरुस्वसार मस्कृतोषसं । उषसमितिकिं । युजंह्या १ न्यमकृत प्रवेपती ।

शौद्राक्षराः संधयएतउक्ताः ॥८८॥

यएते पुरुपृथ्वादय स्तेशौद्राक्षरसंज्ञा वेदितव्याः । शौद्राक्षरागमोपैतौ त्यादिसंज्ञाप्रयोजनं ।

मेधातिथौ वरुणांत ऋतान्तौ स्पशांतस्याप्रत्ययौ निर्ऋसते ॥८९॥

मेधातिथावृषौ । अग्निन्दूतंवृणीमहे इत्यारभ्य कस्यनूनमितियावन्मेधातिथिः ॥ वरुणेति यस्यसमासस्यसवरुणांतः । एवमेवव्रतांतोपि गृह्यते स्पर्शप्रत्यये यंतस्थाप्रत्यये निर्दिसिते । ह्रस्वीभवतः । इंद्रावरुणनूनु वां । इंद्रावरुणयांहुवे । व्रतांतः । युवंदत्तं धृतव्रत मित्रावरुणादूलभं । मेधातिथाविति किं । इंद्रावरुणामदे अस्य । इंद्रावरुणा युवमध्वरायनः । स्पर्शांतस्थाप्रत्यये इति किं । तामित्रावरुणाहुवे ।

आदित्या देवा वरुणा सुरेति येत्यादिषु ॥ ९० ॥

आदित्या । देवा । वरुणा । असुरा । एतानिपदानि ह्रस्वानिभवंति । याइत्यादिपदेषुपरभूतेषु । तानितुउपरिष्टाद्वक्ष्यति । अतउपरिष्टा देवोदाहरिष्यामः ।

वयमित्यत्रमित्रा ॥ ९१ ॥

वयमित्येतस्मिन्पदे परभूते मित्राइत्येतत्पदं ह्रस्वोभवति । मित्रवयंच सूरयः ।

यासुप्रतीकं निष्कृतं पुरोहितिः चत्रं दाशति शवसा भिषज्यथः ९२

या । सुप्रतीकं । निष्कृतं । पुरोहितिः । चत्रं । दाशति । शवसा । भिषज्यथः । एते याद्योधस्तादुपदिष्टाः ॥ या। प्रसाचितिरसुर यामहिप्रिया ॥ सुप्रतीकम् । उद्वांचक्षुर्वरुण सुप्रतीकं ॥ निष्कृतम् । वलित्थादेव निष्कृतमादित्या ॥ पुरोहितिः । इयंदेव पुरोहितिः ॥ चत्रम् । युवं-

नोयेषु वरुणाच्चत्र्वं॥ दाशति। इंद्रायोवां वरुणादाशतित्मन्॥ शवसा । यश्वादित्यशवसान्नमस्वान्॥ भिषज्यथः। यद्वादेव भिषंज्यथः॥

सोचिन्वगस्त्येदशमेचमण्डले॥६८॥

सोचिदितिनिपात्यते॥ ओ त्वंविसर्जनीयस्य॥ अगस्त्येऋषौ दशमेचमंडले॥ सोचिन्नुनमरातिनो वयस्मराम॥ सोचिन्नुसख्यानर्यं इनस्तुतः॥ अगस्त्येदशमेच मंडलइतिकिं॥ सचिन्नवासां पतीरयोणां॥ सचिद्धिवेदनिहितं॥

सान्वीयते॥६९॥

सान्वीत्यस्य आत्वंनिपात्यते॥ सचिकित्वां ईयतेसान्वीयते॥ ईयतइतिकिं॥ प्रत्युदाहरणं प्रत्येतव्यं॥

सःपलिक्नीः॥७०॥

विसर्जनीयस्यालोपोनिपातितः॥ नता अग्म्नन्नजनिष्टहिषः पलिक्नीः॥

हिषस्तव॥७१॥

अत्रविसर्जनीयस्यालोपोनिपात्यते॥ नहिषस्तवनोमम॥ हीतिकिं॥ सतवोती॥ नहीत्येतत्पदे हीतियत्पदावयवग्रहणं तच्छन्दोभंगभयात्॥

जुगुक्षतो दुदुक्ष न्गात्रदुक्ष दुक्षन्नधे स्यदुक्षतानुदक्षि॥ दक्षं न

पत्मन्दक्षुषो भिदक्च त्वक्ष्णासो दक्षि ह्रियानस्यदक्षोः ॥७२॥

यथापठितान्येतानिनिपातितानि । जुगुक्षतः । सुमतिन्न जुगुक्षतः । दुदुक्षन् । सहस्रधारां बृहतींदुदुक्षन् । गाऋदुक्षत् । निर्ज्योतिषातमसो गाऋदुक्षत् । गाइतिकिं । अधुक्ष त्पिप्युषीमिषं । दुक्षन्वृधे स्हरियक्तेमन्दिनं दुक्षन्वृधे । वृधइतिकिं । (१)प्रत्युदाहरणम्मृग्यं । विश्वाहाशुक्रंपयो अस्य दुक्षता । अनुदक्षि । त्वम्बिभास्य नुदक्षि । अन्विति किं नीचातंधक्ष्यतसं । दक्षंन । दक्षन्न त्रिश्वन्तत्रषाणां । नेतिकिं । द्रविर्नद्रावयतिदारुधक्षत् । तस्पत्मन्दक्षुषः । पत्मन्निति किं । प्रत्युदाहरणंमृग्यं । अभिदक्षत् सयोव्यस्थादभिदक्षदुर्वीम् । अभीतिकिं । मृग्यंप्रत्युदाहरणं । आदस्यते कृष्णासोदक्षि । कृष्णासइतिकिं । नीचातंधक्ष्यतसन्नशुष्कं ह्रि यानस्यदक्षोः ॥ संदृष्टिरस्यह्रि यानस्यदक्षोः । ह्रियानस्येतिकिं । धक्षोर्नवाताः परिसन्त्यच्युताः ।

इति श्रीपार्षदव्याख्यायां आनन्दपुरवास्तव्यवज्रटपुत्रोव्वटकृतौ प्रातिशाख्येचतुर्थं सन्धिपटलम् ।

अन्तः पादन्नाम्युपधः सकारः षकारमप्यूष्मपरैर्यथोक्तं ।

(१) निर्धुक्षन्वक्षणाभ्यः खपुस्तकेप्रत्युदाहरणन्दत्तम् ।

अन्यैरेकारात् ॥ १ ॥

अन्तः पादमिति पादस्यमध्ये नामिनोयस्योपधाभूताः सतथोक्तः सकारः। ऋकारादयोद श नामिनः स्वरादुत्युक्तं। सकारः षकारमापद्यते । इत्येतदधिकृतंवेदितव्यं। अनूष्मपरैर्नामिभिरुपहितः अप्यूष्मपरैरित्यपिशब्दः यथोक्तमित्यधिकारोपसंहारवचनं। अन्यैरेकारादितिनामिसामान्यप्रसक्तौ अस्यनिवृत्तिवचनं। यच्चगोषुदुःष्वप्न्यम्। अन्तः पादमितिकिं। तन्नइन्द्रस्तद्वरुणस्तदग्निस्तत्। नाम्युपधइतिकिं। परः सोअस्तुतन्वा ३ तनाच । यथोक्तग्रहणंकिं। ताभिर्याति स्वयुक्तिभिः। अन्यैरेकारादितिकिं। येस्यामनोर्यज्ञियाः।

नतिरत्वपूर्वाततोव्यापतिर्भवतीतिविद्यात् ॥ २ ॥

एकस्मिन्विषयेयत्रकार्यद्वयंप्रवर्ततेतत्रावश्यंभावीक्रमः तच्चयथायोगंकार्यक्रमोभवतीत्येतद्दर्शनायाह । नतिरत्वपूर्वेतियदिहिव्यापत्तिः पूर्वंक्रियतेपश्चान्नतिः। तदा तमेवोष्माणामूष्मणीतिमकारोनाम्यस्यसकारस्यव्यवधायकः स्यान्नामिभिः सहततोनप्रवर्ततेनतिरतः पूर्वमेवनतिःक्रीयतेपश्चात्तमेवोष्माणमूष्मणीति ।

सूतीनकिः स्वैर्व्युरुनह्यभिचीनिहीतिसः ॥ ३ ॥

सु। जती। नकिः। स्वैः। वि। उरु। नहि। अभि। ची। नि। हि। इत्यैतैर्नामभिरुपहितः सकारः षका-

रमापद्यते। सु। प्रसुषविभ्योमरुतः। ऊती। ऊतीषद्व्-ह्वतीतिवः। नकिः। नकिः षोअस्त्यरणोजहुर्हितं। स्वैः। स्वैः षएवैरिरिषीष्टयुर्जनः। वि। रोदसीविषआवः।उरु। उरुषसरथंसारथयेकः। नहि। नहिषस्तवनोमम। अभि। अभिषद्युम्नैरुतवाजसातिभिः। चौ १ वौषपविवाह्वद्यं १ तराद्धे। नि। निषह्वीयतांतन्वातनाच। हि। यू-पादमुंचोअशमिष्टहिषः।

ह्रस्वरेणैवसत्स्थः॥ ४॥

ह्रस्वरेणैवपदेननाम्यन्तेनोपहितः सत्स्थइत्येतयोः स-कारः षकारमापद्यते। सत्। दिविषद्भ्यादद्दे। स्थः। यदिन्द्राग्नीदिविष्ठोयत्। ह्रस्वरेणैवेतिकिं। युवंहिस्थः स्वर्पती।

स्ववह्वन्तरेण॥ ५॥

सुइत्येतत्पदंनम्यतेअवह्वन्तरेणानामिनोपहितंचेत्।मो-ष्व १ द्युहैणान् अभीष्व १ र्यः। अवह्वन्तरेणेतिकिं। सुदीतिभिः सुदीदिहि।

पदादयश्चस्थितिस्कृतिस्मिति॥ ६॥

पदानामादिभूताः सकाराः षकारानापद्यन्ते। य-कारककारनकारपराः सन्तः इतिकरणः प्रकारार्थः स्थिति। गोभिः ष्यामसधमादः। स्कृति। यजुष्कृतं-प्रथमन्देवयानम्। स्मिति। अधिष्णुनाधन्वसानोअव्ये। अवह्वन्तरेणैवेत्येव। तवप्रियासः सूरिषुस्याम। उपद्यां-स्कम्भथुः स्कम्भनेन।

अरेफस्यचस्मिति ॥ ७ ॥

अरेफस्य पदस्यस्मितिपदादिर्नम्यते । नहि ष्मातिश-तंचन। अरेफस्येतिकिम् । प्रतिस्मरेथांतुजयद्भिरेवैः । अवह्वचरेणैवेत्येव। वह्वामिस्मपूषणमंतरेण ।

एकारेणापिस्विति नः परंचेत् ॥ ८ ॥

एकारांतेनापिनाभ्युपहितंसुइत्येतत्पदंनम्यतेनः पदं-परंचेद्भवति। तेषुणोमरुतोमृलयंतु। नः परमितिकिं। त्वेसुपुत्रशवसः। अप्राप्तप्राप्तिवचनोपिशब्दः।

दीर्घोनस्थिति ॥ ९ ॥

दीर्घोनाभ्युपधाभूतोपिस्थितिपदादिर्नम्यते । वीरैः स्यामसधमादः। दीर्घग्रहणंकिं। गोभिः ष्यामसधमादः ।

उचनास्पर्शपूर्वं ॥ १० ॥

उइत्येतत्पदंपूर्वंस्थितिपदादिर्नमते । स्पर्शपूर्वंयदि-नभवति । एषउस्यपुरुव्रतः । अस्पर्शपूर्वमितिकिं । उदुष्यशरणेदिवः ।

तकारवर्गस्तु टकारवर्गमंतःपद-स्थोपि षकारपूर्वः ॥११॥

तकारवर्गस्तु पुनष्टकारवर्गमापद्यते यथासंख्यं ॥ अंतःपदस्थोपिनानापदस्थोपिषकारपूर्वःसन् ॥ कःस्विदृक्षो निष्ठितोमध्ये अर्णसः ॥ आपोहिष्ठा मयोभुवः ॥ ष-कारपूर्वइति किं ॥ युवंहिस्थःस्वर्पती ॥

सितां सधस्थात्स्तनिह्हि स्तवाम स्तवे स्तुवंति स्तुह्हि सीं स्तुतः स्थ ॥ साह्हिस्तः स्तुप् सत्सि सत्सत् स्वनीति स्तोभेत्यादिश्चापि बह्वृचरांतैः ॥१२॥

सितां । सधस्थात् ॥ स्तनिह्हि ॥ स्तवाम ॥ स्तवे ॥ स्तुवंति ॥ स्तुह्हि ॥ सीं ॥ स्तुतः । स्थ ॥ साह्हि ॥ स्तः ॥ स्तुप् ॥ सत्सि ॥ सत्सत् ॥ स्वनि ॥ इत्येषां पदानामादि स्तोभेत्येतस्यचपदस्य सप्रदवास्यादिर्नम्यते ॥ अपिबह्वृचरांतैर्नामिभि रुपह्हितोपि ॥ अबह्वृचरांते रित्यर्थोपिशब्दः ॥ सितां ॥ पदिषिता ममुंचता यजत्राः ॥ सधस्थात् ॥ निष्षीमद्भ्योधमथोनि ष्षधस्थात् ॥ स्तनिह्हि ॥ निष्टनिह्हि दुरिताबाधमानः ॥ स्तवाम ॥ तमुष्टवाम यंगिरः ॥ स्तवे ॥ विश्वायद्वामनु ष्टवे ॥ स्तुवंति ॥ अनुष्टुवन्तिपूर्वथा ॥ स्तुह्हि ॥ तमुष्टुह्हींद्रंयोह्हसत्वा ॥ सीं ॥ निष्षीमद्भ्योधमथोनि ष्षधस्थात् ॥ स्तुतः । नूष्टुत इंद्रनूगृणानः ॥ स्थ ॥ आपोह्हिष्ठा ॥ साह्हि ॥ विषाह्यग्नेगृणाते मनीषां ॥ स्तः ॥ नास्यते मह्हिमानं परिष्टः ॥ स्तुप् ॥ सोमोविराजमनुराजतिष्टुप् ॥ सत्सि ॥ अग्नेनिषत्सि नमसाधिबर्ह्हिषि ॥ सत्सत् ॥ नह्हिषत्सदन्तरः पूर्वोअस्तत् ॥ स्वनि ॥ यदिक्रोशमनुष्वणि ॥ स्तोभेत्यादि ॥ परिष्टोभंतुविंशतिः ॥ परिष्टोभंतुनोगिरः ॥

निपरीति स्वसीत्यादौचकारव-र्गीयोदयौ ॥१३॥

नि परि ॥ इत्येतौनामिनी स्वसिइत्थंभूतौ पदा-दौनमतःकिमविशेषेणनेत्याह ॥ चकारवर्गीयोदयौ चे-त्स्यातां ॥ चकारवर्गपराविव्यर्थः ॥ नि ॥ महांतंकोश-मुदचानिषिंच ॥ परि ॥ सहस्रधारः परिषिच्यतेहरिः ॥ परिष्वजध्वंदश ॥ परिष्वजंते ॥ चकारवर्गीयोदयावि-तिकिं ॥ व्युच्छंतीपरिस्वसुः ॥

दकारेचोत्तरेपरान् सेससीतिस्व-रोदये ॥१४॥

दकारेचउत्तरे चकारःसमुच्चयार्थीयोनिपरीति समु-च्चिनोतिपरान् पदादींनमतः ॥ कथंभूतान्पदादीनित्यत-आह ॥ सेससीइतिकरणःप्रदर्शनार्थः ॥ स्वरोदये दका-रस्यविशेषणमेतत् सेससीतिपदादी न्दकारस्वरपरा-न्नमतइत्यर्थः ॥ से ॥ परियज्ञंनिषेदथुः ॥ स ॥ निषदा-पीतये मधु ॥ शुनंनरःपरिषदन्नुषासं ॥ निषीदहोतमृ-तुथायजस्व ॥ निपरीतिकिं ॥ इमंयमप्रस्तर माहिसी-द ॥ दकारइतिकिं ॥ विसमनाभूमिः ॥ स्वरोदयइति-किं ॥ दिवस्परंति परिसप्रोअंतान् ॥

सेध स्वापय सस्वजे सस्वजाते स-सादच ॥ १५ ॥

चकारोच्चारणादेता न्पदादीन्निपरीनमंतः । सेध ॥

वाचस्पते निषेध ॥ स्वापय ॥ निष्वापयामिथूहृशा ॥ सस्वजे । तमिंदुःपरिषस्वजे । सस्वजाते । समानंवृद्वं-परिषस्वजाते । ससाद । निषसादधृतव्रतः ।

संतंसंतःसंतिपूर्वीःस्थुःस्थाःस्थादिति-तिचोत्तरः ॥१६॥

इतिच पदादीन्सकारानुत्तरोनामीनमति । कश्चोत्त-रःपाठक्रमेण परीति । संतं । अग्निंवत्समम्परिषंतं । संतः । नाद्रयःपरिषंतोवरंत । संतिपूर्वीः । ताइंविश्वतः परि-षंतिपूर्वीः । पूर्वीरितिकिं । धत्तोर्नवाताः परिसंत्यच्यु-ताः । स्थुः । अग्नोनद्वेषो धृषतापरिष्ठुः । स्थाः । परिष्ठा इंद्र मायया । स्थात् । मानोमर्त्तस्य दुर्मतिःपरिष्ठात् ।

च्छिषिंच तूषिंच रजःसुषीद न्नितो-षिञ्चता भिषतः किमुष्वित् ॥ सू-रिभिष्याम दिविषंतु केष्ठप्रति-ष्फुर चोषधस्था कमुष्वित ॥१७॥

च्छिषिंच । तूषिंच । रजःसुषीदन् । इतोषिंचत । अ-भिषतः । किमुष्वित् । सूरिभिष्याम । दिविषंतु । केष्ठ । प्रतिष्फुर । चोषधस्था । कमुष्वित् । एतानियथागृहो-तानि निपात्यंते । अध्वर्यंवातुच्छिषिंच । तूषिंच । आतू-षिंचहरिमींद्रोरुपस्थे । रजःसुषीदन् । बुध्नेनदीनां र-जःसुषीदन् । इतोषिंचत । परोतोषिंत । ओत्वषत्वे नि-पात्येते ॥ अभिषतः ॥ मह्लोविश्वांअभिषतः । अभीषत

स्तदाभर । नन्वभिषत धृतिनिपातनंच यथाश्रुतमेव गृहीतुंन्याय्यं । अतोभीषतस्तदाभरेत्यत्र षत्वंनप्राप्नोति । अभिशब्दस्य दीर्घत्वात् सत्यमेवतत् । यदिनामाधस्तादेव परिभाषितं यथासामवशाः संधयो नियतविषया अपवादकाभवंति नतुसर्वत्र । सामवशाद्इतिचैवापदांजानीयात् अनुलोमाना मन्वक्षरसंधीनां नान्येषांतन्दिति । तथाच्चाप्रकं भवति । नुषप्रेति । भसंनुषप्रपूर्व्य इत्युदाहरणं । अत्रप्रेतियद्विशेषणं तत्रनूसमन्तः शवसेत्यस्यनिर्धारणार्थं । यदिनुशब्दो दीर्घोपिविधातंषत्वस्यनकुर्यात् । तदाप्रशब्दग्रहणं सार्थकं स्यादिति । तस्मात्सामवशाः संधयोपवादका अनुलोमान्वक्षरसंधीनां नान्यत्रेतिसिद्धं । किसुष्वित् । किमुष्विदस्मै निविदोभनंत । किमितिकिं । इ्द्रंकउस्विदाचके । सूरिभिःष्याम । घ्नंतोवृत्राणि सूरिभिःष्याम । दिविषंतु । उतस्वानासो दिविषंत्वग्नेः । केष्ठ । केष्ठानरश्रेष्ठतमाः । प्रतिष्फुर । प्रतिष्फुरविरुज । वीषधस्था । वीषधस्था सिंधवस्त्रिः । कसुष्वित् किमुष्विदस्य सेनया । कमितिकिं । उवच्छेकउस्विदंतमः ।

उषुवाणो दिविषन्त्सूरिभिःष्या सूच्छंतिष्मनूष्ठिरंवंसुषोदति । नुषप्रह्विष्ठोयशसामष्टोषा । विषाभूयामोष्युयतिष्ठनेतिच ॥१८॥

उषुवाणः । दिविषन् । सूरिभिःष्यां । स्वच्छंतिष्म । नु-

ष्ठिरं । वंसुषीदति । नुषप्र । हिष्ठोयशसा । मह्नीषा । विषा भूयामोषु । यतिष्ठन । इतिचयथागृहीतानिपदानिभवंति । उग्रुवाणाः । सोमउग्रुवाणःसोतृभिः । दिविषन् । दिविषन् छुक्रआततः । सूरिभिःषग्रां । आवांसुम्ने वरिमन्त्सूरिभिःषग्रां । ऋकंतिष ऋकंतिषानिष्पदो सुद्गलानीं । नूष्ठिरं । नूष्ठिरंमरुतोवीरवंतं । वंसुषीदति । श्येनोन वंसुषीदति । नुषप्र । भसंनुष प्रपूर्व्यः । प्रेतिकिं । प्रनूसमर्त्तःशवसा । हिष्ठोयशसा । दूतेवहिष्ठो यशसाजनेषु । यशसेतिकिं । युवंहिस्थःस्वर्पती । मह्नीषा । विदेहिमातामहो मह्नीषा । विषाह्योजा विश्वमश्नोति । भूयामोषु भूयामोषुत्वावतः । यतिष्ठन । विश्वेदेवासो मनुषोयतिष्ठन ।

वाजीस्तुतो वहंतिसींपतिस्यां दित्ससिस्तुतः । अपोसुम्यक्ष श्रुधिसुचिस्म स्तुहिस्तुहीतिन ॥१९॥

इत्येतेषुपदेषु यथाप्राप्तं षत्वंप्रतिषिध्यते । वाजीस्तुतः । वाजीस्तुतोविदथे दातिवाजं । वहंतिसीं । वहन्तिसीमरुणासोरुशंतः । पतिःस्यां । अस्यपतिस्यांसुगवः सुवीरः । दित्ससिस्तुतः । यद्दित्ससिस्तुतोमघम । अपोसुम्यक्ष । अपोसुम्यक्षवरुणभियसमत् । म्यक्षेतिकिं । अपोषुणइयं । श्रुधिसु । इन्द्रश्रुधिसुमेहवं । चिःस्म । त्रिस्माह्नस्य योवैतसेन । स्तुहि स्तुही स्तुहिस्तुहीदेतेघाते ।

युग्मान्तस्थादंतमूलीयपूर्वैरंतः पदंनम्यतेन्तः पदस्थैः ॥ २० ॥

युग्मांतस्था पूर्वैर्नामिभि रुपहितः सकारः रेफवकारपूर्वैरित्यर्थः। दन्तमूलीयपूर्वैश्च नामिभिरुपहितः सकारोनम्यते। दन्तमूलीयः सकारस्तवर्गश्च अन्तः पदमेकस्मिन्पदे अन्तः पदस्थैः पदान्तवर्त्तिभि युग्मांतस्थापूर्वैः। वेष्टुभाद्धा वेष्टुभं निरतक्षत। विषितस्तुकारा रोदसीन्नमथाः। दन्तमूलीयपूर्वैः सुषाव सोममद्रिभिः। सुषुवुषोम नीषां।दुष्टरस्तरन्नरातीः। युग्मांतस्था दन्तमूलीयपूर्वैरितिकिं। त्र्यंशुभिर्विसखाइव। सनाज्ज्योतिः सनाम्नः। अन्तः पदस्थैरितिकं। पुरुहूत पुरुवसोसुरघ्नः।

अन्यपूर्वैरपि पद्यादिभाक्सन् ॥२१॥

अन्यपूर्वैरपि नामिभिरुपहितः सकारोनम्यते युग्मांतस्थादंतमूलीयपूर्वै रित्यपिशब्दार्थः। पद्यादिंभजतेयदि। अन्यपूर्वैः। चमूषच्छ्येनः शकुनः। येत्वामृजन्त्यृषिषाण। युग्मांतस्था दन्तमूलीयपूर्वैः। इन्द्रस्त्रिष्टुविन्द्र। सर्सास्तरोविष्टिरः। वेदिषदेप्रियधामाय।

एकाररेफपृतनोपधश्च ॥ २२ ॥

एकारोपधोरेफोपधः पृतनोपधः चशब्दान्नम्यते पद्यादिसकारः एकारोपधः। धियोरथेष्ठा मजरन्नवीयः। रेफोपधः। स्वर्षामप्सां वृजनस्य पृतनोपधः। पृतनाषाह्यायच।

रेफकारकारपरः प्रकृत्या ॥ २३ ॥

इदानीमपवादः । रेफपरः ऋकारपरः ऋकारपरश्च सकारः प्रकृत्यासम्भवति । पुनातितेपरिस्रुतं । इन्द्रस्ययन्तु प्रसवेविसृष्टाः । तिसृणांसप्ततीनाम् ।

संस्पृक् सृष्टसरस्वरेति चाक्षराणां ॥ २४ ॥

सं । स्पृक् । सृष्ट । सर । स्वर । एतेषांचाक्षराणां सकाराःप्रकृत्याभवंति । पदादौअपदादौ वासतां । सं । सुसमिद्धो न आवह । स्पृक् । दिविस्पृग्यात्यरुणानि । सृष्ट । तेदेवाः परिसृष्टतेष्वेषु लोकेषु । शाखायनब्राह्मणमेतत् । ननुनैवेत दुदाहरणं ॥ ब्राह्मणंह्येतत् नचब्राह्मणस्याप्येतल्लक्षणंस्मृतं । मृतत्वय विधानात् । एवंतर्हि यथाजलाहारस्य मत्स्याहरणं । पुष्पाहारस्यफलाहरण मविरुद्धं एवमेतदपि । सर् । विसर्माणंकृणुहि । स्वर । मेयंविप्रा अभिस्वरा ।

सेतिचास्य परिपन्नो पधाचेत्॥२५॥

सइतिइत्थंभूतस्य चाक्षरस्यादिसकारः प्रकृत्याभवति । यदितदक्षरं सकाराद्यनुस्वारस्योपधाभूतंस्यात् । सुसंसन्मिश्रो अतिथिः । परिपन्नोपधाचेदितिकिं । निषदापीतयेमधु ।

संयोगस्य चाप्यनुनासिकादेः ॥२६॥

संयोगस्यचापि कथंभूतस्यानुनासिकोवर्ण आदिभूतोयस्य तस्यैयःसकारलक्षणोक्षरविशेषः उपधाभूतः सप्रकृत्याभवति । सुसन्दृशं सुप्रतीकं । सुसङ्काशा मातृमृ-

ष्टेवयोषा। संयोगस्येतिकिं। अभिस्वरा निषदागाः। अनासिकादेरितिकिं यच्चगोषुदुष्वप्न्यम्।

सहस्रं सनिता स्थावा सावित्रं-
सूवरीस्नुषे। समुद्रं सदृशासारे
सायकः साधनीसह। सनितः
स्पष्टः सदृशः सखायंसप्तैरेते सा-
नुशब्दश्चपद्याः ॥२७॥

एतेपद्याः सानुशब्दश्चसप्रवादः प्रकृत्याभवंति। सहस्रं। चतुःसहस्रंगव्यस्य। सनिता। सनेमतत्सुसनिता॥ स्थावा। भूरिस्थावा भूयविशयंती। सावित्रं। सुसावित्रमासाधिषइतिप्रैषैकदेशे। सूवरी। सुषूमावसूवरी। स्नुषे। सुपुत्र आदुसुस्नुषे। समुद्रं। चतुःसमुद्रंधरुणं। सदृशा। त्रिसदृशाजीविताभिप्रचक्षे। सारे। हिरण्यकेशीरजसोविसारे। सायकः। द्युम्नीसुशिप्रोहरिमन्युसायकः। साधनी। आहृणोपशुसाधनी। सह। यथावःसुसहसति॥ सनितः। सनितःसुसनितरुग्रा स्पष्टः। अनुस्पष्टोभवत्येषोअस्य। सदृशः। यमाइवसुसदृशः सुपेशसः। सखायं॥ तीव्रंसोमंपिबति गोसखायं। सप्तैः। त्रिसप्तैः शूरसत्वभिः। सानुशब्दः। पृदाकुसानुर्यजतोगवेषणः॥ इदाहित उत्रोअद्रिसानो। शब्दग्रहणमुक्तप्रयोजनम्।

सुतेसोमे वक्षणेप्रामिचर्षणि स्व-
भिष्टीत्येवमुपधाश्च सर्वे ॥२८॥

इत्येवंशब्दोपधाभूताःसर्वएवपद्यादिसकाराःप्रकृत्याभवंति । सुते । सुतेसुतेन्योकसे । सोमे । यत्सोमेसोमआभवः । वक्षणे । सुसंशितावक्ष्योवक्षणेस्थाः । अप्रामि । अप्रामिसत्यमघवन्तथा । चर्षणि । इर्यक्ष्वंसत्पतिं चर्षणीसहं । स्वभिष्टि । तूतुजिमिंद्रःस्वभिष्टिसुम्नः ।

अभिसत्वारयिस्थानोयासिसीष्ठाः सिसच्चिच । तिस्तिरेतिस्तिराणाच सिसिचेसिसिचुश्चन ॥२९॥

चकारःसमुच्चयार्थः एतेषुयथाप्राप्तंषत्वं प्रतिषिध्यते । अभिसत्वा । अभिवीरो अभिसत्वासहोजाः । रयिस्थानः । रयिस्थानोरयिमस्मासुधेहि । यासिसीष्ठाः देवस्यहेलो वयासिसीष्ठाः सिसच्चि । छायेवविश्वं भुवनं सिसच्चि । तिस्तिरे । तिस्तिरेबर्हिरानुषक् । तिस्तिराणा यतस्रुचाबर्हिरुतिस्तिराणा । सिसिचे सेक्तेवकोशं सिसिचेपिबध्यै । सिसिचुः । बहुसाकं सिसिचु रुत्समुद्रिणं ।

गोष्ठादिवगोषतमा उपष्टुत्सप्रवादीनार्षदः पर्यषस्वजत् । स्वादुषंसदः पुरुषंतिशब्दः सुषंसदं सुषमिधानुसेषिधत् ॥ ३० ॥

एतेषुपदेषुषत्वंनिपात्यते । गोष्ठादिव । गावोगोष्ठादि-

वेरते। गोषतमाः। द्विविष्यामपार्येंगोषतमाः। उपष्टु-त्। शिचाशचौ वस्तवताउपष्टुत्। सप्रवादोनार्षेदः। सर्वविभक्त्यन्तः। यन्नार्षेदायश्रवः। पुरुसदन्तोनार्षेदं। पर्यषस्वजत्। यन्तौग्न्योनाधितः पर्यषस्वजत्। स्वादुषंसदः स्वादुषंसदः पितरोवयोधाः। सेतिचास्य परिपन्नोपधाचे-दित्यस्यनिषेधस्य प्रतिप्रसवः। पुरुषंतिशब्दः सर्वविभ-क्त्यन्तः। याभिर्ध्वंसंतिं पुरुषंतिमावतं। ध्वस्रयोःपुरु-षन्त्योः। संयोगस्य चाप्यनुनासिकादेरित्यस्य प्रतिप्र-सवः सुषंसदं। परिप्रयंतं वय्यंसुषंसदं। सेतिचास्यपरिप-न्नोपधाचेदित्यस्य प्रतिषेधस्यप्रतिप्रसवः। सुषमिधा। अग्ने भवसुषमिधासमिद्धः। समित्यचरनिषेधस्य प्रति-प्रसवः। अनुसेषिधत्। पद्यादेः सकारस्य षत्वेप्राप्ते परस्यषत्वंनिपात्यते षद्युक्तांअनुसेषिधत्। गोष्ठादिवे-त्यादिपंचस्वप्राप्तेषत्वेवचनं।

तकारपूर्वपद्यांतो व्यापन्नोरेफ-संहिते। नामिपूर्वः॥ ३१॥

तकारेपरेचावस्थिते पूर्वपद्यस्यांतः। कथंभूतः। व्या-पन्नः सत्वंप्राप्तः। अरेफसंलग्नेतकारे। नामिपूर्वः इतिपूर्वे पद्यांतव्यापन्नस्यविशेषणां। षकारमापद्यते। प्रयाकंशास्मि प्रदिशोविदुष्टरः। आविष्ट्यो वर्द्धतेचाहरासु। तकारइति-किं। सद्यंतइन्द्रनिस्रुतः पूर्वपद्यांतइतिकिं। त्वमग्ने प्रमति स्त्वंपितासिनः। व्यापन्नोच्चारणं पदेदृष्टस्यसकारस्य-षत्वंयथा स्यात्। अरेफसंहितइतिकिं। चतुस्त्रिंशद्वाजि-

नः । नाभिपूर्वग्रहणं पुनः क्रियमाणमेकारस्य सङ्ग्रहणं करोति । अग्नेष्ट्वास्येनप्रास्नामि ।

विग्रहेतु त्वातइत्यनुदात्तयोः ॥३२॥

विग्रहेतु पुनः त्वा । ते । इत्येतयोः परत्रावस्थितयो रनुदात्तयोः व्यापन्नं षत्वमापद्यते । त्वा । हविष्ट्वासन्तं हविषायजाम । ते । अभिष्टे अद्यगीर्भिः । अनुदात्तयो रितिकिं । यइतद्विदुस्ते अमृतत्वं ।

अग्निरेकाक्षरस्यादौ ॥ ३३ ॥

अग्निरित्ययं विसर्जनीयोव्यापन्न सकारादेरेकाक्षरस्य पदस्यादौ वर्त्तमानोनम्यते । अग्निष्टं ब्रह्मणासह । एकाक्षरस्यादाविति किं । अग्निस्तुवि श्रवस्तमः ।

नकिश्च ॥ ३४ ॥

नकिरित्ययं विसर्जनीयोनम्यते । चकाराद्व्यापन्न सकारादावेकाक्षरेपदे परभूते । नकिष्टं कर्मणानशत् ।

अथोतनूष्विति ॥ ३५ ॥

अपिच तनूष्वित्येतस्मिन्पदे परभूते नकिरित्ययं विसर्जनीयो व्यापन्नोनम्यते । नकिष्टनूषुयेतिरे ।

तत्तन्यु स्ततक्षुस्तं तीव्रमित्युत्तरेषु निः ॥ ३६ ॥

इत्येतेषु उत्तरपदेषुसत्सु निरित्ययंविसर्जनीयो व्यापन्नोनम्यते । तत् । निष्टज्जभार चमसन्नष्टचात् । त-

तन्यु: । मिहन्नसूरो अतिनिष्टतन्युः । ततचुः । येना-देकंस्वधया निष्टतचुः ॥ तं ॥ निष्टमूहथुः सुयुजारथेन ॥ तोग्रं ॥ निष्टौग्रं पारयथः समुद्रात् ॥

पायुभिः पर्तृभिस्त्रिभि र्दर्दिर्वेर-स्मयुः शुचिः ॥ उत्तरेत्वमिति

इत्येतेषांपदानांविसर्जनीयोव्यापन्नः त्वमित्येतस्मिन्पदेउत्तरेनम्यते । पायुभिः । अदब्धेभिःसवितः पायुभिष्ट्वं । पर्तृभिः । पार्षितोकंतनयंपर्तृभिष्ट्वं । त्रिभिः । त्रिभिष्ट्वंदेवसवितः । दर्दिः । दर्दिष्टृमिंद्रापांसिवाजान् । हरिवोदर्दिष्ट्वं । वेः । पावकशोचेवेष्ट्वंहियज्वा । अस्मयुः । एतंशं समिंद्रा स्मयुष्ट्वं । शुचिः । शुचिष्ट्वमसि प्रियोनमित्रः ।

ईयुष्टे वात्रधुष्टेसधिष्टव ॥३७॥ गोभिष्टिरेम क्रतुष्टम्

एतेद्वैपदाव्यापंनोष्मकृत षत्वानिपात्यंते ईयुष्टे । ईयुष्टेये पूर्वतरामपश्यन् । वात्रधुष्टे । पुरुशंसेन वात्रधुष्टइंद्रं । सधिष्टव । अग्नेसधिष्टव । गोभिष्टरेम ॥ गोभिष्टरेमामतिंदुरेवां । क्रतुष्टं । इंद्रक्रतुष्टमाभर ।

नाहुर्निष्षिध्वरीःप्रभोः ॥ बन्दा-रुः षष्टि राविस्त्रिर्वाह्वोरित्यनु-दात्तयोः ॥३८॥

यदुक्तं त्वातद्दृत्यनुदात्तयो स्तदेतेषांपदानां संबंधिनोविसर्जनीयस्य नभवति । आहुः । आहुस्तेवीधि दिविबंधनानि । निःषिध्वरीः । निष्षिध्वरीस्तओषधीः । प्रभोः । प्रभोस्तेसतःपरियंतिकेतवः । वंदारुः । वंदारुस्ते तन्वंवंदेअग्ने । षष्टिः । त्रिःषष्टिस्त्वा मरुतोवावृधानाः । आविः । आविस्तेगुष्मो भवतुप्रियोमदः । त्रिः । त्रिस्ते अन्नंकृणवत् । बाह्वोः । बाह्वोस्ते बलंहितं ।

ऋकाररेफषकारानकारं समानपदेवग्रह्ये नमंति । अंतःपदस्थ मककारपूर्वा अपिसंध्याः॥२८॥

ऋकारश्चरेफश्चषकारश्च ऋकाररेफषकाराः नकारंनमंति । समानपदेएकपदे वर्त्तमाने नकारेणसह । कथंभूतेपदेअवग्रह्येद्विखंडे । कथंभूतंनकारं । अंतःपदस्थं पदमध्ये वर्त्तमानं । अककारपूर्वाइति ऋकारादीनांविशेषणं । अपिसंध्यासंध्याअपि । संध्याःप्राकृताः । ऋकारस्य । पंथामनु प्रविद्वान्पितृयाणं । रेफस्य । प्रयाणोजातवेदसः । तदारभस्तदुहणो । षकारस्य । विदुर्विप्राणां परिपानमंतिते । समानपदइतिकिं । त्रिरनुव्रतेजन । अवग्रह्यइतिकिं । उष्ट्रानां विंशतिंशता । अंतःपदस्थमितिकिं । जुहुराणश्चिन्मनसा परियन् । अककारपूर्वाइतिकिं । यमासाकृपनीलं । योअग्निः क्रव्यवाहनः । अग्नानहोनष्टातनोतसोम्याः । अनुव्रतेजने इत्यत्रप्राप्नोति पूर्वोनंता नतिषु नश्यमुत्तरमितिवचनान्नभवति ।

संध्यउष्माप्यनिंग्ये ॥४०॥

सन्धौ भवःसंध्यः। संधिजऊष्माप्यनिंग्ये पदेवर्त्तमानो-नकारंनमति। यद्दिक्ष्णोयमनुष्वणि। संध्यइतिकिं। म-ह्यीमे अस्यब्रषनाम।

नमध्यमैः स्पर्शवर्गैर्व्यवेतम् ॥४१॥

ननमंतिनकारमृकाररेफषकाराः मध्यमैः स्पर्शव-गैर्व्यवहितं। चवर्गटवर्गतवर्गामध्यमाः। ऋजुनीतीनो-वरुणः। आनिवर्त्त नवर्त्तय। अभिष्टनेते अद्रिवः।

परिप्रऋषींद्रादिषु चोत्तमेन ॥४२॥

परि। प्र। ऋषि। इंद्र। इत्येवमादिषुपदेषु पद्या-दिषु उत्तमेनापिस्पर्शवर्गेण पकारादिनाव्यवहितं न-कारमृकाररेफषकारान नमंति। परि। परिपानमंति-ते। यमस्यमाता पर्युह्यमाना। प्र। प्रमिनती मनुष्या युगानि। ऋषि। ऋषिमनाय ऋषिकृत्स्वर्षाः। इंद्र। इ-दंत्यत्याव मिंद्रयानं। आदिग्रहणादिहनभवतिनिषेधः। सुप्रयाणांभवत्वघ्न्याभ्यः।

तथाशकार सकार व्यवेतंसर्वा-दिषु ॥ ४३ ॥

यथाधस्तनयो मध्यमोत्तमवर्गयोर्व्यवेतं नकारमृकार-रेफषकारान नमंति तथासकारशकारव्यवेतंन नमंतिस-र्वादिषुपदेषु। अहन्नहिंपरिशयानमर्णः। इदाह्नितउषो-

षद्रिसानो । सर्वादिग्रहणं परिप्रक्षर्षौद्रादि निवृत्त्यर्थं ।

पूर्वपदांतगंच ॥ ४४ ॥

पूर्वपदस्य चांतगतं नकारमृकाररेफषकारा नन-मंति । कर्मन्कर्मंकृतमूर्तिः स्वजंकरः ।

नाभिनिर्णिक्प्रवादादौ ॥ ४५ ॥

नाभिनिर्णिक्शब्दयो रादिभूतंनकारं ऋकाररेफ-षकारा ननमन्ति । नाभि । रथेन वृषनाभिना । निर्णि-क् । अतःमहस्वनिर्णिजा । पतरेवचचराचंद्र निर्णिक् । षादिशब्दोच्चारणं निर्णिक्शब्दस्योच्चारणस्य णत्वंसाध-यति ।

यकार स्पर्शसंहितम् ॥ ४६ ॥

यकारसंलग्नं स्पर्शसंलग्नं नकारमृकाररेफषकारा ननमंति । यकारसंहितं । द्युम्नीसुशिप्रो हरिमन्युसाय-कः । स्पर्शसंहितं । त्वन्ने परिषिच्यसे । सुषुम्नेषितत्वता यजामसि । यकारस्पर्शसंहितमितिकिं । प्रातर्याण्वाः सहस्कृत ।

कर्मनिष्ठां दीर्घनीथे ॥ ४७ ॥

इत्येतयोः पदयो र्नकारमृकाररेफषकारा ननमंति । षन्निर्वीरंस्युत्यं कर्मनिष्ठां ॥ दीर्घनीथेदमूनसि ।

भानुशब्दे ॥

भानुशब्दस्य नकारं ऋकारादयो यथासंभवं ननमं-ति ॥ स्वर्भानोरध ॥

ह्निनोमिच ॥ ४८ ॥

ह्निनोमिइतिच नकारमकारादयो ननमंति । यां-
वांह्नोवां परिह्निनोमि मेधया ।

ऋस्वोदयंत्वेषपूर्वं वमादिषु ॥ ४९ ॥

ह्रस्वउदयमस्य नकारस्य सतथोक्तः । तद्ध्रस्वोदयं ।
त्वेषपुरुइत्येवमादिषुवर्त्तमानं नकारं रेफषकारौ न-
नमतः । त्वेष । यतोजज्ञ उग्रस्त्वेषनृम्णः । पुरु ।
पुरुनृम्णाय सत्वने । ऋस्वोदयइतिकिं । पुरुणीथा
जातवेदः ।

चिशुभ्रयष्मादिषु चोभयोदयं ॥ ५० ॥

चि । शुभ्र । युष्माइत्येवमादिषुपदेषु । उभयोदयं
ऋस्वोदयं दीर्घोदयं चनकारं रेफषकारौ ननमतः ।
चि । चिनाकेचिदिवेदिवः । चिनाभिचक्रमजरमित्यस्य-
तु नाभिनिर्णिक्प्रावदेत्यनेन सिद्धः नप्रतिषेधः । शुभ्र ।
बहेथेशुभ्रयावाना । युष्मा । युष्मानीतो अभयं ।

अह्कारेष्वधिक चाच्चरेषु पुरः पुनर्दुश्चतुर्ज्योतिरादिषु ॥ ५१ ॥

हकारवर्जितेषुअधिकव्यच्चरेषुच पदेषुचतुरचरादिषु-
चेत्यर्थः । उभयविशेषणविशिष्टानि पदानिगृह्यंते । पुरः ।
पुनः । दुः । चतुः । ज्योतिः । इत्यादिषुच नकारोवर्त्तमा-
नोरेफात्रेफनिमित्तात् नतिंनलभते । पुरः । पुरोयावान-

माजिशु । पुनः । पुनरागाः पुनर्नव । दुः । दुर्भियंतुः परिप्रीतोनमित्व । चतुः । सजिह्वया चतुरनीकऋृजते । ज्योतिः । शंनोअग्निर्ज्योति रनीकोअस्तु । अहकारेष्विति किं । कुमारदेष्णा जयतः पुनर्हणः । अधिकष्वहरेष्विति किं । दुर्णामा योनिमाशये ।

उस्रयामणो नुस्रयामणो सुषामणो वृषमणयवो धिषवणया प्रणयः ॥५२॥

एतेषु षट्सु पदेषु णत्वं निपात्यते । यकारस्पर्शसंहितमित्यनेन निषिद्धं सत् । उस्रयामणो । अरं म उस्रयामणो । अनुस्रयामणो । अरमनुस्रयामणो । सुषामणो । युवंवरो सुषामणो । स्पर्शसंहितानि त्रीण्युदाहरणानि । वृषमणयवः । समानमेकं वृषमणयवः पृथक् । अधिषवण्या । अधनाधिषवणयाकृता । इमाउतेप्रणयो ३ वर्धमानाः । एतानि त्रीणि यकारसंहितानि ।

दूढ्य दूणाश दूडभ प्रवादादुर्भूतमक्षरंतेषुनंत्व ॥ ५३ ॥

दूढ्य । दूणाश । दूडभ । एते प्रवादाः कृतदंत्यमूर्धन्यभावा निपातिताः । नचाव्यव ऋकाररेफषकाराणा मन्यतमोपि विद्यते । अतः कारणमपि दर्शयंति । दुरित्येतदक्षरं मात्विकं । तदुद्भूतं हिमात्विकांस त् एतेषुनंत्वधकारनकारदकारेषु । दूढ्यं । नदूढ्ये ३ अनुददासि वामं । मन्युजनस्यदूढ्यः । दूणाशं । दूणाशंसख्यंतव निरुक्तमादूणाशा । दूडभ । इमेमित्र-

वरुणोदूलभासः। परितेदूडभः।

अव्यवेतंविग्रहे विघ्नकृन्नीरेफो-ष्मणौ सर्वपूर्वौयथोक्तं॥ ५४॥

अव्यवेतंअव्यवहितं नकारंविग्रहे नानापदेवर्त्तमानं नकारमेवविघ्नकृद्भिः। विघ्नकर्त्तारस्त्रयो मध्यमवर्गाः। तैरव्यवेतं। नकारमेवरेफोष्माणौ रेफषकारौ नकारं-नमतः। सर्वपूर्वौ ककारपूर्वावपि। यथोक्तं येनप्रकारे-णोक्तमेतदधिकृतं वेदितव्यं। वक्ष्यति नयत्यर्थंच प्रपरीति पूर्वाविति। अध्वरेषुप्रणीयते। वाजीसन्परिणीयते। अव्यवेतमितिकिं। इहश्रवो वीरवत्तक्षतानः। प्लुता-कारांतं मत्रकारमितिप्राप्तिः। सर्वपूर्वाविति किं। शि-क्षाणो अस्मिन्पुरुहूत। विग्रहग्रहणं समानपदाधि-कार निवृत्त्यर्थं। रेफोष्मग्रहणा मृकारनिवृत्त्यर्थं। यथो-क्तग्रहणादिहनभवति। बलंधेहितनूषुनः।

आनीन्नुत्यं नोनुवुर्नोनुमश्च न-यत्यर्थंच प्रपरीतिपूर्वौ॥ ५५॥

आनीत्। नुत्यं। नोनुवुः। नोनुमः। इत्येतानि च पदानि नयत्यर्थंच अर्थग्रहणा न्नयतेः सर्वाणि रूपाणि गृह्यंते। प्र। परि। इत्येतौपूर्वौ नमतः। आनीत्। अ-ग्नेदुप्राणी दममग्निमहा। नुत्यं। प्रणुत्यंविप्रमध्वरेषु साधुं। त्यमितिकिं। प्रसूसमर्त्तः। नोनुवुः। अभिप्रणो-नुवुर्गिरः। नोनुमः। इमाअभिप्रणोनुमः। नयत्यर्थंच। परि। वाजीसन्परिणीयते। अध्वरेषुप्रणीयते। पूर्ववि-

तिवचनात् व्यवहितस्यनभवति । प्रयंराये निनीषसि ।

पुरुप्रिया ब्रह्मसुतेषु नेषिप्लुताकारांतं सषकारमिंद्र । नतेसुस्मेतिसवनेषु पर्षिस्वर्यमाप्रोरुपरीतितैर्नः ॥ ५६ ॥

पुरुप्रिया । ब्रह्म । सुतेसु । नेषि । प्लुताकारांतंसषकारं । मात्रिकोयोकारः सलक्षणवशाद्द्विमात्रिकः सन्प्लुत उच्यतेप्लुतोकारोन्तेयस्य पदस्यतत्तथोक्तं । सहषकारेण वर्त्ततइतिसषकारंपदं । इन्द्र नतेसुस्मेति नतिंप्राप्तेसुस्म इत्येतेपदे । सवनेषु । पर्षि । स्वः । अर्यमा । प्र । उरु । परि । इत्येतैः पदैरुपहितंसत् नः इत्येतत्पदं नम्यते । पुरुप्रिया । पुरुप्रियाणऊतये । ब्रह्म । ब्रह्माणइन्द्रोपयाहि । सुतेषु । शक्रोयथा सुतेषुणः । नेषि । नेषिणो यथापुरा । प्लुताकारांतंसषकारं । चराणोअभिवार्यं । अर्षाणः सोमशंगवे । प्लुताकारांतमितिकिं । तेनसोमाभिरक्षनः । सषकारमितिकिं । यत्रानश्चक्रा जरसंतनूनां । प्लुतग्रहणादिहनभवति । पूषानोयथावेदसां । इन्द्र । समिन्द्रणो मनसानेषि गोभिः । नतेसुस्मेति अभीषुणः सखीनां । मोषुणः परापरा । तऊषुणोमहो यजत्राः । आसुष्वाणोमघवन् । नतेइतिकिं । प्रसूनआयुर्जीवसेतिरेतन । इन्द्रसूरीन्कृणुहि स्मानोअर्द्धम् । रारन्धिसवनेषुणः । पर्षि पर्षिणः पारमंहसः । स्वः । ईशानासोयेदधतेस्वर्णः । अर्यमा । अर्यमाणो अदितिः । प्र । प्रणस्पा-

र्भीभि हृतिभिस्तिरेत । उरु । उरुणवाजसातये । परि ।
परिणःशर्म यन्त्या ।

हेडोमुंचतं मित्रायराया पूषाग-
ध्यविषच्छकारवत् नव्येभिस्त्मने-
नेवाजान्क्रणोत द्वनयप्रतरंपरेषुन॥

हेडः । मुंचतं । मित्राय । राया । पूषा । गधि । अविषत् । छकारवत् । छकारसंयुक्तंपदं । नव्येभिः । त्मने । वाजान् । कृणोत । द्व पदेनयप्रतरमित्येतेषु पदेषु परभूतेषु नद्वत्येतस्यपदस्ययदुक्तं पुरुप्रियादिभि रुपपदे णत्वंतन्नभवति । हेडः । परिनोहेडो वरुणस्यवृज्या । मुंचतं । प्रनोमुञ्चतंवरुणस्य । मित्राय । प्रनोमित्राय वरुणायवोचः । राया । प्रनोराया परीणसा । पूषा । प्रनः पूषाचरथं । गधि । एन्द्रनोगधिप्रियः । अविषत् । सवाजेषु प्रनोविषत् । छकारवत् । प्रनोयच्छत्वर्यमा । नव्येभिः । प्रनोनव्येभि स्तिरतंदे । त्मने । नूमित्रोवरुणो अर्यमानस्त्मने । वाजान् । प्रनोवाजान्नथ्यो ३ अश्वबुध्यात् । कृणोत । देवीःषडुर्वी रुरुनःकृणोत । उर्वीतिणत्वेप्राप्ते प्रतिषेधः । द्वनयप्रतरं । प्रनोनय प्रतरं वस्योअच्छ । द्वइति- किं । प्रणोनयवस्योअच्छ ।

गोरोहेणनिर्गमाणो न्द्रएणाद्वन्द्र-
एणांस्वर्णपराणुदस्व । अग्नेरवे-
णावार्णशक्रएणाम् ।

इत्येतेषु नकारःसंधिजैरपि पूर्वपदस्थै र्निमित्तैर्नम्यते । गोरोहिण गोरोहिणातौग्रो नजिभ्रिः । निर्गमाणि । तिरश्च-तापाश्वी निर्गमाणि । इन्द्रएणाः । इंद्रएणानियच्छतु । इ-न्द्रएणां इंद्रएणां प्रथमोअभ्यतिष्ठत् । स्व १ र्णं ॥ स्व १ र्णंवस्तोरुषसामरोचि । परावृणुदस्व परावृणुदस्व मघवन्न-मित्रान् । अग्नेरवेण मरुतां । वार्णं । वार्णंपथारथ्येव-स्वानीत् । शत्रुएणां । शत्रुएणांपौपयद्विश्वयाधिया ।

एषानतिर्दंत्यमूर्धन्यभावः ॥५७॥

अंतःपदंनाम्युध: सकारइत्येवमादि यदुक्तंतन्नति रि-तिवेदितव्यं । दंत्यानांवर्णानां मूर्धन्यभावो नतिरित्यु-च्यते । नतिसंज्ञायाःप्रयोजनं । नति प्लुतोपाचरितध्रुति ।

इति श्रीपार्षदव्याख्यायामानंदपुर-वास्तव्य वजटपुत्रोव्वटकृतौ प्रा-तिशाख्ये नतिपटलंपञ्चमम् ॥

स्वरानुस्वारोपहितो द्विरुच्यते-संयोगादिःसक्रमोविक्रमेसन् ॥ १ ॥

स्वरेणानुस्वारेणच उपहितःसंयोगादिर्वर्णः अविक्र-मेवर्त्तमानःसन् द्विरुच्यतेसएषविधिः क्रमसंज्ञोवेदित-व्यः । आत्वारथं यथोतये । सोमानंस्वरणं । स्वरानु-स्वारोपहित इतिकस्मात् । त्वावतःपुरुवसो । संयोगादि-रिति कस्मात् । आतेपितर्मरुतां । अयंसयस्यशर्मन् ।(१)अ-

(१) अविक्रम इति विषयस्तत्र्यभिप्रायात्प्रथमोत्तमवर्गीयेस्प-र्शेवीतितत्सस्थानमूष्माणमापन्ने प्यनापन्नेपिजिह्वामूलीयोपध्मानीय-योर्विसर्जनीयस्य द्वित्वन्नभवति । इतिवृत्तिः ।

विक्रमइति कस्मात्। यःप्राणतोनिमिषतो महित्वा।

सोष्मानुपूर्व्येण सहोच्यते सक्त-त्स्वेन॥ २॥

सोष्मानुवर्णः स्वेनपूर्व्येणस्ववर्गीयेण पूर्व्येणासह सक्तदुच्यते। विद्यक्खंमनसावस्य इच्छन्। अबभ्राते वपुंसः

असंयोगादिरपि छकारः॥३॥

संयोगं विनापि क्रामति। उपच्छायामिव घृणेः। स्वरानुस्वार इत्यनेन क्रमस्तुछेनेत्यत्र। तुछेनाभवपिहितंयदासीत्।

परं रेफात्॥४॥

रेफात्परं क्रामति। अर्द्धवीरस्य। परं रेफादित्यविशेषेणोक्तत्वात्। राजाइत्यत्र आकारस्य प्राप्नोति। स्वरोपहिताधिकारान्न। एवमपि पुरोहितमित्योकारस्यप्राप्नोति। संयोगाधिकारान्न सिद्धं स्वरोपहिता त्संयोगादेरेफात्परमिति।

स्पर्शएवं लकारात्॥५॥

यथारेफात्परंव्यञ्जनं क्रामति एवंलकारात्परःस्पर्शः क्रामति। महत्तदुल्बं स्थविरं। स्वरोपहितात्संयोगादेरित्येव अललाभवंतीः स्पर्शइति किं शतवल्शः।

ऊष्मणोवा॥६॥

उष्मणः परस्पर्शोवा क्रामति। प्रास्तौत् प्रास्तौद्दृष्वौजाः। आपोहिष्ठा मयोभुवः। प्रवस्पलक्रन्। अंगिरसां-

सामभि स्तूयमानाः । ऊष्मणः परेषां प्रथमद्वितीयानामे-वस्पर्शानां द्विर्वचनमिष्यते न सर्वेषां । तस्मात् विः स्मइति ऊष्मण एवद्विर्वचनं भवति न परस्य । ईदृशानामिष्टमिति । कथमध्यवसीयतइतिचेत् । ऊष्मण्यघोषोदये लुप्यत इति अत्रानेनलघुनास्पर्शग्रहणेन सिद्धे अघोषस्पर्शोदयइति । त्रिष्मभाङ्क इत्यत्रमकारस्य द्विर्वचनप्रतिषेधार्थं यदघोषग्रहणंकरोति । तद्ज्ञापयति नसर्वेषांस्पर्शानां द्विर्वचनं भवतीति शास्त्रान्तरेष्वपि दृश्यते । शपूर्वाः खयइतिशरः परेषांखयांद्विर्वचनं भवति । हकारात्सर्वेषांविभाषाद्विर्वचनमिष्यते ब्रह्मब्रह्म । स्पर्शइतिकस्मात् अश्वः । वह्वः । अह्नः । प्रस्वः । जगुष्व ।

नावसितम् ॥७॥

न खलुपदावसाने वर्त्तमानंरेफात्परंव्यञ्जनंक्रामति । दर्त् । वर्क् ।

नरेफः ॥८॥

रेफश्च नक्रामति । अर्वैवीरस्य । नैतदुदाहरणं । नपरक्रमोपधेत्यनेनैवसिद्धत्वात् इदन्तर्ह्युदाहरणं यत्रपरक्रमः प्रतिषिध्यते । दर्त् । वर्क् । अप्राप्तप्राप्त्यर्थं ।

वोष्मासंयुक्तो नुपधः ॥९॥

अनुपधः संयुक्तः ऊष्मावाक्रामति । ह्वयाम्यग्निम् । स्वांतन्तिकोशाः अनुपधइतिकस्मात् मुहुराक्रादुनीष्टतः वर्ष्यी ३ अह ।

नतूष्मास्वरोष्मपरः ॥१०॥

नतुखलुऊष्मास्वरपरोवाऊष्मपरोवाक्रामति। प्रत्युअद्दर्शि। पर्षि। ऊष्मपरः यः सोमसख्येतव। किमर्थमिदमुच्यते। त्रयः सकारामाभूवन्(१)।

न परक्रमोपधा ॥ ११ ॥

नतुखलुपरक्रमस्य उपधाक्रामति। मद्दत्तदुत्वं। प्रास्तौत्।

सहातिहाय पवमानयस्य हेतनेचेत्युपहितः पदादिः छकारः॥१२॥

सह। अतिहाय। पवमान। यस्य। हेतनेच। इत्येतैः पदैरुपहितः पदादिश्छकारोनक्रामति। सह। सहस्तोमाः सहछन्दसः। अतिहाय छिद्रागणाणि। पवमान। यत्रब्रह्मा पवमानछन्दस्यां। यस्यछायामृतं। हेतनेच। अधस्माय छतन्वे २ तनेचछर्दिः। पदादिग्रहण मुत्तरार्थं। हेइतिकस्मात्। उतोतदस्मै मध्विच्छद्यात्।

दीर्घणाच मेतिवर्जं ॥ १३ ॥

दीर्घेणाचउपहितः पदादिश्छकारो नक्रामति। माइत्येतद्दीर्घं वर्जयित्वा। मर्माणिते वर्मणा छादयामि। दीर्घेणेतिकस्मात्। उपच्छायामिव मेतिवर्जमितिकस्मात्। माच्छेरश्मीरिति। पदादिरिति किं ऐच्छामत्त्वा।

संयुक्तंतु व्यंजनं शाकलेन ॥ १४ ॥

---

(१) स्वरोष्मपरइतिकस्मात्। अदर्श्यायती तिखपुस्तकेदृश्यते

असंयुक्तं व्यंजनं दीर्घात्परं संयुक्तं व्यञ्जनं नक्रामति । शाकलेन विधानेन । व्यञ्जनग्रहणं ङकाराधिकारनिवृत्यर्थं । आत्वारथं । शाकलेनेतिकस्मात् । आत्वारथं । पदादिरित्येवानुवर्त्तते । राच्चाश्विदंध: । संयुक्तमितिकस्मात् । माच्छेद्म । एवमेके । अपरे दीर्घग्रहणं पदादिग्रहणं नानुवर्तयन्ति । अविशेषेणसर्वत्र शाकलमिच्छन्ति । आत्वारथं । राच्चाश्विदन्ध: । तवत्यत् । यज्ञाथथा ।

पदान्तीयोह्रस्वपूर्वोङकारोनका- रश्चक्रामत उत्तरेस्वरे ॥ १५ ॥

(१)सति । कीदृङ्ङिन्द्र: मरमेका । अहन्नहिंपरिशयानं । ह्रस्वपूर्वइतिकस्मात् । अर्वाङेहि सोमकामं । पशूंतांश्चक्रे वायव्यानारण्यान् ।

अनादेशे पटलेस्मिन्विधानं स- र्वत्रविद्यादपिवैकृतानां ॥ १६ ॥

अनादेशेकस्य पदान्तपदाद्यो: । अस्मिन्पटले द्विर्वचनादियत् विधानं तत् पदांतादिष्वेव विकारशास्त्रं परेदृष्टेषु इत्येता: परिभाषा उपमर्ष सर्वत्रभवतीति विद्यात् । अपिवैकृतानां वर्णानांकिं पुन: प्राकृतानां । केपुन: वैकृताइति येपरेदृष्टा । यथाप्रथमा स्तृतीयभूता: अन्त: पाताश्चेत्येवमादय: ।

---

(१) ह्रस्वपूर्व:ङकार: नकारश्चक्रामत: उत्तरेस्वरे ।

अभिनिधानं कृतसंहितानां स्पर्शान्तस्थानामपवाद्यरेफं ॥ संधारणं संवरणं श्रुतेश्च स्पर्शोदयानां १७

अभिनिधान मित्यधिकारः। यदित ऊर्ध्वमनुक्रमिष्यामः कृतसंहितानां संहिताकार्येषु कृतेषु पश्चाद्भवंतीत्यर्थः। केषामभिनिधानं। स्पर्शानां अंतस्थानांच अपवाद्यरेफं स्पर्शोदयानांतद्भवति। किंपुनस्तदभिनिधानं नाम। सन्धारणं वर्णस्यसंवरणंच वर्णश्रुतेः। एतदभिधानं वेदितव्यं। अर्वाग्देवाअस्य। उपमाषड्द्वाद्वा। यद्देवाअदः सलिले। पुरूयोदग्धासिवना। अद्ध्याचित्। उल्कामिव। दधिक्राव्णः। कृतसंहिताग्रहणं यद्यद्यामीति असंयुक्ताभिनिधाने ट्ययोयश्रवणार्थम्। स्पर्शान्तस्थाना मितिकस्मात्। ब्रह्म। विष्णु। स्म। पृश्निः। अपवाद्यरेफ मितिकस्मात्। अर्चंत्यर्कं मर्किणः। स्पर्शोदयाना मितिकस्मात्। अद्याद्याश्वःश्वः। अध्वानय द्दुरिता। सिनीवाल्यै जुहोतन। बभ्रिवांसं मह्वोरपः।

अपिवावसाने ॥१८॥

अवसानेपिचवर्तमानाना मेतेषां वर्णाना मभिनिधानं वेदितव्यं। वाक्। यत्। विष्टप्।

अंतस्थाः स्वे स्वेच परेपिरक्ताः ॥१९॥

अंतस्था अभिनिधीयंते। स्वेस्वेच प्रत्यये अरक्ताअपिरक्ता अपि। यंय्यंयुजं। इमंल्लोगं। अंगादंगा ल्लोम्नोलो-

म्नः । तंत्वोदस्म सतीषहं । तमवंतं । स्वेस्वेचेतिकिं । सिनीवाल्यै ।

ऌकारऊष्मस्वपिशाकलेन ॥ २० ॥

ऌकारोभिनिधीयते । ऊष्मस्वपिप्रत्ययेषु । शाकलेनविधानेन । नाराशंसोनजल्हव: । वनस्पते शतवल्श: । शाकलेनेति कस्मात् । नजल्हव: । शतवल्श: ।

खकारेचैवमुदये ककार: ख्यातेर्धातो: ॥ २१ ॥

खकारेचोदये ख्यातेर्धातो: ककार: । अक्ख्यद्देवी । शाकलेनेतिकिं । अख्यद्देव: । एवंकथंशाकलेनाभिधीयते ।

रपशतेर्वा पकार: ॥ २२ ॥

रप्शतेश्च पकार:शकारे एवं शाकलेनाभिधीयते । विरप्शी गोमती । शाकलेनेति कस्मात् । विरप्शीगोमती ।

पदांतीया यरवोष्मोदयाश्च स्पर्शा:पदादिष्ववरेवकारात् ॥ २३ ॥

पदांतीया:स्पर्शा: मकारंवर्जयित्वा यरवाऊष्मा इत्येतेषुच पदादिषुवर्त्तमानेषु उदयेषुशाकलेनाभिधीयंते । यद्ययामि तदाभर । तद्रासभो नासत्या । यान्वोनर: । ऊषमा । दभ्रख्‌ इति । अर्वाक्‌ छफाविव । शर्मन्स्याम । स्पर्शग्रहणं अंतस्थाधिकार निवृत्त्यर्थं । पदांतीयाइतिकस्मात् । त्वन्तान्संचेत्यत अंत:पातलक्षणस्य तका-

रस्यनभवतीतिअपदांतत्वात् पदादिष्विति इतिकस्मात् । उद्धेतिसुभग इत्यत्रउकारस्य पदादित्वात् पूर्वस्यनभवति । अवरेमकारादितिकस्मात् । सम्राज्ञी श्वशुरेभव ।

असंयुक्तं शाकलम् ॥ २४ ॥

लकारजषमस्वपि शाकलेनेत्येव मादि यदनुक्रांतं शाकलंतदसंयुक्तं भवतीति शाकलमताभिधानंत्वसंयुक्तस्यभवतीति वेदितव्यं । उक्तान्येवो दाहरणानि ।

तन्नपद्येस्वित्युत्तरे ॥ २५ ॥

नखलुशाकलं वेदितव्यं । सुइत्येतस्मिन्नुत्तरे पदे । अप्स्वग्नेसधिष्टव । स्वित्युत्तर इतिकस्मात् । यद्यक्षामि ।

वात्वनेकाचरान्त्याः ॥ २६ ॥

अनेकाचरांत्या स्तुस्पर्शाः वाशाकलमापद्यन्ते पद्येस्वित्युत्तरे । वाजमर्वत्सुपय उस्त्रियासु । अनेकाचरांत्याइतिकस्मात् हृत्सुक्रतुंवरुणो अप्स्व १ ग्निं ।

सर्वत्रैकेकरणस्थान भेदेवाशाकलम् ॥ २७ ॥

सर्वत्रपद्येचापद्येच एकेआचार्याः करणभेदे स्थानभेदेच विभाषाशाकलमिच्छन्ति करणभेदे क्रियतइतिकरणं प्रयत्नतः वर्णात्मगुणतत्वतातस्यभेदे सक्तत्सुनः ।

स्थानभेदे ।(१)ग्रदब्धाः । यद्वंहिष्ठं । उभयोर्भेदे । ग्रास्त्वग्ने । नृषद्वरसत् । करणस्थानभेदइतिकस्मात् । तत्तदग्निः यत्तेयमं । वात्वनेकाचरांत्याइति । प्रकृतेवाग्रहणेपुनर्वाग्रहणंअनेकाचराधिकारनिवृत्त्यर्थं ।

प्रथमेस्पर्शवर्गे ॥२८॥

प्रथमस्पर्शवर्गस्य एकेग्राचार्याः शाकलमिच्छंति । स त्यक्तस्त्ववंति । ग्रर्वाग्रथं । प्रत्यङ्विश्वंस्वः ।

स्पर्शायमा ननुनासिकाः स्वा-न्परेषु स्पर्शेष्वनुनासिकेषु ॥२९॥

ग्रननुनासिकास्पर्शाः स्वान्यमानापद्यन्ते । ग्रनुनासिकेषु स्पर्शेषु परेषु । पलिक्नीरित् । परिग्मन् । वृत्वघ्ने परिषिच्यसे । परिज्मानमिव । ग्रात्मातेवातः । ग्रमथ्ना-दन्यंपरि । वघ्नासूनो । दाह्यणिदध्मसि । ग्रात्मनंतीर्थं । गृभ्णामिते । स्पर्शाइति कस्मात् । ब्रह्म । दधिक्राव्णः । ग्रननुनासिकाइतिकस्मात् । ग्रर्वाङ्नरा । समन्यायंति । स्वानितिकिमर्थमुच्यते । संज्ञाप्रकरणेचतस्रोंतस्थाः ग्रष्टाउष्माणाइतिवर्णाः कृतसंख्या निर्दिश्यंते । नतथा-यमाः । तस्मादिदं स्पर्शायमाननुनासिका स्वानिति इत्युच्यमानेविंशतित्वात्स्थानिनामादेशानामपियमानां-विंशतित्वप्रसंगःसमाभूत् । चतुर्णामेवयमानां प्रथमा प्रथमं द्वितीया द्वितीयंएवमापंचमा दापद्यरन्नित्युच्यते

(१) ग्रब्जाइत्यप्युदाहरणंखपुस्तके ।

स्पर्शेष्विति कस्मात्। उपस्थांएका। अनुनासिकेष्विति कस्मात्। यद्वंह्विष्ठं।

न स्पर्शस्योष्मप्रकृतेः प्रतीयाद्यमापत्तिम् ॥३०॥

न खलु स्पर्शस्योष्मप्रकृते यमापत्तिंविजानीयात्। प्रद्रोधुवक्ष्मस्नुषु।

नाभिनिधानभावं ॥३१॥

अभिनिधानभावंचऊष्मप्रकृतेः स्पर्शस्य न प्रतीयात्। घ्ननेव वज्रिन्क्नथि ह्नि।

यमः प्रकृत्यैव सदृक् ॥३२॥

यमः प्रकृत्याएव सदृक्भवति यस्ययमापत्तिरुच्यते तत्स्वरूपोवेदितव्यः। प्रकृत्यर्थे किमुक्तंभवति। यमः प्रकृत्याश्रयाणि कार्याणि लभतइत्यर्थः। तस्मात् उपध्मातेवइत्यत्र सोष्मानुरूपो भवतीत्यर्थः। पलिक्नीरित्यत्र ककाररूपोयमोवेदितव्यः। अग्मंनिति गकाररूपो वेदितव्यः। जघ्नथुरित्यत्र घकाररूपः। परिज्मानमिति जकाररूपः। अप्नस्वतीरिति पकाररूपः।

श्रुतिर्वा यमेनमुख्यास्ति समानकाला ॥३३॥

अथवा यमोच्चारणेन समान काला मुखेभवा श्रुति-

रस्ति । यथा यमस्तद्रूपो लच्यते । पलिक्नीः यन्नस्य गृह्णामि । यस्माद्यमा अनुनासिकास्थानाश्चत्वारः संतो विंशतिस्थानिनां सद्रूपालच्यन्ते तस्मादिदमुच्यते ।

अनन्यास्तु प्रकृतेः प्रत्ययार्थे ॥३४॥

अनन्यास्तुप्रकृतेः प्रत्ययार्थेयमावेदितव्याः प्रकृत्यर्थे । किमुक्तंभवति यमःप्रकृत्याश्रयाणि कार्याणिलभतइत्यर्थः । तस्मात्उपध्मातेव इत्यत्रसोष्मातु पूर्व्येणसहोच्यते सकृदिति दकारेणसहोच्यते यमः ।

नसंयोगं स्वरभक्ति विहंति ॥३५॥

न खलु संयोगकार्याणि स्वरभक्तिर्विहंति । यासुजूर्णिः श्रेणिः सुम्नआपिर्क्ष देचक्षुः । स्वरभंत्याचरमिति स्वरभक्ति व्यवायेपिपरं रेफादितिक्रामति ।

यमान्नासिक्या स्वरभक्तिरुत्तरा-गार्ग्यस्य ॥३६॥

यमादुत्तरा नासिकस्थाना स्वरभक्तिरागमोभवति । गार्ग्यस्य भगवतोभि प्रायेण । पलिक्नीरित् परिग्मानमिव ।

ऊष्मासोष्माणः ॥३७॥

तस्यैवाभिप्रायेण सोष्मणो यमादुत्तरोनासिकास्थान-ऊष्मा आगमोभवति । अमध्नादन्यंपरि ।

वर्जयेत्तम् ॥३८॥

तमूष्माणं वर्जयेत्। अमध्नादन्यं।

नादःपरोभिनिधानाद्ध्रुवं तत्त्कालस्थानम् ॥३९॥

घोषवतः अभिधानात्परो नादश्चागमोभवति। ध्रुवसंज्ञंच तद्भवति। तत्कालस्थानमभि निधानकालस्थानमित्यर्थः। अर्वाग्देवाः। यद्दैवाअदः। तन्नैकआङ्गः। ध्रुवकालमनिर्देश्य मल्पत्वात्कवयोविदुः। यद्विप्रागणुमात्रायाः कालभेदेपितत्समं। नादोह्यभिनिधानेन पीड्यमानेननश्यति। तस्मादुच्चार्यतेयस्य यावद्वर्णात्मनःपरं। एकांतलोपं कवयोवर्णयंति ध्रुवस्यच। नासिकास्थानं रक्तस्य यथाह्वपाणिनिर्दिशेत्। सप्तमीकालनिर्दिष्टे पूर्वस्यविधि रिष्यते। पंचम्यास्तूत्तरस्याङ्गः तस्मात् कृच्छ्रस्त्वणुर्भवेत्। इति। ध्रुवसंज्ञायाः प्रयोजनं। सवर्णपूर्वस्यसद्दध्रुवस्येति।

अश्रुतिं त्वघोषात् ॥ ४० ॥

अघोषात् अभिनिधानात्तु ध्रुवंअश्रुतिर्भवति। गायत्र्याम यत्ते।

नासिकास्थान मनुनासिकाच्चेत् ॥ ४१ ॥

नासिकास्थानं ध्रुवं वेदितव्यं । अनुनासिकादभि नि-
धानात् यद्दिपरं भवति । अर्वाङ्गुरा । तन्मेजुषस्व ।

अन्तस्थायाः पूर्वस्वरूपमेव ॥ ४२ ॥

अन्तस्थायाः ध्रुवं पूर्वस्वरूपमेव भवति । यंयंयुजं वयं
वयंते । तंवोदस्मं । पर्वतश्चित् । इमंल्लोगं ।

व्याडेः सर्वत्राभिनिधानलोपः ॥४३॥

व्याडेः राचार्यस्य सर्वत्राभिनिधा नस्य लोपोभवति ।
उपध्मातेव धमति । अर्वाग्देवाः सर्वत्रग्रहणा मन्तस्थाधि-
कार निवृत्यर्थं ।

परक्रमे स्वररेफोपधेन ॥ ४४ ॥

व्याडेराचार्यस्य परक्रमेच स्वरोपधेचरेफोपधेच नलो-
पो भवति अभिनिधानस्य। परक्रमे मफ्त्तदुल्वं । स्वरोप-
धेअर्वाग्देवाः ॥ कथमिद मुभयत्र उदाह्रियते । लोपेच
अलोपेच द्वयोर्गकारयो रुत्तरस्मिन्नभिनिधानलोपः । पू-
र्वस्मिन्नलोपः । तस्मा दुभयत्रो दाह्रियते । रेफोपधे ।
परावर्भारभृत् ।

सवर्णपूर्वस्य सहध्रुवस्य विपर्य-
योध्रु वशिष्टे परेषां ॥ ४५ ॥

एतस्मिन्ध्रुवशिष्टे विधाने अपरेषामाचार्याणां स-
वर्णपूर्वस्य ध्रुवसहितस्य विधानस्यविपर्ययो वेदितव्यः ।
कस्मविपर्ययः अलोपइति प्रकृतं तस्यविपर्ययोलोपः ।

यद्द्रेशाः । व्याडेः सर्वत्राभिनिधानलोपइति एवंसिद्धे नियमार्थमिदमुच्यते । सवर्णपूर्वस्यैव स्यात् । इह मा-भूत् । अर्वाग्देवा इतिपरक्रमस्वररेफोपधेन इत्येवानु-वर्त्तते । सह भुवस्येति कस्मात् यत्तेयमं ।

रेफात्स्वरोपहिताद्व्यंजनोद-याद्दकारवर्णा स्वरभक्तिरुत्तरा ॥४६॥

रेफात्स्वरोपहिताद्व्यञ्जनोदया ऋकारवर्णास्वरभक्ति रुत्तरा उपजायते । यदद्यकर्हिकर्हिचित् । अर्चन्त्यर्क-मर्किणः । स्वरोपहिता दितिकस्मात् । आद्राांपदंकृ-णुते । व्यंजनोदयादितिकस्मात् । सुहृपकृत्तुं ।

विच्छेदात्स्पर्शोष्मपराञ्चघोषि-णः ॥ ४७ ॥

विच्छेदात्घोषिणा अभिनिधाना त्स्पर्शपराञ्च ऊष्मप-राञ्च स्व रभक्तिरुत्तरा उपजायते । अर्वाग्देवाः । शत-वल्शः स्पर्शोष्मपरादिति कस्मात् । यद्यद्यामि तदाभर । घोषिणइति कस्मात् । सम्यक् स्रवंति ।

द्राघीयसीतूष्मपरा ॥ ४८ ॥

ऊष्मपरातु या स्वरभक्तिः द्राघीयसी वेदि तव्या । यदद्य कर्हि कर्हिचित् । ऊष्मपरेति कस्मात् । अर्चंत्य-र्कं मर्किणः ।

इतराक्रमे ॥ ४९ ॥

द्रुतराच स्वरभक्तिः । द्रुततराकतरा याऊष्मपरा सा तुद्राघीयसीतस्या अपिच्चयाद्रुतराऋस्वा । अर्चंत्यर्कं । अनूष्मपरेति कस्मात् । वर्ष्यां २ अह । अदर्श्यायती ।

सर्वत्रैकेस्वरभक्तेर भावं ॥ ५० ॥

सर्वत्रांतःपदेच नानापदेरेफाच्च विच्छेदाच्च स्वरभक्तेरभावं एकेआचार्या मन्यंते । वर्ष्यान् अग्निर्हत्य अर्वाग्देवाः ।

रेफोपधामपरे विद्यमानां ॥ ५१ ॥

रेफोपधांस्वरभक्तिं अपरेआचार्या विद्यमानांमन्यंते । वर्हि । अर्चंति । रेफोपधामितिकस्मात् अर्वाग्देवाः ।

अक्रांतोष्मप्रत्ययाभाव मेके ॥ ५२ ॥

अक्रांतउष्माप्रत्ययः यस्याः स्वरभक्तेः तस्याः अभावंएके आचार्यामन्यंते । वर्षं । अदर्शि । जल्हवः । अक्रांतइति कस्मात् । वर्ष्यान् । अदर्श्यायती ।

पूर्वोत्तरस्वर सरूपतांच ॥ ५३ ॥

पूर्वोत्तरस्वर स्वरूपतां उत्तरस्वरस्वरूपतांच स्वरभक्तेरेके आचार्यामन्यन्ते । नकेवलमकाररूपास्वरभक्तिर्भवतीत्यर्थः । धूर्षदमितिउकार रूपास्वरभक्तिः वर्हिषदइति इकाररूपास्वरभक्तिः ।

ऊष्मोदयंप्रथमं स्पर्शमेके द्वितीयमाहु रपदांतभाजं ॥ ५४ ॥

उष्मोदयं प्रथमं स्पर्शंअपदांतभाजं एकेआचार्योद्वितीयमाहुः । यथा: चुरंप्रत्यंचंजगार । प्रत्यङ्स्वमसुंयन् । शतक्रतुःत्सरत् । विरप्शीगोमती । अपदांतभाजमिति कस्मात् । ऋक्सामाभ्यां । विराट् सम्राट् । अप्स्वग्ने ।

(१)कशातौ खकारयकारा उएके॥५५॥

कशातेर्धातोः ककारशकारयोः स्थानेखकारयकारौकर्तव्यौ एकेआचार्यामन्यन्ते । अख्यद्देवः ।

तावेवख्याति सदृशेषु नामसु ॥५६॥

तावेवखकारयकारौ ख्यातिसदृशेषुनामसुकर्तव्यौ मन्यन्तेएके आचार्याः । सख्ये सखायस्तन्वे तनूभिरिति ।

इति श्रीपार्षदव्याख्यायां आनंदपुरवास्तव्य वजूटपुत्रोव्वटकृतौप्रातिशाख्यभाष्ये षष्ठंपटलं समाप्तम् ॥

इति प्रथमोध्यायः ॥ ओं

(१) ख्याताविति खपुस्तकपाठः ।

दीर्घं ह्रस्वोव्यंजने न्यस्त्वृकारा यथादिष्टं सामवशःससंधिः ॥१॥

ऋकारादन्योह्रस्वःदीर्घत्वमापद्यते । व्यञ्जनेप्रत्यये इत्येतदधिकृतंवेदितव्यं । इतउत्तरं यत्रयत्रवक्ष्यामः तत्र तत्रोदःहरिष्यामः । सावमेशोनाम ससंधिर्वेदितव्यः । व्यञ्जनग्रहणं स्वरेदीर्घत्व प्रतिषेधार्थं । नैतदस्ति प्रयोजनं स्वरेषुहि सर्वेषु सन्धयोविधीयंते । तेऽस्यबाधका भविष्यंति । लृकारोऽकारस्य नकिंचिद्विधीयते तत्रस्यात्-नैव लृकारादिपदमस्ति तस्मादंतरेणापि व्यञ्जन ग्रहणं व्यञ्जनएव भविष्यति । नसिध्यति । कथंमच्चित्येत्यत्र प्रतिपदविधाना द्दीर्घत्वंप्रसज्यते । अस्तु कृतेपि दीर्घत्वे समाना क्षरत्वस्याविघाता दंतस्थापत्ति र्भविष्यति । तथासति पदेदृष्टेष्विति वचनान्नप्राप्नोति । तस्मा द्व्यञ्जनग्रहणंक्रियते । एवमपि नकर्त्तव्यं । प्रतिपदविधानस्य व्यञ्जनेसावकाशत्वात् । इहमच्चित्येत्यत्र उभयप्रसङ्गे शास्त्रानुपूर्व्येण संधयोभवंतीति पूर्वमेवांतस्थापत्तौकृतायां उकाराभावादेव नदीर्घत्वं भविष्यति । तस्मान्नार्थो व्यञ्जनग्रहणेन इहतर्हि अच्छऋषेमारुतमित्यत्र ऋकारउदये कंठ्या वकारमितिकृतेपि पदेदृष्टोह्रस्वोपि विद्यतइति दीर्घत्वंप्राप्नोति तत्प्रतिषेधार्थं व्यञ्जनग्रहणं क्रियते । नैकमुदाहरणंव्यञ्जनग्रहणंप्रयोजयतीति । यद्येतावत्प्रयोजनं स्यात् । नास्येति व्यञ्जनोपध इत्येतस्मिन्प्रकरण एवास्यनिपातनं कुर्यात् । अच्छऋषइति तस्मात्सर्वस्मिन्दीर्घभावे व्यञ्जनएवप्लुतिःस्यात् स्वरेमाभूदित्येव-

मर्थं व्यञ्जनग्रहणं कृतंद्रष्टव्यम्। यदुक्तमधस्ता त्प्रतिपद-
विधानस्य व्यञ्जनेसावकाशत्वात् मघ्व्वित्थेत्यत्र उभयप्र-
सङ्गे शास्त्रानुपूर्व्येणैव पूर्वमेवातस्यापत्तौ कृतायामु-
काराभावादेव प्लुतरप्राप्ते व्यंञ्जनग्रहणानर्थक्यमिति ।
तदेतदसम्यगुक्तं कथं। येनैकस्मिन्नुभे तुल्यबले युगपत्प्रा-
प्नुतः तत्र शास्त्रानुपूर्व्येणसंधिर्भवति। यथातवेमे इत्यत्रव-
इत्यस्यपदावस्थायामेव उदात्तपूर्वस्वरितमनुदात्तमित्यनु-
दात्तत्वे कृतेउत्तरेणसंधौ क्रियमाणे उदात्तपूर्वनियतं
विहत्याव्यञ्जनेनवा। स्वर्यते न्तर्हितमिति स्वरितस्य प्रा-
प्नोति। इकारोदय एकारमकार इतिचसंधिः। तयोःशा-
स्त्रानुपूर्व्येण पूर्वसंधिर्भवति। अतोन्यत्र पूर्वानुत्सर्गा न्बा-
धित्वाउतरे ह्यपवादाभवंति। यथा भूतंदेवानामवमे अ-
वोभिरित्यत्र अवीरतेवां स्यवोरथा इति । प्रतिपदवि-
धानमपि अभिनिहितं संधित्वं बाधित्त्वाअपवादान्तरं क-
स्येतिकरणादौप्रकृत्यास्वरेषु चाप्योमिति प्रकृतेर्भावोभ-
वति। एवमघ्व्वित्थेत्येव मादिष्वप्यपवादत्वात् दीर्घत्वं प्रस-
ज्यते। तस्माद्व्यंजनग्रहणं क्रियते। अन्यस्त्वकारादित्यन-
र्थकं। कथं। पदान्तादिष्वेव विकारशास्त्रं विधीयते नहि-
ऋकारांतं पदमस्तिक्वचा प्रयोजयतिइति। सर्वत्र पूर्वप-
दांताः प्लवंते वसुमघयोःपरयोरित्यत्र प्रयोजयति। यद्य-
स्ति पितृवसु मातृवसुरितिवा यथादिष्टग्रहणं अनादि-
ष्टानां यज्ञस्यदेवमादीनां(१)प्रतिविशेषणार्थं । यदि सर्वे-
षांह्रस्वानां सामान्येनैवदीर्घत्वंस्यात्। उत्तरेषा मनुक्र-
मणमनर्थक्यं स्यात्। नानर्थकं नियमार्थमेव तत्स्यात् यथा
अमुष्यामसुष्मिन्नवेति।

(१) प्रतिषेधार्थमितिख पुस्तकपाठः।

सैवप्लुतिः ॥२॥

साएवप्लुतिरिति वेदितव्या । याह्रस्वस्य दीर्घता । प्लुतिसंज्ञायाः प्रयोजनं । प्लुतोपाचरिते नतिरिति ।

यास्वरेषूपदिष्टा ॥३॥

याच स्वरसंधिषूपदिष्टा एवांअग्निमविषु साचप्लुतोपधेति ह्रस्वस्यदीर्घता वेदितव्या ।

योनिमारैगादिषु चोदयादेः ॥४॥

योनिमारैगित्येवमादिषुच उदयादेर्ह्रस्वस्यदीर्घतानिपातिता साचप्लुति रित्यत्रवेदितव्या । तस्मा त्प्लुतादीनी त्युच्यन्ते ।

मक्षिवत्युकारः प्लवतेसर्वत्राप्य पदांतभाक् ॥५॥

मक्षित्यत्रोकारःप्लवतेसर्वत्राप्यपदांतभाक् । किंपुनः पदांतभाक् । मक्षूदेववतः । मक्षूमक्षूकृणुहि । मक्षूयुभिर्नरा । उकारग्रहणमकारस्याप्रसङ्गार्थं । नैतत्प्रयोजनं । पदांतादिष्वेवविकारशास्त्रविधिः । अथापदांतभागितिप्राप्नोतितन्निवृत्त्यर्थमुकारग्रहणं । सर्वत्रग्रहणं क्रियते सर्वत्रपूर्वपदांताः प्लवंतेवसुमघयोरितिनियमादिति । मक्षूमक्षूकृणुहीत्यत्रपूर्वपदस्यदीर्घत्वंनस्यादिति । अंतः पादाधिकारनिवृत्तिख्यापनार्थंवा । तस्मात् प्रनव्यसासहसः सूनुमच्छायज्ञेन । वैश्वानरंमनसाग्निंनिचाय्याहविष्मंतः । अच्छावोअग्निमवसइत्येवमादिषुदीर्घत्वंसिद्धंभवति ।

सुतायाह्वीत्यतोन्येषुपदेष्वक्केति-विग्रहे ॥६॥

सुताःयाह्वीत्येताभ्यामन्येषुअक्कइत्येतत्पदंविग्रहेवर्त्त-मानंप्लवते। अक्कावदतवस्तं। सुतायाह्वीत्यतोन्येष्विति-कस्मात्। इन्द्रमक्कसुताइमे। अक्कयाह्वावह। विग्रहग्र-हणमपदांतभाग्ग्रहणादिनिवृत्त्यर्थम्। अधिकारार्थंचनि-वृत्त्यर्थत्वात्। गोकामामेअक्कद्यन्नितिनभवतिअधिका-रार्थत्वात्। पुरुहूतंपुरुष्टुतमित्यत्रसाधंमद्यादिभिः प्लुतैः पादांदाविति नभवति यथा। यद्वापुरुपुरुभुजेतिषष्ठं-चाष्टाक्षरेक्षरमितिनभवति। यद्ययंविग्रहाधिकार स्तथाप्यनुवर्तते। अंतः पादंविग्रहएष्वपृक्तइतिकिमर्थम्। तस्यप्रयोजनंतत्रैववक्ष्यामः।

अनाकारोपधश्चांत्योयेत्युत्तरप-दस्ययः। उदात्तादेर्द्व्यक्षरस्य ॥७॥

अनाकारोपधइतिउदात्तादेर्द्व्यक्षरस्योत्तरस्यपदस्य-योन्त्यः सचप्लवते। आपूयाध्वणोअभिगूर्यात्वं। अना-कारोपधइतिकस्मात्। परिदायरसंदुहे। अनाकारोप-धश्चान्त्योयेत्युत्तरइतिकस्मात् वैश्वानरंमनसाग्निंनिचा-य्याहवि ष्मंतः इत्यत्रांतोयोयकारः आकारोपधोनभ-वति। अंत्यइतिकस्मात्। इमांसमेतपश्यत। उत्तर-पदस्येतिकस्मात्। मर्यश्रीस्पृहयद्वर्णः। उदात्तादेरिति-कस्मात्। अप्रामिसत्यमघवन्। द्व्यक्षरस्येतिकस्मात्। सुवीर्यस्यपतयः स्याम। नैतदुदाहरणंयुक्तं। नास्येतिव्यं-

जनोपधइत्येवंसिद्धत्वात् । अतिथिग्वस्यवीरानितियथा ।
तस्मात् आमूरजप्रत्यावर्त्तयेत्येवंविधमन्यद्यंजनोदयंमृग्यं।

नास्येतिव्यंजनोपधः ॥८॥

नखलुअस्येत्ययमंतः प्लवतेव्यंजनोपधः सन् । राजाभिकृष्टेहूपंमस्यबभ्रेः । तेजिष्ठयातिथिग्वस्यवर्त्तनी । व्यंजनोपधइतिकस्मात् । अवास्याशिशुमतीरदीदेः ।

निर्यूयपिष्टतमयाभिपद्यप्रास्यसंगत्यानुदृश्याभिहृत्य । आरभ्यसंमील्यमह्नुंगमाभिरभिवृग्ययचनिषद्यवीतिच ॥९॥

इत्येतानिपूर्वलक्षणप्राप्तानिनप्लवंते। निर्यूयपिष्टतमय । वनस्पतेरशनयानिर्यूयपिष्टतमयावयुनानिविद्वान् । पिष्टतमयेतिकस्मात् । वनस्पतेरशनयानिर्यूयादेवानां । अभिपद्य । तएतेवाचमभिपद्यपायया । प्रास्य । प्रास्यपारंनवतिम् । संगत्य । सर्वाः संगत्यवीरुधः । अनुदृश्य । पूर्वेषांपंथामनुदृश्यधीराः । अभिहृत्य । अभिहृत्यमपत्नान् । आरभ्य । येत्वारभ्यचरामसि । संमील्य । संमील्ययद्भुवना मह्नुंगमाभिः मह्नुंगमाभिरूतिभिः । अभिवृग्यय । अभिवृग्ययचहताः । यत्रेतिकस्मात् । अभिवृग्याचित् । निषद्यवि । पिबा निषद्यविमुचा । वीतिकस्मात् । सभ्रं चानिषद्या हुष्णः । चकार एकैकस्य समुच्चयार्थः ।

नहि जह्यभिवीर्येण कृधीति कृणुथेतिच । एतान्येकाक्षरे पदे चैप्रीभाव्ये ॥१०॥

नहि । जहि । अभि वीर्येण । कृधीति । कृणुथ । इत्येतानिच पदानिच प्लवंते । एकाक्षरेपदे परे चैप्रसन्धीभूते प्रत्यये । नहि । नहीन्वस्यप्रतिमानं । जहि । जहीन्य १ स्याः । अभि अभीष्व १ यंः पौंस्यैः । इन्द्रमाता वीर्येणान्पृष्टं । कृधीष्व १ स्मांअदितेः । कृणुथ । अच्छे चिदस्मै कृणुथान्यंचनं । एतानीति कस्मात् । उतोनोअस्या उषसोजुषेतह्य १ र्कस्य एकाक्षरइति कस्मात् । तमर्यमाभिरक्षति । चैप्रीभाव्यइति कस्मात् । नहिनुते महिमनः समस्य ।

पराणि च ॥११॥

पराणि च यानि वक्ष्यामः तानिचप्लवंते चैप्रीभाव्ये । तान्युत्तरश्लोकेोदाहरिष्यामः । चैप्रीभाव्यइति कस्मात् । मनोवाताअधनुधर्माणिग्मन् ।

युक्ष्वमंदस्व विद्मेतिहीति ॥१२॥

युक्ष्व । मंदस्व । विद्म । इत्येतानि प्लुवंते । हीत्येतस्मिन्प्रत्यये । युक्ष्व युक्ष्वाह्यरुषीः । सार्धमद्यादिभिः प्लुतैरिति सिद्धेसंयोगपरार्थग्रहणं । समंदस्वाह्यंधसः । विद्माह्यस्यवीरस्य । संयोग परार्थमेव ग्रहणं ।

विद्धिपिबत्विति ॥१३॥

विद्धि । पिब । इत्येते प्लुवेते । तुइत्येतस्मि न्प्र विद्धीत्व १ स्यनोवसो । पिबात्व १ स्यगिर्वणः । सं परार्थं ग्रहणं ।

जुहोत यज धासथशिशीतभरेतिस्विति ॥१४॥

जुहोत । यज । धासथ । शिशीत । भर । इत्येतानि-सुइत्येतस्मिन्प्रत्यये प्लुवेते आजुहोतास्वध्वरंजनं । संयोगपरार्थं ग्रहणं । तन्नः शद्धासथास्विंद्रियं । तंशिशीता स्वध्वरं । यथोदयानितिसिद्धे संयोगपरार्थं ग्रहणं । भर । त्वंपुरूण्याभरास्वश्व्या ।

सुनुहीत्येतेषु परेष्वधेति ॥१५॥

सु । नु । हि । इत्येतेषुपरेषु अधइत्येतत्पदंप्लवते । सु । रुद्रस्यमर्या अधास्वश्वाः । नु । अधान्वस्य संदृशंजगन्वान् । हि अधाह्यग्नेक्रतोः । संयोगपरार्थं ग्रहणं ।

दंपर्त्तेनमुंचताद्येतिवीति ॥१६॥

दंप । ऋतेन । मुंचत । अद्य । इत्येतानिविइत्येतस्मिन्प्रत्यये प्लुवंते । दंपाव्यश्वुहीमदं । ददृशुषीस्तदृते नाव्यायन् । एवोष्व १ स्मन्मुंचताव्यंहः । संवत्सर इदमद्याव्यख्यत ।

सुन्वित्यनर्य परयोरुकारः पदं ॥१७॥

सु । नु इत्येतयोरनर्थपरयोः उकारः प्लवते । सु । इमामूष्वा सुरस्य स्नुतस्य । नु । कदून्व १ स्याकृतं । अनर्थपरयो रितिकस्मात् । यस्मादूरस्य सीदुन्व १ र्थोवा । संयोगपरार्थं ग्रहणं । पदमितिकस्मात् । बहुस्वासुस्वश्व्यं ।

तयोरुत्तरेयोजघेति ॥ १८ ॥

तयोः सुनु इत्येतयोः उत्तरेइत्येतस्मिन्प्रत्यये । योज । घ । इत्येते प्लवेते । योज । योजान्विंद्रतेहरी । घ । प्रघास्यस्य महतः । यथोदयेतिसिद्धे संयोगपरार्थं ग्रहणं । एतावान्स्वैप्रोभाव्याधिकारः ।

मृलयच्छ्रां वसुवित्तमं यत्सोम-जातवेदसं । भरतेत्येतेषु ॥ १९ ॥

मृलयच्छ्रां । वसुवित्तमं । यत् । सोमं । जातवेदसं । इत्येतेषुभरतेत्येतत् प्लवते । मृलयच्छ्रां । इत्थंमतिभरतामृलयच्छ्रां । वसुवित्तमं । भरता वसुवित्तमं । यत् । भरता यज्जुजोषति । सोमं । अपावप भरता सोममस्मै । जातवेदसं । प्रदेवंदेव्याधिया भरताजातवेदसं ।

अपादांतः ॥ २० ॥

अपादांत इत्येतदधिकृतंवेदितव्यं । इतउत्तरं यच्छ्यामः । वक्ष्यति चिन्महित्वं गीर्गृणानः सतेपरन्वितीति । प्रनुमहित्वं वृषभस्य वोचं । अपदांत इतिकस्मात् । महांइंद्रः परश्चनुमहित्वं ।

अद्येति करणादिषु ॥ २१ ॥

अद्य इत्येतत्प्लवते करणादिषु प्रत्ययेषु करणादीन्युत्तरत्रोदाहरिष्यामः ।

करणं च चित्करते वृणीमहे भवन्तं कृणोतु भवत स्वस्तये ॥ २२ ॥

ते इमे करणादयः । ये पूर्वसूत्रे निर्दिष्टाः । करणं । च । चित् । करते । वृणीमहे । भवन्तं । कृणोतु । भवत । स्वस्तये । इत्येतेषु अद्य इत्येतत्प्लवते । करणं । प्रतत्ते अद्या करणं कृतं । च । अद्या च नो मृळयत । नैतदुदाहरणं । सार्धमद्यादिभिः प्लुतैः पादादाविति सिद्धत्वात् । एवं तर्हि । सुधीहव मद्या च मृळय । एवमन्यान्यपि पादमध्यस्थान्युदाहरणानि । चित् । तदद्या चित्त उक्थिनः । करते । कोवामद्या करते रातहव्यः । वृणीमहे । सूक्तैरद्या वृणीमहे । भवन्तं । विश्विन्नो अद्या भवन्तं । कृणोतु । भद्रं सोमः सुवानो अद्या कृणोतु नः । भवत भवी त्वो अद्या भवता यजत्राः । स्वस्तये विश्वे देवा नो अद्या स्वस्तये ।

पूर्विति चित्पुरुहूतो नृषूतः सहस्राणि पुरुभुजा धियायते ॥ २३ ॥

पुरु इत्येतत्प्लवते । चित् । पुरुहूतः । नृषूतः । सहस्राणि । पुरुभुजा । धियायते । इत्येतेषु प्रत्ययेषु । चित् । तिरः पुरू चिदर्णवं जगन्वान् । पुरुहूतः इन्द्रः पुरू पुरुहू-

तः । त्वष्टृ तः । सिमापुरु नृषूतोअस्यानवे । सहस्राणी । त्वं पुरु सहस्राणि । यद्वा पुरुभुजा । पुरुपुरुभुजा । धियायते । एषपुरुधियायते ।

वह्निति.त्वंदुहित दैव्यमुतरं ॥ २४ ॥

वह्निरित्येतत्प्लवते । त्वं । दुहितः । दैव्यं । इत्येव-मुत्तरं । त्वं । आदाशुषे जातवेदो वहात्वं । दुहितः । आवहादुहितर्दिवः । दैव्यम् । आवहादैव्यञ्जनं ।

द्युम्नंरुद्रंनव्यमेतेषु वर्धय ॥ २५ ॥

द्युम्नं । रुद्रं । नव्यं । इत्येतेषु प्रत्ययेषु वर्धयइत्येतत्प्ल-वते । द्युम्नं । आयंसद्दो वर्धयाद्युम्न मिंद्र । रुद्रं । रुद्रं दि-वावर्धयारुद्रं । नव्यम् । इहस्पतिं वर्धयानव्यमर्कैः ।

चिन्महित्वं गोर्गृणानःसतेपरं न्वित्यंत्येचे मर्त्तशब्दाद्रिवः परे ॥ २६ ॥

चित् । महित्वं । गोः । गृणानः । सः । ते । इत्येवं-परं नुइत्येतत्प्लवते । अत्येचेत्यत्रे मर्त्तशब्दे परेवा अद्रि-वः परेवा भवतः । चित् । अद्याचिन्नूचित् । महित्वं । प्रनू-महित्वं । गोः । इंद्र वेपोव क्षरोयस्यनूगोः । गृणानः । नू-ष्टुतइंद्रनूगृणानः । सः । प्रनूममर्त्तः शवसा । ते । येचा

कनंतचा कनंतनूतेमर्त्ताः ।ऊतो अभूमन इनूतेअद्रिवः । अंत्येचेन्मर्त्तशब्दाद्रिवः परेइतिकस्मात् । भसन्नुषप्रपूर्व्यः । नहिनुते महिमनः ।

तूतुजानोमतिभि र्भोजनानि नोदद्धिस्तोमं भूरियोनिं त्वमेषु । भरेत्येत् ॥ २७ ॥

तूतुजानः । मतिभिः । भोजनानि । नः । दद्धि । स्तोमं । भूरि । योनिं । त्वे । इत्येतेषु प्रत्ययेषु भरइत्येतत्प्लवते । तूतुजानः । अस्मादृदुप्रभरातूतुजानः । मतिभिः । भूतिं-नभरामतिभिः । भोजनानि । शत्रूयतामाभराभोजनानि । नः । सुपेशसं वाजमाभरानः । दद्धि । मानोमर्द्धीरा भराद-द्धि । स्तोमम् भूषन्निव प्रभरा स्तोममस्मै । भूरि । संगृभ्या-न आभरा भूरिपश्वः । योनिं । धासिमिव प्रभरायोनि मग्नये । त्वं । विश्वावसून्याभरात्वंनः ।

न नुचिद्यः ॥ २८ ॥

नुइत्येतच्चिद्य इत्येवमुत्तरं नप्लवते । उतोनुचिद्यो ओजसा । यइतिकस्मात् । अद्याचिन्नूचित् ।

भवेति स्तोतृभ्यो द्युम्नीशतमेप-रेषु ॥ २९ ॥

भवइत्येतत्प्लवते । स्तोतृभ्यः । द्युम्नी । शत । मे । इत्ये-

तेषुपरेषु । स्तोतृभ्यः । भवास्तोतृभ्यो अंतमः । स्वस्तये । भवाद्युम्नी वाध्रश्व । शत । पूर्भवाशतभुजिः । मे । अभिप्रेहिदक्षिणतोभवामे ।

शोचायविष्ठ्यवायथाकर्ता यत् सादयासम । अर्चामरुद्भ्यस्ति-ष्ठानः सनास्वः पारयानव्यः ॥३०॥

शोचायविष्ठ्य । एवायथा । कर्त्तायत् । सादयासम । अर्चामरुद्भ्यः । तिष्ठानः । सनास्वः । पारयानव्यः । इत्येतेषां द्विपदानां पूर्वपदांताः प्लवंते । शोचायविष्ठ्य । बृहच्छोचायविष्ठ्य । एवायथा । नक्षिरेवा यथात्वं । कर्त्तायत् । ज्योतिष्कर्त्तायदुश्मसि । सादयासम । देवाँईळेसादयासप्तहोतॄन् । अर्चामरुद्भ्यः । दिवोअर्चामरुद्भ्यः । तिष्ठानः । ऊर्ध्वस्तिष्ठानऊतये । सनास्वः । सनाज्योतिः सनास्वः पारयानव्यः । अग्नेत्वं पारयानव्यः ।

बोधास्तोत्रे चक्रमा ब्रह्मवाहः शंसागोषूक्षादुह्वितर्वदातना ॥ अजानष्टं जंभयाता अधामहो-गंतामायुत्स्वाहि सूजावनस्पते३१॥

बोधास्तोत्रे । चक्रमाब्रह्मवाहः । शंसागोषु । उक्षादुह्वित्तः । वदातना । अजानष्टं । जंभयाताः । अधामः । गंत्तामा । युत्स्वाहि । सूजावनस्पते । इत्येतेषांच प्ल-

वंते पूर्वपदांताः । बोधास्तोत्रे । बोधास्तोत्रे वयोदधत् । चकृमा ब्रह्मवाहः । त्वयाहवि श्चकृमा ब्रह्मवाहः । शंसागोषु । प्रशंसा गोष्वघ्न्यं । उच्छादुहितः । व्युच्छादुहितर्दिवः । वदातना । अच्छावदातनागिरा । अजानष्टं । अजानष्टंयथापशुं । जंभयाताः । अभिसति जंभयाता अनश्वसः । अधामहः । मरुतामधामहः । गंतामा । आगंतामारिषण्यत । युक्ष्वाहि । अग्नेयुक्ष्वाहियेतव । सृजावनस्पते । अवसृजावनस्पते ।

अग्नेरक्षाणास्तिष्ठा हिरण्ययं सोतावरेण्यंशोचामरुद्वृधः ॥ शिक्षास्तोतृभ्यो भूमाविवंधुरः पिबामधूनां सोतापरीतिच ॥३२॥

इत्येतेषां पूर्वपदांताः प्लवंते । अग्नेरक्षाणः । अग्नेरक्षाणो अंहसः ॥ अग्नइतिकस्मात् ॥ तेनसोमाभिरक्षनः ॥ तिष्ठाहिरण्यय रथंतिष्ठा हिरण्ययं ॥ सोतावरेण्यं ॥ सोमं सोतावरेण्यं ॥ शोचा मरुद्वृधः ॥ शन्नशोचामरुद्वृधः ॥ शिक्षास्तोतृभ्यः । शिक्षास्तोतृभ्यो मातिधग्भगोनः ॥ भूमाविवंधुरः ॥ सप्रथानो अभिपंचभूमाविवंधुरः । आद्यभूमिति सिद्धे संयोगपरार्थं ग्रहणं । पिबामधूनां । अग्नं पिबामधूनां । सोतापरि । आसोता परिषिंचत ॥

सद्वमिमिद्व दधिष्व वसिष्व श्रोतसुनोत हिनोत पुनात ॥ विघ्न जगृभ्म ररम्म ववन्म द्धाम सुपमनि,मन्थ तमत्स्व। सररद,रणा जिन्वधारयार्षद्वर यजयच्छदश्नस्य साधसेध । तपरुज मृलवर्द्धयावयाचश्नवय नमस्यविदाष्ट क्षपवजोष । शृणुधि शृणुतयंतयच्छ तस्तवसिम गृहत कुतमोषथ । दिधृतपचतवस्वविध्यताथ मदथात्तय दीतपाथन। उपागत्या क्वलीक्षत्यवब्राजा विष्टनो रुष्य । इष्कर्तेलिष्वंमर्मृज्म बिभये यर्त्तंतच्छतं। साधंमदयादिभिः प्लुतैः पादादौ व्यंजनोदयं । न्वेववर्जं नसंयोगे ष्रोषेचा पठितेसति ॥ ३२ ॥

मद्व । मिमिद्व । दधिषु । वसिषु । श्रोत । सुनोत । हिनोत । पुनात । विद्म । जगृभ्म । ररभ्म । ववन्म । चाम । सुपप्तनि । मंथत । मत्स्व । सर । रद । रण । जिन्व । धारय । अर्षं चर । यज । यक्ष । दधस्य । साध । सेध । तप । रुज । मृल । वर्ध । यावय । चत्र । अवय । नमस्य । विद । अष्ट । कृष्व जोष । शृणुधि । शृणुत । यंत । यच्छत । स्तव । सिम । गृहत । कुव । मोषथ । दिधृत । पचत । इष्ठ । विध्यत । अथ । मदथ । अत्त । यदि । इत । पाथन । उपागत्य । अक्खलीकृत्य । ववाज । अविष्टन । उरुष्य । इष्कर्त्त । ईलिष्व । मम्बम । विभग्य । इयर्त्त । इत्यंतं एकोनसप्ततिसंख्यं पदं यदनुक्रान्तम् अद्यइत्येवमादिभिः प्लुतैः भव,बोध, शिक्षेत्यादिभिरनुक्रांतैः सहेतिशेषः अपादार्थं मनुक्रांतैः पादादौच संयोगपरार्थं । सोच । तिष्ठ सोतइत्येतैस्त्रिभिः पुनरुक्तै र्विनाएकत्रिंशतासार्धं तच्छतंपादादौ प्लवते । व्यंजनेप्रत्यये । व्यंजनाधिकारेतुपुनर्व्यंजनगृहणस्यप्रयोजनमुक्तं । नूष्टुतइंद्रगृणानः । रक्षाणो ब्रह्मणस्पते इत्येवमादिषुषत्वणत्वयोः कृतयोः मदेहृष्टेपि व्यंजनमात्रेस्यादिति । मत्स्व । मत्स्वादेव प्रणस्पुरः । मिमिद्व । मिमिद्वा समिलाभरा । दधिष्व । दधिष्वाजठरेसुतं । वसिष्व । वसिष्वा हिमियेध्य । श्रोत । श्रोता हवंजरितुरेव यामरुत् । सुनोत । सुनोता सोमपाव्ने । हिनोता नोअध्वरं देवगज्या । पुनात । पुनाता दक्षसाधनं । विद्म । विद्मातेअग्नेत्रेधा जगृभ्म । जगृभ्माते दक्षिणं । ररभ्म । ररभ्मा शवसस्पते । ववन्म । ववन्मानुते युज्याभिरूती । चाम । चामाये विश्वधा-

यसः । सुपप्तनि सुपप्तनीथे दथुः चोदसः । मंथत । मथता नरः कविमद्वयतं । मत्स्व । मत्स्वा सुशिप्रमन्दिभिः । सर । सरा रसेव विष्टपं । रद । रदापूषेवनः मनिं रण । रणा योअस्यधर्मभिः । जिन्व । जिन्वाधियोवसुविदः । धारय । धारया चमसां इवविवक्षसे । अर्ष । अर्षासोमद्युमत्तमः । चर चराणोअभिवार्यं । यज । यजानो मित्रावरुणा । यच्छ । यच्छा नः शर्म सप्रथः । दशस्य दशस्यानः पुर्वणीकहोतः । साध । प्रनित्रवोदितये तुराय साधा दिवः । सेध । द्युमत्तमं दक्षंधेह्यस्मे सेधाजनानां । तप । तपातपिष्ठ तपसा । रुज । रुजाहृळ्हा चिद्रुक्षसः । मृल । मृलानो रुद्रोतनः । वर्ध । वर्द्धानो अमवद्भिः । यावय । यावया वृकं १ वृकं । अव । अवातिरूप मुत्तममपश्यं । श्रावय श्रावया वाचंकुविदंग । नमस्य । नमस्या कल्मलीकिनं । विद विदा चिन्नुमहांतः । अष्ट । अष्टापरः सहस्रा । कृण्वाकृत्नो अकृतं । जोष । जोषा सवितर्यस्यतेहरः शतं । शृणुधि । शृणुधी जरितुर्हवं । शृणुत । शृणुता मद्रुमंहवं यंत । यंता नोदृकंछर्दिः । यच्छत । यच्छता नोदुष्परिहंतुशर्म । स्तव । स्तवा नुइन्द्रपूर्व्या । सिम । सिमा पुरूनृषूतः । गूहत । गूहता गुह्यंतमः । कुत्र । कुत्रा चिद्यस्यसमृतौ । मोषथ । मोषथा वृक्षंक पनेव दिध्यत । दिध्यता यच्चदुष्टरं । पचत । पचता पक्तीरवसेकृणुध्वमित् । इष्य । इष्या मध्यंप्रत्यग् । विध्यत । विध्यता विद्युतारक्षः । अथ अथा तेअंगिरस्तम । मदथ । मदथा वृक्तबर्हिषः । अत्त अत्ता हवींषि । यदी । यदीगोभि र्वसायते । इत । इतामरुतो अश्विना । पाथन । पाथना शंसात्तनयस्य । उपागत्य । उपागत्येत्युदाहरणं संहितायांनदृष्टंवृत्ताविदमुदाहरणं

हृष्टं । उपागच्छा सोम्यासोम्या स अक्षलौकाय । अक्षलौकस्यापितरंनपुत्रः वव्राज । अव्राजासीमनद्तौरद्ध्याः । अविष्टन अविष्टना पैजवनस्यकेतु । उरुष्य । उरुष्या णोअघायतः । इष्कर्त्तं । इष्कर्त्ता विह्रुतं पुनः । ईळिष्व । ईळिष्वा हिप्रतीव्यं । मर्मृज्म । मर्मृज्मा तेतन्वं । विभय । बिभया हित्वावतः । इयर्त्त । इयर्त्ता मरुतोदिवः । इमेसर्व्वादयउदाहृताः । (१)न्वेववर्जनसंयोग

(१) अद्यादीनीदानीमुदाहरिष्यामः । अद्य । अद्यादेवासः पिपृत । पुरु । पुरूचवृत्राहनति । वह । वहानोहव्यंप्रथमः । वर्द्धय । वर्द्धयावाचंजनयापुरंधिं । नु । नूचपुराचसदनं । भर । भरापिवर्य्याय । भव । भवामित्रोनशेव्यः । शोच । शोचाशोचिष्वदीदिहि । एव । एवाहितेविभूतयः । कर्त्त । कर्त्तानः स्वस्तिमतः । सादय । सादययोनिपुत्रिषु । अर्च । अर्चादेवायाग्नये । तिष्ठ । तिष्ठाहरीरथआयुज्यमाना । सन । सनाचसोमजेषिच । पारय । पारयातुर्वशंयदुंस्वस्ति । बोध । बोधासुमेमघवन् । चक्रम । चक्रमासत्यराधसे । शंस । शंसामहामिंद्रंयस्मिन् । उच्छ । उच्छादिवोदुहितः । वद । मृग्यंमुदाहरणं । अजा । अजावृतइंद्रशूरपत्नीः । जंभय । जंभयाकृकदाश्वं । अध । अधातेविष्णोविदुषा । गंत । गंतानोयज्ञंयज्ञियाः । युक्ष्व । युक्ष्वारथेनशुचयद्भिरंगैः । सृज । सृजावत्संनदाम्नः । रक्ष । रक्षाणोब्रह्मणस्पते । सोत । सोताहिसोममद्रिभिः । शिक्ष । शिक्षाणोअस्मिन्पुरुहूत । भूम । भूमापृष्टेवरुरुहः । पिब । पिबासोममिंद्रमंदतु । पादादावितिकस्मात् । द्यावानोअद्यपृथिवीअनागसः । अत्रैववोपिनह्यामि । नूचिद्दधिष्वमेगिरः । न्वेववर्जनसंयोगइतिकस्मात् । नु एवइत्येतेपदेवर्जयित्वायच्छतंतत्संयोगेनप्लुवते । अद्यत्वावन्वत्सुरेक्णाः । पुरुत्वादाश्वान्वोचे । अधत्वमिंद्राबद्ध्य १ स्मान् । पिवस्वधेनवानां । न्वेववर्जमितिकस्मात् । नूष्टुतइंद्र । एवात्वामिंद्रवज्रिन् । शेषेचापठितेसति । शेषेचदीर्घीभावविधाने । नसंयोगइत्यधिकृतंवेदितव्यं । न्वेववर्जमितिचनिवृत्तंवेदितव्यं । किमविशेषेणासंयोगाधिकारः । नेत्याहअपठितेसति । स्वस्तयउत्तराणि । नघात्वद्रिकृइत्येवंयत्रपाठोनास्तितत्राधिकारोद्रष्टव्यः । वक्ष्यतियथोद्यानीति । तत्संयोगेनभवति । सपिस्पृशतितन्विश्रुतस्य । प्रतुइवपरि । यथावावक्ष्यतिपकादशिद्धादशिनोलेघावितिं । तत्संयोगेनभवति । अतादेवानामुपनुप्रभूषन् । तिरःपवित्रंपरियन्नुरुज्रयः । इहेंद्राग्नीउपह्वये । अपठितइतिकस्मात् । त्यंसुमेषंमहयास्वर्विदांतां आदित्याँअनुमदास्वस्तये । नघात्वद्रिगपवेति । त्वंहित्माच्यावयन्नच्युतानि ।

द्युतिकिं । नृष्टुतद्वंद्र । एवात्वामिंद्र वज्रिन् नसंयो ग-
द्युतिकिं । अधस्मानो मघवन्नकृतादित् । शिषिचापठिते
मतीतिकिं । अधात्वंहि नस्करः । अधत्वमिंद्र वि-
ध्य १ स्मान् ।

वर्धशुभ्रे स्तजयः सेधराजन् वह्-
ह्व्यानि यदिमे ऽधया मनि ।
विघ्नदातार मधधारया ऽधते-
विश्वं पुरुवार्चगाय । वह्वा-
योपिबमध्वः पुरुविद्वान्पुरुवि-
श्वान्यधवायुं पुरुशस्त । यदिम्-
त्यो रधजिह्वा पुरुविश्वा पिबशुद्धं
पिबराये वह्कुत्सं । भरद्वाजेर्चं-
देवाय यदिवापुरुदाशुषे । वह्-
शुष्णायाधवह्वधयत्पुरुहीतिन ३४॥

वर्धशुभ्रे । स्तजयः । सेधराजन् । वह्ह्व्यानि । यदिमे ।
अधयामनि । विघ्नदातारं । अधधारया । अधतेविश्वं ।
पुरुवा । अर्चगाय । वह्वायो । पिबमध्वः । पुरुविद्वान् ।
पुरुविश्वानिअधवायुम् । पुरुशस्त । यदिम्त्योः । अधजि-
ह्वा । पुरुविश्वा । पिबशुद्धं । पिबराये । वह्कुत्सं । भरद्वाजे

र्चदेवाय । यदिवा । पुरुदाशुषे । वहशुष्णाय । अधवञ्जु
अधयत् । पुरुह्वीति । इत्येतेषुयथाप्राप्तास्नुतिर्नभवति ।
वर्षशुभ्रे । वर्षशुभ्रेस्तुवते । ऋजनः । ऋजयस्त्वापृतन्यति ।
सेधराजन् । सेधराज न्नयस्त्रिधः । वहह्व्यानि । वहह-
व्यानि सुमनस्यमानः । यदिमे । यदिमे सख्यमावरः । अ-
धयामनि । अधयामनि प्रसितस्यतद्वेः विश्वदातारम् ।
विश्वदातारमिषम् । अधधारया । अधधारया म-
ध्वापृचानः । अधतेविश्वं । अधतेविश्व मनुहा-
सदिष्टये । विश्वमितिकस्मात् । अधातेविष्णो विदु-
षाचित् । पुरुवा । पुरुवारं पुरुत्मना । अर्चगाय । अर्च-
गाय चवेधसे । वहवायो । वहवायो नियुतोयाहि । पि-
बमध्वः । पिबमध्व स्तृपदिंद्रावृषस्व । पुरुविद्वान् । पुरु-
विद्वां ऋचीषम । पुरुविश्वानि । पुरुविश्वानि जूर्वन् ।
अधवायुं । अधवायु न्नियुतःसश्चतस्वाः । पुरुशस्त । पुरु-
शस्त मधत्तये । यदिमृत्योः । यदिमृत्यो रंतिकन्नीतएव ।
अधजिह्वा । अधजिह्वा पायतीति । पुरुविश्वा । पुरुविश्वा
जनिम मानुषाणां । पिबशुद्धं । पिबशुद्ध सुदकमाचरंती ।
पिबराये । पिबराये शवसेहूयमानः । वहकुत्सं । व-
हकुत्स मिंद्रयस्मिन्चाकन् । भरद्वाजेर्च देवा य ।
अर्चदेवायवरुणायसप्रथः भरद्वाजइतिकस्मात् । अर्चा-
देवायाग्नये । यदिवा । यदिवा दधेयदिवान । पु-
रुदाशुषे । पुरुदाशुषे विचयिष्ठोअंहः । वहशुष्णा-
य । वहशुष्णाय वध कुत्सम् । अधवह्नु । अधवह्नु
वित्तमः । अधयत् । अधय देषान्नियुतः । पुरुहि । पुरुहि
वापुरुभुजादेष्णम् ।

कृधीति परेषु सहस्रसांधियं ज-रित्रे न इति ॥३५॥

कृधीतिपदं प्लवते । सहस्रसां । धियं । जरित्रे । नः । इत्येतेषु परेषु । सहस्रसां । कृधी सहस्रसामृषिं । धियं । कृधीधियं जरित्रेवाजरत्नां । जरित्रे । कृधीजरित्रे मघवन्नवः । नः । कृधीन ऊर्ध्वांचरथाय जीवसे ।

तत्रेतिचांत्ये ॥३६॥

तेषांप्रत्ययानां अंत्ये नइत्येतस्मिन् प्रत्ययेतत्र इत्येतत्पदंप्लवते । तत्रानो ह ब्रह्मणस्पतिः ।

सहस्रेन सुश्रवसं पवस्व इनोअ-धी त्येषुपरेषुतेन ॥३७॥

सहस्रेन । सुश्रवसं । पवस्व । इनोअधि । इत्येतेषुपरेषु तेनइत्येत त्प्लवते । सहस्रेन । तेनासहस्रेनावयं । सुश्रवसं । तेनासुश्रवसं जनं । पवस्व । तेनापवस्वां धसा । इनोअधि । तेनानोअधिवोचत । इइतिकस्मात् । तेनानो मृत्वजीवसे ।

देवंवेनं केतमित्युत्तरेषु दधा-तेति ॥३८॥

देवं । वेनं । केतं । इत्येतेषुपरेषु दधातेति प्लवते । देवं । दधातादेव मृत्विजं । वेनं । दधातावेन मादिशे । केतं । दधाताकेत मादिशे ।

श्रुधि वंस्वे ति नः परे ॥३९॥

श्रुधि वंस्वइत्येते नः प्रत्यये परेप्लवेते । श्रुधि श्रुधीन इन्द्रह्वयामसि । वंस्व । वंस्वानो वार्यापुरु ।

वेदेति विश्वस्य भूमं मे उत्तरे ॥४०

वेदइत्येतत्प्लवते । विश्वस्य । भूमं । मे इत्येवमुत्तरं । विश्वस्य । वेदाविश्वस्यमेधिरः । भूमं । वेदाभूमंचित् इंद्रह्वयामसि । मे । वेदामे देवऋतुपाऋतूनाम् ।

शुनः शेपेचप्लवते यकारे ॥४१॥

शुनः शेपेच ऋषौवेदइत्येत त्प्लवते यकारेप्रत्यये। वेदायोशीनांपदं शुनः शेपइतिकस्मात् । वेदयस्त्रीणि विदथान्येषां । यकारइति । कस्मात् वेदनावः ।

ब्रह्मेति नो हेचगिरः कृणोतिते कृणोत तूतो दितिचोत्तरेषु ॥४२॥

ब्रह्मइत्येतत्प्लवते । नः । हेचगिरः । कृणोति । ते । कृणोत । तूतोत् । इत्येतेषुपरेषु । नः । ब्रह्माण इंद्रोपयाहि । हेचगिरः । ब्रह्माचगिरो दधिरे । हेइतिकस्मात् । ब्रह्मचतेजातवेदः । कृणोति । ब्रह्माकृणोति वरुणः । ते । ब्रह्मात इंद्रगिर्वणः । कृणोत । ब्रह्माकृणोत पन्यइत् । तूतोत् । ब्रह्मातूतो दिंद्रोगातुं ।

अभीतिनोनुनवंतेसतोनरंद्वास-त्स्विति ॥४३॥

अभीत्येतत्प्लवते । नः । नु । नवंते । सतः नरं । द्वा । सत् । सु । इत्येतेष्वपरेषु । नः । अभीन आवहृत्स्व । नु । अभीनु माहृषभ चद्वभीथाः । नवंते । अभीनवंते अद्रुहः । सतः । अभीषत स्तदाभर । नरं । अभीनरं धीजवनं । द्वा । अभीद्वा किमुव यः करंति । सत् । अ-भीष दृप चुच्यवत् । सु । अभीषु णः सखीनां ।

आग्नेऽर्षपरेतु मुख्ये ॥४४॥

इत्येतेषां प्रत्ययानां मुख्ये नइत्येतस्मिन्प्रत्यये । आ । अग्ने । अर्षे । इत्येवंपरे एवअभीतिपदं प्लवते । आ । अ-भीनआ वहृत्स्व । अग्ने । अभीनोअग्न उक्थमिज्जुगुर्याः । अर्षे । अभीनोअर्ष दिव्या । आग्नेर्षपरइति कस्मात् । अभिनो वाजसातमं ।

चक्रु वंदेते दृशस्यन्समुद्रो रथेन-नः सप्तऋषी न्मदंति । ते वो भयंते नियुद्भिः कृपीटं रथस्य सोमस्य मतीरणंति ॥४५॥

चक्रुः । वदेते । दृशस्यन् । समुद्रः । रथेन । नः । सप्तऋषीन् । मदंति । ते । वः भयंते । नियुद्भिः । कृपीटं । रथस्य । सोमस्य । मतिः । रणंति । इत्येते चक्रुराद-

यः। वक्ष्यति। यत्रेतिचक्रुरादिषु नरः सुपर्णा इत्युक्तं यत्रेत्येतत्प्लवते। चक्रुरादिषु। नरः सुपर्णाइत्येतयोश्च। चक्रुः। यत्राचक्रुरमृतागातुं। वदेते। यत्रावदेते अवरः परः। दशस्यन्। यत्रादशस्य न्नुषसः। समुद्रः। यत्रासमुद्र स्कभितः। रथेन। यत्रारथेन गच्छथः। नः। यत्रान श्चक्राजरसं तनूनां। सप्तऋषीन्। यत्रासप्तऋषीन्परः। मदंति। यत्रामदंति धूतयः। ते। यत्रातआहुः परमं। वः। यत्रावोदिद्युद्रदति। भयंते। यत्राभयंते भुवना। नियुद्भिः। यत्रानियुद्भिः सचसेशिवाभिः। कृपीटं। यत्राकृपीट मनुतद्दहंति। रथस्य। यत्रारथस्य बृहतोः सोमस्य। यत्रासोमस्य तृंपसि। मतिः। यत्रामति र्विद्यते। रणंति। यत्रारणंति धूतयः। नरः। यत्रानरः संचविच द्रवंति। सुपर्णाः यत्रासुपर्णा अमृतस्य।

समुद्रं ह्रस्वर्णा नवग्वशब्दो दशग्वंदंसिष्ठ वसूनिनो वसु। त्वर्दं निर्दनु यतिभ्यः सहंतः पृथिव्यां निर्हंसि समत्सु पावक॥ ४६॥

समुद्रं। ह्रस्वर्णा नवग्वशब्दः। दशग्वं। दंसिष्ठ। वसूनि। नः। वसु त्वर्दंनिर्दनु यतिभ्यः। सहंतः। पृथिव्यां। निः। हंसि। समत्सु। पावकइत्येतेसमुद्रादयः। वक्ष्यति। समुद्रादिषु येनेति।

येनइत्येतत्प्लवते। स मुद्रादिषु प्रत्ययेषु। समुद्रं। येनासमुद्र मसृजोमहीः ह्रस्वर्णा। येनास्व १ र्णं ततनाम।

आद्येचेद्वाजयुंपार्ये कमग्नेमघव-
न्परे ॥४९॥

एषां प्रत्ययानामाद्ये । नः । नु । इत्येते । वाजयुं । पार्ये । कं । अग्ने । मघवन् । इत्येवंपरेयद्भिवतः नर्हिभवेत्येतत्प्लवते । वाजयुं । अवानोवाजयुंरथं । पार्ये । अवानःपार्येभवे । कं । अवानुकंज्यायोन्यचनसः । अग्ने । अवानोअग्नऊतिभिः । मघवन् । अवानोमघवन्वाजसातौ । आद्येचेद्वाजयुंपार्येकमग्नेमघवन्परइतिकस्मात् । अवानोवजिनाशिशीहि ।

रास्वापितःशतेनानोवर्धस्वासुश्रु-
धीहवं । मंदस्वासुवहस्वासुवने-
मातेनहीनुवः ॥५०॥

इत्येतेषां पूर्वपदांताःप्लवन्ते । रास्वापितः । रास्वापितर्मरुतां । शतेनानः । शतेनानो अभिष्टिभिः । वर्धस्वासु । वर्धस्वासुपुरुष्टुत । सुधीहवम् । सुधीहव मिंद्रमारिषण्यः । मंदस्वासु । मंदस्वासुस्वर्णरे । वहस्वासु । वहस्वासु स्वश्व्यम् । वनेमाते । वनेमाते अभिष्टिभिः । नहीनुवः । नहीनुवो मरुतोअंत्यस्मे वइतिकस्मात् । नहिनुते महिमनः ।

पाथादिवोधातारयिं सृजता(ग)…-

साधनं । रास्वाचोरूनश्चग्धीनः
सृजतामधुमत्तमं ॥ ५१ ॥

इत्येतेषांपूर्वपदांताःस्रवंते । पाथादिवः । पाथादिवोविमहसः । धातारयिं । धातारयिंसहवीरंतुरासः । सृजतागयसाधनं । समीवत्सन्नमातृभिःसृजतागयसाधनं । रास्वाच । रास्वाचनोअमृतमर्त्यभोजनं । उरून । उरूनराधःसवनापुरूणि । श्चग्धीनः । श्चग्धीनइंद्रयत्वा । सृजतामधुमत्तमं । आनःसोमंपवित्रआसृजतामधुमत्तमं ।

जहीचिकित्वोवेत्थाहिरत्नथान-
हतामखम् । युयोताशरुंस्वेना-
हिवनेमाररिमावयं ॥ ५२ ॥

जहीचिकित्वः । वेत्थाहि । रत्नथान । हतामखं । युयोताशरुं । स्वेनाहि । वनेमाररिमावयं । इत्येतेषांचपूर्वपदांताःस्रवंते । जहीचिकित्वः । जहीचिकित्वोअभिशस्तिमेतां । वेत्थाहि । वेत्थाहिवेधोअध्वनः । रत्नथान । रत्नथानेमवन्नशत् । हतामखं । हतामखंनभृगवः । युयोताशरुं । युयोताशरुमस्मत् । स्वेनाहि । स्वेनाहिवृत्रंशवसाजघंथ । वनेमाररिमावयं । स्तोमंयज्ञंचादरंवनेमाररिमावयं ।

प्रप्रावोअस्मेधामाहृ सनाज्ज्यो-
तिरपावृधि । ऋध्यामातेवाम-

देवे जुहोतामधुमत्तमं ॥ ५३ ॥

प्रप्रावोऽस्मै । धामाह । सनाज्ज्योतिः । अपाद्ध-धि । ऋध्यामातेवामदेवे । जुह्वोतोमधुमत्तमम् । एतेषांच पूर्वंपदांताः प्लवन्ते । प्रप्रावो अस्मे । प्रप्रावो अस्मे-स्वयशोभिः । अस्मेइतिकिं । प्रप्रवस्त्रिष्टुभमिषं । धामाह । धामाहयत्तेअजर । सनाज्ज्योतिः । सनाज्ज्यो-तिः सनास्वः । अपाद्धधि । अपाद्धधि परिह्वतन्नराधः । ऋध्यामाते वामदेवे ऋषौ । ऋध्यामातओहैः । वामदे-वइतिकस्मात् । ऋध्यामातेवरुणाखाम्ब्तस्य । जुह्वोतामधु-मत्तमं । तस्मादुद्रास्रेहविर्जुहोतामधुमत्तमं ।

यद्वामहे धिष्वाशवो जनिष्वा-
देववीतये । अधात्वं ह्यद्याद्या-
श्वःश्वः सचस्वानः स्वस्तये ॥ ५४ ॥

इत्येतेषांच पूर्वंपदांताः प्लवंते । यद्वामहे । यद्वामहे सौमनसाय । धिष्वाशवः । धिष्वाशवः सूरये न । जनि-ष्वा देववीतये । जनिष्वादेववीतये सर्वतातास्वस्तये अधात्वंहि । अधात्वंहिनस्करः । हीतिकस्मात् । अध त्वमिन्द्रविद्धि । अद्याद्याश्वःश्वः । अद्याद्याश्वःश्वइन्द्र । सचस्वानःस्वस्तये । अग्नेसूपायनोभव सचस्वानःस्वस्तये । स्वस्तयइतिकस्मात् सचस्वनः पराकआ ।

इति श्रीपार्षदव्याख्यायामानंद
पुरवास्तव्यवजूटपुत्रोव्वटकृतौ

प्रातिशाख्यभाष्ये सप्तमं पटलम्।

अंतःपादं विग्रहएष्वप्लुतउकारो व्रजस्य सु धानमोभिः। शुचिं पवित्रं तु मह्वो नुचाप्लुतं सुतस्येति॥ १॥

अंतःपादं विधिर्भविष्यति। यदितऊर्ध्वमनुक्रमिष्यामः विग्रहेच भविष्यति। अप्लुतः अव्यञ्जन उकारः प्लवते। व्रजस्य सु धाःनमोभिः। शुचिं। पवित्रं। तु। मह्वोः। नुचाप्लुतं। सुतस्य। इ येतेषु परेषु। व्रजस्य। व्यूव्रजस्य तमसः। सु। अस्याऊषुणाउपसातये। धाः। शंसात्युक्थयजतेव्यूधाः। नमोभिः। होतातमूनमोभिः। शुचिं। तमूशुचिंशुचयः। पवित्रं। अत्यूपवित्र मक्रमीत्। तु। मायामूतु यज्ञियानां। मह्वीः कद्रूमह्वीरधृष्टा अस्य। नुचाप्लुतं। समूनुपत्नी वृषभिर्जगम्यु। सुतस्य तऊसुतस्य सोम्यस्य अप्लुतमितिकस्मात्। किंस्विदच्छ्याभिकिमुनूमनिश्ये। अंतःपादमितिकस्मात्। किंनोदुदुहर्षसेदातवाउ येदेवासो दिव्येकादशस्थ अच्छेतिविग्रहइतिप्रकृतेविग्रहाधिकारे पुनर्विग्रहग्रहणमुदयविशेषणार्थं क्रियते तस्मात्सुपुत आदुसुस्तुष इत्यत्रउकारस्य दीर्घत्वंनभवति यद्युदयविशेषणार्थं विग्रहग्रहणं। स्य सुमेषं महयास्वर्विंदमित्ये व मादिषु नसिध्यति। अत्रापिवचनप्रामाण्यात् सिद्धं। अथापिक्वचिदपि वचनस्यावकाशान्नसिद्धमिति तथापिजदोषः। उदयविशेषणार्थं इह-

निवृत्तमिति व्याख्या स्याम: ॥ एष्विति कस्मात् । अस्माइदुसमिमिव । अपृक्तइति कस्मात् । सहोन: सोमधुत्सुधा: ।

यद्युदयोदयान । सोमसुतिं चर्किराम स्तवाम स्तवाना गभायरथं श्रुधीति ॥ २ ॥

यदिव्रजस्येत्येवमादीनामेते उदयानभवंति । अथ उकार: प्लवते । एषुप्रत्ययेषुनप्लवते । सोमसुतिं । इमासुषुसोमसुतिं । चर्किराम । दधिक्राव्ण इदुनुचर्किराम् । स्तवाम । आशुंदधिक्रांत मनुष्टवाम । स्तवाना । इन्द्राविष्णून्तवदुषुस्तवाना । गभाय । अवर्षीवर्षमुदुषु गभाय । रथं । युवोरुषुरथंहुवे । श्रुधि । इमा उषुश्रुधीगिर: ।

तेअस्ति तेमहिमन: प्रवोचत प्रवोचं न:सुमना द्वैपदाश्च ॥ ३ ॥

इतीमेद्वैपदा उदयोदयायदि चेन्नभवंति अथउकार: प्लवते । तेअस्ति इन्द्रयउनुतेअस्ति । अस्तीति कस्मात् । आदूनुतेअनुक्रतुं । तेमहिमन: । कउनुते महिमन: समस्य । प्रवोचत । नतस्यविद्मतदुषु प्रवोचत । वोचतेतिकस्मात् । पर्यूषुप्रधन्ववाजसातये । प्रवोचं । अभीयोधर्मस्तदुषुप्रवोचं । न: सुमना: । उशन्नुषुण: सुमना: । सुमनाइति कस्मात् । अस्याजषुणउप ।

महेदधिध्वेतिरसुम्ननो मृध स्वर-

नमध्वं नमते नयंत स्वित्ये- तेषु ॥ ४ ॥

इत्येतेषु प्रत्ययेषु सुइत्येतत्प्लवते । मह्वे । प्रसूमह्वे- सुशरणाय । दधिध्वं । निषूदधिध्वमस्वनंतउत्सं । तिर । प्रसूतिराशचीभिः । मुंच । विषूमुंचसुषुवुषः । नः । अ- धप्रसूनउपयंतु । श्वथः । विषूमथः शिश्नथः । चर । वि- षूचरस्वधाअनु । नमध्वं । निषूनमध्वंभवतासुपाराः । नम । निषूनमातिमतिं । ते । प्रसूतइन्द्रप्रवता परिभ्यां । नयंत । प्रसूनयंतगृभयंतः ।

एकाक्षरयोः पराणिचे दपेंद्रा- ग्नेचाध्वरमायुरेत्विति ॥ ५ ॥

एषुप्रत्ययेषु यौएकाक्षरौ । नः तेइति तयोः परा- णि । उप इन्द्रअग्ने अत्र । अध्वरं । आयुः । एतु । इति यदीमानि भवंति सु इत्येतत्प्लवते । उप । अधप्रसून उ- पयंतु । इंद्र । मोषूणइन्द्रात्र । प्रसूतइंद्रप्रवता । अग्ने । नूषूणोअग्ने शृणुहित्वमी । अत्र । मोषूणोअत्र जुहुरंतर । अध्वरं । जुषस्वसूनो अध्वरं । आयुः । प्रसून आयुर्जीवसे । एतु । प्रसून एत्वध्वरं । एकाक्षर- योःपराणिचेतिकस्मात् । मोषुणः परापरा । तां- सुतेकीर्तिं ।

सदे त्येतद्योनिषु पीतयेपरं ॥ ६ ॥

सदइत्येतत्प्लवते । योनिषु । पीतये ॥ इत्येवंपर-

सत् । योनिषु । निषदायोनिषुत्रिषु । पीतये । निषदा-पीतयेमधु ।

धन्वेत्येतत्सोमराट्पूयमानः ॥ ७ ॥

धन्वेत्येतत्प्लवते सोम राट् पूयमानः । इत्येतेषुपरेषु । सोम । प्रधन्वासोमजागृविः । राट् । ऋणोनतायुरतिधन्वाराट् । पूयमानः । अभिस्वरधन्वापूयमानः ।

यदीति क्रथो मनसःकवीनां सबंधवो गोःसरमेति तेषु ॥ ८ ॥

यदीत्येतत्प्लवते । क्रथः । मनसःकवीनां । सबंधवः । गोः । सरमा । इत्येतेषुपरेषु । क्रथ । युवायदीकृथः पुनः । मनसः । तन्नद्यदी मनसः । कवीनां । गुहायदीकवीनां । सबंधवः । गिराग्रदी सबंधवः । गोः । स्वाष्टग्रदेवस्या मृतंयदी गोः । सरमा । विदद्यदी सरमा रुग्णामद्रेः ।

चरेति पुष्टिं सोम चर्षणिप्राः ॥ ९ ॥

चरइत्येतत्प्लवते । पुष्टिं । सोम । चर्षणिप्राः । इत्येतेषुपरेषु । पुष्टिं । रेवांइवप्रचरा पुष्टिमच्छ । सोम । अवीरहा प्रचरासोमदुर्यान् । चर्षणिप्राः । विशःपूर्वीः प्रचराचर्षणिप्राः ।

जनिमेति हंति सं जातवेदाः ॥१०॥

जनिमेति प्लवते । हंति । सं । जातवेदाः । इत्ये-

तेषु परेषु। इंति। विश्वावेदजनिमाहंति। सं। विश्वेदेते जनिमासं विविक्तः। जातवेदाः। विश्वावेद जनिमा जातवेदाः।

रंधयेति येषु कंशासदुत्तरं ॥ ११ ॥

रंधय। इत्येतत्प्लवते। येषु। कं। शासत्। इत्येवमुत्तरं। येषु। एभ्योनृभ्यो रंधयायेष्वस्मि। कं। सुन्वद्भ्यो रंधयाकं चिदव्रतं। शासत्। बर्हिष्मते रंधयाशासदव्रतान्।

न नः कारेस्वित्युपसातयेपरे ॥ १२ ॥

नखलुसु इत्येतत्प्लवते नः कारेप्रत्यये उपसातयइत्येवं परे सति। उपसातये। अस्माजपुत्रा उपसातये। सातइतिकिं। अश्वप्रसून उपयंतु।

महायाच जयकाव्येन गूर्धयभरेतिचस्वरितिप्रत्ययेषट् ॥ १३ ॥

महय। अत्र। जय। काव्येन। गूर्धय। भर। इतिषडेतानिप्लवंते। स्वः इत्येतस्मिन्प्रत्यये महय। त्वंसुमेषंमहयास्वर्विदं। अत्र। अस्माकेभिर्नृभिरत्रास्वर्जय। जय। हनोवृत्रंजयास्वः। काव्येन। विप्रः कविः काव्येनास्वर्चनाः। गूर्धय। तंगूर्धयास्वर्णरे। भर। द्युमंतंशुष्ममाभरास्वर्विदं।

मदपर्षपिपृतधन्वयक्षतरुहेमेति स्वस्तय उत्तराणि ॥ १४ ॥

मद । पर्ष । पिपृत । धन्व । यच्छत । रुहेम । इत्ये-तानिप्लवंते । स्वस्तयइत्येवमुत्तराणि । मद । तां आदि-त्यां अनुमदास्वस्तये । पर्ष । सनः सिंधुमिवनावया-तिपर्षास्वस्तये । पिपृत अद्यादेवासः पिपृतास्वस्तये । धन्व । परिसोमप्रधन्वास्वस्तये । यच्छत । उरुणाः शर्म-यच्छतास्वस्तये । रुहेम । अरिष्यन्तमारुहेमास्वस्तये ।

दधिममदततन्विसिंचतस्तववदतानजरचतोचत । पिपृतपृणातपृच्छतप्रुषस्थघह्निनवायजुहोतपश्यत ॥ चक्रमाकुवभूमस्मशिशीतस्तोतपमत । यथोदयानिसर्वाणि ॥ १५ ॥

दधिम । मदत । तन्वि । सिञ्चत । स्तव । वदत । अनज । रचत । उचत । पिपृत । पृणात । पृच्छत । प्रुष । स्थः । घ । ह्निनव । अय । जुहोत । पश्यत । चकृम । अकुव । भूम । स्म । शिशीत । स्तोत । पमत । इत्येतानिसर्वाणियथोदयानिप्लवंते । दधिम । यस्मि-न्वयंदधिमाशंसमिंद्रे । मदत । इंद्रंगोभिर्मदतावस्वः । तन्वि । नघ्वस्मानस्तन्वी ३ रेपआ । सिञ्चत । आमत्रे-भिः सिंचतमद्यमंधः । स्तव । इंद्रं स्तवानृतमंयस्य । व-दत । रोदसीआवदतागणश्रियः । अनज । इमांवाच-मनजापर्वतच्युते । रचत पूर्भी रचतामरुतोयमावता ।

उक्षत । घृतमुक्षतोमधुवर्णमर्चते । पिपृत । निरंहसः पिपृतानिरवद्यात् । पृणात । स्तोमेभिरीपृणाताभोजमिंद्रं । पृच्छत । तंपृच्छतासजगामासवेद । प्रुष । अभ्रप्रुषोनवाचाप्रुषावसु । स्थ । केष्ठानरःश्रेष्ठतमाः । घ । नघासमामपजोषं । हिनव । प्रतक्तेहिनवायक्तेअस्मे । अथ । नाहमतोनिरयादुर्गहैतत् । जुहोत । आजुहोतादुवस्यत । पश्यत । तदस्येदम्पश्यताभूरिपुष्टं । अहंकविरुशुनापश्यतामा । चक्रम । वयंहितेचक्रमाभूरिदावने । अकुत्र । माकुत्रानोगृहेभ्यः । भूम । द्यावाचभूमाजनुषः । स्म । उतस्मासद्यइत्परि । शिशीत । तंशिशीतास्वध्वरं । स्तोत । इंद्रं स्तोतानव्यंगीर्भिः । पप्रत । वयोनपप्रतासुमायाः ।

त्विति चैकाक्षरोपधम् ॥ १६ ॥

तुइत्येतच्चैकाक्षरोपधं प्लवते । तु । आतून उपगंतन । एकाक्षरोपध मिति कस्मात् । पिबातु सोमं गोऋजीकमिंद्र ।

कदा हरिवो वरुणस्य चक्रतुः सूर्यस्य निष्ट्याइव भूमतेषुन ॥ १७ ॥

कदा । हरिवः । वरुणस्य । चक्रतुः सूर्यस्य । निष्ट्याइव । इत्येतेषु भूमइत्येतन्नप्लवते । कदा । प्रूने भूमकदाचन । हरिवः । अद्याय भूमहरिवः परादै । वरुणस्य । माहियेभूमवरुणस्य । चक्रतुः । सुरेतसापितरा

भूमचक्रतुः । सूर्यस्य । माभूनेभूमसूर्यस्यसन्दृशि । नि-ष्ट्याइव । माभूमनिष्टयाइवेंद्रत्वत् ।

वस्त्राणि हि बाबधे यज्ञियानां ते-दंसोद्वे नः सव शक्रेतेषु तु ॥ १८ ॥

वस्त्राणि । हि । बाबधे यज्ञियानां । तेदंसोद्वे । नः सव । शक्रइत्येतेषु प्रत्ययेषु तुइत्येतन्नप्लवते । वस्त्राणि । सतु वस्त्राण्यधपेशनानि । हि । अध्वर्यवातुहिषिंच । बाबधे । वितुबाबधेरोदसी । यज्ञियानां । मायामूतुयज्ञियानां । तेदंसोद्वे । तत्तुतेदंसोयदहन् । द्वेइतिक । स्मात् । तातूतइंद्र महतीमहानि । नः सव । आतूनः सवयतिगव्यं । नः सवेतिद्व इतिकस्मात् । उक्तं । आतून इंद्र इत्यत्रन्नस्माकं । शक्र । स्तोर्णाबर्हिरातुशक्रप्रयाहि ।

चक्रमेति द्वैपदे भूरिदुष्कृतं वर्ध-तां विप्रवचसो जिह्वयेति ॥ १९ ॥

चक्रमेत्येत न्नप्लवतेद्वैपदे भूरिदुष्कृतं वर्द्धतां । विप्रवचसः । जिह्वया । इत्येतेषुपरेषु भूरिदुष्कृतं । नवो गुहा चक्रमभूरिदुष्कृतम् । दुष्कृतमिति कस्मात् वयंहिते चक्रमाभूरि दावने । वर्धतां । प्राचंयज्ञं चक्रमवर्द्धताम् । विप्रवचसः । आपुरंदरं चक्रम विप्रवचसः । जिह्वया । यद्योदेवा श्चक्रमजिह्वया ।

काणवायना निष्कृतीरेतयोः स्थ ॥ २० ॥

काण्वायना । निष्कृतीः । एतयोस्थ इत्येतत्पदन्नप्लव-

ते ' काण्वायनाः। सुदेवास्य काण्वायनाः। निष्कृतीः। अथोयूयंस्य निष्कृतीः।

जाताः सुरथाह्ववनश्रुतश्च ॥ २१ ॥

जाताः। सुरथाः। ह्ववनश्रुतः एतेषुच प्रत्ययेषु स्य-इत्येतन्नप्लवते। जाताः। येस्यजाताअदितेः। सुरथाः। स्वश्वास्यसुरथाः। ह्ववनश्रुतः। कद्वस्यह्ववनश्रुनः।

सवा परं घेतिन कौत्सवैमदं ॥ २२ ॥

सवा। इत्येवंपरं घइत्येतत्पदं कुत्सस्यवाविमदस्य-वा ऋषेर्वर्तमानं नप्लवते। सः। अयंघसतुरोमदः। घा आघवा याभिररुणीः। कौत्सवैमदमितिकस्मात्। सुनोथोघासमर्त्यः। प्रकृतेपि प्रतिषेधे नकारः श्लोकपूरणार्थो द्रष्टव्यः।

स्मराशिमित्यादिषु न ॥ २३ ॥

स्मइत्येत न्नप्लवते। राशिमित्येवमादिषु प्रत्ययेषु। राशिमादीनुत्तरत्रोदाहरिष्यामः।

प्रतिष्मच ॥ २४ ॥

प्रतिपूर्वं च स स्मइत्येतन्नप्लवते। प्रतिष्म। प्रतिष्मरिषतोदह। प्रतीतिकस्मात्। नहिष्माते शतंचन।

स्मतेपरेषु व्रजनंवनस्पतेशुभे परुष्ण्याम् ॥ २५ ॥

स्मतेइत्येतस्मिन्द्वे पदेपूर्वेनप्लुवते । व्रजनं वनस्पते । शुभे । परुष्ण्यां इत्येतेषुपरेषु । व्रजनं । अधस्मतेव्रजनं वनस्पते । उतस्मतेवनस्पते । शुभे । उतस्मतेशुभेनरः । परुष्ण्यां । उतस्मतेपरुष्ण्याम् व्रजनमित्यादिपरेष्विति कस्मात् । नहिष्मातेशतंचन ।

स्म पुरावृषाकपौ ॥ २६ ॥

स्मपुराइत्येतन्नप्लुवते वृषाकपौ स्मपुरा । संहोत्रं स्मपरानारी । वृषाकपाविति कस्मात् । येस्मापुरा गातूयंतीव ।

राशिंवाजेषु मेसद्मपूषणांतं तृंह धायि मादुर्हणायतः । यस्मै यद्वृत्रहत्येषु मावतेवातीयं यस्य मादुर्गृभीयसे ॥ २७ ॥

तइमे राशिमादयः पूर्वसूत्रेनिर्दिष्टाः । राशिं । उतस्मराशिं परियासिगोनां । वाजेषु । प्रस्मवाजेषुनोव । मे । उतस्ममेव्यत्यै । सद्म । उतस्मसद्म हर्यतस्यपस्त्योः । पूषणां । वस्त्रामिस्मपूषणामंतरणा । तं । अपस्मतंपथोजहि । तृंहत् । कूटंस्मतृंहत् । धायि । उतस्मधायिदर्शतः । मा । चिः स्ममान्हः । दुर्हणायतः । अवस्मदुर्हणायतः । यस्मै । शुचिष्मयस्मा अत्रिवत् । यत् । नहिष्मयद्धवः-पुरा । वृत्रहत्येषु । मघोनस्मवृत्रहत्येषुचोदय । मावते ।

निष्ममावते। वातः। उत्स्मवातोवहति। यं। उतस्मयंशिशुम्। यस्य। अधस्मयस्याचंयः। मत्। उपस्ममन्तरसंतो। दुर्गभीयसे। अतऊर्ध्वमेकादशिद्वादशिनो रेत्येतत्प्रयंतंद्वैपदग्रहणांकृतं द्रष्टव्यं। तेषां द्वैपदानां पूर्वपदान्ताः प्लवंते।

पृक्षाविपश्चितमवापुरंध्याघात्वद्रिग्वीरान्वनुयामात्वोताः। जनयादैव्यंभुजेमातनूभि र्हावहतो वासयामन्मनाच॥ २८॥

इत्येतेषां पूर्वपदांताः प्लुवंते। पृक्षाविपश्चितं इंद्रं पृक्षाविपश्चितं। अवापुरंध्या। रथमवापुरंध्या। घात्वद्रिक्। नघात्वद्रिगपवेतिमेमनः। वीरान्वनुयामात्वोताः। वीरैर्वी रान्वनुयामात्वोताः। वीरानितिकस्मात् वयमग्ने वनुयामत्वोताः। जनयादैव्यं। मनुर्भव जनयादैव्यं जनं। भुजेमातनूभिः। यच्च भुजेमातनूभिः। र्हावहतः। आर्हावहतो मर्त्यायच्छंयच्छं; वासयामन्मना। वस्त्रेणेव वासयामन्मना शुचिं।

वेदावसुधितिं रोमापृथिव्या वोचासुतेषु धावतासुहस्त्यः। मुंचासुषुवुषः स्वाभ्मापितृना मिह्नावृणीष्व बोधयापुरंधिं॥ २९॥

इत्येतेषां पूर्वपदांताः प्लवंते । वेदा वसुधितिं । सद्मि- वेदावसुधितिं । रोमापृथिव्याः । अग्निर्ददाति रोमापृ- थिव्याः । वोचासुतेषु । प्रनुवोचासुतेषु वां । धावतासु- हस्त्यः । आधावतासु हस्त्यः मुंचासुषुवुषः । विषूमुं- चासुषुवुषः । स्वाभ्रापितूनां । ऊधर्नगोनां स्वाभ्रापितूनां । इष्टापूर्तमीष्व । अस्मां इष्टापूर्तमीष्व । बोधयापुरंधिं । प्रबोधयापुरंधिम् ।

अवथासः कृणुथासुप्रतीकं तिरा- शचीभिः कृणुतासुरत्नान् । ग्मं- तानहुषो नयताबियंतः स्मा- च्यावयं नोरयावृष्टिमंतं ॥ ३० ॥

इत्येतेषांपूर्वपदांताः प्लवंते । अवथासः । यंदेवासो- वथासविचर्षणिः । कृणुथासुप्रतीकं । अश्रीरंचित्कृणुथा- सुप्रतीकं । तिराशचीभिः । प्रमूतिराशचीभिर्येत उक्थि- नः कृणुतासुरत्नान् । सुभगान्नोदेवाः कृणुतासुरत्नान् । ग्मंतानहुषः । अधग्मंता नहुषः । अनयाबियंतः । ये- वाजाँअनयताबियंतः । स्माच्यावयन् । त्वंहिस्माच्यावय न्नच्युतानि ईरयावृष्टिमंतं । प्रपर्जन्य मीरया वृष्टिमंतं ।

असृजतामातरं सूरथंहुवे नय- ताबद्धं स्वापयामिथूदृशा । इता- जयता गतासर्वतातय इरयथा- मरुतोनेषथासुगं ॥ ३१ ॥

इत्येतेषां पूर्वपदांताः प्लवंते । असृजतामातरं । सं वत्सेनासृजता मातरंपुनः । सूरथंहुवे । युवोरु षूरथंहुवे । हुवद्वृतिकिं । अस्माकंसुरथंपुरः । नयतावद्वं । नजानीमो नयतावद्वं । स्वापयामिषूहृशा । निष्वापयामिषूहृशा । इताजयत । प्रेताजयतानरः । आगता सर्वतातये । तआदित्यआगता सर्वतातये । ईरयथामरुतः । उदीरयथा मरुतःसमुद्रतः । नेषथासुगं । चक्षुरिवयंतमनुनेषथासुगम् ।

अन्यत्वाचि त्पिबतामुंजनेजनं घास्या वोचेमाविदथेष्वितावधि यं । इतानि यत्वावि दशस्यथा क्रिविंचाबोधातिद्रावयात्वं क्रिरावसु ॥ ३२ ॥

इत्येतेषां पूर्वपदांताः प्लवंते । अन्यत्वाचित् । नूषन्यत्वाचिदद्रिवः । पिबतामुंजनेजनं । इंद्राग्नी पिबता मुंजनेजनं । घास्याः । त्वंत्वंवा घास्याअहं । वोचेमाविदथेषु । तमिहोचेमाविदथेषु शंभुवं । इतावधियं । एतावधियं कृणवामः । इतानि । आत्वेतानि षीदत । यत्वावि । मनोयत्वावितद्वधु विंचेतसः । दशस्यथा क्रिविं । याभिर्दशस्यथाक्रिविं । चाबोधाति । सचाबोधाति मनसायज्ञानि । द्रावयात्वं । अध्वर्यो द्रावयात्वं । क्रिरावसु । स्वानः सोमपवमानः क्रिरावसु ।

ह्वापदेव कर्त्तनाश्रुष्टिं योधया-
च जग्रभावाचं । पाययाच त-
र्पयाकामं गातुयाच मंदया-
गोभिः ॥ ३३ ॥

इत्येतेषांपूर्वपदांताः प्लवंते । ह्वापदेव । आह्वापदे-वगच्छसि । कर्त्तनाश्रुष्टिं । अध्वर्यवः कर्त्तनाश्रुष्टिं । यो-धयाच । सयोधयाच क्षयायाच जनान् । जग्रभावाचं । प्रतीचींजग्रभावाचम् । पाययाच । असादय पायया-चामधूनि । तर्पयाकामं । व्यश्नुहि तर्पयाकामं । गातुयाच । दशस्याच गातुयाच । मंदयागोभिः । इमं-काममंदयागोभिः ।

घास्यालादेनासुमतिं वोचानु-
व्यथया मन्युं । नेथाचचक्राजर-
सं भवता मृलयंतश्च ॥ ३४ ॥

इत्येतेषां पूर्वपदांताः प्लवंते । घास्यालात् । विजा-मातुरुतवाघास्यालात् । एनासुमतिं । विद्मा एना-सुमतिं याज्यस्य । वोचानु । अधिवोचानु सुन्वते । व्य-थयामन्युं । अमित्रस्य व्यथयामन्युमिन्द्र । नेथाच । पाथनेथाच मर्त्यं । चक्राजरसं । यत्रानश्चक्राजरसं त-नूनां । भवतामृलयंतः आदित्यासोभवता मृलयंतः ।

एवाचन भजाराये ररिमाते भ-

जाभूरि । श्रुधीनउभयत्वाते भ-जात्वं मृलयानश्च ॥ ३५ ॥

इत्येतेषां पूर्वपदांताः प्लवंते । एवाचन । मोतसूरो अहएवाचन । भजाराये । अभक्तेचिदाभजाराये अस्मान् । ररिमाते । पिबासोमंररिमाते । भजाभूरि । विभजाभूरितेवसु । श्रुधीनः । अवमेंद्र इन्द्रदाहृहि श्रुधीनः । उभयत्वाते । इन्द्रभ्रातरुभयत्वाते । भजात्वं । आगोमति व्रजेभजात्वं । मृलयानः । सोमराजन्मृलयानःस्वस्ति ।

एकादशिद्वादशिनो र्लघावष्टम मक्षरं । उदये संहिताकाले ॥३६॥

एकादशाक्षरद्वादशाक्षरयोःपादयो रष्टममक्षरं प्लवते । संहिताकाले लघावुदये सति । एकादशिनः । तादीत्नाशत्रुंन किलाविवित्से । द्वादशिनः । अग्नेसख्ये मारिषामा वयंतव । एकादशिद्वादशिनो रितिकस्मात् । भद्रंवोअपि वातयमनः । लघाविति कस्मात् । इषासमत्सुदासस्य नामचित् । प्रच्छभूष्णो दूतमिव वाचमिष्ये । संहिताकाल इतिकस्मात् । थादित्यासस्ते अक्रानवा इधुः । इदंत एकं परऊत(१)एनां ।

नःकारे च गुरावपि ॥ ३७ ॥

नःकारेउदये गुरावपिच एकादशिद्वादशिनो रष्टममक्षरं प्लवते । द्युभिर्हितो जरिमासूनो अस्तु ।

(१) एकमित्यपिपाठः ।

दशमं चैतयोरेवं ॥ ३८ ॥

दशमंचाक्षरंप्लवते एतयोरेकादशिद्वादशिनोः लघ्वुदये संहिताकाले नःकारे च गुरावपि । अच्छाविश्वा सुमनादीदिही नः । अवरुद्रा अशसो हंतनावधः । एकादशिद्वादशिनो रितिकस्मात् । प्रसुवानासो इन्द्रहिवेषु हरयः । लघाविति कस्मात् । रायएषि वसिदधीतधीः । तन्मत्सत मिंद्र शूरचित्रपातु । नःकारे च गुरौ । नूदेवासो वरिवःकर्तनानो भूतनः ।

षष्ठं चाष्टाक्षरे क्षरं ॥ ३९ ॥

अष्टाक्षरेच पादे षष्ठमक्षरं प्लवते । एवंकथं यथा एकादशि द्वादशिनो रष्टममक्षरं दशमञ्च । ईशानोयवयावधं । अष्टाक्षरमिति कस्मात् । पिवासोम मभियमुग्रतर्द्दः । लघाविति कस्मात् आपवस्व देवसोम । संहिताकालइतिकस्मात् । नेमिंतिष्टे वसुहं ।

व्यूहैः संपत्समीक्ष्यो ने क्षैप्र वर्णैकभाविनाम् ॥ ४० ॥

ऊनेपादे क्षैप्रवर्णानांच संधीनामेकीभाविनांच व्यूहैःपादस्य संपत्समीक्षितव्या । उहत्वस्रा अकृणोत नाव्यां इतिक्षैप्रसंधिः । व्यूहात् द्वादशाक्षरस्यपादस्यदशममक्षरंप्लवते क्षैप्रैकभाविनामित्येव सिद्धेवर्णग्रहणा सामर्थ्यात् । गोर्नपर्वं विरदा तिरश्च इतिवर्णव्यूहात् एकादशाक्षरस्याष्टममक्षरं प्लवते । प्रेता जयतानरइति एकीभावव्यूहादष्टाक्षरस्यषष्ठमक्षरंप्लवते एवंसंपत्सर्वत्र

सामीच्या जनइतिवचनात् पूर्णोव्यूहोनभवति । प्रत्यग्रभीष्म न्नतमस्य न्नणां ।

नवाव्वर्धंत वातस्यावघानि जिघांससि । सासह्या मवव्वत्याम- दीदिह्यष्टममूणु हि ॥ ४१ ॥

नतुखलु षष्ठएकादशिद्वादशिनोरष्टाच्चरेच एवमादीनि प्लवंते यानिवच्यामः । वाव्वधंत । वातस्य । अवघानि । जिघांससि । सासह्याम । वव्वत्याम । दीदिह्यष्टमं । ऊणु हि इति । वाव्वधंत । द्युतद्यामानं वाव्वधंतन्नणां । वातस्य । युजानो अश्वावातस्यधुनी । प्रतिषेधाधिकारे वातस्येति ग्रहणमनर्थकं दशाच्चरत्वात् पादस्य । नानर्थकं व्यूहेनद्वादशाच्चरं लिङ्गंभवति । नास्यव्यूह इष्यते । कस्मात् । सर्वानुक्रमण्यामनुष्टुभस्ताः स्वराज इत्युक्तत्वात् । व्यूहेनसता विराजो ह्रस्वः । तस्मादुभयोरपि दशाच्चर एवाद्यपादोभवतिअतएव वातस्येति ग्रहणमनर्थकंभवतीति मर्त्तस्येति तस्यस्थाने पठंति यज्ञेमर्त्तस्यरिपोः । अवघानि । संतोवघानि पुनानाः । जिघांससि । यत्स्तोतारं जिघांससि सखायं । सासह्याम । इन्द्रत्वोताःसासह्याम पृतन्यतः । वव्वत्याम । आतेमनो वव्वत्याम मघाय । दीदिह्यष्टमं । शोचाशोचिष्ठ दीदिहिविशेमयः । अष्टममिति कस्मात् । अहाविश्वा सुमना दीदिहि । ऊणु हि । पुनानइन्द्र ऊणु हिविवाजान् ।

पुरुप्रजातस्या नभिनः कृणुहि

द्व्यक्षरोपधम् । हर्यश्वोतभवंत्विं-द्र सदनायास्ति नामचित् ॥४२॥

इत्येतानिच एकादशिद्वादशिनो रष्टाक्षरंचनप्लवते । पुरुप्रजातस्य । विदत्पुरुप्रजा तस्यगुहायत् । अभिनः । प-तिरिवजाया मभिनोन्येतु । नइतिकस्मात्तंदुरोपमभीनरः । तंनोअग्नेअभीनरः । कृणुहिद्व्यक्षरोपधं । वर्षीयोवयः कृणु हि शचीभिः । द्व्यक्षरोपध मितिकस्मात् । नहित्वष्णयानि कृणुहीपराचः । हर्यश्व । सनःप्रजायै हर्यश्वमृलय । उत । अदिते मित्रवरुणोतमृलय । भवंतु । स्वस्तयआदित्यासो भवंतुनः । इन्द्र । यथाचितेछंद इन्द्रजुजोषसि । सदना-य । सूर्यामासासदनाय सधन्या । अस्ति । रायस्पूर्धिस्व-धावोस्तिहिते । नामचित् । वृषासमत्सु दासस्यनाम-चित् । चिदितिकस्मात् । दिवेदिवे अधिनामादधाना ।

चमसांइवाग्नि वसवानद्वादशि-नः स्तजास्यविमदस्य । सुमखा-यधारय ददातुरक्षधिया दधा तु दधिषेय ॥४३॥

इत्येतानिच एकादशिद्वादशिनो रष्टाक्षरेच नप्लवंते । चमसांइव । धारयाचमसांइवविवक्षसे । अग्नि । देव-स्यवातुरग्निभगस्य । वसवान । मारिषण्यो वसवानवसुः सन् । द्वादशिनःस्तज । संरायाभूयसास्तजमयोभुना द्वादशिनइति कस्मात् । स्वादोःस्वादीय स्वादुनास्तजा

सं। अस्य। संवारंनकिरस्य मघानि। विमदस्यच। त-
थचेन्द्रविमदस्य चक्षषेः। सुमखाय। कद्रुद्राय सुमखाय
हविर्दे। धारय। अस्मेरयिं निधारय विमामदे। ददा-
तु। अग्निरिषां सख्ये ददातुनः। रक्षधिया। ज्योति-
ष्मतः पथोरक्षधियाकृतान्।(१)धियेतिकस्मात्। दधातु।
स्वस्तिपूषा असुरोदधातुनः। दिधिषेय। स्तोतारमिद्दि-
धिषेय रदावसो।

अङ्गसरस्वति पंचचरंति ग्नाभि-
रिहेन्व सिरण्यसिधाव। विद्वि-
षुणोभिषतः सुवितायत्वा स-
मिधानदधीमहि देव॥ ४४॥

(२)अंग। इन्द्रासोमायुव मंगतवं। सरस्वति। अय-
मुते सरस्वति वसिष्ठः। पञ्च। विश्वेदेवा अदितिः
पंचजनाः। इत्तात्मायवलीय स्त्वान्नैतदुदाहरणं।
इदंतर्हिउदाहरणं ये यज्ञाय पंचशतास्मयु। चरं-
ति। समश्वपर्णाश्चरंति नोनरः। ग्नाभिरिह। श-
न्नस्त्वष्टाग्नाभि रिहशृणोतु। ग्नाभिरितिकस्मात्।
अधाते अग्नेकिमिहावदन्ति। इन्वसि इषा यज्ञा-
यमिन्वसि इषाहवः। रण्यसि। उक्थेवा यस्यरण्य-
सि समिंदुभिः। धाव। अव्योवारेपरिधावमधुप्रियं। वि-

---

(१) रक्षाणोअग्ने।

(२) इत्येतानिच षष्ठं अष्टमदशमं अष्टाक्षरेचएकादशद्वाद-
शेचनप्लुवंते।

द्विषुणः । वयंते वयइन्द्रविद्विषुणः । विद्वीतिकस्मात् । द्युभिर्हितो जरिमासूनो अस्तु । अभिषतः । महोविश्वाँ अभिषतः । सतइतिकस्मात् । तंदुरोषमभीनरः सुविताय । इन्द्रायाहि सुविताय महेनः । त्वासमिधान । मर्त्तासस्त्वासमिधा नहवामहे । दधीमहि । प्रतिस्तोमं दधीमहि तुराणां । देव । क्रधीनोअह्नयो देवसवितः ।

जामिषुजासुचिकेत किरासि स्मस्युपपात्यसि सोमशतस्य । आयुषिचेतति विष्टपि मास्वप्रोष्मसि मूर्धनि स ह्म वरंत ॥४५॥

जामिषु । जासु । चिकेत् । किरासि । स्मसि । उप । पाति । असि । सोम शतस्य । आयुषि । चेतति । विष्टपि । मास्व । प्र । उष्मसि । सह्म । वरंत । इत्येतानिचएकादशिद्वादशिनो रष्टकेचन प्लवंते । जामिषु । गर्भंदधासि जामिषु विवक्षसे । जासु । अनमीवोरुद्रजासुनोभव । चि केत । अयंभुवोरयीणां चिकेतयत् । किरासि । आयथामंदसानः किरासनः । स्मसि । द्युम्नेद्धो अपिष्मसि सजात्ये । उप । इमामुषु सोमसुतिमुपनः । पाति जातोब्रह्मन्नभि पातितृतीयं । असि । पुह्वयोदध्धासिवना । सोम । अनुहिचा सुतं सोममदामसि । शतस्य । अधि निधेहिशतस्यनृणां । आयुषि । पिप्रीषति स्वआयुषिदुरोणे । चेतति । सोमाजेनस्य चेतति यथाविदे । विष्टपि । समुद्रस्याधि-

विष्टपि मनीषिण्यः । मास्व । न्नोरयि सुपमास्वन्वंतं । प्र । अभिसव्येन प्रमृश । उश्मसि । तावांवास्तून्युश्मसि गमध्ये । मूर्द्धनि । निपर्वतस्य मूर्द्धनि सदंता । पक्ष । नचक्षोता परिसद्मामितायन् । वरंत । माद्भिः शरद्भिर्दु- रोवरंतवः ।

प्रदिविवरुणातमसि तिरसि घृ- तमिवदिवि ममह्निनुविशः । उ- षसि पृथिविरजसि वहसि हन- ति पितरि विविह्निनि मधु ॥४६॥

इत्येतानिच एकादशिद्वादशिनो रष्टाक्षरैच नख्नवंते । प्रदिवि । इन्द्र सोमासः प्रदिविसुतासः । वरुण । अवतेह्लो वरुणनमोभिः । तमसि । योअपाचीनेतमसिमदंतीः । तिरसि । प्रवेधस श्चित्तिरसिमनीषां । घृतमिव । मधुस्सु- तंघृतमिवसुपूतम् । दिवि । श्येनाइवेदधिदिविनिषि- द । मम । अथाकामा इमेममविवोमदे । ह्नि । यू- पादमुंचोअशमिष्टह्निषः । नुविशः । न्तगास्कंदस्य नुविशः । विशइतिकस्मात् । तूर्वन्नयामन्ने तशस्य- नूरणे । उषसि । तमिद्दोषा तमुषसि यविष्ठं । पृथिवि । तद्दतंपृथिवि इहत् । रजसि । असूर्त्तेंसूर्ते रजसिनिषत्ते । वहसि । अतंद्रो हव्यावहसि हविष्कृतः । हनति । पुरुचहन्ताहनति निदस्यून् । पितरि । का- मंक्रुणवानेपितरि युवत्यां । वि । उभेअप्रा रोदसी विषआवः । विह्नि । यजस्ववीर प्रविह्नि मनायतः ।

नि । पराजितासो अपनिलयंताम् । मधु । आन्नोवायो मधुपिब ।

सहस्राणि श्रोमतेना सनामछायामिवेषणयसि सस्तुपाहि । गोपीथ्याय पवमानोवसंतान्सख्यायवोचेमहि मानुषस्य ॥ ४७ ॥

इत्येतानिच एकादशद्वादशिनो रष्टाक्षरेच न प्लवंते । सहस्राणि । त्वंपुरुसहस्राणि शतानिच । श्रोमतेन । कीनोनुकं श्रोमतेन नशुश्रुवे । असनाम । रथंयुक्तमसनाम सुषामणि । छायामिव । उपछायामिवघृणेः । इषणयसि । कंनश्चित्रमिषणयसिचिकित्वान् । सस्तु । मस्तुमाता सस्तुपिता । पाहि।पाहिइन्द्रत्वंरथिरः पाहिनोरिषः । गोपीथ्याय । जहिषइत्था गोपीथ्यायहि । पवमानः । सोमजहिपवमानदुराध्यः । उवसंतान् । शतमुवसंतान् । वसंतानिति कस्मात् । परजतएकं । सख्याय । मरुत्वन्तं सख्याय हवामहे । वोचेमहि । वयं भ्रोवोचेमहिं समर्ये । मानुषस्य । अपद्रुहो मानुषस्य दुरोवः ।

आव्यभूमेतिपादांतौ व्यंजनेषु ॥ ४८ ॥

आव्य । भूम । इत्येतौपादांतौ व्यंजनेषुप्लवेते । आव्य । अयाधियामनवे श्रुष्टिमाव्यासाकं । भूम । संविव्यइंद्रोवृजनन्न भूमाभर्ति । तपंति शत्रूंस्व १ र्णभूमा

महासेनासः । व्यंजनाधिकारेषु पुनर्व्यंजनग्रहणं सधा-
वित्यधिकारनिवृत्यर्थं ।

श्रुधी हवं ॥ ४९ ॥

श्रुधीत्ययंपादांतो हवमित्येतस्मिनृप्लवते । श्रुधी-
हवं । इमस्मेवरुणाश्रुधीहवं । हवमितिकस्मात् । उत्त-
रेष्वप्येवं योजना ।

सद्मा होता स्मासनेमिधर्मासं-
भूषतारथः ॥ ५० ॥

इत्येतेच पादांताः यथाग्रहीतं प्लवंते । । सद्माहो-
ता । सदूतोविश्वेदभिवष्टि सद्मा होता । स्मासनेमि । क्र-
तंचिद्धि ष्मासनेमि । धर्मासं । समिध्यमानः प्रथमानु ध-
र्मासं । भूषतारथः । अभूदिदंवयुनमोषु भूषतारथः ।

इतिश्री पार्षदव्याख्याया मानं-
दपुरवास्तव्यवज्रटपुत्रोव्वटकृ-
ते प्रातिशाख्यभाष्ये
अष्टमंपटलं समाप्तम् ।

सर्वत्रपूर्वपदांताः प्लवंते वसुम-
घयोः परयोः ॥ १ ॥

इत्येतयोः परयोः सतोः । वसु । पुरूवसुर्हिमघवन् । वसुं । विश्वावसुं सोमगंधर्वमापः । अश्वामघागोमघावांहुवेम । तुविदेष्णांतुवीमघं । सर्वत्रग्रहणं पादांताधिकारनिवृत्त्यर्थं । नैतदस्ति प्रयोजनं । पूर्वपदांता इत्येव सिद्धं । नहि पूर्वपदांतस्य पादांतेसंभवोस्ति । वक्ष्यतिहि । पदाभेदेन पादानां विभागइति । तस्मान्नार्थः सर्वत्रग्रहणेन यदिक्रियेतपादांतेवर्त्तमानयोरेववसुमघयोः पूर्वपदांताः प्लवंते । इतिविज्ञायेततदा इहैवस्यात् । त्वावतः पुरूवसो । तुविदेष्णांतुवीमघमिति । इहनस्यात् । पुरूवसुर्हि मघवन् । अश्वामघागोमघेति । नैषदोषः । नैवंहिशक्यंविज्ञातुं प्रथमानिर्दिष्टत्वात् पादांतग्रहणस्य अंतःपादाधिकारनिवृत्त्यर्थं तर्हिसर्वत्रग्रहणं क्रियते । ननुचएतदपि पूर्वपदांतइत्येवसिद्धं । नहिपूर्वपदांता अंतःपादंसंभवंति । नसिध्यति । नहिपादादिस्थस्य अंतःपादकार्याणिइष्यंते । कस्मात् । यदयं दधिमादिषु यथोदयेषु त्वशब्दस्य पाठेसति । शृणुधि शृणुत यंत यच्छंतत्त्वेतिपादादिप्लुत्यर्थंश्रुतेचपठतितत् ज्ञापयति नपादादिस्थस्य अंतःपादकार्याणि भवंतीति । यद्येतत् ज्ञाप्यते । पूर्वस्मिन्नंतःपादाधिकारे महांइंद्रःपरश्चतिनकारस्यलोपोनप्राप्नोति । नैषदोषः । नात्रपदंगृहीत्वा कार्यमुच्यते किंतर्हिनकारं । नकारः पुनरंतःपादंभवति । यत्रतर्हि पदंगृहीत्वा कार्यमुच्यते । तत्रदोषोभवत्येव यथावास्तोरित्येतत् पति शब्दउत्तरइति । वास्तोष्पतेप्रतिजानीह्यस्मानिति । पादादिस्थस्य नस्यात् । अमीवहावास्तोष्पत इत्येतत्पादांतस्थस्यैवस्यात् । तथा शवसोमहः सहसइडा-

याः पात्वित्येकंपुत्रशब्दे पराणीतिइहैवस्यात् । पिपर्षि येत्सहसस्पुत्रदेवानिति । इहनस्यात् । सहसस्पुत्रो अद्भुतइति । एवंतर्हिदीर्घभाव एवैतत् । ज्ञापकं भविष्यतीति प्रकरणात् । अन्यत्रतुअंतःपादाधिकारेवर्त्तमाने पत्वसत्वयोर्वेणविशेषणत्वात् । वास्तोष्पतेप्रतिजानीह्यस्मान् । सहसस्पुत्रोअद्भुतइतिसिद्धंभविष्यति तत्ज्ञापकादिहैवस्यात् । वाजेषु प्रासहमित्यादिषु इहनस्यात् । प्रासहासम्राडित्येवमादिषु तस्मात्सर्वत्रग्रहणं क्रियते । वसुमघयोरितिकस्मात् । इन्द्रौविपत्रसारथे ।

रवेतुवि ॥ २ ॥

रवेप्रत्यये तुविइत्येवंपूर्वपदांताः प्लवंते । सद्द्रहासंतुवीरवंपतिर्दन् । कथाकविस्तुवीरवान् । रवइतिकस्मात् । तुविद्देष्णां ।

विश्वविभ्व धन्व रथर्ति शत्रु द्युम्न यज्ञेति सहतौ ॥ ३ ॥

विश्व । विभ्व । धन्व । रथ । ऋति । शत्रु । द्युम्न । यज्ञ । इत्येतेपूर्वपदांताःसहतौप्रत्यये प्लवंते । विश्व । विश्वासाहमवसे नूतनाय । विभ्व । होतर्विभ्वासहंरयिं । धन्व । धन्वासहानायते । रथ । युक्ष्वाहि त्वंरथासह । ऋति । तंवोदस्म मृतीषहं । शत्रु । शत्रूषाहःस्वग्नयः । द्युम्न । द्युम्नासाह मभियोधानउत्सं । यज्ञ । यज्ञासाहं दुवइषे ।

प्रचाप्लुते ।

प्रइत्ययंचपूर्वपदांतःप्लवते अप्लुतेसइतौ प्रत्यये । प्र-
चेति । प्रासहस्पतिस्तुविष्मान् । अप्लुतइतिकस्मा-
त् । मत्सरासोजह्षंतप्रसाहं ।

सहप्रवादा उदयास्तमांताः॥४॥

वसु । मघ । रव । सहति । हति । वर्त्त । यवस ।
तम । इत्येतेतमांताःउदयाः सहप्रवादावेदितव्याः ।
एतेषामाद्यानांचतुर्णां सहप्रवादानामुक्तान्युदाहरणानि।
अवशिष्टानामुत्तरत्रोदाहरिष्यामः ।

पर्यभ्यपापीतिवृतावृवर्णे ॥ ५ ॥

परि । अभि । अप । अपि । इत्येतेषांचपूर्वपदांताः
प्लवंते । वृतौतु ऋवर्णेप्रत्यये । परि । अपोविभ्रतं तम-
सापरीवृतं । अभि । वृतेनद्यावापृथिवीअभीवृते । अभी-
वृतंकृशनैर्विश्वरूपम् । अप । राधोविश्वायु शवसेअपावृ-
तं । अपि । अपीवृतो अधयन्मातुरूधः । ऋवर्णइतिक-
स्मात् । उतव्रजमपवर्तासिगोनां ।

अभीवर्त्तःसूयवसोरथीतमःपुरू-
तमोनंतरर्धर्चउत्तमः ॥ ६ ॥

अभीवर्तः । सूयवसं । रथीतमः । पुरूतमः । इत्येते-
षांच पूर्वपदांताःप्लवंते । उत्तमस्तु पुरूतमइत्यर्धर्चस्यादौ
अंतेचवर्त्तमानः प्लवते । अभीवर्त्तः । अभीवर्तेन हविषा ।
अभीवर्त्तो यथासमि । सूयवसं । प्रजावतीः सूयवसंरि-
शंतीः । धेनुंनत्वा सूयवसे दुदुक्षन् । रथीनां । रथीतमं

रथीनां । पवमानोरथीतमः । पुरुहूतमं । पुरुहूतमंपुरूणां । अध्वराणांपुरुहूतमम् । अनंतरधंचंइतिकस्मात् । मरुतां पुरुतममपूर्व्यं ।

कवट्ट धान्यमिथुचर्षणिस्तनपिवेति सर्वत्रयथोदयंच ॥ ७ ॥

कव । ऋट्ट । धान्य । मिथु । चर्षणि । स्तन । पिव । इत्येतेषांचपूर्वंपदांताः प्लवंतेयथोदयंच । कव । तनूशुभ्रंमघवायः कवासखः । ऋट्ट । ऋट्टपेचिद्दूरूधा । धान्य । वयंतोवीजमिव धान्याकृतः । मिथु । निष्वापया मिथूदृशा । चर्षणि । गांनचर्षणीसहम् । चर्षणीधृत मघवानसुच्यम् । स्तन । स्तनाभुजोअशिश्वीः । पिव । पिवापिवेदिन्द्रशूरसोमं । सर्वत्रग्रहणा मनंतरधंचं इत्यधिकारनिवृत्त्यर्थं ।

त्विष्युक्थेत्येता उदयेमकारे ॥८॥

त्विषि । उक्थ । इत्येतेपूर्वंपदांतौ प्लवेते मकारे उदये । त्विषि । त्विषीमंतो अध्वरस्येवदिद्युत् । उक्थ । वृहस्पति रुक्थामदानिशंसिषत् । मकारइतिकस्मात् । उक्थभृतं सामभृतं ।

पर्युर्वच्चे त्यमकारेनुनासिके ॥९॥

परि । उरु । अच्च । इत्येतेपूर्वंपदांताःप्लवंते । अनुनासिकेप्रत्यये मकारंवर्जयित्वा । परि । चक्राणासः परीणहंपृथिव्याः । उरु । उरूणसावसुतृपाउदुंवलौ ।

मच्च । अद्यानद्यो नह्युतनोतसोम्याः । समकारइतिक-स्मात् । विप्रासःपरिमाश्वशुः ।

पित्र्यमाहिनाक्रषिभंगुराश्वविश्वदेव्यभेषजतुग्र्यापस्त्य । सुम्नर्त्तारातौ त्युदयेवकारे ॥ १० ॥

पित्र्य । माहिन । अक्रषि । भंगुर । अश्व । विश्व-देव्य । भेषज । तुग्र्य । पस्त्य । सुम्न । ऋत । अराति । इ-त्येतेपूर्वपदांताः प्लवंते वकारेप्रत्यये । पित्र्य । योषिव-पित्र्यावती । माहिन । त्यनीकः पत्यते माहिनावान् । अक्रषि । बह्वन्नामक्रषी वलम् । भंगुर । अपहतरक्षसो भंगुरावतः । अश्व । अश्वावतींसोमावतीम् । विश्वदेव्य । विश्वकर्मणा विश्वदेव्यावता । भेषज । भेषजावान् । तुग्र्य । मंदंतुतुग्र्याहृधः । पस्त्य । मर्योदिवधन्वपस्त्या-वान् । सुम्न । सुम्नावरी सूनृताः । ऋत । ऋतावायस्य रोदसी । अराति । अरातीवामानस्तारीत् । वकार-इतिकस्मात् । येअश्वदाउत ।

वैभ्वादयश्च ॥ ११ ॥

वैभ्वादयश्च पूर्वपदांताःप्लवंते वकारेप्रत्यये । वैभ्वा-दीनुत्तरत्रोदाहरिष्यामः ।

पृश्नादयस्तु यकारे ॥ १२ ॥

पृश्नादयस्तु पूर्वपदांताः प्लवंते यकारेप्रत्यये । पृ-श्नादींश्चोत्तरत्रोदाहरिष्यामः ।

अरातिकविसुक्रतुश्रुधिपितुसुम्न-
रय्यृताश्वेति चैते ॥ १३ ॥

(१)अराति । अरातीयतोनिदहातिवेदः । कवि । कवीयमा-
नः कइह । सुक्रतु । वियोश्ममेरजसी सुक्रतूयया । श्रुधि ।
श्रुधीयतश्चिदयतो महित्वा । पितु । प्रवतेअग्नेजनिमा
पितूयतः । सुम्न । सुम्नायवईमहेदेवयंतः । रयि । अयमुवां-
पुरुतमो रयीयन् । ऋत । ऋतायिनी मायिनी । अश्व ।
अश्वायंतो गव्यंतः । यकारइतिकस्मात् । येअश्वदाउत ।

नत्वश्वसुम्नर्तवृषेतिपदाएकाक्ष
रा दाउदयेयकारे ॥ १४ ॥

नतुखलुप्लवंते । अश्व । सुम्न । ऋत । वृष । इत्येते-
पदा एकाक्षरादौप्रत्यये यकारे । अश्व । अश्वयुर्गव्यूरथ
युर्वसूयुः । सुम्न । तंवःशर्द्धमारुतंसुम्नयुः । ऋत । त्वंनइन्द्र
ऋतयुः । वृष । अत्योनयूथे वृषयुःकनिक्रदत् । एकाक्षरा-
दाविति कस्मात् । अश्वायंतो गव्यन्तः । सुम्नायव ईम-
हेदेवयन्तः । ऋतायिनीमायिनी । वृषायमाणो वृणीत ।
यकारइतिकस्मात् । ऋतावायस्य रोदसी ।

पृश्नाजिरजुमधुपुत्रिजनिक्रतु-
वल्गुवंधुरवृकांकुटम । वृजिना-
ध्वरीषुवृषमध्यसखिस्तभुदच्छुना-

(१) इत्येतेचपूर्वपदांताः प्लवंतेयकारेप्रत्यये ।

घयविशतुवसु ॥ १५ ॥

इतीमेपृशनादयः येपूर्वसूत्रेनिर्दिष्टाः । पृशन । ता अस्यपृशनायुवः । अजिर । स्तोममिंद्रा जिरायते । ऋजु । ऋजूयंतमनुव्रतं । मधु । शमूषुवांमधूयुवा । पुत्रि । पुत्रीयंतःसुदानवः । जनि । जनीयंतो न्वग्रवः । क्रतु । क्रतूयंति क्रतवः । वल्गु । वल्गूयति वंदतेपूर्वभाजं । वंधुर । यःसूर्यांवहति वंधुरायुः । हक । हकायुरा दिदेशति । अंकु । यमंकूयंत मानयन् । दम । अश्वेवीर उग्रसुग्रंदमायन् । हजिन । सख्यंधूतं वृजिनायंत माभुं । अध्वरि । जामयोअध्वरीयतां । इषु । क्रत्वावेधा इषूयते । हष । हषायमाणो हणीतसोम । मध्य । मध्यायुवउपशिक्षंतियज्ञैः । सखि । विश्वस्मुष्टिः सखीयते । स्तभु । स्तभूयमानं वहतोवहन्ति । दुच्छुन । किमस्मान्दुच्छुनायसे । अघ । अघायते जातवेदः । यवि । सधर्नाजक्षे सहसायवीयुत् । शत्रु । शत्रूयंतो अभि । वसु । अश्वयुर्गव्यूरथयुर्वसूयुः ।

वैभुक्रादनिपुष्टपर्वताहुतिशुभ्रहृदयामतिसहहृष्णायशक्ति । सस्मिस्वधितिक्षशनवयुनर्णाघृणिहितधितविषुसुतत्रिर्वयनीथ ॥ १६ ॥

इतीमेवैभ्वादयः । येपूर्वसूत्रेनिर्दिष्टाः । वैभु । वैभूवशोमृद्धंन्यघ्न्यायाः । क्रादुनि । अव्दयाचिन्मुद्भराक्रा-

दुनीह्रतः। पुष्ट। पुष्टावन्तो यथापशुं। पर्वत। पर्वतः पर्वताद्दृधः। आहुति। युवानमाहुतीहृधं। शुभ्र। अंतःशुभ्रावतापथा। हृदय। उतापवक्ताहृदयाविधश्चित्। अमति। नमेस्तोतामतीवा। सह। सहावां इंद्रसानसिः। हृय्य। यःपत्यते हृषभोहृष्ण्यावान्। शक्ति। शक्तीवोयद्विभरारोदसी उभे। सप्रि। सप्रीवंता सपर्यवः। स्वधिति। रुक्मोनचित्रस्वधितीवान्। क्रशन। मदच्युतक्रशनावतः। वयुन। विद्दांसादधे वयुनाविदेकइत्। रुरा। रुराविब्व्यङ्गनमिक्रमानः। हर्षिा। घृणीवा च्छेतति त्मना। हित। विपन्यामहे विपणिर्हितावान्। धित। श्रुष्टीवानंधितावानं। विषु। विषूहृदिंद्रो अमतेरुत। सुत। सुतावंतस्त्वावयं। क्षत्रिय। इयंतक्षत्रिया वती। नीथ। नीथाविदोजरितारः।

नक्तंवाकेनाश्वविन्सुम्नयंतावसुवसुप्रसहानोभिवाहृते। परिणतंनाभिहृत्य ॥ १७ ॥

इत्येतेपूर्वपदांताः पूर्वलक्षणप्राप्ता नम्रवंते। नक्तवाकेन। नक्तवाकेनसत्येन। अश्ववित्। परिणो अश्वमश्ववित्सुम्नयंता। गीर्भिर्मित्रावरुणासुम्नयंता। वसुवसु। वसुवसुवः पार्थिवासुन्वते। प्रसहानः। ससनीलेभिः प्रसहानः। प्रचाप्लुतइतिप्राप्ते। अभिवाहृते। येनेंद्रोअभिवाहृते। पर्यभ्यपापीतिहृताद्वर्णा इति हृतीतुऋवर्णप्रत्यये इति प्राप्ते। अत्रोच्यते। वकारेण व्यवधानात्प्राप्तिरेव-

नास्ति । तस्मान्नार्थः प्रतिषेधनिपातनेन । एवंसिद्धेसति यन्निपातनं करोति । तज्ज्ञापयत्याचार्यः । व्यवहितेपि निमित्तेक्वचित्कार्यं भविष्यतीति । किमेतस्यज्ञापनेन प्रयोजनं । उदात्तपूर्वं स्वरितमनुदात्तंपदेऽचरमिति । इंद्रइत्यत्र नकारदकाररेफव्यवहितस्यापि स्वरितस्यअकारस्य अनुदात्तत्वंभवतीति स्यान्मतम् वचनाद्भविष्यतीति । अस्तिवचनस्यावकाशः । प्रउगमिति । परिहृतंन । अपाहृषिपरिहृतन्नराध: । नेतिकस्मात् । अपोबिभ्रतं तमसापरीवृतं । अभिवृत्य । अभिवृत्यसपत्नान् ।

अश्ववत्पादांते ॥ १८ ॥

अश्ववदित्येतस्मिन्पूर्वपदांतः पादांते नतुप्लवते । अश्ववत् । दधानोगोमदश्ववत् । पादांतइतिकस्मात् । अश्वावद्गोमद्यवमत् ।

सर्वत्रपरेमघस्य ॥ १९ ॥

मघ इति षष्ठ्यंतपरेमति वसुमघयोरितिप्राप्ते नप्लवते । मघस्य । प्रायंस्तुषितुविमघस्यदानं । षष्ठ्यंतादन्यत्र प्लवते । शुधिचित्रामघेहवं । सर्वत्रग्रहणं पादांताधिकारनिवृत्यर्थं ।

अश्वयूपायाश्वयुजोश्वयोगा:सहवाहःसुमयंतस्त्र्यंत । सहवसुंसहवत्सत्त्र्युक्तिंसहवीरंवयुनवच्चकार ॥ २० ॥

इत्येतेषांचपूर्वपदांताः पूर्वलक्षणाप्राप्ता नप्लवंते। अश्वयूपाय। चषालंये अश्वयूपाय तक्षति। अश्वयुजः। वर्योवृधो अश्वयुजः परिज्मयः। अश्वयोगाः। उतन ईम्मतयोश्वयोगाः। सहवाहः। बृहस्पतिं सहवाहो वहंति। सुम्नयंता। गीर्भिर्मित्रावरुणा सुम्नयंता। ऋतयंत। काद्रुस्तुवंत ऋतयंत। सहवसुं। योनामरं सहवसुं। सहवत्सा। दानुः शयेसहवत्सानधेनुः। ऋतयुक्तिं। ऋतंवदंत ऋतयुक्तिमग्मन्। सहवीरं। धातारयिं सहवीरं तुरासः। वयुनवच्चकार। सूर्येण वयुनवच्चकार। चकारेति कस्मात्। ज्योतिस्तमसो वयुनावदस्मात्।

सुम्नायुर्जुह्व ऋताय न्नृतायुमुग्रादेवंदक्षिणावानृतायोः। वृषारवायसूमयंशतावन्नपीजुवापरीवृतोनपावृत्॥ २१॥

इत्येतेषांपूर्वपदांताः प्लवंते। सुम्नायुः। सुम्नायुर्जुह्वे अध्वरे। जुह्वतिकस्मात्। देवांजिगातिसुम्नयुः। ऋतायन्। सर्गोनसृष्टोअर्वतीऋतायन्। ऋतायुं। उदीमृतायुमीरयत्। एतेषां वयाणामेकाक्षरादा उदयेयकार इति प्रतिषेधेप्राप्ते निपातनं। उग्रादेवम्। उग्रादेवंहवामहे। दक्षिणा वान्। हस्तेदधे दक्षिणे दक्षिणावान्। ऋतायोः। प्रणेतारः कस्यचिदृतायोः। अस्यापिप्रतिषेधेप्राप्ते निपातनं। वृषारवाय। वृषारवायवदते। सूमयं। तुविद्युंतेसुकृतंसू-

मयंधनुः । शतावन् । वह्निष्ठयोः शतावन्नश्वयोरा । अ पीजुवा । उषासानक्ता जगतामपीजुवा । अपरीवृतः । अपरीवृतो वसतिप्रचेताः । अनपावृत् । इत्यास्त्रजाना अनपावृदर्थं ।

इंद्रावतः सोमावती मवायती दीर्घाधियो मित्रायुधो रथीतरः । अन्नावृधं विश्वापुषं वसूजुवं विश्वाभुवे यज्ञायते घृतावृधा ॥ २२ ॥

इन्द्रावतः । सोमावतीम् । अवायती । दीर्घाधियः । अमित्रायुधः । रथीतरः । अन्नावृधं । विश्वापुषम् । वसूजुवं । विश्वाभुवे । यज्ञायते । घृतावृधा । इत्येतेषांपूर्वपदांताः प्लवंते । इंद्रावतः । ऋजिषइमिंद्रावतोनभुज्युं । सोमावतीं । अश्वावतीं सोमावतीं । अवायती । कन्यारवारवायती । दीर्घाधियः । दीर्घाधियोरचमाणाअसुर्यं । अमित्रा युधः । अमित्रायुधो मरुतामिवप्रयाः । रथीतरः । नकिष्टद्रथीतरः । अन्नावृधं । अन्नावृधंप्रतिचरंत्यन्नैः । विश्वापुषं । पुत्रांउतविश्वापुषंरयिं । वसूजुवं । वसवानं वसूजुवं । विश्वाभुवे । अर्चाविश्वानराय विश्वाभुवे । यज्ञायते । यज्ञायते वापशुषोन । घृतावृधा । घृतश्रियाघृतपृचाघृतावृधा ।

सुम्नायन्निन्मित्रायुव ऋषीवोदेवावान्दिवः । एवावदस्य चे-

चासा मृताब्ने सदनासदे ॥२३॥

सुम्नायन्नित् । मित्राय‌ुवः । ऋषीवः । देवावान्दिवः । एवावदस्य । चेवासाम् । ऋताब्ने । सदनासदे । इत्येतेषां पूर्वपदांताः प्लवंते । सुम्नायन्नित् । सुम्नायन्निद्विशो अस्माकम् । इदितिकस्मात् । अर्चामि सुमृयन्नहं । मित्रायुवः । मित्रायुवो न पूर्यतिंसुशिष्टौ । ऋषीवः । शिप्रिन्नृषीवः शचीवः । देवावान्दिवः । सोमंभरद्दाद्दहाणो देवावान्दिवः । दिवइतिकस्मात् । सगृणानो अद्भिर्देववाजिति । एवावदस्य । एवावदस्य यजतस्यसभ्रेः । चेवासां । चेवासां ददथूर्वरासाम् । ऋताब्ने । ऋताब्नेबृहते शुक्रशोचिषे । सदनासदे । देवायसदनासदे ।

पदेष्वन्तरनिंग्येषुप्लुतिः पद्येषु-चोत्तरा ॥ २४ ॥

अनिंग्येषुपदेषु अंतःपद्येषु च उत्तराप्लुतिर्भविष्यति । यदित ऊर्ध्वमनुक्रमिष्यामः । उत्तरवोदाहरिष्यामः ।

वृषस्व वंथ वृध्वांसंवाता वातु र्वनोवृतुः । वृतेवृषाणा वृषाणो वृजे वंधि मृजु मृशुः । मृजेमृजीत वानेषांवमेतिसदृशादिषु ॥२५॥

दृषस्व । वंथ । दृध्वांसं । वाता । वातुः । वनः । वृ-तुः । दृते । दृषाणाः । दृषाणः । दृजे । वंधि । मृजु । मृशुः । मृजे । मृजीत । वान । इत्येतेषामुदयानां सहशादिषूदयेषु वकारमकारौ प्लवेते । दृषस्व । उद्वादृषस्वमघवन् । वंथ । यद्वावंथ पुरुष्टुत । दृध्वांसमिहग्रहणमनर्थकं । आत्रयादिषु पठितत्वात् । द्रात्रयदादृहवादृधेतिपाठात् । नार्थकं आत्रयादिषु वादृधस्येति धकारांतस्येतिग्रहणं । इहतुदृधकारांतग्रहणं । सोष्मानुपूर्व्येणासह्योच्यते सकृत्स्वेनेतिदकारभावात् । दृध्वांसं । वादृध्वांसं चिदद्रिवः । वाता । उपब्रह्म वावाताहृषणा । वातुः । वावातुः सख्युरागहि । वनः । विश्वेभि र्यद्वावनः । वृतुः । विश्वाचक्रे वनावृतुः । वृते । येनेन्द्रो अभिवावृते । दृषाणाः । महोवाजस्यसातौ वावृषाणाः । वृषाणः । उद्वावृषाणो राधसे । वृजे । प्रवावृजेसुप्रयाः । वंधि । वावंधियज्यूंरुततेषु धेहि । मृजुः । देवासस्तन्वो २ निमामृजुः । मृशुः । विप्रासःपरिमामृशुः । मृजे । निमामृजे पुरइंद्रः सुमवीः । मृजीत । विसातयेतन्वं मामृजीत । वान । यद्वावानपुरुतमंपुराषाट् । पदेष्वंतरिति पूर्वपदांताधिकारनिवृत्त्यर्थः । अंतरनिंग्येष्विति कस्मात् । संतशक्तिर्देववाताजरेत । सहशादिष्विति कस्मात् । वकारस्यमकादिषुमाभूत् ।

सहेत्यादिःपूर्वपदोपधःसन्नेका-
क्षरंचपर्णिधन्ववर्जं ॥ २६ ॥

सहेत्यादिःपूर्वपदोपधःसन् प्लवते । एकाक्षरंच पूर्व-

पदं चर्षणिधन्वइत्येतेच वर्जयित्वा । सह । विश्वासाह-मवसे नूतनाय । शत्रूषाहः स्वग्नयः । पूर्वपदोपधः स-न्निति कस्मात् । अषाल्हायसहमानायवेधसे । ए-काक्षरंचर्षणिधन्ववर्जमिति कस्मात् । एकाक्षरं । प्रा-सहासम्राट् सहुरिंसहंतं । चर्षणि । गांनचर्षणीसहसं । धन्व । धन्वासहा नायते । सहेत्यादिरिति धातुग्रहणा-त् चतुःसहस्रमित्यत्रनभवति ।

नतु पादस्याष्टिनोंतंगतस्य ॥२७॥

नतुखल्वस्याष्टाक्षरस्य पादस्यांतंगतस्य सहेत्यादिःप्ल-वते । तंवोदस्ममृतीषहं । अष्टिनइतिकस्मात् । सहस्र-वाजमभि मातिषाहं । अंतंगतस्येति कस्मात् । यन्ना-साहंदुवइषे ।

नद्वादशिनोऽनभिमातिपूर्वः ॥२८॥

नतुखलु द्वादशाक्षरस्य पादस्यांतेवर्त्तमानस्य उत्तरपदस्य सहतेरादिः अनभिमातिपूर्वः सन्प्लवते । सत्रासाहो जन-भक्षोजनंसहः । द्वादशिनइतिकस्मात् । सतोवीराउर-वोव्रातसाहाः । अंतंगतस्येति कस्मात् । सत्रासाहेनम इंद्रायवोचतम् । अनभिमातिपूर्वइतिकस्मात् । स्रुतऋ-षिमुग्रमभि मातिषाहं ।

अभिमातिनृपृतनोपधस्तुसर्वत्र-परप्लवतेयकारे ॥ २९ ॥

अभिमाति । नृ । पृतना । इत्येवमुपधस्तु सहतेरा-

दिः सर्वत्रयकारेपरे प्लवते । अभिमाति । अभिमातिषाह्य । नृ । नृषाह्ये सासह्वां अमित्रान् । अस्मभ्यंतद्रिरीहिसं नृषाह्ये । पृतना । पृतनाषाह्याय च । किमर्थंसहतेयकारे पुनरेवविधीयते । ननु पूर्वेणैवसिद्धन्नसिध्यति । कथं । शेषिचापठितेमतीत्यधिकारात् पूर्वेणासंयोगे नप्राप्नोति तस्मात्संयोगपरार्थं पुनर्विधीयते । यकारइतिकस्मात् । तमसेपृतनाषहं । सर्वत्रेतिकस्मात् । अष्टिहादशिनोः पादांतगतस्येत्यधिकारात् । नृषाह्ये सासह्वां अमित्रान् । पृतनाषाह्याय च । इत्यत्रनस्यादिति ।

आवयादीनामुदयास्त्रिवर्णाः पदैकदेशाइतितान्प्रतीयात् ॥ ३० ॥

आवयइत्येवमादीनांप्लुतानामुदयास्त्रिवर्णाएव वेदितव्याः । आकारउच्चारणार्थोद्रष्टव्यः । पदानामेकदेश इति तान्छ्राविधादी न्प्रतीयात् । तस्मात्छ्रावयइतिगृहीते आश्रावयंत इत्यत्रापि भवति तानुत्तरत्रोदाहरिष्यामः ।

आवय यावय च्यावययामय रामयमामहवावस । दावयदाहहवावधतातपसासहरारय । आदात्वरंप्लुतंतेषां ॥ ३१ ॥

आवय । यावय । च्यावय । यामय । रामय । मा-

मह । वावस । द्रावय । दाहृह । वाह्वध । तात्टष । सासह । रारय । इत्येते आवयादयः । तेषामाद्याक्षरं-प्लुतं भवति । आवय । आश्रावयतइव श्रावयावाचम् । यावय । यावयाद्दक्ष्यं १ हृक्षं । च्यावय । आच्याव-यस्वृतये । यामय । आनः सुम्नेषुयावय । रामय । निरा-मयजरितः सोमे । मामह । तन्नोमित्रोवरुणोमामहं-तां । कोन्वत्रमरुतोमामहेवः । वावस । वावसाना-विवस्वति । वावसे । सत्यामनुस्फिग्यंवावसेदृषा । द्राव-य । अध्वर्योद्रावयात्वं । द्रावयित्नवः । सूर्यस्येवरश्मयो द्रावयित्नवः । दाहृह । दाहृहाणो वज्रमिंद्रोगभस्त्योः । वाह्वध । वाह्वधानाशुभस्पती । वाह्वधीथा अह्नोभिरि-वद्यौः । तात्टष । तीर्थेनाक्काता तृषाणामोकः । य-स्तात्टषाणउभयायजन्मने । सासह । येनासमत्सु सा-सहः । सुप्रकेतेभिःसासहिः । शरय । शोचिषाराग्यो-तिमित्रमहः ।

अनन्वित्यस्यमध्यम ॥ ३२ ॥

अनन्वित्येतस्य मध्यममक्षरंप्लुतं भवति । अनन्नु । अनानुदोदृषभोजग्मिः ।

द्विवर्णःप्रत्ययोनत्यस्य ॥ ३३ ॥

तेषांश्रावयादीनां अंत्यस्यरारयइत्येतस्य द्विवर्णएव-प्रत्ययोवेदितव्यः । सोमरारंधिनोहृदि ।

प्रवादाः षड्इतः परे ॥ ३४ ॥

परेये वक्ष्यन्ते । तेप्रवादाइति षट्वेदितव्याः । तानु-

सरस्वोदाहरिष्यामः ।

दूणाशं ॥ ३५ ॥

दूणाशमित्ययं प्लवते । दूणाशं । दूणाशंसख्यंतव । दूणाशेयं दक्षिणापार्थवानां ।

उक्थशासश्च ॥ ३६ ॥

उक्थशास इत्ययंप्लवते । उक्थशासः । असुतृप उक्थशासश्चरंति । यज्ञंन्यंसामगा मुक्थशासं ।

इकारांतश्च दाधृषिः ॥ ३७ ॥

दाधृषिरित्ययंप्लवते इकारांतः सन् । दाधृषिः । ब्रह्मणायामिसवनेषु दाधृषिः । सवाहणं दाधृषिं । इकारांतइति कस्मात् । वाजेषुदधृषंकवे ।

पादांतेऽपद्यःसादनं ॥ ३८ ॥

पादांतेवर्तमानः अपद्यः सन्सादनइत्ययं प्लवते । सादनम् । धाराऋतस्यसादने । द्युत्तंमित्रस्यसादनं । पादांतइतिकस्मात् । योनिष्टइंद्रसदने अकारि । अपद्यइतिकस्मात् । रथानरोन्टषदने ।

अर्धर्चांतेतु पूरुषः ॥ ३९ ॥

पूरुषइत्ययंतु अर्धर्चांतेवर्त्तमानः प्लवते । पूरुषः । विराजोअधिपूरुषः । आत्मानंतव पूरुषः । अर्धर्चांतइति कस्मात् । सहस्रशीर्षा पुरुषः ।

दोषामस्मैराजतोऽक्रन्वनस्पती-
न्मह्रीयमानांकतितुभ्यमेभ्यः ।
उषासमित्युत्तरंसर्वदेश्यम् ॥४०॥

दोषां। अस्मै। राजतः। अक्रन्। वनस्पतीन्। मह्री-
यमानां। कति। तुभ्यं। एभ्यउत्तरमुषसमिति प्लवते।
सर्वदेश्यं सर्वत्रेत्यर्थः। दोषाम्।दोषामुषासमीमहे। अस्मै।
अस्माउषास आतिरं। राजतः। अधिश्रियाविराजतः
उषासावेहसीदतां। अक्रन्। अक्रन्नुषासो वयुनानि।
वनस्पतीन्। आपशुंगासि पृथिवींवनस्पतीनुषासा। म-
ह्रीयमानां। मह्रा न्मह्रीयमानां उषासमिन्द्र संपिणा-
क्। कति। कत्युषा सःकत्युस्विदापः। तुभ्यं। तुभ्य-
मुषासःशुचयः परावति। सर्वदेश्य ग्रहणमधर्वांताधि-
कारनिवृत्त्यर्थं। सर्वत्रेतिसिद्धेसर्वदेश्यग्रहणं नानार्थच-
स्यादपि निमित्तात्प्राप्त्यर्थं।

पादस्यचैकादशिनोयदन्ते ॥४१॥

एकादशिनोत्तरस्यपादस्यान्तेवर्त्तमानं यदुषासमिति
तत्त्वप्लवते। रेवदुक्थंतसुदिना उषासः। एकादशिनइ-
तिकस्मात्। अग्नेविवस्वदुषसः। अंतइतिकस्मात्।
अग्रे बृहन्नुषसामूर्ध्वः। इतिषट्प्रवादाःसमाप्ताः।

यवयुररमयः ससाह्निषेवव्रधंतो-
रमया गिराररभ्म। यवयसि-

तत्रृषाणामोषतिश्रवयंतोदहहं-ततेन्नृषह्ये ॥ ४२ ॥

ययवयुः । अरमयः । ससाह्यिषि । ववृधंतः । रमयागिरा । ररभ्म । ययवयसि । तत्रृषाणामोषति । श्रवयंतः । अदहृ-हंत । तेन्नृषह्ये । इत्येतानि चपूर्वलक्षणोक्तानि प्राप्तानि नप्लवन्ते । ययवयुः । त्वामिद्यवयुर्मम । अरमयः । अरमयः सरपसस्तरायकं । ससाह्यिषि । प्रससाह्यिषे पुरुहूतश-त्रून् । ववृधंतः । शुचन्तोअग्निंववृधंतइंद्रं । रमयागि-रा । नमस्यारमयागिरा । गिरेतिकस्मात् । निरामय-जरितः । ररभ्म । ररभ्माशवसस्पते । ययवयसि । सख्या-यानायवयसि । तत्रृषाणं । दृचन्नविश्वंतत्रृषाणमोष-ति । ओ षतीतिकस्मात् । तीर्थेनाक्तातात्रृषाणमोकः । श्रवयंतः । अगोह्यं यद्भवयंत एतन । अदहृहंत । यदे-दंता अदहृहंत पूर्वं । तेन्नृषह्यइतिअभिमातिन्नृपृतनो-पधस्तुतइतिप्राप्ते तेन्नृषह्ये । इंद्रदेवेभिरनुतेन्नृषह्ये । तेइतिकस्मात् । नृषाह्ये सासह्वांअमित्रान् ।

श्रवयतंवाजसातौन्नृषह्येविभ्वा-सहंदृणाशारोचनानि । नतत्र-षाणोयमयोरररभ्णेपुरुषीणांयव-यंत्विंदवश्च ॥ ४३ ॥

श्रवयतं । वाजसातौ न्नृषह्ये । विभ्वासहं दृणासा-रोचनानि । नतत्रृषाणो यमयो ररभ्णे पुरुषीणाम् । यवयं-

पिवंद्रत्रः। इत्येतानिपूर्वलक्षणप्राप्तानिनस्रवंते। श्रवयतं। मानोजनेश्रवयतं युवाना। वाजसातौ नृषह्यइत्यभिमा- तिनृष्टतनोपधस्तुइतिप्राप्ते। परिश्रववाजसातौ नृषह्ये। वाजसाताविति कस्मात्। नृषाह्येसासह्वां अमित्रान्। विश्वासह्मितिसहेर्यादिरितिप्राप्ते। विश्वासहं। होतर्वि- श्वासहंरयिं। षलितःपरेइति प्राप्ते दूणाशारोचनानि। निरुत्तमादूणाशारोचनानि। रोचनानीतिकस्मात्। दूणाशेयंदक्षिणा पार्थिवानां। नतत्पषाणः। मायोष्टणो- नतत्पषाणोअजरः। नेतिकस्मात्। यस्मात्पषाणा उभ- यायजन्मने। यमयोः। यमयोश्चिन्नसमावीर्याणि। र- राशे। वियोरराश ऋषिभि र्नवेभिः। पुरुषीणामिति अधचांते तुपूरुषइतिप्राप्ते। पुरुषीणाम्। पर्जन्यःपु- रुषीणां। यवयंत्विंद्रवः। इंद्रवइतिकस्मात्। ते- विश्वास्मद्दुरितायावयंतु।

ररक्षयवयस्तेनंससाहेयवयाव- धं। परमयाइवयंतश्रवयन्नर- तेचन॥ ४४॥

ररक्ष। यवयस्तेनं। ससाहे। यवयाद्वधं। परमया। इवयंत। अवयन्। ररते। इत्येतानि पूर्वलक्षणप्राप्तानि नास्रवंते। ररक्ष। ररक्षतांत्सुकृतो विश्ववेदाः। यव- यस्तेनम्। यवयस्तेनमृस्यं। स्तेनमिति कस्मात्। यावया- द्वेषं १ इत्रं। ससाहे। (१)ससाहेभक्रः पृतनाअभिष्टिः। यवयावधं। वरीयोयवयावधं। वधमितिकिं। यावया-

(१) बृहस्पतिनायुजेन्द्रः ससाहे उदाहरणान्तरं खपुस्तके।

ष्टक्ष्यंष्टक्कं । परमया । तंवोधियापरमया पुराजं । इव-
यन्त । ऊर्मिर्ननिम्ने द्रवयंतवक्काः । अवयन् । प्रांधंस्रोणां
अवयन् । ररते । चनिष्ठंपित्वो ररतेविभागे ।

साह्वांसोवः सचासाहंसदन्यंस-
त्यंतातान । नानामस्रूयाः शु-
स्रूया रीषंतं गातूयतीव ॥४५॥

साह्वांसः । वः सचासाहम् । सदन्यं । सत्यंतातान ।
नानाम । स्रूयाः । शुस्रूयाः । रीषंतं । गातूयतीव । इत्येता-
नित्यवंते । साह्वांसः । साह्वांसो दस्युमत्रयं । वः सचासा-
हमिति नतुपादस्याष्टिन इतिप्राप्ते । त्वयसुवः सचासा-
हं । सादन्यं । सादन्यंविदथ्यं सभेयं । सत्यंतातान ।
सत्यंतातानसूयः । सत्यमितिकस्मात् । आयस्ततान-
रोदसी । नानाम । प्रतिनानाम कद्दोपयंतं । स्रूयाः ।
स्रूयाअग्निश्चित्रभानुर्हवंमे । शुस्रूयाः । यक्तुस्रूया इमंहवं ।
रीषंतं । द्रुहेरीषंतं परिधेहिराजन् । गातूयंतीव । ये-
स्मापुरागातूयं तीवदेवाः ।

वावर्तयेषांरीषतोदकारेसांत्य-
भिनृषाहमपुरुषघ्नः । सांतिगु-
हातन्वं रीरिषीष्ठजानुपूर्व्यांभीष्ट-
तेवस्रथाय ॥ ४६ ॥

वावर्तयेषां । रीषतोदकारे । सांत्यभि । नृषाहं ।

अपूरुषघ्नः। सांतिगुहा। तन्वंरीरिषीष्ट। जानिपूर्व्यः। अभीष्टतेव। अथाय। इत्येतानि प्रवंते। वावर्त्तयेषां। वावर्त्तयेषांराया। येषामितिकस्मात्। कोअध्वरेमरुत-आववर्त्त। रीषतोऽदकारे। पाहिरीषतउतवा। अद-कारइतिकस्मात्। प्रतिस्मरिषतोदह। सांत्यभि। विश्वा-निसांत्यभ्यस्तुमन्हा। अभीतिकस्मात्। संतिकामासो-हरिवः। नृषाहमित्येकाक्षरञ्चपर्याधश्ववर्जमितिनिषे-धप्राप्तौनृषाहं। नरंनृषाहंमंहिष्ठं। अपूरुषघ्नः। अपूरु-षघ्नोअप्रतीत। सांतिगुहा। आविःसांतिगुहापरः। गुहे-तिकस्मात्। संतिकामासोहरिवः। तन्वंरीरिषीष्ट। स्व-यंरिपुस्तन्वं रीरिषीष्ट। तन्वमितिकस्मात्। स्वैःषएवै-रिरिषीष्टयुः। जानिपूर्व्यः। अग्निर्हिजानिपूर्व्यः। पूर्व्य-इतिकस्मात्। देवस्य भर्गः सहसोयतोजनि। अभीष्ट-तेव। अभीष्टतेवता महापदेन। अथाय। विमच्छ्रथाय रशनामिवागः।

साह्वंत्साह्वा जर्हृषंतप्रसाहं न-क्तोषासा सूर्यमुषासमग्निं। प-रिराय: सूनृतेजारयंती शुश्रूया-तं यूयुविः सादनाते॥ ४७॥

साह्वन्। साह्वाः जर्हृषंतप्रसाहं। नक्तोषासा। सूर्यमुषा-समग्निं। परिरायः। सूनृतेजारयंती। शुश्रूयातं। यूयुविः। सादनाते। इत्येतानिप्लवंते। साह्वन्। जयंछत्रूँरमिवा

न्पृक्षसुसाह्न् । साहाः । साहायेसंति मुष्टिहेवाजहृषंत-प्रसाहं । एकाक्षरंचर्षणीतिप्राप्ते । मत्सरासोजहृषंतप्र-साहं । जहृषंतप्रसाहमितिकस्मात् । वाजेषु प्रासहंयुजं । नक्तोषासा । नक्तोषासा सुपेशसा । सूर्य्यमुषासमग्निम् । जनयंतासूर्य्यमुषासमग्निं । सूर्य्यमितिकस्मात् । दधि-क्राव्णः प्रथममश्विनोष समग्निं । अग्निमितिकस्मात् । येभिः सूर्य्यमुषसं मंदसानः परिराय: । बृहस्पतेविपरि-रापोअहृंयति । सूनृतेजारयंती । रेवत्स्तोत्रेसूनृतेजार-यंती । सूनृतइतिकिं । जरयंतीवृजनंपद्वत् । शुश्रूयातम् । शुश्रूयातमिमं हवं । ययुविः । द्विषोयुयोतु यूयुविः । सा-दनाते । अत्रायमःसादनाते मिनोतु । तइतिकिं । देवा-यसदनासदे ।

करन्त्सुषाहा घृतवान्ति साह्वा ऋजूयेव सूयवसा वृषाय। उषा-सानक्ता पृथुजाघने चराथ्येभी-रीरिषत ग्लापयंति ॥ ४८ ॥

करन्त्सुषाहा । घृतवांति । साह्वान् । ऋजूयेव । सू-यवसात् । वृषाय । उषासानक्ता । पृथुजाघने । राथ्येभिः । रीरिषत । ग्लापयंति । एतेच स्रवंते । करन्त्सुषाहेति एकाक्षरञ्चर्षणीधन्ववर्जमिति निषेधेप्राप्ते करन्त्सुषाहा । करन्त्सुषाहाविथुरंनशवः । करन्निति कस्मात् । सुषहा-सोमतानिते । घृतवांति । अवद्योगानि घृतवांतिसीद । साह्वान् । साह्वान्विश्वाअभियुजः । ऋजूयेव । दिशंन-

इष्टा मृजुर्यैवयता। सूयवसात्। सूयवसाद्भगवतीहिभूयाः। इषाय। विपर्जन्यं शंतनवेत्रषाय। उषासानक्ता। उषासानक्ता इहतीसुपेशसा। पृथुजाघने। पृथुष्टो पृथुजाघने। चकारः समुच्चयार्थः। राथ्येभिः। अथोहस्योरथ्या २ राथ्येभिः। रीरिषत। मानोमध्यारीरिषतायुर्गंतोः। ग्लापयंति। उर्ध्वंस्तस्थौनेमवग्लापयंति।

अध्वानयद्रीरिषत्प्रावणेभी रथीयंतीो वाटमायः ससाहे। सासाह्यूयुधिरिवाश्रथायः पूरुषघ्नं रीरिषः पूरुषादः॥ ४९॥

अध्वानयत्। रीरिषत्। प्रावणेभिः। रथीयंतीव। अदमायः। ससाहे। सासाह। यूयुधिरिव। अश्रथायः। पूरुषघ्नं। रीरिषः। पूरुषादः। इत्येतानिपूर्वंते। अध्वानयत्। अध्वानयद्दुरितादं भयञ्च। रीरिषत्। माचष्टामाचरीरिषत्। प्रावणेभिः। प्रावणेभिः सजोषसः। रथीयंतीव। रथीयंतीव प्रजिहीतओषधिः। अदमायः। त्वंहत्यददमायोदस्यून्। ससाहेइतिससाहे यवयावर्धमित्यत्रेहचहिः कस्मात् निपात्यते आवयादिप्लुतेः प्रतिषेधार्थंन्तच। द्वितीयस्य प्लुतिविधानार्थमिह। ससाहे। ससाहेशत्रुः पृतनाअभिष्टिः। सासाह। सासाह्योयुधान्नभिः। यूयुधि-

रिव । गावइवग्रामंयूयुधिरिवाश्वान् । अश्वयाय: । स-तीनमन्युरश्वयायो अद्रिं । पूरुषघ्नं । आरेतेगोघ्न मुत-पूरुषघ्नं । रीरिषः । मानोगोषुमानो अश्वेषुरीरिषः । पूरुषादः । ततोवयः प्रपतान्पूरुषादः ।

अपूरुषं जाह्नषाणेन रीषत ऋता-
तायुभीरथीनां साह्निषीमहि ।
पवीतारः क्रियात्येपूरुषत्वत ऋता-
तावरीरिव हव्यानिगामय ॥५०॥

अपूरुषं । जाह्नषाणेन । रीषते । ऋतायुभिः । रथी-नां । साह्निषीमहि । पवीतारः । क्रियात्या । ईपुरुषत्व-ता । ऋतावरीरिव । हव्यानिगामय । इत्येतानिच प्ल-वंते । अपूरुषं । सिंधोः पारेअपूरुषं । जाह्नषाणेन । यो-व्यंसंजाह्नषाणेन । रीषते । मारीषतेसहसावन् । ऋता-युभिः । पवमानऋतायुभिः । रथीनां । रथीतमं र-थीनां । साह्निषीमहि । वीलुचित्साह्निषीमहि । प-वीतारः । पवीतारः पुनीतन । क्रियात्या । अह-रहर्यात्यक्तुरपांक्रियात्या । एषआकारः प्रत्युदाहर-णार्थः । यदन्यदस्तिक्रियतीतिकस्मात्तम् । अथनास्ति ततोविशेषणार्थः । क्रियतीयोषित्येतदपि आकारेअ-क्रियमाणेसांशयिकंस्यात् । ईकारादिहिपरतः प्रतीक-ग्रहणंचभवति । ईपूरुषत्वता । दीनैर्दृचैः प्रभूती पूरुष-त्वता । ईकारोपधग्रहणंकिमर्थं । नतस्यविद्म पुरुषत्व-तावयं । ऋतावरीरिव । ऋतावरीरिव संक्रोशमानाः ।

इच्यानिगामय । तत्र इच्यानिगामय । इच्यानीतिकस्मात् । अधरंगमयातमः ।

वृषायस्वप्रसवीतासससाहिषे ताटपाणा ताटपिं सादनस्पृशः । साह्यामेयांति पशुमान्ति जागृधुः पवीतारं सूर्यमुषासमीमहे॥५१॥

वृषायस्व । प्रसवीता । ससाहिषे । ताटपाणा । ताटपिं । सादनस्पृशः । साह्याम । इयान्ति । पशुमान्ति । जागृधुः । पवीतारं । सूर्यमुषासमीमहे । इत्येतानिचत्वारिंशत् । वृषायस्व । इषायस्वापूयावाहुभ्यां । प्रसवीता । उद्वेतिप्रसवीता जनानां । ससाहिषेइत्यस्याप्युभयत्रनिपातने प्रयोजनं पूर्ववद्द्रष्टव्यं । ससाहिषे । प्रससाहिषे पुरुहूत । ताटपाणा । तादेवेदंताटपाणाच । ताटपिं । पिबाइषस्व ताटपिं । सादनस्पृशः । मानोनिभाग्वसुनः सादनस्पृशः । साह्याम । साह्याम दासमार्यम् । इयांति । गतेयांतिसवनाहरिभ्यां । पशुमांति । परिसद्मेव पशुमांतिहोता । जागृधुः । निरामित्रोरिपवोन्नेषु जागृधुः । पवीतारं । अवंत्यस्य पवीतारमाशवः । सूर्यमुषासमीमहे । अनागास्त्वंसूर्यमुषासमीमहे । सूर्यमितिकिं । दधिक्रांवः प्रथममश्विनोषसं । ईमहइतिकस्मात् । येभिःसूर्यमुषसं मंदसानः ।

इति श्री पार्षदव्याख्यायामानं-

दपुरवास्तव्यवजटसुतोव्वट कृते प्रातिशाख्यभाष्ये नवमंपटलम् ।

क्रमः ॥ १ ॥

क्रमइत्यधिकारोवेदितव्यः । यदितऊर्ध्वमनुक्रमिष्यामः ।

द्वाभ्या मभिक्रम्य प्रत्यादायोत्तरं-
तयोः । उत्तरेणोपसंदध्यात्तथा-
र्द्धर्च्चंसमापयेत् ॥ २ ॥

द्वाभ्यांपदाभ्यामतिक्रम्यारभ्येत्यर्थः । तयोरर्द्धयोरभिक्रांतयो रुत्तरंपदं प्रत्यादायसंगृहीत्वाताभ्यामुत्तरेण पदेनोपसंदध्यात् । एतेनक्रमेणार्द्धर्चं समापयेत् । पर्जन्यायप्र । प्रगायत । गायतदिवः । दिवस्पुत्राय । पुत्रायमीढुषे ।

एकवर्ण मनोकारं नतेसुस्मेति-
नःपरे । पदेनचव्यवेतंय त्पदंत-
च्चव्यवायिच । इं(१)लुमान्तात्प्लु-
तादीनि स्कंभनेनेतिलुप्तवत् ।
इतोपिच्चतावत्तमः पूर्वेद्वेपदयो-

(१) प्लुतांतमितिगपुस्तकपाठः ।

ईयोः। स्वसारमस्कृतेत्युभे परं वीरासएतन। अतीत्यैता न्यवस्यंति ॥ ३ ॥

एकवर्णंपदमेकाक्षरमित्यर्थः। ओकारं वर्जयित्वा। आ-ऊं इति। इत्येतेपदेअतीत्यावस्यंति। आमंद्रम। मन्द्रमा-वरेण्यं। उद्वेति। उदुत्यं। ऊं इत्यूम्। त्यं जातवेदसम्। अ-नोकारमितिकस्मात्। अभूदो। ओते। त्योइत्यो। नते-सुस्मेतिनःपरे। नतेषत्वभूते सुस्मइत्येतेनःपरेअतीत्याव-स्यंति। मोषुणः। आसुस्माणः। नतेइतिकस्मात्। प्रसू-नआयुर्जीवसे। इंद्रसूरीन् कृणुहि स्मानोअर्द्धं। नःपरे-इतिकस्मात्। मोषुत्वावाघतश्चन। त्वंहिस्माच्यावय न्न-च्युतानि ॥ पदेनचव्यवेतं यत्पदंतच्चव्यवायिच ॥ पदेन-चव्यवेतंपदं यच्चव्यवैतितेउभेअतीत्यावस्यंति। ईयतेनराच शंसंदैव्यः ॥ ईं लुप्तान्ताम्। ईमित्येतत्पदंलुप्तांता मती-त्यावस्यंति। यमीगर्भं। लुप्तांतामितिकस्मात्। समीरे-भासः। प्लुतादीनि। प्लुतादीनिपदानिचातीत्यावस्यं-ति। योनिमारैगप। कुरुश्रवणा माहृणिराजानं ॥ स्कं-भनेनेति लुप्तवत् ॥ स्कंभनेनेत्येतत्पदंलुप्तवत् अतीत्या-वस्यन्ति। चित्स्कंभनेन स्कभीयान्। लुप्तवदिति कस्मात्। अयंमहान्महतास्कम्भनेन ॥ इतोषिंचतावर्तमः पूर्वंद्वेपद-योर्द्वयोः ॥ इतोषिंचत। आवर्तमः। इत्येतयोर्द्वेपदयोः-पूर्वं पदेअतीत्यावस्यंति। इतोषिंचत। परीतोषिंचत। आवर्तमः। उषाआवर्त्तमः॥ स्वसारमस्कृतइत्युभे ॥ स्व-सारं। अस्कृत। इत्युभे एतेपदे अतीत्यावस्यंति। निरु-

स्वसारमस्कृतोषसं । परंवीरासएतन । वीरासः । एतन । इत्येतस्यद्वेपदस्यपरम्पदमतीत्यावस्यंति । वीरासएतन । परंवीरासएतनमर्यासः । प्लुतादिप्रभृतीनिच तानिचातीत्यग्रवस्यंति । शुनश्चिच्छेपंनिदितं । नराशंसंपूषणं । किमर्थमिदमुच्यते । ननु पदेनचव्यवेतं यत्पदं तच्चव्यवायिचेत्येवसिद्धं । नसिध्यति कथं । क्रमोद्वाभ्यामभिक्रम्येतिप्राप्तावसानानिहि एकवर्णमनोकारमित्येवमादीनि अवसानादपोह्यंते । तस्मादत्र उभेव्यवायिव्यवेतपदे प्राप्तावसानेतत्रैवस्यात् । इयतेनराचशंसंदैव्यं इति अन्यत्रनस्यात् एवमर्थमिदमुच्यते । एवमेकेवर्णयंति । अपरेपुनः पदेनचव्यवेतं यत्पदमित्येवसर्वेषुसिद्धं इतिमन्यमाना अन्यथावर्णयंति प्लुतादिप्रभृतीनिचेति चकारंवाशब्दस्यार्थेवर्णयंति । प्लुतादिप्रभृतीनिवा अतीत्यावस्यंति । योनिमारैक् । चित्कंभनेन । वीरासएतन । परीतोषिञ्चत । प्लुतादिप्रभृतीति । प्रभृतिशब्दः प्रकारार्थोद्रष्टव्यः । प्लुतादिप्रकाराणीति किंकृतंभवति । वक्ष्यतिहितौ अनवसानीयेषु केषुकेषुचित् । अभिक्रमंपूर्वनिमित्तमानि नइति तदिहापिदर्शितं भवति ।

पूर्वोत्तरक्षतंरूपम्प्रत्यादानावसानयोः । नब्रूयात् ॥ ४ ॥

पूर्वक्षतंरूपं प्रत्यादानेनब्रूयात् । उत्तरक्षतंरूप मवसानेनब्रूयात् । पूर्वकृतंरूपं । यच्छक्करीषु । शक्करीषुहृता । मोषु । मोइतिमो । सुत्वा । प्रणः ।

नइन्द्रो । उत्तरकृतंरूपं । घनेत्रवज्रिन् । घनेवेतिघना-ऽइव । वज्रिञ्छ्नथिहि । अग्नेअच्छ । अच्छावद ।

सर्वमेवान्यद्यथासंहितमाचरेत् ॥ ५ ॥

पूर्वकृताद्रूपादुत्तरकृताच्च यदन्यत्तत्सर्वं यथासंहितं आचरेत् । यथासंहिता विधानेनविहितंतथैवाचरेदित्यर्थः । वाजेषुसासहिः । सासहिभव ।

अवगृह्याण्यतिक्रम्य सहेतिकरणानिच । धक्षिधुक्षिप्रवादौच विकृतादौप्लुतादिच । अन्तः पदंचयेषांस्या द्विकारोनन्यकारितः । एतानिपरिगृह्णीयात् ॥ ६ ॥

अवगृह्याणिद्विखंडानि पूर्वोत्तरपदरूपाणि पदानि-अतीत्य परिगृह्णीयात् । ऋषिभिरीड्यः । ऋषिभिरित्यृषि-ऽभिः । सहेति करणानि च । इतिकरणसहितानिच पदानि अतिक्रम्य परिगृह्णीयात् । इन्द्राग्नी अपात् । इन्द्राग्नी इतीन्द्राग्नी । धक्षि धुक्षि इत्येतौच प्रवादौचविकृतादीसंतौ अतिक्रम्यपरिगृह्णीयात् । अनु-दक्षि दक्षिदावने । धक्षीतिधक्षि । मंदिनंदुक्षन् । दुक्ष-न्दधे । धुक्षन्निति धुक्षन् । विकृतादौइतिकिं । नीचात् तंधक्षि । धक्ष्यतसं । निधुक्षन् । धुक्षन्वक्षणाभ्यः । प्लुतादिच पदमतिक्रम्य परिगृह्णीयात् । आरैक्पंथां । अरैगित्यरैक् । आयुवच्चातामश्विना । अयुक्षातामित्ययु-

चातां । अंतर्मध्येयेषांपदानां विकारःअनन्यकारितः आत्मकारितइत्यर्थः । तानिचअतिक्रम्य परिगृह्णीयात् । सुषुमायातं । सुसुमेति सुसुम । वावृधानाशुभः । ववृधानेतिववृधाना । अनन्यकारितइतिकिं । शक्रणां ।

बहुमध्यगतानिच ॥ ७ ॥

बहूनांपदानां मध्यगतानिचयानिपदानि तानिच अतिक्रम्य परिगृह्णीयात् । ईयते नराशंसंदैव्यं । नराशंसमितिनराशंसं । चेतिच । शुनश्चिच्छेपंनिदितं । शुनःशेपमितिशुनःशेपं । चिदितिचित् । नरावाशंसं पूषणं । नराशंसमितिनराशंसं । वेतिवा । मोषुणः । मोइतिमो । स्विवतिसु ।

अर्द्धर्चांत्यंच ॥ ८ ॥

अर्द्धर्चांतेवर्त्तमानंच अतीत्यपरिगृह्णीयात् । पुत्राय मीह्लुषे । मीह्लुषइतिमीह्लुषे ।

नाकारं प्रागतोऽननुनासिकं ॥ ९ ॥

अनुनासिकरहितमाकारं अर्द्धर्चांत्यात्प्राक् नपरिगृह्णीयात् । आमन्द्रम । मंद्रमावरेण्यं । आवरेण्यम् । प्रागतइतिकिं । तनुव्वा । एत्या । अननुनासिकमितिकिं । गभीरआँउग्रपुत्रे । एत्या ।

प्रत्यादायैवतं ब्रूयादुत्तरेण पुनः सह ॥ १० ॥

प्रत्यादायतमननुनासिकंआकारं पुनरुत्तरेणैव स- ह्ब्रूयात्। मंद्रमावरेण्यं। आवरेण्यं।

उपस्थितं सेतिकरणं ॥ ११ ॥

इतिकरणसहितंपदं तदुपस्थितसंज्ञंवेदितव्यं। वाहृ- इति। उपस्थितसंज्ञायाः प्रयोजनम्। व्ययवध्युपस्थितइति।

केवलंतु पदंस्थितं ॥ १२ ॥

केवलंतुपदं इतिकरणरहितं स्थितसंज्ञंवेदितव्यं। अ- ग्निं। स्थितसंज्ञायाःप्रयोजनम्। स्थितस्थितोपस्थितयो- श्चदृश्यतेपद यथावदिति।

तत् स्थितोपस्थितं नाम यतो- भेआह संहिते ॥ १३ ॥

तत्पदंनामस्थितोपस्थितं वेदितव्यं। कतरन्नुतत्। उभेस्थितोपस्थितेयवाह्वसंहितेवक्ता। विभावसोइतिवि- भाऽवसो। स्थितोपस्थितसंज्ञायाः प्रयोजनम्। स्थित- स्थितोपस्थितयोश्च दृश्यतेपदं यथावदिति।

अदृष्टवर्णे प्रथमेचोदकः स्यात्प्र- दर्शकः। एतदिष्टं ॥ १४ ॥

प्रथमेद्वेपदेपूर्वपदस्यांतेवर्णे अदृष्टे तत्प्रदर्शकः। चोद- कःस्यात् चोदकःपरिग्रहः इत्यनर्थांतरं। तन्नः। तदि- तितत्। नोमित्रः। तंनः। तमितितं। तांत्वा। नोद्या- वापृथिवी। तामितितां। एतत्प्रदर्शनमिष्टं। कस्मादिति

नपठ्यते । इष्टवचनादेवतस्यानित्यत्वंगम्यते ।

समासांस्तुपुनर्वचनइंगयेत् ॥१५॥

समासांस्त्ववगृह्याणि पदानितानिच पुनर्वचनेपरिग्रहस्यद्वितीयेवचनेइंगयेत् । अवसानकुर्वीयात् । पुरोजितीवः । पुरोजितीइतिपुरः ऽजिती ।

इतिपूर्वेषुसंधानं पूर्वैःस्वःस्यादसंहितं । तदवग्रहवद्ब्रूयात् ॥१६॥

इतिपूर्वेषुपदेषु परिग्रहेक्रियमाणेय इतिपूर्वस्तेष इतिनासंधानात् । पूर्वैराचार्यैःइष्टं अस्माकमपिस्वरितोदम्पदमसंहित स्यात् । आचार्यग्रहणं पूजार्थं । असंहितमितियथेतिकरणांतोनिघातं नप्राप्नुयात् । स्वरितप्रत्यये तदवग्रहवद्ब्रूयात् । अवग्रहवदिति यथामात्राकालान्तरंस्यात् । स्वरितस्वः ।

संधिर्नार्धर्चयो भवेत् ॥ १७ ॥

अस्मिन्क्रमविधाने अर्द्धर्चयोः संधिर्नभवेत् । केन प्राप्तावयंप्रतिषेध आरभ्यते । इष्टक्रमत्वा त्समया त्संदध्यात्सर्वशः क्रमइतिप्राप्ते ।

इष्टक्रमत्वा त्समया त्संदध्यात्सर्वशःक्रमे । पदेनचपदाभ्यांच प्रागवस्येदतीत्यच ॥ १८ ॥

दृष्टक्रमत्वाद्धेतोः समयात्संदध्यात् सर्वशःक्रमेपदे-नच । समयंप्राप्य पदेनावस्येत् । समयमतीत्यपदाभ्या मवस्येत् । प्रप्रवः । प्रप्रेतिप्रऽप्र । वस्विष्टुभमिषं मंदद्वी-रायेंदवे । योनिष्टइंद्रसदने अकारि । अकारितमान्ट-भिः पुरुहूत । दृष्टक्रमत्वादिति हेतुसामान्येसत्यपि । अग्नेवंयं प्रथमस्यामृतानामित्येवमादीनामनुदृष्टानां सर्वशःसंदध्यादिति यदेतत्तन्नोपपद्यते । कस्मात् । सम-यसंज्ञायाअभावात् ।

नकारस्योष्मवद्वृत्तं प्लुतोपाच-रितेनतिः । प्रश्लेषश्चप्रगृह्यस्य प्रकृत्यास्युःपरिग्रहे ॥ १८ ॥

नकारस्ययदूष्मातद्वृत्तं प्लुतश्च उपाचरितश्च नतिश्च प्रश्लेषश्च प्रगृह्यस्ययः ॥ एतानिसर्वाणि प्रकृत्याभवंति प-रिग्रहेक्रियमाणे । नकारस्योष्मवद्वृत्तं अस्माँअस्माँइत् । अस्मानस्मानित्यस्मान्ऽअस्मान् । अभीशूँरिवसारथिः । अभीशूनिवेत्यभीशून्ऽइव । साह्वांश्चिकित्वान् । साह्वा-निति साऽह्वान् । विभ्राजमानाँश्चमसान् । विभ्राजमा-नानिति विऽभ्राजमानान् । आवदंस्त्वम् । आवदन्नि-त्याऽवदन् । स्वतवाँः पायुः । स्वतवानितिस्वऽतवा-न् । प्लुतः मधूमधूकृणुहि । मधुमध्विति मधुऽम-धु । उपाचरितः ज्योतिष्कृदसि । ज्योतिःकृदिति-ज्योतिःऽकृत् । नतिःसुषुमायातं । सुसुमेति सुऽसुम । पित्वयाणांद्युमत् । पित्वयानमिति पित्वऽयानं । प्रगृह्यस्य-प्रश्लेषः । दम्पतीवक्रतुविदा । दंपतीइवेति दंपतीऽइव ।

प्रगृह्यस्येतिकिं । स्वघ्नीवयः । स्वघ्नीवेति स्वघ्नीइव ।

औष्ठाच्चरा गमोऽपैति ॥ २० ॥

औष्ठाच्चराणां संधीनां आगमोयउक्तः सअपैतिपरिग्रहे क्रियमाणे । पुरुश्चंद्रं यजतं । पुरुचंद्रमिति पुरुऽचंद्रं । वनर्षदो वायवः । वनसदइति वनऽसदः ।

न्यायंयांत्युत्तरेत्रयः । रिफिता-न्यूष्मणोघोषेदूभावःस्वधितीवच॥२१॥

न्यायंयांतिप्रकृतिंगच्छन्तीत्यर्थः । उत्तरे त्रयः संधयः परिग्रहेक्रियमाणे रिफितानिचऊष्मणोयान्यघोषे प्रत्यये दूभावः स्वधितीवेतिच पदं । अघोषेरिफितानि । स्वश्चंचारथिनः । स्वश्चचाइतिस्वः ऽ चचाः । धूर्षदं वनर्षदं । धूःसदमितिधूः सदं । स्वर्पतिंयत् । स्वःपतिमिति स्वःऽपतिं । दूभावः । दूणाशंसख्यं । दुर्नशमिति दुःऽनशं । जनस्यदूढ्यः । दुर्ध्य १ इतिदुःऽध्यः । दूळभोरथः । दुदंभइति दुःऽदभः । स्वधितीवरीयते । स्वधितिरिवेतिस्वधितिःऽइव । अघोषइतिकिं । स्वंर्जितंमहि । स्वर्जितमितिस्वःऽजितं । अपरे इदंसूत्रं योगविभागेन वर्णयंति । न्यायंयांत्युत्तरेत्रयः ॥ औष्ठाच्चरागमा वुत्तरेत्रयःसंधयः प्रकृतिंयांति परिग्रहेक्रियमाणे । कतरेत्रयः । जुगुक्षतइति धक्षिधुक्षि प्रवादीच नजुगुक्षतः । जुघुक्षतइतिजुघुक्षतः । अनुदक्षि । दक्षिदावने । धक्षीतिधक्षि । दुक्षन्दधे । धुक्षन्निति धुक्षन् । योगविभागाद्दृतेपरिग्रहे एतेषांप्रकृतिभावो नसिध्यति । यो-

गविभागे ह्यसति । उत्तरत्वेव द्रुतिग्रहणमनर्थकंभवति । रिफितान्यूष्मणोवोषे द्रूभावः स्वधितीवचेति यथोक्त-मेवेति ।

इति श्री पार्षदव्याख्याया मानंद-पुरवास्तव्यवज्रटपुत्रोव्वटकृते प्रातिशाख्यभाष्ये क्रमपट-लंदशमंसमाप्तम् ।

अथार्ष्यलोपेन यदाह सक्रमः समानकालं पदसंहितं द्वयोः ॥१॥

अथार्ष्याः संहितायाः अलोपेन द्वयोःपदसंहितं ते-चपदे तयोश्चसंहिता समानकालं तुल्यकालं यदाह-वक्तासक्रमोधिकृतोवेदितव्यः । अग्निमीले । ईलेपुरो-हितम् । समानकालंपदसंहितन्द्वयोरितिविधेः स्वरानु-स्वारोपहितो द्विरुच्यते संयोगादिः सक्रमइतिमा भूदिति ।

अथोबहूनामविलोपकारणा त्पप-रैरवस्यंत्यतिगम्यकानिचित् ॥२॥

अपिचेहबहूनांपदानां आर्ष्योअविलोपार्थं क्रमोभवती-तिवेदितव्यः । तत्रपरैःपदै रवस्यन्ति । अतिगम्यकानि-चित्पदानि । तानिपदान्युत्तरत्रोदाहरिष्यामः ।

**अपृक्तमेकाक्षरमद्वियोनि यत्त-
दानुनासिक्यभयादतीयते ॥३॥**

अपृक्तमव्यंजनमेकाक्षरमद्वियोन्यसंध्यक्षरं यत्तत्पद-मनुनासिक्यभयादतीयते । अष्टावाद्यानवसाने प्रगृह्या-नाचार्या आहुरनुनासिकान्स्वरानितितन्माभूदिति । मंहिष्ठमावरेण्यं । उइति । अपृक्तमितिकिं । दुहितुराः । एकाक्षरग्रहणं पदविशेषणं । अपृक्तमेकाक्षरं पदमव-सानीयमिति । इतरथाह्यक्षरं विशिष्यते । अपृक्तमद्वि-योनि यदक्षरं तदेतमनवसानीयमिति । अतकोदोषः । शमीध्वमध्रिगा उइति । अवसानंनस्यात् । शमीगाव-इतितु वृत्तौ । अद्वियोनीतिकिं । अभूदो ।

**नतंचपूर्वेण परस्यकारणं नतेः
परस्योभयहेतुसंग्रहात् ॥ ४ ॥**

नतंचपूर्वेण पदेनपरस्य च नतेर्यत्कारणं तत्पदमनव-सानीयंभवति । किंकारणं परस्यपदस्य उभयहेतुसंग्रहार्थ-म् । मोषुणाइत्यत्र स्वववृक्षरेणोति नामिनिमित्तंषत्वं मो-षुणाइत्यत्र नतेसुष्मइतिषत्वनिमित्तं णत्वं नाष्यभावेषत्वं नस्यात् । षत्वाभावेणत्वंच नस्यात् । सविलोपः अतउ-भयहेतुसंग्रहार्थं अतीयते । मोषुणः आसुष्माणः ।

**परीत इत्यक्षरमेतयोर्द्वयोः प-
रंहिपूर्वोनमतीत्यतीयते ॥ ५ ॥**

परि इतः इत्येतयोर्द्वयोः पदयोः परम्पदं अनव-
सानीयंभवति । किंकारणं । अनवसानीयात्परं सिं-
चतेतिपदं व्यवहितमपिपूर्वंपरीतिपदं नमयतीति ।
परीतोषिंचत ।

ततोपरे संध्यमवेक्ष्यकारणं त-
दर्थंजंह्विक्रममत्रकुर्वते ॥ ६ ॥

ततः तेभ्यः अपरआचार्याः अस्यामागमवस्थायां सं-
धिजंकारणमवेक्ष्य किंकारणं । इतोषिंचतेत्योत्वनि-
पातनं । तदर्थमेव षत्वार्थमेव ओत्वंमन्यमानाः ह्विक्रम-
मत्रकुर्वते । परीतः । इतोषिंचत ।

तमः परं रेफनिमित्तसंशयात्त-
थावरित्येतदपोह्यतेपदम् ॥ ७ ॥

तमःपरं आवरित्येतत्पदं तथा यथा पूर्वोक्तमवसा-
नादपोह्यते अपनीयते । किंकारणं रेफनिमित्त संश-
यात् । नहिविज्ञायते पूर्वेणपदांतेन उत्तरेणवापदादि-
ना रेफोभवतीति । अतउभयहेतुमंग्रहार्थं मपनीय-
ते । उषाआवर्त्तमः ।

अदोपितोसोचिदुपर्वसूयवो न-
धन्विधुक्षोत्यपिचातियंतिकिम॥८॥

यदि आवरित्येतत्पदं रेफनिमित्तसंशया दनवसा-
नीयं भवति । सांशयिकनिमित्तानि । अदोपितो । सो-

चित् । उषर्वसूयवः । इतीमानिपदानि यद्विधुत्तीत्ये-तोच प्रवादो किंकारणं नातियंति इमान्यपिहि तेन तुल्यानि । सत्यं । क्रमशास्त्रे अनवसानीये अन-नुगृहीतानिइमानि तस्मान्नातियंति । तत्रगृहीताना-मिच हेतुरुच्यते ।

स्वसारमित्येतदपोद्यतेपदं परः
सकारोपज(१)नोऽक्रतेतिच । नि-
रस्कृतेतिह्युपसर्गकारित स्तद-
न्वयादाचरितंतुपंचभिः ॥ ९ ॥

स्वसारमित्येतत्पदं अवसानादपोद्यते । अक्रतेतिच परंपद मपोद्यते । किंकारणं । परःसकारोह्युपजनः । सकारागमइत्यर्थः । निरस्कृतेत्युपसर्गकारितः तदन्व-यात् उपसर्गान्वयात् पंचभिरेवपदैराचरितं क्रमंविद्यात् आचार्यैः । निरुस्वसारमस्कृतोषसं ।

सहेतिचेमेतिचरक्तसंहितं गु-
णागमादेतनभाविचेतन । पदं
चचास्कंभचिदित्यतः परं प्लु-
तादिचैतानिनिमित्तसंश्रयात् ॥ १० ॥

सहेतिचेम् इतिकारणायुक्तं ईमित्येतत्पदं लुप्तम-कारमनवसानीयं भवति । किंकारणं निमित्तसं-

(१) नोस्कृतेतिचेति बहुपुस्तकपाठः ।

शयात् । नह्निविज्ञायते पूर्वेणावापदान्तेन उतरेणवापदा-
दिनामकारस्यलोपोभवती त्यतउभयहेतु संग्रहार्थमतीय-
ते । यमोगर्भं । एतिचरक्त संहितं आद्रस्येतत्पदं रक्तसंहितं
यत्तत् अनवसानीयं भवति । किं कारणमिति आकारस्य-
रागोभवतीति । अतउभयगतहेतु संग्रहार्थं । अभ्रआँअ-
पोवृणाना वितनोति । गुणागमादेतन भाविचेतन । गु-
णागमादेकारागमा देतनभूतं इतन इत्येतत्पदं अ-
नवसानीयंभवति । किंकारणमिति गुणागमोभव-
तीति अतउभयगत संशयः । वीरास एतनमर्यासः ।
पदञ्चचास्कंभचिदित्यतः परं । चास्कंभचिदित्यस्मा द्वैपदा-
त्परं स्कंभनेनेतिचपदं अनवसानीयं । किंकारणं तेन-
निमित्तेन सकारस्यलोपोभवती त्युभयगतः संशयः ।
चिस्कंभनेनस्कभीयान् । प्लुतादिच । प्लुतादिचपदं यो-
निमारैगित्येवमादि अनवसानीयंभवति । प्लुतादिप्र-
भृतीनिचेत्यत्र गतंयोनिमारैगप । अत्राकारागमः पूर्व-
वत्संशयितः ।

द्वाभिक्रमंपूर्वंनिमित्तमानिन स्त्रिषूत्तमेष्वाहुरनंतरंहितत् ॥११॥

द्वाभ्यांपदाभ्या मभिक्रम्यगच्छंति उत्तमेषु त्रिषुनिमि-
त्तसंशयेषुअनवसानीयात्पूर्वंपदंनिमित्तंमन्यंते । किंका-
रणं । अनंतरंहि तत्पूर्वंपदं गुणागमःसकारलोपश्च दी-
र्घत्वंच त्रयाणांभवतीति । वीरासएतन । चिस्कंभ-
नेन । योनिमारैक् ।

अनन्तरं त्वेव चतुर्थषष्ठयोः परं कथं तच्च नद्यभिक्रमं ॥ १२ ॥

अनन्तरन्तु पुनश्चतुर्थषष्ठयो रनवसानीययोः । उपाश्चावर्त्तमः । यमीगर्भमित्येतयोः परं पदं निमित्तंभवितुमर्हति । पूर्वनिमित्तमानिनां हेतुसामान्यात् । कथं तन्नचते पूर्वनिमित्तमानिनः ह्यभिक्रमं नकुर्वंत्येवं स्थितेपि यदि चतुर्थषष्ठयो र्ह्यभिक्रमं नकुर्वंति विषूत्तमेष्वपि नकर्त्तव्यं । अथ उत्तमेषु कुर्वन्ति चतुर्थषष्ठयोः कर्त्तव्यं उभयत्रापि हि विकारहेतुरानंतर्यमेव ।

अनानुपूर्व्ये पदसंध्यदर्शना त्पदव्यवेतं च पदव्यवायि च ॥ १३ ॥

अनानुपूर्व्ये संहिते क्रमे क्रियमाणे पदेन यद्व्यवेतं यच्च व्यवैतिते उभे अनवसानीये भवतः किंकारणं पदसंध्यदर्शनात् । शुनःशेपं चिदित्येतयोः पदयो रन्योन्येन सह संधिरदृष्टो भवति । शुनश्चिच्छेपं निदितं ।

ततोपरे हिक्रममाहुराश्रया त्कृताविलुप्तावहि वर्णसंहिता ॥ १४ ॥

ततोपरे आचार्याः अस्यामवस्थायां हिक्रममिच्छन्ति । किंकारणं आश्रयाल्लक्षणात् कृताहि अत्र अविलोपिन वर्णानां वर्णैः सहसंहिताभवतीति । शुनइत्यत्र विसर्जनीयः चितिप्रत्यये अघोषे रेफ्यरेफीचोष्माणां स्पर्श-

उत्तरइतिशकारमापन्नः। चिदित्यत्र तकारः शेपप्रत्यये तालव्येघोषउदये चकारमापन्नः। सर्वैः प्रथमैरुपधीयमानः शकारः शाकल्यपितुः छकारमितिछकारमापन्नः। शुनश्चिच्छेपमित्यत्रमकारः पदान्तेवर्तमानः नकारेप्रत्यये। विस्थानेस्पर्शउदयेमकारः सर्वेषामेवोदयस्योत्तमःस्वमिति नकारमापन्नः। शुनश्चिच्छेपन्निदितं।

पदानुपूर्व्येणसपूर्वआसत स्ततोव्यवेतंचसहव्यवायिच॥ १५॥

पदानामानुपूर्व्येण सपूर्वैविद्यमानपूर्वे अनानुपूर्व्ये संहिते अर्द्धर्चस्यपूर्वेद्वैपदशः क्रमोवक्तव्यः आसत अत्रानुपूर्वसंहितायां। हाजना। जनायातयन् यातयन्नन्तः। अंतरीयते। किमर्थमिदमुच्यते। ननुक्रमोद्वाभ्यामभिक्राम्येत्येवसिद्धं। नसिध्यति। ईयते इत्येतस्य नराइत्येतेनपदैकदेशिनसह संधिर्दृष्टः। नराशंसमित्येतेनपदेन सह संधिरदृष्टः। तदापदसंध्यदर्शनात् ईयतेइत्येतस्य पदस्य अनवसानीयता प्राप्नोति सामाभूदित्युच्यते। ततोव्यवेतञ्चपदं यच्चव्यवैति तउभे सहवक्तव्ये। केनसहवक्तव्यमित्येताभ्यांसह। ईयते नराचशंसंदैव्यम् एवमेके। अपरेपुनरन्यथा ईयतइत्येतस्य अनवसानीयता नैवप्राप्नोति। कथं पदैकदेशिनवा कृत्स्नेनवा तदसन्धिर्दृष्टोभवति। किमर्थंतर्हि इदमुच्यते। ततोव्यवेतंचसहव्यवायिचेत्येवमाद्यपूर्वविधिः सचानुक्तः पुनरुच्यते।

ततोनिराहेतरयोश्चतेपदे ततो-व्यवेतेनपरस्यसंहिता ॥ १६ ॥

ततः अस्यामवस्थायां निराहवक्तापरिग्रहेणयोजयतीत्यर्थः। तेपदेकृतसंहिते व्यवेतंचयच्चव्यवैति नराशंतमितिनराशंसं। चेतिच। इतरयोश्चकृतरयोः अविद्यमानपूर्वयोः तेपदेनिराह। शुनश्चिच्छेपंनिदितं। शुनःशेपमितिशुनः शेपम् चिद्दितिचित्। नरावाशंसंपूषणं। नाराशंसमिति नराशंसं। वेतिवा। ततः अव्यवेतेनपदेन परस्यसंहिताकर्त्तव्या। दैव्यञ्चनिदितंसहस्रात् पूषणमगो ह्यम्। असंदिग्धार्थमिदमाचार्येण विस्तरेणोक्तं।

अनंतरेचिक्रमकारणंयदि चिभि-श्चगार्ग्यःपुनरेवचतिभिः ॥ १७ ॥

अनंतरे ऽव्यवहिते चिक्रमयोः कारणेनिमित्तेय-दिभवतः। तदाप्रथमतः चिभिः पदैः क्रमंब्रूयात्। पुनः त्रयाणांमध्यमंपदं प्रत्यादाय पुनरेवच चिभिः किंकारणमेव मपिनिमित्तिनामविलोपो भवतीतिगार्ग्यो मन्यते। उदूषु। ऊषुणः।

त्रिसङ्क्रमेपञ्चभि रार्घ्यनुग्रहः ॥१८॥

अस्मिन्निमित्तनैमित्तिनां त्रयाणांनामिषत्वणत्वानां सङ्क्रमेपञ्चक्रमेण आर्ध्यांअविलोपोभवतीति मन्यन्ते एकेआचार्याः। किंकारणमुक्तंहि उदूषुणइत्यत्र नामि-

निमित्तंषत्वं षत्वनिमित्तंणत्वं । नाम्यभावेषत्वं नस्यात्। षत्वाभावेणत्वं नस्यात्। सविलोपइतिन इत्येतस्यान-वसानीयत्वं कस्मात्। नकारस्योत्तरपदेन प्रत्यादाने णोवसोइतिसह संधिरदृष्टोभवतीति । उदूषणोवसो ।

चतुःक्रमस्त्वाचरितोचशाकलैः॥१९॥

एवं पक्षान्तरगमनेष्वस्मिंस्त्रिसंगमे शाकलास्तु चतुःक्रम माचरन्ति । तुशब्दःपक्षान्तरनिवृत्त्यर्थः। उदूषुणः।

अलोपभावादपरेवहुक्रमं प्रति-स्वमार्षीतिनकुर्वतेक्वचित् ॥२०॥

अलोपभावा दार्ष्याअलोपस्या भावात् अपरेआ-चार्योवहुक्रमंक्वचिदपि नकुर्वते। यदिवहुक्रमो नक्रियते निमित्तनैमित्तिकयोगे कथमार्ष्या अलोपोभवति । पदांतस्यपदादिना सन्धौक्रियमाणे लोपागमविकाराः प्रतिस्वम्भवति । इयोर्द्वयोः पदयोरार्ष्याअलोपोभवति । प्रतिस्वमार्षीभवतीति । मोषु । सुनः ।

असर्वशस्त्रिप्रभृतिष्वनेकशः स्म-रन्तिसंख्यानियमेन शाकलं॥२१॥

प्रतिस्वमार्षीतियदुक्तं तदसर्वशः नसर्वत्रयुज्यत इत्यर्थः। कथंयत्रपदांतपदाद्यो रन्योन्यंप्रतिनिमित्तत्वं तत्रयुक्तं। तन्नः। नोमित्रः इत्यादौ । यत्रतुपदाभ्यां पूर्वपदं विकारस्यनिमित्तंभवति तत्रनयुक्तं त्रिप्रभृतिषुप-देषु। मोषुणइत्यत्रनामि निमित्तंषत्वं स्यात् । यथा-

पदं संधिमपेतहेतुषु इतिवक्ष्यमाणत्वात् सविलोपइ-त्युक्तं। तस्मादनेकशः बहवःस्मरंति। इत्युक्त्वाचार्याः। संख्यानियमेन त्रिःक्रमचतुः क्रमपञ्चक्रमा इति। एतेन संख्यानियमेन शाकलविधानं। मोषुणः। उदूषुणः। निरुस्रसार मस्कृतोषसं।

अयावनेपूर्वविधानमाचरेत् ॥ २२ ॥

अयावने अमिश्रणे। किमुक्तंभवति। यथाक्रम-मप्राप्ताभ्यां पदाभ्यां पूर्वपदंनिमित्तंभवति तत्रेत्युक्तंभ-वति। पूर्वविधानमाचरेदितिद्वाभ्यांक्रममाचरेदित्य-र्थः। अग्निमीळे। ईळेपुरोहितं यत्रयत्र यावनं तत्र-तत्र बहुक्रममाचरेत्। मोषुणइति।

यथापदं संधिमपेतहेतुषु ॥ २३ ॥

यथापदंसंधिंकुर्यात्। अपेतहेतुषु। प्रणः। न इन्द्रो। प्रशब्दोणत्वहेतु स्तस्यापाये उत्तरेणसहप्रत्यादाने क्रिय-माणेनत्व विलोपसंशयनिवृत्त्यर्थं ग्रहणं नइंद्रो।

अथोपदाभ्यां समयंपदेनच क्र-मेष्ववस्येदतिगम्यसंदधत् ॥२४॥

अथोपदाभ्यां समयमतिक्रम्यावस्येत्। संदधत्तथास-मयंपदेन। किंपुनः कारणं। समयातिक्रमणे दृष्टक्रम-त्वादित्युक्तं क्रमशास्त्रेएव। किमर्थंपुनर्द्वाभ्यामतिक्र-म्यावसानं। अदृष्टक्रमत्वादितिवक्तव्यं। एकेनकस्मा-

त्संदधद्वक्ष्यति । संध्यर्थमितिवक्तव्यं । त्वांह । इत्यदिन्द्राग्निसातौ स्वर्मीळ्हे । क्रमेष्वितिगृहणा त्वाद्व्यवस्थायां समयोत्तरपदद्वयांते वसानंनस्यात् । त्वांहत्यदिन्द्राग्निसातावित्यादिषु । यच्चिद्धिसत्यसोमपा इत्यादिषु समयोत्तरेपदद्वयांते वसानंस्यादेव । पादलक्षणवशात् ।

सहेतिकाराणि समासमंतभाग्बहुक्रमेमध्यगतानि यानिच । तृतीयतांगच्छतियस्यसोष्मवाननन्ययोगंविकृतंप्लुतादिषु । अतीत्यतेषांपदतांप्रदर्शयेत् ॥२५॥

सहेतिकाराणि इति करणयुक्तानि । समासं अवग्रह्याणि । अंतभाक् अर्धर्चान्तंयत्पदं भजते । बहुक्रमेमध्यगतानि यानिचत्रिक्रमप्रभृतिषु बहुक्रमेषुयानिमध्यगतानि पदानि यानिच। तृतीयतांगच्छतियस्य सोष्मवान्। जुगुक्षतोदुदुक्षन्नित्येवमादितेषु सोष्माधकारश्चतुर्थः। सच वर्गतृतीयतांदकारमापद्यते। तत् । अनन्ययोगंविकृतं अनन्यकृतो यस्यविकारआत्मकारित इत्यर्थः । प्लुतादीनिचपदानियानिमारैमित्येवमादीनि । तेषांपदानांउत्तरेण सह प्रत्यादानंकृत्वा यापदेप्रकृतिर्दृष्टातं दर्शयेत् । केनपरिगृहेण क्रिंकारणं । स्वइतिस्वः । स्वितिसु । सुइत्यत्र युग्मान्तस्थादंतमूलीयपूर्वैरिति परिगृ-

इत्यहितीयेषत्वप्रसंगः समाभूदिति । समासइति । दुर्हणोइतिदुः ऽहनो । इत्यत्र ऋकाररेफषकारानकारमिति परिगृह्यस्यपूर्ववचने णत्वप्रसंगः समाभूदिति । अंतभाक् । महाम्हिषः । सइतिसः । इत्यत्रयुग्मान्तस्थेति पूर्ववत् । बहुक्रमेमध्यगतानियानि । मोषुणः इत्यत्रपूर्ववत् तृतीयतांगच्छति यस्य सोष्मवान् । जुघुक्षतइति जुघुक्षतइत्यत्र परिगृह्यस्यसंहितावत्पूर्ववचनं पदवदुत्तरमिति परिगृह्यस्यपूर्ववचने तृतीयत्वप्रसंगः समाभूदिति । अनन्ययोगंविकृतं । सुसुमेतिसुसुम । इत्यत्रपरिगृह्यस्य संहितावत्पूर्ववचनेषत्वप्रसङ्गः समाभूदिति । प्लुतादि । योनिमारैगित्येवमादिषु । अरैगित्यरैगित्यत्रपूर्ववचनेदीर्घत्वप्रसंगः समाभूदिति । अस्यैवापरायोजना । अतोत्यतेषांपदतां प्रदर्शयेदिति । सहेतिकाराणीत्येवमादीन्यतिक्रम्य परिग्रहेण तेषांपदानांपदतां प्रदर्शयेत् । किंकारणं । नहिपरिग्रहादृते तेषांपदताहृश्यते । सहेतिकारेषु तावदुस्थितांतत्प्रदर्शनार्थंच । इन्द्राग्नीतपंति । इंद्राग्नीइतीन्द्राग्नी । प्रगृह्यप्रदर्शनार्थंच । प्रातःसोमं । प्रातरितिप्रातः । रेफप्रदर्शनार्थंच । समासेष्ववग्रहप्रदर्शनार्थं च । पुरोहितं यज्ञस्य । पुरोहितमितिपुरः ऽहितं । अंतभाग्दर्शचांतख्यापनार्थं । अर्णाचित्ररथावधीः । अवधीरित्यवधीः । पदादिप्रदर्शनार्थं च । बहुक्रमेषुमध्यगतेषु पदवद्भाग प्रदर्शनार्थं । निरुस्वसार मस्कृतोषसं । ऊँइत्यूँ । स्वसारमितिस्वसारं । अक्रतेत्यक्रत । तृतीयतांगच्छति यस्यसोष्मवानिति पृथग्ग्रहणा मनर्थकं । अनन्ययोगं विकृतमित्येवमेवसिद्धत्वात् । नानर्थ

कं। परिग्रहस्य उभयोरपि वचनयोः पदत्वप्रदर्शनार्थं। दचुषःकृष्णाजंहसः। धचुषइतिधचुषः। किमुच्यतेउभयोरपिवचनयोः पदत्वप्रदर्शनार्थं पृथग्ग्रहणमिति। अन्येष्वप्यनन्ययोगविकृतेषु उभयोरपिवचनयोः पदत्वंप्रदृश्यते। सत्यं। नकारलोपोष्मभावमानयेदित्येवमादि वचनात् यत्रयत्रवचनं नास्ति तत्रतत्रपरिग्रहस्य पूर्ववचने विकारोभवत्येव। यथारजेषितमितिरजः ऽइषितं। अनन्ययोगविकृतेषुप्रकारःपदत्वप्रदर्शनार्थमेव। सुषुमाथालं। सुसुमेतिसुसुम। प्लुतादिषु पदत्वप्रदर्शनार्थमेव। आरैक्पंथां। अरैगित्यरैक्।

कृतेतुगार्ग्यस्य पुनस्त्वाभिक्रमे॥२६॥

गार्ग्यस्याचार्यस्य पक्षे विभिन्नगार्ग्यःपुनरेवच विभिरिति पुनःस्त्यभिक्रमेकृते एवंपदतां प्रदर्शयेत्। उदूषु। ऊषुणः। ऊंइत्यूं। स्वितिसु।

अदृष्टवर्णेप्रथमेप्रदर्शनं स्मरंतितत्त्वतनिराहचोदकः॥ २७॥

प्रथमेद्वैपदे पूर्वपदस्यांत्यवर्णे अदृष्टेतस्यप्रदर्शनमाचार्याः स्मरंतिइच्छंति। तत्प्रदर्शनं निराहेतिप्रवदतिचोदकःपरिग्रहः। किंकारणम्। पदांतसंशयनिवृत्त्यर्थं। तान्त्वामित्यत्र अर्द्धर्चायेद्वैपदे नज्ञायते नकारांतंवा पदंमकारांतंवा तस्मात्परिगृह्णन्ति। तान्त्वम्। तामितितां।

पदंयदाकेवलमाह सास्थितिः॥२८॥

पदंकेवलमनितिकरणं यदाऽऽहवक्ता सास्थितिरिति-वेदितव्या । संज्ञाकरणं स्थित्यभिक्रमार्थं । तान्नः । ता-मितिताम् ।

यदेतिकारांत मुपस्थितंतदा॥२९॥

इतिकरणांतं यत्पदंआहवक्ता तत्पदमुपस्थितसंज्ञं वेदितव्यं । संज्ञाकरणं उपस्थितेनाभिक्रमार्थं । इंद्रा-ग्नीइति । तामिति ।

अथोविपर्यस्यसमस्यचाहते य-दास्थितोपस्थितमाचरंत्युत॥३०॥

अथोतेपदे स्थित्युपस्थिते विषयस्थितेविपर्यस्योपस्थितं तत्पूर्वंकृत्वास्थितंपश्चात् समस्यच यदाऽऽहवक्ता तत्प-दंस्थितोपस्थित संज्ञं वेदितव्यम् । संज्ञाकरणं स्थितोप-स्थितेनाभिक्रमार्थं । विभावसोइतिविभाऽवसो । तान्नः । तामितितां । आचरंत्युत । एवंस्थित्युपस्थितस्थितोप-स्थितानां अन्यतमेन पदप्रदर्शनमाचरंति ।

पुनर्ब्रुवं स्तचसमासमिंगयेत्॥३१॥

तत्रस्थितोपस्थिते क्रियमाणे पुनर्ब्रुवन्वक्ता समा-समवगृह्णीयात् । पुरोहितमितिपुरः ऽहितं । अतो-न्यतेषांपदता प्रदर्शयेत् इत्येवंसिद्धे इदंवचनंपरिग्रहस्य पूर्ववचने अवग्रहप्रतिषेधार्थम् ।

स्वरित्यतोन्येषुतु संधिमाचरेत्।
अवग्रहस्यैवहिकालधारणा प-
रिग्रहेस्तीत्युपधेत्यनुस्मृता ॥३२॥

तस्मिन्नेवचस्थितोपस्थिते स्वरित्येतत्पदंवर्जयित्वा न्येषुपदेषु इतिकरणात्पदेषुसत्सुइतिनातेषां यथोक्तं संधिंकुर्यात् । औवंभ्रगुवदित्यौवंभ्रगुऽवत् । इंद्राग्नीइती-न्द्राग्नी । स्वरित्यतोन्येष्वितिकस्मात् । स्वरित्येतस्यहि पदस्य अवग्रहस्यैवहिमात्राकालः । कालधारणापरिग्रहे इत्युपधास्तीतिपूर्वाशाकलैः अनुस्मृता । आचार्यग्रहणं पूजार्थं । स्व रितिस्वः । क्रमशास्त्रएवहेतुरुक्तः । इति पूर्वेषु संधानं पूर्वैरिति

अभिक्रमेतोभयतोनुसंहितं त-
तोस्यपश्चात्पदतां प्रदर्शयेत् ।
यथापदंवान्यतरेणसंदध त्त्रिपू-
त्तमेष्वेतदलोपसंभवात् ॥ ३३ ॥

अलोपसंभवदर्शनात् अथवाअभिक्रमंकुर्यादुभयतः पूर्वेणच परेणअनुसंहितं ततः पश्चादस्यपदस्य पदतां प्रदर्शयेत् । क्व चित् त्रिपूत्तमेषु निमित्तसंशयेषु निमित्तहेतोः एवमप्यलोपः संभवति । वीरासएतन। एतनमर्यासः। इतनेतीतन । चित्कंभनेन । स्कंभनेनस्कभीयान् । स्कं-

भनेनेतिस्कंभनेन। योनिमारैक् । आरैगप। अरैगित्यरैक्। यथापदंवान्यतरेण पदेन पूर्वेणापरेणच संहितंदधत् क्रमंब्रूयात्। वीरासएतन। एतनमर्यासः। इतनेतीतन। चित्स्कंभनेन। स्कंभनेनस्कभीयान्। स्कंभनेनेतिस्कंभनेन। योनिमारैक्। आरैगप। एवमप्यलोपः संभवति। द्वाविमौपक्षौ। उभयतोनुसंहितमितिच। यथापदं वान्यतरेणेतिच। पदयोः कोभिप्रायः। अज्ञायमानेविकारनिमित्ते अन्यतरयोगेविकारोभवतीति पूर्वस्याभिप्रायः। अन्यतरवचनादन्यतरनिमित्तं भवितुमर्हतीति परस्य एवमेकेवर्णयंति। अपरे पुनः निवृत्तत्वात् निमित्तसंशयाधिकारस्यविवृत्तमेष्वितिप्रकृतानामेवसहेतिकारणेत्येतेषांविवृत्तमेषु तृतीयतांगच्छतियस्यसोश्रवानित्येवमादिषुवर्णयंति। पत्मन्दक्षुषः। दक्षुषः कृष्णजंहसः। धक्षुषइतिधक्षुषः। वरुणोमामह्नतां। मामह्नतामदितिः। ममह्नतामिति ममह्नतां। योनिमारैक्। आरैगप। अरैगित्यरैक्। पक्षयोः पूर्वोत्तरयोः अतीत्यतेषां पदतांप्रदर्शयेत्। इत्येवंसिद्धत्वादिहग्रहणमनर्थकं। नानर्थकं। यथापदंवा अन्यतरेणसंदधदित्यपूर्वार्थविधिः। सउक्तोप्यर्थः पुनः कीर्त्यते। पत्मन्दक्षुषः। धक्षुषः कृष्णजंहसः। वरुणोमामहन्ताम्। मामह्नतामदितिः। योनिमारैक्। आरैगप। यदवशिष्टं तत्पूर्ववत् द्रष्टव्यम्।

अरक्तसंध्येत्यपवाद्यतेपदं पुनस्तदुक्त्वाध्यवसायपूर्ववत्॥ ३४॥

अरक्तसंधिआद्र्त्येतत्पदमपवाद्यते। कस्मात्। परिग्रहात्। कस्यहेतोः। बहुक्रमेमध्यगतानि यानिचेतिपरिग्रहोस्माभूदिति। कथंतर्हिवक्तव्यं। पुनस्तत्पदं उक्त्वा। कतरत्। आद्र्त्येतत्पूर्ववत्परेण पदेनाध्यवसानंकृत्वा क्रमेण। मंद्रमावरेण्य। अरक्तसंधीतिकस्मात्। अभ्रआँअपः।

तथायहृक्षोपनतेबहुक्रमे क्रमेतदस्यैकपदानिनिः सृजेत्॥ ३५॥

तथाकथं। यथाआकारस्यपदप्रदर्शनार्थं प्रत्यादानमुक्तं। पूर्ववदध्यवसानं। यहृक्षोपनतेबहुक्रमे तस्य बहुक्रमस्यैकैक पदं निःसृजेत्। अपनयश्चक्ता क्रमेत। कस्यहेतो यथासर्वपदांताः स्वराश्चसार्थहृष्टाः स्युरिति। आत्वेतानि। त्रत। एत। इतानि। निमित्तनैमित्तिकप्रसङ्गेन योबहुक्रमः क्रमशास्त्रेषु नाम्नातः सयहृक्षोपनतः। यथाआत्वेतानि इत्यत्रतुइति द्वाभ्यामवसानेक्रियमाणे नकारस्यद्वित्वाभावा त्तदनवसानीयं भवति। अनुनासिकभयात्तुदतीयं। दीर्घभावार्थंचतुर्थम्।

नकारस्लोपोष्मरभावमानयेदपेतरागांप्रकृतिंपरिग्रहे॥ ३६॥

नकारस्यखलुलोपभावंचऊष्मभावंच। अपेतरागांरागवर्जितां प्रकृतिमानयेत्। परिग्रहेक्रियमाणे। कस्यहेतोः। पदप्रदर्शनार्थं। दृष्टाहिलोपोष्मरभावः। हेप-

दाभिक्रमणोभवंति । तस्मात्स्वांप्रकृतिमानयेत् । लोपभावः । अस्माँअस्माँइत् । अस्मानस्मानित्यस्मान् ऽअस्मान् । ऊष्मभावः । स्वतवाँः पायुः । स्वतवानिति स्वऽतवान् । नैतदुदाहरणं युक्तं । कथं । स्वतवाँःपायुरिति पायुशब्देपि नकारस्य विसर्जनीयसंबन्धः । इदंतर्ह्युदाहरणं । नूँःपात्रमिति नॄन्पात्रम् । विभ्राजमानांस्त्वमसान् । विभ्राजमानानितिविऽभ्राजमानान् । अभीशूँरिवसारथिः । अभीशूनिवेत्य अभीशून्ऽइव । अतीत्यैषांपदतां प्रदर्शयेदित्येवं सिद्धेकिमर्थं नकारलोपादीनां संहितानां परिग्रहे पुनर्निवृत्तिरुच्यते । परिग्रहस्योभयो र्वचनयो र्विकारनिवृत्त्यर्थं । तेनहि उत्तरस्मिन्नेवस्यात् । नैषदोषः । तेनाप्युभयोर्भवतीति ज्ञापकं ब्रूमः । यदयं पुनर्ब्रुवंस्त्वसमासमिंगयेदिति पूर्वस्मिन्वचने अवग्रहप्रतिषेधार्थं कुर्वंतत् ज्ञापयति । अन्यत्रोभयोरपिवचनयोः पदतयाप्रदर्शनंभवतीति । एवंचेत् अतीत्यतेषां पदतांप्रदर्शयेत् इत्येवंसिद्धे नकारस्यलोपोष्मरभावमानयेदित्येवमादीनां नियमार्थमनुक्रमणं । अनुक्रांतानांविकरणानां परिग्रहस्यपूर्ववचनेनिवृत्ति र्न भवति । यथा । धनर्चमितिधनऽअर्चम् । ककुद्मानिति ककुत् ऽमान् । अहोभिरित्यहः ऽभिः । दशोणिमिति दशऽओणिम् ।

नतिम् ॥ ३७ ॥

नतिंच प्रकृतिमानयेत् परिग्रहेक्रियमाणे । कस्यहेतोः । पदप्रदर्शनार्थं । सुषुमायातम् । सुसुमेति

सुसुम। दुर्हणो। दुर्हनोइतिदुःऽहनो।

प्लुतोपाचरितेच ॥ ३८ ॥

प्लुतंचउपाचरितंचप्लुतोपाचरितेएते प्रकृतिमानयेत् परिग्रहेक्रियमाणे। कस्यहेतोः। समानहेतुःपूर्वेणाप्लुतः। मधूमधूकृणुहि। मधुमध्वितिमधुऽमधु। उपाचरितः। ज्योतिष्कृदसि। ज्योतिःकृदितिज्योतिःऽकृत्।

यत्रचप्रगृह्यमेकीभवतिस्वरोदयम् ॥ ३९ ॥

यत्रयस्मिन्समुदायेस्वरोदयं प्रगृह्यंपदमेकीभावंगच्छति। यथा। त्यचरांतास्तुनेवइतिप्रकृतिभावेप्रतिषिद्धेतत्रप्रकृतिमानयेत् परिग्रहेक्रियमाणे कस्यहेतोःप्रगृह्यप्रकृतिभावप्रदर्शनार्थं। दंपतीवक्रतुविदा। दंपतीइवेतिदंपतीऽइव।

प्रवादिनोदूणाशदूढ्यदूलभान्॥४०॥

प्रवादान्दूढ्यंदूणाशदूलभइत्येतांस्चप्रकृतिमानयेत् परिग्रहेक्रियमाणेकस्यहेतोःपदप्रकृतिदर्शनार्थं। दूणाशंसख्यं। दुर्नशमितिदुःऽनशं। जनस्यदूढ्यः। दुर्ध्य इतिदुःऽध्यः। दूलभोरथः। दुर्दभइतिदुःऽदभः।

परेष्वघोषेषुचरेफमूष्मणः ॥४१॥

अघोषेषुचपरेषुऊष्मणःरेफःक्रियते। तंचप्रकृतिमानये-

त् । परिग्रहेक्रियमाणे । कस्यहेतोःपदप्रकृतिदर्शनार्थं । काश्येनास्वर्चनाः । स्वश्चनाइतिस्वः । ऋनाः । धूर्षदंवनर्षदं । धूःसदमितिधूःऽसदं । पूर्पतिंसुशिष्टौ । पूःपतिमितिपूःऽपतिं ।

महाप्रदेशंस्वधितीवचानयेत् ॥४२॥

महाप्रदेशंस्वधितीवेत्येतच्च पदंप्रकृतिमानयेत्परिग्रहेक्रियमाणे । महान् अयंप्रदेशःयत्प्रतिकंठंचास्ययग्रहणांसर्वाणिहिशास्त्राणिप्रतिकंठमुपदिश्यंते । सर्वशास्त्रार्थंप्रतिकंठ मुक्तं । प्रतिकंठेचास्यविधि रुक्तोनादोइंदुःस्वधितीवेति । स्वधितिरिवेति स्वधितिःऽइव । रेफस्यलोपोदीर्घत्वंचपुराप्रतिपादितं । तस्मात्सहाप्रदेशः प्रकृतिमानयेत् ।

नुदेत्वशोद्वाचरसंध्यमागमं ॥४३॥

नुदेत्शोद्वाचरसंधिंचागमं प्रकृतिमानयेत् क्रियमाणेपरिग्रहे । कस्यहेतोःपदप्रकृतिदर्शनार्थं । सुश्चंद्रदस्म । सुचंद्रेतिसुऽचन्द्र । परिष्कृण्वन्ननिष्कृतम् । परिष्कृण्वन्नितिपरिऽष्कृण्वन् । धूर्षदंवनर्षदं धूःसदमिति धूःऽसदम । वनसदमिति वन । सदम् ।

अभिक्रमेपूर्वविधानमाचरेत्पुनर्भवंस्तूत्तरकारितंक्रमे । विकारमन्यद्यदतोनुसंहितंतदाचरेदंतगताद्ययोस्तुन ॥ ४४ ॥

क्रमविधावभिक्रमेद्वेपदस्य प्रथमेवचनेपूर्वविधानमाचरेत्। पूर्वप्रयुक्तं विकारंपठेदित्यर्थः यथाप्रणाइंदोइत्यत्रप्रणाः । पुनर्ब्रुवन् द्वितीयैकवचने उत्तरकारितमाचरेत् । नपूर्वकारितं । नइन्द्रो । विकारमन्यदितियदतः पूर्वोत्तरकृताविकारादन्यत् अत्पदंस्वयंविकृतं तदनुसंहितमाचरेत् । क्रमकालेपिउभयवचनेपियथासंहितंपठेदित्यर्थः। अंतगतस्याद्यगस्यस्वयंविकृतस्यापि उभयवचनेपिनाचरणं कुर्यात्तयो रुभयवचनस्याभावादितिभावः ।

सकृद्यथासंहितमेषुवाचरेत्पुनर्विवच्चन्पदमप्यसंदधत् । परिग्रहेसंधिषुकारणान्वयात् ॥ ४५ ॥

अथच सकृद्यथा संहितमेषुचाचरेत् । एषुक्तरेषु नकारलोपोष्मरभावमानयेदिति एवमादिषु । पुनर्द्वितीयंवचनंविवचन् वक्तापदमविंक्रियते । असंदधत् संधिमकुर्वन्परिग्रहेक्रियमाणे । कस्यहेतोः संधिषुकारणान्वयात् एषुह्निनकारलोपादिषुसंधिषु यस्मिन्स्ते नकारलोपादयोविहिता स्तत्कारणमन्वेतिपरिग्रहस्यपूर्ववचने । श्येनाँइवेतिश्वेतान्इव । विश्वश्चन्द्रा अभिवृहन् । विश्वश्चन्द्राइतिविश्वऽचन्द्राः ।

अविक्रमंद्वा ऊष्म सुचोष्मसंधिषु ॥४६॥

अविक्रममेवकुर्यात् वक्ता । द्वा ऊष्मसुऊष्मसंधिषुपरिग्रहेक्रियमाणे किमर्थमिदमुच्यते । इहनिष्षिध्वरीः ।

स्वर्षातेतिच। नतेः रेफस्यचनिवृत्तौ कृतायां पुनर्विस-र्जनीयस्यतमेवोष्माणमूष्मणीति नित्यविधिंबाधित्वा-ऊष्मणिचानत इतिविभाषाप्राप्नोति। नचव्यापत्तिरेवे-ष्यतेनविक्रमः। एवमेवार्थमिदमुच्यते। निष्षिध्वरीस्ते। निःसिध्वरीरितिनिः ऽसिध्वरीः। स्वर्षातायत्। स्वः सातेतिस्वः ऽसाता। द्युम्नस्विवितिकिं। दिवः पृथिव्यो-रित्यत्राप्युपाचरितस्य निवृत्तौकृतायां प्रथमोत्तमवर्गी-येस्पर्शेवेति व्यापत्तिरेवस्यात्। अविक्रममिति परिग्रहे-विक्रमस्य प्रतिषेधात्। स्यान्मतं अव्यापत्तिः कख-पफेषुवृत्तिरिति उक्तत्वान्नभविष्यतीति। तच्चन प-रिग्रहादन्यत्रसावकाशात्तस्य।

समानकालावसमानकारणा व-नंतरौवायदिसंनिगच्छतः। प-दस्यदोषावथहेत्वसंग्रहेनियुक्त-मार्ष्यान्यतरेणलुप्यते ॥ ४७ ॥

समानकालौएककालौ असमानकारणौ नानानिमि-त्तौ अनंतरौवा अव्यवहितौनिमिताद्यवहितौ वा यत्रसं-निगच्छतः संनिहितौभवतः। पदस्यदोषौ विकारौ-कार्यौवित्यर्थः। अथास्यामवस्थायां हेत्वसंग्रहेवक्तक्रमेण निमित्तापरिग्रहेसति। नियुक्तंनियोगतः आर्षी संहि-ताअन्यतरेणवचनेन लुप्यते। पूर्वेणापरेणवा। प्रण-इत्यत्रप्रनिमित्तंणत्वंउदात्तनिमितं अनुदात्तस्यस्वरित-

स्वंचोत्तरेणासंप्रत्यादानेक्रियमाणेलुप्यते । नइंद्रो।
व्यवहितेशक्रणां इत्यत्र रेफनिमित्तंणात्वमुदात्तनिमित्त
मनुदात्तस्यस्वरितत्वं तदुत्तरेणप्रत्यादानेक्रियमाणेच-
लुप्यते एनंपीपयत्।

मकारलोपेविकृतस्वरोपधे तृती-
यभावेप्रथमस्यचध्रुवं ॥ ४८ ॥

मकारलोपे विकृतस्वरोपधेसति प्रथमस्यतृतीयभा-
वेच । बहुक्रमेर्न्ञक्रियमाणे ध्रुवमार्षी लुप्यते । एरि-
णांति । इत्यत्रचैकादेशनिमित्तंणात्वं उदात्तत्वंच तदुत्त-
रेणप्रत्यादाने क्रियमाणे लुप्यते इरिणांति । प्रथम-
स्यतृतीयभावे । इन्द्रस्यत्रिष्टुबिहेत्यत्रपकारस्यपरनि-
मित्तं तृतीयत्वंतत्पूर्वेणानुवचनेनलुप्यतेइन्द्रस्यत्रिष्टुबिहभ
गो अन्हः।

विपर्ययोवेतरथाभ्युपेयुषां ॥ ४९ ॥

अथवा वहुक्रमाहृतेपि प्रथमस्यतृतीयभावे विपर्ययः।
कस्यविपर्ययः। लोपइति प्रकृतं अलोपस्तस्यविपर्ययः ।
इतरथाभ्युपेयुषां । कथं । तस्मादन्यमवसाने तृतीयंगा-
र्ग्यस्यप्रश्नमितिगार्ग्यमतं येभ्युपगच्छंति । तेषांइंद्रस्यत्रिष्टुप्

अथोभयेषा मनुनासिकोदये ॥५०॥

अथाप्यार्षी लुप्यतएव । अनुनासिकोदये प्रथमे-
सति उभयेषां गार्ग्यमतं येभ्युपगच्छंति येचशाकटायन-

मत मभ्युपगच्छंति । त्रिककुब्निवर्तदित्यत्रपकारस्यपरनि-
मित्तंमत्वं तत्पूर्वेणासहवचनेनलुप्यते । सप्रवर्गेत्रिककुप् ।

अथोनते नोपहिते नुनासिके ॥५१॥

अथोनते नोपहिते अनुनासिकेसति परेणासह
बहुक्रमेअक्रियमाणे आर्षी लुप्यते । मोषुणद्र-
ध्यत्रषत्वनिमित्तं णत्वं तदुत्तरेणासहप्रत्यादानेक्रियमाणे
लुप्यते । नः परापरा ।

तथाक्षरस्य क्रमएकपातिनः ॥५२॥

अक्षरस्यक्रमः द्विर्वचनंबहुक्रमे अक्रियमाणेउभयोर्व-
चनयोर्लुप्यते एकाक्षरस्यपदस्य । मुंचताबि । व्यंइः ।

नचात्रपूर्वःस्वरितेनसंहितां ल-
भेततस्मिन्नियतस्वरोदये ॥५३॥

अत्रएकपातिनः क्रमे तस्मादेकपातिनः पूर्वस्वरः
स्वरितेनसंहितां नलभते । तस्मिन्नियतस्वरोदयेसति ।
इंसिनि । न्य१त्रिणां ।

यदाचगच्छत्यनुदात्तमक्षरं व-
शंपदादेरुदयस्यतेनच ॥ ५४ ॥

यदाच अनुदात्तमक्षरं उदात्तस्यपदादे र्वशंगच्छ-
ति । स्वरितंच । उदात्तवत्येकीभावउदात्तं सं-
ध्यक्षरमिति तेनोदात्तेनैकीभावे तदाबहुक्रमेअक्रि-

थमाणो भुवमार्षीलुप्यते । आतेवइत्यत्रते इत्यनुदात्तस्य अवइत्युत्तरेणैकादेशे उदात्तत्वम् । तत्पूर्वेणासहवचने लुप्यते । आते । त्वांसोमपवमानं स्वाध्योन्वित्यत्र स्वाध्योइतिस्वरितस्योदात्तवत्येकीभाव इत्युत्तरेणैकादेशे उदात्तत्वं तत्पूर्वेणासहपठने लुप्यते । पवमानंस्वा ध्यायोनु ।

उदात्तपूर्वेनियतस्वरोदये परोविलोपोनियतोयदावरः ॥ ५५ ॥

उदात्तपूर्वएकादेशे नियतस्वरोदयेसति परस्परेणासह वचनेइत्यर्थः । आर्षीविलोपोभवतीत्यनियतो यदावरः यतउदात्तः यदापरोभवत्यनुदात्तस्यपूर्वः तदाअवरः पूर्वेणासहवचनेइत्यर्थः । आर्षोविलोपो भवति । यद्येवंपूर्वस्यायं शेषः । इहकस्मादुच्यते । उदात्तपूर्वेप्येकादेशे इकारयोश्चप्रश्लेष एवमादौ शाकलविधाने पूर्वेणापिसहवचने आर्षीविलोपोभवति । इतिख्यापनार्थंच उदात्तपूर्वे । एंद्रसानसिमित्यत्र आकारेणामहैकदेशनिमित्तमिकारस्योदात्तत्वं तस्यपरेणासह प्रत्यादानेविलोपः । इंद्रसानसिं । शाकलविधानस्योदाहरणं तथातेवंत्वित्यत्रतेइत्युदात्तस्या वंत्वित्यनुदातेनसहैकादेशनिमितं स्वरितत्वं तस्यपूर्वेणासहवचने विलोपः । अर्वंतुतेइत्यनियतो यदावरइत्येतस्य पूर्वसूत्रेनिर्दिष्टमेवोदाहरणं ।

स्वरैकदेशंस्वरितस्यचोत्तरं यदा-

निहन्यादनिमित्तमक्षरं ॥ ५६ ॥

स्वरितस्वरस्योत्तरमनुदात्तमेकदेशं तूदात्तस्वरितपरं संतंनिहन्यात्स्वरः । आप्यो २ रसमिति । तदक्षरं-यदापूर्वेणा सहअनिमित्तंब्रूयात् । आर्षीलुप्यते । सो-तारआोप्योः ।

उदात्तपूर्वोप्यनुदात्तसंगमो य-दास्वरौद्वौलभतेपिवावहून् ॥५७॥

उदात्तपूर्वः स्वरित प्रपूर्वोपि अनुदात्तानामक्षरा-णां समवायः यदाद्वौलभते अपिवहून् स्वरांस्तदाव-हुक्रमे अक्रियमाणे आर्षी लुप्यते । उतदेवाअव हितमित्यत्र देवाइत्यनुदात्तसंगमस्य पूर्वनिमित्तमाद्यस्य स्वरितत्वं तदुत्तरेणासहप्रत्यादानेक्रियमाणे लुप्यते । तथा परनिमित्तमंतस्यानुदात्तत्वं । तत्पूर्वेणासहवच-ने लुप्यते । उतदेवाः । देवाअवहितं । स्वरब-हुत्वे पुरुपुरुभुजायदित्यत्र पूर्वापायेस्वरितोलुप्यते । स्व-रितापायेप्रचयाः । पुरुभुजायत् । उत्तरापाये चा-नुदात्तः । पुरुपुरुभुजा । स्वरितपूर्वः । वदताव-दग्नाः । इत्यत्रपूर्वापाये प्रचयस्वरौ लुप्येते । वाचंवद-तेत्यत्र उत्तरापायेनुदात्तः । यथावहुक्रमेअक्रियमाणे स मानकालानसमानकारणान्नित्येवमादिभिर्विहितेषु आ-र्षीलुप्यते । तस्माद्बहुक्रमंमिच्छंत्येकेआचार्याः ।

यथाप्रक्रमेस्वरवर्णसंहिते तयो-

स्तयोरक्षरवर्णयोस्तथा । अद-
र्शनेनार्ष्यविलोपउच्यते क्रमेष्व-
नार्षंब्रुवतेपरेस्वरं ॥ ५८ ॥

यथा येनप्रकारेण प्रकृतेविहिते स्वरसंहितावर्णसंहि-
ताचतयोरक्षरवर्णयो रक्षरस्यस्वरस्य संहिता। वर्णानांच
संहिता वर्णसंहिता। तयोः स्वरवर्णसंहितयोरदर्शनेसति
उच्यते अनार्षंविलोपः। नआर्ष्यविलोपः अनार्ष्यविलोपः।
आर्षीविलोपइत्यर्थः। कोस्यविग्रहः। विलोपःविनाशः
तस्याऽभावोऽविलोपः। आर्ष्योअविलोपः आर्ष्याविलो-
पः। नआर्ष्यविलोपः अनार्ष्यविलोपः। प्रणइत्यस्मिन्व-
चने णत्वस्वरितयोर्दर्शनादपि अनार्ष्यलोपोभवतीति-
यद्यपिणत्वस्वरितौ तत्रदृष्टौ। नइंद्रो। इंद्रोमहे। इ-
त्यत्रइंद्रोइत्येतस्य प्रचयस्वरस्य अभावात् लोपएव।
नैषदोषः। क्रमेषुह्यपरे आचार्याःस्वरमनार्षंब्रुवते।

अदृष्टमार्ष्यंयदिदृश्यतेक्रमे वि-
लोपमेवं ब्रुवतेपरेतथा । सका-
रणान्यार्ष्यविलोपविक्रमः क्रमे-
णायुक्तोपिबहूनिसंदधत् ॥ ५९ ॥

यद्यप्यन्यतरस्मिन्वचने आर्षीदृश्यते पुनरदृष्टसंहि-
तायां यदिक्रमेदृश्यते एवमस्यामवस्थाया मपरे आ-
चार्याविलोपं मन्यंते। कस्मादसतः प्रादुर्भावात्। न-

इंद्रो । तथाकर्थं । यथा समानकालावसमानकारणा-विति विहितेषु सक्रमः कःआर्ष्यविलोपविक्रमः आर्षं-विलोपहेतुःक्रमेणयुक्तः तंअलोपंप्रतिकारणानिमित्तानि बहून्यपिपदानि संदधत्पठति । इमंमेगंगेयमुनेसरस्व-तिशुतुद्रिस्तोमं ।

पदंपदांतश्चयदानगच्छतिस्वरा वसानंसतुयोलयुज्यते। तदानु-रूपंलभतेनिराकृतं नचेन्निरा-शोपनिवृत्यतत्पदं ॥ ६० ॥

पदं यदास्वरं नगच्छति पदांतश्च यदावसानं नग-च्छति तदाऽनुरूपंलभते । निराकृतंविस्मृतमन्येनकेन-चिदाच्छादितमित्यर्थः । पदकाले स्वरकृतंवर्णकृतं चोभयं-रूपमिति । अस्यामवस्थाया सआर्षीविलोपेन यस्त्वव-युज्यते क्रमकःयउपनिवृत्य तत्पदेनचेद्ब्रवीति । स्वरकृ-तं । तेवदन् । तद्गतिते । अल्पपरिग्रहाद्वते उदात्तकृतंरूपं नलभते । वर्णकृतं । नूइत्था । न्वितिनु । अवकृस्वकृतं रूपंलभते ।

स्थितस्थितोपस्थितयोश्चदृश्यते पदंयथावद्वायवंदृध्युपस्थिते । क्वचित्स्थितौचैवमतोधिशाक-लाः क्रमेस्थितोपस्थितमाचरं-

त्युत ॥ ६१ ॥

यदुक्तमधस्तात् स्थितोपस्थितानां मन्यते एनंपद-प्रदर्शनमाचरंतीति तत्अव्ययवत् । अन्यूनवदित्य-र्थः । आरैक्पंथां । अरैगिति । एवमुपस्थितसति-पदांतस्य पदट्टष्टं स्वरितत्वं तत्रनदृश्यतेतस्मादव्यव-दित्युच्यते । तथामोषूणा इत्यत्रोपस्थित्युक्ते ऋस्वांतं नदृश्यते । क्वचित्स्थितावप्येवं यथोपस्थिते तथाव्य-यवदृश्यते । प्रातःसोमं । प्रातरित्यत्रपदेदृष्टोरेफःस-नदृश्यते । अतोप्यस्माद्धेतोःशाकलाःक्रमेवर्तमानेस्थि-तोपस्थितमेवाचरंति । अरैगित्यरैक् । स्वितिसु । प्रा-तरितिप्रातः ।

क्रमेतसर्वाणिपदानिनिब्रुवन्ति-तिस्मरंति ॥ ६२ ॥

क्रमेणक्रमंब्रूयात्क्रमकःसर्वाणि पदान्येकैकंपदंनिब्रु-वन् । द्विक्रमेवहुक्रमेवा इतिस्मरंति । एवमिच्छंत्येके-आचार्याः । कस्यहेतोः एवंसुखतरमाम्राः भविलो-पोभवतीति । आमंद्रं । एत्या । मंद्रमावरेण्यं । मंद्रमितिमंद्रं । आवरेण्यं । एत्या । एवंसर्वत्र ।

आचरितंतु नोत्क्रमेत् । क्रमस्य वर्त्मस्मृतिसंभवौ ब्रुवन् समा-धिमस्यान्वितराणि कीर्त्तयेत् ॥६३॥

पार्षदं यदाचरंति पूर्वशास्त्रविहितं । क्रमोद्वाभ्यामभिक्रम्येत्येवमादिषु तुनोत्क्रमेत् । नान्यथाकुर्यादित्यर्थः । क्रमस्यवत्म हृतंस्मृतिसंभवौ हेतूब्रुवन्वक्ता स्मृतिशास्त्रे दर्शनादिसंभवमुपपत्तिरित्यनर्थांतरं । अस्यक्रमस्य समाधिंसंपदमन्वितराणि । अनुगम्य अनुलक्ष्यच इतराणिकतराणि क्रमहेतौ शासनानिकीर्त्तयेत् । किमुक्तंभवति । पूर्वस्मिन्क्रमशास्त्रे यासंपदुक्ता तस्या अविरोधेन हेतूक्तानिकुर्यादित्यर्थः । अग्निमीले । ईळेपुरोहितं । हेतौपरिगृह्यमाणे अत्रापिविक्रमः प्राप्नोति अदृष्टमापर्णी यथाद्दृश्यतेक्रमइत्यपरे वर्णयन्ति । समाधिमस्यान्वितराणि कीर्त्तयेत् । अस्यक्रमस्य समाधिमाक्षितराणि क्रमहेतौशासनानि कीर्त्तयेत् । किमुक्तंभवति । पूर्वस्मिन्क्रमशास्त्रे यासंपदुक्ता तस्या अविरोधेनहेतावुक्तानि कुर्यादित्यर्थः । यथा अदृष्टवर्णप्रथमे प्रदर्शनंयथा चप्लुतादिप्रभृतीनीत्येवमादीनि ।

यथोपदिष्टंक्रमशास्त्रमादितः पुनःपृथक्त्वैर्विविधैर्नसाधुवत् ॥६४॥

यथोपदिष्टंक्रमशास्त्रं आदित स्तदेवसाधुरध्येतव्यः । पुनः पृथक्त्वैर्विविधै यदुक्तं तन्नसाधुवद्विद्यात् । किंकारणं । सर्वथाभिक्रमेक्रियमाणे स्वरवर्णपदांतरमाश्रित्य संहितायाअविलोप इत्युच्यते ।

इतिप्राभ्रव्यउवाचचक्रमं क्र-

मप्रवक्ताप्रथमंशशंसच ॥ ६५ ॥

इत्येवंबाभ्रव्यः । बभ्रुपुत्रः भगवान्पंचालः क्रमस्य-प्रवक्ताशिष्येभ्यः क्रमंप्रथमं प्रोवाच । प्रशशंसच । हि-ताय । कथंज्ञायते हितायेति । प्रथममधिगम्य क्रमकाः कृतसंक्रमाद्व मार्गमाक्रमंतःसुखमाक्रमंते । संशयदु-र्गाणिक्रमंते । भवतिचात्रश्लोकः । क्रमाभिगमभिन्ना-नि दुर्गाणिसुमहांत्यपि । विलीयंतेक्रभिन्नानि तमां-सीवनिशात्ययेइति ।

क्रमेणानार्थः पदसंहिताविदः पु-राप्रसिद्धाश्रयपूर्वसिद्धिभिः । अ-कृत्स्नसिद्धश्चनचान्यसाधकोन-चोदयापायकरो नचश्रुतः ॥ ६६ ॥

योयं विहितोविधिः क्रमोद्वाभ्यामभिक्रम्येति तेननार्थः । कस्यहेतोः पदसंहिताविदः पदानिविदुषः संहिताचोत्तरकालं क्रमविधिरारभ्यते पुरा प्रसिद्धाश्रयपूर्वसि-द्धिभिः इतीतृतीया । पुराऽप्रसिद्धः । एवंचास्य क्रमस्य पदसंहिता पूर्वमप्रसिद्धेः । आश्रयपूर्वसिद्धिः । पदसंहितं क्रमस्याश्रय स्तत्पूर्विका स्वास्यसिद्धयो भवंति । पुराचेन्न-विधीयते । नचान्यतो विधीयते । तस्मात्पदसंहिता दनन्योयं क्रमोभवति । अविशेषेहि विशेषारंभोनर्थकः । अकृत्स्नसिद्धश्च । नकृत्स्नसिद्धः क्रमोयद्यपिचास्यविशे-षाः संति संहितायाः अविलोपार्थः पदसंहिताश्रयत्वात् ।

अकृत्स्नसिद्धइत्युच्यते । नचान्यसाधकइति नायंक्रमः अन्यशास्त्राश्रयाद्विशेषान् साधयति। अकृत्स्नसिद्धस्य ह्य-न्यसाधनं नविद्यते । नचोदयापायकरइति । नचा-यंक्रमो अध्येतुरभ्युदयकरः । नचोपायकरः । नचस्तुतः । नचायंक्रमोष्टानां ब्राह्मणपथाना मन्यतमस्मिन् ब्राह्म-णपथेश्रूयते । यथाऋषिश्छंदो दैवतयुक्तः स्वाध्याययज्ञ-कर्मसु संहिताविधिः यथाचनामाख्यातोपसर्गनिपाताः पदमितिपदविधिः एभिः कारणैः क्रमेणानार्थं इत्युच्य-ते । भवतिचात्रश्लोकः । यदिविषयगतोनान्यज्जनय-तिगुणान् कृत्स्नंखलुसमभिकालंपर्षदिवंवदेदिति ।

असिध्यतःसिद्धि विपर्ययोयदि प्रसिध्यतोसिद्धिविपर्ययस्तथा॥६७॥

यदुक्तं पदसंहितापूर्वोयं क्रमोन सिध्यति तस्माद-स्यप्रसिद्धि विपर्ययइति । तन्नास्ति कस्यहेतोः । प्रसिद्ध-तः असिद्धत्वस्य विपर्यय स्तथाभविष्यति । प्रसिद्धं हि प-दसंहितामाश्रित्य यद्ययं क्रमोवर्तते ततः प्रसिद्धएव । अन्यथायं पदसंहिताक्रमोभवतीति प्रतिज्ञापूर्वोक्ता । एकदेशंहि साधयत्येकदेशी ।

सद्दापवादेषुच सत्सुनः क्रमः प्रदेशशास्त्रेषु भवत्यनर्थकः ॥६८॥

अपवादनिंदेत्यर्थः। सद्दापवादेषु प्रदेशशास्त्रेषु स-त्सु येः अर्थाः प्रदिश्यंते तानिप्रदेशशास्त्राणियथासां-

स्यथोग शास्त्राणां। तेष्वपि अन्यस्मिन्नन्यस्यापवादो दृश्यते। तेषु शास्त्रेषु सत्सु विद्यमानेष्वित्यर्थः। नायं क्रमोनर्थको भवितुमर्हति।

विपर्ययाच्छास्त्रसमाधिदर्शना त्पुराप्रसिद्धे रुभयोरनाश्रयात्। समभ्युपेयाद्बहुभिश्च साधुभिः श्रु- तेश्च सन्मानकरः क्रमोर्थवान्॥६८॥

विपर्ययादिति क्रमेणानार्थः पदसंहिताविद इत्यु- क्ताप्रसिध्यतः असिद्धिविपर्ययस्तथेत्युक्तं सविपर्ययः। असिद्धा अपिभावाः सिद्धानाश्रित्यसिद्धा भवंति। शास्त्र- समाधिदर्शनाच्चायंक्रमोर्थवान्भवति। शास्त्रसमाधि द- र्शनादितिक्रमशास्त्रेहि अनेकविधिविशेषाः संहिता- पदादिपदांतानुग्रहार्थाविधीयंते। यथैवानवसानीया- नीति निमित्तसंशयानीत्येवमादयः। पुराप्रसिद्धेश्चायं क्रमोर्थवा न्भवति। पुराप्रसिद्धेरिति कथंहिनामपुरा अप्रसिद्धः सन् अनवसानीयादीन् विशेषानारभेत्। उ- भयोरनाश्रयात्। उभेअपिपदसंहिते अवाश्रित्यक्रमो वर्तते तस्मादप्यर्थवान् क्रमः कथमनाश्रयादित्युच्यते। व्यतिरिक्तेहि पदसंहिते। विशेषारंभस्य क्रमशास्त्रेदृ- श्यते। यथैवावगृह्याणां परिग्रहणं समभ्युपेयाद्बहुभि- स्साधुभिः पूर्वाचार्यैः समभ्युपगमनाच्चायं क्रमोऽर्थ- वान् भवितुमर्हति। कथंहिनामानर्थकं संतंबहवः सा-

धवः परिगृह्णीयुः । श्रुतेश्च सन्मानकरः क्रमोर्थवान् श्रुतेश्चायं दृष्टः क्रमः । द्विपदानांगिरसः प्रोचुः । ति पदेनवालखिल्या इत्येभिः कारणै रयंक्रमोर्थवान् भवति । भवतिचात्रसिद्धोयं । श्रुतितश्चलक्षितोनुमितश्चविविधैर्गुणैर्विशेषैर्वितत्या संधिंनयातिच पदविषये पुनरपिच विकृतिसुचितां न.जहाति ।

ऋतेनचद्वैपदसंहितास्वरौ प्रसिध्यतः पारणकर्मचोत्तमं क्रमात् ॥ ७० ॥

इतश्चायंक्रमोर्थवान् भवति । क्रमादृतेद्वैपदसंहिताचद्वैपदस्वरश्च नसिध्यति । द्विपदेहिसिद्धे उत्तरारंभः शक्यतेकर्तुं । पादार्द्धर्चंऋचवसूक्तसिध्यर्थं । पारणकर्मचोत्तममिति भगवतापंचालेनस्थापितानां पारायणकर्मणां क्रमपारायणमुत्तमं परंपरयामहिम्नाच । भवति चात्रश्लोकः । प्रगाथेपुनरादानं दृष्ट्वायज्ञविधौमुनिः । अर्थवंतंक्रमंब्रूयाद्दैवतायाश्चशास्त्रतः । क्रमोर्थवान् भवति ।

अतोप्यृग्यजुषांचवंहणं पदैःस्वरैश्चाध्ययनं त्रिभिः ॥ ७१ ॥

अतोपि अस्मादपिहेतोः क्रमोर्थवान् भवति । क्रमात् ऋचांयजुषांच धारणंक्रियते द्विपदेन । यथापदाध्ययनेनचोदात्तानुदात्तस्वरितैः ऋग्यजुषांधारणंक्रियते तथाध्ययनंत्रिभि रन्योन्यं वर्त्तते । संहितापदक्रमैस्तस्माच्चा-

यं क्रमोर्थवान् भवति । भवतिचात्रश्लोकः । शरदुज्ज्वलो वितिमिरो विभाति भगवान्यथांशुमान् । सत्यवचनविज्ञत्तमः क्रमकः क्रमतेहि संशयांस्तमस्तथात्मवान् इति ।

इति श्रीपार्षदव्याख्याया मानंदपुरवास्तव्य वज्रटपुत्रोव्वटकृते प्रातिशाख्यभाष्ये क्रमहेतुकमेकादशं पटलम् ।

ऊष्मांतस्थसोष्मचकारवर्गा नांतं यांत्यन्यत्र विसर्जनीयात् ॥ १ ॥

ऊष्माणश्च अंतस्थाश्चऋकारश्च सोष्माणश्च चकारवर्गइत्येते सप्तविंशतिवर्णाः पदांतं नगच्छंति । किमविशेषेणेत्याह । विसर्जनीयं वर्जयित्वा । विसर्जनीयस्तु ऊष्मसुमध्येतिष्ठति तथापि पदांतंनगच्छंति । अग्निः । वायुः । परिशेषादन्येगच्छंति । तानुदाहरिष्यामः । एव । तथा । न्द्यभ्यः । अति । देवी । वसु । बाह्व । अग्ने । वायो । वै । तौ । वाक् । अबीङ् । विट् । वृषण्वान् । यत् । देवान् । त्रिष्टुप् । इंद्रम् ।

ऋकारल्कारौ परमर्धमूष्मणां

नादिंतकारादवरेच सप्त ॥ २ ॥

ऋकारःलृकारः ऊष्मणांचोत्तरभागोविसर्जनीयआदिरुच्यते । तकाराच्च पूर्वेभाकारादयः सप्त । एतेत्रयोदशवर्णाः पदादिंनगच्छंति । पारिशेष्यानुदाहरिष्यामः । अथ । आत् । ऋतं । इदं । ईषत् । उत । ऊचुः । एषः । ओषधीः । ऐत् । औच्छन् । कः । खनमानः । गंगे । घृतं । चित्रं । छाया । जगत् । तं । प्रत्नऽथा । देवं । धनं । नु । परि । फलिनीः । बलं । भयं । मम । या । रत्नं । लक्ष्मीः । वायुः । हरिण्या । शतं । षट् । सः ।

नान्योन्येनमध्यमाः स्पर्शवर्गाः संयुज्यंते ॥ ३ ॥

मध्यमाये त्रयस्पर्शवर्गा स्तेऽन्योन्येनसह नसंयुज्यंते । स्ववर्गीयैस्तु संयुज्यंते । अन्यैश्च । यज्ञ नीः । जज्झतीरिव । सुष्टु । दूळ्यः । मंडूकः । रथ्येव । अध्वनयत् । इन्द्रो । गधितिग्ध । बध्वः । अर्च्चंति । वज्रं । उष्ट्राणां । वर्तनीः । चार्ध्वं । ओतंति । स्तौति । मध्यमाइतिकिं । वाक्पतंगाय धीयते । अन्यैश्च संयुज्यते ।

न लकारेणरेफः ॥ ४ ॥

लकारेण सहरेफो न संयुज्यते । अर्यम्णां । अर्चंति । सर्पिः । बर्हिः । वर्षं ।

स्पर्शैर्वकारो नपरै रनुत्तमैः ॥५॥

अनुत्तमैःस्पर्शैः परैर्वकारो नसंयुज्यते । पूर्वैस्तुसंयुज्यते । क्व । ज्वलंती । नवग्वाः । अनुत्वं । अनुत्तमैरितिकिं । दधिक्राव्णः । सुतपाव्ने ।

तथातेषांघोषिणः सर्वथोष्मभिः॥६॥

तथैवतेषां स्पर्शानां उत्तमादन्येघोषिणः सर्वथाऊष्मभिर्नसंयुज्यंते । अघोषास्तु संयुज्यंते । स्कंभथुः । श्चोतंति । स्थ । स्पट् । अनुत्तमैरितिकिं । यक्ष्मः । पृश्निः । विष्णुः । तथातेषामिति कस्मात् । ह्वयामि । स्वःस्यात् । ऊष्मभिरितिकिं । तस्यदर्वेतोरंहयंत ।

नांत्यांतस्थान प्रथमोष्मभिःपरैः ॥ ७ ॥

अंत्या अंतस्थाः । प्रथमाचांतस्था ऊष्मभिःपरै र्नसंयुज्येत । पूर्वैस्तुसंयुज्येते । श्यावाश्वस्य सुन्वतः । स्वाहाग्नये वरुणाय । अंत्याप्रथमे इतिकिं । अदर्शि । वनस्पते शतवल्शः ।

नरेफो रेफेण ॥ ८ ॥

रेफोरेफेणसह नसंयुज्यते । अन्यैस्तु संयुज्यते । अभ्रावान्नो दाहृतं । अर्यमा ।

नसोष्मणोष्मवान् ॥ ९ ॥

सोष्मणासह ऊष्मवान्नसंयुज्यते । तुवग्रेनाभ्यपिहितं । अमहात् ।

नस्पर्शैरूष्माप्रथमः परःसन् ॥१०॥

स्पर्शैःसह प्रथमोष्मापरः सन्नसंयुज्यते । पूर्वैस्तुसंयुज्यते । पूर्वाह्णे । अन्हान्हानः । स्पर्शैरितिकिं । बर्हिः ।

नानुत्तमैः सचसोष्माचपूर्वौ ॥११॥

अनुत्तमैःस्पर्शैः सचहकारः सोष्माचपूर्वौसंतौ नसंयुज्येते । उत्तमैस्तु संयुज्येते । ब्रह्म । अह्ना । हवम्नः अमथ्नात् । दभ्ना । गृभ्णामि ।

नानुत्तमाघोषिणोघोषिभिःसह स्पर्शैःस्पर्शाः ॥ १२ ॥

अनुत्तमाघोषिणः स्पर्शाःअघोषैःस्पर्शैः पूर्वैःपरैश्चसह नसंयुज्यंते । उत्तमास्तुसंयुज्यंते । पलिक्नीः । अमथ्नात् । अप्नस्वतीमश्विना । परोदाहरणानि । यईङ्खयंति । पन्याम ।

नोत्तमाऊष्मभिःपरैः ॥ १३ ॥

उत्तमाःस्पर्शाः ऊष्मभिःपरैःसह नसंयुज्यंते । पूर्वैस्तु संयुज्यंते । ब्रह्म । विष्णुःस्म । पृश्निः । उत्तमाइतिकिं । अप्सु । रश्मी ।

लकारस्पर्शैर्नयकारउत्तरैः ॥१४॥

लकारेणस्पर्शैश्चोत्तरै यकारो नयुज्यते । पूर्वैस्तुयु-

ज्यते । विबाल्यं । दूळ्यः । सत्यं । आरभ्या । ळकारस्पर्शैरितिकिं । इंद्रवाय्वोः ।

ऊष्मणोन्योन्येनच न ॥ १५ ॥

ऊष्माणोन्योन्येनच सह नसंयुज्यंते । स्वैस्तुसंयुज्यंते । शुनश्शेपः । निष्षिध्वरीः । निष्षयी । शाश्वि ।

ऋक्पदेष्विदं ॥ १६ ॥

यदिदमस्मिन्पटले विधानमुक्तंतदृक्षुपदमध्येएव भवति पदसंधौ नभवतीति । यदुक्तं नान्योन्येन मध्यमाःस्पर्शवर्गा इतिसंधौ नभवति । चषद्रे । उपमाषड्ढाद्वा । तथा नळकारेण रेफइतिसंधौनभवति । सुमदंशुर्ल्ललामीः । तथानोत्तमाऊष्मभिः परैरितिनभवति । देवान्हुवे । दध्यङ्ह । अर्वाङ्छुश्रुतमं । दशश्मन्युष्टिं । प्रत्यङ्सविश्वा । शर्मन्स्याम । इदमपिपद्यांतरमिति ! उदाहरणंभवति ।

नामाख्यातमुपसर्गो निपातश्चत्वार्याहुः पदजातानिशाब्दाः ॥१७॥

नाम । आख्यातं । उपसर्गः निपातः इतिचत्वारिशब्दविदआहुः ।

तन्नामयेनाभिदधाति सत्वं ॥१८॥

तन्नामेत्युच्यते येनशब्देनाभिदधाति वक्ता सत्वं द्रव्यमित्यर्थः अग्निरिंद्रवरुण मित्रदेवाः ।

तदाख्यातं येनभावं सधातु ॥१९॥

तदाख्यातमित्युच्यते येनशब्देन सः धातुना अभिधातिवक्ता । भावं क्रियामित्यर्थः । इतंनुदेर्थां निशिशीतमविद्याः ।

प्राभ्यापरानिर्दुरनुव्युपापसंपरिप्रतिन्यत्यधिसूदवापि । उपसर्गाविंशति रर्थवाचकाः सहेतराभ्यां ॥ २० ॥

प्र । अभि । आ० परा । निः दुः अनु० विः उप० अप । सं । परि । प्रति । नि । अति । अधि । सु । उत् । अव । अपि । इत्येतेविंशतिरुपसर्गाः अर्थवाचकाः अर्थवाचिनः सहेतराभ्यां नामाख्याताभ्यां । प्र । प्रयाणेजातवेदसः । प्रदेवंदेव्याधिया । अभि । अभिष्टनेते अद्रिवः । अभिव्यामरचसः । आ । आयंतारं महिस्थिरं । मरुद्भिरान आगहि । परा । पराथतीं मातरमन्वचष्ट । पराशृणीहितपसा यातुधानान् । निः त्वष्टुर्देवस्य निष्कृतं । निरश्वतापार्श्वान्निर्गमाणि । दुः । पुराग्नेदुरितेभ्यः । दुर्नियंतुः परिप्रीतः । अनु । अनुनुस्यात्यष्टकाभिरूतिभिः तन्नष्टभुज्वानरामनुष्यात् । वि । विराट्संम्राट् अपितवीत । विपाट्छुतुद्री । उप । यज्ञेयज्ञ उपस्तुता । इंद्रमग्निं सुपस्तुहि । अस्यप्रागादपानतो । अपेहिमन सस्पते । सं । प्रसम्राजंचर्षणीनां । सम्रा-

जोरवश्राहृणो। परि। विद्युर्विंषाणां परिपानं। वाजी-सम्परिणीयते। प्रति। प्रतियंतंचिदेनसः। प्रतिकीतवः प्रथमाः। नि। अपोनिषिंचन्नसुरः पितानः महांतंकोशमुदचानिषिंच। अति। अतिविद्धाविथुरेण। अति क्रमिष्टं जुरतं। अधि। ममराष्ट्रस्याधिपत्यं। अभि-शस्तेरधीहि। सु। सुकृत्सुपाणिः स्ववान्। अश्विना-स्तृषिस्तुहि। उत्। उद्यन्नद्यामित्रमहः। उभेउदेतिसूर्यः। अव। अवस्पर्तरधिवक्तारं। अवाधमं विमध्यमं। अपि यदींगच्छंत्युशतीरपिष्ठितं। देवादेवानामपियंतिपाथः।

इतरेनिपाताः ॥ २१ ॥

इतरेकतरे। नामाख्यातोप सर्गेभ्यो न्येनिपातावेदि-तव्याः। अस्मान् एतां। उवा। घ। सा। स्यचां। आवां। अपां। दूतं। नूनं। शश्वत्। कुवित्। शक्रत्। अथातः अथ। अर्थो। अरिष्टतातये। विष्णोर्नुकं। अन्यश्चेन्नाभिगच्छति। सद्योजाः। ताः स्विद्गर्भ इत्येव-माद्याः मादयस्त्वेत्येवमादयः।

विंशतेरुपसर्गाणामुच्चाएकाच्च-रानव ॥ २२ ॥

प्र आ। निः दुः वि। सं। नि। सु। उत्। इत्येते उपसर्गाणां नवसंख्या एकाचरा उच्चाउदात्ताइत्यर्थः।

आद्युदात्तादशैतेषां ॥ २३ ॥

एतेषामुपसर्गाणां दशाद्युदात्तावेदितव्याः। परा।

अनु । उप । अप । परि । प्रति । अति । अधि । अव । अपि । इत्येते अन्तोदात्तस्त्वभीत्ययं २४ । एतेषामेवोपसर्गाणां मध्ये अभीत्ययं अंतोदात्तोविदितव्यः । अभिप्रियाणिपवतेचनोहितः । क्रियावाचकमाख्यातमुपसर्गोविशेषकृत् । सत्वाभिधायकं नाम निपातः पादपूरणः ऋत्व्वर्थावेतौ ।

निपातानामर्थवशान्निपातनादनर्थकानामितरेचसार्थकाः । नेयंतइत्यपि संख्येहवाङ्मये मिताक्षरे चाप्यमिताक्षरेचये॥२४॥

इतिश्रीपार्षदव्याख्यायामानंदपुरवास्तव्यवज्रटपुत्रोव्वटकृते प्रातिशाख्यभाष्येद्वादशपटलं ।

द्वितीयोध्यायः समाप्तः ।

वायुः प्राणः कोष्ठ्यमनुप्रदानं कंठस्यखेविवृते संवृतेवा । आपद्यते श्वासतां नादतांवा वक्त्रीहायां ॥ १ ॥

यइमे शारीरा इह पंचवायवो नानाकर्माणः प्राणापानव्यानोदानसमानास्तेषां प्राणोहि नाभेरुपरिष्टाद्घ्राण्यास्ये व्याचरति । नाभेरधस्तात् पायुमेढ्रयोरपानः । प्रसारणाकुंचनौ क्षेपणावक्षेपणादि कर्मोव्यानः । कर्मप्रवृत्तिषु बलमारोपयत्युदानः । सर्वेक्रियाणामुपरमणः समानः । एवंवाचि वर्त्तमानं प्राणमेके आचार्यामन्यंते । उदानमपरे मन्यंते । उपरिष्टान्मुखादग्र ऊर्ध्वंयोवर्त्तते ऽनिलः । ऊर्ध्वकर्मक्रियाःसर्वाः प्राणिनांसंप्रवर्तयन् ।१।
नाभ्युरोथशिरोभागं गच्छन्करचरणसंयुतः । कंठताल्वोष्ठदंतानां सप्रयत्नः समीरितः । २ । ह्रस्वदीर्घप्लुतान्वर्णा न्स्निग्धान्व्युत्थांस्त्वनेकधा । उदात्ताननुदात्तांश्च स्वरितान्कंपितानपि ॥ ३ ॥ समान्विकीर्णांस्तथा संवृतान्विवृतानपि । देहिनामपिवोधार्थं तेनोदानःसउच्यते ॥४॥ एवमुभयथाऽचार्यविप्रतिपत्ति दर्शनाच्छौनकेन भगवताप्राणंमन्यमानेन शास्त्रमेवंप्रणीतं वायुःप्राणः कोष्ठ्यमनुप्रदानमिति । येपुनरुदानंमन्यन्ते तेषामिदं नसिध्यति । उदानाभावेतेषांच सिद्धं । कथं । शारीराणां पंचानामपि प्राणइतिनामसाधारणं । तस्मात्तेषामपि वायुःप्राणः कोष्ठ्यमनुप्रदानमिति सिद्धं । प्राणोवायुः कोष्ठमुदरं । कोष्ठेभवंकोष्ठ्यं अनुप्रदानं । वायुमनुप्रदीयत इत्यनुप्रदानं । किंचतत् । श्वासनादोभयं केनप्रयत्नेन । किमनुप्रदान मापद्यते । कंठस्यग्रीवायाः खेगलस्यविलेछिद्रेविवृते । विपुलेविशाले भवति । संवृते संकुचिते संश्लिष्टेअल्पेवासति आपद्यते श्वासतां श्वसत्वं । नादतां नादत्वं वा । वक्त्री-

श्वायां। ईषाचेष्टा वक्तुरीषावक्लीषातस्यांवक्लीषायां। सवायुः कंठबिलेविवृतेश्वासत्वमापद्यते। संवृतेनादत्वं।

उभयं वांतरोभौ ॥ २ ॥

उभौ विवृतसंवृतौ अंतराकंठबिलेसमे सत्युभयंश्वासनादावापद्येते।

तावर्णानां प्रकृतयो भवंति ॥ ३ ॥

ताःखलुएताः सर्ववर्णानां श्वासनादोभयास्तिस्रः प्रकृतयोभवंतीति वेदितव्यं। उक्तोप्यस्मिन्नज्ञायते केषांवर्णानां काप्रकृतिर्भवतीति। तत्रब्रूमः।

श्वासोऽघोषाणां ॥ ४ ॥

अघोषाणां श्वासः प्रकृतिर्भवतीति वेदितव्यं।

इतरेषांतु नादः ॥ ५ ॥

इतरेषां कतराणां स्वराणां घोषवतां च नादःप्रकृति र्भवतीति वेदितव्यं।

सोष्मोष्मणांघोषिणांश्वासनादौ ॥ ६ ॥

सोष्माणोयेघोषिणः वर्गचतुर्थः। ऊष्मणांचघोषी हकारस्तेषां वर्णानामेवंश्वासनादौ प्रकृतिर्भवतीतिवेदितव्यं। श्वासानुप्रदानाअघोषाः। हकारचतुर्थाउभयानुप्रदानाः। अवशिष्टाःसर्वे नादानुप्रदानाइतिवेदितव्यं

तेषां स्थान म्प्रतिनादात्तदुक्तं ॥७॥

तेषां श्वासनादोभयानां स्थानंप्रतियद्वक्तव्यं तदेत-द्याख्यातं नादःपरोभिनिधानाद् ध्रुवं तत्तत्कालस्था-नर्भित । एवंश्वासादीनि । त्रीण्यनुप्रदानानि व-र्णकालस्थानानि भवंति । नाधिकानि नन्यूनस्थानानि ।

तद्विशेषकरणं ॥ ८ ॥

तत्रवर्णात्मगुणतत्वज्ञाने करणंनामविशेषो वक्ष्यति । करणंप्रदानं इत्यनर्थांतरमाहुः ।

स्पृष्टमस्थितं ॥ ९ ॥

स्पृष्टं करणं स्पर्शानां । परिशेषात् तत् अस्थितं वेदि-तव्यं । अस्थितमिति यत्रवर्णस्थानमाश्रित्यजिह्वान-संतिष्ठते तदस्थितमित्युच्यते ।

दुस्पृष्टं तु प्राग्घकाराच्चतुर्णां ॥ १० ॥

दुस्पृष्टं ईषत्स्पृष्टमित्यर्थः । हकारात्प्राक्चतुर्णां वर्णानां यरलवानां ।

स्वरानुस्वारोष्मणामस्पृष्टंस्थितं ॥११॥

स्वराणां अनुस्वारस्यऊष्मणां चास्पृष्टंस्थितं वेदित-व्यं । यत्रवर्णस्थानमाश्रित्य जिह्वाऽवतिष्ठते तत्स्थित-मित्युच्यते ।

नैकेकंठ्यस्य स्थितमाहु रूष्मणः॥१२॥

एकेआचार्याः कंठ्यस्य ऊष्मणो हकारस्य विसर्जनीयस्यच अस्पृष्टंकरणंनमन्यंते । स्पृष्टं दुस्पृष्टं वा एवमेके । अपरे अकंठ्यस्येति वर्णयंति ।

प्रयोक्तुरीहागुणसंनिपाते वर्णीभवन्गुणविशेषयोगात् । एकश्रुतीःकर्मणाप्नोतिवह्वीः॥१३॥

प्रयोक्तुर्वक्तुरीहा ईहाएवगुणःईहागुणः तेनसंनिपातेयोगेकंठ्यस्यवायोर्वर्णीभवन्निति वर्णत्वमापद्यमानः एकः सन् कंठ्यः सवायुः गुणविशेषयोगात् गुणाएवविशेषागुणविशेषास्तैर्योगाद्यः कंठ्यवायुर्वह्वीःश्रुतीः बहुरूपाणिकर्मणा क्रियया प्राप्नोति । केवगुणविशेषायैःसंयोगाद्वर्णानांश्रुतितो विशेषोभवति । अनुप्रदान । संसर्ग स्थान करण परिमाणास्तैःसह संयोगाद्वर्णानां रूपभेदोभवति । वर्गेवर्गेतुल्यस्थानानां तुल्यप्रयत्नानामपि प्रथमतृतीयाना मनुप्रदानकृतः श्रुतिविशेषः । कचटतपगजडदबाद्वति । तथाहकारविसर्जनीययोः । संसर्गेणेतिवक्ष्यति आह्रुर्घोषंघोषवतां मकारमेकेनुस्वारमनुनासिकानां । सोष्मतांच सोष्मणामूष्मणामाहुः सस्थानेनघोषिणां घोषिणेवेतिद्वितीयचतुर्थाः ऊष्मणासंसृज्यंते । अनुस्वारेणपंचमां । तत्रतुल्यस्थानप्रयत्नानुप्रदानानामपि प्रथमद्वितीयानां तथातृतीयचतुर्थानां तथातृतीयपंचमानांच संसर्गकृतःश्रुतिविशेषः. । कचटतपखछठथफ । तथा । गजडदब । तथा । घझढधभ ।

तथा । ङञणनमइति । स्थानेनेति तुल्यप्रयत्नानुप्रदानानामपि स्थानकृतः श्रुतिविशेषः । अऋटढुउकचटतपयरलव । हशषस । करणेनेति तुल्यस्थानानुप्रदानानामपि ढुकारजकारयकाराणां करणकृतः श्रुतिविशेषः । परिमाणेनेति तुल्यस्थानप्रयत्नानुप्रदानयोरपि समानाक्षरयोः परिमाणकृतः श्रुतिविशेषस्तथा अआ ऋऋृ इई उऊ इति । अपिचश्लोकः । अनुप्रदानात्संसर्गात्स्थानात्करणविभ्रमात् । जायतेवर्णवैशिष्ट्यं परिमाणाच्चपंचमादिति ।

एकेवर्णाञ्छाश्वतिकान्नकार्यान्॥१४॥

एकेआचार्याः अकारादीन्वर्णां छाश्वतिकान् नित्यान्नकार्यान्नकर्त्तव्यान्मन्यंते ।

आहुर्घोषंघोषवतामकारमेकेनुस्वारमनुनासिकानां ॥ १५ ॥

घोषवतां वर्णानामकारं घोषमाहुरेकेआचार्याः । किमुक्तंभवति । घोषवत्स्वकारः स्वस्थानादागत्य घोषवत्वं जनयतीति । गजडदब यरलवह इति । तथाते एवाचार्याः अनुनासिकानांवर्णानामनुस्वारं घोषमाहुः । किमुक्तंभवति । अनुस्वारः स्वस्थानादागत्य घोषवत्वंजनयतीति । ङञणनमइति ।

सोष्मतांच सोष्मणा सूष्मणाहुः सस्थानेन ॥ १६ ॥

सोष्मणां वर्णानां सोष्मत्वं सस्थानेनोष्मणा आहुः । खकारस्य षूक इत्येतेन । छकारस्य शडू इत्येतेन ठकारस्य ष-इत्येतेन । थकारस्य सडू इत्येतेन । फकारस्य ष्य डू इत्येतेन ।

घोषिणां घोषिणैव ॥ १७ ॥

घोषिणां सोष्मणां घोषिणैवोष्मणा । हकारेणेत्यर्थः । सोष्मतामाहुः । घझढधभ इति ।

अघोत्यन्नावपरे ऊष्मघोषौ ॥१८॥

अत्रैव सोष्मसु घोषवत्सु चोपपद्येते ऊष्मघोषौ इत्यपरे आचार्या आहुः । यदुक्तोमकारो घोषवतां घोषवत्त्वं जनयतीति । अनुस्वारोनुनासिकानामिति सोष्मणां चोष्मा सोष्मत्वमिति । तन्नस्पष्टं लक्ष्यते । कस्मात् । एवमुच्यमाने सति वर्णानामनित्यत्वं प्रसज्येत । नित्याश्च वर्णाः कूटस्था अविचालिनः ।

शीघ्रतरं सोष्मसु प्राणमेके ॥ १९ ॥

सोष्मसु द्वितीयचतुर्थेषु शीघ्रतरं प्राणमेके आचार्या मन्यंते । सर्वेषु वर्णेषु स्थानकरणानुप्रदानानि त्रयो गुणाः समानाः सोष्मसूष्मा गुणोऽधिकः । तत्र गुणबहुत्वान्मात्राकालेन शीघ्रप्राणेन शक्यमुच्चारयितुमिति तेषु शीघ्रतरं प्राणं मन्यंते । पदकारेणाप्युक्तम् । प्रथमद्वितीयाः श्वासानुप्रदाना अघोषा एके अल्पप्राणा अपरे महाप्राणास्तृतीयचतुर्था नादानुप्रदाना घोषवंत एके अपरे महाप्राणा इति । सोष्मसु द्वितीयाप्राणं विदधत् एतमेवार्थमिति ।

रक्तोवचनो मुखनासिकाभ्यां ॥२०॥

मुखेन नासिकयाच यदुच्यते सरक्तोवेदितव्यः। ङञणनमइति। सचाँइंद्रः। अस्माँअस्माँइत्। अभीशूँरिव। नॄँः प्रणेत्रं। किमर्थमिदमुच्यते। ननु रक्तसंज्ञोनुनासिक इत्येवसिद्धं। सत्यं। नहिसंज्ञाक्रियते किंतर्हि। तत्रानुक्तं मुखनासिकावचनत्वं रक्तस्यविधीयते। एवमर्थमिदमुच्यते।

एतद्वर्णात्मगुणशास्त्रमाहुः ॥२१॥

एतद्वायुः प्राणइत्येवमादियदनुक्रांतं तत्वर्णानां आत्मगुणशासनं वेदितव्यं। एतावंतो वर्णात्मगुणाः। श्वासता। नादता। उभयता। स्पृष्टता। दुस्पृष्टता। अस्पृष्टता। कंठबिलस्यविवृतता। अघोषता। घोषता। सोष्मता। अनुनासिकतेति।

नपुंसकं यदूष्मांतं तस्य बह्वभिधानजः। अनुस्वारो दीर्घपूर्वः सिष्यंतेषु पदेषु सः ॥ २२ ॥

नपुंसकलिंगं यच्छब्दस्वरूपं ऊष्मांतं तस्य नपुंसकलिंगस्य बह्वभिधानजः बहुवचनोत्पन्न इत्यर्थः। दीर्घपूर्वोनकारजन्यः पदमध्ये अनुस्वारोवेदितव्यः। सि। षि। इत्येवमंतेषु पदेषु सअनुस्वारोद्रष्टव्यः। भासाँसिवस्ते सूर्योनशुक्रः। चक्षूंषीव सूर्येसंचरंति। आदै-

व्यावृणीमहे वांसि । व्य१र्यद्रिंद्रतनुहि श्रवांसि । तपूंषि-तस्मै वृजिनानि संतु । वपूंषि जाता मिथुनासचेते । आयस्मिन्मनांहवींष्यग्नौ । किमर्थमनुस्वारस्य दीर्घपूर्वस्य पदमध्ये वर्त्तमानस्यत्रिभिः श्लोकैर्लक्षणं क्रियते । ननुपाठादेव सिद्धं यथान्येषां वर्णानां । सत्यं । किंतुदुराम्नाननिवृत्त्यर्थं अनयोः शिक्षापटलयोर्बहूनांवर्णानां लक्षणंक्रियते । यथासमापाद्यान्युत्तरे षट्प्रकारे । शुनःशेपो निष्षपी शास्मिनिष्षालविक्रमान् । एयैरित्येकार मकारमाहु रित्येवमादीनि । कथंपुनर्दुराम्नानप्रसंगः संतिहि । तीर्थोषिताः अलसाः अगुणदोषज्ञाः अन्योन्याध्यापकाः । सर्ववर्णान्यत्वजनयितारस्तद्दोषनिवृत्त्यर्थं आचार्येणशिष्यहितार्थमिदमारब्धं । अनुस्वारस्यस्थाने तावत्ङकारं जनयंति तस्मात् ङकारात्परंककारमंतःपातं जनयंति । हवींषि । सर्पींषि । भासांसि । अवांसीत्येवं तन्निवृत्त्यर्थं मनुस्वारलक्षणंक्रियते । यद्येवंपदांतेप्यनुस्वारस्य तद्वर्णं तुल्यम् । त्वांहत्यदिंद्रार्णसातौ । तांसुतकीर्तिं मघवन् । तस्मादत्रापि यत्नःकर्त्तव्यः । नकर्तव्यः । रेफोष्मणो रुदययो र्मकारोनुस्वारमिति विहितमनुस्वारं जानात्यसौ । तत्रपदमध्ये अनुस्वारलक्षणं नास्ति येनानुस्वारं जानीयात् एवंसति किमर्थंदीर्घपूर्वोगृह्यते । नह्रस्वपूर्वः । आविंशत्या त्रिंशता । अंसेषुव इत्युभयत्रापिहि ङकारश्रवणं तुल्यं । तत्रतावदाहुः दीर्घस्ययथाव्यक्तङकारश्रुति र्नतथाह्रस्वपूर्वस्य । तस्मान्नगृह्यते । अपरेआहुरनुस्वारस्योपधां ह्रस्वांकेचित्द्राघयंत इवपठंति । त-

न्निवृत्त्यर्थं दीर्घपूर्वः परिगृह्यते । एतावान्त्वनुस्वारो दीर्घादित्येवमंतः ।

सः सासौ सं पदांतेभ्यः पूर्वो नाम्युपधस्तथा । यकारोवा वकारोवा पुरस्ताच्चेदसंधिजः ॥२३॥

सः । सा । सौ । सं । इत्येतेभ्यःपदांतेभ्यः पूर्वोनुस्वारः अनाम्युपधः अकाराकारोपधः । तथा । कथं । यथासिष्यं तेषु दीर्घपूर्व एवमिहापि दीर्घपूर्वोवेदितव्यः । असंधिजः यकारोवावकारोवा यदितस्मादवर्णात्पूर्वोभवति । सः । साह्वांसोदभ्युं । सा । शुश्रुवांसाचित् । सौ । विद्वांसौ । इत् । इरः । सं । श्रेयाँसंदधं । वाब्ध्वाँसंचित् । यकारोवावकारोवा पुरस्ताच्चेदसंधिज इति कस्मात् । योव्यंसं ।

जिघांसन् पांसुरे मांसं पुमांसं पौंस्यमित्यपि । पदेष्वेवं प्रवादेषु ॥ २४ ॥

जिघांसन् । पांसुरे । मांसं । पुमांसं । पौंस्यं । इत्येतेषुच पदप्रवादेष्वनुस्वारः दीर्घपूर्वोवेदितव्यः । द्रुहञ्जिघाँसंध्वरसं । यत्स्तोतारंजिघांससि सखायं । समूल्हमस्यपांसुरे । मांसमेकःपिंशति । येचार्वतोमांसभिक्षां । पुमाँसंपुत्रमाधेहि । स्तुषेतदस्यपौंस्यम् । चकृषेतानिपौंस्य ।

नामकार उपोत्तमे ॥ २५ ॥

जिघांसादीना मुपोत्तमप्रवादे अमकारेसति अनुस्वारोदीर्घपूर्वो नभवति । किंतुऋस्वपूर्व एव भवति। पुंसः पुचाँ उतविश्वापुषंरयिं ।

प्रश्लिष्टादभि निहितात् ॥२६॥

प्रश्लिष्टादेकीभावात् अभिनिहिताच्च परअनुस्वारः पदेऋस्वपूर्वः सन् संहितायां दीर्घपूर्वोभवति । प्रश्लिष्टात् । आभूतांशः । अभिनिहितात् । भरेष्विंद्रं सुहवंहवामहेंहोमुचं ।

माँश्चत्वे याँस मित्यपि ॥ २७ ॥

मांश्चत्वे । अयांसं । इत्येतयोश्चानुस्वारो दीर्घपूर्वोवेदितव्यः । माँश्चत्वेवापृशने वावधत्रे । अयाँसमग्ने सुक्षितिं । अयंयोगोऽनर्थकं कथं माँश्चत्वेति नाय मनुस्वारः । किंतर्ह्यादिस्वरश्चोत्तरेषां पदेपीति । अनुनासिकः स्वरः । अयांसमिति सः सा सो सं पदांतेभ्यइत्येवसिद्धं । नानर्थकः शाखांतरे किलमांश्चत्वेसानुस्वारं पठंति तत्प्रदर्श्यते । यद्येवं मांस्पचन्या इतिच निपातयितव्यं । नैतदस्ति प्रयोजनं जिघांसन्पांसुरेमांसःमिति मांसप्रवादत्वात्सिद्धं । अयांसमित्येतस्य निपातने प्रयोजनं मृग्यंउदाहरणं ।

एतावानृद्वनुस्वारो दीर्घात्॥२८॥

नपुंसकं यदूध्मांत मित्येवमादिर्योयमनुस्वारो ऽनु-

क्रांतः एतावानेव ऋचुपदमध्येदीर्घात्परोवेदितव्यः । अत्रैवोदाहृतः ।

इतरथेतरः ॥ २९ ॥

इतरथाकथमुक्ताद्दीर्घपूर्वाद्विषयात् अन्यत्र ऋचुपदमध्येरेफोष्मपरः इतरःकतरः ह्रस्वपूर्वोनुस्वारो वेदितव्यः । अंह.विंशत्या । अंसेषु । अमंदिग्धान्स्वरानिति । उक्तःश्लोकार्थः स्वरपटले । अत्रापि तथैवव्याख्यातव्यः ।

समापाद्यान्युत्तरेषट्पकारे राधोरथोग्नादिवोजाऋतश्च । अंजःपादुः प्रेतिचपूर्वं पद्यावनिंगयन् विक्रममेषु कुर्यात् ॥ ३० ॥

समापाद्यानि षट्पदानि पकारे उत्तरे । राधः रथः ग्नाः दिवः जाः ऋतः इत्येतानि । अंजः । पा । दुःप्र इत्येतौचपूर्वपद्यौ विक्रममेतेषु कुर्यात् । अनिंगयन् अवग्रहमकुर्वन् विक्रमंकुर्यात् इति । विक्रमंउपाचारमपनीयविसर्जनीयमेषु कुर्यात् । त्वंहिराधस्पते । राधःपते । एषतेदेवनेतारथस्पतिः । रथःपतिः । नराशंसोग्नास्पतिर्नः । ग्नाःपतिः । दिवस्पृथिव्योरव आवृणीमहे । दिवःपृथिव्योः । संजास्पत्यं । जाःपत्यं । तववायव्रतस्पते । ऋतःपते । यामन्नंजस्पाइवघ्नेत् । अंजःपाः २ इव । दुष्प्राव्योवहंता । दुःप्रऽअव्यः । पूर्वपद्यौ इतिकिं । इमंमंजस्पासुभये अकृण्वत । अंजस्पामित्य-

त्वावग्रहत्वात् मात्राकालो भवतीति । किमिदं समा-
पाद्यमित्यत आह ।

समापाद्यंनामवदंति षत्वं त-
थाणत्वं सामवशांश्च संधीन् ।
उपाचारं लक्षणत श्चसिद्धमा-
चार्या व्यालिशाकल्यगार्ग्याः॥३१॥

समापाद्यं नामषत्वं वदंति । तथाणत्वं । च पुनः सामवशां त्संधीन् । लक्षणतः सिद्धमुपाचार मपि तथावदंति केते । आचार्या व्यालिशाकल्यगार्ग्याः । सुषुमायातं । तदा रभस्वदुर्हणो । मक्षूमक्षूकृणुहि । त्वं-ह्यिराध्यते ।

ह्रस्वामर्द्धस्वरभक्त्या समाप्ता म-
नुस्वारस्योपधामाहु रेके । अनु-
स्वारं तावतैवाधिकं च ह्रस्वो-
पधं ॥ ३२ ॥

ह्रस्वां अनुस्वारोपधां अर्द्धस्वरभक्त्या असमाप्तां पादमात्रया अर्द्धपादमात्रयावान्यूनां आहुरेके आचार्या अनुस्वारंच तावताकालेनाधिकं ह्रस्वोपधं । त्वंराजेंद्रयेव । त्वंह्यत् ।

दीर्घपूर्वं तदूनं ॥ ३३ ॥

दीर्घपूर्वमनुस्वारं तथैवाहुःस्वरभक्त्या न्यूनमाहुः । दीर्घामुपधां तावताधिकां च । गवांशता । तांसुतेकीर्तिम् ।

रेफोस्त्यृकारेच परस्यचार्द्धं पूर्वेऽह्रस्वीयांस्तु नवेतरस्मात् । मध्येसः ॥ ३४ ॥

ऋकारेरेफो विद्यते । परस्यऋकारस्यच पूर्वेऽर्द्धे रेफोविद्यते । ह्रस्वीयांस्तु ह्रस्वतरः सरेफः । इतरस्माहृकाररेफादल्पतरः । नवाह्रसीयान् । समएववा । मध्येसः । सरेफस्तस्यऋवर्णस्यमध्ये द्रष्टव्यः । नार्दी । नांत्ये । ऋऋ ।

तस्यैवलकारभावे धातौस्वरः कल्पयता लृकारः ॥ ३५ ॥

तस्यऋवर्णस्यस्थानेरेफस्यलकारभावे यदासरेफो लकारमापद्यते तदालृकारोभवति स्वरसंज्ञश्च भवति । कल्पयतावेवधातौ नान्यच । चाक्लृप्रेतेन ऋषयोमनुष्याः इत्यत्रस्वरात्ककारस्य द्विर्वचनं नभवति । असंयोगादित्वात् । पकारस्यच द्वित्वंभवति स्वरोपधत्वात् ।

अनंतस्थं तमनुस्वार माहुः ॥३६॥

योसौ पुरस्तादविशेषेणानुक्रांतो नुस्वारःएतावाश्वानुस्वारोदीर्घादिति । तमनुस्वारं अनंतस्थपद मध्यवर्तमानमाहुराचार्याः । किमर्थमिद मुच्यते । नपुंसकं यदूष्मांतमित्येवमाद्यनुक्रमेणैवसिद्धं । सत्यं । किंतु

एतावान्ह्यनुस्वारो दीर्घादितिनियमविधिः प्रसज्येत । तन्निवृत्यर्थमुच्यते । संतिह्यन्येपि दीर्घात्परांताः । त्वांहि । त्वांराजनं । तांसुतेकीर्तिं ।

व्यालिर्नासिक्यमनुनासिकं वा ॥ ३७ ॥

व्यालिराचार्यः सर्वमनुस्वारं नासिकास्थानं मुखनासिकास्थानं वा मन्यते । त्वंराजा । त्वाँराजानं । अँसेषुवः । हवीँषि । त्वंराजेन्द्रं । त्वांराजानं । अंसेषु वहवींषि । अनुस्वारस्यपूर्वोक्तमपि नासिकास्थानं मुखनासिक्यविधित्सयापुनरुच्यते ।

संध्यानिसंध्यक्षराण्याहुरेके द्विस्थानतैतेषु तथोभयेषु ॥ ३८ ॥

संध्यानिसंधितव्यानि संधितानिवासंध्यक्षराण्याहुरेके आचार्याः । यथाऽन्या न्यक्षराणि स्वयमुत्पन्नानि नतथेमानि । कथमेतदध्यवसीयते यतोद्विस्थानता कंठतालुस्थानता । कंठोष्ठस्थानताच । तथाप्युच्यते । उभयेषु संध्यक्षरेषु कंठतालव्ययोः कंठोष्ठयोश्च । एओ-ऐऔ इति । यद्विसंध्यानि द्वयोर्वर्णयोः संधिजानिभवंति ।

संध्येष्वकारोर्द्धमिकार उत्तरं युजोरुकार इति शाकटायनः ॥ ३९ ॥

संध्येषु संध्यक्षरेषुसत्सुअकारः पूर्वार्द्धंभवति । इकारमुत्तरार्द्धं प्रथमतृतीययो र्भवति । युजोर्द्वितीयच-

र्थयोः उकारमुत्तरार्द्धं भवति एवं शाकटआचार्यो मन्यते। अइ। ए। अउ। ओ अई। ऐ। अऊ। औ। इति। यद्येवमेकारैकारयोरोकारौकारयोर्वाकथं श्रुतिविशेषः।

मात्रासंसर्गादवरेपृथक्श्रुती॥४०॥

अवरेपूर्वे। एओइत्येते मात्रासंसर्गात्। मात्रयोः समयोः चीरोदकवत् नज्ञायते क्वावर्णमात्रा क्वेव र्णोवर्णयो रिति तस्मात्तेअच्चरे अपृथक्श्रुतीभवतः। किमिदमपृथक्श्रुतीइति। एओ इत्येतयोरिवर्णोवर्णयोः पृथक्श्रवणं नविद्यते। चीरोदकवत्संप्रयुक्तत्वात्। एवंश्रुतिविशेषः। अस्यैवापरायोजना। मात्रासंसर्गादवरेऽपृथक्श्रुती। मात्रयोः चीरोदकव त्संप्रयुक्तत्वा न्नज्ञायते तस्मादवरे संध्यच्चरे एओ इत्येते पृथक्श्रुती भवतः। ऐऔकारा भ्यामेकारओकारौ पृथक्श्रूयेते इत्यर्थः। एवंश्रुतिविशेषोभवति।

ह्रस्वानुस्वारव्यतिषंगवत्परे॥४१॥

परे संध्यच्चरे ऐऔइत्येतौ ह्रस्वानुस्वारयो र्योव्यतिषंगोऽनुक्रांतः ह्रस्वामर्द्धस्वरभक्त्यासमाम्नामिति तद्यतिषंगो वेदितव्यः। ऐऔकिमुक्तंभवति। यथा तत्र-ह्रस्वरनुस्वारः पादमात्राधिक उपधाचतावतान्यूना। एवमिहापि द्रष्टव्यं। इवर्णोवर्णयो र्भूयसीमात्रा। अल्पीयसीअवर्णस्य यस्मात्तयोर्वैषम्यान्नचीरोदकव त्संसर्गोभवति। तस्मात्तयोरवर्णस्य इवर्णोवर्णयोश्च पृथक्श्रवणं भवति ऐऔ इति।

त्रीणि मंद्रंमध्यममुत्तमं च स्थानान्याहुः सप्तयमानि वाचः॥ ४२॥

वाचस्त्रीणिस्थानानि। सप्तयमानि सप्तयमा येषुस्थानेषु तानिसप्तयमान्याहु राचार्याः। तेषुमंद्रमुरसि वर्त्तते। मध्यमंकंठेवर्त्तते। उत्तमंशिरसि वर्त्तते एतानिस्थानानि स्वरविशेषणान्यपिभवंति। यथामंद्रेणस्वरेणाधीयते। मंद्रयावाचाप्रातः सवनेशंसेत्। उरसाधीयतेइति।

अनंतरश्चात्रयमोऽविशेषः॥ ४३॥

एषुस्थानेष्वनंतरः अव्यवहितोयमः अविशिष्टोभवति। अनंतरेयमे विशेषोनशक्यते दर्शयितुमित्यर्थः। केतेयमानाम।

सप्त स्वरायेयमास्ते॥ ४४॥

येसप्तस्वराः षड्जऋषभगांधारादयो गांधर्ववेदेसमाम्नाताः। तथासामसु। क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमंद्रा तिस्वार्याः इतिते यमानामवेदितव्याः।

पृथग्वा॥ ४५॥

अथवास्वरेभ्यः पृथग्भूताः अन्येयमाः स्वरेषुवर्तंते एतेषांमृदुत्वं तीक्ष्णत्वं च वेदितव्यं।

तिस्रोवृत्तीरुपदिशंति वाचोविलंबितां मध्यमांचद्रुतां च॥४६॥

तिस्रोवृत्तीर्वीच उपदिशंत्याचार्याः । विलंबितां बालानामध्यापनादिषूपदिशंति । मध्यमां व्यवहारादिषूपदिशंति । द्रुतां अध्ययनस्य बहुरूपोभ्यासे उपदिशंति ।

वृत्त्यंतरे कर्मविशेषमाहुः ॥ ४७ ॥

वृत्तेरन्यावृत्ति वृत्यंतरं तस्मिन्कर्मविशेषमाहुराचार्याः । विलंबितायां प्रातःसवनं भवति । मध्यमायांमाध्यंदिनं सवनं द्रुतायांतृतीयंसवनं इतितेषु सवनेषुएतावृत्तयो भवंतीत्युक्तम्भवति ।

मात्राविशेषः प्रतिवृत्त्युपैति ॥ ४८ ॥

वृत्तिंवृतिं प्रतिमात्राविशेषः मात्राधिक्यं उपैति उपगच्छति । द्रुतायांवृत्तौ येवर्णास्ते मध्यमायां त्रिभागाधिका भवंति । तथा मध्यमायां येवर्णास्त विलंबितायां त्रिभागाधिकाभवंति । चतुर्भागाधिका भवंतीत्येकेइति ।

अभ्यासार्थेद्रुतांवृत्तिं प्रयोगार्थेतु मध्यमाम् । शिष्याणामुपदेशार्थंकुर्याद्वृत्तिं विलंविताम् । चाषस्तु वदते मात्रां द्विमात्रांवायसोब्रवीत् । शिखीचत्रिमात्रो विज्ञेय एषमात्रापरिग्रहः । त्रिमात्रांतु

शिखीभूते नकुलस्त्वङ्कमातिक्रमिति वापाठः । गतार्थमेतत् क्षेपकम् ॥ ४६ ॥

इति श्रीपार्षदव्याख्याया मानंदपुरवास्तव्यवज्रटपुत्रोव्वटकृते प्रातिशाख्यभाष्ये शिक्षापटलं त्रयोदशम् ।

समुद्दिष्टावर्णगुणाः पुरस्तान्निर्दिष्टानां सांहितो यश्च धर्मः । तदायापायव्यथनानि दोषास्ताव्याख्यास्यामोतनिदर्शनाय॥१॥

पुरस्तान्निर्द्दिष्टानां वर्णानां वर्णगुणाः समुद्दिष्टाः सांहितोयश्चधर्मः समुद्दिष्टोऽनुक्रांतेषु पटलेषु तदायापायव्यथनानि । तेषां वर्णानां आयोऽपायः व्यथनमिति । एतेदोषाः प्रादुर्भवंति । आयोनामासतोवर्णस्योपजनः । यथाह्वयामीत्यत्र पुरस्तादनुवादः । अपायोनामसतोपकर्षः यथा उनयोरित्यत्रयोरित्येतस्य व्यथनंनामसतोन्यथाश्रवणं । यथारथ्याइत्यत्र थकारस्यस-

कारवक्तृवर्णां दोषानुत्तरवद्दर्शनार्थं विस्तरेणासौ च-
मुत्रेति अनुक्रामंतोव्याख्यास्याम:।

निरस्तं स्थानकरणापकर्षे ॥ २ ॥

निरस्तंनाम दोषउत्पद्यते स्थानकरणयो रपकर्षेण।
ननु स्थानकरणयो रपकर्षोनोपपद्यते। कथं। स्थान-
करणाभ्यांहि वर्णअपकृष्यते। नैषदोष:। यथास्थान।
करणाभ्यां वर्णोऽपकृष्टोभवति तथावर्णादपि स्थानक-
रणेअपकृष्टे भवत:। तस्मात्सदोष: परिहर्तव्य:।

विहारसंहारयो र्व्यासपीडने ॥३॥

विहारोविहरणं विस्तार:। संहार:संहरणं। अल्प-
थाकरणं संकोचनं वा। कस्यस्थानकरणयो विंहारे
व्यासोनामदोषो जायते। संहारेपीडनं च। व्यासो-
ऽविवेक:। पीडनंद्विर्भाव: तावपि परिहर्त्तव्यौ।

ओष्ठाभ्यामंबूकृतमाहनद्धंदुष्टं ॥ ४ ॥

ओष्ठाभ्यांनद्धं। बद्धमित्यर्थ:। यदाहवक्ता तद्दुष्टं अं-
बूकृतमित्युच्यते। तदपिवर्ज्यम्।

मुखेनसुषिरेणाम्बूनं ॥ ५ ॥

सुषिरेणविलंबितेन मुखेनवक्ता यदाहतद्दुष्टं म्बूनं-
वेदितव्यं।

संदष्टंतु व्रीडन आहहन्वो: ॥ ६ ॥

ब्रीडनेहन्वोः संदष्टं नामदोषोभवति सवर्ज्यः । ब्रीडनंनामहन्वोर्नीच भावः ।

प्रकर्षणे तद्विक्लिष्टमाहुः ॥ ७ ॥

हन्वोः प्रकर्षेणैव विक्लिष्टं नामदोषो भवति । प्रकर्षणंनाम सर्वतस्खलनं । विक्लिष्टं नामासंयुक्तं

जिह्वामूलनिग्रहेग्रस्तमे तत् ॥८॥

जिह्वामूलस्य निग्रहेग्रस्तं नामदोषोभवति तंवर्जयेत् । निग्रहोनामस्तंभनं ।

नासिकयोस्त्वनुषंगे नुनासिकं ॥९॥

नासिकयोर्यदावर्णोनुषज्यते तदाऽनुनासिकत्वमुत्पद्यते सदोषस्तंपरिहरेत् ।

अयथामात्रं वचनं स्वराणाम् ॥१०॥

यथामात्रा यथामात्रं वचनंस्वराणांह्रस्वदीर्घप्लुतानां अयथामात्रोच्चारणं दोषोभवति । प्रायेणदीर्घेषु ह्रस्वेषु च रक्तेषु मात्राधिक्यं कुर्वन्ति तदाचार्येणनिदर्शनार्थमुक्तस्त्वोदाहृतं रक्तंह्रस्वंद्राघयंत्युग्रश्लोकइति ।

संदंशोव्यासः पीडनं निरासः ॥११॥

संदंशः व्यासः । पीडनं । निरासः । एतेचपुरस्तात्कीर्तिताः ते स्वराणांभवंति । संदंशइति संदष्टं ब्रीडनमाहहन्वोरितिकीर्तिताः व्यासपीडनेइत्येतौ वि-

हारसंहारयोरिति कीर्तितौ । निरासइति निरस्तं स्थानकरणापकर्षं इति कीर्तितः ।

ग्रासः कंठ्ययोः ॥ १२ ॥

जिह्वामूलंनिग्रहैग्रस्तमिति यः प्रागुक्तः ग्रासोनामदोषः सकंठ्ययोरकाराकारयोरुत्पद्यतेसत्रर्जयितव्यः ।

अनुनासिकानांसंदष्टता विषमरागतावा ॥ १३ ॥

अनुनासिकानांवर्णानांसंदष्टतादोषो भवति । सव्याख्यातः संदष्टन्तुव्रीडनव्याहृहन्वोरिति । विषमरागतावानुनासिकानां भवति । नहिरागं प्रत्याख्यायानुनासिकावर्त्तन्ते तस्माद्विषमरागतादोष उच्यते । अक्रतं एमि । अभ्रआँअपः ।

सांतस्थानामादिलोपोंतलोपौ १४॥

सहांतस्थयावर्त्तंतइति सांतस्था स्तेषांसांतस्थानां वर्णानां क्वचिदादिलोपःक्रियते क्वचिदंतलोपः तौदोषौज्ञेयौ पिवानिषद्य । इंद्रवाय्वोः ।

अदेशेवावचनं व्यंजनस्य ॥ १५ ॥

अथवाअदेशे अस्थाने असद्यंजनमित्युच्यते सदोषोवर्ज्यः । यथाअस्मान् स्तोमैरभुत्स्महि । उत्स्नाय । विश्वप्स्न्यस्य । इत्यत्रसकारात्परः स्तकाउच्यते । यथायच्छंदोषण्यं । विष्णुः इत्यत्रषकारात् इकारस्तुकारौ ।

अन्योन्येन व्यंजनानां विराग:॥१६॥

व्यंजनानां अन्योन्येनसह विराग: क्रियते सदोष: यथा । उपमाषड्ढाहेत्यत्र उकारात्परस्य ढकारस्यविराग: क्रियते अज्ञात्हभि: ।

लेशेनवावचनं पीडनं वा ॥१७॥

लेशेनवाव्यंजनानांवचनं क्रियते पीडनंवा । लेशेन-प्रयत्नशैथिल्येन । पीडनमतिप्रयत्न:तावुभौदोषौसर्वेषुवर्जयेत् ॥

घोषवतामनुनाद:पुरस्तात्पदा-दिस्थानांक्रियतेधारणं वा ॥१८॥

पदादिस्थानांघोषवतां पुरस्तादनुनाद:ध्वनि:क्रियते अथवा तेषांघोषवतां धारणंनामानुपलब्धि: । यथाह्वयामीत्यत्र पुरस्तादधिक:शब्द:क्रियते अथवा तस्यदोषस्यपरिहरणार्थं हकारस्यानुपलब्धि:क्रियते । अपरेधारणं द्विर्वचनंमन्यंते । ज्योतिष्कृत् । द्यावा । द्वादश ।

सोष्मोष्मणामनुनादोप्यनाद:॥१९॥

सोष्मणामूष्मणामपि पुरस्तात्पदादिस्थानात् अनादोऽशब्द: । अनुनादस्च क्रियते । यथा अभिऽख्याय । छायामिव । स्तोतंति । स्तौति ।

लोमश्यंच क्ष्वेडनमूष्मणां तु॥२०॥

ऊष्मणांत्व घोषाणांलोमश्यंचक्ष्वेडनंच दोषौभवत: ।

लोमध्यंनामासौ कुमार्यं । क्ष्वेडनं नामा(१)धिकोवर्णस्य सद्रूपोध्वनिः ।

वर्गेषुजिह्वाप्रथमं चतुर्षु ॥ २१ ॥

आद्येषुचतुषु वर्गेषुजिह्वाप्रथनंक्रियते सदोषः । जिह्वाप्रथनंनामविस्तारः ।

ग्रासोमुख्ये ॥ २२ ॥

एतेषांवर्गाणां मुख्ये आद्येवर्गे ग्रासोनामदोषो भवति । सव्याख्यातः ।

प्रतिहारश्चतुर्थे ॥ २३ ॥

एतेषामेव चतुर्थेवर्गे प्रतिहारनामदोषो भवति अतिप्रयत्नः प्रतिहारः ।

सरेफयोर्मध्यमयोर्निरासः ॥ २४ ॥

सहरेफेणवर्त्तते इति सरेफौ एतेषांचतुर्णांवर्गाणां यौमध्यमौवर्गौ तयोश्चरेफस्य च निरासो नामदोषो भवति सव्याख्यातः ।

विक्लेशस्थाने सकलेचतुर्थे ॥ २५ ॥

चतुर्थेवर्गेस्थाने सकले सहकलाभिः सकलं कलाअवयवाः केतेकारणादयः तेषुकारणादिषु स्थानेचविक्लेशो नामदोषो भवति । विक्लेशो अवैशद्यमित्येकोर्थः ।

---

(१) अविवेकः वर्णस्य अस्वरूपोध्वनिः । पुरस्ताद्व्याहृतमिति वृत्तिः ।

अतिस्पर्शो बर्बरता च रेफे ॥ २६ ॥

दुस्पृष्टो रेफः सातिस्पृश्यते वर्बरता चोच्यते तौदोषौ रेफस्य वर्जयेत् । बर्बरताप्यसौकुमार्यमेव ।

जिह्वान्ताभ्याञ्च वचनं लकारे ॥२७॥

जिह्वाग्रेणवक्तव्यः सलकारः यदाजिह्वायाः अंताग्राभ्यामुच्यते तदासदोषोभवति । पूर्वोक्तौचातिस्पर्शबर्बरौतयोर्दोषालकारस्यभवंति तान्वर्जयेन्मेधावी ।

श्वासोऽघोषनिभता वा हकारे ॥२८॥

श्वासोवा अधिकः अघोषसदृशत्वं च हकारस्यदोषौलक्षयेत् ।

निरासोन्येषूष्मसु पीडनं वा ॥२९॥

येन्येहकारा दूष्माणस्तेषु शकारादिषुनिरासः पीडनंवेतिद्वौदोषौभवत स्तौव्याख्यातौ ।

स्वरात्परं पूर्वसस्थानमाहुर्दीर्घान्निरस्तं तु विसर्जनीयं ॥ ३० ॥

दीर्घात्स्वरात्परं विसर्जनीयं पूर्वस्यसस्थानं निरस्तमाहुः उक्तः सदोषः । रथीः । वधूः । अग्नेः । वायोः । दीर्घादिति किं उच्यते । ननुह्रस्वादपिविसर्जनीयः पूर्वसस्थानएवश्रूयते । अग्निः वायुः इति । यद्यपिस्वरवर्णं तुल्यं ततोप्याचार्येण दीर्घग्रहणं कृतं तस्माद्दीर्घादेव पूर्वसस्थानत्वं भवतीति नह्रस्वादपिभवतीति मंतव्यं ।

अपरेपुनरन्यथावर्णयंति अन्यस्थानेदीर्घात्स्वरात्परो विसर्जनीयोदेवै रपि नशक्यते उच्चारयितुमितिविधिं वर्णयंति। दीर्घात्स्वरात्परं पूर्वसस्थानमाहुराचार्या इच्छंतीत्यर्थः। तस्मिन्नपिपक्षे दीर्घग्रहणमनर्थकं ह्रस्वादपितथैवेच्छंति। एवंतर्हि परस्ययोगस्यार्थे दीर्घग्रहणं छंदवशेनेहपठितं द्रष्टव्यं। स्वरात्परं पूर्वसस्थानमाहुर्निरस्तं विसर्जनीयमस्मिन्योगे सत्युभयोरपिपक्षयोः अग्निः वायुः रथीः वधूः इतिसर्वंसिद्धंभवति। किं पुनरत्रयुक्तं। उभयं। कथं। शास्त्रांतरेविधिर्दृश्यते। कंठ्यस्थानौ हकारविसर्जनीयौ उभयस्वरादिसंस्थानोविसर्जनीयइति तेषां विसर्जनीयः पूर्वसस्थानो भवतीति। तस्मात्तदपियुक्तम्। इहदोषसमुच्चय प्रकरणे वचनाद्दोषः सइतिनिश्चयः। कथमेतदध्यवसीयते। आचार्यप्रवृत्ति दृश्यते। यथा अनुनासिकपरादूष्मणः परसस्थानयमागमो भवत्येकेषां। यथा अश्नैविष्णुरिति। तदिहास्माकं प्रतिषिद्धं परं यमंरक्तं परादघोषादिति तस्मादेतदध्यवसीयते।

कण्ठ्याद्यथा रेफवत स्तथाहुः ॥३१॥

दीर्घात्कंठ्यात्परं विसर्जनीयं यथारेफवतऋकारात्परं जिह्वामूलीयं तथानिरस्तमाहुः सदोषः। देवाः मातृः। दीर्घादिति कस्मात्। देवः सोमः। ह्रस्वात्कंठ्यात्परोविसर्जनीयो ह्रस्वसस्थान एव भवति।

रक्तानुनासिक्यमपी तरस्मात् ॥३२॥

रक्तात्कंठग्राहीर्षात्परं विसर्जनीयं इतरस्मादपिपरं । कतरस्मात् ऋकारान्नासिक्यमाहुः सदोषः । स्ततवाँः पायुः । नृँः पतिभ्यः ।

संयोगादेरूष्मणः पूर्वमाहुर्विसर्जनीयमधिकं स्वरोपधात् ॥३३॥

स्वरोपधात्संयोगादे ऊष्मणः पूर्वमधिकं विसर्जनीयमाहुः सदोषः । पावकतेस्तोकाश्चोतंति । अभिष्याम । संयोगादेरितिकिं । द्विपदेशं चतुष्पदे । मोषुणः । परिसोमः । ऊष्मणइतिकिं तवत्यत् । स्वरोपधादितिकिं । आस्वग्ने ।

परं यमं रक्तपरादघोषात् ॥ ३४ ॥

ऊष्मणोऽघोषा द्रक्तपरात्परंयमं आहुः सदोषः । पृश्निः विष्णुः । स्नात्वा ।

ऊष्माणंवाघोषिण स्तत्प्रयत्नं ॥३५॥

घोषिणऊष्मणो रक्तपरात्परं घोषिणं पूर्वतुल्यप्रयत्नं ऊष्माणंयमंवाऽऽहुः सदोषः तंवर्जयेत् बुधः । ब्रह्म । अन्हा २ ।

शुनश्शेपो निष्षपीशाश्मिनिष्षालविक्रमान्ब्रह्मविष्णुस्नपृश्निनः॥३६॥

एते अविक्रमाभवंति । एतेषुविक्रमोविसर्जनीयः सदोषोवर्ज्यः । शुनश्शेपो यमन्हृगृभीतः । मानोम-

घेवनिष्षपीपराद्वाः । प्रपाकंशास्मि प्रदिशोविदुष्टरः । प्रनांशरद्वा न्हृषभोननिष्षाल । अभो २ दमेकमेको अस्मिन्निष्षालभौ । ब्रह्मचते जातवेदो नमस्व । इदं विष्णुर्विचक्रमे । कूटंस्मतृंहदभिमातिमेति । आयंगौः पृश्निरक्रमीत् ।

स्पर्शोष्मसंधीन् स्पर्शरेफसंधीनभिप्रायांश्च परिपातयंति ॥३७॥

चरतिचक्रे इत्येवमादीन् स्पर्शोष्मसंधीन् ईकारोकारोपहितोद्गति च स्पर्शरेफसंधीन् विवृत्यभिप्रायेषुचेत्यभिप्रायांश्च परिपातयंति । एतेषुअनुस्वारंकुर्वंतोस्यर्थः । सदोषः । तांस्तेअश्याम । रश्मांरिव । पीवोअन्नाँरयिवृधः ।

स्वरौकुर्वंत्योष्ठनिभौसरेफौतिस्रोमातृस्त्रीन्पितृन्यन्नृभिर्नॄन् ॥ ३८॥

सरेफौ ऋकारऋकारावित्येतावोष्ठनिभौ उवर्णसदृशौकुर्वंति सदोषः । तिस्रोमातृस्त्रीन्पितृन् । कार्हिस्वित्तदिंद्रयन्नृभिर्नॄन् ।

दंत्यान्सकारोपनिभानघोषा न्व्यः पृष्ट्वीपृथिवीत्वापृथीति ॥३९॥

दंत्यानघोषान्सकारोपनिभान् सकारसदृशान् कु-

वन्तिसंदोषः । रथ्यः । पृथ्वी । पृथिवी । त्वा । पृथ्वी । इत्येवमादिषु । असर्जिरथ्योयथा । उर्वी पृथ्वीबहुले दूरेअंते । इदंविचार्यते । पृथिवीत्वेति त्वा ग्रहणं विशेषणार्थं पृथग्ग्रहणंवेति । कुतः संदेहः । प्रायेणथकारे सकारोपनिभोदोषः सलक्ष्यते न तकारइति विशेषणार्थं सेकेमन्यंते । अपरेथकारस्यैव सदोषः स्यात् । कथं थकारं सकारोपनिभमितिलघीयसासिद्धे यद्गन्यग्रहणंकरोति तेनपृथग्ग्रहणंमन्यंते । अदितिः सिंधुः पृथिवीउतद्यौः । यत्वासूर्यस्वर्भानुः । पृथ्वीयद्वांवैन्यः सादनेषु ।

ऊष्मांतस्थाप्रत्ययं रेफपूर्वं ऋस्वं लुंपंत्याहु रथाप्यसंतम् । पुरुषं तिं पुरुवारार्यमाष्ट्रांहरियोजनायहरियूपीयायां ॥ ४० ॥

ऊष्मप्रत्ययमंतस्थाप्रत्ययंचरेफपूर्वं ऋस्वंलुंपंति । नाशयंति । अथवा असंतमविद्यमानं ऋस्वरेफात्परंभाक्तृत्यादयंति तौदोषौवर्जयेत् । एतेषु पुरुषंतिमित्यादिषु षट्सु । यामिर्ध्वसंतिं पुरुषंतिमावतं । महोरायः पुरुवारप्रयंधि । पुरुवीराभि वृषभक्षितीनां । अयं मायातयज्जनः । आष्ट्रांपदं कृणुते अग्निधाने । शतचक्रत्नहरियोजनाय । शचीवतोयद्धरियूपीयायां । अर्यमा आष्ट्रामित्येतयोरसंतमाङ्गुरन्येषुलुंपंति ।

ऐयेरित्येकारमकारमाहु वैय-

ऽञ्चक्रामयंतौ यकारं ॥ ४१ ॥

ऐयैरित्यत्रवैयश्वेचऐकारस्थाने अकारमाहुः परंय-
कारंक्रामयंतः तौदोषौ । हूणीयमानो अपह्निमदैयैः ।
वैयश्वस्यश्रुतंनरा ।

तदेवान्येषु विपरीतमाहु स्तेर-
ट्यावट्यं हृदय्ययेति च ॥ ४२ ॥

तद्दोषद्वयमन्यपदेषु विपरीतमाहुः कथं अकारस्था-
ने ऐकारमाहुः परं यकारमक्रामयंतः तौदोषौ । तेर-
थ्या । वय्यं । हृदय्यया । इत्येवमादिषु । तेरथ्यासंसृजं-
तुनः । परिप्रयंतं वय्यसुपर्णसदम् । अग्नांहृदय्य १ याहृत्या ।

अकारस्यस्थान ऐकारमाहु लु-
पंति चसयमीकारमुत्तमं । वह्व-
च्चरं ह्याचरतां नयंति यथोनयो-
र्ध्वनयीतक्रोशयोरिति ॥ ४३ ॥

येनसह्वर्ततद्भातिसयः तंसयमीकारं अकारस्यस्था-
ने ऐकारमाहुः सयंईकारंलुपंतिच किञ्चान्यत् वह्व-
रं संतंह्याचरतां नयंति एतेत्रयश्चत्वारोवादोषाभव-
न्ति । जनयोः ध्वनयीत् । क्रोशयोः । इत्येवमादिषु ।
जरितुः काममूनयोः । मात्वाग्निर्ध्वनयोद्धूमगंधिः ।
दशक्रोशयोर्दशवाजिनोदात् ।

तदेवचान्यत्रविपर्ययेण कार्यऐ-

त्वे सयमीकारमाहुः । धातोर्विभर्तेर्जयतेर्नियश्चाभैष्मचाजैष्मनैष्टेतिचैषु ॥ ४४ ॥

तद्देवसर्ववान्यवचान्येषु पदेषु कर्तव्येऐत्वेविपर्ययेण अकारंकृत्वा सयमीकारमक्षरं असंतमाहुः तेतथैव दोषा भवंति । भिजिनीइत्येतेषां धातूनां प्रयोगे अभैष्म । अजैष्म । नैष्ट । इति । अभैष्मापतदुक्तु । अजैष्माद्यासनामच । दूरंनैष्टपरावतः ।

इकारस्यस्थानऋकारमाहुर्लकारंवाचंद्रनिर्णिक्सुशिल्पे ॥ ४५ ॥

इकारस्यस्थाने क्वचिद्दकारमाहुः । चन्द्रनिर्णिगित्येवमादिषु । क्वचित् लकारमाहुः सुशिल्पे इत्यादिषु । तौदोषौ लक्षयेत् । अतः सहस्रनिर्णिजा । यतरेववचराचंद्रनिर्णिक् । सुशिल्पे बृहतीमही ।

अनंतरेतद्विपरीतमाहुस्तालव्येशृंगेविभृयाद्विवृताः ॥ ४६ ॥

अनंतरेतालव्येसति ऋकारात्पूर्वोवायदिवा तालव्योवर्णोभवति तदातद्विधानं विपरीतमाहुः । यदुक्तं इकारस्यस्थानेऋकारमाहुः । तदिहऋकारस्थाने इकारमाहुः । सदोषोज्ञेयः । यथाशृङ्गे शिशीतेशृङ्गे रक्षसेविनिक्षे । यमौयमस्यविभृयादजामि । पाशाआ-

दित्यारिपर्वे विवृताः।

तालुस्थानोव्यञ्जनादुत्तरश्चेदय-
कारस्तत्रयकारमाहुः। शुनश्शे-
पः शाम्मिववजुषीणामत्केविर-
पशीतिनिदर्शनानि ॥ ४७ ॥

यकारादन्यस्तालुस्थानो वर्णोव्यंजनादुत्तरोभवति। तत्राविद्यमानं यकारमाहुः। यथा। शुनश्शेपोयमह्वद्गृभीतः। प्रपाकंशाम्मि प्रदिशो विदुष्टरः। विशांववजुंषीणां। आजामिरत्के अव्यत। विरपशीगोमतीमह्यी।

लुंपंति वासंतमेवं रवकारंज्यै-
ष्ठाय सम्वारन्नापृच्छ्यमृभ्वा ॥४८॥

अथक्वचिदेवसंतं कथंसंतं। व्यंजनादुत्तरंभंतं यकारंवकारंवालुंपंति। ज्यैष्ठाय। सम्वारन्। अथर्वणेनायं पादः। इत्तवशे ननुरेकगः समित्यादिः पादः अयंहत्तवशेन पादैकदेशोद्रष्टव्यः। आपृच्छ्यम्। ऋभ्वा। इत्येतेषु इन्द्रज्यैष्ठाय सुक्रतो। सम्वारन्नकिरस्य मघानि। आपृच्छ्यंधरुणं वाज्यर्षति। पुरुहूतोयः पुरुगर्तऋभ्वा।

व्यस्यंत्यंतमहतो व्यायतंतं दी-
र्घायुः सूर्योरुशदीतंऊर्जं ॥४९॥

महतः संयोगस्यांतभूतं महतोदीर्घात्परं अव्यायत-

मपृथग्भूतं रेफेनसक्तमित्यर्थः । तमंतर्यंस्यंति रेफात्पृथक्कुर्वन्ति । केनचित्स्वरेण व्यवदधतीत्यर्थः । दीर्घायुः । सूर्यः । रुशदूर्ते । ऊर्जं । इत्यादिषु । दीर्घायुरस्याय: पतिः । सूर्येणादिवस्मात् । पवमानोरुशदीर्त्तेपयोगोः । इषमूर्जंच पिन्वसि ।

लुंपंत्यंतस्थां क्रमयंतिचैतां स्वरात्सस्थानाद्वरां परांवा । स्वस्तयेधायि भुवनेयमूवुः ॥ ५० ॥

लुंपंत्यंतस्थां अथवा क्रमयंति एतांसंस्थानात्स्वरादवरां पूर्वांपरांवा लोपोद्विर्भावश्चेति । तौदोषौपरिहरेत् । स्वस्तये । अधायि । भुवना । इयं । ऊवुः । इत्यादिषु । स्वस्तयेवायुमुपब्रवामहै । उपप्रागा त्सुमन्मेधायि मन्म । भुवना । तंसंप्रश्नं भुवनायंत्यन्या । इयंशुष्मेभिर्विसखाइवारुजत् । ऊवुः । इंद्रायार्कमहिहत्यऊवुः ।

रक्तांह्रस्वं द्राघयंत्युग्रंओकः ॥ ५१ ॥

रक्तांह्रस्वंदीर्घं कुर्वंति सदोषः । उग्रं ओकः इति । यथा विष्वद्रूयान तविषीव उग्रँओकः । यथाप्रसूता सवितुः सवायंएव ।

ह्कारसोष्मोपहिता यकारा ह्कारावा सर्वसोष्मोष्मपूर्वात् । तत्सस्थानं पूर्वमूष्माणमाहुस्तु-

थ्यान्दघा आपृछ्यमृभ्वाब्ह्-
येऽन्त्यः ॥ ५२ ॥

हकारेणसोष्मभिश्चोपहितात् यकाराद्वकाराद्वा स-
र्वैरुष्मभिः सोष्मभिश्चोपहितात्पूर्वं तेषांसमानस्थानं
ऊष्माणमाहुः। सदोषः । तुध्यान् । दघ्याः। आपृ-
छ्यं। ऋभ्वा। ह्वये। यह्वः । इत्यादिषु । तुध्यान्का-
मान्करतेसिष्विदानः । पश्वासदघ्यायो अघस्यघाता।
आपृछ्यंधरुणं वाज्यर्षति । पुरुह्वतोयः पुरुगूर्त्तऋभ्वा।
तन्वदेवाँ उपह्वये । शतचक्रंयो २ ह्वोवर्त्तनिः। अश्व्यो
वसिष्व ऋस्वः।

पकारवर्गोपहिताच्च रक्तादन्त्यं
यमं टप्लुताप्नानमोभ्नात् ॥५३॥

पकारवर्गेणोपहिता द्रक्तादनुनासिकात्पूर्वं अन्त्यंय-
ममाधिकं आहुः। टप्लुत। आप्नानंओभ्नात्। इत्या-
दिषुदोषोवर्ज्यः। समुटप्लुत ऋभवः । आप्नानंतीर्थं
कइहप्रवोचत्। इह्वान्योभ्नादुशमानओजः।

अनुस्वारमुपधांवान्यवर्णां स्वरो-
पधात्सोष्मयमोदयश्चेत्॥ तंह्न-
व्यञ्मोजह्नतईह्वयंतीः सञ्-
ज्ञातरूपोथसञ्ज्ञानमिन्द्रः ॥५४॥

तत्सस्थानं पूर्वमित्यतः पूर्वमित्यनुवर्तते । पकार-

वर्गोपहिताश्वरक्तादित्यतो रक्तपदमनुवर्तते। स्वरोपधाद्र-क्तात्पूर्वमनुस्वारमाहुः। उपधांवाऽन्यवर्णांतौ दोषौपरिह-रेत् । रक्तः सः । सोष्मोदयोवायमोदयोवायद्भिवति त-ङ्घ्नन्ति । अङ्ग्नुः । जङ्घ्नः । ईङ्ख्यंतीः सञ्ज्ञानतद्धपः । सञ्-ज्ञानमिन्द्रः । इत्यादिषु। नकिष्टङ्घ्नन्त्यन्तितो न दूरात्। गोभिरञ्जमोमदायकम अनन्यस्तुप्रकृतेरितियमोदयत्वम्। पवमानस्यजङ्घ्नतः । ईङ्ख्यंती रपस्युवः। सञ्ज्ञानतद्धपश्चि-केतदस्मै । सञ्ज्ञानमिन्द्रस्याग्निस्य। एषायोजना येरक्ता-त्पूर्वमनुस्वारं कुर्वंतियेनकुर्वन्तितेपूर्वग्रहणं निवर्त्यंस्वरोप-धाद्रक्तात्परमनुस्वारमाहुः । उपधांवान्यवर्णौ कुर्वंति इतियोजनाकर्त्तव्या । केचिद्रक्तमेवानुस्वारमाहुः तैरेवं-योगः परिवर्ज्जितव्यः । अनुस्वारमुपधांवाऽन्यवर्णां स्व-रोपधात्सोष्मयमोदयस्येदिति । अस्मिन्पक्षे स्वरोपधं र-क्तमनुस्वारं कुर्वंतीतियोजनकार्या तान्येवोदाहरणानि।

सांतस्यादौ धारयंतः परक्रमं-शर्मन्स्यामास्मिन्सुजनाङ्क्षु धी-यतः ॥ ५५ ॥

सांतस्यस्य संयोगस्यादौ रक्तंधारयंतः विलंबमानाः परक्रमंकुर्वंति । शर्मन्स्याम । अन्सुजनाङ्क्षुधीयतः इ-तियथा । शर्मन्स्याममरुतामुपस्थे । अस्मिन्स्वे २ तक्षपू-तएनः । संयावन्नस्थे । अपसेवजनाङ्क्षुधीयतस्थित् ।

रक्तौरागः समवायेस्वराणां ननू-

नंनृम्णां नृमणान्नृभिर्नॄन् ॥ ५६ ॥

रक्तैः स्वराणां समवाये रागः क्रियते। ननूनं । नृम्णाम्। नृमणा। नृभिर्नॄन्। इत्यादिषु। ननूनमस्तिनोश्वः। नृम्णां तद्भुतमश्विना। नृमणा वीरपस्त्यः। कर्हिस्वित्त दिंद्रयन्नृभिर्नॄन्।

रक्तात्तुसोष्माक्रियते हकारोदध्यङ्हदेवान्हवते महान्हि ॥५७॥

रक्तात्परोहकारः सोष्माक्रियते। दध्यङ्ह। देवान्हवते। महान्हि। इत्यादिषु। दध्यङ्ह मेजनुषं। देवान्हवतऊनये। दच्तसोमहान्हिषः।

संयोगानां स्वरभक्त्याव्यवायो विक्रमणंक्रमणंवा यथोक्तं। विपर्ययोवाच्यततिल्विलेज्मन्द्रप्सोजुष्प्रन्मार्ज्जयोष्ट्रां प्रनेष्ट्रात् ॥ ५८ ॥

संयोगानां क्वचिदविद्यमानया स्वरभक्त्याव्यवायः क्रियतेक्वचिद्विक्रमणं। अविक्रमणंनाम द्विर्वचनाभावः। संयोगस्यचमध्ये क्वचित्स्वरमुत्पादयतीत्यर्थः। क्वचिच्चयथोक्तं क्रमणंक्रियते। क्वचिद्विपर्ययः। विपर्ययोनाम विद्यमानांस्वरभक्तिं नकुर्वन्तीत्यर्थः। इमेचत्वारो दोषाः संयोगस्यभवन्ति। तान्वर्जयेत्। व्यतइत्य-

त्वविक्रमणं तितिविले अजमन्नित्येतयोर्द्वित्वाभिधानमकृ-त्वा अनार्योषिता उच्चारयंति । तत्र स्वरभक्त्या व्यवाय-इव भवति । इत्से विक्रमणमेव । अजुष्रन्नित्यत्र ष-कारात्परं(१) अकारमिव किंचिदुत्पाद्यते । अयथोक्तं क्र-मणांकुर्वंति । सात्र्स्येत्यत्रविपर्ययः । अष्ट्रां । प्रनेष्ट्रादि-त्येतषु च विक्रमणमेव । व्यत । शूरोयोयुत्सु तन्वंपरिव्यत । तितिविले । भद्रे क्षेत्रे निमितातितिविलेवा । विश्वो वो अजम-न् भयते वनस्पतिः । द्रप्सः । द्रप्समस्कंदप्रथमाँ अनुद्यू-न् । स्वसारः श्यावीमरुषी मजुष्रन् । भरद्वाजान्सात्र्स्-यो अभ्ययष्ट । अष्ट्रांपूषाशिथिरामुद्वरी दृजत् । प्रदेवं । देववीतये । नेष्ट्रासोमं द्रविणोदः पिबक्रतुभिः ।

विवृत्तिषु प्रत्ययादि रदर्शनं य- थायाऐक्ष्व यश्चौशिजश्च ॥ ५८ ॥

विवृत्तिषु प्रत्ययादे रदर्शनंलोपः क्रियते सदोषः । यथा । याऐक्षः । इमागावः सरमेयाऐक्षः । कक्षीवं-तंयऔशिजः ।

इउसंधौसंध्यवचनं च कासु- चित्सइदस्ताकस्तउषोयथैते ॥६०॥

इउइत्येतयोः संधौकासुचिद्विवृत्तिषु संध्यक्षरवचनं प्रत्ययादर्शनंच क्रियते तौदोषौवर्जयेत् । यथा । सइद-स्ता । सइदस्तेवप्रतिधादसिष्यन् । सइंद्रचित्रं अभि । कस्तउषः कधप्रिये । तउत्स्नायरयिमभिप्रतस्थुः ।

(१) उकारमिवकिंचिदुत्पद्यते इत्यपिपाठः ।

समानवर्णासु विपर्ययो वा यथा-च्युती इंद्र कआसतश्च ॥ ६१ ॥

समानवर्णासु विवृत्तिषु कासुचिद्विपर्ययः क्रियते । प्रत्ययादेर्वाऽदर्शनं । कोविपर्ययः पूर्वोवर्णः परःक्रियते परश्चपूर्वः सविपर्ययः । तौदोषौलक्षयेत् । ऊतीइंद्र । कआसत इतियथा । आनस्तुत उपवाजेभि रूती-इंद्र । अच्छायो गंताना धमानमूतीइत्या । कआसतो वचसः संति । तआगमंतुतइह ।

अभिव्यादानेच विवृत्तिपूर्वे क-गठोरतोआपोवसाणति दीर्घे ॥ ६२ ॥

विवृत्तिः पूर्वो अस्मात्सविवृत्तिपूर्वः । तस्मिन्वि-वृत्तिपूर्वे कण्ठ्येदीर्घेप्रत्ययेइति । यत्र सप्तमीनिर्दे-शोविज्ञायते कआसतइत्येवमादिष्वभिव्यादानमेवस्या-त् । सतवविपर्यय उक्तः समानवर्णासु विपर्ययो-वेति । तस्मात्सप्तमीनिर्देशः कथं । विवृत्तिः पूर्वा अस्मादक्षराद्विवृत्तिपूर्वमक्षरं विवृत्तेः पूर्वमपिविवृत्ति-पूर्वं तउभेकण्ठ्यदीर्घे यदाभवत स्तदा कासुचिद्वृत्तिष्वभि-व्यादानंइति । आदानमारंभः विविधंविपुलंविशा-लंवा दानं अथवाआदानमेवव्यादानं अथवाकेन-चिदभिव्याप्त मभिभूतं व्यादानंयस्य तदिदमभिव्यादानं भवत्यक्षरं । किमुक्तंभवति । पाद मात्राविवृत्ति*रिह समधिकाक्रियते । तयापरस्यारंभोव्याप्यतइत्यर्थः ।

क्त। ताआपः। अवसाया। इत्येवमादिषु। ताआ-
पोदेवी रिहमामवंतु। स्वस्त्यागृहेभ्य आवसायाविमो-
चनात्। याआपोदिव्याः। ताआचरंति। तेदोषाः।
तत्रश्लोकः। अभ्रमध्ये यथाविद्यु दृश्यते मणिसूत्रवत्।
एषच्छेदोविहृत्तीनां यथाबालेषुकर्त्तरि।

नदोषाणां स्वरसंयोगजाना मं-
तोगम्यः संख्ययाथेतरेषां ॥ ६३ ॥

एषांदोषाणां स्वरसंयोगजानां स्वरेषूच्यमानेषु उ-
त्पद्यंते तेषामित्यर्थः। अथेतरेषां स्वरसंयोगजानां सं-
ख्यागणनया अंतः पारंगंतुमशक्यं। कस्मात्। उ-
च्चावचाः प्रयोक्तारः नानास्थानकरणानुप्रदानस्वरो-
च्चारणाः तथा नानाप्रतिस्वरभावशीलसमाचाराः केषु
वर्णेषु कान् जनयंतीत्यज्ञानात्।

शक्यस्तुशास्त्रादधि साधुधर्मायु-
क्तेन कृत्स्नः प्रतिपत्तु मस्मा-
त् ॥ ६४ ॥

अस्माच्छास्त्रादधि वर्णानां कृत्स्नोवर्णधर्मः साधु-
युक्तः। साधयताकृत्स्नेनसाधुधर्मयुक्तेनप्रतिपत्तुंशक्यः
साधुयुक्तोनाममनो वाग्बुद्धियुक्तः। तत्वार्थशिक्षालक्षण-
वित्। ऊहापोहवितर्कज्ञः। शास्त्रागमकुशलः। ध्या-
नपरोऽवितथाध्यवसायी।

अकारस्यकरणावस्थयान्यान्स्व-
रान्ब्रूयात् । अक्टद्दुउ एवमा-
द्यान्स्वरान्ब्रूयात् ॥ ६५ ॥

तद्विसंपन्नमाहुः । अकारस्यकरणावस्थया अक्टद्दु-
ईउऊ इत्येवमाद्यानपिस्वरा न्ब्रूयात्तद्विसंपन्नं भवति ।

परानकारोदयवद्विवच्चेत् सर्वंच-
वर्णानिति संपदेषा ॥ ६६ ॥

परान्ककारादीन्यपि व्यंजनानिव्यंजनसंज्ञकान्वर्णा-
न् अकारोदयवद्कारोदयानितिविवच्चेद्वक्तुमिच्छेत् । सर्वे-
ववर्णानित्याहु राचार्याः । ककाकिकीकुकूइति यथा ।
संपदेषावर्णानां । सासंपद्भ्यांपटलाभ्यांव्याख्याता ।

शास्त्रापवादा त्प्रतिपत्ति भेदा-
न्निंदंत्यकृत्स्नेतिच वर्णशिच्चां ॥६७॥

शास्त्राणामपवादाद्दोषाः संति । पुनरुक्तता अ-
विस्पष्टतार्थो कष्ट शब्दतार्थो अशक्यार्थतेति । एवमा-
द्यः । तेष्वशक्यादिषुदोषेषु अस्मिंछास्त्रे संहितमप्ये-
कमक्षरं यथोच्चारयितुं नशक्यं अस्माच्छास्त्रादपवादात् ।
प्रतिपत्तिभेदात् । प्रतिपत्तिभेदाच्च निंदंत्यकृत्स्नेतिच
वर्णशिच्चां । किमिति । अकृत्स्नेत्यप्रयोजनेत्यर्थः । प्र-
तिपत्तिभेदोनाम आहुर्घोषंघोषवतामकारमित्युक्त्वा अ-

श्रोत्पन्नावपर ऊष्मघोषाविस्येवमादीनां वर्णप्रतिपत्ति-भेदोविरुद्धविधानानि ।

नैतेनशास्त्रेण विशिष्यतेन्यैः कृ-त्स्नंच वेदांगमनिंद्यमार्षं ॥१८॥

यदुच्यते इह यथोक्तंतथावर्णोच्चारणं कर्त्तुमशक्यं त-स्मादकृत्स्नेयं वर्णशिक्षेति तन्न । कथं शिक्षा एतेने-वविधानेनान्यैः शास्त्रै र्नविशिष्यते । अन्येष्वपि शास्त्रे-षुहि ग्रस्तनिरस्त इत्यादयोवर्णानांदोषाविधीयंते । ता-निच शक्यार्थविधानात् । अकृत्स्नानीतिनोच्यंते ता-निच कृत्स्नान्येवभवतितस्मादिदमपिशास्त्रंकृत्स्नं संभवि-तुमर्हति । प्रतिपत्तिभेदश्चन । अन्येष्वपिशास्त्रेषुएवं विधाविकल्पाः संति । तस्मादनिंद्यं षडंगवत् । षट्-सुवेदांगेषु इदमप्येकं अंगं कल्पोव्याकरणं निरुक्तं शि-क्षाछंदोविचितिर्ज्योतिषा मयनं इति । तस्माच्चानिंद्यं आर्षञ्च वेदांगशास्त्रं । आगमश्च लोकेप्रमाणं भवति । तस्माच्चानिंद्य मपिच । अत्रश्लोकाः । उक्तोदाहरणं-किंचि द्बहुग्रंथधरोनरः । आचिप्तःशैक्षिकेणेह तूष्णीमि-श्विशाम्यति ॥ १ ॥ सुबहुज्ञोपियोभूत्वा शिक्षांचेन्ना-भिगच्छति । नराजतिसभायां सशैक्षिकस्यसमीपतः ॥२॥ ब्राह्मणेषुसमेतेषु विद्वत्सुचबहुष्वपि । ब्रह्मोद्येद्येप्रवृत्तेयः शैक्षिकःसविराजते ॥ ३ ॥

इतिश्री पार्षदव्याख्याया मानं-

दपुरवास्तव्यवज्रटपुत्रोव्व-
टकृते प्रातिशाख्यभा
ष्ये चतुर्दशंपटलं
समाप्तम् ॥

पारायणंवर्तये ब्रह्मचारी गुरुः-
शिष्येभ्यस्तदनुव्रतेभ्यः। अध्या-
सीनोदिशमेकां प्रशस्तां प्राची-
मुदीची मपराजितां वा ॥ १ ॥

पारायणमध्यापनं। वर्तयेत् कुर्यात्। गुरुरुपा-
ध्यायः ब्रह्मचारीभूत्वातावंतंकालं शिष्येभ्यस्तदनुव्रतेभ्य-
गुरौ अध्ययनेचयेभक्ताः तेभ्यः प्रशस्तां एकां दिशंअ
ध्यासीनः। प्राचींपूर्वां उदीचीमुत्तरां अपराजितां वा
प्रागुदीचीम्।

एकः श्रोतादक्षिणतो निषीदे-
द्द्वौवा ॥ २ ॥

एकःश्रोताशिष्यः दक्षिणतः निषीदेत्। उपविशे-
दित्यर्थः। यदिद्वौश्रोतारौ स्यातां दक्षिणतएवनिषीदेतां।

भूयांसस्तुयथावकाशं ॥ ३ ॥

भूयांसः बहवः श्रोतारो यदिस्युः यथावकाशं यत्र-
यत्रावकाशं तत्रतत्रनिषीदेयुः।

तेधीहिभो ३ इत्यभि चोदयंति
गुरुंशिष्य उपसंगृह्य सर्वे ॥ ४ ॥

तेसर्वेंशिष्याः उपसंगृह्य गुरोः पादौ पाणिभ्यां उपपीड्यशिरसिकृत्वा अधीहिभो ३ इत्यनेन गुरुमभिचोदयंति ।

सओ ३ मितिप्रस्वरति त्रिमात्रः
प्रस्वारस्थाने सभवत्युदात्तः । चतुर्मात्रोवार्द्धपूर्वोनुदात्तः षण्मात्रोवाभवति द्विःस्वरःसन् ॥ ५ ॥

सगुरुः ओं ३ इति प्रस्वरतिशब्दंकरोति । त्रिमात्रः प्रस्वारः सओंकारशब्दः त्रिमात्रः स्थाने भवति । उदात्तश्च । किमिदंस्थानमिति । उपांशुस्थानमिति । उपांशुस्थानं निषादपंचममध्यमतारेषु तेयेनस्थानेन प्रयोज्यंस्यात् तेनैवप्रकारेण प्रणवंकुर्यात् । तान्येतान्युक्तानि भवंति । अथवा चतुर्मात्रः संभवति । अर्द्धपूर्वः अनुदात्तोयस्यसअर्द्धपूर्वोनुदात्तः । अथवाषण्मात्रो भवति-द्विःस्वरःसन् इमेत्रयः प्रणवाः । तेषामाद्योवहुभिः परिगृहीतः । न मध्यमः । किमितिनज्ञायते । अस्माभिस्तु उत्तममंत्यंमत्वातथापद्यते ।

अध्येतुरध्यापयितुश्च नित्यंस्वर्गद्वारं ब्रह्मवरिष्ठमेतत् मुखंस्वा-

ध्यायस्य भवेत् ॥ ६ ॥

अध्येतुः शिष्यस्याध्यापयितुश्च मुखंनित्यं प्रणवोभव-ति । स्वर्गद्वारंवरिष्ठं प्रधानं ब्रह्मइत्येतदक्षरं प्रतीयात् जानीयात् ।

मुखमादौ स्वाध्यायस्य भवेत्त-द्ब्रह्म । नचैतत्संदध्यात्स्वा-ध्यायगतं परेण ॥ ७ ॥

एतदोंकारं स्वाध्यायार्थं प्रयुक्तं परपादेन वार्द्धर्चेन-वा नसंदध्यात् । यज्ञकर्मणितु संधानं भवति चो-दितत्वात् ।

प्रचोदितोऽभिक्रमते यथास्यक्र-मः परस्ताद्विहितस्तथैव ॥ ८ ॥

तथाशिष्यस्य प्रचोदितोगुरुः ओङ्कारंकृत्वा अभिक्र-मते । अध्ययनमुच्चारयति । यथा अस्यक्रमः आनुपूर्व्यं-म्परस्तादुत्तरत्र विहितंदक्षिणाय प्रथमंप्रश्नमाहेति तथैव ।

सर्वोदात्तंत्विहतस्मि न्नपृक्तम-च्चिप्रयुक्तं द्विरुपस्थितंवा ॥ ९ ॥

इहपारायण प्रवचने तस्मिन्नभिक्रमे सर्वोदात्तंच य-त्तत्पदं अच्चिप्रयुक्तंवा अपृक्तंवा उपस्थितंवा । शिष्यज्ञाप-नार्थं गुरुर्द्विरुच्चारयति । प्र । आ । रोदसीइति । उभेइति-यथा । अच्चिप्रयुक्तमितिकस्मात् । उहेति । एवमेकेष-

परे उद्गादाकारयोः । अपि सर्वोदात्तमित्येव सिद्धत्वात् । अपृक्तमचिप्रयुक्त मित्यनर्थकं भवति । तस्मात्त्वामंतरेण वर्णयंति । उद्देति । यथाऽपृक्तं सन्नचैप्रयुक्तंइति । ननु अत्रापि उपस्थितमित्येवसिद्धं । सत्यं । नियमार्थमिदमुच्यते । इहमाभूत् । क्व । उद्देति । उद्ग्यदेव इत्येवमादौतु नियमः स्यात् । अथवा उपस्थितंवेति उपस्थितविभाषाप्राप्ते नित्यार्थमस्य ग्रहणं । अपृक्तमचिप्रयुक्तमिति । १ ।

अभिक्रांतेवैपदेवाधिकेवा पूर्वपदंप्रथमः प्राहशिष्यः ॥ १० ॥

गुरुणार्द्धपदेवाधिकेवा प्रोक्तेपूर्वपदं प्रश्नाद्यंपदं प्राहदक्षिणः शिष्यः ततः पश्चादितरे प्राहुः । अस्मिन्पटलेयदुक्तं विधानं तेनदक्षिणात्याः पठंति तस्मादिष्टज्ञापनत्वाभिप्रायेणकिंचिदुक्तंमत्वातत्कस्मिंश्चिन्नइति ।

निर्वाच्येतु भो ३ इतिचोदनास्या न्निरुक्तं ओंभो ३ इतिचाभ्यनुज्ञा ॥ ११ ॥

शिष्येणनिर्वक्तव्ये गुरोः भोः ३ इतिचोदनास्यात् तेननिरुक्ते ओंभो ३ इतिचार्थं पुनर्गृहीतमावर्तयितुमभ्यनुज्ञास्यात् ।

परिपन्नं प्राकृतमूष्मसंधिं नका-

रस्य लोपरेफोष्मभावं । असं-
युक्त मृपदं रेफसंधिं विवृत्तिमि-
त्यत्र निदर्शनानि ॥ १२ ॥

परिपन्नंलंराजेंद्रेत्यादि । प्राकृतमक्षरं ऊष्मसंधौ । अग्निश्चयः । यस्तेमन्योयः शंवरं पर्वतेषु । नकारलोपभावं । अस्माँ अस्माँ इत् । रेफभाव । रश्मीँरिव । अभीशूँरिव । ऊष्मभावः पशूंन्ताँश्चक्रे । तांस्तेअश्याम । नःपात्रं । असंयुक्तं । तववायदृतस्पते पदं । यन्नृभिर्नृ-न् । रेफसंधिं । अन्तर्वावत् । अग्नीरक्षांसि । विवृत्तिं सइंपाहि । इत्येतानि निदर्शनान्याहुराचार्याः । कस्यनिदर्शनानीत्येतदागमयितव्यं । केचिदेतं श्लोकं नपठंति ।

प्रत्युच्चार्यैतद्वचनं परस्यशिष्य-
स्यस्याद्भो ३ इतिचोदनावा ।
अर्द्धर्चोदर्केषु तुवर्जयेयु रध्या-
यान्तेषूभयथास्मरंति ॥ १३ ॥

प्रत्युच्चार्यैतद्वचनं परस्यगुरोरित्यर्थः । शिष्यस्याद्भो ३ इतिचोदना स्यात् । नवास्यात् । अर्द्धर्चोदर्केषु अर्द्धर्चसमयेषु तांचोदनां वर्जयेयुः । अध्यायांतेषु अर्धर्चोदर्केषु-उभयथास्मरंत्याचार्याः वर्जनंवानवेति ।

गुरुः शिष्यस्यपदमाहमुख्यं स-

मासश्चेदसमासो यदिद्वे ॥ १४ ॥

गुरुः शिष्यस्य प्रश्ने मुख्यं एकपदमाह यदिसमासः यद्यसमासः द्वेपदेश्चाह ।

एतेनकल्पेन समाप्यप्रश्नं प्रत्याम्नाय स्तम्पुनरेवसर्वे ॥ १५ ॥

एतेनविधानेन प्रश्नंसमाप्य सर्वेशिष्या स्तमेव प्रश्नं पुनः पुनरभ्यासयेयुः ।

ततऊर्ध्वंसन्ततंसंहतेनप्रविग्रहेण मृदवग्रहेण । सर्वोदात्तेन चचर्चयेयुः सर्वइमानुपस्थापयंतः पदानि ॥ १६ ॥

तस्मादभ्यासादूर्ध्वंसंततं अव्यवस्थितं संहतं समानं । समानशब्देन प्रविग्रहेण सप्रश्लिष्टः यस्मिन्संभवति सप्रविष्टः । इंद्रोइत्येवमादिषु प्रविग्रहेषु प्रश्लिष्टं विश्लिष्टं कुर्यात् । कालाधिक्येनकुर्यादित्यर्थः । मृदवः अवग्रहायस्मिन्समृदवग्रहः तेनसर्वोदात्तेनस्वरेण चर्चयेयुः । आदिपदिकाश्चोत्तरपदिकाश्च भूत्वा सर्वेशिष्यास्तमेवप्रश्नं । इमानिपदानि । यानिवक्ष्यामः तान्युपस्थापयंतः सेतिकरणानिकुर्वन्तइत्यर्थः ॥

अभ्युत्परानिर्व्युपसम्प्रति प्रयध्य-

त्यपादुःस्वपिपर्यवानु ॥ १७ ॥

अभि । उत् । परा । निः । वि० उप । सं । प्रति । प्र । नि । अधि । अति० अप० आ० दुः । सु । अपि । परि । अव । अनु० इत्येतानिपदानि केषांचिच्छाखिनां सेतिकरणा-निभवंति । उदिति । परेति । अस्माकंतुनपुनः यानि सेतिकरणानि तेष्वेवायंविधिः कर्त्तव्यः ।

आद्यंस्थितोपस्थित मेकमेषाम-र्द्धर्चांते कुर्युरथोद्विपन्धौ ॥ १८ ॥

तेषामुपसर्गाणा माद्यमभीत्येकमुपसर्गं मर्द्धर्चांतेवर्त-मानंअथोद्विसंधौ वा विहृत्तिस्थाने स्थितोपस्थितं कु-र्युः तेषामेवशाखिनां । अभीत्यभि ।

चद्यद्धिवेतिच्च सर्वंचतेषामनेकं-चेत्संनिपते द्वितीयं ॥ १९ ॥

चद्यद्धिवेत्येतानि सर्वंस्थितोपस्थितानिकुर्युः चेतिच तेषामुपसर्गाणां अभ्यादिः वांतानांयद्यनेकं संनिप-तेतर्हि द्वितीयमेवसेतिकरणं कुर्युः । नेतरत् । उदिति ।

समस्यंतश्च द्विपदाद्यर्द्धर्चौ व्यव-स्यंत इतराश्चर्चयेयुः ॥ २० ॥

पश्वानतायुमित्येवमादीनां द्विपदानां उक्तानां द्वौ-द्वौअर्द्धर्चौएकामृचंकुर्वन्तः । व्यवस्यंतः पृथक्कुर्वन्तः इत-

राश्वधिकायाः सूक्तेषु साधुर्नरष्मुरिति यथातास्तथैव चर्चयेयुः । आदिग्रहणादादिपदस्यैतदुच्यते ।

दक्षिणायप्रथमं प्रश्नमाहप्रदक्षिणं ततऊर्ध्वंपरीयुः ॥ २१ ॥

दक्षिणायशिष्याय प्रथमंप्रश्नमाह गुरुः ततअध्ययनारंभादूर्ध्वंकश्चित्गच्छंतः शिष्याः प्रदक्षिणमाचार्यंकृत्वा परीयुः प्रदक्षिणावृत्तीः परीयुरितिवायोजनीयं ।

एवंसर्वे प्रश्नशोऽध्यायमुक्त्वोपसंगृह्या तिसृष्टायथार्थम् ॥ २२ ॥

एवमेतेनविधिनाप्रश्नशः सर्वेशिष्या अध्ययनांतंगत्वा उपसंगृह्यगुरुं तेनातिसृष्टायथार्थं यथार्थाः स्युः । यद्यत्स्वकर्मतत्तत्कुर्युरित्यर्थः किमिदंप्रश्नइति ।

प्रश्नस्तृचः ॥ २३ ॥

तृचः । प्रश्नइत्युच्यते ।

पंक्तिषुतुद्वृचोवा ॥ २४ ॥

पंक्तिषुक्षुद्वृचोवाप्रश्नोभवति तृचोवा ।

द्वेद्वे त्वपंक्तेरधिकाक्षरेषु ॥ २५ ॥

त्रिष्टुभादिषु तस्माद्वेद्वे एवऋचः प्रश्नोभवति ।

एकाचसूक्तं ॥ २६ ॥

एकाऋक् यत्सूक्तंभवति । साचप्रश्नोभवति ।

समयास्त्वगण्याः परावराद्ध्र्याः २७॥

समयाः परावराद्ध्र्याः प्रश्नेषुगण्यंते ।

द्विपदे यथैका ॥ २८ ॥

द्विपदेयथा एकाहक् तथागण्यंते ।

सूक्तस्यशेषोल्पतरो यदिस्या त्पूर्वंसगच्छेत् ॥ २९ ॥

एवंप्रश्नेषु परिकल्प्यमानेषु सूक्तस्यशेषं यदिस्वल्पतरंस्यात् । प्रश्नात्पूर्वंसप्रश्नोगच्छेत् ।

यदितुतृचोवा ॥ ३० ॥

यदिसूक्तस्य शेषोतृचोभवति । पूर्वंप्रश्न गच्छेद्वा न वेति । पंक्त्याः प्राक् छंदसः तृचंपूर्वमेवगच्छेत् । यदिपराणि पंक्त्या स्युः । तदापूर्वंनगच्छेत् । यदिमिश्राणिस्युः पंक्त्यांतर्हि क्वचित्पृथक्स्यात्पूर्वंगच्छेद्वा संख्यावशेन ।

तेषष्टिरध्याय उपाधिकावा सूक्ते समाप्ते यदितेसमाप्ताः ॥ ३१ ॥

तेप्रश्नाः एवंगण्यमानाः एकैकस्मिन्नध्याये षष्टिर्भवंति । उपाधिकावाभवंति । सूक्तेषुसमाप्तेषु यदितेप्रश्नाः समाप्यंति यदिषष्टिः पूर्णाभवंतीत्यर्थः । तदायावद्भिः प्रश्नैः सूक्तशेषः समाप्यते तावद्भिरधिका

षष्ठिर्भवति । एवंप्रायेणसर्वत्रयुज्यते । क्वचित्सूक्ते समाप्तेइति । शतधारमिति । जातिग्रहणं द्रष्टव्यं । सूक्तेषुसमाप्तेष्विति । यथाचतुः षष्ठिरध्यायाः ।

भो ३ इत्यर्द्धर्चेगुरुणोक्तआह शिष्य ओं भो ३ इत्युचिता स्मृचं च ॥ ३२ ॥

अध्यायस्यांत्ये अर्द्धर्चेसमाप्तेभो ३ इति गुरुणा-उक्तः शिष्यः ओं भो ३ इत्याह । चाथैवार्द्धंयुष्मदनुध्यानात् समाप्तमित्यर्थः । उक्तांचऋचमाह । उचितास्यात् तथा नमोब्रह्मणेनमोस्त्वग्नय इति यानित्यं स्वाध्यायेपरिधानीया ऋक्स्यात् ।

अथैकेप्राहुरनुसंहितं तत्पारायणे प्रवचनंप्रशस्तं ॥ ३३ ॥

अथैकेआचार्याः प्राहुः । एतदेवपारायणस्यप्रवचनं अनुसंहितं । संहिताक्रमेण प्रशस्तंइति ॥ ३ ॥

इति श्री पार्षदव्याख्याया मानंदपुरवास्तव्यवजटपुत्रोवटकृते प्रातिशाख्यभाष्ये पंचदशं पटलम् ।

गायत्र्युष्णिगनुष्टुप्चबृहतीच प्र-
जापतेः । पंक्तिस्त्रिष्टुब्जगतीच-
सप्तछन्दांसि तानि ह । अष्टाक्ष-
रप्रभृतीनि ॥ १ ॥

गायत्री । उष्णिक् । अनुष्टप् बृहती पंक्तिः । त्रि-
ष्टुप् जगती । इत्यष्टाक्षरप्रभृतीनिसप्तछंदांसि तानिप्र-
जापतेर्वेदितव्यानि ।

चतुर्भूयः परंपरं ॥ २ ॥

यथापरंपरं तेषु छंदःसु पूर्वस्मात्पूर्वस्माच्छन्दसः उत्त-
रमुत्तरं चतुर्भिरक्षरै भूयोभवति ।

दैवान्यपिच सप्तैव ॥ ३ ॥

देवानामपि सप्तछंदांसिभवंति -

सप्तचैवा सुराण्यपि ॥ ४ ॥

आसुराण्यपि सप्तैव छंदांसि भवंति ।

एकोत्तराणिदैवानां तान्यैवैका-
क्षरादधि ॥ ५ ॥

तान्येवगायत्र्यादीनि एकाक्षरप्रभृतीनि एकोत्तराणि
देवानांभवंति ।

एकावमान्यसुराणां ततः पंच-

दशाक्षरात्॥ ६॥

तान्येवपंचदशाक्षरप्रभृति चैमानि एकावमानि एकैकन्यूनानि असुराणांभवंति।

तानित्रीणि समागम्यसनामानि सनामतत्। एकंभवत्यृषिछंदस्तथागच्छति संपदं॥ ७॥

तानिप्रजापति देवासुराणां छंदांसि समाननामानितानित्रीणि समागम्य सहभूत्वा सहभूतानां सनामतदेकं ऋषिछंदोभवति। तथाकथं। प्रजापतेर्गायत्रमष्टाक्षरं देवानामेकाक्षरं असुराणांपञ्चदशाक्षरं। तानिचतुर्विंशतेः चतुरुत्तराणिभवंति। एवंसर्वाणिछंदांसि संपदंगछंति

एवंत्रिप्रकृतीन्याहु र्युक्तानिचतुरुत्तरं। ऋषिछंदांसि॥ ८॥

एवंकथंयुक्तानि समाननामानि सनामेतिच त्रिः प्रकृतीनि ऋषिछंदांसि चतुरुत्तराण्याहुः।

तैः प्रायोमंत्रः श्लोकश्चवर्त्तते॥९॥

तैर्ऋषिछंदोभिः प्रायेणमंत्रोनुवर्त्तते श्लोकश्च। १।

तत्पादोयजुषां छंदः साम्नांतुद्वाहचां त्रयः॥ १०॥

तस्मादस्तेषां ऋषिछंदसां चतुर्थांशः यजुषांछंदोवेदितव्यं । साम्नांछन्दो द्वौपादौवेदितव्यौ । ऋचांछंदः त्रयः पादावेदितव्यं ।

गायत्र्यादि जगत्यंतमेकद्वित्र्यधिकंतु तत् । आर्षवत्तत्समाहारो ब्राह्मोवर्गः षडुत्तरः ॥ ११ ॥

तानिछंदांसियजुः सामऋचांगायत्र्यादिजगत्यंतानि क्रमेणएकद्वित्र्यधिकानि भवंति । कः क्रमः । यजुषांगायत्रीषडक्षरा । उष्णिक्सप्ताक्षरा । तथासाम्नांद्वादशाक्षरागायत्री उष्णिक्चतुर्दशाक्षरा । तथा ऋचा मष्टादशाक्षरागायत्री । उष्णिगेकविंशत्यक्षरा । इति एवंसर्वत्र । तत्समाहारस्तेषां ऋग्यजुः साम्नांछंदसांसमाहारः आर्षवत् । ऋषिछंदोवत् द्रष्टव्यः । सब्राह्मः ब्रह्मणोयंवर्गगणः षडुत्तरोवेदितव्यः ।

अक्षराणितुषट्त्रिंशद्गायत्रीब्रह्मणोमिता । यजुषांषडृचां त्रिःषट्साम्नां द्वादशसंपदि ॥ १२ ॥

कथं यद्ब्रह्मणोगायत्रीषट्त्रिंशदक्षरा भवतीति मन्यसे तच्छृणु । यजुषांगायत्रीषडक्षरा । ऋचांत्रिःषट् । अष्टादशाक्षरेत्यर्थः । साम्नांद्वादशाक्षरा । अस्यांसंपदि षट्त्रिंशदक्षरा भवति ।

ऋषीणांतु त्रयोवर्गाः सप्तका-एवनेतरे ऋषिछंदांसि ॥ १३ ॥

प्रजापतिप्रभृतीनि छंदांसिव्याख्यातानि । तेषुऋ-षिछंदांसि । सोदाहरणानि विस्तरेणवक्ष्यति ।

गायत्री साचतुर्विंशत्यक्षरा । अ-ष्टाक्षरास्त्रयः पादाश्चत्वारोवाष-डक्षराः ॥ १४ ॥

तेषु गायत्रीचतुर्विंशत्यक्षरास्यात् । तस्या अष्टाक्षराः त्रयः पादाभवंति । अग्निमीळे पुरोहितं । षडक्षरा वाचत्वारः पादाभवंति । इंद्रः शचीपतिर्बलेन व्री-डितः । दुश्च्यवनो वृषासमत्सुसासहिः । इतिषडक्षरा-याउदाहरणं ।

पंचकाः पंचषड्वांत्यः पदपंक्ति-र्हिसाभुरिक् । द्वौवापादौचतु-ष्कश्चषट्कश्चैकस्त्रिपंचकाः ॥१५॥

पंचाक्षराः पंचपादाभवंति यस्याः साभुरिक्पदपं-क्तिर्वेदितव्या । षडक्षरोवा अंत्यः पादोभवति चत्वा-रश्चपंचकाः साभुरिक्पद पंक्तिर्वेदितव्या । द्वौपादौएकश्च तुष्कः एकः षट्कः त्रयश्चपंचाक्षराभवंति ।

अधाहींद्रेतिच त्वचौष्टतमग्ने-

तमित्यृचः ॥ १६ ॥

अधाहींद्रेतिद्दचौ । घृतमग्नेतमद्य । इत्येतास्त्वृचः । तासामुदाहरणानि भवंति । अधाह्यग्ने । इंद्रेतिषोडशिनस्तोविय: । इंद्रजुषस्व । प्रवहायाहि । सूरहरीह । पि वासुतस्यमतिर्न । मध्वस्त्वकान: । चारुमंदाय । एवमष्टाचरे विनापंचका: पंचपादाभवंति । घृतेनपूतं । अग्नेतमद्य।

अष्टकोदशकः सप्तकोविद्वांसाविति साभुरिक् ॥ १७ ॥

अष्टक: प्रथम: पाद: उत्तरोदशक: अंत्य: सप्तक: साभुरिक् । उदाहरणं विद्वांसाविहुर: पृच्छेत् ।

युवाकुहीतिगायत्री त्रय: सप्ताचराविराट्। सैषापादनिचृन्नाम गायत्र्येवैकविंशिका ॥ १८ ॥

युवाकुहिशचीप्रनामित्येषा त्रि: सप्ताचरागायत्री एवंविराट् एकविंशत्यचरापादनिचृन्नामवेदितव्या ।

षट्कः सप्तकयोर्मध्ये स्तोतॄणांविवाचीति । यस्याः सातिनिचृन्नाम गायत्रीद्विदंशाक्षरा ॥ १६ ॥

सप्तकयोर्मध्येषट्कः पादः साऽतिनिचृन्नामविंशत्य-क्षरागायत्री । पुरुतमंपुरूणांस्तोतृणां ।

षट्कसप्तकयोर्मध्येस्तु ह्यासा-वातिथिं । षडक्षरः प्रकृत्यैष-व्यूहेनाष्टाक्षरोपि वा ॥ २० ॥

प्रकृत्या एषषडक्षरः अक्षरव्यूहेनअष्टाक्षरः षट्कस-प्तकयोर्मध्ये । साचगायत्री अतिनिचृदेव । प्रेष्ठमुप्रि-याणामिति । ३ ।

उत्तरोत्तरिणः पादाः षट्सप्ता-ष्टाविति त्रयः । गायत्रीवर्द्धमा-नैषा त्वमग्नेयज्ञानामिति ॥ २१ ॥

उत्तरोत्तरिण एकैकाक्षरेणवर्द्धमानाः त्रयः पादा-षट्सप्ताष्टाक्षराः यस्याः सागायत्री वर्द्धमानानामवे-दितव्या । त्वमग्नेयज्ञानां ।

अष्टकौमध्यमः षट्कएकेषा मु-पदिश्यते ॥ २२ ॥

एकेषांशाखिनां आद्यंतौ अष्टकौ पादौ मध्यमः ष-ट्कः यस्याः सावर्द्धमानैव उपदिश्यते ।

सनोवाजेषु पादौद्वौजागतौ द्वि-पदोच्यते ॥ २३ ॥

मनोवाजेऽवविता पुरूवसुरिति जागतौपादौद्विप-दागायत्रीउच्यते ।

आद्यांत्यौसप्तकौ यस्या मध्ये-
चदशकोभवेत् । यवमध्याच-
गायत्री समुन्वद्भुतिदृश्यते ॥ २४ ॥

आद्यांत्यौपादौसप्तकौयस्याः मध्येचदशको भवेत् । यवमध्यानाम सागायत्रीवेदितव्या । समुन्वेयोवसूनां ।

षडक्षरः सप्ताक्षरस्ततएकाद-
शाक्षरः । एषोष्णिग्गर्भागायत्री
तामेअग्रव्यानामिति ॥ २५ ॥

षडक्षरःप्रथमःपादः ततोद्वितीयः सप्ताक्षरः तृतीयः एकादशाक्षरःयस्याः एषाउष्णिग्गर्भानामगायत्रीवेदितः व्या । तामेअग्रव्यानांहरीणां नितोशना ।

अष्टाविंशत्यक्षरोष्णिक्सापादै
र्वर्ततेत्रिभिः । पूर्वावष्टाक्षरौ-
पादौ तृतीयोद्वादशाक्षरः ॥२६॥

यस्याअष्टाविंशत्यक्षराणि साउष्णिग्भवति । त्रिभि-स्त्रपादैर्वर्तते । पूर्वौद्वावष्टाक्षरौपादौ तृतीयोद्वादशाक्षर-सोष्णिक्भवति ॥ ४ ॥

पुरउष्णिकतुसातस्मिन् प्रथमे-

मध्यमेककुप् ॥ २७ ॥

तस्मिन्द्वादशाक्षरे प्रथमेसति पुरउष्णिग्भवति । तस्मिन्द्वादशाक्षरे मध्यमेसतिककुब्भवति ।

अग्नेवाजस्य तत्त्वक्षुःसुदेवः समहेतिच । ऋचोनिदर्शनायैताः परायास्तायथोदिताः ॥ २८ ॥

उष्णिक्पुरउष्णिक्ककुभां क्रमेणैताऋचोनिदर्शनानि भवंति । अग्नेवाजस्यगोमतः । तच्चक्षुर्देवहितं । सुदेवःसमहासति । पराःयाःऋचः ताअपियथोदिताः उत्तरत्रयथाकथ्यमानाः तत्रतथाजानीयात् ।

समाक्षरैश्चतुर्भिर्देनदंमंसीमहीतिच । पादैरनुष्टुभौ विद्या दक्षरैरुष्णिहाविमे ॥ २९ ॥

समाक्षरैः चतुर्भिःपादैर्देऋचौउष्णिहौ भवतः । पादैरनुष्टुभौजानीयात् । अक्षरैःकृत्वा उष्णिहौभवतः । नदंवउदतीनां । मंसीमहित्वावयमित्येते ।

ददीरेक्णइतिविषाककुपन्न्यंकुशिरानिचृत् । एकादशोस्याःप्रथमः उत्तमश्चतुरक्षरः ॥ ३० ॥

अस्याःप्रथमएकादशाक्षरः नाह्निककुप्शब्दात् । द्वि-

तीयोद्वादशाक्षरः उत्तमस्तृतीयश्चतुरक्षरः। एषाककुभ्न्यं-कुशिरानिचृत्। उदाहरणंदीरेक्णास्तन्वेदद्विंसु।

एकादशाक्षरौच द्वौमध्येचैकः षडक्षरः। उष्णिक्पिपीलिक-मध्याहरीयस्येति दृश्यते ॥२१॥

यस्याएकादशाक्षरौ द्वौपादौ। तयोर्मध्ये एकःषड-क्षरः। पिपीलिकमध्यानामोष्णिग्वेदितव्या। हरीयस्य सुयुजाविव्रतावेः।

ताभ्यांपरः षडक्षरः प्रयातनु-शिरोनाम ॥ ३२ ॥

ताभ्यां एकादशाक्षराभ्यां पादाभ्यां षडक्षरःपादः परोभवति सोष्णिक्तनुशिरानामवेदितव्या। प्रयाघोषि-भृगवाणेनशोभे। ५।

आद्यःपंचाक्षरःपाद उत्तरेष्टाक्ष-रास्त्रयः। अनुष्टुवगर्भेषोष्णिक् साऽगस्त्येऽस्तिपितुन्विति ॥३३॥

आद्यःचपंचाक्षरःपादः उत्तरेत्रयःपादा अष्टाक्षराःयस्या एषाअनुष्टुब्गर्भा उष्णिग्भवति। साअगस्त्यऋषौ वि-द्यते। पितुन्नुस्तोषं।

द्वात्रिंशदक्षराऽनुष्टु प्चत्वारो-

ष्टाक्षराःसमाः ॥ ३४ ॥

याद्वात्रिंशदक्षरासा अनुष्टुब्भवति । तस्याःचत्वारः-पादाः अष्टाक्षराः तेचसमानावेदितव्याः । उदाहरणं गायंतित्वागायत्रिणः ।

कृतिर्द्वौद्वादशाक्षरावेक आष्टाक्षरःपरः ॥ ३५ ॥

यस्याःपादौद्वादशाक्षरौस्तः परःअष्टाक्षरःपादोभवति । साअनुष्टुप्कृतिर्नामवेदितव्या । उदाहरणंवक्ष्यति ।

यस्यास्त्वष्टाक्षरोमध्येसापिपीलिकमध्यमा ॥ ३६ ॥

यस्यास्तुद्वादशाक्षरयो र्मध्ये अष्टाक्षरैःपादोभवति सापिपीलिकमध्यमा अनुष्टुब्भवति । वक्ष्यमाणोदाहरणं ।

नवकौद्वादशोदृव्यूना ताविद्वांसेति काविराट् ॥ ३७ ॥

नवकावाद्यंतौपादौ मध्येचद्वादशोपादः । द्वाभ्यांन्यूनाविराट्इत्यर्थः काविराट्नामवेदितव्या । ताविद्वांसाहवामहेवां ।

तेषामेकाधिकावंत्यो नष्टरूपाविपृक्ताभि ॥ ३८ ॥

तेषामेवनवकद्वादशिनां पादानां अंत्यौएकैकाक्षरे-

णाधिकोभवतः । नवाक्षरः प्रथमःदशाक्षरो द्वितीयः त्रयोदशाक्षरान्त्यः । अनुष्टुप्स्थानेष्टरूपा नामवेदितव्या । विपृक्षामिपाक्षारनदेवान् ।

दशाक्षरास्त्रयो विराट्त्रयोवैका- दशाक्षराः ॥ ३९ ॥

दशाक्षरास्त्रयःपादाः एकादशाक्षरावात्रयोयस्याः- पादा भवंतिविराट् । नामसानुष्टुब्वेदितव्या । तयोरु- दाहरणेवक्ष्यामः ।

षणमहापदपंक्तिस्तु षट्कोंत्यः पंचपंचकाः ॥ ४० ॥

षड्भिःपादै योअनुष्टुप् सामहापदपंक्तिरित्युच्यते । अंत्यःपादःषट्कः । पंचपंचकाआद्याः । उदाहरणंवक्ष्यति ।

माकस्मै पर्यू षु श्रुध्यग्ने तवस्वा- दिष्ठा ताऋचः ॥ ४१ ॥

इत्येताऋचो निर्दिष्टलक्षणानां उदाहरणान्यनिर्दि- ष्टोदाहरणानां । माकस्मै । पर्यूषु । श्रुधि । अग्ने । त- वस्वादिष्ठाइति । कृतिः माकस्मैधातमभ्यमित्रिणेनः । पिपीलिकमध्यानुष्टुप् । पर्यूषु प्रधन्व वाजसातये । द- शाक्षराविराट् । श्रुधीहवं विपिपानस्याद्रेः । एकादशा- क्षरा अग्नइंद्रश्च दाशुषोदुरोणे । महापदपंक्ति स्तवस्वा- दिष्ठारनेसंदृष्टिः । ६ ।

चतुष्पदांतुबृहती प्रायःषट्त्रिं-

शदक्षरा । अष्टाक्षरास्त्रयःपादा स्तृतीयोद्वादशाक्षरः ॥ ४२ ॥

बृहती षट्त्रिंशदक्षराचतुष्पदा भवति तस्याः त्रयः पादा अष्टाक्षराः तृतीयोद्वादशाक्षरः पादोभवति । एषाबृहतीप्रायः । किमिदंप्रायइति । प्रायेणैषा प्रयुज्यत इत्यर्थः । माविदन्यदिशंसत ।

पुरस्ताद्बृहतीनाम प्रथमेद्वादशाक्षरे । उपरिष्टाद्बृहत्यनन्त्ये द्वितीयेन्यंकुसारिणी । स्कंधोग्रीव्युरोबृहती चैधैनांप्रतिजानते ॥४३॥

प्रथमेद्वादशाक्षरेसति पुरस्ता द्बृहतीनाम वेदितव्या । अन्तिमेद्वादशाक्षरे उपरिष्टाद्बृहतीनाम । द्वितीयेद्वादशाक्षरे न्यंकुसारिणीतिकेचिदाहुः । अपरेस्कंधोग्रीवामन्यंते । उरोबृहत्यन्ये । तासामुदाहरणानि वक्ष्यति । एवमेनां त्रिधाप्रतिजानते आचार्याः ।

त्रयोद्वादशकायस्याः साह्योर्ध्वबृहतीविराट् ॥ ४४ ॥

यस्याबृहत्यास्त्रयःपादा द्वादशाक्षराः साविराडूर्ध्वबृहतीनाम वेदितव्या । उदाहरणं वक्ष्ये ।

महोयोधीन्नतं मत्सीजानमिदजीजनः ॥ ४५ ॥

महीयः। अधीत्। नतं। मत्सि। ईजानमित्। अजीजनः। निर्दिष्टलक्षणानाम निर्दिष्टोदाहरणाना मुदाहरणानि। पुरस्ताद्बृहत्याः हे। महीयस्मतिः शवसो षसाम्या। अधीन्वत्वसप्ततिंच मप्तच। उपरिष्टाद्बृहत्याः नतमंहोनदुरितं। न्यंकुसारिणीस्कंधोग्रीव्युरोबृहतीनां-द्वे। मत्स्यपायितेमहः। ईजानमिद्यौ गूर्त्तावसुः। विराडूर्ध्वंबृहत्याः अजीजनोअमृतमर्त्येष्वा।

अष्टिनोर्द्दशकौमध्ये विष्टारबृहतीयुवं ॥ ४६ ॥

अष्टिनोःपादयोर्मध्ये दशकौयस्याः साविष्टारबृहती। युवंह्यास्तमहोरन्।

एकाऽगस्त्ये पितुस्तोमेनवाक्षरपदोत्तमा॥ ४७ ॥

अगस्त्यऋषौ अन्नस्तुतिसूक्ते उक्तं। उत्तमात्येकानवाक्षरपादात्रिद्युते। इत्येव। तंत्वावयंपितो वचोभिः।७।

द्वयोश्चोपेदमाहार्षं सर्वेव्यूहेनवाक्षराः॥ ४८ ॥

उपेदमुपपचनं। आहार्षंत्वाविदंत्वा। इत्येतयोस्त्वद्वयोऋचोः सर्वेव्यूहेनवाक्षराः पादाभवंति। इत्येव।७।

त्रयोदशाक्षरौचद्वौमध्येचाष्टाक्षरोभवेत्। अभिवोवीरमित्ये-

षा सापिपीलिकमध्यमा ॥४९॥

त्रयोदशाक्षरयोर्मध्ये चाष्टाक्षरःपादःसापिपीलिकमध्यमा बृहतीनामवेदितव्या । अभिवोवीरमंधसो मदेषुगाय ।

नवकाष्टादशसहैकःपरमोष्टच यदिपादाः । बृहतीविषमपदा सासनितः सुसनितरुग्र ॥५०॥

नवाक्षरः प्रथमःपादः अष्टाक्षरोद्वितीयः एकादशाक्षरस्तृतीयः परमःअंत्योष्टाक्षरः इतिईदृशायदिभवंति सा बृहतीविषमपदानाम वेदितव्या । सनितः सुसनितरुग्रेति ।

पंक्तिरष्टाक्षराः पंच ॥ ५१ ॥

सापंक्तिरिष्यते यस्याअष्टाक्षराः पंचपादाभवंति । इंद्रोमदाय वावृधे ।

चत्वारोदशकाविराट् ॥ ५२ ॥

यस्याःचत्वारोदशकाः पादाः साविराट्पंक्तिर्भवति । मन्ये त्वायज्ञियं यज्ञियानां ।

आदेशेष्टाक्षरौ विद्यात्सोपसर्गेषु नामसु ॥ ५३ ॥

आस्तारपंक्तिरित्येवमादिषु सोपसर्गेषुनामसु आदितोऽन्ततो मध्यतइत्येवमादिष्वष्टाक्षरौपादौविद्यात् ।

युग्मावष्टाक्षरौ पादा वयुजौ द्वादशाक्षरौ । सासतोबृहतीनाम ॥ ५३ ॥

यस्याः युग्मौद्वितीयश्चतुर्थौ पादावष्टाक्षरौ भवतः । अयुजौ प्रथमतृतीयौ द्वादशाक्षरौ सापंक्तिः सतोबृहतीनामवेदितव्या । मातेराधांसि मातञ्जतयोवसो ।

विपरीताविपर्यये ॥ ५४ ॥

तेषांविपर्ययेयुग्मौद्वादशाक्षरौ अयुजौअष्टाक्षरौसा-विपरीतापंक्तिर्नामवेदितव्या । यस्त्वश्वः श्रावयत्सखा ।

आस्तारपंक्ति रादितः ॥ ५५ ॥

आदौअष्टाक्षरौ अंत्यौद्वादशकौ साआस्तारपंक्ति र्नाम । आग्निंनस्वृक्तिभिः ।

प्रस्तारपंक्तिरंततः ॥ ५६ ॥

यस्याः अंत्योपादौ अष्टाक्षरौ आद्यौ द्वादशाक्षरौ साप्रस्तारपंक्तिर्नाम । मह्विद्यावापृथिवी भूतमुर्वी ।

संस्तारपंक्तिर्मध्यतः ॥ ५७ ॥

मध्येष्टाक्षरौपादौ आद्यांत्यौ द्वादशाक्षरौभवतः सा-संस्तारपंक्तिर्नाम । पितुश्चतोनतंतुमित्सुदानवः ।

विष्टारपंक्तिर्बाह्यतः ॥ ५८ ॥

आद्यांत्यौ चाष्टाक्षरौ मध्येद्वादशकौभवतः साविष्टारपंक्तिर्नाम । अग्नेतवश्रवोवयः । ८ ।

मन्येत्वा मातेराधांसि यक्ष्व आग्निंमहीति च । पितुभृतो नाग्नेतव ताऋचोऽत्रनिदर्शनं॥५९॥

मन्येत्वायज्ञियं । मातेराधांसिमात । यक्ष्वःश्राव-य । आग्निंनस्वृक्तिभिः । महिद्यावापृथिवी । पितुभृ-तोनतंतु । अग्नेतवश्रवो । एताऋचोऽत्रनिदर्शनं यथा-क्रमं विराट्पंक्तीत्यादीनां पुरस्तादेवनिदर्शितानां ।

चतुश्चत्वारिंशत्त्रिष्टुबक्षराणिच-तुष्पदा । एकादशाक्षरैः पादैः॥६०॥

चतुश्चत्वारिंशदक्षरा एकादशाक्षरैःपादैः चतुष्पदा-त्रिष्टुब्भवति । पिबासोममभियमुग्रतर्दः ।

द्वौचेत्तुद्वादशाक्षरौ । प्रायस्यौप-जगत्येषा परस्यास्यतुसात्रि-ष्टुप् ॥ ६१ ॥

यदिद्वौद्वादशाक्षरौभवतः द्वावेकादशाक्षरौपरस्यज-गतीप्रायेवर्त्तमानेत्यर्थः । उपजगतीनामवेदितव्या । य-था । सोचिन्नुवृष्टिर्यूथ्या २ स्वासचा । अस्यतुत्रिष्टुभः प्रा-

यस्यसात्रिष्टुप्नाम्ना वेदितव्या । यथासनेमिचक्रमजरं विवावृते ।

वैराजजागतैः पादैर्योवाचेत्य-भिसारिणी ॥ ६२ ॥

द्वौदशाक्षरौभवतः द्वौद्वादशाक्षरौ अभिसारिणीसंज्ञासा । योवाचाविवाचा व्यभ्रवाय: ।

नवकोदशकोवास्या द्वेकोनेको-पित्रिष्टुभः । एकादशाक्षरस्यापि-विराट्स्थानाह्वनामसा ॥ ६३ ॥

त्रिष्टुभःपाद एकोप्यनेकोपि नवकोवादशकोवास्या-त् । एकादशाक्षरस्याप्यनेकोवास्यात् । एतदुक्तंभवति यदेकोनवकः द्वौदशकौभवतः । एकोदशकः द्वौनवकौ । उभयत्रापियेकस्त्रैष्टुभः द्वौचैत्रैष्टुभौ एकैकोद्वतरौ । सा-विराट्स्थाना नामवेदितव्या । श्रुधीहव मिंद्रमारि-षण्यः ।

पूर्वौदशाक्षरौपादा वुत्तरेष्टाक्ष-रास्त्रयः । विराट्पूर्वाह्वनामैषा-त्रिष्टुप्पंक्तुत्तरैववा ॥ ६४ ॥

यस्याः पूर्वौद्वौपादौ दशाक्षरौ भवत उत्तरेष्टाक्षरा-स्त्रयोभवंति । एषात्रिष्टुव्विराट्पूर्वा वापंक्त्युत्तरावा वे-दितव्या । एवेंद्राग्निभ्यामह्वाविह्व्यस् । ६ ।

त्रयश्चैकादशाक्षरा एक अष्टाक्षरः परः । विराड्रूपाह्वनामैषा त्रिष्टुब्नाक्षरसंपदा ॥ ६५ ॥

यस्यास्त्रयःपादा एकादशाक्षरा एकश्चापरोष्टाक्षरः साविराड्रूपा नाम त्रिष्टुब्वेदितव्या । यद्यप्यक्षरसंपन्नास्ति । उदाहृतं । त्रिष्टुभोयाविराट्स्थाना विराड्रूपा तथापरा । वह्निनाज्ञापिताज्ञेया त्रिष्टुभोब्राह्मणं तथेति । कीलालोरश्मआभुवः ।

त्रयश्चद्वादशाक्षरा एकश्चाष्टाक्षरःक्वचित् । एषाज्योतिष्मतानाम ततोज्योतिर्यतोष्टकः ॥६६॥

यस्यास्त्रयःपादा द्वादशाक्षराः एकश्चाष्टाक्षरः क्वचिद्भवति एषात्रिष्टुप्ज्योतिष्मतीनामवेदितव्या । यतः अष्टकःपादः ततोज्योतिरित्युच्यते । यद्वायज्ञं मनवेसंमिमिक्षथुः । मध्येज्योतिः । अग्निनेन्द्रेणवरुणेन विष्णुना । उपरिष्टाज्ज्योतिः ।

चत्वारोष्टाक्षराःपादा एकश्चद्वादशाक्षरः । सामहाबृहतीनाम ६७॥

यस्याअष्टाक्षराःपादाः चत्वारः एकश्चद्वादशाक्षरः साविष्टुम्महाबृहती नामवेदितव्या । नमोवाके प्रस्थितेअध्वरेनरा ।

यवमध्यातुमध्यमे ॥ ६८ ॥

आद्यावष्टाक्षरौ तृतीयोद्वादशाक्षरः चतुर्थपंचमौचा-ष्टाक्षरौ सात्रिष्टुप्यवमध्याज्ञेया। इष्टङ्गिरग्ने अर्चिभिः।

सोच्चिन्नुसनेमिश्रुध्ये वङ्गोल्ल-न्यद्वाग्निनेंद्रेण। नमोवाकेवृह-ञ्जिश्च ताश्चचोचनिदर्शनं॥ ६९ ॥

उक्तप्रायमेतत्।

पंचाशज्जगतीद्व्यूनाचत्वारोद्वा-दशाक्षराः। तदस्यावहुलंवृत्त-म्॥ ७० ॥

द्वाभ्यामूनानि पंचाशदक्षराणि जगतीनामभवति। चत्वारःपादा द्वादशाक्षरा भवंति। वहुलंतद्वृत्तंजगती-प्रायेणभवतीत्यर्थः। अस्याउदाहरणं। प्रदेवमच्छामधु-मंतइन्दवः।

महापंक्तिः षडष्टकाः॥ ७१ ॥

यस्याःपादाषट् अष्टाक्षराभवंति साजगती महा-पंक्तिरित्युच्यते।

अष्टकौसप्तकः षट्कौदशको न-वकश्च वा॥ ७२ ॥

द्वौपादौ षष्टाक्षरौ एकःसप्ताक्षरः अपरःषडक्षरः । दशाक्षरोन्यः । इतरेनयाक्षरोभवति सावामहापंक्तिः । सेहानउग्रपृ । सूर्येविषं ।

महासतोबृहत्यर्द्वे व्यूहयोरितयोःसह । संपातेत्वेतिपादांतेदैववान्सामविंशके ॥ ७२ ॥

एतयोरुक्तयो महापंक्त्योः अर्द्वेसहद्वादशाक्षरयोः पादयोः सहव्यूहयोरिवसतोः द्वादशाक्षरौ वयश्चाष्टाक्षरा अनिमेन यस्याः सामहासतोबृहतीनाम जगतीवेदितव्या । । अस्माकमुभे यदिंद्रसेहान उग्रेतिषट् । आयःपप्रौच विश्वासांताक्तयोरुक्तनिदर्शनं । अस्माकषु प्रभृतये । उभेयदिंद्ररोदसी । सेहानउग्रपृतनाइति षडेतामहापंक्तयः । आयःपप्रौ भानुनारोदसीउभे । विश्वासांगृहपतिविंश । एतेमहासतोबृहत्यौ ॥ १० ॥

इतिश्रीपार्षदव्याख्यायामानन्दपुरवास्तव्य वजूटपुत्रोव्वटकृतप्रातिशाख्यभाष्ये षोडशपटलं समाप्तम् ।

द्वावतिछंदसां वर्गावुत्तरौ चतुरुत्तरौ ॥ १ ॥

जगत्याउत्तरावति छंदसांद्वौवर्गौ चतुरुत्तरौ वेदितव्यौ-

प्रथमातिजगत्या सांसाद्विपंचा-
शदक्षरा ॥ २ ॥

यासाप्रथमाथा द्विपंचाशदक्षरा अतिजगतीनामवे
दितव्या । यथा । तमिंद्रंजोहवीमिमघवानसुग्रं ।

षट्पंचाशत्तु शक्करी ॥ ३ ॥

षट्पंचाश दक्षराशक्करी भवति । प्रोष्वस्मैपुरोरथं: ।

षष्ठिरेवाति शक्करी ॥ ४ ॥

षष्ठ्यक्षराणि अतिशक्करीभवति । सुषुमायातमद्रिभिः ।

उत्तराष्टि श्चतुःषष्टिः ॥ ५ ॥

तस्याउत्तरो या षष्टि:साचतु:षष्टि रक्षरैर्भवति ।
साअष्टिर्नाम । त्रिकद्रुकेषु महिषोयवाशिरं ।

ततोऽष्टाषष्टिरित्यष्टिः ॥ ६ ॥

ततउत्तरा अष्टाषष्टिरक्षराणि साऽत्यष्टिर्भवति । अ-
यारुचाहरिण्यापुनानः ।

धृतिःपूर्वा द्विसप्ततिः ॥ ७ ॥

अतिधृतेः पूर्वायाद्विसप्तत्यक्षरासाधृति र्भवति । स-
खिवखाय मभ्यावदृत्स्व ।

षट्सप्तति स्त्वतिधृतिः ॥ ८ ॥

यस्याःषट्सप्तत्यक्षराणि भवंति साऽतिधृतिः । सद्वि
शद्वोन मारुतं तु विष्वणिः ।

सर्वाद्याश्चतयीष्वेता: ॥ ९ ॥

एता अतिजगत्यादय: सर्वाद्याश्चतयीषुविद्यंते ।

उत्तरास्तु सुभेषजे ॥ १० ॥

उत्तरायावच्यंते ता:सुभेषजे ऋचोद्रष्टव्या: ।

कृति:प्रकृतिराकृतिर्विकृति: सं-
कृतिस्तथा । षष्ठीचाभिकृति
र्नामसप्तम्युत्कृतिरुच्यते ॥११॥

एता: कृत्यादय: सप्तता:या:सुभेषजेउक्ता: ।

अशीति श्चचतुरशीति रष्टा-
शीति र्द्विर्नवति: । षण्णवति:
शतं पूर्णमुत्तमातु चतु:शतं॥१२॥

कृत्यादीना मक्षरपरिमाणानि क्रमेण । अशीति:
८४ । ८८ । ९२ । ९६ । १०० । १०४ ॥

तमिंद्रं प्रोषुसुष्वुमत्विकद्रुके षव-
याऋचा । सखेचसद्दिशर्द्धश्च
मध्यमोवर्ग उच्यते ॥ १३ ॥

तास्तुयथाक्रमं पुरस्ता त्तत्तल्लक्षणो उदाहृता: ।

आसुकृतिस्तुप्रकृतिर्ध्रुवं पूर्वात-

तस्तुया। आकृति र्यदितेमाता-मेषी विकृतिरुच्यते। संकृतिस्तु नवैतच्चदेवो अग्निस्त्वभिकृतिः। सर्वमित्युत्कृति स्तत्र तृतीयो-वर्ग उच्यते ॥ १४ ॥

कृतिः। आसुरैरुपराबतद्रुति। प्रकृतिः भ्रुवंपूर्वेति। ततःप्रकृतेः पराआकृतिर्यदितेमात्रेति। मेषीविकृति रुच्यते। संकृतिस्तु नवैतत्र। तस्मिंस्तुभेषजेपि नविद्यते। एवंप्रायेणावर्णयंति। केचिद्वर्णयंति संकृतेर्नवाद्रुत्येतदुदाहरणं। अभिकृतिः। देवोअग्निःस्विष्टकृदिति। उत्कृतिःसर्वस्येति। अपर् क्रमेआम्नातत्वादिहसंज्ञाभिरुदाहृताः अचास्यामुत्कृतौ तृतीयोवर्गःसमाप्यते। (१)

एवंक्रमप्रमाणानां छंदसामुप-दिश्यते॥ १५ ॥

एवंचतुर्विंशत्यक्षरादीनां क्रमप्रमाणानांचतुरुत्तराणां चतुःशतपर्यंतानामेकविंशतिछंदसां कश्चिद्विशेष उपदिश्यतेकोसौ विशेषः।

एकद्व्यूनाधिकासैव निचृदूनाधिकाभुरिक् ॥ १६ ॥

(१) इति श्रीपार्षदव्याख्यायामानंदपुरवास्तव्यवज्रटपुत्रउवटकृते प्रातिशाख्यभाष्ये षोडशपटलं समाप्तम् इतिखपुस्तकपाठः।

एकेनऊनानिचृद्भवति एकेनवाधिकासाभुरिग्भवति। यःशुक्रइवसूर्योनिचृत्। परिधामानियानितेभुरिक्।

विराजस्तूत्तरस्याहुर्द्वाभ्यांयाविषयेस्थिताः। स्वराजएवं पर्वस्ययाः काश्चैवंगतास्त्वचः॥ १७॥

द्वाभ्यामक्षराभ्यां याऋचोधिका न्यूनावाविषयेमध्ये-स्थिताः उत्तरस्यपूर्वस्यचछंदसःविराजस्ताआहुरुत्तरस्य। स्वराजःपूर्वस्य। यथाषड्विंशत्यक्षराऋचोगायत्रीप्रायेस्व-राज्योगायत्र्योभवंति। उष्णिक्प्रायेषु विराजउष्णिहोभ-वति। यथा। जोषासवितर्यस्यतेइतिस्वराड्गायत्री। अतिथिंमानुषाणामिति विराडुष्णिक्। उत्तरत्रापि। याःकाश्चैवंगता एताएवऋचोभवंति।

याः कश्चिद्बहुपादास्तु गायत्र्योहीनतांगताः अक्षरैर्बहुभिस्तास्तु गायत्र्यउपधारयेत्॥१८॥

गायत्र्यः द्वाभ्यांत्रिभिश्चतुर्भिः पंचभिर्वान्यूनाःसत्योगायत्र्यएवविराजो भवंति। पूर्वस्यछंदसो ऽभावात्। भगवता उभयछंदसां मध्येत दुक्तं।

ताराट् विराट् स्वराट्सम्राट्स्ववशिनी परमेष्ठी। प्रतिष्ठाप्रत्नमम्रतं वृषाशुक्रं जीवंपयः।

**त्प्रमर्णों श्रीभौंबुवायापश्चोदक-
मुत्तमं ॥ १६ ॥**

विषयेस्थिताः द्वाभ्यांताइमाः ताराट् । विराट् । स्व-
राट् । सम्राट् । स्ववशिनी । परमेष्ठी । प्रतिष्ठा । प्रत-
म् । अमृतं । तृषा । शुक्रं । जीवं । पयः । तृप्तं । अणः ।
अंशः । अम्भः । अंबु । वारि । आपः । उदकं । इति ।
यथाएकविंशतिर्विराजस्य । द्वाविंशत्यक्षरादयोद्विशता-
क्षरपर्यंताःएवंस्वराजः ।

**दैवतंछंदसामचवक्ष्यतेततउ-
त्तरं । अग्नेर्गायत्र्यातोधिदैभ-
त्यादैवतमाहतुः । सप्तानांछंद-
सामृचौ ॥ २० ॥**

ताराङादीनांछंदसामुत्तरंगायत्र्यादीनांछंदसांचदेव-
ताःकथ्यंते । अग्नेर्गायत्र्यभवत्सयुग्वेत्यारभ्यद्दृक्टचौछंदसां
भक्त्यादैवतमाहतुःसप्तानां । तस्मादग्नेर्गायत्रीभवति ।
सावित्रीउष्णिक् । सौमीअनुष्टुप् । बृहतीबार्हस्पत्या ।
मैत्रावरुणीविराट् । ऐन्द्रीत्रिष्टुप् । वैश्वदेवीजगती । छं-
दसांदैवतज्ञानेधर्मःप्रयोजनं । भवत्येवसंशयेछंदसांदैव-
तेनाधरवसायः । यथातवस्वादिष्टा । शिवानःस-
ख्याइत्युष्णिगनुष्टुभोर्मघेग्रघृतन्नपूतमितिषड्विंशत्यक्षरेदृ-
क्टचौदैवतेनस्वराजौगायत्र्यावधरवसीयेतेन विराजा-
वुष्णिहौ ।

नपंक्तेः ॥ २१ ॥

पंक्तेर्दैवतमेतेऋचौनाहतुः । सप्तसुमध्येयस्मात्पंक्ति-
स्तस्मादिदमुच्यते ।

सातुवासवी ॥ २२ ॥

सापंक्तिर्वासवीवेदितव्या । १ ।

प्राजापत्यास्त्वतिछंदाः ॥ २३ ॥

याअतिछंदाअतिछंदांसिअतिजगत्यादीनितानिप्रा-
जापत्यानिज्ञेयानि ।

विछंदावायुदैवता ॥ २४ ॥

याविछंदाऋक्सावायुदैवतावेदितव्या । विछंदाअवां-
तरभेदाः पदपंक्तिः पुरउष्णिगाद्याः तावायथाज्ञेयाः ।

द्विपदापौरुषंछंदः ॥ २५ ॥

याद्विपदाऋक्सापौरुषीवेदितव्या ।

ब्राह्मीत्वेकपदास्मृता ॥ २६ ॥

याएकपदाऋक्साब्राह्मीस्मृता ।

एतेनैवक्रमेणैषांवर्णतोभक्तिरु-
च्यते ॥ २७ ॥

येनक्रमेणछंदसांदेवतमुक्तंतेनैवक्रमेणेषांवर्णतोभक्ति-रुच्यते ।

श्वेतंचसारंगमतःपिशंगंकृष्णमेव-च । नीलंचलोहितंचैवसुवर्णमिवसप्तमं । अरुणंश्यामगौरंचबभ्रुवैनकुलंतथा ॥ २८ ॥

श्वेतंशंखवर्णंगायत्रं । द्विवर्णंशुक्लकृष्णसारंगमौष्णिहं । पिशंगंरोचनावर्णंआनुष्टुभं । कृष्णमगुरुवर्णं बार्हतं । नीलमुत्पलवर्णं वैराजं । लोहितमिन्द्रगोपवर्णं त्रैष्टुभं । सुवर्णरूपवर्णं जागतं । अरुणं प्रातःसंध्याभवर्णं पांक्तं । श्यामं कृष्णवर्णं अतिछंदः । गौरं सिद्धार्थवर्णं विछंदः । बभ्रु कपिलवर्णं द्विपदंछंदः । नकुलवर्णं एकपदंछंदः । एतावतोदेवताः क्रमेणविधिः ।

पृश्निवर्णं वैराजं ॥ २९ ॥

पृश्निवर्णं बहुवर्णंचित्रं वैराजम् । अथकस्माद्वैराजस्य द्विवर्णोपदेशः क्रियते । तत्र क्रमेणैवनीलत्वं सिद्धम् । नसिध्यति । कथं । एतास्तिस्रोविराजः अनुष्टुबेका-पंक्तिरेका । द्वाभ्यांन्यूनाचैका । तत्र पूर्वयोर्नीलवर्णः । अस्याः पृश्निरितिवेदितव्यं । एवमपि कथमेतदध्यवसीयते पूर्वयोः नीलः । अस्याः पृश्निरिति । निचृद्भुरिजोर्न्यूनाधिकयोः समीपोपदेशात् अस्याः पृश्निरिति । परिशेषादितरयो नीलइत्यध्यवसीयते । तयोरप्येके क्रमात्पंक्तेरेवविराजो नीलत्वमन्यन्ते ।

निचृच्छ्यावं ॥ ३० ॥

कृमिदूषितपत्रवर्णो निचृद्भवति ।

पृषद्भुरिक् ॥ ३१ ॥

विद्रुमवत् भुरिग्भवति ।

ब्रह्मसामर्ग्यजुश्छन्दः कपिलंवर्णतः स्मृतं ॥ ३२ ॥

ब्रह्मणःसामर्ग्यजुषांचछन्दः वर्णतः कपिलं जटाकलापसूर्यरश्मिवर्णं स्मृतं ।

मा प्रमा प्रतिमो पमा समाच चतुरक्षरात् । चतुरुत्तरमुद्यन्ति पञ्चछन्दांसितानिह ॥ ३३ ॥

मा । प्रमा । प्रतिमा । उपमा । समाचेति । चतुरक्षराच्चतुरुत्तराणि तानिगायत्र्याः पूर्वाणि पञ्चछन्दांसि वेदितव्यानि ।

हर्षिका सर्षि का(१) सर्वमाचा विराट्कामा । द्व्यक्षरादीनि मादीनां वैराजान्यनुचक्षते ॥३४॥

इत्येतानिचद्व्यक्षरादीनि चतुरुत्तराणि अष्टादशाक्षरपर्यंतानि मादीनां वैराजान्यनुचक्षते आचार्याः ।

---

(१) मर्षिकेत्यपिक पुस्तक पाठः ।

अक्षराण्येव सर्वत्र निमित्तं बल-
वत्तरं । विद्धाद्विप्रतिपन्नानां
पादवृत्ताक्षरैर्ऋचां ॥ ३५ ॥

पादैर्वृत्ते रक्षरैश्च विप्रतिपन्नामृचां सर्वत्र बलवत्तरं। निमित्तं अक्षराण्येवविद्यात्। यथा। सूर्यैविषमासजामि। पादैर्विप्रतिपन्नास्तिस्रो ऋचैर्जगत्योधारवसीयन्ते। नवानांनवतीनामिति पंक्तिः। अभ्रप्रुषो नवाचाप्रुषात्रसुइति। वृत्तैर्विप्रतिपन्नाक्षरै स्त्रिष्टुबधारवसीयते। यथायास्ते प्रजाअमृतस्येत्यनुष्टुप्। यथा च येनः सपत्नाअपते भवन्त्विति त्रिष्टुप्प्रायैचाक्षरैरेवजगत्यधारवसीयते। तथा मांधुरिन्द्रंनामदेवतेतिजगतीप्रायवृत्ताभ्यां विप्रतिपन्नापित्रिष्टुप्।

व्यूहेदेकाक्षरीभावान्पादेषूनेषु-
संपदे ॥ ३६ ॥

ऊनेषुपादेषु संपदिकर्त्तव्यायां एकाक्षरीभावांत्सं-धीन्व्यूहेत्पृथक्कुर्यादित्यर्थः। प्रेताजयतानरः। सास्माकेभिरेतरीनशूषैः। ऊनेष्विति किं। सैमंयज्ञंमधुमन्तं कृधीनः। संपदइति कस्मात्। आइतायामोपगव्यन्त इन्द्र मित्यत्र त्रयएकीभावापूर्वस्यैत्र व्यूहेनसंपत्सिद्धेरुत्तयोर्नकर्त्तव्योभवति।

त्रैप्रवर्णाश्च संयोगान्व्यवेयात्सदृ-
शैः स्वरैः ॥ ३७ ॥

क्षैप्रवर्णाश्चसंयोगान्सान्तस्था न्संयोगानित्यर्थः । व्य-वेयात्व्यवधानंकुर्यादित्यर्थः । सदृशैः समानस्थानैः स्वरैः । ध्यंवकंयजामहे । उद्वत्स्वस्मा अकृणोतनात्तृणङ्गोनंपर्वं-विरदातिरश्वा । पादेषूनेष्विति छन्दसः संपदेद्दत्ये-वानुवर्त्तते । ऊनेष्विति कस्मात् । प्रत्यग्रभौमान्तमस्य-न्तृणां । संपदइति कस्मात् । अगोह्यस्य यदसस्तनागृ-हइत्यत्र ह्यो क्षैप्रवर्णा यौ तत्र पूर्वेणासंपत्सिद्धेरुत्तरस्मिन्न कर्त-व्यो भवति । अत्र केचित् क्षैप्रसंधिकृतानं तस्यासंयोगान् व्यूहेत् । एकाक्षरीभावानिति । एवंसिद्धे इति मन्यंते तेषां उद्वत्स्वस्मा अकृणोतनात्तृणामिति व्यूहः कर्तव्यः । तत्सदृशैः स्वरैर्व्यवायः । अस्यतुयेस्वाभाविका अन्त-स्थसंयोगा स्तेतूदाहरणात्वे नभवन्ति । यथात्वमभ्य्रस्त्व-मश्मनस्परिद्दति । गोनंपर्वंविरदातिरश्वेति अयंव्यवायः यकारवकारसंयोगे एवेष्यते । रेफलकारसंयोगयोर्नं । कथंज्ञायते । अयंभुवोरयोणांचिकेतयत् इत्यत्र दीर्घत्व-प्रतिषेधार्थं जामिषुजासुचिकेतेति चिकेतशब्दस्यपाठात् ।

पदाभेदेन पादानां विभागोभि-समीक्ष्यतु । छन्दसः संपदं तांतां यांयां मन्येत पादतः ॥३८॥

छन्दसःपादतो यांयां संपदं मन्येत तांतां सम्य-क्पूर्वमभिसमीक्ष्य पादांश्चपश्चात्पदानामभेदेन पादा-नांविभागः कर्तव्यः । यद्यप्युत्तरैः पादज्ञानहेतुर्वि-रोधो भवति । यथा माध्यन्दिनस्य सवनस्यवृत्रहन्नद्यत्ये-

तयोः पादयोः पदभेदेनाष्टाक्षरयोः क्रियमाणयोः यद्य-पिप्रायहृत्तसंपद्भवति । अनाद्दत्यतां माध्यंदिनस्य सव-नस्येत्येवंविभागः कर्त्तव्यः । एकारालस्य भुवनस्येत्येवमेत्र ।

प्रायोर्थोवृत्तमित्येते पादस्थान-स्यहेतवः ॥ ३९ ॥

प्रायः अर्थः वृत्तः एतेपादस्थानस्य हेतवोभवन्ति । त्रिष्टुभः प्रायो गोर्नपर्वविरदेति । दशाक्षरोप्यूहेनैका-दशाक्षरः क्रियते । तथा अर्थः । सगृणानो अद्भिर्देव-वानिति । तथावृत्तम् । अजाय्यस्य परशुर्नवाशतोमिति प्रकृत्या एकादशाक्षरोविकर्षेण द्वादशाक्षरः क्रियते । वृत्तादेव अर्थोगिरः सधस्थाजग्मुषीरिति पादांतः ।

विशेषसंनिपातेतु पूर्वंपूर्वं पर-परं ॥ ४० ॥

एतेषामेवविशेषाणां संनिपातेतु पूर्वंनिमित्तं पूर्वंभ-वति । परंनिमित्तंपरंभवति । पूर्वोहेतुरुत्तराद्बलीयानि-त्यर्थः । त्वंचकथंमनवेस्थोनानित्यत्र प्रायोर्थयोर्विरोधे-प्रायो बलीयस्त्वादस्मात्स्थोनानितिपादांतः । येषां पु-नरर्थोबलीयां स्तेषांमनवे स्थोनाभ्यथइतिपादांतोगम्य-ते । प्रायबलीयस्त्वादेव ऊर्ध्वोवाजस्य सनितायदंजि-भिरिति पादांतःनसनिता । प्रायवृत्तविरोधे प्रायब-लीयस्त्वा त्प्रत्यग्रभीश्चन्तमस्य नृणामितिपादांतः ए-कादशाक्षरएवभवति वृत्तादिक्रम्यते । अर्थवृत्तविरोधे-

ऽथंबलीयस्त्वात् यदग्नेस्यामहंत्वंइतिपादांतः । नइत्त्वा-दहमिति । एवंसर्वंचबलाबलमभिसमीक्ष्य पादंजि-ज्ञासेत् । ३ ।

अनुदात्तंतु पादादौ नोवर्जं वि-द्यते पदं ॥ ४१ ॥

चतुःषष्ठ्यां पादादावनुदात्तंपदं नविद्यते । उकार-स्तुविद्यते । यथाउलोककृत्नुमद्रिवोहरिप्रियं । उलोको-यस्तेअद्रिवः । अयमपि पादांतज्ञानहेतुरेव । सर्वहेतुभ्यो बलवत्तरः । तस्मात्सर्वान्वाधित्वा बतोबतासियमनैवत-इतिपादांतः । तथाचत्वायत्व मवसीतिपादांतः ।

पादादावनुदात्तंतु यदन्यत्तदि-होदितं ॥ ४२ ॥

तुपुनः पादादीयान्यनुदात्तानिपदानि तान्याचार्यः सूत्रेपठति । वशिस्तोयत्त्वसीत्यादयः ।

वशिस्तोयत्त्वसीत्येकं ॥ ४३ ॥

इदंचैकमनुदात्तं पदमस्तिवशि ऋषौपादादावनु-दात्तं पदमस्ति । इयत्त्वसिगायेत्वा नमसागिरा ।

त्वेचा भिष्ट्इत्यपि । नेति पू-र्वाणिसर्वाणि ॥ ४४ ॥

आभिष्टइतिच त्वेनेति पूर्वाणिसर्वाणि । आभि-

छेग्रग्नेत्येतस्मिंस्तृचे अनुदात्तानि सर्वाणि संति । स्तनयं-तिशुष्माः । रोचतउपाके । रोचतस्वधावः ।

मधुछंदस्यृताव्रधौ ॥ ४५ ॥

मधुछंदसि ऋषौ ऋताव्रधौ इत्येकमनुदात्तमस्ति । ऋताव्रधावृतस्पृशेति ।

स्तोमशब्देपरे धायि ॥ ४६ ॥

स्तोमशब्देप्रत्यये अधायीत्येकमनुदात्तमस्ति । अ-धायिस्तोमः ।

ऋतशब्दे परे स्रिधत् ॥ ४७ ॥

ऋतशब्देप्रत्यये स्रिधदित्येकमनुदात्तमस्ति । माय-ज्ञोअस्य । स्रिधदृतायोः ।

हुवे तुराणां यत्पूर्वं ॥ ४८ ॥

हुवेतुराणामिति द्वेपदे यत्पूर्वंपदं तदनुदात्तं । प्रि-यात्रोनामहुवेतुराणां ।

ट्टप न्मरुत उत्तरं ॥ ४९ ॥

ट्टपन्मरुतेद्वेपदे यदुत्तरं तदनुदात्तमस्ति । आयट्ट-पन्मरुतोवावशानाः ।

प्रेदंब्रह्मेतिचैतस्मिन्सूक्ते पाठो-स्तिपंचमः । सर्वानुदात्तः षट्-

स्वृद्वादित श्चतुर्दश: ॥ ५० ॥

प्रेदंब्रह्म वृत्रतूर्येष्वाविथेत्यस्मिन्सूक्ते सर्वानुदात्तः पादोस्तिपञ्चमः । वृत्रहन्ननेघेति । अस्यैवसूक्तस्यादित-श्चतुर्दश: पादः सोपिसर्वानुदात्तोस्ति । वसिश्चीपत इति । एवमिमे सप्तसर्वा उदात्ताः सन्ति मधुच्छन्दस्येक-र्चताष्टधाष्टतस्पृशेति । स्राभिष्टइति च तृचेएकः । रो-चतस्वधावः इत्येताभ्यांसहनव । नदशमाभवति ।

पादौ गायत्रवैराजौ अष्टाक्षरद-शाक्षरौ ॥ ५१ ॥

अष्टाक्षरदशाक्षरपादौ गायत्रवैराजौ विद्यात् ।

एकादशिद्वादशिनौ विद्या त्रैष्टु-भजागतौ ॥ ५२ ॥

एकादशद्वादशाक्षरौ पादौ त्रैष्टुभजागतौ विद्यात् ।४।

वर्षिष्ठानिष्ठयोरेषां लघूपोत्तम-मक्षरं । गुर्वेतरयो र्दृष्टं त वृत्तं छंदसांप्राहुः ॥ ५३ ॥

एषांपादानां वर्षिष्ठानिष्ठयो रष्टाक्षरद्वादशाक्षरयोः पादयोः उपोत्तममक्षरं लघुभवति । यथा अग्निमी-ळेपुरोहितं । प्रदेवमच्छा मधुमंतइंदवइति । इतरोःय

दशाक्षरैकादशाक्षरयोः उपोत्तमंगुरुभवति । स्रुधीरुवं विपिपानस्याद्रेः । पिबासोममभिय मुग्रतर्द्दः । छंदसां कृत्युतवृत्तमाहुराचार्याः ।

छंदांसिवर्त्तंते सर्वाण्यन्यै रतोल्पशः । एतद्विकारा एवान्ये सर्वेतु प्राकृताः समाः ॥ ५४ ॥

एतैःपादैः सर्वाणिछंदांसि वर्त्तंते । अतःएभ्योऽन्यैपादैरल्पशोवर्त्तंते येत्वन्ये पादास्ते एतेषामेवपादानां विकारा भवंति । अष्टाक्षरा त्पूर्वंपादास्ते गायत्रपादस्यविकारा भवंति । नवाक्षरोवैराजस्य विकारः यदिगुरूपोत्तमः । अन्यस्तु गायत्रस्यैव । त्रयोदशाक्षरप्रभृतिषु ये गुरूपोत्तमास्तेत्रैष्टुभस्य येलघूपोत्तमास्तेजागतस्य सर्वेतुप्राकृताः येसमाःपादाः तेसर्वेसमावेदितव्याः तेप्राकृता अष्टाक्षराद्यश्चतुर्विधाः । यद्येवंनैतेसमाः बह्वोह्यष्टाक्षराः अल्पीयांसोदशाक्षरादयः । यद्येवंसमाइत्येषांसंज्ञास्यात् । नसंज्ञायाः प्रयोजनमस्ति । एवंतर्हि अन्योर्थः कल्प्यते । सर्वेतुप्राकृताःसमाः तुशब्दःपक्षव्यावर्त्तकः यदुक्तमेतेषां विकाराअन्येपादाइति तन्न । तथासर्वेपादाः प्राकृताएवनान्योन्यस्यविकाराः । तस्मात्समाः नसंख्याकृतंतेषांसमत्वं । अपरे पुनरन्यथावर्णयंति । सर्वेतुप्राकृताःसमाः । सर्वेअष्टाक्षरप्रभृतयश्चतुर्विधाःप्राकृताः समास्तुल्याभवंति । किमुक्तंभवति । नान्योन्यस्य विकाराभवंतीत्युक्तंभवति ।

एकएकपदैतेषां द्वौपादौ द्विपदोच्यते । तेतुतेनैवप्रोच्येते सरूपेयस्यपादतः ॥ ५५ ॥

तेषांचतुर्णां पादानां एकःपादःयस्याःसाएकपदा ऋगित्युच्यते । यथाऽसिन्नयांयजमानोनहोता । तेषामेवचतुर्णां द्वौपादौयस्याः साद्विपदाऋगित्युच्यते । साधुर्नगृध्नुरस्तेव्सुदूति । ते-नैवछंदसाप्रोच्येते तेद्विपदैकपदे । छंदसांमध्ये यस्यछंदसःपादतः सरूपेभवतः । यदिगायत्रस्य सरूपेभवतः । यदित्रिष्टुभःगायत्री द्विपदा त्रिष्टुबेकपदाइति ।

नदाशतय्येकपदाकाचिदस्तीति वैयास्कः । अन्यत्रवैमघाः सैकादशिनी मुखतोविराट् ॥ ५६ ॥

दाशतयेभवादाशतयी काचिदेकपदोनास्तीति यास्काचार्योवैमन्यते । अस्माकं याःएकपदास्ताः सर्वासामृचां अध्यासान्मन्यंते । अंतानित्यर्थः । किमविशेषिणानेत्याह । अन्यत्र वैमघा एकपदायाःसातुस्यान्मुखतःवैमंद्रस्य । आदावित्यर्थः । दशिनीविराळेकपदास्त्येव ।

आहुस्त्वेकपदा अन्ये अध्या सानेकपातिनः । अध्यासानपिये-

केचित्त्वाहुरेकपदाइमाः २ आवांसुम्ने सिक्त्यांहै उरौदेवाः सिषक्तुनः ॥ ५७ ॥

इमान्युदाहरणानि । आवांसुम्नेवरिमन्सूरिभिःष्यां । असिक्त्यां यजमानोनहोता । उरौदेवा अनिबाधेस्याम । सिषक्तुन ऊर्जव्यस्यपुष्टेः । इति तानपिएकपातिनः अध्यासानन्येआचार्याएकपदाआहुः । अस्मिन्पाठान्तरेतातरेमेत्येवमादीनांपुनः पदानां अनेकपादानां अध्यासानामेकपदाशंकैवनभवति । तस्मादुदाहरणान्युक्तानि ।

पादाएकाधिकाः सन्तिछंदसांचतुरक्षरात् । ५ । संत्यतिछंदसांपादाएकोत्कर्षेणजागतात् । षोडशाक्षरपर्यन्ता एकश्चाष्टादशाक्षरः ॥ ५८ ॥

छंदसाम्पादाश्चतुरक्षरात्प्रभृतिषोडशाक्षरपर्यंताः तेएकैकेनाधिकाः संतिएकोष्टादशाक्षरः नूनमथ । अग्नेनय । ऋध्यामातओहैः । नदंवओदतीनां । अग्निमीळे पुरोहितं । तंत्वावयं पितोवचोभिः । सुधीव्हवंविपिपानस्याद्रेः । पिबासोममभिय मुग्रतर्दः । प्रदेवमच्छामधुमंतइंदवः । तमिंद्रंजोहवीमिमघवानमुग्रं ।

अपूरुषघ्नोअप्रतीतशूरसत्वभिः । अभित्यं देवंसविता-रमोण्योः कविक्रतुं । त्रिकद्रुकेषुमहिषोयवाशिरंतुवि-शुष्मः । एते चतुरक्षरादारभ्य षोडशाक्षरपर्यंताः । अर्चामिसत्यसवं रत्नधामभिप्रियं मतिंकविं । एषचा-ष्टादशाक्षरः । केचित्पाठांतरं वर्णयंति जागतादारभ्या-ष्टादशाक्षरपर्यंताः पादा अतिछंदसांविद्यंत तेव्याख्या-ताइति ।

एकादशैवछंदसि पादायेषोड-शाक्षराः । सर्वे त्रिकद्रुकीयासु-नाकुलोष्टादशाक्षरः ॥ ५९ ॥

छंदसि संहितायां येषोडशाक्षराः पादाः एका-दशैवतेसर्वेत्रिकद्रुकीयासुदृश्यंते यथात्रिकद्रुकेष्विति सू-क्तस्य प्रथमायृचिचत्वारः द्वितीयायांत्रयः पादाः चतु-र्थ्यामेकः तृतीयायां त्रयः । एवं त्रिकद्रुकीयासु सर्वे-भवंति । नकुलस्यार्षेअष्टादशाक्षरः । अर्चामिसत्यसवंर त्नधामभिप्रियंमतिंकविमिति ।

अवर्मह्नोऽविकर्षेण ज्येष्ठोदाश-तयीष्वृचाम् ॥ ६० ॥

अवर्मह इंद्रेत्येषा अविकर्षेण सप्तत्यक्षरासाज्येष्ठाम-हती दाशतयीषुऋक्षु । बहूक्षरेत्यर्थः ।

विकर्षणात्तु पादैश्च सहिमाईद्र-

तिस्मृता ॥ ६१ ॥

विकर्षेणात्तु षट्सप्तत्यक्षराभवति पादैश्चाष्टपदीभवति तस्माज्ज्येष्ठास्मृता । सहिशर्द्धोनमारुतं तुविष्वणिरिति ।

कनिष्ठा बहुपादानां भारद्वाजी-
पुरूतमं ॥ ६२ ॥

बहुपादानां ऋचां मध्येकनिष्ठा अल्पाविंशत्यक्षरा भारद्वाजी पुरुतमंपुरूणां स्तोतृणामिति । ऋषिग्रहणात्पुरुतमं पुरूणामीशानमिति मास्तु ।

अविकर्षेण सौभरी प्रेष्ठम्वादि-
ष्क्रसीयसी ॥ ६३ ॥

अविकर्षेणसौभरिणा दृष्टाप्रेष्ठमुप्रियाणामित्येषाक्रसीयसी । अल्पाक्षरतराभवत्येकोनविंशत्यक्षरेति ।

विराजोद्विपदाः केचित्सर्वा
आहुश्चतुष्पदाः। कृत्वापंचाक्षरा-
न्पादां स्तांस्तथाक्षरपंक्तयः ॥५०॥

पश्वानता युंगुहाचतंतमित्येवमादयः । याविराजोद्विपदास्ताः सर्वाः पंचाक्षरान्पादान्कृत्वा चतुष्पदाणाहुः ।

इति श्री पार्षदव्याख्याया मा-

नंदपुरवास्तव्य वज्रटपुत्रोव्व-
टकृते प्रातिशाख्यभाष्ये
सप्तदशंपटल-
म् ॥ १६ ॥

वार्हतोबृहतीपूर्वः ककुप्पूर्वस्तु-
काकुभः । एतौसतोबृहत्यंतौ
प्रगाथौभवतोद्वृचौ ॥ १ ॥

योबृहतीपूर्वः सबार्हतः । ककुप्पूर्वीयः सकाकुभः । उभावेतौ सतोबृहत्यंतौ द्वृचौ प्रगाथौ भवतः ।

त्वमंगप्र प्रवोयह्व माचिद्बृहद्-
गायिषे । बार्हताः काकुभाना-
हुस्तंगूर्धयावयम्विति ॥ २ ॥

इमेते प्रगाथाः त्वमंगप्रशंसिषः प्रवोयह्वं पुरूणां । माचिदन्यद्विशंसत । बृहद्गायिषेवचः । काकुभानाहुः । तंगूर्धयास्वर्णरं । वयमुत्वामपूर्व्येति ---

अनुष्टुब्द्वेचगायत्र्या वैषश्चानुष्टु-
भःस्मृतः । विराजावभिसंपन्नः
पद्याच्चर्येसउत्थितः ॥ ३ ॥

एकानुष्टुप्द्वेचगायत्र्यौ एषप्रगाथ आनुष्टुभः स्मृतः । विराजौद्वेअभिसंपन्नः । पद्याचाचर्या च । पादैरनुच-रैश्चेत्यर्थः । दशपदाः सैकाविराट् । अशीतिरचराणि अचर्यास इतिप्रतीकं । सपूर्व्योमहानामित्युत्थित इति प्रशंसाकृता । अन्येप्रगाथाः षड्भिः सप्तभिरष्टाभिर्वापादै र्भवति । अयं तु दशभिस्तस्मादुत्थितइति प्रशस्यते ।

आकृतिर्व्यपदेशानां प्रायआदि-तआदितः ॥ ४ ॥

आदितः प्रायेण प्रगाथः क्रियते । व्यपदिश्यते । बा-र्हतः काकुभआनुष्टुभइति तेषामादितोयच्छन्दस्तेनैव-व्यपदेशः कृतो द्रष्टव्यः । नोभाभ्यां । यथागायत्रबा-र्हतइति ।

गायत्र्यादिस्तु बार्हते प्रायोगा-यत्रबार्हतः ॥ ५ ॥

गायत्र्यादिर्बृहत्यंतः एषप्रगाथः प्रायोगायत्रबार्हत उच्यते । यथातमिंद्रंदानमीमहे इति ।

गायत्रकाकुभोनाम प्रायोभव-ति काकुभे ॥ ६ ॥

गायत्र्यादिः ककुबंतः प्रगाथः गायत्रकाकुभोनाम वेदितव्यः यथासुनीथोघासमर्त्यइति ।

औष्णिहरूणिहापूर्वः पङ्क्त्या-

न्तः पाङ्क्तकाकुभः ॥ ७ ॥

उष्णिक्पूर्वः सतो बृहत्यन्तः प्रगाथऔष्णिह इत्युच्यते यथा। यमादित्यासो अद्रुह इति । पंक्त्यंतःककुप्पूर्वः पांक्तकाकुभोनाम वेदितव्यः । यथा अदान्मे पौरुकुत्स्यः। १ ।

तमिन्द्रंचसुनीथश्च यमादित्यास-
एव च। अदान्मेपौरुकुत्स्यश्च-
तास्त्रचोत्तनिदर्शने ॥ ८ ॥

पुरस्तादेवनिदर्शितान्युक्तानि।

महासतो बृहत्यंतो योमहा-
बृहतीमुखः ॥ ९ ॥

समहाबार्हतोनाम । महासतोबृहत्यंतोयः प्रगाथ समहाबार्हतइत्युच्यते । यथातंवःशर्द्धं रथेशुभमिति ।

बार्हतोबृहतीमुखः ॥ १० ।

बृहतीमुखःजगत्यंतोयः प्रगाथःसबार्हतस्थत्युक्तमित्येव ।

अथो अतिजगत्यंतः।

अपिचातिजगत्यन्तो बृहतीमुखोयोबार्हतएवसः । यथानेमिंनमंति चक्षसेति ।

यवमध्योत्तरोपि च ॥ ११ ॥

यवमध्योत्तरो बृहतीमुखो योबार्हतएवसोपि । यथा । वामो वामस्य धूतयइति ।

बृहद्भिस्तंवोनेमि चवामीवामस्य ता ऋचः ॥ १२ ॥

पुरस्तादेवोदाहृताः ।

नहिते विपरीतान्तः ॥ १३ ॥

नहिते क्षत्रराधसइत्ययंप्रगाथो विपरीतांतः बृहतीमुखः विपरीतांतोनामवेदितव्यः ।

मोषुत्वाद्विपदाधिकः ॥ १३ ॥

मोषुत्वावाघतश्चनेति प्राकृतएवप्रगाथः द्विपदाधिको वेदितव्यः । रायस्कामो वज्रहस्तमित्येतया सहितोद्रष्टव्यः ।

अनुष्टुब्जगतीचैव विश्वेषामिरज्यंतं च ॥ १४ ॥

विश्वेषामिरज्यंतं वसूनामित्ययंप्रगाथः अनुष्टुप्पूर्वः जगत्यंतो वेदितव्यः ।

द्विपदाबृहतीचैव सनोवाजेष्विवतिस्मृतः ॥ १५ ॥

सनोवाजेष्ववितापुरूवसुरित्ययं प्रगाथः द्विपदापूर्वः बृहत्युत्तरः स्मृतः ।

ककुप्पूर्वस्तुकोवेद स्मृतः का-
कुभबार्हतः ॥ १६ ॥

ककुप्पूर्वोबृहत्यंतः काकुभबार्हतो नामायंप्रगाथः स्मृतः । कोवेदजानमेषामिति । २ ।

आनुष्टुभौष्णिहं विद्यात्तेम आहु
र्यआययुः ॥ १७ ॥

तेमआहुर्यआययुरित्ययं प्रगाथः । तमानुष्टुभौष्णिहं विद्यात् । अनुष्टुप्पूर्वा अपरावुष्णिहाविति ।

तेनस्त्राध्वं बृहत्यादिबार्हतानु-
ष्टुभःस्मृतः ॥ १८ ॥

तेनस्त्राध्वंतेवतेत्ययं प्रगाथो बृहत्यादिरनुष्टुबंतो बार्हतानुष्टुभःस्मृतः ।

अग्निंवः पूर्व्यमित्येषाऽनुष्टुप्पं-
क्तिरेवच ॥ १९ ॥

अग्निंवः पूर्व्यंगिरेतिप्रगाथोऽनुष्टुप्पूर्वः पंक्त्यन्तः आनुष्टुभःपांक्तइतिस्मृतः ।

यदध्रिगावो अध्रिगूककुप्च त्रि-
ष्टुबेवच ॥ २० ॥

यदध्रिगावो अध्रिगइत्येषप्रगाथः ककुप्पूर्वः त्रिष्टुबंतः काकुभस्त्रैष्टुभः स्मृतः ।

यदद्यवामनुष्टुप्चैवोपदिश्यते॥२१॥

यदद्यवां नामेत्ययंप्रगाथः अनुष्टुप्पूर्वः त्रिष्टुबुत्तरः आनुष्टुभः त्रैष्टुभःस्मृतः।

यत्स्थोदीर्घेतिचत्वेषोबृहती त्रिष्टबेवच ॥ २२ ॥

यत्स्थोदीर्घप्रसद्मनीत्येषप्रगाथः बृहतीपूर्वः त्रिष्टुबुत्तरवार्हतत्रैष्टुभइत्युच्यते।

आयन्मावेनात्रिष्टुप्च जगतीचोपदिश्यते ॥ २३ ॥

आयन्मावेना अरुहन्नृतस्येत्ययं प्रगाथः त्रिष्टुप्पूर्वः जगत्युत्तरः त्रैष्टुभजागत इत्युपदिश्यते।

ताबधं तावनुष्टुप्च महासती-(१)मुखेति च ॥ २३ ॥

महासतीमुखेति विराट्पूर्वा त्रिष्टुबुच्यते। ताबधंतावनुष्टुनित्ययप्रगाथो ऽनुष्टुप्पूर्वः त्रिष्टुबुत्तरः आनुष्टुभः त्रैष्टुभइत्युपदिश्यते।

जागत स्त्वददा अभींप्रगाथ स्त्रिष्टुबुत्तरः ॥ २४ ॥

अददाअभींमहते वचस्यवइतिप्रगाथः त्रिष्टुबुत्तरः

---

(१) मुखेविराद् इति खपुस्तकेपाठः।

जागतइत्युपदिश्यते ।

उत्तरस्त्रैष्टुभ स्तस्मा ज्जगत्यु-त्तरउच्यते ॥ २५ ॥

तस्मादुत्तरःप्रगाथः इंद्रंनमोहृषभाय स्वराजइति जगत्युत्तरः त्रैष्टुभइत्युच्यते । ३ ।

त्वमेतां जनचद्वौद्वौ सघारा-जेतिच स्मृतौ ॥ २६ ॥

त्वमेतांजनराज्ञोद्विहर्षेति द्वौप्रगाथौ पूर्ववद्द्रष्टव्यौ । यथापूर्वोजागतः त्रिष्टवुत्तरइत्युच्यते । तस्मादुत्तरःप्रगाथः यउहृचीद्रदेवगोपा इति त्रैष्टुभजागतइत्युच्यते । सघाराजासत्पतिः भूश्रुवज्जनइतिच द्वौप्रगाथौस्मृतौ पूर्वोजागतः त्रिष्टुवंतः । तुभ्येदेतेबहुला अद्रिदुग्धा इति त्रैष्टुभो जगत्युत्तरः ।

त्वमस्यपारे रजसो जागतौ त्रि-ष्टवुत्तरौ ॥ २७ ॥

त्वमस्य पारे रजसोव्योमनइति द्वौप्रगाथौ त्रिष्टवुत्तरौ जागतौज्ञेयाविति ।

सव्यंजनः सानुस्वारः शुद्धोवा-पिस्वरोक्षरं ॥ २८ ॥

व्यंजनेनयुक्तः अनुस्वारेणसहितः अथवा ऽनुस्वारव्यंजनाभ्यांरहितःस्वरः अक्षरसंज्ञकोभवति ।

व्यञ्जनान्युत्तरस्यैवस्वरस्यांत्यंतु पूर्वभाक् ॥ २९ ॥

व्यंजनानि उत्तरस्यस्वरस्यैवांगं भवंति । तदस्य । तन्न: । यंतंतु व्यंजनं पूर्वमच्चरं भजेत् । तत् । वाक् ।

विसर्जनीयानुस्वारौ भजेते पूर्वमच्चरं ॥ ३० ॥

विसर्जनीय: अनुस्वारश्च पूर्वमच्चरंभजते । य:सोम । त्वंसोम ।

संयोगादिश्चैवंच ॥ ३१ ॥

संयोगादिर्वा पूर्वमच्चरं भजते । तस्य । यस्य ।

सहक्रम्य: परक्रमे ॥ ३२ ॥

क्रमेणासह क्रम्योवर्ण: पूर्वमच्चरं भजते वा परक्रमे सति । सक्थिम् । अर्क्क: । ऊर्ज्जं ।

तथा । पूर्वं पादेन पश्चाद्दाभ्यां । इतेरितिते इत्यमस्तु सस्थंद्रति ।

मध्येवसानंतु चतुष्पदानां ॥३३॥

चतुष्पदानां मध्येऽवसानं भवति गायंतित्वा गायत्रिणाइति ।

त्रिभि: समस्तैरवरै:परैर्वा ॥३४॥

त्रिभिः समस्तैः पादैः पूर्वमवसानं भवति । पादेन-उत्तरं यथा एत शंसमिंद्रा स्तयुष्टाम् । पादैर्वात्रिभिः पर-मवसानं भवति । पादेनपूर्वं अधीन्वत्र सप्ततिंच सप्तचेति-

पंक्त्यांद्विशोवा तत उत्तरेण त्रिभिः परैर्वाविपरीतमेतत् ॥३५॥

पंक्त्यां पंचपदास्वित्यर्थः । द्विशः द्वाभ्यांद्वाभ्यां अव-स्येत् । पादे नोत्तरमवसान । अयंच क्रमिषणात्सूर्यस्येति । त्रिभिःपादैः परमवसानंवा । द्वाभ्यां पूर्वं । नकिष्टं क-र्मणानशदिति । एतद्विपरीतं वा । त्रिभिः पूर्वंद्वाभ्या-मुत्तरं । न किष्टंवाम्निनीमस्तोति ।

द्विश स्त्रिशोवा परतश्चतुर्भिः स्यात्षट्पदानामवसानमेतत् ॥३६॥

द्वाभ्यांद्वाभ्यां त्रिभिस्त्रिभिर्वा अवस्येत् विश्वान्देवा न्हवामहे । एषातुकौषी तक्रीनां षट्पदाशस्यते अस्माकं य: पंचमः पादः सतेषां न विद्यते । अस्मिन्पक्षे उदा-हरणं । त्रिशोवा । त्रिभिः २ अवस्येद्वा । संक्षपः परि-षस्वजे । अथवा परतश्चतुर्भिरवस्ये द्वाभ्यांपूर्वं निष्कं-वाद्याक्रणवते । एवंत्रिविध मवसानंषट्पदानां स्यात् ।

त्रिभिस्तु पूर्वं ततउत्तरंस्या द्विशस्त्रिशोवा यदिवासमस्ते । द्वाभ्यां पुनः सप्त पदावसानं ॥ ३७॥

सप्तपदानां तु पूर्वमवसानं त्रिभिः पादैः स्यात् । तस्मादुत्तरं द्विशः । यथा सुषुमायातमद्रिभिरिति । त्रिशो-वा यदिपूर्वमवसानं तदाउत्तरं समस्तं । चतुर्भिर्ग्यर्थः । अस्यानुवृत्तिः पूर्वसूत्राद्वा यथा नहित्वांविव्रयामहइति । द्वाभ्यां पुनः पूर्वमवसानं उत्तरंसमस्तैः पंचभिः स्यात् । प्रोष्वस्मैपुरोरथमिति ।

द्वाभ्यांच मध्येष्टपदासु विद्यात्॥३८॥

अष्टपदासु ऋतुमध्येद्वाभ्यांअवसानं स्यात् । परिशे-षादाद्यंतयो स्त्रिभिस्त्रिभिरवसानं भवति । सद्दिशर्द्धीन-मारुतंतु विष्वगिरिति । अग्निमीळे इतेरिवगायंत्ये त-मग्नोन्विति । अयं चक्रं नकिष्टंच नकिर्ह्रैवामिनीमसि । विश्वान्देवान्हवामहे सन्नपोनिष्कं सुषुम । नहिवां प्रो-षुसद्दिशर्द्धश्च तान्ऋचोऽत्रनिदर्शनम् । यथाक्रमं पुरस्तादेव निदर्शितानि ।

द्वाभ्यांपादेनद्वाभ्यांतु तवत्यत्यं-चपदाष्टिः। अत्यूहेनातिशक्करी तृतीयःषोडशाक्षरः ॥ ३९ ॥

द्वाभ्यामवस्येत् । ततःपादेन । पुनर्द्वाभ्यां । तवत्य-न्नर्यंन्तोयदिंद्र त्यत्रावसानं । सेयं पंचपदा आष्टिर्वि-ज्ञेया । अत्यूहेनातिशक्करी । अस्यास्तृतीयः षोडशाक्षरः ।

चतुर्भि स्ततएकेनाग्ने तमद्य-

तिच ॥ ४० ॥

चतुर्भिः पूर्वमवसानं ततएकेन। अग्नेतमद्याश्वंन-स्तोमैरिति।

चतुर्भिस्तुपरं द्वाभ्यां तवस्वादि-ष्ठातच्छंयोः ॥ ४१ ॥

चतुर्भिः पूर्वमवसानं परंद्वाभ्यां। तवस्वादिष्ठाग्नेसं-दृष्टिः। तच्छंयोरावृणीमहे।

भरद्वाजाय तच्चक्षुरधीदृच्चा दृ-तेरिव। एतासु नव्यवस्यंत्येके द्वादशकादिषु ॥ ४२ ॥

एतासु ऋक्षु एके अवसानंनकुर्वंति। भरद्वाजायाव-धुक्ष तद्द्विताधेनुं च। तच्चक्षुर्देवहितं शुक्रमुच्चरत्पश्ये-म। अग्नोन्वश्वसप्ततिंच सप्तचमधोदिदिष्ट। दृत्राश्चिन्न अभिपित्वे अरारणुर्गामृद्दतेरिवतेष्टकमस्तु सख्यमच्छिद्र-स्य। प्रश्नस्तुच इत्युक्तौ ॐकारपटलेश्लोकौ। अवश्च। तत्रैवव्याख्यातौ।

सर्वाणिभूतानि मनोगतिश्च स्प-र्शाश्च गंधाश्च रसाश्चसर्वशब्दा-श्चरूपाणिच सर्वमेत त्त्रिष्टुब्ज-गत्यौ समुपैतिभक्त्या ॥ ४३ ॥

सर्वाणिभूतानि । मनःगतिःस्पर्शाःगंधाःसर्वेरसाः। शब्दाःरूपाणीत्येतत्सर्वं त्रिष्टुप्जगत्यौ भक्त्यासमुपगच्छंतिश्च

गुर्वक्षराणांगुरुवृत्तिसर्वं गुर्वक्षरंत्रैष्टुभमेवविद्यात् ॥ ४४ ॥

यत्किंचित्स्थावरं जंगमं गुरुवृत्ति । तत्सर्वंगुर्वक्षरमेव किंपुनर्गुर्वक्षरं । त्रैष्टुभमिति ।

लघ्वक्षराणां लघुवृत्तिसर्वं लघ्वक्षरं जागतमेवविद्यात् ॥४५॥

यत्स्थावरं जंगमंलघुवृत्ति । तत्सर्वंलघ्वक्षरमेवविद्यात् । किंपुनर्लघ्वक्षरं । जागतमिति ।

यश्छंदसां वेदविशेषमेतं भूतानिचत्रैष्टुभजागतानि । सर्वाणिरूपाणिच भक्तितोयः स्वर्गंजयत्येभि रथामृतत्वं ॥ ४६ ॥

योब्राह्मणः छंदसामेतं विशेषं वेद भूतानिचत्रैष्टुभजागतानिचयोवेद । सर्वाणिरूपाणि च । किमिति । योद्वादशाध्यायानां वर्णानां चाभ्यासं-करोतिभूतानि च त्रैष्टुभजागतानिसर्वाणि रूपाणि च भक्तितः सस्वर्गंजयत्येभिरथामृतत्वं । एवमेवाचार्याणां नमस्कारंदद्यात् शास्त्रांतेचा चार्याणां नमस्कारउपपद्यते । तस्माच्छास्त्रत्वं मुखेशास्त्रत्वे चात्मवत्संज्ञानि

वर्त्तयति । एकशास्त्रभाव प्रदर्शनार्थं संबंधङ्करोति । संबंधेप्रयोजनं पूर्ववदेव । नित्योहिवेदः । कः पुनरनित्यत्वेप्रसंगः । सर्वाणि श्रौतानि इमानिच स्मार्त्तीध्यांपूर्वैः सहातुल्यत्वात्स्यादनित्यत्वं । तस्मान्नित्यत्वं । नैषदोषः । एतस्य समाम्नायस्य वितान इतियोयं नियम आरब्धः सएतेष्वपि प्रसज्यतां । वैतानिकसंज्ञालाभे सति नियमे ममाग्नेवर्चइति यथेध्मनंवर्चो वैश्वदेवः प्रयुज्यते । ममाग्नेवर्चइति प्रत्यृचंसमिद्वइव सर्वत्रेष्यते । अग्न्याधेयोत्तरं कालंच नैवनिवर्त्तयितव्याः कथं प्राप्तिः सास्वते तैः पूर्वैद्वादशाध्यायाः सौनकस्य । अमीचत्वार आश्वलायनस्य एवमप्राप्तसंज्ञाकिमिति निवर्तयति सकलं पुनर्नानाशास्त्रमादाय रामाचार्यप्रदर्शनाच्च स्वामिकुमारपुत्रे मुद्गले मनुधीमताक्रियमाणाये दं दत्तं । भात्रे शिष्यायधीमते त्रैष्टुभजागतानि योवेद भक्तितः सस्वर्गलोकं जयति । एभिः छंदोभिः अथ अक्षतत्वंच गच्छति इत्याह भगवान् शौनकः । श्लोकाः । गायत्र्यादीनिछंदांसि सोमेनवाह्यतः पुरा ॥ १ स्वर्ग्यं यशस्य मायुष्यं पुण्यं वृद्धिकरं शुभं । कीर्त्तिस्मृर्ग्यं यशस्य च्च छंदसांज्ञानमुच्यते । २ ।

इति श्री पार्षदव्याख्याया मानंदपुरवास्तव्य वज्रटपुत्रोव्वटकृतौ प्रातिशाख्यभाष्ये अष्टादशं पटलं समाप्तम् ।

समाप्तोयं ग्रंथाः ।

जटा माला शिखा रेखा ध्वजो दंडो रथो घनः।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः ॥१॥ ब्रूयात्क्रमविपर्यासंक्रममीदृग्विनिर्दिशेत्। जटाख्यां विकृतिंधीमान्विज्ञायक्रमलक्षणम् ॥२॥ क्रमविपर्यासक्रममित्यस्यैव प्रपंचं विवक्षुः पूर्वोक्तमर्थमनूद्यधर्मं विशेषमाह ॥ अनुलोम विलोमाभ्यां त्रिवारंहि पठेत्क्रमम्। विलोमेपदवत्संधिरनुलोमेयथाक्रमम् ॥३॥ अनुलोमे आद्यन्तक्रमयोः पाठेऽथा क्रमंप्रातिशाख्योक्तलक्षणविशिष्ट क्रमका लीन संध्यनतिक्रमेण संधिर्ज्ञातव्या। विलोमे अनुपदवत्पदेन तुल्यम्। ब्रूयात्क्रमविपर्यासावर्द्धचंस्यादितो न्ततः। अंतं चादिन्नयेदेवं क्रममालेतिकीर्तिता। ४। पदोत्तरां जटामेव शिखामार्याः प्रचक्षते। क्रमादिविचतुः पंच पदक्रममुदाहरेत् ।५। पृथक्पृथग्विपर्यस्य रेखामाहुः पुनः क्रमात्। ब्रूयादादेः क्रमं सम्यगं तादुत्तारयेदिति॥६॥वर्गोवा ऋचिवा यस्यपठनं सध्वजः स्मृतः। क्रममुक्त्वाविपर्यस्य पुनस्त्रक्रममुत्तरं ७ अर्द्धर्चादेवमुक्तोऽयं क्रमदंडोऽभिधीयते। पादशोऽर्द्धर्चंशोवापिसंहितायादंडवद्रथः।८। अंतात् क्रमंपठेत्पूर्वं आदिपर्यन्तमानयेत्। आदिक्रमंनयेदन्तं घनमाहुर्मनीषिणः।९। लोके प्रसिद्धद्वितीयघनलक्षणमाह। शिखामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत्। अयं घन इति प्रोक्तइत्यष्टौविकृतीः पठेत्। १०। इति जटादिविकृतीनां लक्षणकारिकाः।

अथ शौनकोक्तं चरणव्यूहपरिशिष्टं सभाष्यँल्लिख्यते ॥

नत्वा श्रीशमुमेशं च गणेशं श्रीयुतं गुरुम् ॥ शाखादेरिदमाख्यानं क्रियतेऽन्वेष्य यत्नतः ॥ १ ॥ यथाऽनादिर्हरिः ख्यातो निदानं जगतां परम् ॥ तथा वेदोऽपि शास्त्राणां स्मृत्यादीनां महाशयः ॥ २ ॥ तमगाधं च को वेत्ति विस्तीर्णत्वं विनेश्वरम् ॥ तस्मात्सङ्क्षेपतो वक्ष्ये वैदिकादिमुदे मुदा ॥ ३ ॥ ओमित्येकाक्षरं ब्रह्म नादबिन्दुकलात्मकम् ॥ त्रिदेवत्वं त्रिमात्रं च स्फुटं विष्णुसनातनम् ॥ ४ ॥ तं सर्वज्ञं जगत्सेतुं परमात्मानमीश्वरम् ॥ वन्दे नारायणं देवं निरवद्यं निरञ्जनम् ॥ ५ ॥ कृष्णद्वैपायनं वन्दे गुरुं वेदमहानिधिम् ॥ येन चरणव्यूहेषु शाखाभेदमितं कृतम् ॥ ६ ॥ तच्छिष्यं शौनकगुरुं वेदज्ञं लोकविश्रुतम् ॥ नत्वा तु शाकलाचार्य्यं तथैव चाश्वलायनम् ॥ ७ ॥ एवं परम्पराप्राप्तं बालकृष्णं महागुरुम् ॥ यस्य प्रसादाद्व्याख्यामि चरणव्यूहसंज्ञकम् ॥ ८ ॥

अथातश्चरणव्यूहं व्याख्यास्यामः ॥ १ ॥

अथशब्दो मङ्गले प्रस्तावे च । अथशब्दः पूर्वमेव

मङ्गलार्थ इत्यर्थः । अतो हेत्वर्थः । वेदराशेः पारायण-
चतुर्विभागाच्चरण उच्यते । तस्य व्यूहः समुदायः ।
चतुर्वेदानां समुदायं व्याख्यास्यामइत्यर्थः । कथमेक-
वेदः । तदुक्तमारण्यके "सर्वे वेदाः सर्वे घोषा एकैव
व्याहृतिः प्राणा एव प्राण ऋच एवं विद्यादिति" त-
स्य चतुर्विभागाः कृताः । तथा चोक्तं द्वादशस्कन्धे ष-
ष्ठाध्याये भागवते । तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैः
प्रभुः ॥ सव्याहृतिकान्सोङ्कारांश्चातुर्होत्रविवक्षया ॥
१ ॥ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् ॥ ते
तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ २ ॥ ते प-
रम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथ व्य-
स्ता द्वापरादौ महर्षिभिः ॥ ३ ॥ क्षीणायुषः क्षीणस-
त्वान्दुर्मेधान्वीक्ष्य कालतः ॥ वेदान्ब्रह्मर्षयो व्यस्यन्हृ-
दिस्थाच्युतनोदिताः ॥ ४ ॥ अस्मिन्नप्यन्तरे ब्रह्मन्भग-
वाल्लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो ध-
र्मगुप्तये ॥ ५ ॥ पराशरात्सत्यवत्यामंशांशकलया वि-
भुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥ ६ ॥
ऋगथर्वयजुःसाम्नां राशीकृत्य वर्गशः ॥ चतस्रः सं-
हिताश्चक्रे सूत्रे मणिगणा इव ॥ ७ ॥ तासां स चतु-
रः शिष्यानुपाहूय महामतिः ॥ एकैकसंहितां ब्रह्म-
न्नेकैकस्मै ददौ विभुः ॥ ८ ॥ पैलाय संहितामाद्यां
बह्वृचाख्यामुवाच ह ॥ वैशम्पायनसञ्ज्ञाय निगदाख्यां
यजुर्गणम् ॥ ९ ॥ साम्नां जैमिनये प्राह तथा छन्दो-
गसंहिताम् ॥ अथर्वाङ्गिरसां नाम स्वशिष्याय सुमन्त-

वे ॥ १० ॥ पैलः स्वसंहितामूचे इन्द्रप्रमितये मुनिः ।
बाष्कलाय च सोऽप्याह शिष्येभ्यः संहितां स्वकाम् ॥
११ ॥ चतुर्द्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ।
पराशरायाग्निमित्रे इन्द्रप्रमितिरात्मवान् ॥ १२ ॥
अध्यापयत्संहितां स्वां माण्डूकेयमृषिं कविम् ॥ तस्य
शिष्यो वेदमित्रः सौभर्य्यादिभ्य ऊचिवान् ॥ १३ ॥ शा-
कल्यस्तत्सुतः स्वां तु पञ्चधा व्यस्य संहिताम् ॥ वात्स्य-
मौद्गल्यशालीयगोसत्यशिशिरेष्वधात् ॥ १४ ॥ जातू-
कर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ॥ व्यलीक-
पैङ्गिपैलालविरजेभ्यो ददौ मुनिः ॥ १५ ॥ बाष्कलिः
प्रतिशाखाभ्यो वालखिल्याख्यसंहिताम् ॥ चक्रे बाला-
य निर्भज्य कासारश्चैव तां दधुः ॥ १६ ॥ बह्वृचाः
संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छन्दसां
व्यासं सर्वपापैः प्रमुच्यते ॥ १७ ॥ अस्यार्थः । व्यासा-
त्पैलः संहितां पदक्रमं च त्रिविधरूपं पठित्वा इन्द्रप्र-
मितये बाष्कलाय च ददौ इन्द्रप्रमितिश्चतुर्धा जटान्तं
व्यासं कृत्वा स्वसुताय माण्डूकेयाय बोध्याय याज्ञव-
ल्क्याय पराशरायाग्निमित्रे च ददौ । माण्डूकेयस्य-
शिष्यो वेदमित्रस्तस्य पुत्रेभ्यः सौभर्यादिभ्यस्तैः स्वसुता-
य शाकल्याय ददौ । शाकल्यः संहितापदक्रमज-
टादण्डरूपं च पञ्चधा व्यासं कृत्वा वात्स्यमुद्गलशा-
लीयगोसत्यशिशिरेभ्यो ददौ । शाकल्यशिष्यो जा-
तूकर्ण्यः सनिरुक्तां संहितां व्यलीकपैङ्गिपैलालविर-
जेभ्यो ददौ । पूर्वोक्तबाष्कलपुत्रो बाष्कलिः पूर्वोक्त

सर्वशाखाभ्य उद्धृत्य वालखिल्याख्यसंहितां चक्रे तां नाम्ना वालखिल्यसंहितां वालायनिप्रभृतयोऽधीतवन्तः ॥ इति पदेषु संहितात्वमितिकरणवेष्टनं, उदात्तस्वरितस्वराणां सिद्धिः, एतच्छन्दसां व्यासं विस्तारं श्रुत्वा सर्वपापैः प्रमुच्यत इत्यर्थः । तथा च विष्णुपुराणे । ब्रह्मणा चोदितो व्यासो वेदान्व्यस्तु प्रचक्रमे ॥ अथ शिष्यान्स जग्राह चतुरो वेदपारगान् ॥ १ ॥ ऋग्वेदश्रावकं पैलं सञ्जग्राह महामतिः ॥ वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत् ॥ २ ॥ जैमिनिः सामवेदस्य तथैवाथर्ववेदवित् । सुमन्तुस्तस्य शिष्योऽभूद्वेदव्यासस्य धीमतः ॥ ३ ॥ तथा च गृह्यसूत्रम् ॥ सुमन्तुजैमिनि वैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या इति । जानन्ति बाह्वित्यारभ्य माण्डूकेया इत्यन्तं माण्डूकगणसमुदायः । गार्गी वाचक्नवीत्यारभ्य शाङ्खायनमित्यन्तेन शाङ्खायनगणः । एतेषां कौषीतकीब्राह्मणमारण्यकं शाङ्खायनसूत्रं चेति । ऐतरेय इत्यारभ्य आश्वलायनान्ता आश्वलायनगणाः । एषामैतरेयब्राह्मणमारण्यकमाश्वलायनसूत्रं चेत्यर्थः ॥ (१)

(१) अमुमेवार्थं श्रीमद्वेदव्यासः प्रथमस्कन्धे चतुर्थाध्याये आह ॥ सूतउवाच ॥ द्वापरे समनुप्राप्ते तृतीययुगपर्यये ॥ जातः पराशराद्योगी वासव्यां कलया हरेः । १ । स कदाचित्सरस्वत्याउपस्पृश्य जलं शुचिः ॥ विविक्त एक आसीनउदिते रविमण्डले ॥ २ ॥ परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा ॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥ ३ ॥ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम् ॥ अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसितायुषः । ४ । दुर्भगश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा ॥ सर्वधर्माश्रयाणां यद्दध्यौ चिरममोघदृक् । ५ । चातुर्होत्रं कर्मशुद्धं प्रजानां वीक्ष्य वैदिकम् ॥ व्यदधाद्यज्ञसन्तत्यै वेदमेकं चतुर्विधम् । ६ । ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वा-

तत्र यदुक्तं चातुर्विध्यं चत्वारो वेदा विज्ञाता भवन्ति ॥ २ ॥

अस्मिन् ग्रन्थे यदुक्तं चातुर्विध्यं तेऽत्र चत्वारो वेदा विज्ञाता भवन्ति ॥

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति ॥ ३ ॥

रउद्धृताः । इतिहासपुराणं च पञ्चमो वेद उच्यते । ७ । तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः । वैशम्पायन एवैको निष्णातो यजुषां मुने । ८ । अथर्वाङ्गिरसामासीत्सुमन्तुर्वारुणो मुनिः । इतिहासपुराणानां पिता मे रोमहर्षणः । ९ । तएव ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा । शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनो भवन् । १० । तएव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा । एवं व्यवस्यद्भगवान्व्यासः कृपणवत्सलः । ११ । अस्यार्थः । कृतयुगापेक्षया तृतीये युगपर्यवसाने समनुप्राप्ते सति हरेः कलांशेन पराशरात्पराकृतः शरो हिंसा येन स तथोक्तस्तद्वासव्यां वसोरुपरिचरस्य पुत्र्यां सत्यवत्यां योगी नित्यज्ञानी नाम्ना व्यासो जातोऽवतीर्णो भगवान् स कदाचिच्छुद्धः सरस्वत्या नद्या जलमुपस्पृश्य सन्ध्याक्रियां निर्वर्त्य पश्चाद्रविमण्डले उदिते सति तत्तटे एकान्ते एकाकी काललयज्ञानी युगधर्मसाङ्कर्यं कालकृतभूतकार्याणां शक्तिह्रासं च तात्पर्यशून्यान्निरुत्साहान्दुष्टमेधान्धारणाशक्तिशून्यानल्पायुषो दुष्टभाग्यान्वीक्ष्य मौनवान् अपरोक्षज्ञानेन सर्वाश्रमाणां यद्धितं तच्चिरं चिन्तितवान् । होत्रध्वर्यूद्गातृब्रह्माणो यस्मिंस्तत्तथोक्तं दर्शहोत्रादिचातुर्होत्रपर्यन्तैर्मन्त्रैः प्रकाश्यं वा अग्निष्टोमादिकं कर्म प्रजानां वैदिकीनां शुद्धिकरं वीक्ष्य अग्निष्टोमादियज्ञपरम्पराप्रवर्त्तनाय अविभक्तं ऋगादिभेदेन चतुर्विधं वेदं व्यदधात् । वेदव्यासेन मूलवेदसमुद्राच्चत्वारो वेदा उद्धृता न तु कृताः, तदर्थज्ञानाय कृतं इतिहासपुराणं च वेदार्थवेदकत्वात्पञ्चमो वेदो रचितोऽर्थतो न किन्तु शब्दतः । जैमिनस्यापत्यं जैमिनिः साम गायति शिष्येषु गमयति प्रवर्तयति, कविः सूक्ष्मज्ञानी । यजुर्वेदप्रवर्त्तकतया वैशम्पायनः । वरुणपुत्रः सुमन्तुः । रोमहर्षणः इतिहासपुराणानां प्रवर्त्तकः । किमर्थं दीनजनस्निग्धः शाखोपशाखाभेदेन व्यवस्यत् चकार तस्माद्व्यास इति नाम बोध्यम् ॥

इति स्पष्टार्थः । "वेदा हि यज्ञार्थमभिप्रवृत्ताः । तथा च विष्णुपुराणम् । आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः । ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक् ॥ १ ॥ अत्रैव मत्सुतो व्यास अष्टाविंशतिमेऽन्तरे ॥ वेदमेकं चतुष्पादश्चतुर्धा व्यभजत्प्रभुः ॥ २ ॥ अस्यार्थः । आद्यो वेदो वेदविभागात्पूर्वकालीनो वेदश्चतुष्पादः ऋगादिचतुष्टयसमूहरूपः । शतसाहस्रसम्मितः । दश दश तच्छतं दशशतानि "तत्साहस्रं तत्सर्वमिति श्रुतेः । अनन्तसङ्ख्याकः । "अनन्ता वै वेदा इति श्रुतेः । ततो वेदात्प्रवृत्तः कृत्स्नोऽयं दशगुणः । दशविधः । "स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोमइति श्रुतेः । तथा च "पञ्च वा एते महायज्ञा इत्युपक्रम्य ब्रह्मयज्ञो देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञइति श्रुतेश्च । वैतानिका गार्ह्याश्च दशयज्ञाः । अत्रान्तरे वैवस्वतमन्वन्तरे अष्टाविंशतिमे द्वापरयुगे इति शेषः । मत्सुतो व्यासः कृष्णद्वैपायनश्चतुर्धा व्यभजत् । ऋग्वेदादिरूपेण चतुर्धा विभक्तवान् । पाकयज्ञास्त्रिविधाः । अत्र गृह्यम् । "हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुताइति । अत्र वृत्तिकृत् । हुता अग्नौ हूयमाना हविष्यस्य जुहुयादित्येवमादयो हुताः । अनग्नौ क्रियमाणा अथ बलिहरणमित्येवमादयः प्रहुताः । ब्राह्मणभोजनं यत्रास्ति ब्राह्मणान्भोजयित्वेति ब्रह्मणि हुताः इति । नित्या-

व्यासो ब्रह्मयज्ञः पारायणं च । अत्र गृह्यसूत्रम् । ब्रह्मयज्ञखण्डे । यदृचोऽधीते पय आहुतिभिरेव तद्देवतास्तर्पयति यद्यजूंषि घृताहुतिभिर्यत्सामानि मध्वाहुतिभिर्यदथर्वाङ्गिरसः सोमाहुतिभिर्यद्ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानीत्यमृताहुतिर्यदृचोऽधीते पयसः कुल्या अस्य पितॄन्त्स्वधा उपक्षरन्तीति ॥

तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति ॥ ४ ॥

तत्र ऋग्वेदस्याष्टभेदा भवन्ति शाकलबाष्कलौ ऐतरेयब्राह्मणारण्यकौ ४ शाङ्खायनमाण्डूकौ ६ कौषीतकीब्राह्मणारण्यकौ ८ अन्येऽष्टभेदा यथा "वेदा विकृतिशाखाश्च भेदस्तु त्रिविधस्तथा ॥ पृथङ्नाना विधानेन व्यासेन कथितं पुरा। इति। अत्राष्टभेदेनाष्टस्थानेन वा विकृतिर्ग्राह्या । विकृतिस्तु अग्रे वक्ष्यामः । तस्माद्ब्रह्मयज्ञार्थं पारायणार्थं च ऋग्वेदस्याध्ययनं कर्त्तव्यम् । ततश्चतुष्पदेन वक्ष्यति ॥

चर्चा श्रावकश्चर्चकः श्रवणीयपारः ॥ ५ ॥

चर्चाअध्ययनम् । तत्र औणादिसूत्रे । चिन्ति पूजि कथि कुम्बि चर्चश्च । एभ्योऽङ् स्त्रियां भावादौ । चि-

न्ति स्तुत्याम् । पूजि पूजायाम् । कथि वाक्यप्रबन्धे । कुम्बि आच्छादने । चर्चाध्ययने । चुरादय इति । अष्टाध्यायीसूत्रे ताल्वोष्ठपुटव्यापारेण शब्दस्य श्रवणं क्रियते सा चर्चा । तदध्ययनस्य श्रावको गुरुः । तस्य चर्चकः शिष्यः । श्रवणीयपारः श्रवणीयो वेदः तस्य पारः समाप्तिः । इति चतुष्पदेन अध्ययनं सूचितम् । अग्रे चतुष्पदेन चत्वारि पारायणानि सूचयति । तत्पारायणं द्विविधं प्रकृति विकृति रूपम् । का प्रकृतिः । का विकृतिः । प्रकृतिः संहिता सा द्विविधा रूढा योगा । रूढा यथा "अग्निमीडे पुरोहितमिति । योगा यथा अग्निमीडे । ईडे पुरोहितम् । इति शौनकीयप्रातिशाख्यद्वितीयपटले उव्वटभाष्यकारेण व्याख्यातम् । अथ चतुष्पारायणं यथा ॥

क्रमपारः क्रमपदः क्रमजटः क्रमदण्डश्चेति चतुष्पारायणम् ॥ ६ ॥

क्रमशब्द उभयसंहिता वाच्यः । स कथम् । अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् । विलोमे पदवत्सन्धिरनुलोमे यथाक्रमम् । यथाक्रमं यथा संहिता इत्यर्थः । अन्यच्च । वर्णक्रमः । अक्षरसमाम्नाय एवेत्यारण्यके । कथमभिष्टुयादित्यक्षरशः । चतुरक्षरशः । पच्छः । अर्द्धर्चशः । ऋक्शः । इति ब्राह्मणम् । भूयांसि तु समाम्नानात् व्यञ्जनमात्रं तु तत्तस्याभिधानस्य भवतीति नैरुक्ताः । क्रमः संहिता-

वाचो कथम् । पदप्रकृतिः संहितेति निरुक्तवचनात्सा क्रमरूपा इत्यर्थः । क्रमपदः क्रमः संहिता तस्याः पदानि । इति द्वे प्रकृतिपारायणे द्वे विकृतिरूपे । विकृतिरष्टविधा भवति । तत्र । जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः । अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिरिति । आसां मध्ये जटा दण्डयोः प्राधान्यम् । तत्कथम् । जटानुसारिणी शिखा । दण्डानुसारिणी माला लेखा ध्वजो रथश्च । घनस्तूभयानुसारित्वात् । अस्या नियमवाक्यानि व्याडीकृतजटापटले उदाहरणानि च । तत्र जटावाक्यम् । क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ॥ अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेवं हि जटाभिधीयते । १ । अस्यार्थः । क्रमे यथोक्तेसति "क्रमो द्वाभ्या"मित्याद्युक्ते क्रमप्रकारे पदजातं पदद्वयं वा पदत्रयं वा द्विवारमभ्यसेत् । द्विवारं पठेत् अभ्यासप्रकारः । उत्तरमेव पूर्वं क्रमवत्पदद्वयं गृहीत्वा पूर्वं नाम प्रथमं उत्तरपदमभ्यसेत् । तत उत्तरपूर्वपदयोः सन्धानद्वारा पूर्वं द्विरभ्यस्योत्तरे पदेऽवसानं एवं प्रकारेणाध्ययनं जटाभिधीयते कथ्यते । हीति निश्चयार्थम् । उदाहरणान्दर्शयति । अग्निमीळईळेऽग्निमग्निमीळे, ईळे पुरोहितं पुरोहितमीळऽ ईळे पुरोहितम् । इत्यादि ज्ञेयम् । अथ दण्डलक्षणम् । क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम् । अर्द्धर्चादेवमुक्तोऽयं क्रमदण्डोऽभिधीयते । उदाहरणं

यथा । अग्निमीडे । ईडेग्निम् । अग्निमीडे । ईडेपुरोहितम् । पुरोहितमीडेग्निम् । इत्यादि ज्ञेयम् । अथमाला लक्षणम् । ब्रूयात्क्रमविपर्यासावर्द्धं चस्यादितोऽन्ततः । अन्तं चादिं नयेदेवं क्रममालेति गीयते । माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा ॥ आवर्त्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसङ्क्रमाः । अथ शिखालक्षणम् । पदोत्तरां जटामेव शिखामार्याः प्रचक्षते । अथ रेखालक्षणम् । क्रमाद्द्वित्रिचतुष्पञ्चपदक्रममुदाहरेत् । पृथक्पृथग्विपर्यस्य लेखामाहुः पुनः क्रमात् ॥ अथ ध्वजलक्षणम् । ब्रूयादादेः क्रमं सम्यगन्तादुत्तारयेद्यदि ॥ वर्गे च क्वचित्वा यत्र पठनं स ध्वजः स्मृतः । अथ रथलक्षणम् । पादयोऽर्द्धर्चयो वाऽपि सहोक्त्या दण्डवद्रथः । अथ घनलक्षणम् । जटामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत् । अयं घन इति प्रोक्तः इत्यष्टौ विकृतीः पठेत् । अन्यच्च घनस्य द्वितीयलक्षणम् । अन्तात्क्रमं पठेत्पूर्वमादिपर्यन्तमानयेत् । आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः । इत्यष्टविकृतिलक्षणान्युक्तानि अध्ययने संहितापारायणम् । १ । पदपारायणम् । २ । जटापारायणम् । क्रमदण्डपारायणञ्च । ४ । एतत्पारायणचतुष्टयमित्यर्थः ॥

एतेषां शाखाः पञ्च विधा भवन्ति ॥ ७ ॥

एतेषां वेदपारायणानां पञ्च शाखा भवन्तीत्यर्थः ॥

ताः काइत्यत आह ॥

शाकला बाष्कला आश्वलायनाः शाङ्खायना माण्डूकायनाश्चेति ॥ ८ ॥

इति प्रसिद्धाः ॥ तेषामध्ययनम् । तेषां आश्वलायनीयादिशाखानां समानाध्ययनं सूचयति ॥

अध्यायाश्चतुःषष्टिर्मण्डलानि दशैव तु ॥ ९ ॥

अध्यायाश्चतुःषष्टिः । अग्निमीळे । अयं देवायेत्यादि चतुःषष्टिरध्याया इत्यर्थः । मण्डलानि दशैव तु । अग्निमीळे । कुषुम्भक इत्याद्युपाकर्मप्रसिद्धानीत्यर्थः ॥

एकश्च एकवर्गश्चैकश्च नवकस्तथा द्वौ वर्गौ तु द्व्यृचौ ज्ञेयौ न्यूनं तृचशतं स्मृतम् । वर्गाणां परिसङ्ख्यातं द्वे सहस्रे षडुत्तरे । ऋचां दश सहस्राणि ऋचां पञ्च शतानि च । ऋचामशीतिपादश्चैतत्पारायणमु-

च्यते ॥ १ ॥ इति शौनकीये चरणव्यूहपरिशिष्टे प्रथमा कण्डिका समाप्ता ॥

वर्गादि ऋक्चान्ताः सङ्ख्या वालखिल्यैर्विना ज्ञेया । षड्तरसहस्रद्वयवर्गा इत्यर्थः । सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पितम् । दशसप्तसु पञ्चान्ते सप्तदशाधिकसहस्रसूक्तानीत्यर्थः । सञ्जातं वै पदक्रमं एकशतसहस्रं वा द्विपंचाशत्सहस्रार्धमेतानि चतुर्दश वासिष्ठानामितरेषां पञ्चाशीतिः । एकलक्षद्विपञ्चाशत्सहस्रपञ्चशतचतुर्दश, वासिष्ठानाम् । १५२५१४ । वासिष्ठगोत्रीयाणां "इन्द्रोतिभिरेकसप्ततिपदात्मको वर्गो नास्ति । इतरगोत्रीयाणां पञ्चाशीत्यधिकपदानीत्यर्थः । ८५ । अथ वालखिल्यसंहिता पदसङ्ख्योच्यते । लक्षैकं तु त्रिपञ्चाशत्सहस्रं शतसप्तकम् । पदानि च द्विनवतिः प्रमाणं शाकलस्य च । १ । एकलक्षत्रिपञ्चाशत्सहस्रसप्तशतद्विनवतिसाधिकानि पदानीत्यर्थः । १५३७९२ । पदानि वालखिल्यस्य ह्यर्कसङ्ख्याशतानि च । अधिकानि तु सप्तैव । १२०७ । वर्गा अष्टादश स्मृताः । सप्ताधिकद्वादशशतानि पदानीत्यर्थः । इत्याश्वलायनानाम् । शाङ्खायनानां तु वालखिल्यसंहितपदसङ्ख्योच्यते । शाकल्यदृष्टे पदलक्षमेकसार्धन्तु वेदे त्रिसहस्रयुतम् । शतानि सप्तैव तथाऽधिकानि चत्वा-

रि त्रिंशच्च पदानि चर्चा। शाकल्यो माण्डूकगणस्थः। संहिता पदानि एकलचत्रिपञ्चाशत्सहस्रसप्तशतचतुस्त्रिंशदधिकानि पदानीत्यर्थः। १५३७४३ ॥ पदानि वालखिल्यस्य रुद्रसङ्ख्याशतानि च। षट्पञ्चाशदधिकानि वर्गाः सप्तदशास्तथा। एकादशशतषट्पञ्चाशदधिकवालखिल्ये पदानीत्यर्थः। ११४६। अष्टपञ्चाशत्पादात्मकृक्त्रयस्य। यस्त्विजो वर्गो नास्ति। न तु हविष्यान्तीयसूक्ते द्वे समीचीवर्गे त्रिकृचानन्तरमेक एवाग्निर्नृक्। यस्त्विजो कृक्। खिलरूपेण पठन्ति। ज्योतिष्मन्तश्चाभावः। कृक्त्रयस्य तेषामन्ते पदाभावत्वात्। अन्ते वर्गसमाप्तौ यावन्मात्रश्चं पठन्ति। एवं द्वे समीचीति षड्कृचो वर्गः। आश्वलायनानां चतुर्कृचात्मको वर्गः। इत्याश्वलायनशाङ्खायनशाखयोर्भेदइत्यर्थः। यस्य मन्त्रस्य पदाभावस्तस्य खैलिकत्वं सिद्धम्। तर्हि त्र्यम्बकं यजामह इति मन्त्रस्य पदाभावात्तस्य खैलिकत्वं सिद्धम्। न हि उ मा नागात्। उपलेखायां त्र्यम्बकं प्रथमं भद्रं नः प्रजायते ऋतं चेति पदक्रममिममुपयामि गीतमर्द्धर्चान्ते पदम्। तस्मात्पदकाले क्रमकाले च पठन्ति। "क्रमो द्वे पदश"इति वचनात्। अत्र द्वितीयपदं नास्ति अर्द्धर्चान्तसमापनात्। क्रमाभावस्तस्मात्पदकाले क्रमकाले पठनं सएव पदक्रम इत्यर्थः। क्रमकाले तु वेष्टनं कर्त्तव्यं चतुस्त्रिंशत्सहस्राणि। षत्वे णत्वे च दीर्घत्वे आकारे सानुनासिके॥ त्रिचतुष्पञ्चक्रमे अर्द्धर्चान्ते च वेष्टयेत्।

क्रमेणोदाहरणानि ज्ञातव्यानि । "सुषुमायातम् । मो षूणः । वाजेषु सा सहिर्भव । आँ उपानसः । न्या-विध्यदिलीशस्य । अगादारैगुकृष्णा । निरुक्सारम-स्कृतोषसम् । अग्निमीडे॰ ऋत्विजमित्युत्विजमिति । चतुस्त्रिंशत्सहस्राणि क्रमकाले वेष्टनानीत्यर्थः । ३४०००' । द्विखण्डानां सहस्राणि द्वात्रिंशत्षोडशो-त्तरम् । षोडशोत्तरद्वात्रिंशत्सहस्राणि द्विखण्डानी-त्यर्थः । ३२०१६ । चत्वारिंशत्सहस्राणि द्वात्रिंशतं चाक्षरसहस्राणि । चतुर्लक्षद्वात्रिंशत्सहस्राक्षराणी-त्यर्थः । ४३२००० । द्वात्रिंशतं चाक्षरसहस्राणीत्यर्थ-समाप्तिः पुनर्वचनमुक्तम् । अथ पारायणे ऋक्परिमा-णा उच्यन्ते । ऋचां दशसहस्राणि ऋचां पञ्चशतानि च । ऋचामशीतिपादश्च पारायणं प्रकीर्तितम् । ए-तत्पारायणं वालखिल्यैर्विना सङ्ख्यातम् । वालखिल्या-नि पारायणे न सन्ति तदुच्यते । ऋग्वेदान्तर्गतवाल-खिल्यमेकादशसूक्तम् । ११ । सूक्तं १०० सप्तदशाधि-क १७ मित्यत्र ऋचां दशसहस्राणीत्येतत्सङ्ख्याव्यति-रिक्तानि वालखिल्यानीति प्रसिद्धिः । तत्र यज्ञानुष्ठा-ने ब्राह्मणे सूत्रे च श्रूयते । "वालखिल्याः शंसन्ति प्राणा वै वालखिल्या" इति । अभि प्र वः सुराधसमि-ति षड्वालखिल्यानां सूक्तानामिति ब्राह्मणे आरण्य-के । अथ वालखिल्याविहरेत्तदुक्तं षोडशिनेति सू-त्रकारः श्रौतस्मार्त्तसर्वकर्मानुष्ठाने वालखिल्यप्रसि-द्धिः । वेदपारायणे वर्जमित्यर्थः । शौनकाचार्यवच-

नात्। यथा प्रैषाध्यायकुन्तपाध्यायनिविदाध्यायसुप-र्णाध्यायश्चेति तद्वालखिल्याध्यायइत्यर्थः। वालखिल्यसं-हितासर्वानुक्रमणीयमन्त्ररूपीसङ्ख्योच्यते। द्विप-ञ्चादधिकपञ्चशतदशसहस्राणीति १०५५२। वा-लखिल्यव्यतिरिक्तऋक्सङ्ख्या तु। द्विसप्तत्यधिकचतुः-शतमन्त्रः सहस्रऋक् १०४७२। एतत्सङ्ख्या नित्या द्विपदा नैमित्तिकद्विपदासहित उक्तहवनाभ्यां समाना सा नित्या द्विपदा। आसां सङ्ख्या उपलेखायाम्। तत्र "साधुरसिकन्यां सिषक्तु न ऊरौ देवा विद्वेषां-स्यया वाजं महिराध आवां सुम्नते ते देवाय रायस्का-मः प्रति न स्तोमं त्वायुधासः पितुर्न पुत्रः स नोवाजे-षु गावो न यूथं पवस्व सोममन्दयन्निति तिस्रः परि-सुवानो नृभिर्यं मा नः प्रत्यञ्चमर्कमनयच्छचीभिरिति द्विपदैकपदा द्वाविंशतिस्तासां सप्तदश द्विपदा १७ एकपदाः पञ्चइति। हवनाध्ययने विपरीता सा नै-मित्तिकद्विपदा ता आह वर्गरूपेण। पश्वानतायुं दश-रयिर्न दश। श्रीणान्दश शुक्रः शुशुक्वां दश वनेम पू-र्वीर्दशाग्ने त्वन्नश्चत्वार्यग्ने भव षट् प्रशुक्रैतु दश राजा राष्ट्रानां दशक इँन्नाव्य दश बभ्रुरेका दश परिप्रधन्व दश तन्ते सोतारो द्वादशेमा नुकं चत्वार्यायाहि वन-सा चत्वारीति नैमित्तिकद्विपदा चत्वारिंशोत्तरश-तमिति १४०। हवने एकैका अध्ययने द्वे द्वे आसा-मन्या एका उर्वरिता सा नित्या द्विपदा। उक्तं च परिभाषायाम्। विंशिका द्विपदा विराजस्तदृमेक-

पदा द्विर्द्विपदास्त्वृचः समामनन्ति। आयुद्ध्वन्त्या द्विपदैवेति। द्विर्द्विपदास्त्वृचः समामनन्ति। यस्य सूक्तस्य द्विर्द्विपदाः समामनन्ति। ता ऋचोऽध्ययने चतुष्पदाः कृत्वेत्यर्थः। आयुद्ध्वन्त्या द्विपदैव सूक्तस्यार्ची युजो या न भवति तास्त्वन्त्या नित्या द्विपदैव। एवमध्ययने द्वाबर्द्धर्चावेकैव ऋगेव प्राधान्यम्। त्रीण्यर्द्धर्चीयाः कथम्। तत्रापि द्वावर्द्धर्चावेका ऋचा। अर्द्धर्चा एका कर्तव्या अध्ययनसम्प्रदायबलात्। अनादेशे अष्टाक्षराः पादाश्चर्चीइति परिभाषायाम्। अध्ययने त्रीण्यर्द्धर्च ऋगेव सम्प्रदायो नास्ति। असां परिमाणमाह। अग्निं होतारं पञ्च सहिष्ठर्द्धेर्नषडयं जायत पञ्च विश्वो विहायास्तिस्रोऽयं त्वं रथं पञ्च प्रतद्वोचे यं षडिन्द्रायाह्युप नः पञ्चेमां ते वाचं चत्वारि स नो नव्येभिर्वज्रमिन्द्राय हि द्यौः सप्त त्वया वयं षड्वर्म ह एका वनोति हि एका त्वा जुषः षट् स्तोत्रं पञ्चेमे वांसोमा एका इमे ये ते सुवायवे का प्रसुज्येष्ठं षडति देवानां वर्जम्। सुषुमायातं त्रीणि प्रप्रपूषास्त्रतुष्कमस्तु श्रौषट् चत्वारि शचीभिर्नोवर्ज्यं इषंनिन्द्रपञ्च ये देवासो वर्जं तवत्यं नर्यमेका सखे सखायमेकया ऋचा त्रीण्येतास्त्रोणि त्रीण्यर्द्धी ऋचा हवनीयास्तुर्नवतिसङ्ख्येत्यर्द्धर्च ऋग्भवने। अध्ययने अर्द्धर्चद्वयेन ऋगेका। अर्द्धर्चैनैकैव ऋग्द्वये कर्त्तव्य इत्यर्थः। एकर्चस्य ऋग्द्वयं विराट् छन्दो विना कथं भवतीत्याशङ्क्य तत्रोच्यते। विराट्छन्दः सर्वच्छन्दसि व्याप्तं वर्त्तते। उ-

क्तां चारायणेके । "चत्वारः पुरुषा इति व्याधः शरीरपुरुषश्छन्दःपुरुषो वेदपुरुषो महापुरुषइति । तस्योष्णिग्लोमानि त्वचं गायत्री त्रिष्टुप् मांसमनुष्टुप् स्नावान्यस्थि जगती पङ्क्तिर्मज्जा प्राणो बृहतीति यान्येतानि विराट् चतुर्थान्येवमु हैवैवं विदुष एतदहः सर्वैश्छन्दोभिः प्रतिपन्नं भवतीति" प्राप्तो भवतीत्यर्थः । "गायत्री पङ्क्तीश्च व्यतिषजति गायत्रो वै पुरुषः पाङ्क्ताः पशव" इति ब्राह्मणम् । अत्रोदाहरणम् । "प्रवस्व सोम मन्दयन्निति तिस्रो नित्या द्विपदा गायत्र्य" इति सर्वानुक्रमण्याम् । द्विपाद्वै पुरुषो वीर्यं त्रिष्टुब्विराड्भ्यामनयोर्द्वात्रिंशयोर्द्विपदयोरयं पुरुषः । अत्रोदाहरणानि । आवां सुम्ने वरिमन् । प्रत्यस्मै क्रमनयन् । परिस्रुवानो गिरिः । जगती पादइति । एवं सर्वव्याप्तो भवतीत्यर्थः । "छन्दांसि जज्ञिर" इति श्रुतिः । तथा च शतपथब्राह्मणे "किञ्छन्दः का देवता प्रतिष्ठे" । यथा विष्णुः सर्वव्याप्तस्तथा विराट्छन्दइत्यर्थः । विराट् छन्दस्तु चतुष्पदा । तोरयूईचीयां पञ्चपदा स्वक्तर्तव्येति । किं प्रमाणं तत्रोच्यते । "एकपाद्भूयो द्विपदो विचक्रमे द्विपात्त्रिपादमभ्येति पश्चात् । चतुष्पादेति द्विपदामभिस्वरे सम्पश्यन्पङ्क्तीरुपतिष्ठमानः" । एकपदा द्विपदा नित्या द्विपात्त्रिपादमभ्येति । एकीभूता भवन्तीत्यर्थः । अस्योदाहरणम् । "अग्निं होतारं मन्ये० दसम् । यऊर्ध्वया० कृपा" । अग्रे अर्द्धर्चा "घृतस्य विभ्राष्टिमनुवष्टि० सर्पि-

षः" । इति द्विपदा । चतुष्पदा तु । पञ्चानतायुम्० । एकार्द्धर्चा त्रिपदा । एकार्द्धर्चा द्विपदा । एका ऋक् पञ्चपदा अध्ययने । द्विद्विपदास्त्वृचः समामनन्तीत्यत्र समपादग्रहणात् । असमानपादा विरुद्धा तर्हि पङ्क्तिच्छन्दः पञ्चपदा भवति तस्य द्वितीयभेदो विराट् तस्मात्पञ्चपादत्वं प्राप्तम् । समपादा वा असमपादो विराट् छन्द इत्यर्थः । अत्र श्रुतिः । "समौ चिद्धस्तौ न समं विविष्टः सम्मातरा चिन्न समं दुहाते" इत्यनया ऋचा परिहारः । दक्षिणवामहस्तौ समौ कर्त्तव्ये असमाप्ताविल्यर्थः । अथाध्ययने ऋक्सङ्ख्योच्यते । षसवत्यधिकचतुःशतदशसहस्राणीति । १०-४६६ । ताः सहितनैमित्तिकद्विपदाश्चत्वारिंशोत्तरशतसहितदशसहस्राणीति । १०५९६ । सञ्ज्ञानसुशनावदत्सूक्तस्य पञ्चदशर्चैकीकृत्य पारायणे ऋक्सङ्ख्या । १०५८० । ऋचां दशसहस्राणि इति वचनस्य सङ्ख्या पूर्णा भवतीत्यर्थः । एका ववर्जिता सा "भद्रन्नो अपि वातयमनः" इति पादाधिक्यमनुक्रमणिकादृत्तावप्युक्तेः । भद्रं पुच्छमित्यारण्यके । अथ सञ्ज्ञानसूक्तम् । सञ्ज्ञानमुशनाऽवदत्सञ्ज्ञानं वरुणोऽवदत् । सञ्ज्ञानमिन्द्रश्चाग्निश्च सञ्ज्ञानं सविता वदत् । १ । सञ्ज्ञानं न स्वेभ्यः सञ्ज्ञानमरणेभ्यः । सञ्ज्ञानमश्विना युवमिहास्मासु नियच्छताम् । २ । यत्कक्षीवांसं वननं पुत्रो अङ्गिरसामवे । तेन नोऽद्य विश्वेदेवाः सम्प्रियां समजीजन-

त्। ३ संवो मनांसि जानतां समाकूतिर्मनामसि। असौ यो विमना जनस्तं समावर्त्तयामसि। ४। तच्छं-योरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजं शन्नो अस्तु द्विपदे शं चतुष्पदे। ५। नैर्हस्त्यं सेनादरणं परिवर्त्म तु यद्धविः। तेनामित्राणां बाहून् हविषा शोषयामसि। ६। परिवर्त्मान्येषामिन्द्रः पूषा च सस्रुतः। तेषां वो अग्निदग्धानामग्निमूढानामिन्द्रो हन्तु वरं वरम्। ऐषु नह्यवृषाजिनं हरिणस्य भियं यथा। परां अमित्रां एष त्वर्वाचो गौरुपेजतु। ८। प्राध्वराणां पते वसो होतर्वरेण्य क्रतो। तुभ्यं गायत्रमृच्यते। गोकामो अन्नकामः प्रजाकामउत कश्यपः। ९। भूतं भविष्यत्प्रस्तौति महद्ब्रह्मैकमक्षरं बहु ब्रह्मैकमक्षरम्। यदक्षरं भूतकृतो विश्वेदेवा उपासते। १०। महर्षिभिश्च गोप्तारं जमदग्निमकुर्वत। जमदग्निराप्यायते छन्दोभिश्चतुरुत्तरैः। ११। राज्ञः सोमस्य भक्षेण ब्रह्मणा वीर्यावता। शिवा नः प्रदिशो दिशः सत्या नः प्रदिशो दिशः। १२। अजो यत्तेजो ददृशे शुक्रं ज्योतिः परो गुहा। तदृषिः कश्यपः स्तौति सत्यं ब्रह्म चराचरम् ध्रुवं ब्रह्मचराचरम्। १३। त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य त्र्यायुषम्। यद्देवानां त्र्यायुषं तन्मेऽस्तु त्र्यायुषं। १४। तच्छंयोरावृणीमहे०। १५। इति सञ्ज्ञानसूक्तं पञ्चदशर्चात्मकम्। अस्य ग्रहणे प्रमाणमाश्वलायनसूत्रम्। तच्च। "समानीव" इत्येका।

तच्छंय्योराहृणीमह” इत्येकेति । तथा च शाङ्खायनसूत्रम् । “अथोपाकर्मौषधीनां प्रादुर्भावे हस्तेन श्रवणेन वाऽक्षतसक्तूनां धानानां च दधिघृतमिश्राणां प्रत्यृचं वेदेन जुहुयादिति हैक आहुः स्वतानुवाकाद्याभिरिति वाऽध्यायार्षेयाद्याभिरिति माण्डूकेयोऽथ ह स्म कौषीतकिरग्निमीळे पुरोहितमित्येका कुषुम्भकस्तदब्रवीदावदंस्त्वं शकुने भद्रमावद गृणाना जमदग्निना धामन्ते विश्वं भुवनमधिश्रितं गन्तानो यज्ञं यज्ञियाः सुशमि यो नः स्वोऽअरणः प्रतिचक्ष्व विचक्ष्वाग्ने याहि मरुत्सखा यत्ते राजञ्छृतं हविरिति द्वृचास्तच्छंय्योराहृणीमह इत्येका हुतशेषाद्धविः प्राश्नीति” । पञ्चशाखानां पारायणं तच्छंय्योराहृणीमह इत्यत्र समाप्तिरेकवेदत्वात् । उक्तञ्च । शाङ्ख्याश्वलायनौ चैव माण्डूका बाष्कलस्तथा । बह्वृचा ऋषयः सर्वे पञ्चैते ह्येकवेदिनः ॥ अथ पारायणे चर्चासङ्ख्योच्यते । “एकर्चएकवर्गस्य एकर्चनवकस्तथा” । एकर्च एकवर्गो जातवेदसइत्यर्थः । नवर्च एकवर्गऽआपो हि ष्ठेति । द्वौ वर्गौ तु द्वृचौ ज्ञेयौ, द्वौ वर्गौ द्वृचावित्यर्थः । अग्ने त्वन्नोऽअन्तमः । आयाहि वनसा सहेति । त्र्यृक्त्रयस्य शतं स्मृतम् । त्र्यृचो वर्गाः शतमित्यर्थः । उदुत्यं चमसं नवमित्यादि । चतुर्ऋचां पञ्चसप्तत्यधिकं च शतं तथा । चतुर्ऋचवर्गाः पञ्चसप्तत्यधिकशतमित्यर्थः । १७५ । यदङ्ग दाशुषे त्वमित्यादि । पञ्चर्चं तु द्विशतकं सहस्रं रुद्रसंयुतम् ।

पञ्चर्चवर्गा एकादशाधिकद्वादशशतानीत्यर्थः । १२११ । अग्निमीळे इत्यादि, । पञ्चचत्वार्यधिकं तु षड्ऋचां तु शतत्रयम् । षड्ऋचवर्गाः पञ्चचत्वारिंशदधिकशतत्रय इत्यर्थः । ३४५ । अश्विना पञ्चरीरिषइत्यादि, । सप्त ऋचां शतं ज्ञेयं विंशतिश्चाधिकाः स्मृताः । सप्तर्चवर्गा विंशत्यधिकशतत्रय इत्यर्थः । १२० । यच्चिद्धि सत्यसोमपा इत्यादि, । अष्टऋचां तु पञ्चाशत्पञ्चाधिकास्तथैव च । अष्टर्चवर्गाः पञ्चाधिकपञ्चशतं इत्यर्थः । ५५ । इन्द्रं विश्वाऽअवीवृधन्नित्यादि, । एवं दशाधिकसहस्रद्वयवर्गा इत्यर्थः । २०१० । पञ्चशाखासु निश्चिताः । पञ्चशाखानां पारायणे निश्चयेन इत्यर्थः । वर्गाः सञ्ज्ञानसूक्तस्य चत्वारश्चात्र मीलिताः । सञ्ज्ञानसूक्तस्य चत्वारो वर्गाश्चात्र मिलित्वा दशाधिकसहस्रद्वयमित्यर्थः । एवं पारायणे प्रोक्ता ऋचां सङ्ख्या न न्यूनतः । एवं पूर्वोक्तप्रकारेण वर्गस्य ऋक् न्यूनसङ्ख्येन दशर्चस्य पञ्च ऋक् वीर्यद्वर्चस्य ऋक्कर्तव्येत्यर्थः । एवं चतुर्विधपारायणेऽपि ज्ञेयम् । "समानीव इति" शाकलानां "तच्छंय्योरिति" बाष्कलानामित्यत्र बाष्कलशाखाध्ययनमनुक्रमणिकाद्दृत्तावुक्तम् । "गौतमादौशिजः कुत्सा दीर्घतमेत्येव बाष्कलाध्ययनक्रमः" । अस्यार्थः । गौतमादौशिजः कुत्सः । उपप्रयन्तो । नासत्याभ्याम् । अग्निं होतारम् । इमं स्तोमम् । वेदिषदे । एष बाष्कलक्रमइत्यर्थः । अत्रैवकृत्ते उत्तम-

मण्डले नवके अनुक्रमविपर्यासः । तच्च । स्वादोरभक्षि सूक्तान्ते अभिप्रवः सुराधसम् । प्र सुश्रुत"मिति सूक्तद्वयं पठित्वा । अग्नऽआयाह्यग्निभिरिति पठेत् । ततः आप्र द्वाध्याये गौर्धयत्यनुवाको दशसूक्तात्मकः शाकलस्य । पञ्चदशसूक्तात्मको बाष्कलस्य । तदोच्यते । गौर्धयति सूक्तानन्तरं "यथा मनौ सांवरणौ । यथा मनौ विवस्वति । उपमन्त्वा । एतत्तऽइन्द्र । भूरिदिन्द्रस्य । इत्यन्तानि पञ्चसूक्तानि पठित्वा "आत्वा गिरो रथीरिवेति" पठेयुः । अन्ते संसमित्सूक्तानन्तरं पञ्चदशऋचात्मकं "सञ्ज्ञानमुशनावदत्तच्छंय्योराहृणीमहे" इत्यन्तं वेदसमाप्तिरिति बाष्कलशाखाध्ययनम् । एवमध्ययनाभावाच्छाखाऽभाव इत्यर्थः । सूक्तसहस्रसप्तदशाधिकात् अष्टौ सूक्तानि बाष्कलस्याधिकानीत्यर्थः । प्रति ते । युवं देवाः । यत्खिलजः । इमानि वामिति चत्वारि वालखिल्यसूक्तानां लोपइत्यर्थः । यस्तानृग्विवेद चैवाप्यधीते स नाकपृष्ठं भजते ह शश्वत् । अस्यार्थः । यः तान् ऋगर्थवित् वेद, ततः स्वनपारायणं च अधीते सः वेदिताऽध्येता च नाकपृष्ठं शश्वत्सदा भजते । ह प्रसिद्धौ । इतोऽमुं लोकमेत्युत तस्मान्न प्रच्यवते हीत्यर्थः । अथ पारायणफलं तदुक्तमारण्यके । "यद्धि सन्धि विवर्त्तयति तं निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्याग्रऽउऽएवोभयमन्तरेणोभयव्याप्तं भवत्यन्नादकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्त-

देणेति" । अस्यार्थः । द्वयोः पदयोरक्षरयोर्वाऽपि सन्धितस्य अविच्छेदाध्ययनं तन्निर्भुजं संहितापारायणमुच्यते । शुद्धे द्वे पदे अक्षरे वा सन्धिमकुर्वतोच्चारणं तत्प्रतृण्णं पदपारायणम् । संहितापदाभ्यामुभाभ्यां व्याप्तमुभयमन्तरेण क्रमपारायणमित्यर्थः । तथा च सति त्रिभिः कृत्वा स्वरास्वरं विजानाति मात्रामात्रां विभजते सा संहितेति । एवमेतां यो वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति । तस्मात्क्रमावृत्ते द्वे पदे संहिता द्वे पदे स्वरश्च न सिध्यति । द्वे पदे सिद्धे उत्तरारम्भः कर्त्तुं न शक्यते । अतश्च पादार्द्धर्च ऋक् सूक्तसिध्यर्थं भगवता पाञ्चालेन स्थापितानां पारायणकर्मणां क्रमपारायणमुत्तमं भवतीति चात्र श्लोकः । प्रागाथेन पुरा दानं दृष्ट्वा क्रुद्धो महामुनिः । अर्थवन्तं क्रमं ब्रूयाद्दैवतायाश्च शास्त्रतः । अत ऋग्यजुषां बृंहणां पदैः स्वरैश्चाध्ययनं तथा त्रिभिः । अतोऽपि अस्मादपि हेतोः क्रमः अर्थवान्भवति । क्रमेण कृत्वा ऋग्वेदपारायणे ऋचां बृंहणं साधारणं भवति । इदमित्थं सर्व पाठ इति । स्वरमात्रादिरूपेण निश्चयो भवति तथा यजुर्वेदपारायणे यजुषां बृंहणं नाम साधारणं स्वरमात्रादिरूपेण इदमित्थमेव पाठइति निश्चयो भवति । इत्यतिदेश इत्यलं प्रपञ्चेन ॥ अथ पारायण विधिः । अत्रादौ कलशस्थापनाद्युक्तं महार्णवे । तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते ॥ कलशं सुदृढं

तत्र सुनिर्मितं सुभूषितम् । १ । पुष्पपल्लवमालाभिश्च-
न्दनैः कुङ्कुमादिभिः । मृत्तिकायवसम्मिश्रं वेदमध्ये
न्यसेत्ततः । २ । पश्चात्पञ्चभिः कुशैः कार्यो ब्रह्मा प-
श्चान्मुखस्थितः । स्नापितः स्थापितः कुम्भे चतुर्बाहुश्च-
तुर्मुखः । ३ । वत्सजान्वाकृतिर्वेदं उत्तराग्रैः कुशैः
कृतम् । ब्रह्मोपधाने दत्वा तं ततः स्वस्त्ययनं पठेत् ।
४ । प्रतिष्ठां कारयेत्पश्चात्पूजाद्रव्यमथोच्यते । यज्ञो-
पवीतं नैवेद्यं वस्त्रं चन्दनकुङ्कुमैः । ५ । स्रग्धूपदीप-
ताम्बूलैरेतैश्चापि पितामहम् । ब्रह्म जज्ञानमिति वा
गायत्र्या वा प्रपूजयेत् । ६ । उपाध्यायं च सम्पूज्य
यथा पाठं पठेत्ततः । ततो होमादि वक्ष्यमाणं कृत्वा
पठेदित्यर्थः । तत्रैव बौधायनः । स्थंडिलं कल्पयित्वा-
ग्निमुपसमाधाय तं परिस्तीर्याज्येनैताभ्यो देवताभ्यो
जुहोत्यग्नये सोमाय विश्वेभ्यो देवेभ्यो ब्रह्मण ऋषि-
भ्यो ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै
धारणायै श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये
काण्डऽऋषयेऽग्नये काण्डऽऋषये विश्वेभ्यो देवेभ्यः
काण्डऽऋषिभ्यः सांहितीभ्यो देवताभ्यऽउपनिषद्भ्यो
याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीदेवताभ्य
उपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो वरुणेभ्योऽनुमत्यै
स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृति
भिश्च हुत्वा पुनः परिषिञ्चति समाप्ते चैव यजुषा त-
र्पयति । अन्ते एताग्निसोमाद्या यजुषा पदेन सह
तर्पयेत् । यद्वा "भूर्देवांस्तर्पयामि" इत्यादि यजुषा त-

र्पयित्वाऽग्न्यादींस्तर्पयेदित्यर्थः । महार्णवः । एवमृग्वेदिनां काण्डऋष्यादिवर्जमाश्विष्टकृतस्तेषां स्थाने शतर्चिभ्यो मध्यमेभ्यो गृत्समदाय विश्वामित्राय वामदेवायात्रये भरद्वाजाय जमदग्नये गौतमाय वसिष्ठाय प्रगाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्यो महानाम्नीभ्य इति ततो वेदादिमारभ्य सन्ततमधीयीतेत्याह भगवान्बोधायनः । पुनर्महार्णवे । अथातः पारायणविधिं व्याख्यास्यामन्त्रासमाप्तेर्नाश्नीयाद्यथाशक्ति वाऽपः पयः फलान्योदनं हविष्यं मात्रमन्नमल्पं भुक्त्वा तदाऽशेषमधीयीत ग्रामात्प्राच्यामुदीच्यां वा दिश्युपनिष्क्रम्याग्निमुपसमाधाय परिस्तीर्येध्मं प्रज्वाल्याज्येनैताभ्यो देवताभ्यो जुहोत्यग्नये सोमायेन्द्राय प्रजापतये बृहस्पतये विश्वेभ्यो देवेभ्यो ब्रह्मण ऋषिभ्यऽऋग्भ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतयेऽनुमतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्डऽऋषये सोमाय काण्डऽऋषयेऽग्नये काण्डऽऋषये विश्वेभ्यो देवेभ्यः काण्डऽऋषिभ्यः सांहितीभ्यो देवताभ्य ऽउपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य ऽउपनिषद्भ्यो वारुणीभ्यो देवताभ्यऽउपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो वरुणेभ्योऽनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनः परिषिञ्चति समाप्ते चैवं यजुषा तर्पयतीति अन्ते एताग्निसोमाद्या यजुषा पदेन सह तर्पयेत् । यद्वा भूर्देवांस्तर्पयामीत्यादियजुषा तर्पयित्वाऽग्न्यादींस्तर्पये-

दित्यर्थः । महार्णवः । एवमध्येतॄणां काण्डऋष्यादिवर्जमास्विष्टकृतस्तेषां स्थाने "शतर्चिभ्य इत्यादिमहानाम्नीभ्य इत्यन्तं प्राग्वत् । ततो वेदादिमारभ्य सन्ततमधीयीत नैतस्यान्तराऽनध्यायो नास्यान्तरा जननमरणे अशुचि आशौचं नेत्यर्थः । नान्तरा व्याहरेन्न विरमेद्यावन्तमधीयीत । यावत्पर्यन्तं पठेत्तावत्पर्यन्तं न विरमेन्नान्यच्च वदेदित्यर्थः । यद्यन्तरा विरमेत् त्रीन्प्राणानायम्य प्रणवं वा प्रविधाय यावत्कालमधीयीत । ततः सर्वनिशान्तरं सङ्ग्रामारण्यसलिलं लोप्य परिदध्यात् । निशान्तरं सन्ध्यानिशादींल्लोप्य विहाय समापयेदित्यर्थः । आदावन्ते च ब्राह्मणभोजनं दक्षिणां च दद्यादिति महार्णवोक्तं विधानम् ॥ अथ कमलाकरः । य एतेन विधिना वेदमधीयीत सन्ततः पूतो वेदो भवति मनः शुद्धिश्च भवति वेदरूपो भवतीत्यर्थः । द्वाभ्यां पारायणाभ्यां ऋग्भिश्चाभोजन इष्टाधीतेऽनृतेभ्यः प्रमुच्यते त्रिभिर्बह्वृभ्यः पतनीयपातकेभ्यः शूद्रायां रेतः सिक्त्वा गङ्गाऽप्सु वन्निमज्यश्च भवति चतुर्थ्यः शूद्रान्नभोजनात्स्त्रीसेवनाच्च पञ्चभिरयाज्ययाजनादग्राह्यग्रहणात् षड्भिर्ब्राह्मणस्य लोहितकरणात्पशुहननात्सुवर्णस्तेयात्पतिसंयोगाच्च सप्तभिः प्राजापत्यस्य हीनचरणाद्यज्ञोपबन्धनाच्चाष्टभिश्चान्द्रायणगुरुतल्पगमनाद्रजस्वलागमनाच्च नवभिः सुरापानाद्दशभिः पुनर्जन्मेह जन्मकृतैः सर्वैः पापैः प्रमुच्यते स्वर्गं लोकं गच्छतीति । अग्निष्टोमादिक्रतु-

भिरिष्टं भवति। पितृन्स्वर्गं ल्लोकं गमयति। वेदाध्यायी सदैव स्याद्यतात्मा सत्यवाक् शुचिः । यं यं कामं कामयते तं तं वेदेन साधयेत्। असाध्यं नास्ति यत्किञ्चिद्ब्रह्मणो हि फलं महत्। ऋग्विधाने। आदावेव तु सावित्र्या कर्म कुर्वीत शान्तये। पुष्ट्यै पशुलाभाय धनलाभाय भूतये। एषा हि संहिता देवैः सर्वब्रह्ममयी निचृत्। उग्रेण तपसा दृष्टा विश्वामित्रेण धीमता। होमांश्च जपयज्ञांश्च नित्यं कुर्वीत वै तथा। सर्वकामप्रसिध्यर्थं परं ब्रह्मेदमुच्यते। एषा वै प्रतिलोमोक्ता शत्रुपक्षविनाशिनी। अक्षरप्रतिलोमेयमभिचारेषु शस्यते। सर्वसंहितया प्रत्यृचं होम आज्येन तिलेन वा। "आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते" इति श्राद्धोक्तेः। सर्वपापहरो होमस्तिलैः सर्वत्र शस्यते। इति विष्णुधर्मोत्तराच्च। शातातपः। लक्षो देव्ययुतं चैव वेदपारायणं तथा। तिलहोमसहस्रं च सममेतच्चतुष्टयम्। इदं केवलम्। अन्ये चान्द्रमसम्। इति कमलाकरभट्टकृतो वेदपारायणविधिः समाप्तः। व्याख्या चरणव्यूहस्य आद्यखण्डस्य तेन वै। यथामति विरचिता महादेवप्रसादतः॥

इति चरणव्यूहपरिशिष्टव्याख्यायां प्रथमखण्डस्य व्याख्या समाप्ता॥

यजुर्वेदस्य षडशीतिभेदा भवन्ति त-

त्र चरका नाम द्वादश भेदा भवन्ति चरका आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वारायणीया वार्त्तान्तवीया श्वेताश्वतरा औपमन्यवः पाताण्डनीया मैत्रायणीयाश्चेति तत्र मैत्रायणीया नाम षड्भेदा भवन्ति मानवा वाराहा दुन्दुभाश्छगलेया हारिद्रवीया श्यामायनीयाश्चेति तेषामध्ययनं द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके । ऋग्गणः परिसङ्ख्यातं ततोऽन्यानि यजूंषि च, अष्टौ शतानि सहस्राणि चाष्टाविंशतिरन्यान्यधिकञ्च पादमेतत्प्रमाणं यजुषां हि केवलं सवालखि-

त्यं सशुक्रियं ब्राह्मणं च चतुर्गुणं ।
तत्र तैत्तिरीयका नाम द्विभेदा भव-
न्त्यौखेयाः खाण्डिकेयाश्चेति तत्र
खाण्डिकेया नाम पञ्चभेदा भवन्ति
कालेता शाट्यायनी हैरण्यकेशी
भारद्वाज्यापस्तम्बी चेति तेषाम-
ध्ययनमष्टादशयजुःसहस्राण्यधीत्य
शाखापारो भवति तान्येव द्विगुणा-
न्यधीत्य पदपारो भवति तान्येव
त्रिगुणान्यधीत्य क्रमपारो भवति
षडङ्गान्यधीत्य षडङ्गविद्भवति ।
त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः
सह यजुर्वेदः स विज्ञेयः शेषाः शाखा-
न्तराः स्मृताः ॥

अथ द्वितीयखण्डं व्याख्यायते ॥ यजुर्वेदस्य षड-

शीतिर्भेदा भवन्ति अत्र शाखाभेदो ग्राह्यः । षट् अशीतिर्भेदाइत्यर्थः । तत्र चरकानां द्वादश भेदा भवन्तीति स्पष्टार्थः। ते के भेदाः। चरकाः । आह्वरकाः । कठाः । प्राच्यकठाः कपिष्ठलकठाः । चारायणीया । वारायणीया। वार्त्तान्तवेया । श्वेताश्वतरा । औपमन्यवः । पाताण्डनीया । मैत्रायणीयाश्चेति। मैत्रायणीयानां केचित्सप्त भेदा भवन्ति इति वदन्ति श्यामा इत्यधिकं तदधिकमेव । मैत्रायणीयस्तु वाजसनेयवेदाध्यायी । मानवं कर्मसूत्रम् । तेषामध्ययनमष्टोत्तरशतं यजुः सहस्राण्यधीत्य शाखापारो भवति तेषामध्ययने द्विचत्वारिंशदध्यायाः । अष्टशताधिकसहस्रमन्त्रा इत्यर्थः । तान्येव द्विगुणान्यधीत्य पदपारो भवति । द्विवारपठनात्पदपारायणफलं भवतीत्यर्थः। तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । त्रिवारपठनात्क्रमपारायणफलं भवतीत्यर्थः । पदक्रमाध्ययनं भवतीत्यर्थः । षडङ्गान्यधीत्य षडङ्गविद्भवति तानि कानि षडङ्गान्युच्यन्ते ॥

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि । छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रो

त्वमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते। तथा प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि, तत्र परिशिष्टानि भवन्ति यूपलक्षणं छागलक्षणं प्रतिज्ञाऽनुवाकसङ्ख्या चरणव्यूह श्राद्धकल्पशुल्बकानि पार्षदमृग्यजूंषीष्टकापूरणं प्रवराध्यायोक्थशास्त्रक्रतुसङ्ख्या निगमा यज्ञपार्श्वहौत्रकं प्रसवोत्थानं कूर्मलक्षणमित्यष्टादश परिशिष्टानि भवन्ति, तत्र कठानां योगा येन विशेषस्तत्र प्राच्योदीच्यनैर्ऋत्यवाजसनेया ना-

म पञ्चदश भेदा भवन्ति जाबाला बौद्धायनाः काण्वा माध्यन्दिनेयाः शाफेयास्तापनीयाः कपोलाः पौण्डरवत्सा आवटिकाः परमावटिकाः पाराशरा वैणेया अद्धा बौधेयाश्चेति तेषामध्ययनं सौक्तिकं प्रवचनीयाश्चेति । मन्त्रब्राह्मणकल्पानामङ्गानां यजुषामृचाम् । षण्णां यः प्रविभागज्ञः सोऽध्वर्युः कृत्स्नमुच्यते ॥ २ ॥

शिक्षादीनि षड्भवन्ति, षडुपाङ्गान्यपि प्रतिपदादितकोन्तानि भवन्ति, तस्मिन्यजुर्वेदे यूपलक्षणादि कूर्मलक्षणान्तान्यष्टादशपरिशिष्टसूत्राणि भवन्ति । एतेषां व्याख्यानान्यग्रे वक्ष्यामः । तत्र प्राच्योदीच्यां नैर्ऋत्यां निर्ऋत्यस्तत्र वाजसनेयानां पञ्चदशभेदा भवन्ति । प्राच्य उदीच्य नैर्ऋत्येषु तिसृषु दिक्षु वाजसनेयवेदोत्पत्तिरग्रे वक्ष्यामः । इतरदेशेषु वेदशाखयोर्वि-

भाग उच्यते । तच्च महार्णवे । पृथिव्या मध्यरेखा च नर्मदा परिकीर्तिता । दक्षिणोत्तरयोर्भागे शाखा वेदाश्च उच्यते । १ । नर्मदादक्षिणे भागे आपस्तम्ब्याश्वलायनी । राणायनी पिप्पला च यज्ञकन्याविभागिनः । २ । माध्यन्दिनी शाङ्खायनी कौथुमी शौनकी तथा । नर्मदोत्तरभागे च यज्ञकन्याविभागिनः । ३ । तुङ्गा कृष्णा तथा गोदा सह्याद्रिशिखरावधि । आ आन्ध्रदेशपर्यन्तं बह्वृचश्चाश्वलायनी । ४ । उत्तरे गुर्जरे देशे वेदो बह्वृच ईरितः । कौषीतकीब्राह्मणं च शाखा शाङ्खायनी स्थिता । ५ । आन्ध्रादिदक्षिणाग्नेयी गोदा सागरआवधि । यजुर्वेदस्तु तैत्तिर्य आपस्तम्बी प्रतिष्ठिता । ६ । सह्याद्रिपर्वतारम्भाद्दिशां नैर्ऋत्यसागरात् हिरण्यकेशी शाखा च पर्शुरामस्य सन्निधौ । ७ । मयूरपर्वताच्चैव यावद्गुर्जरदेशतः । व्याप्ता वायव्यदेशात्तु मैत्रायणी प्रतिष्ठिता । ८ । अङ्गवङ्गकलिङ्गश्च कानीनो गुर्जरस्तथा । वाजसनेयी शाखाच माध्यन्दिनी प्रतिष्ठिता । ९ । ऋषिणा याज्ञवल्क्येन सर्वदेशेषु विस्तृता । वाजसनेयवेदस्य प्रथमा काण्वसञ्ज्ञका । १० । व्यासशिष्यो वैशम्पायनो निगदाख्यं यजुर्वेदं पठित्वा शिष्याञ्चकार । तच्च भागवते(१) । वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् । यच्चेरुर्ब्रह्महत्यांहः क्षपणाय गुरोर्व्रतम् । १ । याज्ञवल्क्यस्तु तच्छिष्य आहाहो भगवन्कियत् ।

---

(१) द्वादशस्कन्धे ६ अध्याये षड्विंशत्पद्यमारभ्य त्रयस्त्रिंशत्पद्यपर्यन्तम् ॥

चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् । २ । इत्यु-
क्तो गुरुरप्याह कुपितोऽपि ह्यलं त्वया । विप्रावमन्त्रा
शिष्येण मदधीतं त्यजाश्विति । ३ । देवरातसुतः सो-
ऽपि छर्दित्वा यजुषां गणम् । ततो गतोऽथ मुनयो-
ददृशुस्तान्यजुर्गणान् । ४ । भूत्वा तित्तिरयो ब्रह्मँस्त-
ल्लोलुपतया ददुः । तैत्तिरीया इति यजुःशाखा आस-
न्सुपेशलाः । ५ । याज्ञवल्क्यस्ततो ब्रह्मन् छन्दांस्य-
धिगवेषयन् । गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्व-
रम् । ६ । याज्ञवल्क्य उवाच । ओं नमो भगवते आ-
दित्यायेत्यारभ्य(१) यातयामयजुः काम उपसरामी-
ति । सूत उवाच । एवं स्तुतः स भगवान्वाजिरूप-
धरो हरिः । यजूँष्ययातयामानि मुनयेऽदात्प्रसाद-
तः । ७ । यजुर्भिरकरोच्छाखा दशपञ्च तथा विभुः ।
जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः । ८ ।
इत्यादिग्रन्थपर्यालोचनया यजुर्वेदत्यागानन्तरं देवरा-
तसुतेन अब्राह्मणत्वभिया सविता सूर्यो वाजिरू-
पेण वाजेभ्यः केसरेभ्यः वाजेन वेगेन वा सन्यस्ता-
स्त्यताः शाखा वाजसनेयी सञ्ज्ञा । शाखारण्डत्वप-
रिहारार्थं चातुर्वेद्यत्वसञ्ज्ञासंरक्षणार्थं च वाजिरूपे-
ण सूर्येणायातयामानि (२)यजूंषि मुनये दत्तानि तै-
र्यजुर्भिरुपरतैः समुचिता (३) वाजसन्यः पञ्चदश-

(१) जीर्णभुक्ते उच्छिष्टवान्ते यातयामशब्द इति निघण्टुः ॥
(२) अयातयामानि अगतसाराणि वीर्यवन्तीत्यर्थः ॥
(३) वाजसनः सूर्यस्तत आगताः शाखा वाजसन्यस्ताः शाखाः काण्वादयो माध्य-
न्दिनादयश्चेत्यर्थः कृतो भागवतव्याख्याकारेण विजयध्वजेनेति स्फुटमवलोकयन्तु

शाखा अकरोत् । तस्माच्च मुनेः सकाशात्काण्वा माध्यन्दिनादय अध्ययनं चक्रुः । ते पञ्चदश भवन्ति । अथ प्रसङ्गाद्यजुर्वेदस्य शाखाप्रणयनविचारः किञ्चिदुच्यते । तत्र यजुर्वेद एव प्रथमः । तथा च विष्णुपुराणे । एक एव यजुर्वेदस्तं चतुर्द्धा व्यकल्पयदिति । यजुर्वेदो यज्ञोपयोगित्वसूपयोगात्सर्वोऽपि वेदो यजुर्वेद इत्युच्यते । यजुर्वेदस्य शाखाभेदं सविस्तरमाह । यजुर्वेदतरोः शाखाः सप्तविंशन्महामुने । वैशम्पायननामासौ व्यासशिष्यश्चकार वै । १ । शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् । याज्ञवल्क्यस्य तत्राभूद्ब्रह्मरातः सुतो द्विजः । २ । शिष्यः परमधर्मज्ञो गुरुवृत्तिरतः सदा । ऋषिर्यश्च महामेरौ समाजेनागमिष्यति । ३ । तस्य वै सप्तरात्रं तद्ब्रह्महत्या भविष्यति । पूर्वमेवं मुनिगणैः समयोऽयं कृतो द्विजं । ४ । वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तथा । स्वस्त्रियं बालकं सोऽथ पदाघृष्टमघातयत् । ५ । शिष्यानाह च भोः शिष्या ब्रह्महत्यां परावृते । चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा । ६ । अथाह याज्ञवल्क्यस्तं किमेतैर्बहुभिर्द्विजैः । क्लेशितैरल्पतेजोभिश्चारिष्येऽहमिदं व्रतम् । ७ । ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामुनिम् । मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमानकः । ८ । निस्तेजसा वदस्येतान्यस्त्वं ब्राह्मणपुङ्गवान् । तेन शिष्येण नार्थो-

---

सूरयः ॥

ऽस्ति ममाज्ञाभङ्गकारिणः । ९ । याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् । ममाप्यलं त्वयाऽधीतं यन्मया तदिदं द्विज । १० । श्रीपराशर उवाच । इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंष्यथ । छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः । ११ । यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विजः । जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ततः स्मृताः । १२ । ब्रह्महत्याव्रतं चीर्णं गुरुणा नोदितं तु यैः । चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम । १३ । याज्ञवल्क्योऽपि मैत्रेय प्राणायामपरायणः । तुष्टाव प्रणतः सूर्यं यजूंष्यभिलषस्ततः । १४ । अस्यार्थः । यजुर्वेदतरोरित्यादिना सप्तविंशतिः । इयं च प्रधानशाखानां सङ्ख्या । ब्रह्माण्डपुराणोक्तषडशीतिशाखाभेदस्तु प्रतिशाखविवक्षया तास्व शुक्लयजुः पञ्चदशकं सहेत्येकशाखा आपस्तम्बोक्ता इति द्रष्टव्यम् । याज्ञवल्क्येन छर्दितैर्यजुर्भिस्तैत्तिरीयशाखा बभूव । ते याज्ञवल्क्यव्यतिरिक्ता वैशम्पायनशिष्या याज्ञवल्क्येन छर्दितं विप्ररूपेण गृहीतुमनुचितमिति तित्तिररूपिणो भूत्वा याज्ञवल्क्यविसृष्टानि यजूंषि जगृहुः । ततस्ताः शाखास्तैत्तिरीया बभूवुरित्यर्थः । याज्ञवल्क्यव्यतिरिक्तानां चरकाध्वर्युसञ्ज्ञां निर्वक्ति । चरकाध्वर्यवस्ते वै चरणान्मुनिसत्तम । चरकाध्वर्यवइति पाठे चरणाद्यजुषां ग्रहणात् । आध्वर्यवं चक्रुरित्यर्थः । यजूंषि वैशम्पायनेनाधीतानि । याज्ञवल्क्यस्ततो ब्रह्मञ्छन्दांस्यधिगवेषयन् ।

गुरोरविद्यमानानि स्वपतस्थेऽर्कमीश्वरम्। इति भागवतोक्तेः। याज्ञवल्क्य उवाच। नमः सवित्रे द्वाराय मुक्तेरमिततेजसे। ऋग्यजुःसामरूपाय त्रयीधामात्मने नमः। १५। इत्येवमादिभिस्तेन स्तूयमानः स वै रविः। वाजीरूपधरः प्राह ब्रीयतामभिवाञ्छितम्। १६। याज्ञवल्क्यस्तथा प्राह प्रणिपत्य दिवाकरम्। यजूँषि तानि मे देहि यानि सन्ति न मे गुरौ। १७। पराशर उवाच। एवमुक्तो ददौ तस्मै यजूँषि भगवान् रविः। अयातयामसञ्ज्ञानि यानि वेत्ति न तद्गुरुः। १८। यजूँषि यैरधीतानि तानि विप्रैर्द्विजोत्तम। वाजिनस्ते समाख्याताः सूर्य्याश्वाः स भवेद्यतः। १९। शाखाभेदस्तु तेषां वै दशपञ्च च वाजिनाम्। कण्वाद्यास्तु महाभाग याज्ञवल्क्यप्रकीर्त्तिताः। २०। इति। तद्गुरुर्वैशम्पायनो यानि न वेत्ति तेषां व्यासेनानुपदिष्टत्वादिति भावः। वाजिनः समाख्याता वाजिरूपसूर्य्यप्रोक्तसंहिताध्यायित्वात्। अग्निपुराणेऽपि। काण्वामाध्यन्दिनीसञ्ज्ञा कठी माध्यकठीतथा। मैत्रायणीयसञ्ज्ञा च तैत्तिरीयाभिधानका। वैशम्पायनिकेत्याद्याः शाखा याजुषसञ्ज्ञिता इति। आदिशब्देनएतदन्यशाखाग्रहणम्। तदुक्तं नृसिंहपराशरे। प्रथमो याज्ञवल्क्यश्च आपस्तम्बो द्वितीयकः। तृतीयो मूलघटकश्चतुर्थो वाणसः स्मृतः। पञ्चमः सहवासश्च षष्ठः स्याद्गोत्रपण्डितः। सर्मानुजः सप्तमोक्त अष्टमश्च गयावलः। चित्रखड्गो नवमः प्रोक्तो नवशाखाः प्रकीर्त्ति-

ता: । तन्मध्ये सह्यवासस्तु कर्मनिष्ठो द्विजाग्रणी: । एवं शाखादेशभेदाद्बह्वस्तु द्विजातय: । तत्रापि कर्मनिष्ठाश्च ग्राह्या यज्ञादिकर्मसु । हीना द्विजातय: सर्वे त्याज्या: सर्वत्र कर्मसु । हीना द्विजातय: अभीराद्य:, । परदेशे त्रिदण्डवेषधारिण: । सन्यासिन: स्वग्रामे परिग्रहयुक्तास्ते त्रिदण्डिन:, । गोत्रपण्डितो वैश्ययाजक: । मूलघटको नागवल्लीरोपक: । निर्गुणा इति प्रसिद्धा: । अन्ये वाणसादि प्रसिद्धा: । केचिद्धर्मशास्त्रानभिज्ञा वानप्रस्थाज्जाता वाणसा इति वदन्ति तद्वाश्रमारूढपतितपरम् । तदुक्तं कूर्मपुराणे वानप्रस्थाश्रमधर्मे । यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् । तद्व्रतं तस्य लुप्येत प्रायश्चित्तीयते द्विज: । तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभि: । न हि वेदेऽधिकारोऽस्य तद्वंशेऽप्येवमेव हि । आरूढपतित: प्रोक्तो मुनिभिस्तत्वदर्शिभिरिति । वाजसनीयवेशोत्पत्तिरित्यर्थ: । काण्वा: । माध्यन्दिना: । शापेया: । तापायनीया: । कपोला: । पौण्ड्रवत्सा: । आवटिका: । परमावटिका: । पाराशर्या: । वैणेया: । वैधेया: । अद्धा: । बौधेया: । (१) इति पञ्चदशशाखा इत्यर्थ: । प्रतिपदे अनुपदे अन्यत्पदं कर्तव्यमित्यर्थ: । छन्द: शास्त्रं पिङ्गलोक्तमध्यायाष्टकम् । भा-

---

(१) 'क' 'ख' पुस्तकयो: पाठा यथा । शावेया: । स्थापनीया: । कपाला: । पौण्ड्रवत्सा: । पराशरा: । वैनेया:, । वैजवा: । गालवा: । कात्यायनीयाश्चेति । शाखात्रितयस्थाने मूले न दृश्यन्तेऽतो मूलोक्ता: प्रामाणिका: पाठा इति बुधैरवगन्तव्या इत्यर्थ: ॥

षाशब्देन भाष्यतेऽर्थः पर्यायशब्दैर्निघण्टुरध्यायपञ्चकः ॥ त्रयोदशाध्यायात्मकं निरुक्तम् । धर्मशास्त्रं मन्वाद्यनेकमहर्षिप्रणीतम् । मीमांसा जैमिनिमहर्षिकृतमध्यायद्वादशकम् । न्यायशब्देन काणादसूत्रम् । तर्कशब्देन गौतमसूत्रम् । इति षडुपाङ्गानि । उपज्यौतिषं ज्यौतिःशास्त्रं साङ्गलक्षणं सामुद्रकादि ॥ यूपलक्षणं छागलक्षणं च यज्ञे प्रसिद्धम् । प्रतिज्ञासूत्रं खण्डत्रयात्मकम् । अनुवाकाध्यायः । वेदशाखापरिज्ञानम् । श्राद्धसूत्रं नवखण्डात्मकम् । श्रौतयज्ञार्थमण्डपरचनात्मकं शुल्बसूत्रम् । पार्षदपरिशिष्टसूत्रम् । ऋग्यजुर्निर्णयात्मकम् । इष्टकापूरणपरिशिष्टसूत्रम् । गोत्रप्रवरनिर्णयार्थः । प्रवराध्यायः । उक्थशास्त्रपरिशिष्टम् । निगमयज्ञपार्श्व,क्षौत्र,क,प्रसवोत्थान,कूर्मलक्षणपरिशिष्टपञ्चकं यज्ञेषु प्रयोजनं प्रसिद्धम् । एतानि परिशिष्टान्यष्टादशसङ्ख्यकानि कात्यायनमहर्षिप्रणीतानि । द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके । ऋग्गणः परिसङ्ख्यातमेतत्सर्वं सशुक्रियम् । वाजसनेयके वेदे नवशताधिकसहस्रमन्त्रा इत्यर्थः । एतत्सकलं शुक्रियमंत्रब्रह्मचँव्याचमिति षट्त्रिंशदध्यायोक्तचतुर्विंशद्दचात्मकसहितं, मध्याह्ने शुक्लवर्णेन सूर्येण दत्तः सशुक्रयजुः परिसङ्ख्यात इत्यर्थः । वेदोपक्रमणे चतुर्दशीपौर्णिमाग्रहणाच्छुक्लयजुः । प्रतिपदायुक्तपौर्णिमाग्रहणात्कृष्णयजुरिति वा । ऋक्सङ्ख्या १९०२५ । पञ्चविंशत्युत्तरैकोनविं-

श्रुतिः। खिलमन्त्रा अग्निश्चेति षड्विंशत्यध्यायोक्ताः। यजुःसङ्ख्या अष्टाविंशत्युत्तराष्टशतान्यष्टौ सहस्राणि । वेदचतुर्गुणं शतपथब्राह्मणमित्यर्थः । यजुर्वेदतरोरासन् शाखा एकोत्तरं शतम् । तत्रापि च शिवाः शाखाः दशपञ्च च वाजिनाम् । तत्रापि मुख्या विज्ञेया शाखा या कण्वसञ्ज्ञका । इति । ग्रन्थान्तरे, । तैत्तिरीयकानां द्विभेदा भवन्ति । औखेया । खाण्डिकेयाश्चेति । खाण्डिकेयानां पञ्चभेदा भवन्ति । आपस्तम्बी । बौधायनी । सत्याषाढी । हिरण्यकेशी । भारद्वाजीति, कात्रेता शाट्यायनीति द्वे मूलोक्ते तयोः स्थाने बौधायनी औधेयाइति बोध्ये । तेषामध्ययनपरिमाणम् । काण्डास्तु सप्त विज्ञेयाः प्रश्नाश्चाधिक्यकास्ततुः। चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट् । १ । एकपञ्चाशदधिकाः सङ्ख्याः पञ्चाशदुच्यते । द्विसहस्रञ्चैकशतमष्टानवति चाधिका ।२। लक्षैकं तु द्विनवति सहस्राणि प्रकीर्त्तितम् । पदानिनवतिश्चैव तथैवाक्षरमुच्यते । ३ । लक्षद्वयं त्रिपञ्चाशत्सहस्राणि शताष्टकम् । अष्टषष्ठ्यधिकं चैव यजुर्वेदप्रमाणकम् । ४ । काण्डाः । ७ । प्रश्नाः । ४४ । अनुवाकाः । ६५१ । पञ्चाशी । २१९८ । पदानि १९२९० । अक्षराणि । २५३८ । शाखावाक्यान्ययुतानि सहस्राणि नवानि च । चतुःशतान्यशीतिस्त्र अष्टौ वाक्यानि गण्यते १। इति ब्राह्मणे अष्टौ वाक्यसङ्ख्या । १९४८० । इति तैत्तिरीयनिगदवेदा-

ष्यसङ्ख्योक्ता इत्यर्थः । तत्र कठानां तूपगा यजुर्विशेषस्त्वतुश्चत्वारिंशदुपग्रन्थाः । मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते। यजुर्वेदः स विज्ञेय अन्ये शाखान्तराः स्मृताः । चतुश्चत्वारिंशदुपग्रन्था अध्यायाः समीपे उक्ताः। मन्त्रश्च ब्राह्मणं च मन्त्रब्राह्मणे तयोर्मन्त्रब्राह्मणयोर्वेदइति सञ्ज्ञा । तदुक्तं मन्त्रब्राह्मणयोर्वेदइति नामधेयमित्यृग्वेदीयप्रातिशाख्यभाष्यकारेणोव्वटेन । आपस्तम्बसामान्यसूत्रभाष्यकारेण कपर्दिना धूर्त्तस्वामिना च । तथा मन्त्रो नाम संहितामन्त्रस्ताहङ्मन्त्ररूपसंहितायास्तन्मध्ये एव तदग्रे ब्राह्मणत्वेन पठनमित्युभयथाऽपि संहितात्वेन पदत्वेन क्रमत्वेन च पठनं त्रिगुणं पठनमिति, मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यत इत्यस्यार्थः । एतादृशपठनं शाखाया अध्ययनं स यजुर्वेदस्तच्च तैत्तिरीयशाखायामेवास्ति । तथा हि । सम्पश्यामि । "प्रजाऽअहमिह प्रजसो मोनवीरिति" संहितामन्त्रः । एतस्यैव ब्राह्मणसंहितायामेव तदग्रेसम्पश्यामि । "प्रजाअहमित्याह यावन्त एवेति" ब्राह्मणमित्युभयोरपि संहितात्वेन पदत्वेन क्रमत्वेन पठनं त्रिगुणितं पठनं भवति । एतादृशमुदाहरणान्तरमाह । "इमामगृभ्णन्रशनामृतस्य पूर्वऽआयुषि विदथेष्विति संहितामन्त्रः । "इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त" इति ब्राह्मणम् । अनयोरपि त्रिगुणत्वेन पठनम्। "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रय" इति त्रिगुणेन पठनं भवति। एते त्रिगुणाः क-

स्तां अपि शाखायां न भवन्ति किन्तु गाथा सङ्ग्रन्थत्वात् । एवमन्यान्यपि बहूनि वाक्यानि सन्ति तानि विस्तरभयान्नोक्तानि । अतः कारणादन्ये शाखान्तराः स्मृताः । 'तेषामध्यनं प्रवचनीयाश्चेति" तेषां शुक्लकृष्णयजुषां पठनं प्रवचनीयाः प्रतिवचनत्वेन आर्षीयपाठत्वेन च समाप्तमित्यर्थः ॥ इति महिदासद्विजन्मना कृते चरणव्यूहपरिशिष्टसूत्रव्याख्याने द्वितीयखण्डः समाप्तः ॥

अन्यान्यपि पुराणवाक्यानि सङ्गृहीतानि । अग्निमीडे नमस्तुभ्यमिषे त्वोर्जे त्वसत्तनुः । अग्नऽआयाहि वीतये शन्नो देवी स्वरूपवान् । १ । इषे त्वोर्जे यजुर्वेदशब्दः पुरुष एव च । नभस्य पूर्णिमासूर्य उदयव्यापिनी तथा । २ । सङ्गृह्यमाणस्य वेदं प्रतिवर्षंव्रतं चरेत् । यातयामनिवृत्यर्थं वेदस्य च विशेषतः । ३ । तस्योष्णिक्छन्दसा मेदा गायत्री च त्वचा स्मृता । मांसेषु त्रिष्टुभं विद्यादनुष्टुब्रुधिरं स्मृतः । ४ । अस्थिषु जगती चैव मज्जासु पङ्क्तिरेव च । प्राणेषु बृहती छन्दो यजुर्वेदस्य लक्षणम् । ५ । एतदर्थे ऐतरेयश्रुतिः । "शुक्लकृष्णकनीनिकेति स यद्यपि स्तषा वदति । यएवमेतं छन्दसां छन्दस्त्वं वेदेत्यनतम्" । पुण्याहवाचने मन्त्रान्मोचने जङ्घणस्य च । सभायां ब्रह्मयज्ञे च इषे त्वोर्जे यजुः पठेत् । शाङ्ख्यायनं ब्रह्मयज्ञे इषे त्वोर्जे यजुः स्मरेत् । श्रौते स्मार्त्ते च पूर्त्ते च सर्वकर्मसु योजितः । २ । ऋग्यजुःसामाथर्वांश्च सभायां कुण्डमण्डपे । ब्रह्मयज्ञे प्रतिसरे पठेद्वै स्वस्तिवाच-

ने । ३ । अन्यत्र समुदायश्च प्रायश्चित्ते सभासु ते । यजुर्वेदोपनिषदे मन्त्राः शाकलसञ्ज्ञकाः । ४ । उपदिष्टाः शौनकेन आत्मशिष्याय हृद्यये । तेषां शाकलमन्त्राणां यजुःसञ्ज्ञा समीरिता । ५ । व्याख्या चरणव्यूहस्य यजुःखण्डस्य तेन वै ॥ विस्तारिता यथा बुद्धि महादेवप्रसादतः । ६ ॥ इति शौनकोक्तयजुर्वेदीयद्वितीयखण्डस्य चरणव्यूहपरिशिष्टसूत्रस्य व्याख्या समाप्ता ॥

अथ तृतीयखण्डस्य व्याख्या प्रारभ्यते ॥

सामवेदस्य किल सहस्रभेदा भवन्त्येष्वनध्यायेष्वधीयानास्ते शतक्रतुवज्रेणाभिहताः शेषान्व्याख्यामस्तत्र राणायनीया नाम सप्त भेदा भवन्ति राणायनीयाः शाट्यमुग्राः कालोपा महाकालोपा लाङ्गलायनाः शार्दूलाः कौथुमाश्चेति तेषामध्ययनमशी-

तिशतमाग्नेयं पावमानं चतुः शतमै-
न्द्रं तु षट्शतियानि गायन्ति साम-
गास्तान्यधीत्य चण्डात्प्रचण्डतरो भ-
वति शिष्टान्यधीत्य शिष्टाऽऽविंशति-
को भवति तत्र केचित्पुनर्ऋक्तन्त्रं
सामतन्त्रं सञ्ज्ञाधातुलक्षणमिति
विधीयन्ते। अष्टौ सामसहस्राणि सा-
मानि च चतुर्द्दश। अष्टौ शतानि न-
वतिदशतिर्वालखिल्यकम् । सरहस्यं
ससुपर्णं प्रेक्ष्यस्तत्र वालखिल्याः ।
सारण्यकानि सौर्याणि ह्येतत्साम-
गणं स्मृतम् ॥ इति शौनकोक्तचरण-
व्यूहपरिशिष्टसूत्रे तृतीयखण्डः स-
माप्तः ॥

अथ तृतीयखण्डस्य व्याख्यानम् ॥

सामवेदस्येति । किलेति प्रसिद्धौ सहस्रभेदा आसीत् । सहस्रभेदमध्ये शक्रेण वज्रेणाभिहताः प्रणष्टाः । अनध्यायेष्वधीयाना म्रीयन्ते विद्युताः खलु इति । शेषान् शाखापाठकान्व्याख्यास्यामः । आसुरायणीया । वासुरायणीया । वार्त्तान्तरेया । प्राञ्जल ऋग्वैनविधाः । प्राचीनयोग्याः । राणायनीयाश्चेति, तत्र राणायनीयानां नव भेदा भवन्ति । राणायनीयाः । शाट्यायनीयाः । शाट्यमुग्राः । खल्लाः । महाखल्लाः । लाङ्गलाः । कौथुमी । गौतमी । जैमिनीयाश्चेति । (१) । तेषामध्ययनं अष्टौ सामसहस्राणि सामानि च चतुर्दशान्यष्टौ शतानि दशभिर्दशसप्तसु वालखिल्यः सुपर्णः प्रेक्ष्यमेतत्सामगणं स्मृतम् । अथ प्रकारान्तरेणाह । तत्र राणायनीयानां सप्त भेदा भवन्ति । राणायनीयाः । सासत्यमुग्राः । कालेयाः । महाकालेयाः । लाङ्गलायनाः । शार्दूलाः । कौथुमाश्चेति । तत्र कौथुमानां षड्भेदा भवन्ति कौथुमाः । आसुरायणाः । वातायनाः । प्राञ्जलिद्वैनभृतः । प्राचीनयोग्याः । नैगमीयाः । इति तेषां कौथुमादीनामध्ययनम् । अशीतिशतमाग्नेयं पावमानं चतुःश-

(१) कालेया । महाकालेया । इत्यनयोर्द्वयोः स्थाने, खल्वला महाखल्वला इति 'ख' पुस्तकपाठः । अपरं मूले सप्त भेदा, व्याख्यायां नव भेदा भेदद्वयमधिकं च दृश्यमिति 'ग' पुस्तकपाठ इति ॥

तम् । ऐन्द्रं तु षड्विंशतिर्यानि गायन्ति सामगास्तानि सूक्तान्यधीत्य चण्डा उत्कृष्टास्ते चण्डतरा अत्युत्कृष्टा भवन्ति शिष्टानि व्यतिरिक्तानि अधीत्य पठित्वा शिष्टाविंशको भवति शिष्टान् प्रामाणिकान् आविंशतिशिष्टेषुवा शिष्टभागाः प्रवेशयोग्याः शिष्टा अष्टाविंशतिगणानां पूरकाः सर्वश्रेष्ठो भवतीत्यर्थः । तत्र सूक्तेषु केचिन्मन्त्रतन्त्रा इति मन्त्रास्तत्रुद्धो विधीयन्ते । तदाहाचार्यः । ऋक्तन्त्रम् । सामतन्त्रम् । सङ्ख्यालक्षणम् । धातुलक्षणमिति । इदानीं सामसङ्ख्यामाह । (१) अष्टौ सामसहस्राणि सामानि च चतुर्दश । अष्टौ शतानि नवतिर्विंशतिर्वालखिल्यकम् । सरहस्यं ससुपर्णं प्रैष्य तत्सामदर्पणम् । सारण्यकानि सौर्याण्येतत्सामगणं स्मृतम् । अशीतिशतमाग्नेयम् । १८० । पावमानम् । १०४ । ऐन्द्रन्तु । २६ । शिष्टाः २८ गणानां पूरकाः । अष्टौ सामसहस्राणीत्यस्यार्थोऽङ्कतो ज्ञातव्यः । ८८१४ ॥, अन्यशाखासङ्ख्यामाह । नवतीति । सुपर्णप्रैष्यः काश्चिच्छाखाभेदः तेन सह वर्त्तमानः ससुपर्णप्रैष्यः सुपर्णप्रैष्येण सहितोवालखिल्यः शाखाभेदो नवतिः नवतिसङ्ख्याकाः द-

(१) अष्टौ सामसहस्राणी,त्यस्यायं पाठभेदो ज्ञातव्यो यथा, छन्दोगार्चिकसंहिता । गानानि तस्य वक्ष्यामि सहस्राणि चतुर्दश । अष्टौ शतानि ज्ञेयानि दशोत्तराण्तथैव च । ब्राह्मणं चोपनिषदं सहस्रत्रितयं तथा । अस्मिन्सामवेदे गोभिलोक्तं गृह्यसूत्रम् । शाट्यायनोक्तं श्रौतसूत्रम् । अष्टौ ब्राह्मणानि षड्विंशआर्षदैवतछन्दोमन्त्रसामविधानछान्दोग्यादीनि । अन्यान्यपि श्राद्धसूत्रस्नानसूत्रपरिशिष्टानि भवन्ति ग्रन्थविस्तरभयान्न लिखितानीति शम् ॥

शदशतयो यस्मिन् स नवतिदशतिः । दशतिरिति दशसङ्ख्या सङ्ख्या दशगुणा नवतिरित्यर्थः । अङ्कतोऽऽपि । ६० । सारण्यकानि आरण्यकेनोपनिषद्भागेन सह वर्त्तमानानि सौर्याणि सूर्यदैवत्यानि सूक्तानि । तत्र वालखिल्यशाखायामेव । आरण्यकं सूर्यसूक्तं सुपर्णप्रैत्तवालखिल्यानि मिलित्वा नवशतानीत्यर्थः । निगमयन्त्येतत्पूर्वोक्तसामसमूहः स्मृतं कथितम् । गणशब्दस्य क्लीयत्वं छान्दसम् । आसां षोडशशाखानां मध्ये तिस्रः शाखा विद्यन्ते । तासु गुर्जरदेशे कौथुमी प्रसिद्धा । कार्णाटके जैमिनी प्रसिद्धा । महाराष्ट्रदेशे राणायनीया प्रसिद्धेति । आसां शाखानामध्यापकाचार्यास्त्रयोदशसङ्ख्याकास्ते यथा राणायनी सात्यमुग्रा दुर्वासा अथ भागुरिः । भालुण्डो गोर्गुलवीर्भगवानौपमन्यवः । १ दारालो गार्ग्यसावर्णी वार्षगण्यश्च ते दश । कुथुमिः शालिहोत्रश्च जैमिनिश्च त्रयोदश । २ । इत्येते सामगाचार्याः स्वस्तिं कुर्वन्ति तर्पिताः ॥ इति ॥ अन्ये अपि भागवतद्वादशस्कन्धीयषष्ठाध्यायस्थचतुस्त्रिंशत्पद्यारभ्योनचत्वारिंशत्पद्योक्ताः सामवेदप्रवर्त्तकास्ते यथा । जैमिनेः सामगस्यासीत्सुमन्तुस्तनयो मुनेः । सुमन्वांस्तत्सुतस्ताभ्यामेकैकां प्राह संहिताम् । ३४ । सुकर्माऽपि च तच्छिष्यः सामवेदतरोर्महान् । सहस्रं संहिताभेदं चक्रे साम्नां ततो द्विजः । ३५ । हिरण्यनाभः कौसल्यः पौष्यञ्जिश्च सुकर्मणः । शिष्यौ जगृहतुश्चान्ये आवन्त्यो ब्रह्मवित्तमः । ३६ । उदीच्याः सामगाः

शिष्या आसन्पञ्चशतानि वै । पौष्यञ्ज्यावन्त्ययोश्चापि तांश्चोदीच्यान्प्रचक्षते । ३७ । लौगाक्षिर्लाङ्गलिः कुल्यः कुसीदः कुक्षिरेव च । पौष्यञ्जिशिष्या जगृहुः संहितास्ते शतं शतम् । ३८ । कृतो हिरण्यनाभस्य चतुर्विंशतिसंहिताः । शिष्य ऊचे स्वशिष्येभ्यः शेषा आवन्त्य आत्मवान् ३९ अस्यार्थः । सामगस्य जैमिनेः पुत्रः सुमन्तुर्नाम तस्य सुमन्तोः सुतः सुमन्वान्नाम ताभ्यां सुमन्तुसुमन्वभ्यां पुत्रपौत्राभ्यां क्रमेणैकैका प्राह । सुकर्मापि तस्य जैमिनेः शिष्यो महानतिप्रज्ञावान् सामवेदाख्यतरोः साम्नां सहस्रसंहितारूपं भेदं चक्रे । कोसलपुत्रो हिरण्य नाभस्य पौष्यञ्जिश्च सुकर्मणः शिष्यौ सामशाखां जगृहतुः । अन्ये आवन्त्य उदीच्यश्च सामशाखां जगृहतुः, पौष्यञ्ज्यावन्त्ययोश्चापि सामगाः पञ्चशतानि शिष्या आसन् । तेषां समुदितानां मतानां नामानीति पौष्यञ्जिशिष्या लौगाक्ष्यादयो नाम्ना शतं शतं संहितां जगृहुः, हिरण्यनाभस्य शिष्यो नाम्ना कृतश्चतुर्विंशतिसंहिताः स्वशिष्येभ्य ऊचे शेषाश्चान्या संहिता आत्मज्ञानवानावन्त्यः स्वशिष्येभ्य ऊचे । इत्यर्थः ॥ व्याख्याचरणव्यूहस्य सामखण्डस्य तेन वै ॥ विस्तारिता यथाबुद्धि महादेवप्रसादतः ॥

इति चरणव्यूहपरिशिष्टस्य तार्तीयकखण्डस्य व्याख्या समाप्ता ॥

अथ चरणव्यूहपरिशिष्टसूत्रस्य चतुर्थखण्डः प्रारभ्यते ॥

अथर्ववेदस्य नव भेदा भवन्ति पिप्पलाः शौनका दामोदात्तोत्तायना जाबाला ब्रह्मपलाशा कुनखी देवदर्शी चारणविद्याश्चेति द्वादशैव सहस्राणि पञ्चकल्पानि भवन्ति कल्पे कल्पे पंचशतानि भवन्ति नक्षत्रकल्पो विधानकल्पः संहिताविधिरभिचारकल्पः शान्तिकल्पश्चेति तत्र वेदानामुपवेदाश्चत्वारो भवन्त्यृग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेदउपवेदः सामवेदस्य गान्धर्ववेदोऽथर्ववेदस्यार्थशास्त्रं चेत्याह

भगवान्व्यासःस्कन्दो वा य इमे वेदाश्चत्वारस्तेषामेकैकस्य कीदृशं रूपं वर्णविधोच्यते ऋग्वेदः पद्मपत्राक्षः सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः श्वेतवर्णो वर्णेन कीर्त्तितं प्रमाणं तावत्तिष्ठन्वितस्तीः पञ्च; यजुर्वेदः पिङ्गाक्षः कृशमध्यस्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा प्रादेशमात्रःषड्दीर्घत्वेन सामवेदो नित्यं स्रग्वी सुप्रयतः शुचिवासाः शमी दान्तो बृहच्छरीरः शमीदण्डी कातरनयन आदित्यवर्णो वर्णेन नवारत्निमात्रोऽथर्ववेदस्तीक्ष्णः प्रचण्डकामरूपी विश्वकर्त्ता क्षुद्रकर्त्ता

स्वशाखाध्यायी प्राज्ञश्च महानीलो-
त्पलवर्णो वर्णेन दशारत्निमात्र ऋ-
ग्वेदस्यात्रेयसगोत्रं सोमदैवत्यं गा-
यत्रीछन्दो, यजुर्वेदस्य काश्यपस-
गोत्रमिन्द्रदैवत्यं त्रिष्टप्छन्दः; साम-
वेदस्य भारद्वाजसगोत्रं रुद्रदैवत्यं ज-
गतीछन्दोऽथर्ववेदस्य वैतानसगो-
त्रं ब्रह्मदैवत्यमनुष्टुप्छन्दो, य इमे वे-
दानां नामरूपगोत्रं प्रमाणं छन्दो-
दैवतं वर्णं वर्णयन्ति । अविद्यो ल-
भते विद्यां जातिस्मरोऽथ जायते।
जन्मजन्मवेदपारगो भवत्यव्रतीव्रती
भवत्यब्रह्मचारी ब्रह्मचारी भवति न-
मः शौनकाय नमः शौनकाय ॥

य इदं चरणव्यूहं गर्भिणीं श्रावये-त्स्त्रियम् ॥ पुमांसं जायते पुत्रमृषि-भिर्वेदपारगम् । य इदं चरणव्यूहं श्राद्धकाले पठेद्द्विजः । अक्षय्यं तद्भ-वेच्छ्राद्धं पितॄंश्चैवोपतिष्ठते । य इदं चरणव्यूहं पठेत्स पङ्क्तिपावनः । तारयेत्प्रभृतीन्पुत्रान्पुरुषान्सप्तसप्त-च ।-य इदं चरणव्यूहं पठेत्पर्वसु प-र्वसु । विधूतपाप्मा स स्वर्गी ब्रह्म-भूयाय गच्छति । रतिर्धृतिश्शिवा श्यामाश्चत्वारो वेदपत्निकाः। ज्ञा-तव्या यज्ञकालेषु ईशानादिव्यव-स्थिताः । लक्षं तु चतुरो वेदा लक्षं भारतमेव च । लक्षं व्याकरणं प्रोक्तं

चतुर्लक्षं तु ज्यौतिषं चतुर्लक्षं तु ज्यौतिषम् ॥ ५ ॥

इति शौनकोक्तचरणव्यूहपरिशिष्टसूत्रे चतुर्थपञ्चमखण्डः समाप्तः ॥

अथ चतुर्थपञ्चमखण्डस्य विवृत्तिरारभ्यते ॥

अथर्ववेदस्येति। अथर्ववेदस्य नव भेदा भवन्ति नव शाखा भवन्तीत्यर्थः। तानाह। पैप्पला। दान्ता। प्रदान्ता। स्नाता। सौला। ब्रह्मदावला। शौनकी। देवदर्शी। चारणविद्याश्चेति(१)॥ तेषामध्ययनं द्वादशैव सहस्राणि मन्त्राणाम्। कीदृशानि पञ्चकल्पानि भवन्ति। अत्र बहुवचनात्ते बहवः। यत्र एकवचनं स एकः। तेषामध्ययनं शाखया उच्यते। द्वादशसहस्राणि मन्त्राणां कीदृशानि। एकस्मिन्कल्पे कल्पे पञ्चशतानि मन्त्राणाम्। कल्पान्याह। नक्षत्रकल्पः। विधानकल्पः। संहिताविधिकल्पः। अभिचारकल्पः। शान्तिकल्पः। इति

---

(१) दान्ता प्रदान्ता इति 'ख' पुस्तकेऽधिकपाठो मूलसूत्राद्बोध्यः॥ वेददर्शीति 'ग' पुस्तकपाठः। चरणविद्याश्चेति 'घ' पुस्तकपाठः। 'ब्रह्मदायशाखेति 'क' पुस्तकपाठश्च॥

पञ्चकल्पाः । तत्र वेदानां चत्वार उपवेदा भवन्ति । यथा ऋग्वेदस्योपवेद आयुर्वेदः चिकित्साशास्त्रम् । यजुर्वेदस्योपवेदो धनुर्वेदो युद्धशास्त्रम् । सामवेदस्योपवेदो गान्धर्ववेदस्सङ्गीतशास्त्रम् । अथर्ववेदोऽर्थशास्त्रं नीतिशास्त्रम् । शस्त्रशास्त्रं विश्वकर्मादिप्रणीतशिल्पशास्त्रम् । इति भगवान्वेदव्यासः स्कन्दः कुमारो वाऽऽह । य इमे चत्वारो वेदा उक्तास्तेषां मध्ये एकैकस्य कीदृशं रूपं आकारः । तत्तद्वर्णं सितासितादि । वर्णविधः प्रकारस्सोच्यते । तत्रादौ ऋग्वेदस्वरूपमाह । ऋग्वेदः पद्मपत्रायताक्षः । पद्मपत्रं कमलदलं तद्वद्दीर्घिणी नेत्रे यस्य सः । सुविभक्तः । सुविभक्ता रेखात्रयाङ्किता ग्रीवा यस्य सः । कुञ्चितकेशश्मश्रुः । कुञ्चिताबलीमन्तः केशाः शिरसिजाः श्मश्रूणि मुखरोमाणि यस्य सः । श्वेतवर्णो । वर्णेन तु ककुब्वर्णो न, श्वेतवर्णः श्वेतो वर्णो यस्य सः । कीर्तितं प्रमाणं तावत्तिष्ठन्वितस्तीः पञ्च, तावत्साकल्येन, पञ्च वितस्तीर्भवन्ति ह्येतत्प्रमाणमृग्वेदस्य कीर्तितमुक्तं' वितस्तिशब्दो द्वादशाङ्गुलात्मकः । सार्द्धहस्तद्वयप्रमाणमित्यर्थः । यजुर्वेदस्वरूपमाह । यजुर्वेदः पिङ्गे पीते अक्षिणीयस्य सः । कृशं मध्ये कटिप्रदेशे यस्य सः । स्थूलौ गलकपोलौ यस्य सः । ताम्रवदाचरितो रक्तो वर्णो यस्य सः । यद्वा कृष्णवर्णो यस्य सः । दीर्घत्वेनोच्चत्वेन षट्प्रादेशमात्रप्रमाणं यस्य सः । प्रादेशस्तु प्रदेशिन्येत्यभिधानोक्तेः । अङ्गुष्ठप्रदेशिन्योर्विहितत्वात्प्रमाणप्रादेशो दशाङ्गुलः ।

ताहशाः षट्प्रादेशाः प्रमाणं षण्ण्यङ्गुलं सार्द्धद्वयहस्तमित्यर्थः । सामवेदस्वरूपमाह । सामवेदो नित्यं स्रग्वी स्रजो माला यस्य सन्तीति स्रग्वी । "अस्मायामेधास्रजो विनिः" । इति सूत्राद्विनि प्रत्ययः । नित्यं पुष्पमालाधारी । यमनियमवान् । सुप्रयतः शुचिः । पवित्रः । शुचि शुद्धं वासो वस्त्रं यस्य स शुद्धवस्त्रधारी । शमः शान्तिरस्यास्तीति शमी शान्तमनाः । दान्तो नियतबाह्येन्द्रियः । बृहन्महच्छरीरं यस्य सः । शमीतरोर्दण्डो यस्य सः शमीदण्डो ॥ (१) कातरेऽल्पेऽ-

(१) श्रीमद्भागवतेऽपि अथर्ववेदाचार्याः कथिता यथा । अथर्ववित्सुमन्तुश्च शिष्यमध्यापयत्स्वकम् । संहितां सोऽपि पथ्याय वेददर्शाय चोक्तवान् । १ । शौक्लाय निर्ब्रह्मबालिमोदोषः पिप्पलायनिः । वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ।२। कुमुदः शौनको ब्रह्मन् जाजलिश्चाप्यथर्ववित् । बभ्रुः शिष्योऽप्यङ्गिरसः सैन्धवायनएव च । ३ । अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथाऽपरे । नक्षत्रकल्पः शान्तिश्च कश्यपाङ्गिरसादयः । ४ । एते आथर्वणाचार्याः शृणु पौराणिकान्मुने । टीकाकारः । शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे । द्वितीयां संहितां प्रादात्सैन्धवायनसञ्ज्ञिते ५ ।। इति अथर्ववेदाचार्याः सम्यगुदीरिताः द्वादशस्कन्धे ६ अध्याये ।। अन्यान्यपि ऋग्वेदयजुर्वेदसामवेदाथर्वायुर्वेदधनुर्वेदगान्धर्ववेदार्थवेदानां शिक्षादिषडङ्गानां, च धर्मशास्त्राद्युपाङ्गानां पुराणेतिहासादिनां च लक्षणानि हेमाद्र्युक्तानि लिख्यन्ते । ऋग्वेदः श्वेतवर्णः स्याद्द्विभुजो रासभाननः । अक्षमालामयः सौम्यः प्रीतश्चाध्ययनोद्यतः । १ । अजास्यः पीतवर्णः स्याद्यजुर्वेदोऽक्षसूत्रधृक् । वामे कुलिशपाणिस्तु भूतिदो मङ्गलप्रदः । २ । नीलोत्पलदलाभासः सामवेदो हयाननः । अक्षमालान्वितो दक्षे वामे कम्बुधरः स्मृतः । ३ । अथर्वणाभिधो वेदो धवलो मर्कटाननः । अक्षसूत्रं च खट्वाङ्गं बिभ्राणोऽयं जपप्रियः । ४ । आयुर्वेदो हरिद्राभो वानरास्यो विशालदृक् । अक्षसूत्रं सुधाकुम्भं बिभ्रदारोग्यदो भृशम् । ५ । अस्य धन्वन्तरिर्भगवान्कर्त्ता । पीतवर्णो धनुर्वेदः पिकवक्त्रो महातनुः । रत्नमालावलिं धत्ते मस्तके भूषिता जटा । ६ । अस्य कर्त्ता महर्षिर्विश्वामित्रः । गीतशास्त्रं सितं रम्यं मृगं वक्त्रं जटाधरम् । अक्षसूत्रं त्रिशूलं च बिभ्राणं च त्रिलोचनम् । ७ । अस्य कर्त्ता महर्षिर्भरतः । अर्थशास्त्रं भवेद्गौरं सारिकास्यं सुचन्दनम् । अक्षसूत्रं पृदाकुं च धारयन्कुण्डला-

च्छिणी हे नेत्रे यस्य सः । काञ्चननयनो वा । आदित्यस्य भानोर्वर्णइव वर्णो यस्य सः । श्वेतवर्णो वा नवार-

---

न्वितम् । ८ । अस्य कर्त्ता महर्षिरुशनाः । शिक्षा शुभ्राऽभयकरा ज्ञानमुद्रान्विता शुभा । अक्षसूत्रा सकुण्डीका द्विभुजा दण्डपङ्कजा । ९ । शिक्षा बहुधा आसां कर्त्तारो याज्ञवल्क्यकात्यायनपाराशरभरद्वाजगौतममाध्यन्दिनमाण्डव्या यजुर्वेदीया महर्षयः । आधुनिकाशिक्षाकारकामरेशकेशवमल्लशर्म्माणः । पाणिनीया शिक्षा ऋग्वेदाद्युपकारिका सामवेदीये द्वे शिक्षे नारदीयलोमशीये च ॥ कल्पस्तु कुमुदाभासो वायसास्यो महोदरः । दण्डी कुण्डधरोऽब्जस्थो मेखलाकुण्डलान्वितः । १० । तत्तद्वेदीयकल्पसूत्राणां कात्यायनापस्तम्बाश्वलायनहिरण्यकेशिबौधायनलाटयायनगोभिलशाङ्खायनादयो महर्षयः कर्त्तारः । सितं व्याकरणं ज्ञेयं मयूरास्यं कठोदरम् । वीणाकजान्वितं दिव्यं दिव्यवस्त्रविभूषितम् । ११ । अष्टौ व्याकरणानि एषामिन्द्रचन्द्रादयोऽनेके कर्तारः । इन्दुवन्निर्मलं शान्तं बकवक्त्रं कृशोदरम् । पाशपङ्कजहस्तं स्याच्चाक्षसूत्रं सपुस्तकम् । १२ । अस्य कर्त्ता यास्काचार्यः । जपाकुसुमसङ्काशं छन्दो ज्ञेयं विपश्चिता । चकोरास्यं जपासक्तं शक्ति बिभ्रच्छिखान्वितम् । १३ । अस्य कर्त्ता पिङ्गलाचार्यः । ज्यौतिषं तु बिडालास्यमिन्द्रनीलनिभं शुभम् । अक्षसूत्रं दधद्दक्षे सुधापूर्णघटं करे । १४ । अस्य कर्त्तारो जैमिनिनारदादयः । अतसीपुष्पसङ्काशो न्यायो ज्ञेयो विपश्चिता । सिंहास्यो दक्षिणे सूत्रं ध्वजं वामकरे दधत् । १५ । अस्य कर्त्ता महर्षिः काणादः । धर्मशास्त्रं सितं शान्तं चाषवक्त्रं कजासनम् । मुक्ताजपाङ्कधृग्दक्षे तुलाहस्तं तु वामतः । १६ । अस्य कर्त्तारो महर्षिमन्वादयः । पुराणं चम्पकाभासं शुकवक्त्रं चतुर्दलम् । अक्षसूत्रत्रयं ज्ञेयं नानाऽऽभरणभूषितम् । १७ । अस्य भगवान्वेदव्यासः प्रणेता ॥ इतिहासः कजाभासः शूकरास्यो महोदरः । अक्षसूत्रं घटं बिभ्रत्पङ्कजाभरणान्वितः । १८ । अस्यापि निर्माता द्वैपायनो महर्षिः ॥ पूर्वमीमांसाभिधं तु धवलं वृषभाननम् । अक्षसूत्रं हलं धत्ते वनमालाविभूषितम् । १९ । अस्य कर्त्ता महर्षिजैमिनिः ॥ शास्त्रं पाशुपतं शुभ्रं व्यालवक्त्रं कृशोदरम् । सूत्रपात्रधरं भीमं व्याघ्रचर्माम्बरावृतम् । २० । अस्य कर्त्ता साक्षादीश्वरः ॥ पातञ्जलाभिधं रक्तं सर्पवक्त्रं सुतेजसम् । अक्षसूत्रं पृदाकुं च धारयन्कुण्डलान्वितम् । २१ । अस्य कर्त्ता शेषः पतञ्जलिः ॥ साङ्ख्यं तत्कपिलं बभ्रुवक्त्रमुज्ज्वलतुन्दिलम् । जाप्यदण्डधरं दीर्घ नखलोमजटाधरम् ॥ २२ ॥ अस्य कर्त्ता महर्षिः कपिलाचार्यः ॥ इति सम्यग्विचारेण शास्त्रदृष्टं फलं शुभम् ॥ सर्वं भवति लोचेत्तान्नष्फलं चाशुभास्पदम् ॥ २३ ॥ शुभमस्तु ॥

त्निप्रमाणं यस्य सः साईचतुष्टयहस्तदीर्घ इत्यर्थः । षडरत्निमात्रो वा ॥ अथर्ववेदस्वरूपमाह । तीक्ष्णः । उग्रः । प्रचण्डः । क्रोधी । कामरूपी । कामेन रूपाणि यस्य सः । स्वेच्छारूपधारी । विश्वस्य आत्मा जीवनम् । विश्वस्य कर्त्ता स्रष्टा च उपनिषद्बाहुल्यात् । क्षुद्राणि कर्माणि यस्य सः । अभिचारकृत्याप्रयोजकमन्त्रबाहुल्यात् । स्वशाखाध्यायी । अथर्वणे विशेषः प्राज्ञश्च । महानीलोत्पलवर्णेन श्यामकमलइव वर्णो यस्य सः श्यामसुन्दरः । दश अरत्नयः अकनिष्ठिकहस्तः प्रमाणं यस्य पञ्चहस्तप्रमाण इत्यर्थः । अथर्ववेदस्य रूपान्तरे पाठान्तरञ्च "श्वेतसाध्यवशी च । सजलमूर्द्धनिगालवः स्वदारजुष्टः । परस्त्रियाः स्तन्यपश्चेति" ॥ अथ वेदानां गोत्रदेवताछन्दांस्याह । ऋग्वेदस्यात्रेयसगोत्रम् । आत्रेयाः सगोत्राः समानगोत्रा यस्य तत् । अत्रिगोत्रऋग्वेद इत्यर्थः । सोमदैवत्यं यस्य तत् । गायत्रीछन्दो यस्य तत् । एवमग्रेऽपि व्याख्यातव्यम् । अथ यजुर्वेदस्य काश्यपगोत्रं इन्द्रदैवत्यं त्रिष्टुप्छन्दः । अथ सामवेदस्य भारद्वाजगोत्रं रुद्रदैवत्यं जगतीछन्दः । अथर्ववेदस्य वैतानगोत्रं ब्रह्मदैवत्यं अनुष्टुप्छन्दः । अथ चतुर्वेदस्य फलस्तुतिमाह । य इदमिति । यः पुमानिदं वेदानां नाम रूपं गोत्रं प्रमाणं छन्दो दैवत्यं वर्णं वर्णयति । नामादीनां द्वन्द्वैकवद्भावः । नाम ऋग्वेदादि १ रूपं पद्मपत्राक्षादि २ गोत्रमात्रेयादि ३ प्रमाणं पञ्चवितस्त्यादि ४ छन्दो गायत्र्यादि ५

दैवत्यं सोमादि ६ वर्णं श्वेतादि च ७ इत्यादि यो जानाति स अविद्यो विद्याहीनः सन्विद्यां लभते प्राप्नोति जातिस्मरोऽथ जायते । अथ जन्मान्तरे उत्तमजातिर्जायते पूर्वजातिं स्मरति । जन्मजन्म प्रतिजन्मवेदपारगः । वेदपाठी भवति । अव्रती व्रती भवति । व्रतहीनोऽपि व्रतवान्भवति व्रतम् ब्रह्मचर्यंहीनो ब्रह्मचर्यफलं प्राप्नोति । शौनकाचार्याय नमः । षट्शास्त्रिर्ग्रन्थसमाप्त्यर्थः । श्रवणपठनफलमाह । यइदमिति । यः पुमान् इदं चरणव्यूहं गर्भिणीं स्त्रियं श्रावयति सा स्त्री पुमांसं पुरुषलक्षणोपेतं पुत्रं जनयेत् यः श्राद्धकाले द्विजः इदं चरणव्यूहं पठेत् तच्छ्राद्धं पितृन्तर्पयतीत्यर्थः । य इदं प्रत्यहं पठेत्स पङ्क्तिपावनो भवति । यस्यां पङ्क्तौ द्विजा आस्ते तां सर्वां पङ्क्तिं पावयतीत्यर्थः । स च पुरुषः पुत्रान्प्रभृतीन्पुत्रादिकान्सप्त सप्त च पुनः सप्तवारानाद्यादीन्पित्रादींश्च आत्मानं चैव पञ्चदशपुरुषान्तारयति । यइदं पठेत्पर्वसु । अष्टमीभूतदर्शपौर्णमासीसङ्क्रान्तिषु च पठति सधूतपाप्मा दूरीकृतः पापं येन सः । स स्वर्गवासी पवित्रः सन् ब्रह्मभावाय गच्छति । "कर्मणि चेति" चतुर्थी । ब्रह्मभावं प्राप्नोतीत्यर्थः । 'ख' पुस्तके पाठविशेषो यथा । यो नामानि पुरा वेदा अमृतत्वं च गच्छति । लोकातीतं महाशान्तममृतत्त्वं च गच्छति । ओं नमः इत्याह भगवान्पाराशर्यः । ओं नमः परमर्षिभ्यो नमः । तं वेदशास्त्रपरिनिश्चितशुद्धबुद्धिं च-

मीश्वरं सुरमुनीन्द्रतनुं कवीन्द्रम् । कृष्णद्विपं कनक पिङ्गजटाकलापं व्यासं नमामि शिरसा तिलकं मुनीनाम् । १ । इति शौनकमहर्षिप्रणीतचरणव्यूहपरिशिष्टसूत्रभाष्ये चतुर्थपञ्चमखण्डव्याख्या समाप्ता ॥ त्रिदशाङ्कधरा १६१३ मिते गतेब्दे मधुमासे दशमीतिथौ सुधांशौ ॥ महिदासबुधः परोपकृत्यै चरणव्यूहमिदं व्यकारि काश्याम् ॥ १ ॥ विद्वद्भिः प्रार्थितेनेयम्महिदासद्विजन्मना ॥ चरणव्यूहविवृत्तिर्विधिना तु मया कृता ॥ २ ॥

तां संविशोध्य सहसा विदुषा पाठके न तु ।
युगलप्राक्किशोरेण स्थापिता विवृतिर्मुदा ॥ १ ॥
श्रीकाश्यां वैश्यवर्येण कन्नूलालाभिधेन वै ।
मुद्रिता सीरीजभागे थीबो शिष्टानुसारतः ॥ २ ॥

संवत् १९४५ श्रावणशुक्ल ७ सप्तम्यां भौमवासरे ॥

अथ शुद्धाशुद्धिसूचीपत्रम् ॥

शुद्ध	अशुद्धि	पङ्क्ति	पृष्ठ
प्रयोजनपूर्वकाणां	पूर्त्रकाणां	१	२
विभूतिर्या	विभतिर्या	१०	७
यकाराकारयोः	यकारवकारयोः	१४	१४
गृहीतौ	ग्रहीतौ	७	२३
अग्नेपूर्वं	पूवं	९	२५
भवति	भवति	१५	३६
इहाकारः	इहेकारः	४	५०
आविर्निरिङः	अविर्निरिङः	५	७३
सकारो ङकारमा	सकारमा	३	१०२
ओकारमितः	उकारमितः	५	१२०
व्याकरणस्य	व्यारणस्य	४	१२९
उदात्ताच्चानुदात्तं	उदात्तानुदात्तं	१७	१२९
परेश्च सिञ्चतेः	परेःसिञ्चतेः	१३	१३१
परीत्येतत्पदं	परोत्येतत्पदं	१३	१३४
अवग्रहवर्जिते	अवग्रवर्जिते	४	१५२
लक्ष्माघाघारा	लक्ष्माघारा	१	१६१
चतुर्थोऽध्यायः	तृतीयोऽध्यायः	१	१६५
औणादिवशप्रत्यये	औणादिकशप्रत्यये	९	१६५
जहीमोऽम्बिके	जहीमोम्बिके	८	१९९
स्पर्शैर्भवन्ति	स्पर्शैर्भवन्ति	१४	२००
त्वकारमात्रे	त्वकारात्रे	२४	२४४
विसर्जनीयाद्व्यञ्जनपरः । १०६ सू० ।	पङ्क्तौविस्मृतम्	१२	२५०
पुरोऽनुवाक्या	राऽनुवाक्या	८	२६५
श्रुतिधरा	श्रुतितरा	९	२६६
सु नः	पदद्वयं विस्मृतम्	७	२७१
प्रत्ययेषु	सुप्रत्ययेषु	१२	२७१
ऋलृवर्ण	ऋलृवर्णा	८	३२२
गोपतौ	गौपतौ	११	३३९
कनीनाम्	कनीनम्	२	३६४

शुद्ध	अशुद्धि	पङ्क्ति	पृष्ठ
अति	विस्मृतम्	३	६६६
पाङ्क्त्रानिति	पाङ्क्त्रामिति	३	३७५
पञ्चमोऽध्यायः ।	चतुर्थोऽध्यायः	नामपङ्क्तौ	३२९
,,	,,	,,	३३१
,,	,,	,,	३३३
,,	,,	,,	३३५
,,	,,	,,	३३५
,,	,,	,,	३३७
,,	,,	,,	३३९
,,	,,	,,	३४१
,,	,,	,,	३४३
साधारण्येन	साधारण्यंन	४	४१९
भाषिक	प्रतिज्ञा	नामपं.	४६५
भाषिक	प्रतिज्ञा	,,	४६७
भाषिक	प्रतिज्ञा	,,	४६९
आस्मिन्न्हव्या	आस्मिम्न्हव्या	५	४९२
आस्म्मिन्	आस्म्भिन्	५	४९२
अस्मिन्न्हव्या	आस्मिन्हव्या	६	४९२
शिखामुतक्रा	शिखामुत्क्वा	९	४९२
चतुरवसाना	चतुरवना	१६	४९७
वाशुस्त्रिवृदेका	वाशुस्त्रिवृदेका	२३	५०३
अनुवाकाध्यायपरिशिष्टम् ५०५	शुक्लयजुःप्रातिशाख्ये ५०४	नामपङ्क्तौ	५०५
अपाघं	अपाद्यं	१३	५०५
शुक्लयजुःप्रातिशाख्ये ५०६	ऋग्यजुःपरिशिष्टम् ५०५	नामपङ्क्तौ	५०६
५०७	५०६	,,	५०७
वैशम्पायन	वैसम्यायन	१२	४
श्रीण्यद्धा ऽऽर्या	श्रीण्यूर्द्धचार्या	१७	१७
कण्वाद्यास्तु	कण्वाद्यस्तु	१३	३७

इति शुभम् ।

00056118

Digitized with financial assistance from
Shri Brihad Bhartiya Samaj
on 11 March, 2020